संस्कृत दिवसः (4.5)

गतप्राया वर्षा

राष्ट्रम्

अस्यार्थः प्रागेव स्फुटीकृतः (ग) ।

तद्विशेषानाह—(घ)

२ । ते पुनः पञ्चधा मताः ।

पदे पदांशे (१) वाक्येऽर्थे सम्भवन्ति रसेऽपि यत् ॥ (ङ)

स्पष्टम् ।

(ग) अस्येति । प्रागेव प्रथमपरिच्छेद एव "दोषास्तस्यापकर्षकाः" इत्यस्य व्याख्यानावसरे कृताविवेत्यर्थः । तथा च दुःश्रवत्वादिषु साक्षाद् रसापकर्षकत्वाभावेऽपि परम्परया रसापकर्षकत्वान्नाव्याप्तिरित्याशयः । एतद्विवरणन्तु तवत्यटीकायामनुसन्धेयम् ।

(घ) तदिति । तेषां दोषाणां विशेषान् भेदान् ।

(ङ) दोषा हि प्रधानतस्त्रिधा सम्भवन्ति—शब्दगताः, अर्थगताः, रसगताश्च ; तत्र च शब्दगताः पुनस्त्रिधा—पदगताः, पदांशगताः, वाक्यगताश्चेति ; तत्साकल्येन सङ्कलयन्नाह ते पुनरिति । ते पुनर्दोषाः पञ्चधा मताः । यद्यस्मात्, पदे, पदांशे, वाक्ये, अर्थे, रसेऽपि च सम्भवन्ति । अत्रापि रसपदं विभावादीनां भावादीनाञ्चोपलक्षणम् । अतएव वक्ष्यति—"स्थायिसञ्चारिणोरपि" इत्यादि ।

तत्र सति सम्भवे स्वानेकदेशवृत्तित्वे सति एकमात्रपदप्रयोज्यदोषत्वं पददोषत्वम् । अत्र स्वपदं पदपरम् । तथा च "कार्त्तार्थ्यं यातु तन्वङ्गी कदानङ्गवशंवदा ।" अत्र हि सम्भवसत्त्वेन "र्त्ता" "र्थ्यम्" इति पदोभयदेशवृत्तित्वात् "कार्त्तार्थ्यम्" इत्येकमात्रपदप्रयोज्यत्वाच्च दुःश्रवत्वं नाम पददोषः । "कान्तमायान्तमालोक्य द्राग् गच्छति कृतस्मिता । इत्यादौ "द्राक्" इत्यत्र स्वरान्तराभावादनेकदेशासम्भवेऽपि न पदगतदुःश्रवत्वदोषहानिः । अत उक्तं सति सम्भव इति । स्वानेकदेशवृत्तित्वे सतीत्यभिधानात् "तद्गच्छ सिद्ध्यै कुरु देवकार्य्यम्" इत्यादौ पदांशगतदुःश्रवत्वदोषे नातिव्याप्तिः, "द्ध्यै" इत्यवस्थदोषस्य एकदेशवृत्तित्वेनानेकदेशवृत्तित्वाभावात् । एकमात्रेत्यभिधानाच्च "स्मरार्त्तान्धः कदा लप्स्ये कार्त्तार्थ्यं विरहे तव" इत्यादावनेकपदप्रयोज्यवाक्यदोषे नातिव्याप्तिः ।

पदगतकियदंशप्रयोज्यदोषत्वं पदांशदोषत्वम् । यथा—"पाणिः पल्लवपेलवः ।" अत्र पेलवशब्दस्य "पेल" इत्यंशेन अण्डकोषोपस्थापनात् पदांशगतोऽश्लीलतादोषः । न चैवं "कार्त्तार्थ्यम्" इत्यादावपि पदांशदोषप्रसङ्ग इति वाच्यं पददोषभिन्नत्वे सतीत्यस्य निवेशनीयत्वात् ।

वाक्यघटकानेकपदप्रयोज्यदोषत्वं वाक्यदोषत्वम् । यथा—"स्मरार्त्तान्धः कदा लप्स्ये कार्त्तार्थ्यं विरहे तव" इत्यादौ "स्मरार्त्तान्धः" "कार्त्तार्थ्यम्" इति वाक्यघटकानेकपदप्रयोज्यत्वात् वाक्यदोषत्वम् ।

अर्थप्रयोज्यदोषत्वम् अर्थदोषत्वम् । अर्थस्तु सामान्यात् शक्यो लक्ष्यो रसदोषाणां पृथगभिधानात् रसादिभिन्नो व्यङ्ग्यश्च ग्राह्यः । यथा—"विलोक्य वितते व्योम्नि विधुं मुञ्च रुषं प्रिये !" इत्यादौ विततशब्दशक्यार्थप्रयोज्यत्वादेवार्थदोषत्वम् ।

(१) तदंशे इति पाठः ।

तत्र—

३ । दुःश्रव-त्रिविधाश्लीलानुचितार्थाप्रयुक्तताः ।
ग्राम्याप्रतीत-(१) सन्दिग्ध-नेयार्थ-निहतार्थताः ॥
अवाचकत्वं क्लिष्टत्वं विरुद्धमतिकारिता ।
अविमृष्टविधेयांशभावश्च पदवाक्ययोः ॥
दोषाः केचिद्भवन्त्येषु पदांशेऽपि पदे परे (२) ।
निरर्थकासमर्थत्वे च्युतसंस्कारता तथा ॥ (च)

परुषवर्णतया श्रुतिदुःखावहत्वं दुःश्रवत्वम् (छ) । यथा—

रसव्रतिदोषत्वं रसदोषत्वम् । यथा—"तामुद्वीक्ष्य कुरङ्गाक्षीं रसो नः कोऽप्यजायत ।" इत्यादौ रसादिशब्दप्रयोज्यो दोषो रसादावेव वर्त्तत इति रसदोषत्वम् ।

किञ्च दोषाः पुनर्द्वेधा नित्या अनित्याश्चेति । तत्र सर्वदैव हेयस्वभावत्वं नित्यदोषत्वम् । यथा—च्युतसंस्कारता-हतवृत्ततादयः । ते हि सर्वेष्वेव रसेषु सर्वास्ववस्थासु च हेयाः, प्रतिप्रसवाभावात् । रसभेदेनावस्थाभेदेन वा हेयोपादेयोभयस्वभावत्वमनित्यदोषत्वम् । यथा—दुःश्रवतादयः । ते हि शृङ्गारादौ हेयाः, रौद्रादौ चोपादेयाः । अतएव नित्यदोषः अनित्यदोषश्चेति संज्ञापि सङ्गच्छते ।

(च) दोषाणां पदगतत्वादिकं व्यवस्थापयन् संख्यामाह दुःश्रवेति । "द्वन्द्वात् परः श्रूयमाणः शब्दः प्रत्येकमभिसम्बध्यते" इति न्यायानुसारेणात्रापि द्वन्द्वसमासात् परं तप्रत्ययार्थः सर्वत्र सम्बध्यते । तेन दुःश्रवता, त्रिविधा अश्लीलता, अनुचितार्थता, अप्रयुक्तता, ग्राम्यता, अप्रतीतता, सन्दिग्धता, नेयार्थता, निहतार्थता इति लभ्यते । अवाचकत्वम्, क्लिष्टत्वम्, विरुद्धमतिकारिता, अविमृष्टः अप्राधान्येन निर्दिष्टः विधेयांशः प्रधानभागो यत्र तस्य भावः अविमृष्टविधेयांशता विधेयाविमर्श इति यावत् । एते त्रयोदश दोषाः पदवाक्ययोरुभयोरेव पदे वाक्ये चेत्यर्थः भवन्तीति परेणान्वयः । एषु मध्ये केचिद्दोषाः पदांशेऽपि भवन्तीत्यन्वयः । तथा च दुःश्रवता, अश्लीलता, निहतार्थता, अवाचकता, नेयार्थता चेत्यादयो दोषाः पदांशेऽपि, सम्भवन्तीत्यर्थः । निरर्थकासमर्थयोर्भावौ ते तयोक्ते । तथा च निरर्थकता, असमर्थता, तथा च्युतसंस्कारता चेति परे अन्ये इमे त्रयो दोषाः पदे केवलपद एव सम्भवन्ति ।

(छ) क्रमादेषां लक्षणानि विवक्षुः प्रथमं दुःश्रवत्वलक्षणमाह परुषेति । परुषवर्णतया शब्दस्य कर्कशाक्षरतया श्रुतिदुःखावहत्वं कर्णावच्छेदेनात्मनि दुःखजनकत्वं दुःश्रवत्वम् । दुःखेन श्रूयत इति दुःश्रवः, दुःपूर्वकात् श्रुधातोः "ईषद्दुःसुषु—" इत्यादिना खल्, तस्य भावो दुःश्रवत्वम् । इदमेव श्रुतिकटुत्वमित्याख्यायते । अयञ्चानित्यो दोषः, "वक्तरि क्रोधसंयुक्ते" इत्यादिवक्ष्यमाणयुक्तेः प्रतिप्रसवात् ।

---

(१) ग्राम्योऽप्रतीत इति क्वचित् पाठः । (२) अपरे, परम् इति पाठभेदो ।

"कार्त्तार्थ्यं यातु तन्वङ्गी कदानङ्गवशंवदा ॥" (ज)

अश्लीलत्वं व्रीड़ा-जुगुप्साऽमङ्गलव्यञ्जकत्वात् त्रिविधम् (१) (झ)।

क्रमेणोदाहरणम्—

"दृप्तारिविजये राजन् ! साधनं सुमहत्तव ।" (ञ)

"प्रससार शनैर्वायुर्विनाशे तन्वि ! ते तदा ॥" (ट)

(ज) पदगतं दुःश्रवत्वमुदाहरति कार्त्तार्थ्यमिति ।

"रमणीरसि विन्यस्य सुपीनकठिनौ स्तनौ ।" इति मत्पूरितपूर्वार्द्धम् ।

एतत्प्रकरणीयोदाहरणानां प्रायेण ग्रन्थकृतैव सङ्कलितत्वादेवमेवान्यत्रापि मयैव यथाकथञ्चित् पूरणीयम् । अनङ्गवशंवदा मदनायत्ता इयं तन्वङ्गी कृशाङ्गी कदा कार्त्तार्थ्यं कृतार्थतां यातु कान्तसंसर्गात् प्राप्नोतु । अत्र कृतार्थस्य भावः कार्त्तार्थ्यमिति ष्यञ्प्रत्ययान्तपदस्य परुषवर्णद्वयतया रसास्वादेन सुखमनुभवितु-मिच्छोः श्रोतुः श्रवणमार्गेणात्मनि दुःखजननाद्वैमुख्यापादनेन रसप्रकर्षहानेर्दुःश्रवत्वम् ।

(झ) अश्लीलतां लक्षयन् तत्त्रैविध्यमप्याह अश्लीलत्वमिति । एतेन व्रीड़ाजुगुप्साऽमङ्गलान्यतमव्यञ्जक-शब्दत्वमश्लीलत्वमिति लक्षणमपि सूचितम् । तथा च श्रियं काव्यशोभां लाति ददातीति श्लीलः, श्रीशब्दोप-पदात् लाधातोः "आतोऽनुपसर्गात् कः" इति कप्रत्यये कपिलिकादित्वात् श्रीशब्दगतरेफस्य लत्वम् । न श्लीलः अश्लीलस्तस्य भावः अश्लीलत्वम् । तच्च त्रिविधम्—व्रीड़ाव्यञ्जकम्, जुगुप्साव्यञ्जकम्, अमङ्गलव्यञ्जकञ्चेति । तत्र व्रीड़ा लज्जा, जुगुप्सा च घृणा । अयमप्यनित्यो दोषः "सुरतारम्भगोष्ठ्यादावश्लीलत्वं तथा पुनः" इति वक्ष्यमाणात् ।

(ञ) पदगतं व्रीड़ाव्यञ्जकत्वरूपमश्लीलत्वमुदाहरति दृप्तेति ।

"तेनास्मिन् सार्वभौमोऽसि विनायासेन भूयसा ॥" इति मत्पूरितपरार्द्धम् ।

हे राजन् ! दृप्तानां गर्वितानाम् अरीणां शत्रूणां विजये तव सुमहत् साधनं सैन्यशस्त्राद्युपायो विद्यत इति शेषः ।

अत्र साध्यते सुरतमनेनेति व्युत्पत्त्या सुमहच्छब्दसहकृतेन साधनशब्देन विशालशिश्नरूपार्थस्यापि प्रतीतेर्व्रीड़ाव्यञ्जकतया सहृदयानां सहसैव लज्जासङ्कोचसम्पादनात् राजविषयकरतिभावस्य प्रकर्षहान्या अश्लीलत्वम् ।

(ट) पदगतं जुगुप्साव्यञ्जकम् अमङ्गलव्यञ्जकञ्चाश्लीलत्वमेकोदाहरणेनैवाह प्रससारेति ।

"स्वःप्रान्ते अरातीऽहं त्वां यदालिङ्गितुं गतः ।" इति मत्पूरितपूर्वार्द्धम् ।

हे तन्वि ! कृशाङ्गि ! तदा ते तव विनाशे अदर्शने लोकावलोकनभयात् पलायनसमये इत्यर्थः वायुः शनैर्मन्दं प्रससार वहति स्म ।

अत्र प्रथमपादे सृधातोः कर्त्तृतया अन्वितस्य वायुशब्दस्य पायु-वायुप्रत्यायकतया घृणाव्यञ्जकत्वाच्-

---

(१) त्रिधा इति पुस्तकान्तरे पाठः ।

अत्र साधन-वायु-विनाशशब्दा अश्लीलाः (ठ)।
"शूरा अमरतां यान्ति पशुभूता रणाध्वरे।" (ड)
अत्र पशुपदं कातर्य्यमभिव्यनक्तीत्यनुचितार्थत्वम् (ढ)।
अप्रयुक्तत्वं तथा प्रसिद्धावपि कविभिरनादृतत्वम् (ण)। यथा—

श्रोतुर्वैमुख्यापादनेन रसप्रकर्षहानेरश्लीलत्वम्। द्वितीये पादे तु विनाशशब्दस्य प्रसिद्धत्वान्मरणरूपामङ्गलार्थबोधकतया श्रोतुरुद्वेगजननादुन्मनस्कताजननेन रसप्रकर्षनाशादश्लीलत्वम्।

(ठ) ननूक्तोदाहरणेषु के नाम शब्दा दोषं प्रत्याययन्तीत्याह अत्रेति। अत्रेदमवधेयम्—स्थलविशेषं महदादिशब्दान्तरसहकृत एव साधनशब्दोऽश्लीलतामावहति। अन्यथा "अनुमितिः साधनं धूमः" इत्यादावपि अश्लीलतादोषप्रसङ्गः। वायु-वात-शब्दौ च स्वधातोः कर्त्तृवाचकाविव सन्तौ सर्वत्रैवाश्लीलतादोषं जनयतः; "वायुः सरति" "वातः सरति" इत्यादौ पायुवायुप्रतीत्या घृणाप्रतीतेः, "समीरणः सरति" "वायुर्वाति" इत्यादौ च तदप्रतीतेः। अतएव मेघदूते—

"तच्चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा"

इत्यत्रापि घृणाव्यञ्जकाश्लीलतादोष एव। येषां पुनरर्थान्तरेष्वत्यन्तप्रसिद्धिः, तेषां शब्दानामभिधाने कुत्रापि नाश्लीलतादोषः। यथा—भगवन्, भगवती, सुभगा, शिवलिङ्गम्, अमरकोषः, ब्रह्माण्डम् इत्यादौ। विनाशशब्दस्तु शब्दान्तरासहकृत एवामङ्गलं व्यनक्तीत्यदर्शनार्थं तत्प्रयोगमात्र एवाश्लीलतादोष इति।

(ड) पदगतामनुचितार्थतामुदाहरति शूरा इति। तल्लक्षणन्तु अतस्मिंस्तद्धर्म्मबोधकत्वमिति। एवञ्च विरुद्धमतिकारितादोषे नातिव्याप्तिरपीति ध्येयम्। अयन्तु नित्य एव दोषः, प्रतिप्रसवाभावेन सर्वदैव हेयत्वात्।

"स्वर्गेऽमरभूतास्तु पशुतां यन्ति दुर्बलाः॥" इति मत्पूरितपरार्द्धम्।

शूरा वीराः रणाध्वरे युद्धयज्ञे पशुभूतास्छागादिपशव इव छिन्नकण्ठाः सन्तः अमरतां देवत्वं यान्ति प्राप्नुवन्ति स्वर्गं गच्छन्तीत्यर्थः।

(ढ) लक्ष्ये उक्तविधाभिप्रेतलक्षणं सङ्गमयितुमाह अत्रेति। अकातरेषु शूरेषु कातर्य्याभिव्यञ्जनाच्छ्रोतुर्वैमनस्यजनकतया रसप्रकर्षनाशादिति भावः। एवम्—

"प्रज्वलज्जलधारावन्निपतन्ति शरास्तव।"

इत्यादौ अप्रज्वलन्त्यां जलधारायां प्रज्वलनबोधकत्वादनुचितार्थत्वम्।

"दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैःशिरसां सतीव॥"

इत्यादौ असमर्थनीये उत्प्रेक्षितार्थे समर्थनीयत्वबोधकत्वादनुचितार्थत्वम्। अनयोरनुचितार्थत्वन्तु ग्रन्थकृतैव वक्ष्यते।

(ण) अप्रयुक्ततां लक्षयति अप्रयुक्तत्वमिति। तथा प्रसिद्धावपि कोषादिषु तेन प्रकारेण प्रसिद्धिसत्त्वेऽपि। अनादृतत्वमनादरेण स्वस्ववाक्ये अपरिगृहीतत्वम्। अयञ्चानित्यो दोषः, "स्यातामदोषौ श्लेषादौ निहतार्थाप्रयुक्तते।" इति वक्ष्यमाणात्।

"भाति पद्मः सरोवरे ॥" (त)

अत्र पद्मशब्दः पुंलिङ्गः (थ)।

ग्राम्यत्वं यथा—"कटिस्ते हरते मनः ॥" (द)

अत्र कटिशब्दो ग्राम्यः (ध)।

अप्रतीतत्वमेकदेशमात्रप्रसिद्धत्वम् (न)। यथा—

"योगेन दलिताशयः ।" (प)

अत्र योगशास्त्र एव वासनार्थं आशयशब्दः (फ)

(त) पदगतामप्रयुक्ततामुदाहरति भातीति ।

"दलमूलसुरक्तोष्ठो भ्रमद्भ्रमरलोचनः ।

नवीनमधुनः पूर्णो भाति पद्मः सरोवरे ॥" इति मत्पूरितविपादः श्लोकः ।

(थ) लक्ष्ये लक्षणं योजयितुमाह अत्रेति । पुंलिङ्गः पद्मशब्दोऽप्रयुक्ततादोषमावहतीति वाक्यशेषः । "वा पुंसि पद्मम्" इत्यमरकोषादौ पद्मे पुंलिङ्गस्य प्रसिद्धिसत्त्वेऽपि कविभिरप्रयुक्तत्वेनानादृतत्वात् तत्प्रयोगस्य प्रयोजनानुसन्धानव्यग्रतया सभ्यानां रसस्य विलम्बेन प्रतीतेः प्रकर्षहानेरिति भावः ।

(द) ग्राम्यतादोषमाह ग्राम्यत्वमिति । तल्लक्षणन्तु अशिक्षितसाधारणप्रयोज्यत्वम् । इह हि पदं त्रिविधम्—नागरमुपनागरं ग्राम्यञ्चेति । तत्र अतिशिक्षितजनप्रयोज्यं नागरम्, अर्द्धशिक्षितजनप्रयोज्यमुपनागरम्, अशिक्षितजनप्रयोज्यञ्च ग्राम्यम् । तत्र नागरोपनागरपदप्रयोगे शृङ्गारादीनां गूढ़तास्थितेश्चमत्कारितास्थितिः, ग्राम्यपदप्रयोगे तु तेषां गूढ़ताया अस्थितेश्चमत्कारिताया अप्यस्थितिरिति रसप्रकर्षहानेर्ग्राम्यताया दोषत्वम् । अतएवायमनित्यो दोषः, अधमप्रयोगे ग्राम्यताया एव योग्यत्वात् "ग्राम्यत्वमधमोक्तिषु" इति वक्ष्यमाणात् ।

"राकाविभावरीकान्त-संक्रान्तद्युति ते मुखम् ।

तपनीयशिलाशोभा कटिस्ते हरते मनः ॥" इति काव्यप्रकाशे श्लोकसमुदायः ।

(ध) लक्ष्ये उक्तविधमभिप्रेतलक्षणं सङ्गमयितुमाह अत्रेति । ग्राम्यः कटिशब्दो ग्राम्यतादोषं घटयतीति वाक्यशेषः ।

(न) अप्रतीततादोषं लक्षयति अप्रतीतत्वमिति । एकदेशमात्रे प्रसिद्धत्वं न पुनः सर्वत्रेत्यर्थः ; एषोऽप्यनित्यो दोषः । "गुणः स्यादप्रतीतत्वं ज्ञत्वश्चेद्वक्तृवाच्ययोः ।" इति वक्ष्यमाणात् ।

(प) पदगतामप्रतीततामुदाहरति योगेनेति ।

"तीर्थेन परिधौतात्मा योगेन दलिताशयः ।

तपसा क्षपितक्लेशो मुक्त्यासन्नो महाशयः ॥" इति मत्पूरितविपादः श्लोकः ।

योगेन चित्तवृत्तिनिरोधेन दलितो नाशितः आशयो मिथ्याज्ञानजन्यः संस्कारविशेषो येन सः ।

(फ) लक्ष्ये लक्षणं सङ्गमयति अत्रेति । योगशास्त्र एव पातञ्जलदर्शनादावेव वासनार्थं आशयशब्दो विद्यत इति शेषः । तथा च पातञ्जलसूत्रम्—"क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ।"

"आशीःपरम्परां वन्द्यां कर्णे कृत्वा कृपां कुरु॥" (ब)

अत्र "वन्द्याम्" इति किं वन्दीभूतायाम् उत वन्दनीयामिति (१) सन्देहः (भ)।

नेयार्थत्वं रूढ़िप्रयोजनाभावादशक्तिकृतं लक्ष्यार्थप्रकाशनम् (म)।

यथा—

"कमले चरणाघातं मुखं सुमुखि! तेऽकरोत्॥" (य)

अत्र चरणाघातेन निर्ज्जितत्वं लक्ष्यम् (र)।

अत्रायमभिप्रायः—योगशास्त्रानभिज्ञानां योगेनेत्यादौ आशयशब्दस्य वासनार्थानवबोधात् रसस्येवाप्रतीतिरिति। अतएवास्य अप्रतीतत्वमिति संज्ञा।

(ब) पदगतां सन्दिग्धतामुदाहरति आशीरिति। तल्लक्षणन्तु वक्तृतात्पर्य्यगतसन्देहविषयत्वम्। अयञ्चानित्यो दोषः, "सन्दिग्धत्वं तथा व्याजस्तुतिपर्य्यवसायि चेत्" इति वक्ष्यमाणेन प्रतिप्रसवात्।

"आलिङ्गितस्तत्र भवान् सम्पराये जयश्रिया।" इति काव्यप्रकाशे पूर्व्वार्द्धम्।

आशीःपरम्पराम् आशीर्वादसमूहम्। कर्णे कृत्वा आकर्ण्य।

(भ) अत्रेति वन्दीभूतायां व्यक्तौ युद्धे विजित्याङ्गीकृते जने। वन्दनीयां चारुत्वेन प्रशंसनीयाम्। सन्देहः सन्दिग्धतादोषमावहतीति शेषः। तथा च प्रकरणादिनियमाभावात् वन्दीजनस्य वक्तृत्वे कृपाया अधिकरणे सप्तम्येकवचनान्तस्य वन्दीशब्दस्य वन्द्यामिति रूपं स्यात्, किञ्चित्प्रार्थिनी जनस्य वक्तृत्वे तु आशीःपरम्परामित्यस्य विशेषणत्वेन घ्यण्प्रत्ययान्तवन्दधातुनिष्पन्नस्य वन्द्याशब्दस्य द्वितीयैकवचने वन्द्यामिति रूपं स्यात्। इत्थञ्च सन्देहेन श्रोतुरेकतरनिश्चयाकुलतया राजविषयकरतिभावस्य विलम्बेन प्रतीतेर्दोषत्वम्।

(म) नेयार्थत्वं लक्षयति नेयार्थत्वमिति। रूढ़िप्रयोजनाभावात् निर्द्दोषलक्षणाया हेतुभूतयो रूढिप्रयोजनयोरसत्त्वाद्धेतोः अशक्तिकृतं कवेश्छन्दःपूरणाद्यसामर्थ्यप्रयुक्तम्। अयं खलु नित्यो दोषः, प्रतिप्रसवाभावेन सर्व्वदैव हेयत्वात्। नेयः कविना बलात् प्रापणीयः अर्थस्तादृशलक्ष्यार्थो यस्य तस्य भावो नेयार्थत्वम्।

(य) पदगतं नेयार्थत्वमुदाहरति कमल इति।

"रजन्यां मुद्रितावस्थे सदा प्रस्फुटसुन्दरम्।" इति मत्पूरितपूर्व्वार्द्धम्।

हे सुमुखि! ते तव मुखं कर्त्तृ कमले पद्मे चरणाघातं पदप्रहारमकरोत्।

(र) अत्रेति। निर्ज्जितत्वं मुखकर्त्तृकं पद्मस्य विजितत्वम्, लक्ष्यं लक्ष्यार्थो नेयार्थत्वदोषमावहतीति शेषः। तथा चात्र मुखस्य चरणाभावात्तदाघातासम्भवेन मुख्यार्थानवबोधः, रूढ़िप्रयोजनयोरभावेन च लक्षणाया उत्थानासम्भवाल्लक्ष्यार्थस्याप्रतीतिरिति रसप्रतीतेरेवाभावाद्दोष इति भावः

अथ निर्ज्जितत्वातिशय एव प्रयोजनमस्तीति चेत्, तर्हीदमुदाहरणम्—

"तपर्त्तुपूर्त्तावपि मेदसां भरा विभावरीर्भिव भराम्बभूविरे।"

---

(१) वन्दनीयायामिति पाठान्तरम्।

निहतार्थत्वम् उभयार्थस्य शब्दस्याप्रसिद्धेऽर्थे प्रयोगः (ल)। यथा—
"यमुनाशम्बरमम्बरं व्यतानीत्।" (व)
शम्बरशब्दो दैत्ये प्रसिद्धः, इह तु जले निहतार्थः (श)।
"गीतेषु कर्णमादत्ते।" (ष)
अत्र आङ्पूर्वो दाञ्धातुर्दानार्थे अवाचकः (स)। यथा वा—
"दिनं मे त्वयि सम्प्राप्ते ध्वान्तच्छन्नापि यामिनी॥" (ह)

अत्र हि मेदसां भरा इत्यनेन अतिवृहत्त्वं लक्ष्यते। न चात्रापि वृहत्त्वातिशय एव प्रयोजनमिति वाच्यं मेदसां भरा इत्यत्र तदप्रतीतेः। वस्तुतस्तु—

"स्वसङ्केतप्रक्लृप्तार्थं नेयार्थमिति कथ्यते।"

इति सरस्वतीकण्ठाभरणोक्तमेव युक्तिसहम्, नेयार्थ इति शब्देनापि तथैव प्रतीतेः।

(ल) निहतार्थतां लक्षयति निहतार्थत्वमिति। उभयार्थस्य यत्किञ्चिदर्थद्वयवाचकस्य। तथा च निहतः प्रसिद्धेनार्थेन तिरोहितः अर्थः अप्रसिद्धोऽर्थो यस्य तस्य भावो निहतार्थत्वम्। अयन्त्वनित्यो दोषः, 'स्यातामदोषौ श्लेषादौ निहतार्थाप्रयुक्तते।" इति वक्ष्यमाणेन प्रतिप्रसवात्।

(व) पदगतां निहतार्थतामुदाहरति यमुनेति।

"नवनीरदकान्तिनाम्बुकेलि-प्रहतानां व्रजसुन्दरीकुचानाम्।
मदपुञ्जभरेण मोदमान यमुनाशम्बरमम्बरं व्यतानीत्॥" इति श्लोकसमुदायः।

यमुनाशम्बरं यमुनाजलम् अम्बरं व्यतानीत् आकाशं व्याप्तवत्।

(श) शम्बरेति। दैत्ये मदनेन व्यापादिते दैत्यविशेषे। जले जलविषये निहतार्थः प्रसिद्धेन दैत्यार्थेन तिरोहितार्थः। अतएव निहतार्थतां दोषमावहतीत्यर्थः। अत्रायमाशयः—प्रसिद्धेन दैत्यार्थेन अप्रसिद्धस्य जलार्थस्य तिरोधानादप्रतीत्या रसस्यैवाप्रतीतिर्दोष इति।

(ष) पदगतमवाचकत्वमुदाहरति गीतेष्विति। तल्लक्षणन्तु सर्वथैव विवक्षितार्थानवबोधकत्वम्। नेयार्थत्वे यथाकथञ्चिल्लक्षणया विवक्षितार्थबोधनात् निहतार्थत्वे च अप्रसिद्धस्यापि विवक्षितार्थस्य कदाचिद्बोधनयोग्यत्वान्नातिव्याप्तिः। अतएवायं नित्यदोषः, प्रतिप्रसवाभावेन सर्वदैव हेयत्वात्।

"दूरादुत्तरतस्तीरात् समायातस्त्वरैष्वयम्।
गीतेषु कर्णमादत्ते प्रागुत्कर्णस्तुरङ्गमः॥" इति मत्पूरितविपादः श्लोकः।

(स) अत्रेति। दानार्थे अर्पणार्थविषये अवाचकः ग्रहणार्थस्यैव बोधनात् वाचकताशक्तिहीनः अभिधाशक्तिहीन इति यावत्। अतएव 'आदत्ते' इति पदमवाचकत्वदोषमावहति विवक्षितार्थाबोधनेन रसादिप्रतीतेरेवाभावादिति भावः।

(ह) ननूपसर्गाणां निपातत्वेनानेकार्थत्वात् "पद्ममारचयति" इत्यादिवदत्रापि आङुपसर्गस्य सम्यगर्थो भविष्यतीत्याह यथा वेति।

"प्राणेश! त्वदसम्प्राप्तौ मध्याह्नोऽपि महानिशा।" इति मत्पूरितपूर्वार्द्धम्।

अत्र दिनमिति प्रकाशमयार्थे अवाचकम् (च)।

क्लिष्टत्वमर्थप्रतीतेर्व्यवहितत्वम् (क)। यथा—

"चीरोदजावसतिजन्मभुवः प्रसन्नाः ।" (ख)

अत्र चीरोदजा लक्ष्मीस्तस्या वसतिः पद्मं तस्य जन्मभुवो जलानि इत्यर्थप्रतीतौ व्यवधानम् (१) (ग)।

"भूतयेऽस्तु भवानीशः ।" (घ)

अत्र भवानीशशब्दो भवान्याः पत्यन्तरप्रतीतिकारित्वाद्विरुद्धमतिकृत् (ङ)।

(च) अत्रेति। अवाचकमिति। दिनशब्दस्य सूर्य्यकिरणावच्छिन्नकालवाचित्वादिति भावः। काव्यप्रकाशकारोऽपि "हा धिक् सा किल तामसी" इत्यादिकमुदाहृत्य "दिनमिति प्रकाशमयमित्यर्थे अवाचकम्" इत्याह स्म।

(क) क्लिष्टत्वदोषं लक्षयति क्लिष्टत्वमिति। अर्थप्रतीतेर्व्यवहितत्वम् अनेकपदप्रतीतिव्यवधानाद्विलम्बेन विवक्षितार्थस्य प्रतीतत्वम्। अतो न निहतार्थत्वादिष्वतिव्याप्तिः। तेषु हि अप्रसिद्धत्वादिभ्य एव विलम्बेनार्थप्रतीतिः, न पुनरनेकपदप्रतीतिव्यवधानात्। अयन्तु नित्यो दोषः, अनुकरणं विना समाधानानिर्देशेन सर्वदैव हेयत्वात्।

(ख) पदगतं क्लिष्टत्वदोषमुदाहरति चीरोदजेति।

"ताः क्वाप्यहो घनघटा विलयं प्रयाता, ज्योत्स्नाश्चिराय मुदिताश्च विलासशीलाः।
चीरोदजा-वसति जन्मभुवः प्रसन्ना, अद्यानुरञ्जयति भास्वति दक्षिणाशाम् ॥"

इति ग्रन्थान्तरे श्लोकसमुदायः।

(ग) अर्थप्रदर्शनपूर्वकं लक्ष्ये लक्षणं सङ्गमयति अत्रेति। अर्थप्रतीतेर्व्यवधानादेव विलम्बेन रसादेः प्रतीत्या तत्प्रकर्षहानेर्दोष इति भावः।

(घ) पदगतं विरुद्धमतिकारितादोषमुदाहरति भूतय इति। तल्लक्षणन्तु असम्भावितार्थप्रत्यायकत्वम्। अतएवायमपि नित्यो दोषः समाधानाभावात्।

"प्रभूतभूतिभूषाढ्यो भूतेशो भूतभावनः।
भूतयेऽस्तु भवानीशो भवतां भोगिभूषणः ॥" इति मत्पूरितत्रिपादं पद्यम्।

(ङ) अत्रेति। अत्रायमाशयः—भवस्य पत्नीत्यर्थे "भव-शर्व-रुद्र-मृडाचार्य्याणामानन्तश्च" इत्यनेन आनङ्-प्रत्ययश्चेति भवानी, तस्या ईशः पतिरिति भवानीशशब्दो देवदत्तस्य पत्न्याः पतिरित्यादिवत् भवान्या अपि असम्भावितं पत्यन्तरं प्रत्याययतीति विरुद्धमतिकृत्, तेन च श्रोतुर्वैमनस्येन रसप्रकर्षहानेर्दोष इति।

---

(१) इत्यर्थप्रतीतौ व्यवधानमिति पाठः क्वचिन्न दृश्यते।

विधेयस्यांशस्य विमर्शाभावेन गुणीभूतत्वम् अविमृष्टविधेयांशत्वम् (१) (च)। यथा—

"स्वर्गग्रामटिका-विलुण्ठन-वृथोच्छूनैः किमेभिर्भुजैः ॥" (छ)

अत्र वृथात्वं विधेयम्, तच्च समासे गुणीभावादनुवाद्यत्वप्रतीतिकृत् (ज)।

यथा वा—"रक्षांस्यपि पुरःस्थातुमलं रामानुजस्य मे ॥" (झ)

अत्र रामस्येति वाच्यम् (ञ)।

यथा वा—"आसमुद्रक्षितीशानाम् ।" (ट)

अत्रासमुद्रमिति वाच्यम् [ठ]।

(च) अविमृष्टविधेयांशभावं लक्षयति विधेयस्येति। विधेयस्यांशस्य प्रधानस्य भागस्य, विमर्शाभावेन, प्रधानतया निर्द्देशाभावेन, गुणीभूतत्वम् अप्रधानीभूतत्वम्। अयमेव विधेयाविमर्श इत्याख्यायते। प्रधानस्याप्राधान्येन निर्द्देशो विधेयाविमर्श इत्यर्थः। एष च नित्यो दोषः प्रतिप्रसवाभावेन सर्वदैव हेयत्वात्। अस्य तु समासेन प्रधानस्याप्रधानतया निर्द्देशे पदगतत्वम्, उद्देश्यविधेययोः पौर्वापर्य्यविपर्य्यये तु वाक्यगतत्वमित्युन्नेयम्।

(छ) तत्र पदगतं विधेयाविमर्शमुदाहरति स्वर्गेति। समस्तपद्यन्तु प्रागेव (७म पृष्ठे) प्रदर्शितं व्याख्यातञ्च।

(ज) उक्तोदाहरणे दोषं समर्थयति अत्रेति। विधेयम् "उच्छूनत्वं वृथा" इत्यभिप्रायेण उच्छूनत्वमुद्दिश्य वृथात्वमेव विधातव्यम्। गुणीभावादुच्छूनत्वांशे विशेषणीभूतत्वात्, अनुवाद्यत्वप्रतीतिकृत् तस्यैवोद्देश्यत्वबोधजनकम्। तथा च तात्पर्य्यविषयीभूतान्वयानुपपत्त्या रसप्रकर्षहानेर्दोष इति भावः।

(झ) विधेयाविमर्शस्यैव प्रकारान्तरमुदाहरति यथा वेति।

"विशालाकृतिघोराणि भीषणास्त्रधराणि च।" इति मत्पूरितपूर्वार्द्धम्।

रामानुजस्य मेऽपि पुरः रक्षांसि स्थातुमलं समर्थानि ? नैवेत्यर्थः।

(ञ) अत्रेति। वाच्यं वक्तुमुचितम्। अत्रेदमवधेयम्—अनेकदुर्जयराक्षसवधेन राम एव राक्षसहन्तृतया अतिप्रसिद्धः, तेन च "रामस्य योऽनुजस्तस्यापि मम पुरतो राक्षसाः स्थातुमलं भवेयुः ?" इति हि सदर्पं वक्तुर्लक्ष्मणस्याभिप्रायः, स च 'रामानुजस्य' इति समासकरणान्नोपपद्यते, उपपद्यते तु 'रामस्य' इति सविभक्तिपदनिर्द्देशात् तथैव शब्दस्वभावात्।

(ट) अस्यैवापरं प्रकारमाह आसमुद्रेति।

"सोऽहमाजन्मशुद्धानाम् आफलोदयकर्म्मणाम्।
आसमुद्रक्षितीशानाम् आनाकरथवर्त्मनाम् ॥" इति रघुवंशे श्लोकसमुदायः।

(१) अविमृष्टविधेयांशत्वम् इति माव: पाठः क्वचित्।

यथा वा—

"यत्र ते पतति सुभ्रु ! कटाक्षः, षष्ठबाण इव पञ्चशरस्य ।" [ड]

अत्र षष्ठ एव इत्युत्प्रेक्ष्यम् [ढ] ।

यथा वा—"अमुक्ता भवता नाथ ! मुहूर्त्तमपि सा पुरा ।" [ण]

अत्र अमुक्तेत्यत्र नञः प्रसज्यप्रतिषेधत्वमिति विधेयत्वमेवोचितम् [त] । यदाहुः—

"अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥ [थ]

(ढ) अत्रेति । आसमुद्रमिति । असमस्तमेव पदं वाच्यं वक्तव्यमित्यर्थः । अत्रायमाशयः—सूर्य्यवंशीयानामाधिपत्यं समुद्रेष्वप्यासीदिति हि वक्तुरभिप्रायः, स तु "आसमुद्रक्षितीशानाम्" इत्युक्तौ नोपपद्यते, आसमुद्रं या क्षितिस्तस्या ईशा इति प्रतीत्या क्षितिमात्रस्यैवेशत्वप्रतीतेः । "आसमुद्रं क्षितीशानाम्" इत्युक्तौ तु समुद्रेष्वपि तेषां राजत्वं स्फुटमेव प्रतीयत इति । तेन राजत्वान्वयि प्रधानान्तरीभूतानां समुद्राणां समासे गुणीभावात् विधेयाविमर्श इति ।

(ड) प्रकारान्तरेण विधेयाविमर्शमेवोदाहरति यथा वेति ।

"गाढविद्धहृदयो विवशः सन् त्वद्वशत्वमुपयाति स एव ॥" इति मत्पूरितपराद्र्धम् ।

हे सुभ्रु ! पञ्चशरस्य मदनस्य षष्ठबाण इव ते तव कटाक्षो यत्र पतति ।

(ढ) अत्रापि दोषं समर्थयितुमाह अत्रेति । इत्युत्प्रेक्ष्य इत्यमुत्प्रेक्षणं कार्त्तव्यम् । अत्रायमभिप्रायः—न खलु मदनस्य शरमात्रस्यैवासम्भवः, अपि तु पञ्चशरत्वात् षष्ठस्यैव शरस्यासम्भवः ; तेन तदीयशरगतषष्ठत्वमेवोत्प्रेक्षणीयम् ; तच्च 'षष्ठबाण इव' इत्युक्तौ नोपपद्यते, षष्ठत्वस्य समासे गुणीभावेन इवार्थान्वयायोग्यत्वात् तत्पुरुषसमासस्योत्तरपदप्राधान्येन षष्ठत्वविशिष्टबाणत्वस्यैव तदन्वयसम्भवात्, स च वक्तुर्नाभिमत इति ।

नन्वेतेषूदाहरणेषु वक्तुरभिमतसम्बन्धानुपपत्त्या अभवन्मतसम्बन्धतादोष एवेति चेन्न प्रधानस्याप्रधानतया निर्द्देशेनाभिमतसम्बन्धानुपपत्तौ विधेयाविमर्शः, हेत्वन्तरेणाभिमतसम्बन्धानुपपत्तौ तु अभवन्मतसम्बन्धता इति नियमस्य सामान्यविशेषन्यायेन सुवचत्वात् । प्रकारान्तरन्तु वक्ष्यते ।

(ण) अभवन्मतसम्बन्धतादोषसंशयाविषयीभूतं विधेयाविमर्शस्य शुद्धोदाहरणं दर्शयितुमाह यथा वेति ।

"चिराय प्रवसन्नस्मिन् यां क्षणं न स्मरस्यपि ।" इति मत्पूरितपूर्वार्द्धम् ।

(त) उदाहृते विधेयाविमर्शमुपपादयितुमुपक्रमते अत्रेति । प्रसज्यप्रतिषेधत्वमिति । क्रियान्वयित्वादिति भावः । विधेयत्वमेवोचितमिति । नञर्थे प्रतीतिपर्य्यवसानादित्याशयः ।

(थ) अप्राधान्यमिति । यत्र स्थले विधेर्नञ्भिन्नपदार्थस्य अप्राधान्यं नञर्थापेक्षया अप्रधानताप्रतीतिः, प्रतिषेधे नञर्थे च प्रधानता अपरपदार्थापेक्षया प्रधानताप्रतीतिः, तत्र असौ नञ् प्रसज्यप्रतिषेधः

यथा—"नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः ।" (द)

उक्तोदाहरणे तु तत्पुरुषसमासे गुणीभावे नञः पर्य्युदासतया निषेधस्य विधेयतयाऽनवगमः [१] [ध]

यदाहुः—"प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्य्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥" [न]

तेन—"जुगोपात्मानमत्रस्तो भेजे धर्म्ममनातुरः ।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत् ॥" [प]

अत्यन्ताभावबोधक इत्यर्थः । फलितार्थमाह क्रिययेति । यत्र स्थले क्रियया क्रियापदेन सह नञ् साक्षादन्वेतीति शेषः, तत्र असौ नञ् प्रसज्यप्रतिषेध इत्यर्थः ।

(द) प्रसज्यप्रतिषेधार्थकनञ उदाहरणमाह यथेति । विक्रमोर्वश्याम्—

"सुरधनुरिदं दूराकृष्टम्, न तस्य शरासनम् ।
अयमपि पटुर्धारासारः, न बाणपरम्परा
कनकनिकषस्निग्धा विद्युत्, प्रिया न ममोर्वशी ॥" इति शेषपादत्रयम् ।

तथा च अयमाकाशे दृश्यमानो नवजलधर एव सन्नद्धो वायुना स्तूपीकृतः, किन्तु दृप्तनिशाचरः कश्चिद्दर्पितराक्षसो न भवति । अत्र नञर्थे निशाचराभावे प्रधानताप्रतीतिः भवतीत्यध्याहर्त्तव्यया क्रियया च सह नञोऽन्वयात् प्रसज्यप्रतिषेधतेति भावः ।

(ध) अर्थं तावता किमित्याह उक्तोदाहरण इति । उक्तोदाहरणे अनुक्तेत्यादौ । तत्पुरुषसमासे नञ्तत्पुरुषसमासे । पर्य्युदासतया गुणीभावेन पर्य्युदासवत् प्रतीयमानतया, निषेधस्य क्रियया सहैवान्वयात् वस्तुतः प्रसज्यप्रतिषेधस्य, विधेयतयाऽनवगमः प्राधान्येनाप्रतीतिः । अतएव प्रधानस्याप्राधान्येन निर्द्देशाद्विधेयाविमर्श इति भावः ।

(न) पर्य्युदासस्यैवाप्रधानत्वेनानुवाद्यता सम्भवतीत्याह यदाहुरिति । प्रधानत्वमिति । यत्र स्थले विधेर्नञ्व्यतिरिक्तपदार्थस्य प्रधानत्वं प्रधानतया प्रतीतिः, प्रतिषेधे नञर्थे च अप्रधानता अपरपदार्थापेक्षया अप्रधानताप्रतीतिः ; तत्र स नङ् पर्य्युदासः अन्योन्याभावबोधक इत्यर्थः, विज्ञेयः शब्दस्वभावादिति भावः । अत्रापि फलितार्थमाह यत्रेति । यत्र स्थले उत्तरपदेन क्रियाभिन्नस्वसमभिव्याहृतपरवर्त्तिपदार्थेन सह नञ् अन्वेतीत शेषः, तत्रैव पर्य्युदास इत्यर्थः । क्रियेतरपदार्थान्वयी नञ् पर्य्युदास इति तु तत्त्वम् । "रात्रौ श्राद्धं न कुर्वीत" इत्यत्र तु नञर्थस्य-रात्रावित्यनेनैवान्वय इति लौगाक्षिशूलपाणि-रघुनन्दनादयः । अस्य विस्तरस्तु नञ्वादादावनुसन्धेयः ।

(प) जुगोपेति । रघुवंशप्रथमसर्गे दिलीपवर्णनमिदम् । स दिलीपः अत्रस्तः अभीतः सन्नेव आत्मानं जुगोप रक्षितवान्, न पुनरपर इव भयावस्थायामेव, "आत्मानं सततं गोपायीत" इति श्रुतेरित्यभिप्रायः, अनातुरः अनार्त्तः सन्नेव धर्म्मं भेजे कर्त्तव्यबुद्ध्या सिषेवे, न पुनरन्य इव रोगाद्युपशमेच्छयेति भावः ।

---

(१) विधेयताऽनवगम इति पाठान्तरम् ।

अत्र अत्रस्ततायनूद्य आत्मगोपनाद्येव विधेयमिति नञः पर्य्युदासतया गुणभावो युक्तः [फ] ।

ननु "अश्राद्धभोजी ब्राह्मणः" "असूर्य्यम्पश्या राजदाराः" इत्यादिवत् "अमुक्ता" इत्यत्रापि प्रसज्यप्रतिषेधो भवतीति चेत् [ब] न, अत्रापि यदि भोजनादिरूपक्रियांशेन नञः सम्बन्धः स्यात्, तदैव तत्र प्रसज्यप्रतिषेधत्वं वक्तुं शक्यम् । न च तथा, विशेष्यतया प्रधानेन तद्भोज्याद्यर्थेन कर्त्त्रंशेनैव नञः सम्बन्धात् (भ) ।

यदाहुः—"श्राद्धभोजनशीलो हि यतः कर्त्ता प्रतीयते ।
न तद्भोजनमात्रन्तु कर्त्तरीनेर्विधानतः ॥" इति (म) ।

अगृध्नुः अलोभी सन्नेव अर्थान् करस्वरूपधनानि आददे प्रजाभ्यो गृहीतवान्, न पुनरितर इव लुब्धभावेनेत्याशयः । असक्तः अतत्परः सन्नेव सुखम् अन्वभूत् अनुभूतवान्, न पुनरपर इवासक्तचेता एवेत्यभिप्रायः । अत्र नञर्थस्य वस्तादिक्रियेतरपदार्थैरन्वयात् पर्य्युदासत्वम् ।

(फ) अत्रेति । अनूद्य कविना उद्देश्यतावच्छेदकीकृत्य आत्मगोपनाद्येव विधेयं विहितमिति शेषः । इति हेतोः । गुणभावो नञ्तत्पुरुषसमासेनाप्रधानीभावः । अतएवात्रापि न विधेयाविमर्शाशङ्केति भावः ।

(ब) समासेन गुणीभूतस्यापि नञर्थस्य प्रसज्यप्रतिषेधत्वमाशङ्कते नन्विति । भवतीति । अत्रायमाशयः—श्राद्धं श्राद्धीयान्नं न भुङ्क्ते इत्यश्राद्धभोजी, सूर्य्यं न पश्यन्तीत्यसूर्य्यम्पश्याः, अनयोर्यथा समासेन गुणीभूतस्यापि नञः क्रियया सहान्वयात् प्रसज्यप्रतिषेधत्वम्, तथा अमुक्तेत्यत्रापि समासेन गुणीभूतस्यापि नञः क्रियया सहान्वयात् प्रसज्यप्रतिषेधत्वमेवास्तामिति कुतो विधेयाविमर्शप्रसङ्ग इति ।

(भ) समाधत्ते नेति । अत्रापि, न केवलम् 'अमुक्ता' इत्यत्र "अश्राद्धभोजी" "असूर्य्यम्पश्याः" अनयोरपि । भोजनादीत्यादिपदेन दर्शनग्रहणम् । अत्र तयोः "अश्राद्धभोजी" "असूर्य्यम्पश्याः" इत्यनयोः । तथा—भोजनादिरूपक्रियांशेन नञः सम्बन्धः, न च नैवेत्यर्थः । अत्रायं सरलार्थः—अश्राद्धभोजीत्यादौ अस्त्यंशद्वयम्— विशेषणत्वादप्रधानभूता भोजनादिक्रिया, विशेष्यत्वात् प्रधानभूतस्तत्कर्त्ता च ; तत्र नञोऽन्वयसन्देहे "अव्यक्तं प्रधानगामि" इति न्यायात् प्रधानभूतेन कर्त्रा सहैव नञोऽन्वय इति क्रियेतरपदार्थान्वयित्वात् पर्य्युदासत्वमेवेति । कातन्त्रवृत्तिकृतो दुर्गसिंहस्य मते तु "असूर्य्यम्पश्या राजदाराः" इत्यत्र नञः प्रसज्यप्रतिषेधत्वमेव । तथा चोक्तम्—"दृशिना सह सम्बद्धस्य नञः सूर्य्येण सह समासो गमकत्वात्" इति ।

(म) अत्र वैयाकरणसंवादमाह यदाहुरिति । श्राद्धेति । अत्रावधारणे हिशब्दः, अन्वयश्चास्य कर्त्तेत्यनेन । तथा च कर्त्तरि इनेर्विधानतः "व्रताभीक्ष्ण्ययोश्च" इत्यनेन कर्त्तरि णिनिप्रत्ययविधानात् श्राद्धभोजनशीलः कर्त्तैव प्रतीयते "यो यत्र प्रत्ययो जातः" इत्यादिन्यायादिति भावः, तु किन्तु तद्भोजनमात्रं केवलं श्राद्धभोजनं न प्रतीयते ; अतः प्रधानतया कर्त्रैव सह नञः सम्बन्ध इति शेषः ।

"असुक्ता" इत्यत्र तु (१) क्रिययैव सह सम्बन्ध इति दोष एव (य)।
एते च क्लिष्टत्वादयः समासगता एव पददोषाः [र]।
वाक्ये दुःश्रवत्वं यथा—[ल]
"स्मरार्त्तान्धः कदा लप्स्ये कार्त्तार्थ्यं विरहे तव॥" [व]
"कृतप्रवृत्तिरन्यार्थे कविर्वान्तं समश्नुते।" [श]
अत्र जुगुप्साव्यञ्जकाश्लीलता [ष]।

(य) उपसंहरन्नाह असुक्तेति। क्रिययैव सह सम्बन्ध इति। पदान्तरान्वयासम्भवात् "सा भवत्-कर्त्तृकलोचनाभाववती" इति प्रसज्यप्रतिषेधतया प्रतीतिश्चेति भावः। दोष एव विधेयाविमर्शदोष एव। प्रधानस्य नञर्थस्य समासेनाप्रधानतया निर्द्देशादित्याशयः।

(र) व्यवस्थापयति एते चेति। आदिशब्देन विरुद्धमतिकारिता विधेयाविमर्शयोर्ग्रहणम्। समासगता एव समासयोग्यपदवृत्तय एव तत्तद्दोषघटने पदान्तरसापेक्षपदप्रयोज्या एव, न पुनर्निरर्थकत्वादि-वत् पदान्तरनिरपेक्षपदप्रयोज्या अपीत्यर्थः। यथाश्रुतार्थकल्पने तु "क्षीरोदजाया वसते जन्मभुवः प्रसन्नाः" इत्यत्र क्लिष्टत्वम् "भवान्या ईशः" इत्यत्र विरुद्धमतिकारिता च न स्यात्। न स्यादेवेति चेन्न तत्तद्दोषयथा-वस्थानेव सत्त्वात्। केवलं विधेयाविमर्श एव पदप्रयोज्यः समासगत एव सम्भवति। तत्राप्युक्तविवरणे नानुपपत्तिरिति बोध्यम्। एतेन "विना समासं तेषामसम्भवात्" इति रामचरणोक्तं हेयम्।

(ल) वाक्यस्य पदघटितत्वेन पददोषज्ञानानन्तरमेव वाक्यदोषजिज्ञासोपस्थितेः "पदे पदांशे वाक्येऽर्थे" इत्युक्तक्रममुल्लङ्घ्य प्रथमं वाक्यदोषमेवाह वाक्य इति। वाक्यघटकीभूतानेकपदप्रयोज्यत्वं वाक्यदोषत्वमिति लक्षणमत्रानुसन्धेयम्।

(व) स्मरेति। "अन्यकर्म्मशतापेत उपैतत्वद्गतस्मृतिः।" इति मत्पूरितपूर्वार्द्धम्।

स्मरार्त्तान्धः कामपीड़या दिग्विदिग्ज्ञानशून्यः अहं तव विरहे कदा कार्त्तार्थ्यं त्वत्सङ्गमलाभेन कृता-र्थतां लप्स्ये प्राप्स्यामि।

हन्त! कार्त्तार्थ्यशब्दोऽयं काव्यप्रकाशाद्यलङ्कारग्रन्थकृतां दुःश्रवतादोषोदाहरणवेलायामद्वितीयमेव शरणम्। अत्र "स्मरार्त्तान्धः" "कार्त्तार्थ्यम्" इति पदद्वयस्यैव परुषवर्णतया श्रुतिदुःखावहत्वाद्वाक्यगतदुःश्रवत्वम्।

(श) वाक्यगतां जुगुप्साव्यञ्जकाश्लीलतामुदाहरति कृतेति।

"संग्रहीतुं चिरेणापि सन्तमर्थमशक्नुवन्।" इति मत्पूरितपूर्वार्द्धम्।

अन्यार्थे अन्यकविसंगृहीते भावे शब्दे च कृता प्रवृत्तिर्ग्रहणेच्छा येन स तादृशः कविः वान्तं समश्नुते अन्योद्गीर्णं ग्रहीतुमुद्युञ्जानः अन्योद्गीर्णग्रहणोद्योगी कुक्कुरादिरिव निन्दनीयो भवतीत्यर्थः।

(ष) अत्रेति। "वान्तं समश्नुते" इति पदद्वयस्य "अन्योद्गीर्णं श्लेष्मादिकं खादति" ईदृशार्थ-प्रत्यायकत्वादिति भावः। अत्र "समश्नुते" इति पदस्य स्वतो जुगुप्साव्यञ्जकत्वाभावेऽपि वान्तविषयकभोजन-

---

(१) इत्यत्र च इति क्वचित् पाठः।

"उद्यत्कमललौहित्यैर्वक्राभिर्भूषिता तनुः।" (ख)

अत्र कमललौहित्यं पद्मरागः, वक्राभिर्वामाभिरिति नेयार्थता (छ)।

"धम्मिल्लस्य न कस्य प्रेच्य निकामं कुरङ्गशावाच्याः।

रज्यत्यपूर्वबन्धव्युत्पत्तेर्मानसं शोभाम्॥" (च)

बोधकत्वाज्जुगुप्साव्यञ्जकत्वमिति वाक्यदोषत्वमेव। अथ तर्हि "प्रससार शनैर्वायुः" इति प्राक्प्रदर्शितपदगतजुगुप्साव्यञ्जकाश्लीलतोदाहरणेऽपि "वायुः प्रससार" इति समुदितस्यैव पदद्वयस्य जुगुप्साव्यञ्जकत्वाद्वाक्यदोषत्वमेव स्यादिति चेत्—

"तेऽन्यैर्वान्तं समश्नन्ति परोत्सर्गञ्च भुञ्जते। इतरार्थग्रहे येषां कवीनां स्यात् प्रवर्त्तनम्॥"

इति काव्यप्रकाशोदाहृतमेवावाप्युदाहरणम्। अत्र हि वान्तं परोत्सर्गञ्च इति पदद्वयस्यैव कृतवमित्यक्तपुरीषयोः प्रत्यायकतया वाक्यगतजुगुप्साव्यञ्जकाश्लीलता।

वाक्यगतव्रीडाव्यञ्जकाश्लीलता यथा सरस्वतीकण्ठाभरणे—

"विद्यामभ्यसतो रात्रावर्ति या भवतः प्रिया। वनितागुह्यकेशानां कथं ते पेलवं धनम्॥"

अत्र "वनितागुह्यकेशानाम्" इत्यत्र "वनिताया गुह्ये गुप्तस्थाने ये केशास्तेषाम्" इत्यर्थस्य "पेलवं धनम्" इत्यत्र च "पेलस्य अण्डकोषस्य वन्धनम्" इत्यर्थस्य च प्रत्यायकत्वाद्वाक्यगतव्रीडाव्यञ्जकाश्लीलता।

वाक्यगतामङ्गलव्यञ्जकाश्लीलता यथा तत्रैव—

"प्रवासयति या कान्तं वसन्ते गृहसंस्थितम्। विना शपथदानेन पिशाची सा न चाङ्गना॥"

अत्र संस्थित-विनाशशब्दाभ्यां मरणार्थस्य, पिशाचीशब्देन च प्रेतार्थस्य सूचनादमङ्गलव्यञ्जकाश्लीलता।

अनुचितार्थतादीनां वाक्यगतत्वे ग्रन्थकृदनुक्तान्युदाहरणानि परस्तात् प्रदर्शयिष्यन्ते।

(ख) वाक्यगतां नेयार्थतामुदाहरति उद्यदिति।

"नवैश्च चम्पकदलैः कुन्तलाः समलङ्कृताः॥" इति मत्पूरितपराद्धम्।

वक्राभिर्वामाभिः स्त्रीभिः, उद्यत्कमललौहित्यैः प्रकाशमानपद्मरागैः करणैः, तनुः शरीरं भूषिता अलङ्कृता।

(छ) नेयार्थतां समर्थयितुमाह अत्रेति। इति कविना अभिप्रेतमतो नेयार्थतेत्यर्थः। अत्रायमाशयः—कमललौहित्यपदेन पद्मगतरक्तिमैवाभिधीयते, न पुनः पद्मरागाख्यो मणिविशेषः; वक्राशब्देन च कुटिलैवोच्यते न तु वामा। तेन च रूढिप्रयोजनरसत्त्वेऽपि कविना कमललौहित्यपदेन पद्मरागमणिरूपार्थस्य वक्राशब्देन च वामारूपार्थस्य अशक्तिवशेन लक्ष्यतया प्रकाशनात् अनेकपदगतत्वाच्च वाक्यगता नेयार्थता।

(च) वाक्यगतं क्लिष्टत्वमुदाहरति धम्मिल्लस्येति। कुरङ्गशावस्य हरिणशिशोः अक्षिणी इव अक्षिणी यस्यास्तस्याः, अपूर्वा चमत्कारिणी बन्धव्युत्पत्तिर्बन्धनपरिपाटी यस्य तादृशस्य धम्मिल्लस्य संयतकेशकलापस्य शोभां प्रेक्ष्य दृष्ट्वा विद्यमानस्य कस्य जनस्य मानसं चित्तं कर्त्तृ, निकामं पर्य्याप्तं यथा स्यात्तथा न रज्यति अनुरक्तं न भवति? अपि तु सर्वस्यैव रज्यतीत्यर्थः।

अत्र धम्मिल्लस्य शोभां प्रेक्ष्य कस्य मानसं न रज्यतीति सम्बन्धः क्लिष्टः (क)।

"न्यक्कारो ह्ययमेव मे यदरयः" (१) इति (ख)।

अत्र च अयमेव न्यक्कार इति न्यक्कारस्य विधेयत्वं विवक्षितम्। तच्च शब्दरचनावैपरीत्येन गुणीभूतम् (ग)। रचना च पदद्वयस्य विपरीतेति वाक्यदोषः (घ)।

"आनन्दयति तु नेत्रे योऽसौ सुभ्रु ! समागतः ॥" (ङ)

इत्यादिषु "यत्तदोर्नित्यः सम्बन्धः" इति न्यायादुपक्रान्तस्य यच्छब्दस्य निराकाङ्क्षत्वप्रतिपत्तये तच्छब्दसमानार्थतया प्रतिपाद्यमाना इदमेतददःशब्दा

(क) उदाहृते क्लिष्टतादोषमुपपादयितुमाह अत्रेति। सम्बन्धः अन्वयः, क्लिष्टः क्लेशसाधितः। तथा चात्र परस्परान्वयिपदानामत्यन्तदूरवर्त्तित्वात् विशेषानुसन्धानेनैव तेषां परस्परमन्वयो ज्ञायत इति तद्विलम्बाद् रसस्यापि विलम्बेनैव प्रतीतेः अपकर्षकान्या क्लिष्टत्वदोषः, स चानेकपदगतत्वाद्वाक्यगत इत्याशयः।

(ख) वाक्यगतं विधेयाविमर्शमुदाहरति न्यक्कार इति।

(ग) उक्तदोषमुदाहृते प्रतिपादयितुमाह अत्र चेति। विधेयत्वं विवक्षितमिति। तस्यैव परप्रतीति-विषयत्वादिति भावः। तच्च न्यक्कारगतविधेयत्वञ्च शब्दानां न्यक्कार इत्यादीनाम्, रचनाया विन्यासस्य, वैपरीत्येन गुणीभूतम् अप्रधानीभूतम्। तथा च शाब्दबोधे प्राक्प्रतीतिविषयत्वमुद्देश्यत्वं परं प्रतीतिविषयत्वञ्च विधेयत्वम्; तेन "यः सुन्दरः स आगतः" "पर्वतो वह्निमान्" इत्येवं शब्दविन्यासेनैव व्युत्पत्त्यनुसारात् साहजिकी प्रतीतिरुत्पद्यते; "स आगतो यः सुन्दरः" "वह्निमान् पर्वतः" इत्यं वैपरीत्येन शब्दविन्यासे तु उद्देश्यताविधेयतयोः प्रतीतिर्वैपरीत्यमिव जायते। अतएवोक्तं मीमांसकैः—

"अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्। नह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति ॥"

ग्रन्थकारोऽप्यनुपदमेवाह—"इदमेतददःशब्दा विधेया एव भवितुं युक्ताः" इति। ततश्चात्र उद्देश्य-प्रत्यायकस्य यत्पदस्य परं सन्निवेशात् विधेयप्रत्यायकस्य इदम्पदस्य च पूर्वं विन्यासात् इदम्पदप्रत्यायितन्यक्कार-गतविधेयत्वस्य गुणीभूतत्वेन प्रतीयमानतया विधेयाविमर्शदोषः। केचित्तु विधेयबोधकन्यक्कारपदस्य प्राङ्-निर्देशात् उद्देश्यबोधकेदम्पदस्य च परं निर्देशाद्विधेयाविमर्श इति व्याचक्षते।

(घ) ननु तथात्वेऽपि कथं वाक्यदोषत्वमित्याह रचनेति। पदद्वयस्य इदम्पदस्य यत्पदस्य च। रचना विन्यासः। तथा चानेकपदप्रयुक्तत्वाद्वाक्यदोषत्वमिति भावः।

(ङ) प्रकारान्तरेण विधेयाविमर्शमुदाहरति आनन्दयतीति।

"कान्तिमं कान्तिकौं बिभ्रत् कुमुदिन्याः शशी यथा।" इति मत्पूरितपूर्वार्द्धम्।

(च) उदाहृते दोषं समर्थयितुमाह इत्यादिष्विति। नित्यः परस्परापेक्ष्यापेक्षित्वरूपो नियतः।

---

(१) यत् इतिमात्रः पाठः क्वचित्;

विधेया एव भवितुं युक्ताः । अत्र तु यच्छब्दनिकटस्थतया अनुवाद्यत्वप्रतीतिकृत् (च) ।

तच्छब्दस्यापि यच्छब्दनिकटस्थितस्य प्रसिद्धपरामर्शित्वमात्रम् (छ) । यथा—

"यः स ते नयनानन्दकरः सुभ्रु ! स आगतः ॥" (ज)

यच्छब्दव्यवधानेन स्थितास्तु निराकाङ्क्षत्वमवगमयन्ति (झ) । यथा—

"आनन्दयति ते नेत्रे योऽधुनाऽसौ समागतः ॥" (ञ)

एवमिदमादिशब्दोपादानेऽपि (ट) ।

यत्र च यत्तदोरेकस्यार्थत्वं संभवति, तत्रैकस्योपादानेऽपि निरा-

---

उपक्रान्तस्य उद्देश्यत्वेनाभिहितस्य । निराकाङ्क्षत्वप्रतिपत्तये आकाङ्क्षापूरणायेत्यर्थः, तच्छब्दसमानार्थतया तच्छब्दवत् प्रक्रान्तपदार्थोपस्थापकतया प्रतिपाद्यमानाः प्रयुज्यमानाः । विधेया एव विधेयबोधका एव, न पुनरुद्देश्यबोधका इति एवशब्दार्थः । अत्र तु "आनन्दयति ते नेत्रे" इत्यादौ तु । अनुवाद्यत्वप्रतीतिकृत् उद्देश्यताबोधजनकः, अदःशब्द इति शेषः । तेनात्रापि "हे सुभ्रु ! योऽसौ समागतः, स ते तव नेत्रे आनन्दयति" इत्यर्थप्रत्यायकतया विधेयताबोधकतच्छब्दस्य उद्देश्यताबोधकयच्छब्दात् प्रागेवाध्याहर्तव्यत्वात् "न्यक्कारो ह्ययमेव मे यदरयः" इत्यादिवदेव विधेयाविमर्श इति भावः ।

(छ) इदानीं विधेयाविमर्शस्य प्रसङ्गाप्रसङ्गप्रदर्शनाय शब्दविन्यासप्रकारविशेषेणैव अर्थविशेषप्रतीतिरिति प्रदर्शयितुमाह तच्छब्दस्यापीति । न केवलमुदाहृते अदःशब्दस्य, तच्छब्दस्यापीत्यर्थः । अत्र तच्छब्द एतदिदंशब्दयोरप्युपलक्षणम् । प्रसिद्धपरामर्शित्वमात्रं केवलप्रसिद्धार्थोपस्थापकत्वम्, न पुनर्यच्छब्दाकाङ्क्षापूरकत्वमपीत्यर्थः ।

(ज) य इति । "वसन्तविलसत्कान्तिश्चलत्कुञ्चितकुन्तलः ।"

इति मत्पूरितपूर्वार्द्धम् । एवं परत्रापि ।

अत्र यच्छब्दनिकटस्थितस्य 'स' इत्यस्य प्रसिद्धोपस्थापकत्वम्, द्वितीयस्य तु 'स' इत्यस्य विधेयबोधकत्वम् तेनात्र उद्देश्यविधेयबोधकयोर्यच्छब्दतच्छब्दयोर्यथानियममवस्थानान्न विधेयाविमर्शः ।

(झ) यच्छब्देति । स्थिता इदमेतददःशब्दा इति सम्बन्धः । निराकाङ्क्षत्वं यच्छब्दस्येत्यर्थः ।

(ञ) आनन्दयतीति । अधुना यः समागतः, असौ ते नेत्रे आनन्दयतीत्यन्वयः । तेनात्र य इत्यतः असावित्यस्य अधुनापदेन व्यवधानात्, असावित्यदःशब्देन य इति यच्छब्दस्य निराकाङ्क्षत्वमवगमितम् । विधेयोपस्थापकस्य असावित्यस्य परमेव पाठादत्रापि न विधेयाविमर्शः ।

(ट) एवमिति । तत्र इदंशब्दोपादाने यथा—

"योऽयं ते नयनानन्दकरः स समुपागतः ।"

"आनन्दयति ते नेत्रे योऽधुनाऽयमुपागतः ।"

एवमेतच्छब्दोपादानेनाप्युदाहार्यम् ।

काङ्क्षत्वप्रतीतिरिति न क्षतिः [ठ]। तथाहि, यच्छब्दस्योत्तरवाक्यगतत्वेनोपादाने सामर्थ्यात् पूर्ववाक्ये यच्छब्दस्यार्थत्वम् [ड]। यथा—

"आत्मा जानाति यत् पापम्—"। (ढ)

एवम्—"यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे।
भास्वन्ति रत्नानि महौषधीश्च—" (ण)।

इत्यादावपि (त)।

तच्छब्दस्य प्रक्रान्तप्रसिद्धानुभूतार्थत्वे यच्छब्दस्यार्थत्वम् (थ)। क्रमेण यथा— "स हत्वा वालिनं वीरस्तत्पदे चिरकाङ्क्षिते।
धातोः स्थान इवादेशं सुग्रीवं सन्न्यवेशयत्॥" (द)

(ठ) "यत्तदोर्नित्यः सम्बन्धः" इति न्यायस्य व्यभिचारं दर्शयितुमाह यत्र चेति। एकस्य एकतरस्य। आर्थत्वं तात्पर्य्येणैव बोध्यत्वम्।

(ड) उक्तमर्थमुपपादयितुमाह तथाहीति। सामर्थ्यात् यत्तदोः परस्परापेक्ष्यापेक्षित्वरूपसम्बन्धस्य नित्यत्वात्। आर्थत्वं तात्पर्य्यत एव बोध्यत्वम्।

(ढ) आत्मेति। "आत्मा जानाति यत् पापं प्रश्नो नान्यत्र युज्यते।
स्वाङ्गे व्रणस्य रूढस्य स्वयं वेत्ति हि वेदनाम्॥" इति सत्पूरितपरपादत्रयम्।

आत्मा जानाति, यत् पापं वर्त्तते। अत्र पूर्ववाक्ये तच्छब्दस्य तात्पर्य्यलभ्यत्वादुत्तरवाक्यगतयच्छब्दस्य निराकाङ्क्षत्वम्।

(ण) यच्छब्दस्य पद्यान्तररूपोत्तरवाक्यगतत्वेनोपादानेऽपि पद्यान्तरीयतच्छब्दस्यार्थत्वं प्रदर्शयितुमाह एवमिति। "पृथूपदिष्टां दुदुहुर्धरित्रीम्॥" इति शेषपादः।

दोहदक्षे दोहननिपुणे मेरौ सुमेरुपर्वते दोग्धरि दोहनकर्त्तरि स्थिते सति सर्वशैलाः यं हिमालयं वत्सं परिकल्प्य पृथुना राज्ञा उपदिष्टां धरित्रीं पृथिवीं भास्वन्ति दीप्तिमन्ति रत्नानि महौषधीश्च दुदुहुः। दुहिर्द्विकर्मकः। इति कुमारसम्भवे।

एतदादावुत्तरवाक्ये यच्छब्दस्य स्थितत्वात् "अस्त्युत्तरस्यां दिशि देवतात्मा" इत्यादौ पूर्ववाक्ये "स अस्ति" इति तच्छब्दस्यार्थत्वम्।

(त) इत्यादाविति। इत्यादावपि एवं तच्छब्दस्यार्थत्वमिति पूर्वेणान्वयः।

(थ) एवं तच्छब्दस्यार्थत्वं प्रदर्श्य यच्छब्दस्याप्यार्थत्वं विषयभेदेन प्रदर्शयितुमाह तच्छब्दस्येति। प्रक्रान्तः प्रकरणवशात् प्राप्तः, प्रसिद्धो विख्यातः अनुभूतः स्वयमनुभवविषयीकृतश्च अर्थो यस्य तस्य भावस्तत्त्वं-स्तथाभूते सति आर्थत्वं तात्पर्य्यलभ्यत्वम्। तच्छब्दस्य प्रस्तुतार्थवाचित्वे प्रसिद्धार्थवाचित्वे स्वयमनुभूतार्थ-वाचित्वे च यच्छब्दस्य अर्थवशाल्लभ्यत्वमिति सरलार्थः।

(द) तत्र प्रथमं तच्छब्दस्य प्रस्तुतार्थवाचित्वे यच्छब्दनिराकाङ्क्षत्वमुदाहरति स इति। श्लोकोऽयं

स वः शशिकलामौलिस्तादात्म्यायोपकल्पताम् (१) ॥" (ध)

तामिन्दुसुन्दरमुखीं हृदि चिन्तयामि ॥" (न)

यत्र च यच्छब्दनिकटस्थितानामपीदमादिशब्दानां भिन्नलिङ्गविभक्तित्वम्, तत्रापि निराकाङ्क्षत्वमेव (प)। क्रमेण यथा—

विभाति मृगशावाक्षी येदं भुवनभूषणम् ॥" (फ)

इन्दुर्विभाति यस्तेन दग्धाः पथिकयोषितः ॥" (ब)

रघुवंशद्वादशसर्गे । स वीरो रामचन्द्रः, वालिनं हत्वा सुग्रीवमेव चिरकाङ्क्षिते तस्य वालिनः पदे राजत्वे धातोर्हनुमत्प्रभृतिः, स्थाने आदेशं वधादिकमिव सुग्रीवं सम्प्रवेशयत् स्थापितवान् ।

अत्र स इति तच्छब्दः प्रस्तुतरामरूपार्थवाचित्वात् यच्छब्दं नाकाङ्क्षति ।

(ध) तच्छब्दस्य प्रसिद्धार्थवाचित्वे यच्छब्दनिराकाङ्क्षत्वं दर्शयति स व इति ।

"अनन्तभोगयुक्तोऽपि भोगहीनो भवात्मकः ।" इति मत्पूरितपूर्वार्द्धम् ।

स प्रसिद्धः शशिकलामौलिश्चन्द्रशेखरः शिवः, वो युष्माकं तादात्म्याय सायुज्यमुक्तये उपकल्पतां प्रभवतु ।

अत्र स इति तच्छब्दः प्रसिद्धार्थवाचित्वात् यच्छब्दं नापेक्षते !

(न) तच्छब्दस्य स्वयमनुभूतार्थवाचित्वे यच्छब्दनिराकाङ्क्षत्वमाह तामिति ।

"आलिङ्गनेन गलितामिव कोमलाङ्गीं स्पर्शैः सुधामिव तनौ परिलिम्पयन्तीम् ।

आनन्दमन्दमधुरं ब्रुवतीञ्च बालाम्—" इति मत्पूरितपूर्वपादत्रयम् ।

अत्र तामिति तच्छब्दस्य स्वयमनुभूतार्थवाचित्वात् यच्छब्दं नापेक्षते ।

(प) "तच्छब्दस्यापि यच्छब्दनिकटस्थितस्य प्रसिद्धपरामर्शित्वमात्रम्" "एवमिदमादिशब्दोपादानेऽपि" इत्येताभ्यां यच्छब्दनिकटस्थितानामिदमादिशब्दानां केवलं प्रसिद्धपरामर्शित्वमेव न पुनराकाङ्क्षापूरकत्वमपीति पूर्वमभिहितम्, इदानीं तदत्ययं दर्शयितुमाह यत्र चेति । आदिशब्देन तदेतददःशब्दानां ग्रहणम् । निराकाङ्क्षत्वमेव यच्छब्दाकाङ्क्षापूरकत्वमेव ।

(फ) यच्छब्दनिकटस्थितस्य भिन्नलिङ्गस्य इदंशब्दस्य यच्छब्दाकाङ्क्षापूरकत्वं दर्शयितुमाह विभातीति ।

"अनन्यसमलावण्या मुनीनामपि मोहिनी ।" इति मत्पूरितपूर्वार्द्धम् ।

अत्र "भुवनभूषणम्" इति प्रक्रंस्यमानलिङ्गभागितया इदमिति क्लीवलिङ्ग इदंशब्दः 'या' इत्यस्य भिन्नलिङ्गत्वादाकाङ्क्षां पूरयति ।

(ब) यच्छब्दनिकटस्थितस्य भिन्नविभक्तिकस्य तच्छब्दस्य यच्छब्दाकाङ्क्षापूरकत्वमुदाहरति इन्दुरिति ।

"अमन्दनयनानन्दकरः शीतकरोऽप्ययम् ।" इति मत्पूरितपूर्वार्द्धम् ।

य इन्दुर्विभाति तेन इन्दुना पथिकयोषितः प्रवासिनां वनिताः दग्धास्तापिताः ।

अत्र 'यः' इति प्रथमान्तयच्छब्दस्य तेनेति तच्छब्दस्तृतीयान्तत्वेन भिन्नविभक्तिकत्वादाकाङ्क्षां पूरयति ।

---

(१) उपकल्प्यताम् इति क्वचित् पाठः ।

क्वचिदनुपात्तयोर्द्वयोरपि सामर्थ्यादवगमः (भ)। यथा—

"न मे शमयिता कोऽपि भारस्येत्युर्वि ! मा शुचः ।
नन्दस्य भवने कोऽपि बालोऽस्त्यद्भुतपौरुषः ॥" (म)

अत्र योऽस्ति स ते भारस्य शमयितेति बुध्यते (य)।

"यद्‌यद्विरहदुःखं मे तत् को वाऽपहरिष्यति ॥"

इत्यत्रैको यच्छब्दः साकाङ्क्ष इति न वाच्यम् (र)। तथाहि यद्-यदित्यनेन येन केनचिद्रूपेण स्थितं सर्वात्मकं वस्तु विवक्षितम्। तथाभूतस्य तस्य तच्छब्देन परामर्शः (ल)।

एवमन्येषामपि वाक्यगतत्वेनोदाहरणं बोध्यम् (व)।

एवमेतददःशब्दयोरप्युदाहार्यम् ।

(भ) क्वचिदिति । अनुपात्तयोर्वाक्ये अप्रयुक्तयोः, द्वयोरपि यच्छब्दतदाद्यन्यतमशब्दयोः सामर्थ्यात्तात्पर्यवशात् ।

(म) नेति । कंसभारार्द्दितां पृथिवीं प्रति ब्रह्मण आश्वासोक्तिरियम् । "कोऽपि जनः मे मम भारस्य शमयिता कंसादीनां व्यापादनेन विलोपयिता नास्ति" इति कृत्वा हे उर्वि ! पृथिवि ! मा शुचः शोकं मा कृथाः । येन हि नन्दस्य भवने अद्भुतपौरुषः कोऽपि बाली बालकोऽस्ति ।

(य) अत्रेति । बुध्यते वक्तृत्वात्पर्यवशादिति भावः ।

(र) आशङ्काविशेषमपनेतुमाह यद्‌यदिति ।

"सखि ! कान्ते पदप्रान्ते प्रणिपत्य गतेऽधुना ।" इति मत्पूरितपूर्वार्द्धम् ।

इत्यत्रेति । एकेन तच्छब्देन एकस्यैव यच्छब्दस्य आकाङ्क्षापूरणादिति भावः ।

(ल) उपपादयति तथाहीति । सर्वात्मकं सर्वप्रकारम्, वस्तु दुःखरूपः पदार्थः विवक्षितं वक्त्रा इति शेषः । तथाभूतस्य सर्वात्मकस्य सर्वप्रकारस्य, तस्य दुःखरूपवस्तुनः, परामर्शः आकाङ्क्षापूरकत्वेन सम्बन्धः ।

क्वचित् सर्वात्मकतया उपस्थापकस्य एकस्यैव यच्छब्दस्य तच्छब्दद्वयेनाकाङ्क्षापूरणम् । यथा—

"ते ते सत्पुरुषाः परार्थघटकाः स्वार्थस्य बाधेन ये ।"

नैषधे—"तदहं विदधे तथा तथा दमयन्त्याः सविधे तव स्तवम् ।
हृदये निहितस्तया भवान् अपि नेन्द्रेण यथापनीयते ॥"

शान्तिशतके च—"तत्तत्कर्म्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वञ्चितम् ।"

एवमविवक्षायान्तु यत्तदोर्द्वयोरपि वीप्सितत्वम् । यथा रघुवंशे—

"सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥"

(व) एवमिति । तत्र वाक्यगतमनुचितार्थत्वं यथा काव्यप्रकाशे—

"कुविन्दस्त्वं तावत् पटयसि गुणग्राममभितो यशो गायन्त्येते दिशि दिशि च नग्नास्तव विभो!।
शरज्ज्योत्स्नागौरस्फुटविकटसर्वाङ्गसुभगा तथापि त्वत्कीर्त्तिर्भ्रमति विगताच्छादनमिह॥"

अत्र पद्ये कुविन्दस्तन्तुवायस्त्वं गुणग्रामं तन्तुसमूहं पटयसि पटं करोषि, इत्याद्यर्थस्य प्रत्यायकतया स्तूयमानस्य राज्ञो निन्दाप्रत्यायनादनुचितार्थत्वम्।

वाक्यगता अप्रयुक्तता यथा तत्रैव—

"स रातु वो दुश्च्यवनो भावुकानां परम्पराम्। अनेडमूकताद्यैश्च द्यतु दोषैरसम्मतान्॥"

अत्र रातीतिदाने, दुश्च्यवनशब्दस्य इन्द्रे, भावुकशब्दस्य मङ्गले, अनेडमूकशब्दयोर्बधिरे, दोधातोश्च खण्डने प्रसिद्धिसत्त्वेऽपि कविभिरनादृतत्वादप्रयुक्तता।

वाक्यगता ग्राम्यता यथा सरस्वतीकण्ठाभरणे—

"कन्ये! कामयमानं मां न त्वं कामयसे कथम्।"

अत्र कामयमानमिति कामयसे इति च शब्दौ ग्राम्यौ।

वाक्यगता अप्रतीतता यथा तत्रैव—

"किं भाषितेन बहुना रूपस्कन्धस्य सन्ति मे न गुणाः। गुणनान्तरीयकञ्च प्रेमेति न तेऽस्त्युपालम्भः॥"

अत्र रूपस्कन्धनान्तरीयकशब्दौ बौद्धमीमांसादर्शनयोरेव विषयप्रपञ्चान्तर्गतार्थयोः प्रसिद्धावित्यप्रतीतता।

वाक्यगता सन्दिग्धता यथा काव्यप्रकाशे—

"सुरालयोल्लासपरः प्राप्तपर्य्याप्तकम्पनः। मार्गणप्रवणो भास्वद्भूतिरेष विलोक्यते॥"

अत्र सुर-कम्पन-मार्गण-भूतिशब्दाः प्रकरणादिनियमाभावात् किं देव-सेना-शरसम्पदर्थाः, किंवा मद्य-सञ्चलन-पर्य्यटन-भस्मार्था इति सन्देहात् सन्दिग्धता।

नेयार्थतां तु ग्रन्थकृत्तैव "उद्यत्कमललौहित्यैः" इत्यादिना उदाहृता।

वाक्यगता निहतार्थता यथा तत्रैव—

"सायकसहायबाहो! मकरध्वजनियमितक्षमाधिपते!।
अब्जरुचिभास्वरस्ते भातितरामवनिप! श्लोकः॥"

अत्र बाण-कामदेव-सहिष्णुता पद्म-पद्यरूपार्थेषु प्रसिद्धानां सायक-मकरध्वज-क्षमाब्ज-श्लोकशब्दानां यथाक्रमं तरवारि-समुद्र-पृथिवी-चन्द्र-यशोरूपेष्वप्रसिद्धेष्वर्थेषु प्रयोगान्निहतार्थता।

वाक्यगता अवाचकता यथा नैषधे—

"मदिप्रलभ्यं पुनराह यत्त्वां तर्कः स किं तत्फलवाचि मूकः?।
अशक्यशङ्कव्यभिचारहेतुः वाणी न वेदा यदि सन्ति के तु॥"

अत्र आह-वेदशब्दौ सूचनसत्यार्थयोरवाचकावित्यवाचकता। क्लिष्टताविधेयाविमर्शौ तु वाक्यगतौ ग्रन्थकृत्तैवोदाहृतौ।

वाक्यगता विरुद्धमतिकारिता यथा मम—

"भाग्यैर्नैवाद्य सम्प्राप्तो नन्वभिप्रेत! नागर!। अविचार्य्यैव किञ्चित्ते भवाम्येव गलग्रहा॥"

पदांशे श्रुतिकटुर्यथा—"तद्गच्छ सिद्ध्यै कुरु देवकार्य्यम्—" (अ)

"धातुमत्तां गिरिर्धत्ते।" (ध)

अत्र मत्ताशब्दः क्षीवार्थे निहितः (१) (स)।

"वर्ण्यते किं महासेनो विजेयो यस्य तारकः॥" (ह)

अत्र विजेय इति कृत्यप्रत्ययः क्तप्रत्ययार्थेऽवाचकः (च)।

"पाणिः पल्लवपेलवः।" (क)

अत्र अभीष्ट-काष्ठाविशेषवाचिनौ प्रयुक्तावपि अभिप्रेतगलग्रहशब्दौ प्रेत-भारार्थौ सूचयत इति विरुद्ध-मतिकारिता।

(अ) इदानीमुद्देशक्रमप्राप्तान् पदांशदोषानाह पदांश इति।

अर्थोऽयमर्थान्तरभाव्य एव।

अपेक्षते प्रत्ययमुत्तमं त्वां बीजाङ्कुरः प्रागुदयादिवाम्भः॥"

इति कुमारसम्भवतृतीयसर्गे शेषपादत्रयम्।

अत्र सिद्ध्यै इति पदस्य 'द्ध्यै' इत्यंशः परुषवर्णतया श्रुतिदुःखावहः।

(ध) "दुःश्रवत्रिविधाश्लील"त्यादिकारिकाणां गणनामात्रपरत्वेन पाठक्रमस्याकिञ्चित्करत्वात्तमुल्लङ्घ्य यथेच्छमेवोदाहरन् प्रथमं निहतार्थतामुदाहरति धात्विति।

"धातुमत्तां गिरिर्धत्ते रत्नं धरति सागरः।

आकाशो वहति ज्योतिर्गुणं श्रयति सज्जनः॥" इति मत्पूरितशेषपादत्रयम्।

गिरिः पर्वतः धातुर्गैरिकादिरस्यास्तीति धातुमान् तस्य भावो धातुमत्ता तां "यदुत्तरवर्त्ती भावविहितः प्रत्ययस्तद्धर्मं वक्ति" इति न्यायात् गैरिकादिधातुमित्यर्थः।

(स) अत्रेति। क्षीवार्थे उन्मत्तारूपार्थे निहितः "मत्ते शौण्डोत्कटक्षीवाः" इत्यभिदधानैरमरादिभिः स्थापितः अनुशिष्ट इत्यर्थः। तथा च मत्ताशब्दस्य प्रसिद्धेन क्षीवार्थेन अप्रसिद्धस्य मत्तारूपार्थस्य तिरोहित-प्रायीकृतत्वात् धातुमत्ताशब्दैकदेशगतत्वाच्च पदांशगतं निहतार्थत्वम्।

(ह) पदांशगतमवाचकत्वमुदाहरति वर्ण्यत इति।

"महाशक्ति-महादेव-पुत्रः शक्तिधरः स्वयम्।" इति मत्पूरितपूर्वार्द्धम्।

(च) अत्रेति। कृत्यप्रत्ययो जिधातोः "स्वराद् यः" इति यप्रत्ययः। अवाचक इति। कृत्यप्रत्ययस्य "शकि च कृत्याः" इत्यनेन शक्यार्थबोधकत्वात् क्तप्रत्ययस्य च अतीतकालवृत्तिविजयकर्मत्वबोधकत्वादिति भावः।

(क) पदांशगतामश्लीलतां प्रदर्शयति पाणिरिति।

"वीणानिनादवद्वाणी बिम्बवल्लोहितोऽधरः।

मृगीनेत्रसमे नेत्रे पाणिः पल्लवपेलवः॥" इति मत्पूरितपूर्वपादत्रयम्।

पल्लवपेलवः पल्लववत् कोमलः।

---

(१) निहत इति पाठान्तरम्।

पेलवशब्दस्य आद्याक्षरे अश्लीले (ख)।

"संग्रामे निहताः शूरा वचोबाणत्वमागताः॥" (ग)

अत्र वचःशब्दस्य गीःशब्दवाचकत्वे नेयार्थत्वम्। यथा तत्रैव बाण-स्थाने शरेति पाठे। अत्र पदद्वयमपि न परिवृत्तिसहम् (घ)।

जलध्यादौ तु उत्तरपदम्, वाड़वानलादौ तु पूर्वपदम् (ङ)!

एवमन्येऽपि यथासम्भवं पदांशदोषा ज्ञेयाः (च)!

(ख) पेलवेति। आद्याक्षरे 'पेल' इति प्रथमाक्षरद्वयम्। तथा च "अण्डकौ वृषणः पेलम्" इति हेमचन्द्रोक्तेः पेलशब्दस्य अण्डकोषप्रत्यायकतया व्रीड़ाव्यञ्जकत्वादश्लीलत्वम्। एवञ्च पेलवशब्दस्य प्रयोगमात्र एवायं दोष इति बोध्यम्।

पदांशगता जुगुप्साव्यञ्जकाश्लीलता यथा—"गङ्गया पूयते पापी।" अत्र पूयत इति शब्दस्य प्रथमाक्षरद्वयं घनीभूतविकृतरक्तबोधकत्वादश्लीलम्।

पदांशगता अमङ्गलव्यञ्जकाश्लीलता यथा—"अभिप्रेतौ महाधनः।" अत्र अभिप्रेतशब्दस्य अन्तिमाक्षरद्वयम् अकृतसपिण्डनमृतबोधकत्वादश्लीलम्।

(ग) पदांशगतां नेयार्थतामुदाहरति संग्राम इति।

"स्वाम्यर्थे वा स्वदेशार्थे युध्यमाना मनस्विनः।" इति मत्पूरितपूर्वार्द्धम्।

वचोबाणत्वं गीर्बाणत्वं देवत्वमिति यावत्, आगताः सम्प्राप्ताः।

(घ) अत्रेति। गीःशब्दवाचकत्वे गीःशब्दरूपलक्ष्यार्थोपस्थापकत्वे अभिप्रेते इत्यर्थः। तथा च "गीर्वाणा दानवारयः" इत्यमरोक्तेः, गीर्वाणीव बाणी बाणवदरातिनाशिका यस्येति व्युत्पत्तियोगाच्च गीर्वाणशब्दो देवतायां योगरूढ़ः। तेन पङ्कजादिवत् तत् पदद्वयमपि न परिवृत्तिसहम्। ततश्च रूढ़िं प्रयोजनञ्च विनापि कविना वचःशब्देन गीरूपलक्ष्यार्थप्रकाशनात् वचोबाणत्वपदैकदेशगतत्वाच्च पदांशगतं नेयार्थत्वमित्याशयः। तत्रैव गीर्वाणशब्द एव। शरेति पाठ इति। "गीःशरत्वमुपागताः" इति प्रयोगेऽपि, तद्युक्तरीत्या पदांशगतं नेयार्थत्वम्। अत्र गीर्वाणशब्दे, पदद्वयं गीःपदं बाणपदञ्च, न परिवृत्तिसहस्वस्वार्थबोधकशब्दान्तरनिवेशेऽपि न देवतारूपार्थबोधकं पङ्कजादिवद्योगरूढत्वादिति भावः।

(ङ) प्रसङ्गादन्यत्रापि पदांशानां परिवृत्त्यसहत्वं दर्शयितुमाह जलध्यादाविति। प्रथमादिपदेन जलधरादीनां ग्रहणम्। उत्तरपदं शेषभागः धिप्रभृतिरंश इत्यर्थः। द्वितीयादिपदेन च सरोजादीनां परिग्रहः। पूर्वपदं वाड़वाद्यंशः। न परिवृत्तिसहमिति पूर्वेणान्वयः। अरिसिंहोऽप्येवमेवाह। यथा—

"जलदादिषु पूर्वपदे सरोजमुख्येषु चोत्तरपदेषु। सुरपतिसमेषु चोभयपदेषु पर्यायपरिवृत्तिः॥

इति परिवृत्तिसहा ये योगास्ते यौगिकाः शब्दाः। परिवृत्त्यसहा ये तु मिश्रा गीर्वाणतुल्यास्ते॥"

तेन—"जलधौ वर्त्तते रवं कुर्वचित्तुरगानलः।" इत्यादिषु वचोबाणत्वमित्यादिवदेव पदांशगतं नेयार्थतादोष इत्युन्नेयम्।

निरर्थकत्वादीनां त्रयाणाञ्च पदमात्रगतत्वेनैव लक्ष्ये सम्भवः (छ) ।

क्रमेण (१) यथा—"मुञ्च मानं हि मानिनि ! ॥" (ज)

अत्र हिशब्दो वृत्तिपूरणमात्रप्रयोजनः (झ) ।

"कुञ्जं हन्ति कृशोदरी" (ञ)

(च) एवमिति । तत्र पदांशगता अनुचितार्थता यथा—

"भञ्जकल्पतरुर्दत्ते फलं विज्ञस्तु तद्वान् ।"

अत्र कल्पतरुपदस्य 'कल्प' इत्यंशः 'हे भञ्जकल्प !' इति-सम्बोधनं द्योतयतीत्यनुचितार्थता ।

पदांशगता अप्रयुक्तता यथा—"एषोऽधिकवया वन्ध्या पुपुवीयिषति ध्रुवम् ॥"

अत्र 'पुपु' इति द्विवचनस्य व्याकरणप्रसिद्धत्वेऽपि कविभिरनादृतत्वादप्रयुक्तता ।

पदांशगता ग्राम्यता यथा—"कुरुते जम्बुकी नीरे कूर्म्मस्येव नखादनम् ।"

अत्र नखभक्षणमित्यर्थे प्रयुक्तस्य नखादनमिति पदस्य खादनमित्यंशो ग्राम्यः ।

पदांशगता सन्दिग्धता यथा काव्यप्रकाशे—

"कस्मिन् कर्म्मणि सामर्थ्यमस्य नोत्तपतेतराम् । अयं साधुचरस्तस्मादञ्जलिर्बध्यतामिह ॥"

अत्र साधुचर इति पदस्य 'चर' इत्यंशे "किं भूतपूर्वः साधु"रित्यर्थे "भूतपूर्वे चरट्" इत्यनेन चरट् प्रत्ययः, उत वा साधुषु चरतीत्यर्थे 'चरेष्ट' इति टप्रत्ययः, इति सन्देहात् सन्दिग्धता ।

पदांशगता विरुद्धमतिकारिता यथा—"भवान् कल्पतरुप्रायो दत्ते परमसत् फलम् ।"

अत्र परमसदिति पदस्य शेषाक्षरद्वयम् 'असत्' इति विरुद्धां मतिं करोतीति विरुद्धमतिकारिता ।

अप्रतीतत्व-क्लिष्टत्वयोस्तु पदांशगतत्वं न सम्भवतीति कारिकायां "दोषाः केचिद्भवन्त्येषु पदांशेऽपि" इत्यत्र केचिदिति, वृत्तौ चात्र "यथासम्भवम्" इति प्रयुक्तम् ।

(छ) "पदे परे" इति कारिकांशं व्याख्यातुमाह निरर्थकत्वादीनामिति । आदिशब्देन असमर्थत्व-च्युतसंस्कारत्वयोः संग्रहः । सम्भव इति । अतएव "परे पद एव" इति कारिकायामुक्तमित्याशयः ।

(ज) तत्र निरर्थकत्वमुदाहरति मुञ्चेति । तल्लक्षणन्तु छन्दःपूरणं विना अन्यप्रयोजनहीनप्रयोग-कत्वम् । अतएव हि निरर्थकत्वमिति समाख्या । कवेः शक्तिहीनत्वज्ञापनद्वारा श्रोतुर्वैमनस्यापादनेन रसप्रकर्षहानिकरत्वादस्य दोषत्वम् । अयन्तु नित्यो दोषः, प्रतिप्रसवासम्भवेन सर्वदैव हेयत्वात् ।

"कोकिलः काकलीं वक्ति गुञ्जन् भ्रमति षट्पदः ।

पतितोऽहं पदान्ते च मुञ्च मानं हि मानिनि ! ॥" इति मत्पूरितपूर्वपादत्रयम् ।

(झ) अत्रेति । वृत्तिपूरणमात्रप्रयोजनः, अतएव निरर्थकत्वदोष इत्याशयः ।

(ञ) असमर्थत्वमुदाहरति कुञ्जमिति । तल्लक्षणन्तु सहकारिविरहेण विवक्षितार्थप्रत्यायनाशक्तत्वम् । अतएवास्यापि असमर्थत्वमिति संज्ञा । विवक्षितार्थाप्रत्यायकतया च रसस्यैव प्रतीतिबाधादस्य दोषत्वम् । प्रतिप्रसवाभावेन सर्वदैव हेयत्वादस्यापि नित्यदोषत्वम् ।

---

(१) क्रमतः इति पाठान्तरम् ।

अत्र (१) हन्तीति गमनार्थे पठितमिति न तत्र समर्थम् (ट)

"गाण्डीवी कनकशिलानिभं भुजाभ्या-
माजघ्ने विषमविलोचनस्य वक्षः ॥" (ठ)

"आङो यमहनः" (पा, १ । ३ । २८) "स्वाङ्गकर्म्मकाच्च" (पा, १ । ३ । २८ । सू, वा,) इत्यनुशासनबलादाङ्पूर्वस्य हनः स्वाङ्गकर्म्मकस्यैवात्मनेपदं नियमितम् । इह तु तल्लङ्घितमिति व्याकरणलक्षणहीनत्वात् च्युतसंस्कारत्वम् (ड) ।

नन्वत्र "आजघ्ने" इति पदस्य स्वतो न दुष्टता, अपि तु पदान्तरापेक्षयैव, इत्यस्य वाक्यदोषता । मैवम् । तथाहि, गुणदोषालङ्काराणां शब्दार्थगतत्वेन व्यवस्थितेस्तदन्वयव्यतिरेकानुविधायित्वं हेतुः (ढ) । इह तु दोषस्य

"साशङ्कं परिपश्यन्ती हरिणीचललोचना ।
रमणागमनाश्वासात् कुञ्जं हन्ति कृशोदरी ॥" इति मत्पूरितपूर्वपादद्वयम् ।

(ट) अत्रेति । पठितमपि "हन हिंसागत्योः" इत्यनेनेति शेषः । तत्र गमनार्थे न समर्थं न प्रतीतिजननक्षमम्, सहकारिविरहादिति भावः ।

(ठ) च्युतसंस्कारतामुदाहरति गाण्डीवीति । तल्लक्षणनु व्याकरणलक्षणहीनत्वम् । तेन च्युतं संस्कारो व्याकरणकृतपरिमार्जनं यस्य तस्य भावश्च्युतसंस्कारतेति व्युत्पत्तिः । कवेर्व्याकरणज्ञानहीनत्वप्रतिपादनद्वारा तद्वचने श्रोतुर्वैमनस्यापादनेन रसप्रकर्षहानिकरत्वादस्य दोषत्वम् । एष तु महादोषः सर्वथैव नित्यः, सर्वथा प्रतिप्रसवाभावेन सर्वदैव हेयत्वात् ।

"उन्मज्जन्मकर इवामरापगाया वेगेन प्रतिमुखमेत्य बाणनद्याः ।"

इति किरातार्जुनीयसप्तदशसर्गे पूर्वार्द्धम् ।

गाण्डीवी अर्जुनः भुजाभ्यां कनकशिलानिभं स्वर्णमयप्रस्तरतुल्यं विषमविलोचनस्य त्रिलोचनस्य किरातरूपिणो महादेवस्य वक्षः आजघ्ने आहतवान् ।

(ड) अत्र च्युतसंस्कारतां समर्थयति आङ् इति । तल्लङ्घितमिति । पराङ्गकर्म्मकत्वेऽप्यात्मनेपदविधानादिति भावः । न च कनकशिलानिभं कनकनिकषपाषाणतुल्यं श्यामवर्णं स्ववक्ष एव आजघ्ने इत्यर्थं इति वाच्यम् । युद्धे प्रवर्त्तमानानां वीराणां स्ववक्षस आघातादर्शनात् तत्पूर्वमेव हि दर्पप्रकाशार्थे तत्करणदर्शनात् ।

(ढ) आजघ्ने इत्यस्य वाक्यदोषत्वमाशङ्कते नन्विति । स्वतो न दुष्टतेति । स्वाङ्गकर्म्मकत्वे कर्म्मणि च आत्मनेपदस्य साधुत्वादिति भावः । पदान्तरापेक्षया विषमविलोचनस्य वक्ष इति पराङ्गबोधक-

---

(१) तत्रेति क्वचित् पाठः ।

"आजघ्ने" इति पदमात्रस्यैवान्वयव्यतिरेकानुविधायित्वम् । पदान्तराणां परिवर्त्तनेऽपि तस्य तादवस्थ्यादेवेति पददोष एव [ग] । तथा यथेहात्मनेपदस्य परिवृत्तावपि न पददोषः [त] । तथा हन्प्रकृतेरपि इति न पददोषः

एवं "पद्मः" इत्यत्राप्रयुक्तस्य पदगतत्वं बोध्यम् [थ] ।

एवं प्राकृतादि-व्याकरण-लक्षण-ज्ञानावपि च्युतसंस्कारत्वमूह्यम् [द] ।

इह तु शब्दानां सर्वथा प्रयोगाभावे असमर्थत्वम्, विरलप्रयोगे निह-

---

पदापेक्षया । वाक्यदोषतेति । वाक्यघटकानेकपदप्रयोज्यत्वादिति भावः । शब्दार्थगतत्वेन व्यवस्थिते शाब्दत्वार्थत्वनियमस्य, तयोः शब्दार्थयोः, अन्वयव्यतिरेकानुविधायित्वम् अन्वयव्यतिरेकानुसारित्वम् । तथा च यत्र तत्तच्छब्दसत्त्वे तेषां गुणादीनां सत्ता तदसत्त्वे च तेषामप्यसत्ता तत्र गुणादीनां शाब्दत्वम् । एवमार्थत्वमपि ।

(ग) ननु तेन किमित्याह इहेति । गाण्डीवीत्यादिपद्य इत्यर्थः । पदमात्रस्यैव न पुनः सापेक्षपदान्तरस्येत्यर्थः । तथा च 'आजघ्ने' इति पदसत्त्वे च्युतसंस्कारतादोषसत्ता, तत्पदासत्त्वे च तद्दोषासत्ता । पदान्तराणां परिवर्त्तनेऽपि विषमविलोचनस्य वक्ष इत्यत्र विलोचनस्योरः इति पाठेऽपि तस्य च्युतसंस्कारतादोषस्य, तादवस्थ्यात् तद्रूपेणावस्थानादेव इति पदमात्रस्यैवेत्याद्युक्तिं प्रति हेतुः । इति हेतोः पददोष एव न पुनर्वाक्यदोष इत्यर्थः । तथा च पदान्तरासत्त्वेऽपि तद्दोषसत्त्वेन व्यतिरेकव्यभिचाराद्वाक्यव्यापकत्वाभावेन नायं वाक्यदोष इति भावः ।

(त) ननु तर्हि 'आजघ्ने' इत्यात्मनेपदसत्त्वे च्युतसंस्कारतादोषसत्ता, तदसत्त्वे च तदसत्ता इत्यात्मनेपदस्यैव उक्तदोषं प्रत्यन्वयव्यतिरेकानुविधायितया बीजत्वात् च्युतसंस्कारतादोषोऽयं पदांशगत एवास्तामित्याह तथेति । परिवृत्तावपि "आजघान" इति पाठेऽपि । तथा हन्प्रकृतेरपि 'प्रजघ्ने' इति पाठेन हन्प्रकृतेः परिवृत्तावपि न पददोष इत्यर्थः । इति हेतोः । अत्रायमाशयः—"आजघ्ने" इत्यात्मनेपदसत्त्वे हन्प्रकृतिसत्त्वे च च्युतसंस्कारतादोषसत्ता, तयोरसत्त्वे च तदसत्तेति उभयांशस्यैवान्वयव्यतिरेकाभ्यां दोषघटकत्वात्तदुभयांशस्यैव च पदरूपत्वात् पददोष एवायम् । "धातुमत्तां गिरिर्धत्ते" इत्यादौ तु मत्ताशब्दसत्त्वे निहतार्थत्वसत्ता तदसत्त्वे च तदसत्त्वेति पदैकदेशस्यैव दोषघटकत्वात् पदांशदोष एव । एवञ्च अन्वयव्यतिरेकानुसारिण गुणदोषालङ्काराणां वाक्यव्यापित्वे वाक्यगतत्वम्, पदमात्रव्यापित्वे पदगतत्वम्, पदांशमात्रव्यापित्वे च पदांशगतत्वमिति नियम इति ।

(थ) नियमनिममन्यत्राप्यतिदिशन्नाह एवमिति । अनया रीत्येत्यर्थः । अप्रयुक्तस्य अप्रयुक्ततादोषस्य । तथा च "पद्मः" इति पद्मशब्दसत्त्वे ततः पुंलिङ्गसत्त्वे च अप्रयुक्ततादोषसत्ता तयोरसत्त्वे च तदसत्तेति उभयांशस्यैव दोषघटकत्वादत्राप्रयुक्ततायाः पदगतमेवेति भावः ।

(द) एवमिति । तथा च "सर्वत्रात्मनेपदस्य परस्मैपदम्" इति प्राकृतादिव्याकरणसूत्रात् 'करीअदि' इति प्रयोक्तव्ये 'करीअदे' इति प्रयोगे च्युतसंस्कारत्वम् ।

तार्थत्वम् (ध)। निहतार्थत्वमनेकार्थशब्दविषयम्, अप्रतीतत्वन्त्वेकार्थस्यापि शब्दस्य सार्वत्रिकप्रयोगविरहः (न)। अप्रयुक्तत्वकार्थशब्दविषयम् असमर्थत्वमनेकार्थशब्दविषयम् (प)। असमर्थत्वे हन्त्यादयोऽपि गमनार्थे पठिताः, अवाचकत्वे दिनादयः प्रकाशमयाद्यर्थे न तथा, इति परस्परभेदः (फ)।

एवं पददोषसजातीया वाक्यदोषा उक्ताः, सम्प्रति तद्विजातीया उच्यन्ते—(ब)

(ध) इदानीमुक्तदोषाणां कतिपयस्य लक्षणविशेषेण क्रमाशङ्क्य परस्परं भेदं निर्दिशन्नादौ विवक्षितार्थप्रत्यायनमन्यरत्वेन असमर्थत्वनिहतार्थत्वयोरैक्ये प्राप्ते भेदमाह इहेति। सर्वथा स्वार्थप्रधानतया सर्वप्रकारेणेत्यर्थः। तेन हन्धातोर्गत्यर्थप्रधानतया गच्छतीत्यर्थे हन्तीति सर्वत्रैव प्रयोगाभावात् "कुञ्जं हन्ति कृशोदरी" इत्यादावसमर्थत्वम्। अन्यार्थप्रधानतया गतयें प्रयोगस्तस्यैव। यथा—पद्म्यां हन्यते गम्यते अस्यामिति पद्धतिः पन्थाः, एवं जङ्घा, उद्धत इत्यादि। अतएव "हन हिंसागत्योः" इति गत्यर्थे पाठः सार्थकः। विरलप्रयोगे—"अकालसन्ध्यामिव धातुमत्ताम्" इत्यादिरूपाल्पप्रयोगे।

(न) सर्वप्रकारयोरप्यु विवक्षितार्थप्रत्ययनमन्थरत्वेन निहतार्थत्वाप्रतीतयोरभेदे प्राप्ते भेदमाह निहतार्थत्वमिति। निहतार्थत्वे—"धातुमत्तां गिरिर्धत्ते" इत्यादौ मत्ताशब्दस्य क्षीव-तत्सत्तारूपावनेकार्थौ; अप्रतीतत्वे तु—"योगेन दलिताशयः" इत्यादौ आशयशब्दस्य वासनारूप एक एवार्थः, योगशास्त्रं विना अन्यत्र प्रयोगाभावश्चेति ज्ञेयम्।

(प) कविभिरनुक्तत्वरूपेण अप्रयुक्तत्वासमर्थत्वयोरभेदमाशङ्क्य भेदं दर्शयति अप्रयुक्तत्वमिति। अप्रयुक्तत्वे—"भाति पद्मः सरोवरे" इत्यत्र पद्मशब्दस्य एकसरोजरूप एवार्थः। असमर्थत्वे तु "कुञ्जं हन्ति कृशोदरी" इत्यत्र हन्धातोर्हिंसागतिरूपौ द्वावेवार्थौ इत्युन्नेयम्।

(फ) विवक्षितार्थबोधकत्वेन असमर्थत्वावाचकत्वयोरभेदे प्राप्ते भेदमाह असमर्थ इति। अपिशब्दस्य गमनार्थे इत्यनेनान्वयः तेन गमनार्थेऽपीत्यर्थः। न तथा केनाप्यमरादिना न पठिता इत्यर्थः। तथा च तदर्थे सत्यपि सहकारिविरहात्तद्बोधनाक्षमत्वमसमर्थत्वम्। यथा—"कुञ्जं हन्ति कृशोदरी।" अत्र "हन हिंसागत्योः" इत्यनेन गत्यर्थे सत्यपि चरणादिसहकारिविरहात्तदर्थबोधनाक्षमत्वेन असमर्थत्वम्। अवाचकत्वन्तु तदर्थासत्त्वेन तद्बोधनाक्षमत्वम्। यथा—"दिनं मे त्वयि सम्प्राप्ते ध्वान्तच्छन्नापि यामिनी।" अत्र दिनपदस्य प्रकाशमयार्थासत्त्वेन तद्बोधनाक्षमत्वादवाचकत्वमित्याशयः।

एवम् अनुचितार्थत्वमशक्यार्थविषयम्, विरुद्धमतिकारित्वन्तु शक्यार्थविषयमिति भेदः।

(ब) एवमिति। तद्विजातीयाः पददोषविजातीया वाक्यदोषा इत्यर्थः। अत्र पदे प्रसक्त्या वाक्ये प्रसक्तत्वं पददोषसजातीयवाक्यदोषत्वम्, पदे अप्रसक्त्या वाक्यमात्रे प्रसक्तत्वं पददोषविजातीयवाक्यदोषत्वमिति दिक्।

४। वर्णानां प्रतिकूलत्वं लुप्ताहतविसर्गते।
अधिकन्यूनकथित-पदता हतवृत्तता (१) ॥
पतत्प्रकर्षता सन्धौ विश्लेषाश्लीलकष्टताः।
अर्द्धान्तरैकपदता समाप्तपुनरात्तता ॥
अभवन्मतसम्बन्धा-क्रमामतपरार्थताः।
वाच्यस्यानभिधानञ्च भग्नप्रक्रमता तथा ॥
त्यागः प्रसिद्धेरस्थाने न्यासः पदसमासयोः।
सङ्कीर्णता गर्भितता दोषाः स्युर्वाक्यमात्रगाः ॥ (अ)

वर्णानां रसानुगुण्यविपरीतत्वं प्रतिकूलत्वम् (म)। यथा मम—

(अ) वर्णानामिति। वर्णानां प्रतिकूलत्वं प्रतिकूलवर्णता। लुप्ता आहताश्च (ओत्वं प्राप्ताश्च) विसर्गा यत्रोस्ते लुप्ताहतविसर्गं वाक्यं तयोर्भावो लुप्ताहतविसर्गते। अत्रापि "द्वन्द्वात् परः श्रूयमाणः शब्दः प्रत्येकमभिसम्बध्यते" इति न्यायात् लुप्तविसर्गता, आहतविसर्गता च। अधिकानि न्यूनानि कथितानि च पदानि येषां वाक्यानां तेषां भावास्तान्तथोक्ताः। अधिकपदता, न्यूनपदता, कथितपदता च। हतं वृत्तं छन्दो यस्य वाक्यस्य तस्य भावो हतवृत्तता। पतन् स्खलन् प्रकर्षो यस्य वाक्यस्य तस्य भावः पतत्प्रकर्षता। सन्धौ विषये विश्लेषस्य अश्लीलकष्टते च तास्तथोक्ताः, सन्धिविश्लेषः, सन्ध्यश्लीलता, सन्धिकष्टता च। अर्द्धान्तरे पद्यस्यान्यस्मिन्नर्द्धे एकं पदं यस्य वाक्यस्य तस्य भावः सा अर्द्धान्तरैकपदता। समाप्तमपि पुनरात्तं गृहीतमारब्धं वाक्यमिति तस्य भावः सा समाप्तपुनरात्तता। अभवन्ननुपपद्यमानः मतः अभिमतः सम्बन्धः अन्वयो यत्र तदभवन्मतसम्बन्धं वाक्यम्, न विद्यते क्रमो यत्र तदक्रमं वाक्यम्, अमतः अनभिमतः परो द्वितीयः अर्थो यस्य तदमतपरार्थं वाक्यञ्च तेषां भावास्तान्तथोक्ताः। तेन अभवन्मतसम्बन्धता, अक्रमता, अमतपरार्थता च। वाच्यस्य वक्तव्यस्य अनभिधानं वाच्यानभिधानम्। भग्नः प्रकारान्तरेण द्वितीयादिप्रयोगान्नष्टः प्रक्रम उपक्रमो यत्र तद्भग्नप्रक्रमं वाक्यं तस्य भावो भग्नप्रक्रमता। प्रसिद्धित्यागः। अस्थाने अनुपयुक्तस्थाने पद-समासयोर्न्यासः सन्निवेशः। तेन अस्थानस्थपदता, अस्थानस्थसमासता च। सङ्कीर्णता, गर्भितता च। एते त्रयोविंशतिर्दोषाः, वाक्यमात्रगाः केवलवाक्यगता एव स्युः।

(म) तत्र प्रतिकूलवर्णतां लक्षयति वर्णानामिति। अत्र वर्णानामिति पदमावर्त्तनीयम्। तेन वर्णानां रसानुगुण्यविपरीतत्वं प्रकृतरसविरोधित्वं वर्णानां प्रतिकूलत्वं प्रतिकूलवर्णतेत्यर्थः। अस्य च प्रकृतरसविरोधित्वेन तत्प्रतीतिप्रतिबन्धकत्वाद्दोषत्वम्। असौ तु नित्यो दोषः, स्वव्यञ्जकस्यैव विरोधित्वेन प्रतिप्रसवासम्भवात्।

---

(१) हतवृत्तताः इति पूर्वेण सह समासात् सविसर्गः पाठः क्वचित्।

"ओवट्टइ उल्लट्टइ सअणे कहिं पि मोट्टाअइ णो परिहट्टइ हिअएण फिट्टइ लज्जाइ खुट्टइ दिहीए सा ।" (य)

अत्र टकाराः शृङ्गाररसपरिपन्थिनः केवलं शक्तिप्रदर्शनाय निबद्धाः (र)। एषाम्वैक-द्वि-त्रि-चतुः-प्रयोगे (१) न तादृग् रसभङ्ग इति न दोषः (ल) ।

"गता निशा इमा बाले !" (व) ।

अत्र लुप्तविसर्गाः (श) ।

आहता ओत्वं प्राप्ता विसर्गा यत्र (ष) । यथा—

(य) उदाहरति ओवट्टइ इति । "उद्वर्त्तयति उल्लोटयति शयने कस्मिन्नपि मोट्टायति नो परिघट्टयति हृदयेन स्फोटयति लज्जया खट्टयति धृतेः सा ।" इति संस्कृतानुवादः । कस्याश्चिद्विरहावस्थावर्णनेयम्। सा युवतिः शयने शय्यायां स्थिता कस्मिन्नपि क्षणे उद्वर्त्तयति शरीरमुत्तानं करोति, कस्मिन्नपि क्षणे उल्लोटयति शरीरं विलुठितं करोति, कस्मिन्नपि क्षणे मोट्टायति प्रागुक्तलक्षणं मोट्टायितं करोति, कस्मिन्नपि क्षणे नो परिघट्टयति शरीरं न सञ्चालयति, कस्मिन्नपि क्षणे हृदयेन मनसा स्फोटयति स्वजीवनं हिनस्ति मर्तुमिच्छतीत्यर्थः, कस्मिन्नपि क्षणे लज्जया धृतेर्धैर्यात् धैर्यमवलम्ब्येत्यर्थः खट्टयति आत्मनोऽवस्थां सम्वृणोति ।

(र) अत्रेति । शृङ्गाररसस्य परिपन्थिनो विरोधिनः, विकटतया स्वविरोधिरौद्रादिरसव्यञ्जकत्वादिति भावः ।

(ल) फलितार्थमाह एषाम्वेति । एषां प्रतिकूलवर्णानाम् । रसभङ्गो रसबोधप्रतिबन्धः । उदाहृते दुःश्रवत्वमपि वर्त्तत एवेति बोध्यम् । शुद्धोदाहरणन्तु—

"विहितासङ्गतासङ्ग ! दितिनन्दनमन्दिरे । अनङ्ग ! मङ्गलमयीं नालिङ्गेः पुनरङ्गनाम् ॥"

अत्र रौद्ररसे माधुर्य्यव्यञ्जकवर्णसद्भावात् प्रतिकूलवर्णता ।

(व) लुप्तविसर्गतामुदाहरति गता इति । तल्लक्षणन्तु बहुतरविसर्गलोपवत्त्वम् । तेन कतिमावविसर्गलोपे नायं दोषः । बहुतरविसर्गलोपेन श्रोतुर्विरक्तिरिव जायत इति रसप्रकर्षनाशादस्य दोषत्वम्। अयमपि नित्यो दोषः प्रतिप्रसवाभावात् ।

"गता निशा इमा बाले ! त्वत्कान्तेश्चिन्तयेव मे ।
इदानीं यदि सम्प्राप्ता निश्चिन्तं कुरु किङ्करम् ॥" इति मत्पूरितपरपादत्रयम्।

(श) अत्रेति । लुप्तविसर्गा वाक्यस्य दोषं जनयन्तीति शेषः । बहुतरविसर्गस्थितावपि दुःश्रवत्वमेव । यथा—

"क्षरः खरः खलः कान्तः कायः कोपधनः कृशः-
च्युतो मानोऽधिको रागो मोहो जातोऽसवो गताः ॥"

एष तु असमस्तता नाम दोष इति सरस्वतीकण्ठाभरणकाराः ।

---

(१) प्रयोगेषु इति पाठान्तरम् ।

"धीरो वरो नरो याति ।" (स) ।

"पल्लवाकृतिरक्तोष्ठो ।" (ह) । अत्राकृतिपदमधिकम् (च) ।

एवम्—"सदाशिवं नौमि पिनाकपाणिम् ।" (क) इति विशेषणमधिकम् (ख) ।

"कुर्य्यां हरस्यापि पिनाकपाणेः" (ग) इत्यत्र पिनाकपाणिपदं विशेषप्रतिपत्त्यर्थमुपात्तमिति (१) युक्तमेव (घ) ।

(प) आहतविसर्गताशब्दं व्युत्पादयति आहता इति । यत्र वाक्ये, तदाहतविसर्गं वाक्यं तस्य भाव आहतविसर्गता । एतेन ओत्वप्राप्तबहुविसर्गवत्त्वमाहतविसर्गतेति लक्षणमभिप्रेतम् । अस्य दूषकतावीजत्वादिकन्तु पूर्ववदूह्यम् ।

(स) आहतविसर्गतामुदाहरति धीर इति ।

"धीरो वरो नरो याति समुज्ज्वलपरिच्छदः ।
आकर्षन्निव रूपेण गुणेन च जयन्निव ॥" इति मत्पूरितविपादं पद्यम् ।

(ह) अधिकपदतां प्रदर्शयति पल्लवेति । तल्लक्षणन्तु—अनावश्यकपदवत्त्वमधिकपदत्वमिति । निरर्थकतादोषः पदगतः अयन्तु वाक्यगत इत्युभयोर्भेदः । अनावश्यकपदस्य सार्थक्यानुसन्धानेन विलम्बाद्विलम्बेन रसप्रतीतेरस्य दोषत्वम् । अयन्त्वनित्यो दोषः "गुणः क्वाप्यधिकं पदम्" इति वक्ष्यमाणेन प्रतिप्रसवात् ।

"पल्लवाकृतिरक्तोष्ठी सरोजसदृशेक्षणा ।
शरच्चन्द्रमुखी सा मे हृदि राज्यमुपार्जयत् ॥" इति मत्पूरितपरविपादं पद्यम् ।

पल्लवाकृती पल्लवसदृशौ रक्तौ ओष्ठौ यस्याः सा तथोक्ता ।

(च) अत्रेति । आकृतिपदाभावेऽपि "पल्लवमिव रक्तौ ओष्ठौ यस्याः सा पल्लवरक्तोष्ठी" इति बहुव्रीहिणैव तदर्थप्रतीतेरिति भावः ।

(क) एवमिति । "विरिञ्चि-दामोदर-रुद्ररूपैः सृष्टिस्थितिप्रलयव्यवहारहेतुम् ।
चिरन्तनं योगिगणैकलक्ष्यं सदाशिवं नौमि पिनाकपाणिम् ॥"
इति मत्पूरितपूर्वविपादं पद्यम् ।

(ख) इतीति । विशेषणं पिनाकपाणिपदम् । अधिकमिति । तस्य स्वार्हताया अप्रयोजकत्वादित्याशयः ।

(ग) विशेषणस्य सार्थक्यस्थले तु न दोष इति दर्शयितुमुदाहरति कुर्य्यामिति ।

"तव प्रसादात् कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा ।
कुर्य्यां हरस्यापि पिनाकपाणेर्धैर्य्यच्युतिं के मम धन्विनोऽन्ये ॥"
इति कुमारसम्भवे श्लोकसमुदायः ।

---

(१) उपात्तत्वादिति पाठान्तरम् ।

यथा वा—"वाचमुवाच कौत्सः ।" (ङ)

अत्र वाचमित्यधिकम्, उवाचेत्यनेनैव गतार्थत्वात् (च) ।

क्वचित्तु विशेषणदानार्थं तत्प्रयोगो युज्यते । यथा—"उवाच मधुरां वाचम्" इति (छ) ।

केचित्त्वाहुः—यत्र विशेषणस्यापि क्रियाविशेषणत्वं सम्भवति, तत्रापि तत्प्रयोगो न घटते (ज) । यथा—

"उवाच मधुरं धीमान्" इति (झ) ।

"यदि मय्यर्पिता दृष्टिः किं ममेन्द्रतया तदा ॥" (ञ)

(घ) इत्यत्रेति । विशेषप्रतिपत्त्यर्थं हरस्य दुर्जयताबोधार्थम्, उपात्तं प्रयुक्तम् । युक्तमेवेति । तादृशदुर्जयस्यापि हरस्य जयेनात्मनोऽसाधारणवीरत्वसूचनादिति भावः ।

(ङ) प्रकारान्तरेणाधिकपदतामुदाहर्तुमाह यथा वेति । रघुवंशपञ्चमसर्गे—

"अथोष्ट्रवामीशतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः ।
स्पृशन् करेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः ॥"

(च) अत्रेति । गतार्थत्वात् श्रोतृभिरवगतविषयत्वात्, वचधातोरेव वचनोच्चारणार्थत्वादिति भावः ।

(छ) क्वचिदिति । तत्प्रयोगो वचधातोः कर्मतया वागादेः प्रयोगः ।

"उवाच मधुरां वाचं चकारातीव सत्क्रियाम् ।
महान्तो हि विजानन्ति कर्त्तव्यं सभ्यसंसदि ॥" इति मत्पूरितं परपादत्रयम् ।

अत्र मधुरामिति विशेषणदानार्थं वाचमित्यस्य प्रयोगो युक्त इति नाधिकपदतादोष इति ग्रन्थकृन्मतम् ।

(ज) केचिदिति । विशेषणस्यापि कर्म्मविशेषणत्वेनाभिमतस्यापि । तत्प्रयोगः क्रियासमानार्थक-कर्म्मपदप्रयोगः, न घटते न युज्यते ; क्रियाविशेषणेनैव कर्म्मविशेषणार्थलाभात् क्रिययैव च तादृशकर्म्मार्थ-बोधनादनावश्यकतया अधिकपदताप्रसङ्गादिति तेषामाशयः । यत्रेत्यादिना क्वचित्तु तादृशकर्म्मविशेषणस्य क्रियाविशेषणत्वं न सम्भवतीत्यपि सूचितम् । यथा—

"वेदस्तोवाच वाचं स शीघ्रमोघोपयोगिनीम् ।" अत्र तु नाधिकपदतादोषः ।

(झ) उक्तरीत्या निर्दोषं तन्मतीयमुदाहरणमाह उवाचेति । प्रागुक्तमेवास्यापि पूरणमूह्यम् एतेन "उवाच मधुरां वाचम्" इत्यत्रापि अधिकपदतैवेति तेषां मतमिति बोध्यम् । "उवाच मधुरां वाचम्" इत्यत "उवाच मधुरं धीमान्" इत्यस्य प्रतीतिवैषम्यमेव एतन्मतस्यास्वरसताबीजम् ।

(ञ) न्यूनपदतामुदाहरति यदीति । तल्लक्षणन्तु—अनिश्चयान्वयिवाचकपदहीनवाक्यत्वं न्यूनपद-त्वम् । अत्रानिश्चयेत्यभिधानात् "यामि यद्यनुमन्यसे" इत्यादौ 'अहम्' 'त्वम्' इति कर्त्तृपदयोरनुक्तावपि उत्तमपुरुष-मध्यमपुरुषयोः प्रयोगेणैव तयोर्निश्चयान्न न्यूनपदत्वम् । अन्वयीत्युक्तेश्च वाक्यान्तरीयपदा-नभिधाने नास्य प्रसक्तिः । वाचकेत्यभिधानाच्च द्योतकस्य वाच्यस्यानभिधाने नातिव्याप्तिः । अयमेवाध्याहार

अत्र प्रथमे त्वयेति पदं न्यूनम् (ट) !

"रतिलीलाश्रमं भिन्ते सलीलमनिलो वहन् ॥" (ठ)

अत्र लीलाशब्दः पुनरुक्तः (ड) ।

एवम्—"जचुर्विसं धृतविकाशिविसप्रसूनाः ।" (ढ)

अत्र विसशब्दस्य "धृतपरिस्फुटतत्प्रसूनाः" इति सर्वनाम्नैव परामर्शो युक्तः [ण] ।

हतवृत्तम्—लक्षणानुसरणेऽप्यश्रव्यम्, रसाननुगुणम्, [१] अप्राप्तगुरुभावान्तलघु च [त] । क्रमेण यथा—

इत्युच्यते । अनुक्तस्यान्वयिपदस्यानुसन्धानविलम्बेन रसप्रतीतिविलम्बादस्य दोषत्वम् । अयं पुनरनित्यो दोषः "उक्तावानन्दमग्नादेः स्यान्न्यूनपदता गुणः" इति वक्ष्यमाणेन प्रतिप्रसवात् ।

"व्यञ्जती याचितं रागं फुल्लपाथोजसन्निभा ।" इति मत्पूरितपूर्वार्द्धम् ।

(ट) अत्रेति । प्रथमे पादे, त्वयेति पदम् अपितितिक्षिषायाः कर्त्तृभूतमित्यर्थः ।

(ठ) कथितपदताया उदाहरणमाह रतीति । तल्लक्षणन्तु—अभिन्नार्थकसमानानुपूर्वीकपदान्तरवद्वाक्यत्वं कथितपदत्वमिति । "स सुरभिं सुरभिस्" इत्यादौ भिन्नार्थत्वात् "रामो दाशरथिः" इत्यादौ च भिन्नानुपूर्वीकत्वान्न कथितपदत्वम् । एकस्यैव पदस्यासकृदुपादाने तदर्थानुसन्धानव्यग्रतया श्रोतुर्विलम्बेन रसप्रतीतेरस्य दोषत्वम् । अयमप्यनित्यो दोषः—"कथितञ्च पदं पुनः" इत्यादिना प्रतिप्रसवस्य वक्ष्यमाणत्वात् ।

"स्पृशन् सुमनसोऽशेषा लतामालिङ्ग्य नर्त्तयन् ।" इति मत्पूरितपूर्वार्द्धम् ।

सलीलं सखेलं वहन् अनिलो वायुः रतिलीलाश्रमं सुरतकेलिजनितपरिश्रमम्, भिन्ते नाशयति ।

(ड) अत्रेति । पुनरुक्तः रतिलीलेति सलीलमिति च वारद्वयमभिहितः अतएव कथितपदतादोष इति भावः ।

(ढ) प्रकारान्तरेणोदाहरणमाह एवमिति । शिशुपालवधपञ्चमसर्गे—

"सक्तुः पयः पपुरनेनिजुरम्बराणि जचुर्विसं धृतविकाशिविसप्रसूनाः ।

सैन्याः प्रियामनुपभोगनिरर्थकत्व-दोषप्रवादममृजन्नगनिम्नगानाम् ॥"

धृतानि विकाशीनि प्रस्फुटन्ति विसप्रसूनानि पद्मानि यैस्ते तादृशाः सैन्याः विसं मृणालं जघुर्भक्षितवन्तः । अत्र विसशब्दस्य द्विरुपादानात् कथितपदता ।

(ण) अत्रेति । सर्वनाम्नैव सर्वनामान्तर्गततच्छब्देनैव, परामर्शः उपस्थितिः । एवञ्च सति पुनर्विसशब्दानुपादानान्न कथितपदतादोष इत्याशयः ।

· (१) रसानुगुणम् इति पुस्तकान्तरेष्वसङ्गतः पाठः, काव्यप्रकाशेऽपि रसाननुगुणम् इत्येव पठितत्वात् तस्यैव सङ्गतत्वाच्च ।

"हन्त ! सततमेतस्या हृदयं भिन्ते मनोभवः कुपितः।" [थ]

"अयि ! मयि मानिनि ! मा कुरु मानम्।" [द]

इदं वृत्तं हास्यरसस्यैवानुकूलम् [ध]।

"विकसित-सहकार-भार-हारि-परिमल एष समागतो वसन्तः॥" [न]

यत्पादान्ते लघोरपि गुरुभाव उक्तः, तत् सर्वत्र द्वितीयचतुर्थपाद-विषयम्। प्रथमतृतीयपादविषयन्तु वसन्ततिलकादेरेव [प]।

(त) हतवृत्ततामाह हतेति। छन्दोगतदोषवत्त्वं हतवृत्तत्वमिति हतवृत्ततायाः सामान्यलक्षणम्। छन्दोवैरूप्ये च श्रोतुर्विरक्तिजननात् रसप्रकर्षनाशिनास्य दोषत्वम्। एवञ्च नित्य एवायं दोषः प्रतिप्रसवा-सम्भवेन सर्वदैव हेयत्वात्। तच्च त्रिविधम्—लक्षणानुसरणेऽपि तत्तच्छन्दसः पूर्णलक्षणानुगमनेऽपि अश्रव्यम् अश्रुतिमधुरम्, रसस्य प्रकृतरसादेः अननुगुणम् अननुकूलम्, तथा न प्राप्तो गुरुभावो गुरुत्वं येन सः अप्राप्त-गुरुभावो वर्णः अन्ते पादस्यान्तिमे देशे लघुर्यस्य वाक्यस्य तत्तथोक्तञ्च वाक्यं हतवृत्तमित्यन्वयः। हतवृत्त-मित्यत्रापि हतं वृत्तं छन्दो यस्येति बहुव्रीहिणा उक्तोऽन्वयः सूपपन्न एवेति भाव्यम्।

(थ) तत्र "लक्षणानुसरणेऽप्यश्रव्यम्" इत्यस्योदाहरणमाह हन्तेति।

"शून्यमिदमनुभवन्त्या भुवनं दूरगतदयितायाः॥" इति मत्पूरितपरार्द्धम्।

कुपितो मनोभवः कामः, एतस्या नायिकाया हृदयं सततमेव भिन्ते विदारयति व्यथयतीत्यर्थः।

अत्र "यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि। अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्या॥"

इत्युक्तार्य्यालक्षणानुसरणेऽपि प्रथमपादे सहसा अनुष्टुभ इव प्रतीतिः, हठाच्च द्वितीयपादे आर्य्याप्रकारोप-स्थितिरिति वैरूप्यादश्रव्यतया हतवृत्तत्वम्।

(द) रसाननुगुणमित्येतदुदाहरति अयीति। अस्य मत्पूरणीयं परपादत्रयं यथा—

"अयि ! मयि मानिनि ! मा कुरु मानं पतति पदेऽयं न भवतु यानम्।

कति कति सहिता मन्मथपीडास्तदपि न याता मानक्रीडा॥"

(ध) इदमिति। वृत्तं पज्झटिका नाम च्छन्दः, हास्यरसस्यैव अनुकूलं परिपोषकम्, न पुनरत्य-शृङ्गाररसस्येति छन्दोवैरूप्यात् हतवृत्तता। इदमानुकूल्यमनानुकूल्यञ्च श्रोतुरेव प्रतीतिसाक्षिकमिति हेतुर्नोक्तः। अतएव च प्रतीतिसाक्षिकत्वादाह नागोजिभट्टः—"करुणे पुष्पिताग्रादीनाम्, शृङ्गारादौ पृथ्वीस्रग्धरादीनाम्, वीरे शिखरिणीमन्दाक्रान्तादीनाम्, हास्ये च दोधकस्य आनुगुण्यम्।" इति।

(न) अप्राप्तगुरुभावान्तलघुत्वे उदाहरति विकसितेति। अस्य मत्पूरितपूर्वार्द्धं यथा—

"अलिकुलललितः सुमञ्जुकुञ्जः परभृतकूजितपूर्णकाननान्तः।"

विकसितस्य सहकारभारस्य आम्रकुसुमसमूहस्य हारी मनोहरः परिमलः सौरभं यस्मिन् स तादृशः, एष वसन्तः, कालः समागतः।

"अयुजि नयुगरेफतो यकारः" इत्यनेन पुष्पिताग्रावृत्तस्य प्रथमतृतीयपादयोरन्तिमाक्षरस्य यगणान्तिमत्वेन गुरुत्वावश्यकत्वात् अत्र तु तदभावात् हतवृत्तता।

(प) ननु 'हारि' इत्यत्र ऋस्वस्यापि इकारस्य पादान्तगततया विकल्पेन गुरुत्वप्राप्तेः—"अयुजि नयुगरेफतो यकारः" इति लक्षणसमन्वयेऽपि कथं हतवृत्तत्वमित्याह यदिति । उक्तः—

"संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसम्मिश्रम् । विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन ॥"

इत्यादिना छन्दःशास्त्रकारैरिति शेषः । सर्वत्र सर्वेषु छन्दःसु । "वसन्ततिलकादेरेव" इत्यत्र आदि-पदेन इन्द्रवज्रोपेन्द्रवज्रा-मालिनी-प्रहर्षिणी-शार्दूलविक्रीडितप्रभृतीनां ग्रहणम् । एषां हि प्रथमतृतीय-पादयोरपि अन्तिमवर्णस्य लघुत्वे उदाहृतवन्न श्रुतिशैथिल्यमुपलभ्यते इति न तत्र लघुवर्णप्रयोगेऽपि हत वृत्तता । येषां पुनरार्या-पज्झटिका-तोटक-पुष्पिताग्रा-भुजङ्गप्रयातादीनां प्रथमतृतीयपादयोरन्तिमवर्णस्य लघुत्वेन उदाहृतवत् श्रुतिशैथिल्यमुपलभ्यते, तेषां तत्र तत्प्रयोगे हतवृत्तत्वमेव ।

केचित्तु "आदिपदेन इन्द्रवज्रोपेन्द्रवज्रयोः संग्रहः" इति वदन्ति । तदसत्, अन्येषामपि प्रथमतृतीयपादयो-रन्तिमवर्णलघुत्वस्य बहुलमुपलम्भात् । तथा च—

"विकचनवकुसुम्भस्वच्छसिन्दूरभासा प्रबलपवनवेगोद्भूतवेगेन तूर्णम् ।
तटविटपलताग्रालिङ्गनव्याकुलेन दिशि दिशि परिदग्धा भूमयः पावकेन ॥"

इति ऋतुसंहारे प्रथमसर्गे २४श श्लोके मालिन्यां तृतीयपादान्तिमवर्णस्य लघुत्वम् ।

"उत्पुष्यादगलधूसनिस्फुटप्रसर्पत् प्रत्यग्रक्षतजभरीनिरुद्धपायः ।
हर्षाश्रुप्रचुरमधु स्मितस्फुटश्रि-मक्काञार्चितचरणः शिवः प्रमाणम् ॥"

इति महावीरचरिते पञ्चाङ्के १४श श्लोके प्रहर्षिण्यां तृतीयपादान्तिमवर्णस्य लघुत्वम् ।

"अस्मिन् दिग्विजयोद्यते पतिरयं मे स्वादिति ध्यायति कम्पं सात्त्विकभावमञ्चति रिपुक्षौणीन्द्रदारा धरा ।
अस्यं वाभिमुखं निपत्य समरे यास्यन्निरुद्धं निजः पन्था भास्वति दृश्यते विलमयः प्रत्यर्थिभिः पार्थिवैः ॥"

इति नैषधे द्वादशसर्गे २९श श्लोके शार्दूलविक्रीडिते प्रथमपादान्तिमवर्णस्य लघुत्वम् ।

मृच्छकटिकनवमाङ्केऽपि ४३ श्लोके तृतीयचरणान्तिमाक्षरस्य लघुत्वम् ।

मृच्छकटिकदशमाङ्के १३ श्लोके प्रथमतृतीययोरुभयोरेवान्तिमाक्षरस्य लघुत्वम् ।

"द्रव्यं लब्धं द्यूतेनैव दारा मित्रं द्यूतेनैव । दत्तं भुक्तं द्यूतेनैव सर्वं नष्टं द्यूतेनैव ॥" इति मृच्छकटिकद्वितीयाङ्के प्रथमतृतीयपादयोरन्तिमाक्षरस्य लघुत्वम् ।

"मा गाः प्रत्युपकारकातरतया वैवर्ण्यमाकर्णय हे कर्णाटवसुन्धराधिप ! सुधासिक्तानि सूक्तानि मे" इति कर्णाटवर्णने प्रथमचरणान्तिमाक्षरस्य लघुत्वम् ।

"भीता शक्तिधरः कुमारनिपुणो वक्त्राणि बिभ्रत्त्वत्र
शम्भो ! किं भवितेति चिन्तितवती पायादसौ पार्वती ॥"

इति कातन्त्रपरिशिष्टटीकायां तृतीयचरणान्तिमाक्षरस्य लघुत्वम् ।

इत्थमन्यत्रापि नवीनकवीनां प्रबन्धेष्वपि च प्रचुरमेव परिलक्षणीयम् ।

अथ तेष्वपि हतवृत्तत्वमेव ब्रूमः । अहो साहसम् ! तदेवं हतवृत्तताभारेण महाकवीनमूलनिहत्य वरमात्ममति-परिवर्त्तनेन आदिशब्दव्याख्यायामप्यादिशब्दः प्रयुज्यताम्—"आदिपदेन इन्द्रवज्रोपेन्द्रवज्रादीनां संग्रहः" इति ।

अत्र "प्रमुदितसौरभ आगतो वसन्तः" इति पाठो युक्तः [फ]।

यथा वा—[ब]

"अन्यास्ता गुणरत्नरोहणभुवो धन्या मृदन्यैव सा
सम्भाराः खलु तेऽन्य एव विधिना यैरेष सृष्टो युवा ।
श्रीमत्कान्तिजुषां द्विषां करतलात् स्त्रीणां नितम्बस्थलात्
दृष्टे यत्र पतन्ति मूढ़मनसामस्त्राणि वस्त्राणि च ॥" [भ]

अत्र "वस्त्राणि च" इति बन्धस्य श्लथत्वश्रुतिः। "वस्त्राण्यपि" इति पाठे तु दार्ढ्यमिति न दोषः [म]। 'इदमप्राप्तगुरुभावान्तलघु' इति काव्यप्रकाशकारः [१] [य]। 'वस्तुतस्तु लक्षणानुसरणेऽप्यश्रव्यम्' इत्यन्ये [२] [र]।

(फ) अत्रेति। "संयुक्ताद्यं दीर्घम्" इति न्यायेन संयोगात् प्राग्वर्त्तिनो वर्णस्य लघोरपि गुरुत्वातिदेशात् प्रशब्दपूर्ववर्त्तित्वेन 'हारि' इति क्रस्वस्य इकारस्य गुरुवद्भावेन हतवृत्ततादोषासम्भवादित्याशयः।

(ब) ननु "यत्पादान्ते लघोरपि" इत्यादिना यदुक्तं तत् सर्वमेव प्रमाणहीनम्। महाकविनिबन्धेषु उक्तप्रकारदर्शनमेव प्रमाणमिति चेन्न उदाहृतश्लोकेषु तद्व्यभिचारस्यापि दर्शनात्। किञ्च, "विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन" इत्यतिदेशवाक्यस्य सामान्यमुखप्रवृत्ततया सर्वेषामेव पादानामन्तिमलघुवर्णस्य गुरुवद्भावे प्राप्ते "विकसितसहकारहारि" इत्यन्तिमलघुवर्णस्यापि गुरुवद्भावात् कुतो नाम हतवृत्ततायाः प्रसक्ति इत्यत उदाहरणान्तरे प्रकारान्तरेण हतवृत्ततां दर्शयितुमाह यथा वेति।

(भ) अन्या इति। ताः, गुणाः शौर्य्यसौन्दर्य्यादय एव रत्नानि तेषां रोहणभुव उत्पत्तिक्षेत्राणि, अन्याः साधारणविलक्षणाः; धन्या पुण्यवती सा मृत् एतद्देहोपादानभूता मृत्तिका, अन्यैव साधारणमृत्तिकाविलक्षणैव; ते खलु सम्भारा जलाद्युपकरणान्यपि, अन्य एव साधारणविलक्षणा एव; यैर्गुणरत्नरोहणभूप्रभृतिभिस्त्रिभिः करणैः, विधिना कर्त्रा, एष युवा सृष्टो निर्म्मितः। यत्र यूनि दृष्टे सति, मूढ़मनसां भयेन कामवेगोदयेन च कर्त्तव्याकर्त्तव्यज्ञानहीनात्मनाम्, श्रीमत आयुष्मतः अस्य यूनः कान्तिं समरारम्भकालीनवीरश्रीमां स्वाभाविकसौन्दर्य्यञ्च जुषन्ते सेवन्ते मनसा अनुभवन्तीति तेषां तासाञ्च, द्विषां शत्रूणां करतलात् अस्त्राणि पतन्ति; स्त्रीणाञ्च नितम्बस्थलात् वस्त्राणि पतन्ति। महावीरः परममनोहरश्चैष युवेति भावः।

(म) अत्र हतवृत्ततां प्रतिपादयितुमाह अत्रेति। बन्धस्य लघुवर्णेन रचितान्तिमभागस्य श्लथत्वश्रुतिः लघुवर्णस्वभावादुपान्ते संयोगाभावाच्च शैथिल्यश्रवणम्। तथा च शार्दूलविक्रीड़िते वृत्ते अन्तिमवर्णस्य गुरुत्वनियमेन दृढ़त्वश्रवणावश्यकत्वादत्र तु तदभावात् हतवृत्ततेति भावः। समाधानमाह—वस्त्राण्यपीति। दार्ढ्यम् उपान्ते संयुक्तवर्णसत्त्वाद्दृढ़त्वश्रुतिः, इति हेतोर्न दोष न हतवृत्तता।

---

(१) काव्यप्रकाशकारादय इति क्वचित् पाठः। (२) अश्रव्यत्वम् इति पुस्तकविशेषे पाठः।

"प्रोज्ज्वलज्ज्वलनज्वाला-विकटोरुसटाच्छटः ।
श्वासक्षिप्तकुलक्ष्माभृत् पातु वो नरकेशरी ॥" (ल)

अत्र क्रमेणानुप्रासप्रकर्षः पतितः (व) ।

"दलिते उत्पले एते अक्षिणी अमलाङ्गि ! ते" ॥ (श)

(य) आप्ततरमतं प्रमाणयति इदमिति । काव्यप्रकाशे इदमित्यादिपाठादर्शनात् अप्राप्तगुरुभावान्तलघुस्थले एतस्योदाहरणात्त्व इति काव्यप्रकाशकारो मन्यत इत्यर्थः ।

(र) ये तु हतवृत्ततया अपरभेदद्वयमनावश्यकं मन्यमानाः सकलसंग्रहोपपत्तेः केवलं लक्षणानुसरणोऽप्यश्रव्यतारूपं भेदमेवाङ्गीकुर्वन्ति तन्मतमाह वस्तुतस्त्विति ।

इदमत्रालोचनीयम्—"यत्पादान्ते लघोरपि गुरुभाव उक्तः" इत्यादिनियमाभिधानमकिञ्चित्करम्, तादृशनियमप्रमाणाभावात्, "विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन" "गुरुः पादान्तगोऽपि वा" इति सामान्यशास्त्रस्य विना कारणं सङ्कोचकल्पनापत्तेः, उक्तनियमेन चतुर्थचरणान्तिमाक्षरतया गुरुत्वावश्यम्भावेऽपि लघुत्वाभिप्रायेण "वस्त्राणि च" इत्यत्र आत्मन एव हतवृत्ततादोषप्रदर्शनानुपपत्तेः, तथैव तु गुरुत्वावश्यम्भावेऽपि "इदमप्राप्तगुरुभावान्तलघु" इत्याप्ततरकाव्यप्रकाशकारमतेन सह दुर्निवारविरोधप्रसङ्गाच्च । अतः "यत्पादान्ते" इत्याद्यभिधानन्तु प्रायिकत्वेन प्रदर्शनमात्रपरम् । सर्वेष्वेव छन्दःसु सर्वेषामेव पादानामान्तिमलघुवर्णस्य विकल्पेन गुरुत्वमेव । तत्र च वर्णविशेषस्वभावात् शैथिल्यश्रवणे हतवृत्ततादोषः, दृढत्वश्रवणे तु नासौ दोष इत्यत्रत्यग्रन्थपर्य्यालोचनादस्मान्त एव सिद्धान्तः । तेन च 'भारहारि' 'वस्त्राणि च' इत्युभयत्रापि पादान्तगतत्वेन गुरुत्वसम्भवेऽपि स्वल्पप्राणवर्णतया शैथिल्यश्रवणादेव हतवृत्ततादोष इति सर्वमवदातम् ।

कण्ठाभरणकारस्तु यतिभङ्गमपि दोषान्तरत्वेनाह स्म । यथा—

"अस्थाने विरतिर्यस्य तत्तु भग्नयतीष्यते ।"

(ल) पतत्प्रकर्षतामुदाहरति प्रोज्ज्वलदिति । तल्लक्षणन्तु क्रमिकप्रकर्षहीनत्वम् । क्रमिकप्रकर्षह्रासेन श्रोतुरानन्दस्यापि क्रमिकह्रासात् रसप्रकर्षहानिरस्य दोषत्वम् । अयञ्चानित्यो दोषः, "पतत्प्रकर्षता तथा" इत्यनेन क्वचिद्गुणतया वक्ष्यमाणत्वात् ।

प्रोज्ज्वलत उद्दीप्यमानस्य ज्वलनस्य वह्नेः ज्वाला शिखेव विकटा भीषणा उर्वी महती च सटाच्छटा जटासमूहो यस्य सः । तथा श्वासेन निश्वासवायुना क्षिप्ता दूरं नीताः कुलक्ष्माभृतः कुलपर्वता येन स तादृशो नरकेशरी नरसिंहरूपी भगवान् वो युष्मान् पातु रक्षतु ।

(व) अत्रेति । तथा च प्रथमे चरणे एकविधैरेव त्रिभिः संयुक्तज्वकारैर्घटितोऽनुप्रासः परममनोहरः, द्वितीये त्रिभिरसंयुक्तटकारैर्विहित इति पूर्वस्मात् किञ्चिदपकृष्टः तृतीये च संयुक्तक्षकारद्वयेन घटित इति द्वितीयादपि निकृष्टः, चतुर्थे च पुनः केवलरेफद्वयेन घटित इति तृतीयादप्यपकृष्ट इति भावः ।

(श) सन्धिविश्लेषोदाहरणमाह दलिते इति । तत्र सन्धिविहीनत्वमेव सन्धिविश्लेषः । स च निषिध-

एवंविधसन्धिविश्लेषस्य असकृत् प्रयोग एव दोषः। अनुशासनमुल्लङ्घ्य वृत्तभङ्गभयमात्रेण सन्धिविश्लेषस्य तु सकृदपि (ष)। यथा—

"वासवाशामुखे भाति इन्दुश्चन्दनविन्दुवत्॥" (स)

"चलण्डामरचेष्टितः।" इति (ह)।

सत्त्वे असकृत्प्रयुक्तः, विधिसत्त्वे तु सकृदप्यप्रयुक्तश्चेति द्विविधः। ईदृशे च सन्धिविश्लेषे श्रोतुः कथमिव विरक्तिरुपजायत इति रसप्रकर्षनाशाद्दोषत्वम्। एष तु नित्य एव दोषः प्रतिप्रसवाभावात्।

"मुखं पूर्णः शरच्चन्द्रो मृणालश्च भुजद्वयम्।" इति मत्पूरितपूर्वार्द्धम्।

हे श्मलाक्षि! ते तव एते अक्षिणी चक्षुषी, दलिते प्रस्फुटिते उत्पले नीलोत्पलयुगलस्वरूपे इत्यर्थः। अत्र पदान्तरप्रयोगेणैवेष्टशार्थबोधनसम्भवेऽपि निषेधसत्त्व एव सन्ध्यकरणात् सन्धिविश्लेषः।

(ष) अनुभवसिद्धां व्यवस्थामाह एवंविधेति। सकृदपि सकृत्प्रयोगेऽपि दोष इत्यनुषज्यते। तथैव श्रोतुर्वैमनस्यापातादित्यभिप्रायः।

(स) द्वितीयप्रकारं सन्धिविश्लेषमुदाहरति वासवेति। अस्य मत्पूरितपूर्वार्द्धं यथा—

"राजते तारकाराजी स्वराशिरिवाम्बरे।"

वासवाशामुखे पूर्वदिश उपरिभागे इन्दुश्चन्द्रः चन्दनविन्दुवत् भाति; इदानीमपि पादपान्तरिता-परांशतया कियदंशस्यैव प्रकाशादिति भावः।

अत्र 'भाति इन्दुः' इत्यत्र सन्धिप्राप्तावपि तदकरणात् सन्धिविश्लेषः। न च तथात्वे च्युतसंस्कारते-वापत्तामिति वाच्यम्--

"संहितैकपदे नित्या नित्या धातूपसर्गयोः। सूत्रेष्वपि तथा नित्या सैवान्यत्र विभाषया॥"

इत्युक्तेभिन्नपदे सन्धेर्वैकल्पिकत्वेन व्याकरणलक्षणहीनत्वाभावात्। एवञ्च "अनुशासनमुल्लङ्घ्य" इति वृत्तिपङ्क्तेः पक्षे प्राप्तमप्यनुशासनमतिक्रम्येत्यर्थः। एतेन "अत्र नित्यं संहितैकपदवत्पादेष्वर्द्धान्तवर्जम्" इत्यनुशासनात् "पद्ये सन्धेर्नित्यत्वमिति तल्लङ्घनाद्दोषः" इति रामचरणोक्तमपास्तम्। तथात्वे च्युतसंस्कार-ताया दुर्निवारत्वात्। किञ्च नित्यं संहितेति नित्यसंहितासम्भवप्रदर्शनपरम्, न तु नित्यमेव सन्धिविधान-परम्। अन्यथा "अथ प्रदोषे दोषज्ञः संवेशाय विशाम्पतिम्" इत्यादावपि सन्धेर्नित्यत्वे विसर्गस्थित्या सन्धि-विश्लेषदोषापत्तिः।

(ह) सन्ध्यश्लीलतामुदाहरति चलेति। सन्धिनैव घटिता अश्लीलता सन्ध्यश्लीलता। एतेन पदांश-गताश्लीलतादोषादस्य भेदोऽपि दर्शितः। न च पदांशगता अश्लीलता सन्धिघटिता। ईदृशपदश्रवणेन श्रोतुर्वैमनस्यापातात् रसप्रकर्षनाशेनास्य दोषत्वम्। अयन्तु अनित्यो दोषः, "सुरतारम्भगोष्ठ्यादावश्लीलत्वं तथा पुनः" इति वक्ष्यमाणेन सामान्याश्लीलताया एव गुणत्वेन प्रतिप्रसवात्।

"वेगादुड्डीय गगने चलण्डामरचेष्टितः।

अयमुत्पतते पत्री ततोऽत्रैव रुचिङ्कुरु॥" इति काव्यप्रकाशे पूर्णं पद्यम्।

चलन् प्रसरन्, डामरमुद्धतं चेष्टितं कार्यं यस्य सः।

अत्र सन्धौ जुगुप्साव्यञ्जकमश्लीलत्वम् (च)।

"उर्व्यसावत्र तर्वाली मर्वन्ते चार्ववस्थितिः।" (क)

अत्र सन्धौ कष्टत्वम् (ख)।

"इन्दुर्विभाति कर्पूरगौरैर्धवलयन् करैः।
जगन्मा कुरु तन्वङ्गि! मानं पादानते प्रिये॥" (ग)

(च) अत्रेति। सन्धौ सति। तथा च चलन् डामरचेष्टित इत्यत्र सन्धिनिष्पन्नस्य चलण्डामरशब्दस्य अन्तर्गतो लण्डाशब्दः प्रगाढ़ं दीर्घाकारं पुरीषं बोधयतीति जुगुप्साव्यञ्जकत्वमिति भावः।

अत्रार्थे क्लीवलिङ्गोऽपि लण्डशब्दो दृश्यते। यथा श्रीभागवते—

"समेधमानेन स कृष्णबाहुना निरुद्धवायुश्चरणांश्च निक्षिपन्।
प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लण्डं विसृजन् क्षितौ व्यसुः॥"

व्रीडाव्यञ्जकसन्ध्यश्लीलता यथा—अत्रैव पद्ये रुचिं कुरु इत्यत्र सन्धिनिष्पन्नस्य रुचिङ्कुरु इति शब्दस्य अन्तर्गतः 'चिङ्कु' इति शब्दो देशविशेषे स्त्रीणां योनिदेशान्तर्गतमवयवविशेषं बोधयतीति व्रीडाव्यञ्जकं सन्ध्यश्लीलत्वम्। एवमेव काव्यप्रकाशटीकायां महेश्वरः।

अमङ्गलव्यञ्जकं सन्ध्यश्लीलत्वं यथा—"श्रयति चिरमरणं दुर्बलः।" अत्र चिरम् अरणम् इत्यत्र सन्धिनिष्पन्नस्य चिरमरणशब्दस्य अन्तर्गतो मरणशब्दः अमङ्गलं व्यनक्तीति।

(क) सन्धिकष्टतामुदाहरति उर्व्यसाविति। सन्धिनैव घटिता कष्टता सन्धिकष्टता। अत्रापि पूर्ववदेव क्लिष्टत्वदोषाद्भेदः समुन्नेयः। सन्धिवशेनार्थप्रतीतिविलम्बात् रसप्रतीतेरपि विलम्बेन तत्प्रकर्षनाशादस्य दोषत्वम्। अयमप्यनित्यो दोषः,—"वैयाकरणमुख्ये तु" इत्यादिना क्वचित् प्रतिप्रसवस्य वक्ष्यमाणत्वात्।

"नात्रर्जु युज्यते गन्तुं शिरो नमय तन्मनाक्॥" इति काव्यप्रकाशे परार्द्धम्।

अत्र मरौ मरुभूमेः, अन्ते प्रान्तदेशे, चारुर्मनोहरा अवस्थितिरवस्थानं यस्याः सा, असौ दृश्यमाना उर्वी महती, तरूणाम् आली वृक्षाणां श्रेणी, वर्त्तत इति शेषः।

(ख) अत्रेति। सन्धौ सति, कष्टत्वम् अर्थबोधे श्रोतुः क्लिष्टत्वम्। अतः सन्धिकष्टतादोष इत्याशयः।

(ग) अर्द्धान्तरैकपदतामुदाहरति इन्दुरिति। तल्लक्षणन्तु स्वावस्थानार्द्धादपरार्द्धसन्निविष्टैकमात्रपदवद्वाक्यत्वमर्द्धान्तरैकपदत्वमिति। अत्र मात्रपदादर्द्धान्तरे अनेकपदसत्त्वे नायं दोष इति बोध्यम्। एकार्द्धावस्थितवाक्यस्य एकस्मिन् पदे अपरार्द्धावस्थिते तदनुसन्धानेन श्रोतुर्विलम्बाद्विलम्बेन रसप्रतीतिरिति दोषत्वमस्य। अयन्तु नित्यो दोषः प्रतिप्रसवासम्भवात्। एष च पूर्वार्द्धवाक्यघटकैकपदस्य परार्द्धे पाठे, परार्द्धवाक्यघटकैकपदस्य च पूर्वार्द्धे पाठे सम्भवतीति द्विविधः। एवमयं पद्य एव सम्भवति गद्ये अर्द्ध-नियमाभावात्।

अत्र प्रथमप्रकारे उदाहरणम् इन्दुरिति। इन्दुश्चन्द्रः कर्पूरवत् गौरैः शुभ्रैः करैः रश्मिभिः जगत् धवलयन् धवलीकुर्वन् सन् विभाति। अतएव हे तन्वङ्गि! पादानते प्रिये मयि मानं मा कुरु।

अत्र जगदिति प्रथमार्द्धे पठितुमुचितम् (घ) ।

"नाशयन्तो घनध्वान्तं तापयन्तो वियोगिनः ।
पतन्ति शशिनः पादा भासयन्तः क्षमातलम् ॥" (ङ)

अत्र चतुर्थपादो वाक्यसमाप्तावपि पुनरात्तः (च) ।

अभवन्मतसम्बन्धो यथा—(छ)

"या जयश्रीर्मनोजस्य यया जगदलङ्कृतम् ।
यामेणाक्षीं विना प्राणा विफला मे कुतोऽद्य सा ॥" (ज)

अत्र प्रथमार्द्धगतवाक्यघटकीभूतस्य 'जगत्' इत्येकमात्रपदस्य परार्द्धे पाठादर्द्धान्तरैकपदता ।
द्वितीयप्रकारे यथा—"बाले ! ललितवल्लीयम् भाशिष्यति तरुन्तु माम् ।
भराबसन्नमासन्नं कथं नाशिष्यसि प्रियम् ॥"
अत्र सत्प्रणीतपद्ये द्वितीयार्द्धगत-वाक्यघटकीभूतस्य मामित्येकपदस्य द्वितीयार्द्ध एव पाठो युक्तः ।

(घ) अत्रेति । तथा पाठे च नासौ दोष इति भावः ।

(ङ) समाप्तपुनरात्ततामुदाहरति नाशयन्त इति । तल्लक्षणन्तु समाप्तवाक्यस्ययत्किञ्चित्पदविशेषण-तया पदान्तरोपादानम् । वाक्यस्य समाप्तत्वञ्च विवक्षितकारकादिलाभेन निराकाङ्क्षत्वमेव । समाप्तस्य पुन-रात्तत्वे पुनरप्याकाङ्क्षोदयेन तदन्वयिपदानुसन्धानविलम्बात् रसप्रतीतिविलम्बे नास्य दोषत्वम् । अयन्तु अनित्यो दोषः, "समाप्तपुनरात्तत्वं न दोषो न गुणः क्वचित्" इत्यनेन क्वचित् प्रतिप्रसवस्य वक्ष्यमाणत्वात् । एष तु क्वचित् कर्त्तृपदस्य क्वचित् कारकान्तरस्य क्वचित् सम्बन्धिपदस्य च विशेषणतया पदान्तरोपादानात् सम्भव-तीति बहुविधः ।

तत्र कर्त्तृपदविशेषणतया पदान्तरोपादाने यथा नाशयन्त इति । शशिनश्चन्द्रस्य पादाः किरणाः, घन-ध्वान्तं निविड़ान्धकारं नाशयन्तः, वियोगिनो जनान् तापयन्तः, क्षमातलं भूतलं भासयन्तः प्रकाशयन्तश्च सन्तः पतन्ति ।

(च) अत्रेति । चतुर्थपादश्चतुर्थपादगतं भासयन्त इति पदम् । पुनरात्तः पादा इत्यस्य विशेषणतया पुनः प्रयुक्तः । अतएवात्र समाप्तपुनरात्ततेति भावः ।

कर्म्मविशेषणतया पदान्तरोपादाने यथा मम—

"स्मितस्नपितदन्तालीमाश्लेषप्रसरद्भुजाम् । प्रेयसीं चुम्बति प्रेयान् रोमाञ्चितकलेवराम् ॥"

अत्र वाक्यसमाप्तावपि कर्म्मविशेषणतया पुनश्चतुर्थपादपदोपादानात् समाप्तपुनरात्तत्वम् । एवमन्यत्रा-प्यूह्यम् ।

(छ) अभवन्मतसम्बन्धतां दर्शयति अभवन्मतेति । एतत्पदस्य व्युत्पत्तिस्तु प्रागेव दर्शिता । लक्षणन्तु पदविशेषस्य अभिमतसम्बन्धानुपपत्तिमद्वाक्यत्वमभवन्मतसम्बन्धत्वमिति । वक्तुरभिमतसम्बन्धानुपपत्त्या श्रोतु-र्वैमनस्योदयेन रसप्रकर्षनाशादस्य दोषत्वम् । नित्य एवायं दोषः प्रतिप्रसवाभावात् । एष तु क्वचिदाकाङ्क्षा-विरहेण क्वचिद्वा प्रयुक्तपदस्य योग्यताया अभावेन अभिमतसम्बन्धानुपपत्तौ सम्भवतीति द्विविधः ।

अत्र यच्छब्दनिर्दिष्टानां वाक्यानां परस्परनिरपेक्षत्वात् तदेकान्तःपातिना एणाक्षीशब्देन अन्येषां सम्बन्धः कवेरभिमतो नोपपद्यत एव (झ)।

"यां विनामी वृथा प्राणा एणाक्षीं सा कुतोऽद्य मे ।" (ञ)

इति तच्छब्दनिर्दिष्टवाक्यान्तःपातित्वे तु सर्वैरपि यच्छब्दनिर्दिष्टवाक्यैः सम्बन्धो घटते (ट)।

यथा वा—(ठ)

"ईक्षसे यत् कटाक्षेण तदा धन्वी मनोभवः ॥" (ड)

अत्र यदित्यस्य तदेत्यनेन सम्बन्धो न घटते (ढ)। "ईक्षसे चेत्" इति तु युक्तः पाठः (ण)।

(ञ) तत्राद्यमुदाहरति येति। या मनोजस्य कामदेवस्य जयश्रीर्विजयलक्ष्मीः, यया जगदलङ्कृतम्, याम् एणाक्षीं हरिणलोचनां विना मे मम प्राणाः विफलाः, अद्य सा कुतः कुत्र वर्त्तते ?।

(झ) उदाहृते अभवन्मतसम्बन्धतामुपपादयितुमाह अत्रेति। यच्छब्देन निर्दिष्टानां चिह्नितानाम्। परस्परनिरपेक्षत्वादन्योन्याकाङ्क्षाविरहात्। अयन्तु नोपपद्यत एवेत्येतत् प्रति हेतुः। तेषु वाक्येषु मध्ये एकस्य वाक्यस्य अन्तःपातिना अन्तर्गतेन। अन्येषां वाक्यानाम्। तथा च "या एणाक्षी मनोजस्य जयश्रीः, यया एणाक्ष्या जगदलङ्कृतम्, यामेणाक्षीं विना मे प्राणा विफलाः" इत्थं सर्वत्र यच्छब्दविशेष्यविधया एणाक्षीशब्दसम्बन्धः कवेरभिमत इति एकत्र एणाक्षीशब्दोपन्यासादेव प्रतीयते ; स तु सम्बन्धः वाक्यानां परस्पराकाङ्क्षाविरहात् एणाक्षीमिति द्वितीयाविभक्तिनिर्देशाच्च न घटत इत्यभवन्मतसम्बन्धतादोष इति भावः।

(ञ) यादृशपाठेन एणाक्षीशब्दस्य सर्वत्र सम्बन्धो घटते तादृशपाठमाह यामिति।

(ट) इतीति। तच्छब्दनिर्दिष्टवाक्यान्तःपातित्वे प्रदर्शितप्रकारेण एणाक्षीशब्दस्य तच्छब्दान्वितवाक्यान्तर्गतत्वे तु सति। सम्बन्धो घटत इति। "यत्तदोर्नित्यः सम्बन्धः" इति न्यायेन परस्पराकाङ्क्षासत्त्वात्, तच्छब्दविशेष्यभूतपदार्थस्य सर्वयच्छब्दानामेव विशेष्यत्वसम्भवादिति भावः। अतएव "यां विनामी" इत्यादिपरिवर्त्तितपाठे नाभवन्मतसम्बन्धतादोष इति बोध्यम्।

(ठ) प्रयुक्तपदस्य योग्यताया अभावेनाभिमतसम्बन्धानुपपत्तौ द्वितीयप्रकाराभवन्मतसम्बन्धतामुदाहर्त्तुमाह यथा वेति।

(ड) ईक्षस इति। "सन्निधत्से यदा कान्ते ! सन्निधत्तेऽप्यसौ तदा।" इति मत्पूरितपूर्वार्द्धम्। यद्यदा त्वं कटाक्षेण ईक्षसे जनं पश्यसि, तदा तं प्रति मनोभवः कामदेवो धन्वी धनुर्धारी भवति।

(ढ) अत्रेति। यदित्यस्य प्रथमान्ततया कालार्थकसप्तम्यन्तेन सहान्वये योग्यताया अभावादित्याशयः। अतएव ईक्षसे यदित्यादावपि अभवन्मतसम्बन्धतादोषः।

(ण) उक्तदोषसमाधानप्रकारं दर्शयति ईक्षसे चेदिति। युक्तः पाठ इति। चेदित्यस्य यद्यर्थकतया तदेत्यनेन सम्बन्धस्य सुघटत्वादित्यभिप्रायः।

यथा वा—(त)

"ज्योत्स्नाचयः पयःपूरस्तारकाः कैरवाणि च ।
राजति व्योमकासार-राजहंसः सुधाकरः ॥" (थ)

अत्र व्योमकासारशब्दस्य समासे गुणीभावात्तदर्थस्य न सर्वैः संयोगः (द)। विधेयाविमर्शे यदेवाविमृष्टं तदेव दुष्टम्। इह तु प्रधानस्य कासारपदार्थस्य प्राधान्येनाप्रतीतेः सर्वोऽपि पयःपूरादिशब्दार्थस्तदङ्गतया न प्रतीयत इति सर्ववाक्यार्थविरोधावभास इत्युभयोर्भेदः (ध)।

"अनेन छिन्दता मातुः कण्ठं परशुना तव ।
बद्धस्पर्द्धः कृपाणोऽयं लज्जते मम भार्गव ! ॥" (न)

(त) प्रकारान्तरेण योग्यताया अभावादभिमतसम्बन्धानुपपत्तौ अभवन्मतसम्बन्धतां दर्शयितुमाह यथा वेति ।

(थ) ज्योत्स्नेति । ज्योत्स्नानां चयः समूह एव पयःपूरो जलराशिः, तारका नक्षत्राण्येव कैरवाणि कुमुदानि च । तथा सुधाकरश्चन्द्र एव, व्योम आकाशमेव कासारः सरोवरः तस्य राजहंसो राजति ।

(द) अत्रेति । गुणीभावात् राजहंसमात्रस्यैव विशेषणीभूतत्वात्, तदर्थस्य व्योमकासारशब्दाभिधेयस्य, सर्वैर्ज्योत्स्नाचयरूपपयःपूरादिभिः सह संयोगः सम्बन्धो नोपपद्यत इति शेषः । तथा च आकाशरूपे सरोवरे ज्योत्स्नासमूहरूपो जलराशिः, नक्षत्ररूपाणि चन्द्ररूपश्च राजहंसो राजति इति हि कवेरभिमतः सम्बन्धः स तु नोपपद्यत एव, व्योमकासारशब्दस्य राजहंसशब्देन सह समासेन तन्मात्रस्यैव विशेषणीभूततया अन्यैः सह सम्बन्धे योग्यताया अभावात् ईदृशैकदेशिन सह अन्येषां सम्बन्धस्य अव्युत्पन्नत्वादित्याशयः । अतएवात्रापि अभवन्मतसम्बन्धतैव । "राजति व्योम्नि कासारे" इति पाठे तु नोक्तो दोषः ।

(ध) ननु तर्हि विधेयाविमर्शेन सङ्कैक्यापत्तिरित्याह विधेयेति । यदेव पदम्, अविमृष्टम् अप्राधान्येन निर्दिष्टम् । सर्वेषां वाक्यानामर्थस्य विरोधावभासः अनन्वितत्वेन प्रतीतिः । तथा चात्र साङ्गरूपकमलङ्कारः, तेन व्योम्नि कासारत्वारोपः प्रधानम्, ज्योत्स्नाचयादौ पयःपूरत्वाद्यारोपस्तु तन्निर्वाहकतया तदङ्गमित्यवश्यं वक्तव्यम् ; किन्तु कासारपदार्थस्य समासेनाप्रधानीकृतत्वात् तदङ्गतया पदार्थान्तराणां न प्रतीतिः, अप्रधानानां परस्परमङ्गाङ्गिभावानङ्गीकारादित्याशयः । न च तथापि वाक्यगतविधेयाविमर्शेन सङ्कैक्यापत्तिरिति वाच्यम्, तादृशदोषाणां पदद्वयादिगतत्वेनैव वाक्यगतत्वस्य परिभाषितत्वात् अस्य तूक्तरीत्या सर्ववाक्यगतत्वस्य वास्तवत्वात् ।

(न) प्राचीनमते प्रकारान्तरेणायोग्यतायामेव अभवन्मतसम्बन्धतामुदाहरति अनेनेति । हे भार्गव ! परशुराम ! मातुः कण्ठं छिन्दता अनेन तव परशुना सह बद्धस्पर्द्धः आरब्धवैरः अयं मम कृपाणस्तरवारिः लज्जते ; गुरुतरपातकिना सह वैराचरणस्यापि तत्पापसंक्रामकत्वेनानौचित्यादिति भावः ।

अत्र "भार्गवनिन्दायां प्रयुक्तस्य मातृकण्ठच्छेदनकर्त्तृत्वस्य (१) परशुना सम्बन्धो न युक्तः" इति प्राच्याः (प) ।

"परशुनिन्दामुखेन भार्गवनिन्दाधिक्यमेव वैदग्ध्यं द्योतयति" इत्याधुनिकाः (फ) ।

अक्रमता यथा—(ब)

"समय एव करोति बलाबलं प्रणिगदन्त इतीव शरीरिणाम् ।
शरदि हंसरवाः परुषीकृतस्वरमयूरमयू रमणीयताम् ॥" (भ)

अत्र परामृश्यमानवाक्यानन्तरमेव इतिशब्दप्रयोगो युज्यते, (२) न तु प्रणिगदन्त इत्यनन्तरम् (म) । एवम्—(य)

"इयं गतं सम्प्रति शोचनीयतां समागमप्रार्थनया पिनाकिनः (३) ।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥" (र)

(प) अत्रेति । न युक्त इति । तथा च अचेतने परशौ कारकान्तरप्रयोजकत्वरूपस्य कर्त्तृत्वस्य स्थातुमयोग्यत्वात् कवेरभिमतोऽपि परशौ कर्त्तृत्वसम्बन्धो नोपपद्यत इत्यभवन्मतसम्बन्धतादोष एवेति भावः । प्राच्याः प्राचीनाः ।

(फ) परश्विति । परशोर्निन्दामुखेन निन्दाद्वारा । वैदग्ध्यं कवेर्निर्म्माणनैपुण्यम् । तथा च "स्थाली पचति" इत्यादाविव करणभूते परशौ कर्त्तृत्वारोपः ; तेन चारोपितेनापि कर्त्तृत्वेनाचेतनस्यापि परशोर्निन्दा, तत्र तु चेतनस्यैव वास्तवकर्त्तृत्वेन च निन्दायां का कथेति निन्दाधिक्यमुन्नेयम् । एवञ्च परशौ कर्त्तृत्वसम्बन्धो घटत एवेति नाभवन्मतसम्बन्धतादोष इत्याधुनिकानामाशयः ।

(ब) अक्रमतां दर्शयति अक्रमतेति । तत्र स्वानुपस्थाप्यपदोत्तराव्ययपदप्रयोगवत्त्वमक्रमत्वम् । रूपद-मव्ययपदपरम् । अस्थाने अव्ययपदप्रयोगे अक्रमता अस्थाने अनव्ययपदप्रयोगे तु अस्थानस्थपदतेति भेदः । अस्य तु उपस्थाप्यपदानुसन्धान वलम्बेन रसप्रतीतिविलम्बाद्दोषत्वम् । अयन्तु नित्य एव दोषः प्रतिप्रसवाभावात् ।

(भ) अक्रमतामुदाहरति समय इति । शिशुपालवधषष्ठसर्गे श्लोकोऽयम् । समयः काल एव शरीरिणां बलाबलं प्रबलदुर्बलभावं करोति, इति प्रणिगदन्त इव ब्रुवन्त इव, शरदि शरत्काले हंसानां रवा नादाः परुषीकृताः कर्कशीकृताः स्वराः कण्ठशब्दा येषां ते तथोक्ता मयूरा यस्मिन् कर्म्मणि तद्यथा तथा रमणीयतां चारुताम्, अयुः प्राप्ताः ।

(म) अत्रेति । परामृश्यमानवाक्यानन्तरमेव स्वोपस्थाप्यमानवाक्यात् परमेव । तथा च "समय एव करोति बलाबलम् इति वदन्त इवात्र शरीरिणाम्" इति पाठे नैष दोष इत्याशयः ।

---

(१) छेदकर्त्तृत्वस्य छेदनस्य इति पाठभेदौ । (२) युक्त इति क्वचित् पाठः ।
(३) कपालिन इति पाठान्तरम् ।

अत्र त्वमित्यनन्तरमेव चकारो युक्तः (ल) ।

अमतपरार्थता यथा—(व)

"राममन्मथशरेण ताड़िता—" इत्यादि (१६२ पृष्ठे) ।

अत्र शृङ्गाररसस्य व्यञ्जको द्वितीयोऽर्थः प्रकृतरसविरोधित्वादनिष्टः (श) ।

वाच्यस्यानभिधानं यथा—(ष)

"व्यतिक्रमलवं कं मे वीक्ष्य वामाक्षि ! कुप्यसि ? ॥" (स)

अत्र व्यतिक्रमलवमपीत्यपिरवश्यं वक्तव्यो नोक्तः (ह) ।

(य) पदान्तरेणाक्रमतां दर्शयितुमाह एवमिति ।

(र) इयमिति । कुमारसम्भवपञ्चमसर्गे श्लोकोऽयम् । सम्प्रति इयं पदार्थद्वयं पिनाकिनः शिवस्य समागमप्रार्थनया संसर्गेच्छया शोचनीयतां गतं प्राप्तम् । किन्तत् इयमित्याह । कान्तिमती नित्यमेव शोभावती सा प्रसिद्धा, कलावतश्चन्द्रस्य कला च षोड़शभागैकभागश्च, तथा अस्य दृश्यमानस्य लोकस्य भुवनस्य नेत्रकौमुदी कौमुदीवन्नयनानन्दकारिणी त्वञ्च ।

(ल) अत्रेति । चकारेण त्वमित्यस्यैवोपस्थापनीयत्वादिति भावः । एवञ्च "जगद्दशस्त्वञ्च विशुद्धचन्द्रिका ।" इति चतुर्थचरणपाठे तु नायं दोष इति बोध्यम् ।

(व) अमतपरार्थतां दर्शयति अमतेति । अमतः प्रकृतरसविरोधिरसव्यञ्जकत्वादनभिमतः परार्थो द्वितीयार्थो यस्य वाक्यस्य तत्तथोक्तम्, तस्य भावः सा । तथा च प्रकृतरसविरोधिरसव्यञ्जकद्वितीयार्थबोधकवाक्यत्वममतपरार्थत्वमिति लक्षणम् । व्यज्यमानेन विरोधिरसेन प्रकृतरसस्यापकर्षजननादस्य दोषत्वम् । अयमपि नित्य एव दोषः प्रतिप्रसवाभावात् ।

(श) अत्रेति । प्रकृतरसस्य बीभत्सरसस्य विरोधित्वात् "आद्यः करुणबीभत्सरौद्रवीरभयानकैः" इत्युक्तनयेन आस्वादप्रतिबन्धकत्वात् ।

(ष) वाच्यानभिधानमाह वाच्यस्येति । अवश्यवक्तव्यस्यानभिधानं वाच्यस्यानभिधानम् । अवश्यवक्तव्यस्यानभिधानात्तदनुसन्धानविलम्बेन रसप्रतीतिविघ्नत्वादस्य दोषत्वम् । अयन्त्वनित्य एव दोषः, "उक्तावानन्दमग्नादेः" इत्यादिना न्यूनपदतायाः प्रतिप्रसवेनास्यापि प्रतिप्रसवात् अनयोः समानविषयत्वात् ।

(स) वाच्यानभिधानमुदाहरति व्यतिक्रमेति । अस्य सत्पूर्वार्द्धं यथा—

"नाप्यं दृशापि पश्यामि वसाम्येव च तेऽन्तिके ।"

हे वामाक्षि ! सुलोचने ! मे मम कं कञ्चित् व्यतिक्रमलवं त्रुटिलेशमपि वीक्ष्य कुप्यसि ? क्रुद्धासि किमिति काकुः ।

(ह) अत्रेति । अवश्यं वक्तव्य इति । अन्यथा अभिप्रेतार्थो नोपपद्यत इति भावः । अत्र कमित्यस्य अनिर्दिष्टार्थबोधकत्वे तु नायं दोष इति ध्येयम् । तथा च सतीदमुदाहरणम्—

"आज्ञा शीघ्रा वरमधिगुणा नाथसे लक्ष्मकामा ॥" इति ।

न्यूनपदत्वे वाचकपदस्यैव न्यूनता विवक्षिता, अपेस्तु न तथात्व-मित्यनयोर्भेदः (ख) ।

एवमन्यत्रापि (क) । यथा वा—(ख)

"चरणानतकान्तायास्तन्वि ! कोपस्तथापि ते ॥" (ग)

अत्र 'चरणानतकान्तासि' इति वाच्यम् (घ) ।

भग्नप्रक्रमता यथा—(ङ)

"एवमुक्तो मन्त्रिमुख्यै रावणः प्रत्यभाषत ।" (च)

अत्र मीघापि लब्धकामापि इति अपिद्वयमवश्यं वक्तव्यं किन्तु नोक्तमिति वाच्यानभिधानद्वयमेव ।

(ख) ननु न्यूनपदत्ववाच्यानभिधानयोः को भेदः, येनोभयमङ्गीक्रियत इत्याह न्यूनेति । अपेरपि-शब्दस्य तु, न तथात्वं न वाचकत्वम्, उपसर्गत्वेन द्योतकमात्ररूपत्वादिति भावः ।

(क) एवमिति । अन्यत्रापि अन्यविधद्योतकपदाभावस्थलेऽपि एवं वाच्यानभिधानमूहनीयमित्यर्थः । यथा—"नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः ।"

अत्र 'न तु' इति तुशब्दोऽवश्यं वक्तव्यः, किन्तु नोक्त इति ।

(ख) ननु अकिञ्चित्करं वाचकत्वद्योतकत्वभेदमनङ्गीकृत्य वरमुभयोरेकतरमेवाङ्गीक्रियतामित्यतो न्यूनपदताया अविषये वाच्यानभिधानं दर्शयितुमाह यथा वेति ।

(ग) चरणेति । "वचनेनानुनीतासि स्वेष्टवस्तुस्तुतासि च ।" इति मत्पूरितपूर्वार्द्धम् ।

हे तन्वि ! कृशाङ्गि ! चरणे आनतः कान्तो यस्यास्तस्यास्ते तव तथापि कोपः । अत्र तथापीत्यने-नावश्यमपेक्षणीयस्य वाक्यान्तरस्यानभिधानाद्वाच्यानभिधानदोषः ।

(घ) नन्वत्र तथापीत्यनेन किं नामापेक्षणीयं यद्वाच्यं स्यादित्याह अत्रेति । वाच्यमवश्यं व्यक्तव्यम् । अन्यथा तथापीत्यस्यान्वयः कथमपि नोपपद्यत इति भावः । अत्र तु न न्यूनपदत्वप्रसङ्गः, कस्यापि पदस्य न्यूनत्वाभावात् । न च तथापि, तथापीत्यस्य अभिमतसम्बन्धानुपपत्तेरभवन्मतसम्बन्धतादोष एवायमिति वाच्यम् ; अभिमतपदप्रयोगेण समाधेयत्वे अभवन्मतसम्बन्धतादोषः, अभिमतवाक्यप्रयोगेण समाधेयत्वे तु वाच्यानभिधानदोष इति नियमस्य सुवचत्वादिति दिक् ।

(ङ) भग्नप्रक्रमतां दर्शयति भग्नेति । भग्नो नष्टः प्रक्रमः प्रथमप्रकारो यत्र वाक्ये तस्य भावः सा । तेन प्रक्रान्तभिन्नप्रकारपदवत्त्वं भग्नप्रक्रमत्वमिति लक्षणम् । भिन्नप्रकारत्वञ्च समानकारकत्वे भिन्नवचनादि-मत्त्वं समानार्थकत्वे च भिन्नप्रकृतिमत्त्वमित्याद्यूहनीयम् । देवदत्तो ग्रामान् गच्छतीत्यादौ भिन्नवचनवत्त्वेऽपि समानकारकत्वाभावान्नातिप्रसङ्गः । भिन्नप्रक्रमवत्पदप्रयोगकारणानुसन्धानविलम्बात् रसप्रतीतिविलम्बे नास्य दोषत्वम् । अयन्तु नित्य एव दोषः प्रतिप्रसवाभावात् ।

(च) तत्र धातुरूपप्रकृतिभेदे भग्नप्रक्रमतामुदाहरति एवमिति । अस्य मत्पूरितपरार्द्धं यथा—

"मानभङ्गमुरीकृत्य नार्पयाम्येव जानकीम् ॥"

अत्र वचधातुना प्रक्रान्तं प्रतिवचनमपि तेनैव वक्तुमुचितम् । तेन 'रावणः प्रत्यवोचत' इति पाठो युक्तः (छ)। एवञ्च सति न कथितपदत्वदोषः, तस्योद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयकत्वात् (ज)। इह हि वचनप्रतिवचनयोरुद्देश्यप्रतिनिर्देश्यत्वम् (झ)। यथा—(ञ)

"उदेति सविता ताम्रस्ताम्र एवास्तमेति च ।" (ट)

अत्र यदि पदान्तरेण स एवार्थः प्रतिपाद्यते तदा अन्योऽर्थ इव प्रतिभासमानः प्रतीतिं स्थगयति (ठ)। यथा वा—(ड)

"ते हिमालयमामन्त्र्य पुनः प्रेक्ष्य च (१) शूलिनम् ।
सिद्धञ्चास्मै निवेद्यार्थं तद्विसृष्टाः खमुद्ययुः ॥" (ढ)

अत्र 'उक्तः प्रत्यभाषत' इति पदयोः प्रकृतिभेदाद्भिन्नप्रकारत्वमिति भग्नप्रक्रमता ।

(छ) अत्रेति । प्रक्रान्तम् उक्त इति पदेनेति शेषः । प्रतिवचनं प्रतिवचनबोधकं पदम् । तेनैव वचधातुनैव । युक्त इति । तादृशपाठे च अभिन्नप्रकृतिकत्वान्न भग्नप्रक्रमतेति भावः ।

(ज) ननु "रावणः प्रत्यवोचत" इति पाठे वचप्रकृतेरभिन्नार्थकत्वादेकानुपूर्वीकत्वाच्च पुनः कथितपदत्वदोषप्रसङ्ग इत्याह एवञ्चेति । तस्य कथितपदत्वदोषस्य । उद्देश्यं प्राक्प्रयोज्यमेव प्रतिनिर्देश्यं परमपि प्रयोज्यं यत्र विषये स तथोक्तस्तस्मात् व्यतिरिक्तो भिन्नो विषयः स्थलं यस्य तस्य भावस्तस्मात् । तथा च येन शब्देन यादृशोऽर्थः प्राक्प्रत्यायितः सहसैव, तेन शब्देनैव यत्र तादृश एवार्थः पुनः प्रत्याय्यते पूर्वापरयोरुभयोरर्थयोरभेदज्ञापनाय, स उद्देश्यप्रतिनिर्देश्यो नाम विषयः, तत्र न कथितपदत्वदोषः, तथात्वेन रसापकर्षजननाभावात् प्रत्युत तदुत्कर्षस्यैव जननादिति भावः ।

(झ) अत्र किन्तदित्याह इहेति । हि तथाहि । इह "एवमुक्तो मन्त्रिमुख्यैः रावणः प्रत्यवोचत" इत्यत्र । तथा च मन्त्रिमुख्यैर्यादृशभावेन रावण उक्तः, रावणोऽपि तादृशभावेनैव तत्प्रत्युक्तवानिति वचनप्रतिवचनयोरुक्तिप्रत्युक्त्योरभेदबोधनादुद्देश्यप्रतिनिर्देश्यत्वमित्यर्थः ।

(ञ) अत्र स्वोक्तिदृढत्वाय काव्यप्रकाशधृतं प्रसिद्धप्रमाणमुदाहर्त्तुमाह यथेति ।

(ट) उदेतीति । "सम्पत्तौ च विपत्तौ च महतामेकरूपता ॥" इति काव्यप्रकाशे परार्द्धम् ।

(ठ) ईदृशस्थले प्रत्युत शब्दान्तरप्रयोग एव दोषो भवतीति बोधयितुमाह इत्यत्रेति । पदान्तरेण रक्तप्रभृतिशब्देन, स एवार्थस्ताम्ररूप एवार्थः प्रतिपाद्यते बोध्यते । अन्योऽर्थ इव शब्दस्यान्यत्वादर्थोऽप्यन्य इव, प्रतिभासमानो बुद्धौ प्रकाशमानः, प्रतीतिम् उभयोरभेदज्ञानम्, स्थगयति आपाततो निवर्त्तयति । तथा चोक्तं काव्यप्रकाशटीकायां महेश्वरेण—"न सोऽस्ति प्रत्ययो लोके यत्र शब्दो न भासते ।"

तेन च ईदृशस्थले एकविधमेव शब्दद्वयं प्रयोज्यम्, तथापि न कथितपदत्वमित्याशयः ।

(ड) प्रातिपदिकात्मकसर्वनामरूपप्रकृतिभेदे भग्नप्रक्रमतामुदाहर्त्तुमाह यथा वेति ।

---

(१) प्राप्य च इति इदानीन्तनमूलपुस्तके पाठः ।

अत्र 'अस्मै' इति इदसा प्रक्रान्तस्य तेनैव तत्समानाभ्यामेतददः-शब्दाभ्यां वा परामर्शो युक्तः न तच्छब्देन [ण]। यथा वा—[त]

"उदन्वच्छिन्ना भूः स च पतिरपां योजनशतम् ।" [थ]

अत्र "मिता भूः पत्यापां स च पतिरपाम्" इति युक्तः पाठः [द]। एवम्—[ध]

"यशोऽधिगन्तुं सुखलिप्सया वा मनुष्यसंख्यामतिवर्त्तितुं वा ।
निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः ॥" [न]

(ढ) ते इति । कुमारसम्भवषष्ठसर्गे श्लोकोऽयम् । ते सप्तर्षयः, हिमालयमामन्त्र्य 'वयमिदानीं गच्छामः ?' इत्यापृच्छ्य शूलिनं शिवं पुनः प्रेक्ष्य साक्षात्कृत्य च अस्मै शूलिने सिद्धं निष्पन्नम् अर्थं प्रयोजनं निवेद्य च, तेन शूलिना विसृष्टाः सन्तः खमाकाशम् उदययुरुत्पतिताः ।

(ण) अत्रेति । इदसा इदंशब्देन । तेनैव इदमैव इदंशब्देनैव । तत्समानाभ्याम् इदं-शब्दसमानार्थाभ्याम् । परामर्शः सम्बन्धः । ननु एतददःशब्दाभ्यां परामर्शेऽपि पर्यायान्तरप्रयोगेण प्रक्रम-भङ्गात् "उदन्वच्छिन्ना भूः" इत्यादिवत् भग्नप्रक्रमतैवेति चेत्, सत्यम् । अतएव एतददःशब्दाभ्यां परामर्शपक्षे वाशब्देनानास्थां द्योतयति । उक्तिस्तु दोषलघुताप्रदर्शनार्थेति । अतएव काव्यप्रकाशकारेणोक्तम्—"अनेन विसृष्टा इति तु वाच्यम्" इति ।

(त) एकपर्यायत्वेऽपि प्रकृतिभेदे भग्नप्रक्रमतामुदाहर्त्तुमाह यथा वेति ।

(थ) उदन्वदिति । अस्य सत्पूरितपरपादद्वयं यथा—

"उदन्वच्छिन्ना भूः स च पतिरपां योजनशतं चतुष्कं तस्यापि प्रसृतिपुटके येन विधृतम् ।
शिरो विन्ध्यस्योच्चैरतिरविपथं येन नमितं महर्षिः सोऽगस्त्यो जयति जठरे जीर्णदनुजः ॥"

भूः पृथिवी उदन्वता समुद्रेण, छिन्ना परिच्छिन्ना, स च अपां पतिरुदन्वान् योजनशतं शतयोजनव्यापीत्यर्थः। अत्र उदन्वदित्यनेन प्रक्रम्य पुनरपां पतिरिति तस्यैव पर्यायीभूतप्रकृत्यन्तरस्य प्रयुक्तत्वाद्भग्नप्रक्रमतेत्याशयः ।

(द) तत्समाधानप्रकारं दर्शयितुमाह अत्रेति । भूः पृथिवी अपां पत्या समुद्रेण मिता परिमिता, स च अपां पतिः योजनशतमित्युक्तेनान्वयः । अत्र अपां पतिरिति प्रक्रान्तस्य पुनरपां पतिरित्यनेनैवाप-संहारान्न भग्नप्रक्रमता, उद्देश्यप्रतिनिर्देश्यविषयत्वाच्च न कथितपदतेति भावः ।

(ध) प्रत्ययभेदे भग्नप्रक्रमतां दर्शयितुमाह एवमिति ।

(न) यश इति । किरातार्जुनीयतृतीयसर्गे अर्जुनं प्रति द्रौपद्या उक्तिरियम् । यशः कीर्त्तिम् अधिगन्तुं लब्धुम्, सुखलिप्सया सुखं लब्धुमिच्छया वा, मनुष्यसंख्यां मानुषमध्ये गणनाम् अतिवर्त्तितुम् अति-क्रमितुं वा, अभियोगभाजाम् अभिनिवेशशालिनाम्, निरुत्सुकानां प्रयतसाध्यर्थमनुत्कण्ठितानां जनानाम्, सिद्धिः पूर्वोक्तयशःप्रभृतिनिष्पत्तिः समुत्सुका नितान्तोत्कण्ठिता कान्तेव अङ्कं क्रोडं समीपमित्यर्थः, उपैति आगच्छति।

अत्र यशोऽधिगन्तुमिति तुमुन्प्रत्ययेन प्रक्रम्य पुनः सुखलिप्सयेति सन्प्रत्ययस्य प्रयुक्तत्वेन प्रत्ययभेदाद्भग्न-प्रक्रमतेति भावः ।

अत्र 'सुखमीहितुम्' इत्युचितम् [प] ।

अत्राद्ययोः प्रकृतिविषयः प्रक्रमभेदः । तृतीये पर्य्यायविषयः । चतुर्थे प्रत्ययविषयः [फ] । एवमन्यत्रापि [ब] ।

प्रसिद्धित्यागो यथा—[भ]

"घोरो वारिमुचां रवः ।" [म]

(प) तत्समाधानं दर्शयितुमाह अत्रेति । सुखम् ईहितुमीप्सितुमित्येवार्थः । उचितं पठनमित्यर्थः । ईहशपाठे तु एकविधतुम्प्रत्ययात्र भग्नप्रक्रमतेत्याशयः ।

(फ) ननूदाहृतेषु कुत्र कीदृशः प्रक्रमभेद इत्याह अत्रेति । आद्ययोः "एवमुक्तो मन्त्रिमुख्यैः" "ते हिमालयमामन्त्र्य" इत्येतयोः । तृतीये "उदन्वच्छिन्ना भूः" इत्यत्र । पर्य्यायविषय एकपर्य्यायेऽपि प्रकृतिविषय इत्यर्थः । यथाश्रुतन्तु न सङ्गच्छते, उदन्वदपांपतिशब्दयोः पर्य्यायभेदाभावात् एकार्थवाचकाभिन्नानुपूर्वीकशब्दस्यैव पर्य्यायपदार्थत्वात् । चतुर्थे "यशोऽधिगन्तुम्" इत्यादौ ।

(ब) एवमिति । अन्यत्रापि उपसर्ग-कारक-वचनभेदादिष्वपि एवमूहनीयमित्यर्थः । तत्रोपसर्गभेदे यथा किराते—"विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।"

अत्र विपदापदिति 'वि' 'आङ्' इत्युपसर्गभेदाद्भग्नप्रक्रमता ।

कारकभेदे यथा नैषधे—

"कयाचिदालोक्य नलं ललज्जे कयापि तद्भासि हृदा ममज्जे ।
तं कापि मेने स्मरमेव कन्या भेजे मनोभूवशभूयमन्या ॥"

अत्र कर्तृकारकाणामनुक्तोक्ततया भेदाद्भग्नप्रक्रमता ।

वचनभेदे भग्नप्रक्रमता यथा शिशुपालवधे—

"काचित् कीर्णा रजोभिर्दिवमनुविदधे भिन्नवक्त्रेन्दुलक्ष्मीः
अश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः ।
भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत् कम्पमापुः
प्रस्थाने पार्थिवानामशिवमिति पुरो भावि नार्य्यः शशंसुः ॥"

अत्र काचिदित्येकवचनान्तेन प्रक्रम्य पुनः काश्चिदिति बहुवचनान्तस्य प्रयुक्तत्वाद्भग्नप्रक्रमता । एवं लिङ्गभेदादिष्वप्यूहनीयम् ।

(भ) प्रसिद्धित्यागमाह प्रसिद्धीति । उक्तमेव स्पष्टं लक्षणम् । अप्रसिद्धशब्दप्रयोगादर्थप्रतीतिविलम्बेन रसप्रतीतेरपि विलम्बादस्य दोषत्वम् । प्रतिप्रसवाभावादयं नित्यो दोषः ।

(म) उदाहरति घोर इति । अस्य मत्पूरितापरपादत्रयं यथा—

"द्योतते महती विद्युत् घोरो वारिमुचां रवः ।
यामिनी तमसाच्छन्ना तत् कान्तो दुर्लभोऽद्य मे ॥"

वारिमुचां मेघानाम् ।

अत्र मेघानां गर्जितमेव प्रसिद्धम् (य)। यदाहुः—

"मञ्जीरादिषु रणितप्रायं पक्षिषु तु कूजितप्रभृति।
स्तनितमणितादि सुरते मेघादिषु गर्जितप्रमुखम्॥" इत्यादि (र)।

अस्थानस्थपदता यथा—(ल)

"तीर्थे तदीये गजसेतुबन्धात् प्रतीपगामुत्तरतोऽस्य गङ्गाम्।
अयत्नबालव्यजनीबभूवुर्हंसा नभोलङ्घनलोलपक्षाः॥" (व)

अत्र तदीयपदात् पूर्वं गङ्गामित्यस्य पाठो युक्तः (श)।

एवम्—"हितान्न यः संशृणुते स किम्प्रभुः।" (ष)

अत्र 'संशृणुते' इत्यतः पूर्वं नञः स्थितिरुचिता (स)।

(य) एवेति। न तु रव इति वाक्यशेषः। तेन प्रसिद्धित्यागो नाम दोष इत्याशयः।

(र) मञ्जीरेति। मञ्जीरं नूपुरम्, आदिशब्दात् कङ्कणादयश्च तेषु, रणितप्रायं रणितक्वणितादिकमित्यर्थः, पक्षिषु तु कूजितं प्रभृतिशब्दात् रुतादिकञ्च। सुरते स्तनितं मणितम् आदिशब्दात् रुतादिकञ्च। मेघे आदिशब्दात् सिंहादौ च गर्जितं प्रमुखशब्दात् स्तनितादिकञ्च पदं तत्तदर्थे प्रयोक्तव्यमिति सर्वं वाक्यः। तथा अश्वशब्दे ह्रेषितादि, हस्तिशब्दे बृंहितादि प्रयोक्तव्यम्।

(ल) अस्थानेति। अनुपयुक्तस्थाने वाचकपदप्रयोगवत्त्वमस्थानस्थपदत्वम्। तत्र अस्थाने वाचकपदप्रयोगे अस्थानस्थपदता, अस्थाने द्योतकपदप्रयोगे तु अक्रमतेत्युभयोर्भेदः। अन्वयोपयोगिस्थानानुसन्धानविलम्बेन रसप्रतीतेर्विलम्बादस्य दोषत्वम्। अयमपि नित्य एव दोषः प्रतिप्रसवाभावेन सर्वदैव हेयत्वात्।

(व) उदाहरति तीर्थे इति। श्लोकोऽयं रघुवंशषोड़शसर्गे। तदीये गङ्गासम्बन्धिनि तीर्थे जलावतरणदेशे गजसेतुबन्धात् हस्तिसमूहेन कल्पित् सेतुं निर्म्माय प्रतीपगां प्रतिकूलवाहिनीं गङ्गाम् उत्तरत उत्तीर्य गच्छतः अस्य कुशस्य सम्बन्धे नभोलङ्घनाय आकाशातिक्रमणाय लीलाश्चलाः पक्षा येषां ते तादृशा हंसाः, अयत्नेनैव बालव्यजनीबभूवुश्चामरीभूताः।

(श) एवेति। युक्त इति। तथा पाठे पूर्ववस्तुपरामर्शिना तच्छब्देन गङ्गायाः परामर्शसम्भवादिति भावः। यथास्थितपाठे तु पूर्ववस्तुपरामर्शिना तच्छब्देन परवर्त्तिन्या गङ्गायाः परामर्शासम्भवादस्थानस्थपदतादोष इति बोध्यम्। मल्लिनाथस्तु विन्ध्यपर्वतसम्बन्धिनि इत्यभिप्रेत्य "तदीये वैन्ध्ये" इत्याह स्म। तथाविधे अर्थे तु नोक्तो दोषः। किन्तु 'गङ्गासम्बन्धिनि' इत्यभिप्रायेण तदीय इत्यस्य पूर्वं पाठे तु तद्दोषसम्भव एवेति ग्रन्थकर्त्तुरपि न न्यूनतापत्तिः उदाहरणस्य स्थलप्रदर्शनमात्ररूपत्वादिति भाव्यम्।

(ष) प्रकारान्तरोदाहरणमाह एवमिति। किराते श्लोकसमुदायो यथा—

"स किं सखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किम्प्रभुः।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः॥"

अत्र च पदमात्रस्यास्थाने निवेशेऽपि सर्वमेव वाक्यं विवक्षितार्थ-प्रत्यायने मन्थरमिति वाक्यदोषता (ङ) । एवमन्यत्रापि (च) ।

इह केऽप्याहुः—"पदशब्देन वाचक एव प्रयोगो निगद्यते, (१) न च नञो वाचकता, निर्विवादात् स्वातन्त्र्येणार्थबोधनविरहादिति यथा "द्वयं गतम्" इत्यादौ त्वमित्यनन्तरं चकारानुपादानादक्रमता तथात्रापि" इति (क) ।

अस्थानस्थसमासता यथा—(ख)

"अद्यापि स्तनशैलदुर्गविषमे सीमन्तिनीनां हृदि
स्थातुं वाञ्छति मान एष धिगिति क्रोधादिवालोहितः ।
प्रोद्यद्दूरतरप्रसारितकरः कर्षत्यसौ तत्क्षणात्
फुल्लत्कैरवकोषनिःसरदलिश्रेणीकृपाणं शशी ॥" (ग)

(ङ) अत्रेति । उचितेति । अन्यथा 'हितान्न' इतिशब्दः 'अहितात्' इति भ्रममिव जनयतीति भावः । वस्तुतस्तु इदमेवास्थानस्थपदताया उदाहरणम् । यथा मम—

"पत्युर्नखपदं मत्वा प्रातः परिहसत्यलम् । सुवक्रकुङ्कुमलवं स्तने दृष्ट्वा सखी सखीम् ॥"

अत्र सुवक्रकुङ्कुमलवे एव नखचिह्नभ्रमात् नखपदमित्यतः पूर्वं सुवक्रकुङ्कुमलवमित्यस्य पाठौचित्येऽपि तदकरणादस्थानस्थपदतादोषः स्पष्टः ।

(ङ) ननु पदघटितत्वात् पददोष एवायमित्याह अत्रेति । किञ्चेति चार्थः । पदमात्रस्य केवलपदस्य । सर्वमेव निखिलपदान्वितमेव । मन्थरं विलम्बजनकम् ।

(च) एवमिति । अन्यत्रापि, एवं वाक्यव्यापकत्वेन वाक्यदोषता ऊहनीयेत्यर्थः ।

(क) इहेति । वाचक एवेति । घटपदं पटपदमित्यादिप्रयोगदर्शनात् चपदं त्रापदमित्यादि-प्रयोगादर्शनाच्चेति भावः । प्रयुज्यत इति प्रयोगः शब्दः । स्वातन्त्र्येण पदान्तरसाहाय्यं विना । अर्थ-बोधनविरहात् अर्थबोधकत्वाभावात् । इति हेतोः । अत्रापि "हितान्न यः संशृणुते स किम्प्रभुः" इत्यत्रापि, तथा—य इत्यनन्तरं नञोऽनुपादानादक्रमतादोष एवेत्यर्थः । एतन्मतेऽपि "तीर्थे तदीये" इत्यादावस्थानस्थ-पदतैव तदीयशब्दस्य वाचकत्वेन अक्रमताया असम्भवात् द्योतकपदस्यास्थाने प्रयोग एव अक्रमताया अङ्गीकारादिति बोध्यम् ।

(ख) अस्थानस्थसमासतादोषमाह अस्थानेति । स्वव्यञ्जरसाव्यञ्जकशब्दे समासस्य स्थितिरस्थानस्थ-समासता स्वपदं समासपरम् । तथा च समासस्य स्थानान्तरे अवस्थानेन स्वपर्यवसानीयरसस्यापकर्षकत्वादेवास्य दोषत्वम् । अयमपि नित्य एव दोषः प्रतिप्रसवाभावात् ।

(ग) अद्यापीति । एष मानः कुतोऽपि कारणादभिमानः, स्तनावेव शैलौ उन्नतत्वात् कठिनत्वाच्च

(१) वाचकमेव प्रायो निगद्यत इति पाठान्तरम् ।

अत्र कोपिन उक्तौ समासो न कृतः, कवेरुक्तौ कृतः (घ)।

वाक्यान्तरपदानां वाक्यान्तरेऽनुप्रवेशः सङ्कीर्णत्वम् (ङ)। यथा—

"मुञ्च चन्द्रं कुरङ्गाक्षि! पश्य मानं नभोऽङ्गने।" (च)

अत्र नभोऽङ्गने चन्द्रं पश्य मानं मुञ्चेति युक्तम् (छ)।

क्लिष्टत्वमेकवाक्यविषयमित्यस्माद्भिन्नम् (ज)।

वाक्यान्तरे वाक्यान्तरानुप्रवेशो गर्भितता (झ)। यथा—

"रमणे चरणप्रान्ते प्रणतिप्रवणेऽधुना।
वदामि सखि! ते तत्त्वं कदाचिन्नोचिताः क्रुधः॥" (ञ)

पर्वतौ ताविव दुर्गं दुर्गमं ताभ्यां विषमे दुष्प्रवेशे सीमन्तिनीनां रमणीनां हृदि हृदये, अद्यापि अधुनापि मनोदयसमयेऽपीत्यर्थः, स्थातुं वाञ्छति इच्छति? अतएव मां धिक्, इत्यस्मात् क्रोधादिव, आलोहितो रक्तवर्णः असौ शशी चन्द्रः, प्रोद्यन्त उदयमानाः दूरतरे देशे प्रसारिताश्च कराः किरणाः हस्ताश्च यस्य स तथोक्तः सन्, तत्क्षणात् फुल्लतां प्रस्फुटतां कैरवाणां कुमुदानां कोषेभ्यः सम्पुटेभ्यः बहिरावरणेभ्यश्च निःसरन्ती वहिर्निःक्रान्ती या अलीनां मधुकराणां श्रेणी सैव कृपाणः कृष्णवर्णत्वाल्लम्बमानत्वाच्च तरवारिस्तं कर्षति आकृष्य गृह्णाति; तमेव मानं निहन्तुमिति भावः।

(घ) अत्रेति। कोपिनो मानं प्रति क्रुद्धस्य चन्द्रस्य, उक्तौ अद्यापीत्यादि धिक्शब्दपर्यन्ते वाक्ये। कवेरुक्तौ फुल्लदित्यादौ कविवाक्ये। अत्रायमाशयः—दीर्घसमासो हि ओजोगुणव्यञ्जकः ओजोगुणश्च रौद्ररसादावेव प्रयोजनीयः रौद्ररसश्च क्रुद्धस्य चन्द्रस्यैव वाक्ये न पुनः सुस्थस्य कवेः। तेन चन्द्रवाक्ये दीर्घसमासस्यावश्यकत्वेऽपि तदकरणात्, कवेर्वाक्ये तदनावश्यकत्वेऽपि तत्करणाच्च स्वव्यङ्ग्यरसाव्यञ्जकशब्दे समासस्यावस्थितत्वया उदाहृते अस्थानस्थसमासतादोष इति।

(ङ). सङ्कीर्णत्वदोषं लक्षयति वाक्येति। सङ्कीर्णत्वं नाम मिश्रितत्वम्, तेनैतादृशं लक्षणमिति बोध्यम्। तत्तदन्वयिपदानुसन्धानविलम्बेन रसप्रतीतिविलम्बादस्य दोषत्वम्। अयमपि नित्यो दोषः प्रतिप्रसवाभावात्।

(च) मुञ्चेति। अस्य मत्पूरितपरार्द्धं यथा—

"सम्प्राप्तोऽहं रसालत्वं भव त्वञ्चेह माधवी॥"

(छ) अत्रेति। युक्तं पठनमिति शेषः। तथा च सति नोक्तदोष इत्याशयः।

(ज) अथात्रापि अन्वयव्यवधानेनार्थप्रतीतेरपि व्यवधानात् क्लिष्टत्वदोष एवास्तामित्याह क्लिष्टत्वमिति। क्लिष्टत्वमेकवाक्यविषयम् इदं पुनरनेकवाक्यविषयम्, इति हेतोः, क्लिष्टत्वम् अस्मात् सङ्कीर्णत्वदोषाद्भिन्नमित्यर्थः। तेनात्रानेकवाक्ये न क्लिष्टत्वदोष इति भावः।

(झ) गर्भितत्वादोषं लक्षयति वाक्येति। स्पष्टं लक्षणम्। गर्भः अभ्यन्तरगतं वाक्यमस्य सञ्जात इति गर्भितं वाक्यं तस्य भावो गर्भितता। अत्रापि वाक्यान्तरस्य वाक्यान्तरे प्रवेशादन्वयिपदानुसन्धानविलम्बेन रसप्रतीतिविलम्बाद्दोषत्वम्। अयन्त्वनित्यो दोषः "गर्भितत्वं गुणः क्वापि" इति वक्ष्यमाणेन क्वचित् प्रतिप्रसवात्।

अर्थदोषानाह—(ट)

५ । अपुष्टदुष्क्रमग्राम्य-व्याहताश्लीलकष्टताः ।
अनवीकृतनिर्हेतु-प्रकाशितविरुद्धता ॥
सन्दिग्धपुनरुक्तत्वे ख्यातिविद्याविरुद्धते ।
साकाङ्क्षता सहचर-भिन्नताऽस्थानयुक्तता ॥
अविशेषे विशेषश्चानियमे नियमस्तथा ।
तयोर्विपर्य्ययो विध्यनुवादायुक्तते तथा ।
निर्मुक्तपुनरुक्तत्वमर्थदोषाः प्रकीर्त्तिताः ॥ (ठ)

तद्विपर्य्ययो विशेषेऽविशेषो नियमेऽनियमः (ड) ।
अत्रापुष्टत्वं मुख्यानुपकारित्वम् (ढ) । यथा—

(ञ) रमण इति । रमणे पत्यौ, चरणप्रान्ते तव पदसमीपे, प्रणतिप्रवणे पतनायोत्सुके सति, अधुना इतः प्रभृति, कदाचिदपि क्रुधस्तव कोपाः, न उचिताः, हे सखि ! ते तव समीपे तत्त्वमेतद्‌याथार्थ्यं वदामि ।
अत्र "वदामि सखि ! ते तत्त्वम्" इति वाक्यस्य "रमणे चरणप्रान्ते प्रणतिप्रवणे अधुना कदाचित् क्रुधो नोचिताः" इति वाक्यमध्ये प्रवेशाद्‌गर्भिततादोषः ।

(ट) वाक्यदोषानभिधायेदानीमुद्देशक्रमप्राप्तानर्थदोषानभिधातुं शिष्येभ्यस्तानुद्बोधयति अर्थेति । अन्वयव्यतिरेकानुविधायितया अर्थप्रयोज्यदोषत्वमर्थदोषत्वमिति सामान्यलक्षणमत्रानुसन्धेयम् । अर्थश्चात्र शक्य-लक्ष्य-व्यङ्ग्यरूपस्त्रिविध एव ।

(ठ) अपुष्टेति । अत्रापि "द्वन्द्वात् परः श्रूयमाणः शब्दः प्रत्येकमभिसम्बध्यते" इति न्यायेन द्वन्द्वात् परं तप्रत्ययः सर्वत्र सम्बध्यते । तेन अपुष्टता, दुष्क्रमता, ग्राम्यता, व्याहतता, अश्लीलता, कष्टता, अनवीकृतता, निर्हेतुता, प्रकाशितो विरुद्धोऽर्थो येन स प्रकाशितविरुद्धोऽर्थस्तस्य भावः सा, सन्दिग्धता, पुनरुक्तता, ख्यातिविरुद्धता, साकाङ्क्षता, सहचरभिन्नता, अस्थानयुक्तता, अविशेषे अर्थस्य सामान्यतौचित्ये विशेषस्तदेकदेशपरत्वम्, तथा अनियमे नियमः तयोर्विपर्य्ययो विपरीतत्वम्, तच्च विशेषे अविशेषः नियमे अनियमश्चेति, विध्ययुक्तता, अनुवादायुक्तता तथा निर्मुक्तपुनरुक्तता चेति त्रयोविंशतिप्रकारा अर्थदोषाः प्रकीर्त्तिताः ।

(ड) एतेष्वस्पष्टतया तद्विपर्य्ययपदमेव व्याचष्टे तद्विपर्य्यय इति ।

(ढ) उद्देशक्रमेणैतान् यथासम्भवं सोदाहरणं लक्षयन्नादावपुष्टार्थत्वं लक्षयति अत्रेति । एतेषु मध्ये इत्यर्थः । मुख्यानुपकारित्वम् उद्देश्यानुपयोगित्वम् । उद्देश्यानुपयोगिनोऽर्थस्य सन्निवेशकारणानुसन्धानविलम्बेन रसप्रतीतिविलम्बादस्य दोषत्वम् । अयं खलु नित्य एव दोषः प्रतिप्रसवासम्भवात् ।

"विलोक्य वितते व्योम्नि विधुं मुञ्च रुषं प्रिये !।" (ग)

अत्र विततशब्दो मानत्यागं प्रति न किञ्चिदुपकुरुते (त)।

अधिकपदत्वे पदार्थान्वयप्रतीतिः समकालमेव बाधप्रतिभासः, इह तु पश्चादिति विशेषः (थ)।

दुष्क्रमता यथा—(द)

"देहि मे वाजिनं राजन् ! गजेन्द्रं वा मदालसम् ॥ (ध)

अत्र गजेन्द्रस्य प्रथमं याचनमुचितम् (न)।

"स्वपिहि त्वं समीपे मे स्वपिम्येवाधुना प्रिय ! (१)।" (प)

अत्रार्थो ग्राम्यः (फ)।

(ग) उदाहरति विलोक्येति। अस्य सत्पूरितपरार्द्धं यथा—

"एहि निष्पिष्य वक्षोभ्यां हन्तो विरहवैरिणम् ॥"

हे प्रिये ! वितते विस्तृते व्योम्नि आकाशे विधुं चन्द्रं विलोक्य रुषं मानं मुञ्च परित्यज।

(त) अस्य लक्षणं योजयितुमाह अत्रेति। विततशब्दो विततशब्दस्यार्थः। न किञ्चिदुपकुरुत इति। अतएवात्र अपुष्टतादोष इति भावः। एवं चन्द्रदर्शनमात्रस्यैव मदनोद्दीपकतया मानत्यागोपयोगित्वात् चन्द्रस्य व्योमव्यापित्वरूपार्थोऽपि मानत्यागानुपयोगीति व्योम्नीति पदमप्यनावश्यकमिति बोध्यम्।

(थ) नन्वर्थस्यानुपयोगित्वेनानावश्यकतया तदुपस्थापकशब्दस्यापि तथैवानावश्यकमिति अधिकपदतादोष एवायमास्तामित्याह अधिकपदत्व इति। बाधप्रतिभासः अनावश्यकतया वैयर्थ्यज्ञानम् पश्चात् पदार्थान्वयप्रतीतेः परम्। विशेषो भेदः। अत्र सहृदयानां प्रतीतिरेव प्रमाणमित्याशयः।

(द) दुष्क्रमतेति। विपरीतत्वेन दूषितक्रमवत्त्वं दुष्क्रमत्वम्। अत्रापि यथायथक्रमानुसन्धानविलम्बेन रसादिप्रतीतिविलम्बाद्दोषत्वम्। नित्य एवायं दोषः समाधानासम्भवात्।

(ध) देहीति। अस्य सत्पूरितपूर्वार्द्धं यथा—

"तुष्टोऽसि कर्मणा त्वं चेत् पुष्टोऽसि गजवाजिभिः।"

(न) अत्रेति। उचितमिति। गजेन्द्रस्यैवाधिकमूल्यत्वादिति भावः। लोके हि अधिकमूल्यमेव वस्तु प्रथमं याच्यते, तदप्राप्तिसम्भवे तु स्वल्पमूल्यमिति नियमः। अत्र तु स्वल्पमूल्यस्यैव वाजिनः प्रथमयाचनात् तन्नियमविपरीततया क्रमस्य दूषितत्वात् दुष्क्रमत्वमिति बोध्यम्।

(प) ग्राम्यताया उदाहरणमाह स्वपिहीति। अत्रापि अशिक्षितसाधारणप्रयोज्यत्वं ग्राम्यत्वमित्येव लक्षणम्। ग्राम्यत्वेन निकृष्टार्थस्य ज्ञानमात्रेणैव श्रोतुर्वैमनस्योदयात् रसप्रकर्षनाशनास्य दोषत्वम्। अयमनित्यो दोषः, "ग्राम्यत्वमधमोक्तिषु" इति सामान्यत एव प्रतिप्रसवस्य वक्ष्यमाणत्वात्।

"कण्ठोरुपकण्ठे हि विरहोऽतीवदुःसहः ॥" इति सत्पूरितपरार्द्धम्।

---

(१) प्रिये ! इति पाठान्तरम्।

कस्यचित् प्रागुत्कर्षमपकर्षं वा अभिधाय पश्चात्तदन्यप्रतिपादनं व्याहतत्वम् (ब)। यथा—

"हरन्ति हृदयं यूनां न नवेन्दुकलादयः ।
वीक्ष्यते यैरियं तन्वी लोकलोचनचन्द्रिका ॥" (भ)

अत्र येषामिन्दुकला नानन्दहेतुस्तेषामेवानन्दाय तन्व्याश्चन्द्रिकात्वारोपः (म)।

"हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः ।
यथाशु जायते पातो न तथा पुनरुन्नतिः ॥" (य)

(फ) अत्रेति। अर्थः "स्वपिहि स्वपिमि" इति पदयोरभिधेयम्, ग्राम्यः, हालिकाद्यशिक्षितसाधारणप्रयोज्यत्वादिति भावः।

(ब) व्याहतत्वं लक्षयति कस्यचिदिति। कस्यचिद्वस्तुनः प्रागुत्कर्षमभिधाय पश्चादपकर्षप्रतिपादनम्, किंवा प्रागपकर्षमभिधाय पश्चादुत्कर्षप्रतिपादनं व्याहतत्वमित्यर्थः। पूर्वापरयोः परस्परविरोधेन परस्परस्यैव व्याहन्यमानत्वात् व्याहतत्वमिति संज्ञा। अतएव च श्रोतुः क्वापि विश्वासासम्भवात् वैमनस्योदयेन रसप्रकर्षहानेरस्य दोषत्वम्। अयन्तु नित्य एव दोषः प्रतिप्रसवासम्भवात्।

(भ) हरन्तीति। नवेन्दुकलादयो नूतनोदितचन्द्रकलाप्रभृतयः यूनां हृदयं न हरन्ति; यैर्युवभिः, लोकलोचनयोः चन्द्रिका ज्योत्स्नारूपा इयं तन्वी कृशाङ्गी वीक्ष्यते दृश्यते।

(म) उदाहृते दोषं प्रतिपादयितुमाह अत्रेति। नानन्दहेतुरिति। हृदयाहरणादिति भावः। तथा च नवेन्दुकलादयो हृदयं न हरन्तीत्यनेन चन्द्रकलायाः प्रागपकर्षमभिधाय पश्चाच्च तत्किरणात्मकचन्द्रिकात्वारोपेणैव नायिकाया उत्कर्षप्रतिपादनात् तस्याश्चन्द्रकलाया अपि सुतरामेव उत्कर्षप्रतिपादनं कृतमिति व्याहतत्वदोष इति सरलार्थः।

उत्कर्षाभिधानानन्तरमपकर्षप्रतिपादने यथा मम—

"कामकान्त्या किल कान्तं कामिनीनां मनो हरन्। असामान्यैस्तु लावण्यैः काममेव जयत्ययम् ॥"

अत्र यस्यैव कामस्य कान्त्या कामिनीनां मनो हरति तमेव कामं जयतीति कामस्य प्रागुत्कर्षमभिधाय पश्चादपकर्षप्रतिपादनाद्व्याहतत्वम्।

(य) अश्लीलतामुदाहरति हन्तुमिति। अर्थस्य व्रीड़ा-जुगुप्सामङ्गलान्यतमव्यञ्जकत्वमश्लीलत्वमिति लक्षणम्। व्रीड़ाव्यञ्जकतया सङ्कोचजननेन, जुगुप्साव्यञ्जकतया विरागोत्पादनेन, अमङ्गलव्यञ्जकतया चोद्वेगप्रवर्त्तनेन, रसप्रकर्षनाशकत्वादस्य दोषत्वम्। अयमप्यनित्यो दोषः, "सुरतारम्भगोष्ठ्यादा"विति वक्ष्यमाणेन सामान्यत एव प्रतिप्रसवात्।

हन्तुमेव प्रव,ैविनाशयितुमेव प्रवृत्तस्य उद्यतस्य, विवरैषिणश्छिद्रान्वेषिणः सतः स्तब्धस्य निष्पन्दभावेनावस्थितस्य जनस्य यथा आशु शीघ्रं पातः शत्रोराक्रमणात् पराजयो जायते, तथा शीघ्रं पुनरुन्नतिर्विजयो न जायते।

अत्रार्थोऽश्लीलः (र)।

"वर्षत्येतदहर्पतिर्न तु घनो धामस्थमच्छं पयः
सत्यं सा सवितुः सुता सुरसरित्पूरो यया प्लावितः ।
व्यासस्योक्तिषु विश्वसित्यपि न कः श्रद्धा न कस्य श्रुतौ
न प्रत्येति तथापि मुग्धहरिणी भास्वन्मरीचिष्वपः ॥" (ल)

द्वितीयोऽर्थस्तु—हन्तुमिव योनौ प्रहर्त्तुमिव प्रवृत्तस्य आरभमाणस्य, स्तब्धस्य दृढ़भावेन दण्डायमानस्य, विवरैषिणो योनिरन्ध्रं मुहुः प्रविष्टस्यच्छेशः पुरुषाङ्गस्य, यथा आशु पातो वीर्य्यपातेन शैथिल्यं जायते, तथा आशु पुनरुन्नतिः पुनरप्युद्गमो न जायत इति । उभयवाप्येवशब्दस्तन्नीतिज्ञानाभावं द्योतयति ।

(र) अत्रेति । अर्थो द्वितीयोऽर्थः, अश्लीलः, शिश्नाव्यञ्जकत्वादिति भावः । अतएवात्रार्थगता व्रीड़ाव्यञ्जकाश्लीलता । अर्थगता जुगुप्साव्यञ्जकाश्लीलता यथा—

"अनन्तक्रिमिसङ्कीर्णं हृर्य्यं व वमिकारणम् । स्रवत् पर्य्युषितं गूथं चुधा विशति कुक्कुरी ॥"

अर्थगता अमङ्गलव्यञ्जकाश्लीलता यथा मम—

"अकाले प्रस्थितं कान्तं वीक्ष्य विच्छेदकातरा । एकाकिनी वासगृहे स्थिता वाष्पं विमुञ्चति ॥"

अत्र बहिर्गमनार्थे प्रयुक्तेनापि प्रस्थितपदेन मरणार्थस्यापि बोधनादर्थगता अमङ्गलव्यञ्जकाश्लीलता ।

(ल) कष्टतादोषोदाहरणमाह वर्षतीति । कष्टबोध्यार्थता कष्टता । अर्थस्य दुर्बोधतया तद्बोधविलम्बेनैव रसबोधविलम्बादस्य दोषत्वम् । अयमप्यनित्यो दोषः, "वैयाकरणमुख्ये तु" इत्यादिना क्वचित् प्रतिप्रसवस्य वक्ष्यमाणत्वात् ।

नायक एव नायिकान्तराय धनसम्पदं ददाति, तया च धनसम्पदा तस्या वसनभूषणादिकं वर्द्धितम्, इति नायकः स्वयं वदति लोकोऽपि वदति, तथापि अपरा मुग्धा नायिका, तत् सकलं न विश्वसितीति तां प्रति भङ्ग्या नायकस्योक्तिरियं वर्षतीति । अहर्पतिः सूर्य्यः, धामस्थं निजकिरणस्थितम्, अच्छं निर्म्मलम्, एतत् पयो जलं वर्षति ; न तु घनो मेघो वर्षतीत्यन्वयः । मेघस्य जलादिमात्ररूपत्वादिति भावः । "आदित्याज्जायते वृष्टिः" इति श्रुतेः । सा यमुना सवितुः सूर्य्यस्य सुता इति सत्यम्, आदित्येन जलवर्षणात् तज्जलस्यैव च यमुनारूपेण परिणतत्वादित्याशयः । अतएव च विष्णुपुराणम्—"सूर्य्यस्य पत्नी संज्ञाऽभूत् तनया विश्वकर्म्मणः । मनुर्यमो यमी चैव तदपत्यानि वै मुने ॥" यया यमुनया सुरसरितो गङ्गायाः पूरः प्रवाहः प्लावितः परिवर्द्धितः । व्यासस्य, उक्तिषु "विवस्वानष्टभिर्मासैरादायापो रसात्मिकाः । वर्षत्यम्बु ततस्तस्मादन्नादप्यखिलं जगत् ॥" इत्यादिपुराणात्मकवाक्येषु को न विश्वसिति ? अपि तु सर्व एव विश्वसितीत्यर्थः कस्य वा जनस्य श्रुतौ "आदित्याज्जायते वृष्टिः" इत्यादिश्रुतिवाक्ये श्रद्धा विश्वासो नास्ति, अपि तु सर्वस्यैवास्तीत्यर्थः । तथापि मुग्धहरिणी बुद्धिहीना मृगी, भास्वन्मरीचिषु सूर्य्यकिरणेषु अपो जलानि सन्तीति शेषः न प्रत्येति न विश्वसिति ।

अत्र अप्रस्तुतसूर्य्यकर्त्तृकवर्षणादिकथनात् प्रस्तुतानामात्मकर्त्तृकधनदानादीनां प्रतीतिरप्रस्तुतप्रशंसालङ्कारः कवेरभिप्रेतः ।

अत्र यस्मात् सूर्य्याद्दृष्टेर्यमुनायाश्च प्रभवस्तस्मात्तयोर्जलमपि सूर्य्यप्रभवम् । ततश्च सूर्य्यमरीचीनां जलप्रत्ययहेतुत्वमुचितम् । तथापि मृगो भ्रान्तत्वात्तत्र जलप्रत्ययं न करोति । अयमप्रस्तुतोऽप्यर्थो दुर्बोधः, दूरे चास्मात् (१) प्रस्तुतार्थबोध इति कष्टार्थत्वम् (ब) ।

"सदा चरति खे भानुः सदा वहति मारुतः ।
सदा धत्ते भुवं शेषः सदा धीरोऽविकत्थनः ॥" (श)

अत्र सदेत्यनवीकृतत्वम् (ष) । अत्रास्य पदस्य पर्य्यायान्तरेणोपादानेऽपि यदि नान्यद्विच्छित्त्यन्तरम्, तदाऽस्य दोषस्य सद्भाव इति कथितपदत्वाद्भेदः (स) ।

(ब) उदाहृते कष्टतादोषं प्रतिपादयितुमाह अत्रेति । यस्माद्धेतोः । प्रभव उत्पत्तिः । तस्माद्धेतोः । तयोर्द्दृष्टियमुनयोः । सूर्य्यप्रभवं सूर्य्यादुत्पन्नम् । दृष्टियमुनयोर्जलाभिन्नत्वादिति भावः । षष्ठीसप्तम्योरर्थं प्रति भेदाभावात् सूर्य्यमरीचीनां सूर्य्यकिरणेष्वित्यर्थः, जलप्रत्ययहेतुत्वं जलमस्तीति विश्वासकारणत्वम् अप्रस्तुतोऽप्यर्थ इति अपिशब्दो भिन्नक्रमे । तथा च अयमप्रस्तुतोऽर्थो वर्त्ततीत्यादिना साक्षादुक्तोऽपीत्यर्थः । दुर्बोध इति । बहुतरशास्त्रयुक्तिकार्य्यकारणभावादिसम्पादितत्वादिति भावः । अस्मात् साक्षाद्वाक्येनोक्तादपि अप्रस्तुतार्थात्, प्रस्तुतार्थबोधो दूरे अत्यन्तव्यवहित इत्यर्थः वाक्येनानुक्तत्वादिति भावः । इति हेतोः ।

(श) अनवीकृतत्वमाह सदेति । एकविधशब्देन पुनः पुनरेकार्थकथनमनवीकृतत्वम् । अतएव अन्यविधशब्देन अर्थस्य अनूतनीकृतत्वादनवीकृतत्वमिति संज्ञाप्युपपद्यते । एवं तच्च वर्णनेनैव एकविधशब्दद्वारा पुनः पुनरेकार्थावगमेन, श्रोतुर्विरागोत्पत्तिरिति रसप्रकर्षनाशादस्य दोषत्वम् । अयन्तु नित्यो दोषः प्रतिप्रसवाभावात् ।

भानुः सूर्य्यः सदा खे आकाशे चरति, मारुतो वायुः सदा वहति, शेषोऽनन्तनागः सदा भुवं पृथिवीं धत्ते धारयति, धीरो जनोऽपि सदा अविकत्थनः अनात्मश्लाघाकरो भवति ।

(ष) उदाहृते दोषमुपपादयति अत्रेति । सदेत्यनवीकृतत्वं सदेत्येकविधशब्देनैव पुनः पुनः सततरूपार्थकथनादनवीकृतत्वदोष इत्यर्थः ।

(स) नन्वनेकवारमेकविधशब्दोपादानात् कथितपदत्वदोष एवायमास्तामित्याह अत्रेति । अस्य पदस्य सदाशब्दस्य, पर्य्यायान्तरेण सर्वदासन्ततादिरूपेण भिन्नानुपूर्वीकत्वेन उपादानेऽपि । अन्यद्विच्छित्त्यन्तरम् अपरविधचमत्कारिताविशेषो न जायते । अस्य अनवीकृतत्वाख्यस्य । सद्भावो विद्यमानता स्यादेव । न पुनः कथितपदत्वस्यापि तत्र सद्भावः, एकार्थकैकानुपूर्वीकशब्दसद्भाव एव तत्सद्भावनियमादिति भावः । एतेन "सदा चरति" इत्यादौ कथितपदत्वं सम्भवत्येव ; किन्तु—

"सदा चरति खे भानुर्नित्यं वहति मारुतः । चिरं धत्ते भुवं शेषोऽनिशं धीरोऽविकत्थनः ॥"

---

(१) अस्मात् इति पाठान्तरम् ।

नवीकृतत्वं यथा—(ङ)

"भानुः सकृद्युक्ततुरङ्ग एव रात्रिन्दिवं गन्धवहः प्रयाति।
बिभर्त्ति शेषः सततं धरित्रीं षष्ठांशवृत्तेरपि धर्म्म एषः॥" (च)

"गृहीतं येनासीः परिभवभयान्नोचितमपि
प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः।
परित्यक्तं तेन त्वमपि सुतशोकान्न तु भया-
द्विमोक्ष्ये शस्त्र! त्वामहमपि यतं (१) स्वस्ति भवते॥" (छ)

अत्र द्वितीयशस्त्रमोचने हेतुर्नोक्त इति निर्हेतुत्वम् (ज)।

इति पाठे न कथितपदत्वम्। अनवीकृतत्वन्तु स्यादेव अन्यविच्छित्तिविशेषाभावादिति बोध्यम्।

(ङ) यत्र तु शब्दान्तरप्रयोगेण नवीकृततया विच्छित्तिविशेषस्तत्र नायं दोष इत्याशयेन नवीकृतत्व दर्शयितुमाह नवीकृतत्वमिति।

(च) भानुरिति। अभिज्ञानशकुन्तलपञ्चमाङ्के श्लोकोऽयम्। भानुः सूर्य्यः, सकृदेकवारमेव युक्ता जगद्भ्रमणाय रथे नियद्धाः तुरङ्गा अश्वा येन स तथोक्तः। सूर्य्यः खल्वेकवारमेव रथे तुरङ्गान् योजयित्वा जगति केवलं विचरत्येव न तु कदापि विश्राम्यतीत्याशयः। गन्धवहो वायुरपि रात्रिन्दिवमेव वहति, न तु क्षणमपि विश्राम्यतीति भावः। शेषः अनन्तनागः सततमेव धरित्रीं बिभर्त्ति न तु कदापि तां मस्तकादवतार्य्य विश्रामं लभत इत्यभिप्रायः। षष्ठांशेन प्रजाभ्यः करत्वेन शस्यादीनां षष्ठांशग्रहणेन वृत्तिर्जीविका यस्य तादृशस्य राज्ञोऽपि एष एव सर्व्वदा जगत्पालनरूप एव धर्म्मः।

अत्रैकविधविच्छित्तिसत्त्वान्नानवीकृतत्वदोष इति ज्ञेयम्।

(छ) निर्हेतुतामाह गृहीतमिति। आकाङ्क्षितहेतुशून्यत्वं निर्हेतुत्वम्। हेतोराकाङ्क्षासत्त्वेऽपि तदनभिधानेन तदनुसन्धानविलम्बात् रसप्रतीतिविलम्बेनास्य दोषत्वम्। अयन्त्वनित्यो दोषः, "निर्हेतुता तु ख्यातेऽर्थे दोषतां नैव गच्छति" इति वक्ष्यमाणेन प्रतिप्रसवात्।

वेणीसंहारनाटके अश्वत्थाम्नोक्तमिदं गृहीतमित्यादि पद्यम्। हे शस्त्र! येन मत्पित्रा द्रोणेन परिभवभयात् परकर्त्तृकापमानाशङ्कावशात्, नोचितमपि ब्राह्मणस्य शस्त्रधारणनिषेधादसङ्गतमपि त्वं शस्त्रम्, गृहीतं धृतमासीः; तथा यस्य मत्पितुर्द्रोणस्य प्रभावात् कश्चिदपि जनस्तव शस्त्रस्य विषयो लक्ष्यः नाभूत् इति न खलु, अपि तु दैवो वा मानुषो वा सर्व्व एव तव लक्ष्योऽभूदिति तव काचिदपि नावमाननासीदिति भावः। तेनापि मत्पित्रा द्रोणेन सुतशोकात् अलीकपुत्रमरणवृत्तान्तश्रवणजनितशोकात् त्वं शस्त्रं परित्यक्तम्, तु किन्तु भयात् त्वं न परित्यक्तम्। अहमपि त्वां शस्त्रं विमोक्ष्ये परित्यक्ष्यामि। तेन च यते ममान्तिकात् गच्छते भवते स्वस्ति मङ्गलमस्तु।

(ज) अत्रेति। द्वितीयशस्त्रमोचने अश्वत्थाम्नः शस्त्रपरित्यागे।

---

(१) यतः इति पाठान्तरम्।

"कुमारस्ते नराधीश ! श्रियं समधिगच्छतु ॥" (ग)

अत्र त्वं म्रियस्वेति विरुद्धार्थप्रकाशनात् प्रकाशितविरुद्धत्वम् (घ)।

"अचला अबला वा स्युः सेव्या ब्रूत मनीषिणः ! ॥" (ङ)

अत्र प्रकरणाभावाच्छान्तशृङ्गारिणोः को वक्तेति निश्चयाभावात् सन्दिग्धत्वम् (च)।

"सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥" (छ)

(ग) प्रकाशितविरुद्धतामुदाहरति कुमार इति। अनिष्टार्थव्यञ्जकत्वं प्रकाशितविरुद्धत्वम्। अनिष्टार्थप्रकाशेन श्रोतृहृद्गतोद्वेगादाचमत्कारितात्मकरसप्रकर्षनाशित्वादस्य दोषत्वम्। एष तु नित्य एव दोषः प्रतिप्रसवाभावात्।

"समस्तगुणवानेष राज्यभारसहः सुधीः। इति मत्पूरितपूर्वार्द्धम्।

श्रियम् इतोऽपि शिक्षासम्पदं समधिगच्छतु सम्यक् प्राप्नोतु।

(घ) अत्रेति। अयमाशयः—"श्रियं समधिगच्छतु" इत्यत्र राजलक्ष्मीं सम्प्राप्नोतु इत्यर्थोऽपि प्रकाशते। एवञ्च पितरि जीवति पुत्रस्य राज्यादिप्राप्त्यसम्भवात् "त्वं म्रियस्व ततः परमयं कुमारो राजलक्ष्मीं सम्प्राप्नोतु" इत्यनिष्टार्थोऽपि प्रकाशत इति। ननु विरुद्धमतिकारितादोषेण सहास्य को भेद इति चेत्; उच्यते—'भूतयेऽस्तु भवानीशः' इत्यत्र भवानीशशब्दपरिवर्त्तने विरुद्धमतिकारितादोषो नावतिष्ठत इति स शाब्दो दोषः। अत्र तु कुमारादिशब्दपरिवर्त्तनेऽपि इष्टशार्थसत्त्वे एव प्रकाशितविरुद्धता दोषोऽवतिष्ठत एवेत्ययमार्थो दोष इति शाब्दत्वार्थत्वभेदाद्भेद इति।

(ङ) सन्दिग्धतादोषमाह अचला इति। सन्देहविषयीभूतार्थत्वं सन्दिग्धत्वम्। सन्दिग्धविषये एकतरनिश्चयाय कारणानुसन्धानविलम्बेन रसप्रतीतिविलम्बादस्य दोषत्वम्। अयन्त्वनित्यो दोषः, "सन्दिग्धत्वं तथा व्याजस्तुतिपर्य्यवसायि चेत्" इत्यनेन सामान्यत एव प्रतिप्रसवस्य वक्ष्यमाणत्वात्।

"विहायापरकर्म्माणि समासक्तधिया मया।" इति मत्पूरितपूर्वार्द्धम्।

हे मनीषिणो ज्ञानिनः! मया अचला ईश्वरोपासनार्थं पर्वताः, अथवा सुरतसम्भोगार्थं वनिता वा सेव्याः सेवनीयाः स्युरिति यूयं ब्रूत उपदिशत।

(च) अत्रेति। प्रकरणाभावादिति; प्राक्प्रस्तुतत्वाभावात्। अत्र अथवा वा इति वाशब्दस्याबलान्वये अबलासेवनास्थाप्रकाशेन शान्तो वक्ता सम्भवति; एवमचला वा इति वाशब्दस्याचलान्वये अचलसेवनास्थाप्रकाशेन शृङ्गारी वक्तापि स्यादिति वक्तृनिश्चयाभाव इति भावः। अत्रापि पूर्ववत् शाब्दत्वार्थत्वभेदेनैव प्रागुक्तसन्दिग्धत्वदोषादस्य भेदः।

(छ) पुनरुक्ततामाह सहसेति। येन केनचित् प्रत्यायितस्यार्थस्य पुनरपि प्रत्यायनं पुनरुक्तता। द्वितीयवारप्रत्यायनकारणान्वेषणविलम्बेन रसप्रतीतिविलम्बादस्य दोषत्वम्। अयमप्यनित्यो दोषः, "धनुर्ज्या-

अत्र द्वितीयार्द्धे व्यतिरेकेण (१) द्वितीयपादस्य वार्थ इति पुनरुक्तता (ज)।

प्रसिद्धिविरुद्धता यथा—(झ)

"ततश्चचार समरे शितशूलधरो हरिः ॥" (ञ)

अत्र हरेः शूलं लोकेऽप्रसिद्धम् (ट)। यथा वा—(ठ)

"पादाघातादशोकस्ते सञ्जाताङ्कुरकण्टकः ।" (ड)

अत्र पादाघातादशोकेषु पुष्पमेव जायत इति प्रसिद्धम्, नत्वङ्कुर इति कविसमयख्यातिविरुद्धता (ढ)।

दिषु शब्देषु" इत्यादिना वक्ष्यमाणेन प्रतिप्रसवात्। अत्रापि प्रागुक्तरीत्यैव कथितपदत्वाद्भेदः। किञ्च, एकानुपूर्वीकशब्दस्य द्विःप्रयोगे कथितपदत्वम्, भिन्नानुपूर्वीकशब्दैरेकस्यैवार्थस्य द्विःप्रत्यायने पुनरुक्तता। प्रमाणान्तरैण प्रतीतस्यार्थस्य शब्देन पुनः प्रत्यायने अपुष्टता, शब्देनैव प्रतीतस्यार्थस्य शब्देनैव पुनः प्रत्यायने पुनरुक्ततेति भेदः। व्योम्नो विततत्वन्तु प्रत्यक्षेणापि प्रतीयते।

किराताजुनीयतृतीयसर्गे सहसेत्यादिश्लोकः। सहसा अविचार्य्य, क्रियां यत्किञ्चिदपि कार्य्यम्, न विदधीत लोको न कुर्य्यात्। येन हि अविवेकः अविवेचनपूर्वककार्य्यकरणम्, परमापदां महाविपदां पदं स्थानं हेतुरित्यर्थः। हि तथाहि, गुणलुब्धा गुणपक्षपातिन्यः सम्पदः, विमृश्यकारिणं विवेचनपूर्वककार्य्यकारिणं जनम्, स्वयमात्मनैव वृणते अवलम्बन्ते। न तत्र चेष्टापेक्षेति भावः।

(ज) अत्रेति। द्वितीयार्द्धे वृणत इत्यादिवाक्ये, व्यतिरेकेण विपरीतभावेन, द्वितीयपादस्यैव अविवेक इत्यादेरेव अर्थो वर्त्तत इति शेषः। तथा च यथा 'अरोगी सुखी' इत्युक्ते 'रोगी दुःखी' इति स्वभावत एव प्रतीयते, तथा 'अविवेकः परमापदां पदम्' इत्युक्ते 'विवेकः परमसम्पदां पदम्' इत्यपि स्वभावादेव प्रतीयते। तथापि वृणत इत्यादिना पुनस्तस्यैवार्थस्य प्रत्यायनात् पुनरुक्ततेति भावः।

(झ) ख्यातिविरुद्धतामाह प्रसिद्धीति। ख्यातिरिति प्रसिद्धिरिति च नार्थान्तरमिति "ख्यातिविद्याविरुद्धते" इति कारिकोक्तेन सह नास्य विरोधः। लोकसमाजे कविसम्प्रदायादौ च प्रसिद्धस्य, अन्यथावर्णनं प्रसिद्धिविरुद्धत्वम्। प्रसिद्धिविरोधिनार्थप्रतीतिरेव प्रतिबध्यत इति दूरे तावदास्तां रसप्रतीतिरिति दोषत्वमस्य। अयन्त्वनित्यो दोषः, "कवीनां समये ख्याते गुणः ख्यातविरुद्धता" इति वक्ष्यमाणेन प्रतिप्रसवात्।

(ञ) तत इति। "सिंहनादेन तीव्रेण त्रासयन्नसुरान् पुरः।" इति मत्पूरितपूर्वार्द्धम्।

(ट) अत्रेति। किन्तु शिवस्यैव प्रसिद्धमिति भावः।

(ठ) कविसम्प्रदायप्रसिद्धिविरुद्धतामुदाहर्त्तुमाह यथा वेति।

(ड) पादेति। "मुखमद्येन पुष्पोञ्च वकुलानां कुलं किल ॥" इति मत्पूरितपरार्द्धम्। हे प्रिये! ते तव पादाघातात् अशोको वृक्षः, सञ्जातम् अङ्कुरः कलिकाप्ररोह एव कण्टकं यस्मिन् स तथोक्तः।

---

(१) द्वितीयार्द्धे व्यतिरेकेण, द्वितीयार्द्धव्यतिरेकेण इति पाठभेदौ।

"अधरे करजक्षतं मृगाक्ष्याः ।" (ण)

अत्र शृङ्गारशास्त्रविरुद्धत्वाद्विद्याविरुद्धता (त) ।

एवमन्यशास्त्रविरुद्धत्वमपि (थ) ।

"ऐशस्य धनुषो भङ्गं क्षत्रस्य च समुन्नतिम् ।
स्त्रीरत्नञ्च कथं नाम मृष्यते भार्गवोऽधुना ? ॥" (द)

अत्र स्त्रीरत्नमुपेक्षितुमित्याकाङ्क्षति (१) (ध) ।

(ढ) अत्रेति । अशोकेषु वृक्षेषु । कवीनां समयेन वर्णनानियमेन या ख्यातिः प्रसिद्धिस्तद्विरुद्धता । तथा च वक्ष्यति—"पादाघातादशोकं विकसति बकुलं योषितामास्यमद्यैः" इति ।

(ण) विद्याविरुद्धतामाह अधर इति । व्याकरणेतरशास्त्रोक्तनियमराहित्यं विद्याविरुद्धत्वम् । अत्र व्याकरणेतरेत्यभिधानात् व्याकरणशास्त्रोक्तनियमराहित्यं च्युतसंस्कारतैवेति बोध्यम् । विद्याविरुद्धोक्तेर्मिथ्याज्ञानेन रसप्रतीतेरेव प्रतिबन्धादस्य दोषत्वम् । अयमप्यनित्यो दोषः, हास्यरसे अस्योपयोगयोगित्वेन गुणत्वात् ।

"अधरे करजक्षतं मृगाक्ष्या अलसा देहलता कचा विकीर्णाः ।
नयने च निमीलिते कथञ्चित् कथयन्तीव रतं नवीनमेते ॥"

इति मत्पूरितपरपादत्रयः श्लोकः ।

मृगाक्ष्या हरिणलोचनायाः, अधरे ओष्ठे करजक्षतं नखाघातचिह्नम् ।

(त) अत्रेति । शृङ्गारशास्त्रविरुद्धत्वात् अधरे करजक्षतस्येत्यर्थः । तथा च कामशास्त्रम्—

"नखाघातः प्रदातव्यो यथास्थानानि कर्मसु । पार्श्वयोः स्तनयोश्चैव ऊरौ चैव नितम्बके ॥
कक्षस्थले च कर्णान्ते कपोले बाहुमूलके । ग्रीवायां कण्ठदेशे च नखाघातं समाचरेत् ॥"

(थ) एवमिति । ऊहनीयमिति शेषः । तत्र श्रुतिशास्त्रविरुद्धत्वं यथा—

"प्रातःसन्ध्यां करोत्येष मध्याह्ने धार्मिको द्विजः ।"

अत्र ब्राह्ममुहूर्त्ते कर्त्तव्यायाः प्रातःसन्ध्याया मध्याह्ने करणात् श्रुतिशास्त्रविरुद्धता ।

(द) साकाङ्क्षतां दर्शयितुमाह ऐशस्येति । अनुपपद्यमानार्थस्य स्वोपपत्तये अनुक्तार्थसापेक्षत्वं साकाङ्क्षत्वम् । निर्हेतुतायां हेतोराकाङ्क्षितत्वमात्रम्, न पुनर्हेतुं विना अर्थस्यानुपपत्तिः ; अत्र तु आकाङ्क्षितमनुक्तार्थं विना उक्तस्यार्थस्यानुपपत्तिरेवेति निर्हेतुतादोषादस्य भेदः । अतएव च न्यूनपदत्वदोषादप्यस्य भेद इति भाव्यम् । आकाङ्क्षितार्थानभिधानेन विवक्षितार्थानवगमात् रसप्रतीतिप्रतिबन्धं नास्य दोषत्वम् । अयन्तु नित्यो दोषः प्रतिप्रसवाभावात् ।

भार्गवः परशुरामः, अधुना ऐशस्य शिवसम्बन्धिनो धनुषो भङ्गम्, क्षत्रस्य क्षत्रियजातेः समुन्नतिञ्च स्त्रीरत्नं सीताञ्च उपेक्षितुं कथं नाम मृष्यते शक्नोति ? अपि तु कथमपि नेत्यर्थः ।

(ध) अत्रेति । आकाङ्क्षति मृष्यत इति पदस्यार्थ इति शेषः । तथा च स्वगुरुहरधनुर्भङ्गः क्षत्रिय-

---

(१) आकाङ्क्षता इत्यपि पाठः ।

"सज्जनो दुर्गतौ मग्नः कामिनी गलितस्तनी ।
खलः पूज्यः समज्यायां तापाय मम चेतसः ॥" (न)

अत्र सज्जनः कामिनी च शोभनौ, तत्सहचरः खलोऽशोभन इति सहचरभिन्नत्वम् (प) ।

"आज्ञा शक्रशिखामणिप्रणयिनी शास्त्राणि चक्षुर्नवं
भक्तिर्भूतपतौ पिनाकिनि पदं लङ्केति दिव्या पुरी ।
उत्पत्तिर्द्रुहिणान्वये च तदहो नेदृग्वरो लभ्यते
स्याच्चेदेष न रावणः क्व नु पुनः सर्वत्र सर्वे गुणाः ? ॥" (फ)

जातिरभ्युदयश्च परशुरामस्य अनिष्ट इति तत्र तस्य असह्यता सम्भवति ; स्त्रीत्वन्तु तस्य नानिष्टमिति कथं तत्र तस्य असह्यता सम्भवतीति स्त्रीत्वापेक्षाया एव असह्यत्वसम्भवात् त्यज्यत इति पदस्यार्थोऽनुपपद्यमानः स्त्रीपपत्तये अनुक्तस्य उपेक्षितुमिति पदस्यार्थमाकाङ्क्षतीति साकाङ्क्षतादोष इति भावः ।

(न) सहचरभिन्नतामुदाहरति सज्जन इति । उत्कृष्टापकृष्टयोरेकभावेनैकत्र निर्देशः सहचरभिन्नता । "साधुः खलं पश्यति" इत्यादौ कारकभेदाद्भिन्नभावेन निर्देशे नायं दोष इत्यत उक्तमेकभावेनेति । अमृतविषयोरिव उत्कृष्टापकृष्टयोरेकत्र समावेशे कथमपि श्रोतुरुद्वेगोदयात् रसस्य चमत्कारिताहानेरस्य दोषत्वम् । अयमपि नित्यो दोषः समाधानाभावात् ।

समज्यायां परिषदि । क्वचिदपकृष्टोत्कृष्टयोरप्येकत्र निर्देशे यथा मम—

"मूर्खो हास्याय अन्धाय दस्युस्तापाय दुःसुतः । सत्पुत्रो विधिना सृष्टः स्वर्गाय च सुखाय च ॥"

(प) अत्रेति । कामिनी शोभना स्वरूपेणैव, न तु गलितस्तनत्वेनेति बोध्यम् ।

(फ) अस्थानयुक्ततामुदाहरति आज्ञेति । अस्थाने वाक्यार्थसमाप्तिरस्थानयुक्तता । स्थाने उपयुक्त स्थाने युक्तता वाक्यार्थसमाप्तेर्योग इति स्थानयुक्तता न स्थानयुक्तता अस्थानयुक्तता । सा च द्विविधा— समाप्तावश्यकत्वे आधिक्यम्, आधिक्यावश्यकत्वे च समाप्तिरिति । तत्राद्ये अनावश्यकाधिक्यकारणानु-सन्धानविलम्बेन रसप्रतीतिविलम्बः, द्वितीये तु आधिक्यावश्यकत्वेऽपि तदभावात् रसप्रतीतेरपूर्णतेति दोषत्व-मस्य । समाप्तपुनरात्ततायां विशेषणस्य पुनरुपादानम्, इह तु विशेष्यस्य ; अधिकपदत्वे प्रतीतिसम-कालमेवाधिक्यप्रतीतिः अत्र तु पश्चादिति ताभ्यां सहास्य आधिक्यप्रकारे भेदः । स्त्रीपपत्तये न्यूनपदत्वे अनुक्तं पदं साकाङ्क्षत्वे चानुक्तमर्थमाकाङ्क्षति, अत्र तु नोपपत्तय इति ताभ्यां सहास्य न्यूनत्वप्रकारे भेदः । अयमपि नित्यो दोषः प्रतिप्रसवासम्भवात् ।

प्रथमप्रकारे उदाहरणमाज्ञेति । बालरामायणे शतानन्दस्योक्तिरियम् । आज्ञा शक्रशिखामणिप्रणयिनी इन्द्रस्य चूडारवसङ्गिनी स्वयमिन्द्रेणापि शिरसा ध्रियत इत्यर्थः । शास्त्राण्येव नवं चक्षुः, भूतपतौ पिनाकिनि शिवे भक्तिः, लङ्केति नाम दिव्या पुरी पदं वासस्थानम् । द्रुहिणान्वये ब्रह्मणो वंशे उत्पत्तिश्च । तत्तस्मात्, अहो ईदृग् गुणवान् वरो न लभ्यते । तदा अस्मै एव सीता दीयतामित्याह स्यादिति । एष

अत्र न रावण इत्येतावतैव समाप्यम् (व)।

"हीरकाणां निधेरस्य सिन्धोः किं वर्णयामहे ।" (भ)

अत्र रत्नानां निधेरित्यविशेष एव वाच्यः (म)।

"आवर्त्त एव नाभिस्ते नेत्रे नीलसरोरुहे ।

तरङ्गा वलयस्तेन त्वं लावण्याम्बुवापिका ॥" (य)

अत्र आवर्त्त एवेति नियमो न वाच्यः (र)।

"यान्ति नीलनिचोलिन्यो रजनीष्वभिसारिकाः ॥" (ल)

चेत् रावणो न स्यात् दुराचारत्वेन विख्यातनामा रावणो यदि न स्यादित्यर्थः, तदा अस्मै सीता दातव्यैव स्यादिति भावः। सर्वत्र सर्वेष्वेव जनेषु सर्वे गुणाः पुनः क्व नु देशे सन्ति ? अपि तु क्वापि नेत्यर्थः।

(व) अत्रेति। समाप्यं वाक्यमिति शेषः। तथा चात्र न रावण इत्यत्रैव वाक्यसमाप्तेरावश्यकत्वेऽपि क्व नु पुनरित्यादेरयोग्यसमर्थकवाक्यस्य अनावश्यकाधिक्यादस्थानयुक्ततादोष इति भावः।

द्वितीयप्रकारे उदाहरणं यथा मम—

"किशोरमुल्लसत्कान्तिमाकण्ठमग्नमम्बुनि। मत्वा युवतिमात्मेच्छां विस्तारणोत्येष कामुकः ॥"

अत्र "क्व विवेकः स्मराकुले" इति समर्थकवाक्ये नाधिक्यावश्यकत्वेऽपि पूर्वमेव समाप्तेरस्थानयुक्तता।

(भ) अविशेषे विशेषमुदाहरति हीरकाणामिति। सामान्ये अभिधातव्ये विशेषाभिधानम् अविशेषे विशेषः। ईदृशस्थले विवक्षितार्थप्रतीतिविलम्बेन रसप्रतीतेरपि विलम्बादस्य दोषत्वम्। अयमपि नित्यो दोषः प्रतिप्रसवाभावात्।

"नास्य रत्नानि शिष्यन्ते सर्वैरपि च संग्रहे ॥" इति मत्पूरितपरार्द्धम्।

(म) अत्रेति। अविशेषः सामान्यम्। तथा च सति न दोष इति भावः।

(य) अनियमे नियममाह आवर्त्त इति। नियमप्रयोजनाभावेऽपि तदभिधानम् अनियमे नियमः। अप्रयोजनस्याभिधाने तत्प्रयोजनानुसन्धानविलम्बेन रसप्रतीतिविलम्बादस्य दोषत्वम्। प्रतिप्रसवाभावादयमपि नित्यो दोषः।

हे प्रिये ! ते तव नाभिः आवर्त्तो जलभ्रमिरेव, नेत्रे नयनद्वयं नीलसरोरुहे नीलपद्मद्वयम्, वलयस्त्रिवल्यय तरङ्गाः, तेन हेतुना, त्वं लावण्याम्बुनो वापिका दीर्घिका।

(र) अत्रेति। नियमो नियमार्थक एवशब्दः। न वाच्यः प्रयोजनाभावात्।

(ल) विशेषे अविशेषमाह यान्तीति। विशेषेऽभिधातव्ये सामान्याभिधानं विशेषे अविशेषः। अनुपपत्तिज्ञानेन रसप्रतीतिप्रतिबन्धादस्य दोषत्वम्। उक्तादेव हेतोरयमपि दोषो नित्यः।

"अतिनिःशब्दसञ्चाराः परितः प्रेरितेक्षणाः।" इति मत्पूरितपूर्वार्द्धम्।

नीलनिचोलिन्यः अन्धकारे यथा कश्चिल्लक्षयितुं न शक्नुयात् तदर्थं परिहितनीलवसनाः अभिसारिकाः प्रागुक्तलक्षणा नायिका रजनीषु यान्ति।

अत्र तमिस्रास्विति रजनीविशेषो वाच्यः (व)।

"आपातसुरसे भोगे निमग्नाः किं न कुर्वते॥" (श)

अत्र आपात एवेति नियमो वाच्यः (ष)।

ननु वाच्यस्यानभिधाने "व्यतिक्रमलवम्" इत्यादावपेरभावः, इह चैवकारस्येति कोऽनयोर्भेदः? अत्राह—"नियमस्यावचनमेव पृथग्भूतं नियमपरिवृत्तेर्विषयः" इति; तन्न, तथा सत्यपि द्वयोः शब्दार्थदोषतायां नियामकाभावात् (स)। तत् का गतिरिति चेत् "व्यतिक्रमलवम्" इत्यादौ शब्दोच्चारणानन्तरमेव दोषप्रतिभासः, इह तु अर्थप्रत्ययानन्तरमिति भेदः (ह)।

एवञ्च शब्दपरिवृत्तिसहत्वासहत्वाभ्यां पूर्वैराहृतोऽपि शब्दार्थदोषविभाग एवं पर्य्यवस्यति, यो दोषः शब्दपरिवृत्त्यसहः स शब्ददोष एव; यश्च पदार्था-

---

(व) अत्रेति। तमिस्रासु अन्धकारान्वितासु रात्रिषु। तथा च "तमिस्रा तामसी रात्रिः" इत्यमरः। वाच्य इति। तथा सति अन्धकारसमानवर्णतया नीलवसनानां लोकैरलक्ष्यतया गोपनेनैव गमनं सिध्यतीति नोक्तो दोष इति भावः। रजनीष्विति सामान्याभिधाने तु ज्योत्स्नान्वितरात्रीणामपि प्राप्तेस्तासु नीलवसनानामनायासेन लक्ष्यतया गोपनगमनानुपपत्तिरिति कवेरभिप्रेतासिद्धेरुक्तदोष एवेति बोध्यम्।

(श) नियमे अनियममुदाहरति आपातेति। नियमे अभिधातव्ये तदनभिधानं नियमे अनियमः। तथा चार्थस्य विवक्षितभावेनाप्रतीत्या रसादेश्चमत्कारिताह्रासादस्य दोषत्वम्। एषोऽपि नित्य एव दोषः प्रतिप्रसवाभावात्।

"संसारकूपसम्भूते गभीरे पङ्कसङ्कुले।" इति मतपूरितपूर्वार्द्धम्।

आपातसुरसे प्रथमत एव सुखकरे, भोगे विषयोपभोगे निमग्ना जनाः।

(ष) अत्रेति। आपात एव उपस्थितिमात्रमेव। वाच्य इति। तथा सति अर्थस्य विवक्षितभावेनैव प्रतीतेर्नोक्तदोष इत्याशयः।

(स) वाच्यानभिधानेन सह नियमे अनियमस्य भेदं दर्शयितुं पृच्छति नन्विति। आह कश्चिदिति शेषः। अवचनमनुक्तिरेव, पृथग्भूतं व्यतिरिक्तं सत् अनियमपरिवृत्तेर्नियमेऽनियमाख्यदोषस्य। तथा च नियमद्योतकशब्दानभिधाने नियमेऽनियमः, तद्भिन्नद्योतकशब्दानभिधाने तु वाच्यानभिधानमिति सामान्यविशेषभावेनानयोर्भेद इति तस्याभिप्रायः। द्वयोर्वाच्यानभिधानदोषनियमानियमदोषयोः। शब्दार्थदोषतायामिति। वाच्यानभिधानस्य शब्ददोषत्वे नियमानियमदोषस्य चार्थदोषत्वे इत्यर्थः, नियामकाभावात् उभयोरपि शब्दाभावघटिततया शब्ददोषत्वस्यैव सम्भवेन नियमानियमदोषस्य अर्थदोषत्वे निश्चायकाभावादित्यर्थः।

(ह) तदिति। का गतिरुभयोर्भेदनिरूपणे क उपायः। दोषप्रतिभासो दोषप्रतीतिः। भेद इति। एवञ्चोभयोः शब्दार्थदोषतायामपि नियामकोपपत्तिरिति भावः।

(च) नन्वेवं शब्दार्थयोः प्रतीत्यानन्तर्य्यमात्रेणैव शब्दार्थदोषयोर्विभागे सिद्धान्तिते प्राचीनमत-

न्वयप्रतीतिपूर्वबोध्यः सोऽपि शब्ददोषः; यथार्थप्रतीत्यनन्तरबोध्यः सोऽर्थाश्रय इति (च)।

एवञ्च अनियमपरिवृत्तित्वादेरप्यधिकपदत्वादेर्भेदो बोद्धव्यः (क)।

अमतपरार्थत्वे तु "राममन्मथशरेण—" इत्यादौ (१६२ पृष्ठे) नियमेन वाक्यव्यापित्वाभिप्रायाद्वाक्यदोषता (ख)। अश्लीलत्वादौ तु न नियमेन वाक्यव्यापित्वम् (ग)।

"आनन्दितस्वपक्षोऽसौ परपक्षान् हनिष्यति॥" (घ)

विशेषः; ते हि केवलं शब्दपरिवृत्तिसहत्वे अर्थदोषत्वं शब्दपरिवृत्त्यसहत्वे तु शब्ददोषत्वमित्यं शब्दार्थदोषौ विभजन्ते अत्याह एवञ्चेति। एतेन "निरुक्तभेदे प्राचीनस्वरसमप्याह एवञ्चेति" इति रामचरणोक्तमपास्तम्। तथात्वे "एवं पर्यवस्यति" इत्यादिना प्राचीनमतस्यार्थान्तरकल्पनानुपपत्तेः। एवञ्च अस्मन्मते शब्दार्थयोः प्रतीत्यानन्तर्य्येण शब्दार्थदोषविभागस्य सिद्धान्त चेत्यथः। शब्दपरिवृत्तिसहत्वासहत्वाभ्यां शब्दपरिवर्त्तने दोषस्य स्थित्यस्थितिभ्याम्। पूर्वैः प्राचीनैः। तथा च यो यो दोषस्तत्तच्छब्दपरिवर्त्तनेऽपि केवलमर्थमाश्रित्यावतिष्ठते, स सोऽर्थदोषः; यो यस्तु दोषः केवलशब्दाश्रिततया तत्तच्छब्दपरिवर्त्तने नावतिष्ठते स स शब्ददोषः, उभयत्राप्यन्वयव्यतिरेकानुसारित्वादिति प्राचीनानामाशयः। एवं पर्य्यवस्यति—युक्त्या वक्ष्यमाणप्रकारेण परिणमते। तं प्रकारमेवाह यो दोष इति। पदानां ये अर्थास्तेषाम् अन्वयप्रतीतेः परस्परसम्बन्धबोधात् पूर्वं बोध्यः, तत्तच्छब्दश्रवणानन्तरमेव बोधगम्य इत्यर्थः। सोऽपि शब्ददोष इति। स्वश्रवणमात्रमेव ज्ञायमानतया केवलशब्दघटितत्वादिति भावः। अर्थाश्रय इति। स्वप्रतीत्यनन्तरमेव प्रतीयमानतया केवलार्थघटितत्वादित्याशयः। इतीति। अनेन प्रकारेण पर्य्यवस्यतीत्यर्थः।

(क) उक्तसिद्धान्तमन्यत्रापि सञ्चारयति एवञ्चेति। किञ्चेति चार्थः। एवमनेन प्रकारेण। अनियमपरिवृत्तित्वम् अनियमे नियमः, आदिशब्दादपुष्टत्वास्थानयुक्तत्वादेर्ग्रहणम्। द्वितीयादिशब्दात् न्यूनपदत्वसमाप्तपुनरात्तत्वादेः परिग्रहः। तथा च अधिकपदत्वे शब्दश्रवणानन्तरमेव दोषप्रतीतिः अनियमे नियमादौ तु अर्थप्रतीत्यनन्तरमेवेत्यादिरूपो भेदः समुन्नेयः।

(ख) अर्थवमर्थप्रतीत्यनन्तरमेव प्रतीयमानतया अमतपरार्थतादोषस्य अर्थदोषत्वसम्भवेऽपि कथं वाक्यदोषमध्ये परिगणनमित्याह अमतेति। नियमेन अवश्यम्भावेन। एतेनोक्तरीत्या अमतपरार्थता अर्थदोष एव वास्तविक इति सूचितम्।

(ग) अथ तर्हि "हन्तुमेव प्रवृत्तस्य" इत्यादावपि अश्लीलार्थस्य वाक्यव्यापित्वाद्वाक्यदोषत्वसम्भवे कथमयमर्थदोषमध्ये परिगणित इत्याह अश्लीलेति। नियमेन अवश्यम्भावेन। तथा च "हन्तुमेव प्रवृत्तस्य" इत्यादौ वाक्यव्यापित्वसम्भवेऽपि "अकाले प्रस्थितं कान्तम्" इत्यादौ केवलप्रस्थितपदव्यापित्वेन वाक्यव्यापित्वाभावादर्थगत एवाश्लीलतादोष इत्याशयः।

(घ) विध्ययुक्ततामुदाहरति आनन्दितेति। अयोग्ये विधित्वारोपो विध्ययुक्तता। विधिरत्र समापिका

अत्र परपक्षं हत्वा स्वपक्षमानन्दयिष्यतीति विधेयम् (ङ)।

"चण्डीशचूड़ाभरण ! चन्द्र ! लोकतमोऽपह !।
विरहिप्राणहरण ! कदर्थय न मां वृथा॥" (च)

अत्र विरहिण उक्तौ तृतीयपादस्यार्थो नानुवाद्यः (छ)।

"लग्नं रागावृताङ्ग्या सुदृढ़मिह ययैवासियष्ट्यारिकण्ठे
मातङ्गानामपीहोपरि परपुरुषैर्या च दृष्टा पतन्ती।
तत्सक्तोऽयं न किञ्चिद्गणयति विदितं तेऽस्तु तेनास्मि दत्ता
भृत्येभ्यः श्रीनियोगाद्गदितुमिति गतेवाम्बुधिं यस्य कीर्त्तिः॥" (ज)

क्रिया। तथा च असमापकक्रियायामपि समापकक्रियात्वारोपेण प्रतीतिविपर्य्यासात् रसप्रतीतिप्रतिबन्ध इति दोषत्वमस्य। अयमपि नित्यो दोषः प्रतिप्रसवाभावात्।

"कुमारी मारतुल्यश्रीः कुमारसमविक्रमः।" इति मत्पूरितपूर्वार्द्धम्।

आनन्दितेत्यादौ परपक्षहननेन स्वपक्षानन्दजननस्याभिप्रेततया, आनन्दनक्रियायामेव समापनौचित्ये हननक्रियायां समापनाद्विधेयायुक्तता। अथैवं विधेयाविमर्शेन सहास्य को भेद इति चेत्; उच्यते— "आनन्दयासौ निजान् पक्षान् परपक्षान् हनिष्यति" इति पाठे विधेयाविमर्शस्य प्रसङ्ग एव नास्ति, अयन्तु स्यादेवेति विषय-भेदाद्भेदः। अथवा शब्दश्रवणानन्तरमेव विधेयामर्शप्रतीतिः, अयन्तु अर्थप्रतीत्यनन्तरमेवेति भेदः।

(ङ) अत्रेति। विधेयं विधातुं समापयितुं योग्यमित्यर्थः। तथा सति नोक्तो दोष इत्याशयः।

(च) अनुवादायुक्ततामुदाहरति चण्डीशेति। अनुवादस्य विधिविरोधित्वमनुवादायुक्तता। अत्रानुवादो नामोद्देश्यविशेषणम्। अस्य तु विधिविशेषणयोः परस्परविरोधप्रत्यायकतया रसप्रतीतिप्रतिबन्धकत्वाद्दोषत्वम्। प्रतिप्रसवाभावादयमपि नित्यो दोषः।

हे चण्डीशचूड़ामरण! दुर्गापतेः शिवस्यापि शिखालङ्कार! हे चन्द्र! हे लोकतमोऽपह! जगदन्धकारनाशक! हे विरहिप्राणहरण! मां विरहिणं वृथा न कदर्थय मदनोद्दीपनेनानर्थकं नोत्पीड़य।

अत्र विरहिण एव निरर्थककदर्थनविधिना सह स्वाभाविकतया सार्थकस्यैव विरहिप्राणहरणविशेषण-स्यानुपपत्त्या विरोधादनुवादायुक्तता।

(छ) अतएव समाधानप्रकारमाह अत्रेति। नानुवाद्यो न चन्द्रविशेषणतया स्थापनीयः। तथा च "विरहिप्राणहरण!" इत्यत्र "जगदानन्दजनन!" इत्युक्तौ तु नायं दोष इत्याशयः।

(ज) निर्म्मुक्तपुनरुक्तत्वदोषमुदाहरति लग्नमिति। समाप्तस्यापि वाक्यार्थस्य कारकान्तरेण पुनरुपा-दानं निर्म्मुक्तपुनरुक्तत्वम्। अतएव विशेषणमात्रेण पुनरुपादाने समाप्तपुनरात्तता, विशेष्यीभूतकारकान्तरेण पुनरुपादाने तु निर्म्मुक्तपुनरुक्ततेत्यनयोर्भेदः। निर्म्मुक्तः समाप्तोऽपि पुनरुक्त इति निर्म्मुक्तपुनरुक्तो वाक्यार्थ-स्तस्य भावः सा। अत्र मध्ये आकाङ्क्षाभङ्गेन रसभङ्गोऽपि प्रतीयत इति दोषत्वमस्य। पाठपरिवर्त्तनमन्तरेण समाधानासम्भवादयमपि नित्य एव दोषः।

अत्र विदितं तेऽस्त्वित्यनेन समापितमपि वचनं तेनेत्यादिना पुनरुपात्तम् (झ) ।

अथ रसदोषानाह—

६ । रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपि ।
परिपन्थिरसाङ्गस्य विभावादेः परिग्रहः ॥
आक्षेपः कल्पितः कृच्छ्रादनुभावविभावयोः ।
अकाण्डे प्रथनच्छेदौ तथा दीप्तिः पुनः पुनः ॥
अङ्गिनोऽननुसन्धानमनङ्गस्य च कीर्त्तनम् ।
अतिविस्तृतिरङ्गस्य प्रकृतीनां विपर्य्ययः ॥
अर्थानौचित्यमन्यच्च (१) दोषा रसगता मताः । (ञ)

राज्ञः प्रशंसेयं लग्नमित्यादिः । रागेण शत्रुरुधिरेण अनुरागेण च आवृतानि व्याप्तानि अङ्गानि समस्तावयवा यस्यास्तया, ययैव असियष्ट्या कृशतरवारिणा असियष्टिवत् कृशाङ्ग्या कयाचित् स्वैरिण्या च, इह अधुना, अरीणां कण्ठे लग्नं शिरश्छेदाय आलिङ्गनाय च संसक्तम् । या च असियष्टिः, इह मातङ्गानां हस्तिनां कामशास्त्रोक्तहस्तिलक्षणविशिष्टपुरुषविशेषाणाञ्च अपि उपरि पतन्ती तेषां वधाय तैः सह रमणाय च संसजन्ती सती, परपुरुषैः शत्रुपक्षीयलोकैः पतिभिन्नजनैश्च दृष्टा । तस्यामसियष्ट्यां स्वैरिण्याञ्च सक्त आसक्त अयं मत्पतीभूतो राजा, किञ्चित् मत्सुखादिकं न गणयति न चिन्तयति ; अपि च तेन राज्ञा अहं भृत्येभ्यः स्वसेवकेभ्यो दत्तास्मि ; इति ते तव मत्पितुः समुद्रस्य विदितं ज्ञातमस्तु । अनन्तरञ्च स्वकन्याया दुःखमोचनाय यत् कर्त्तव्यं भवति तत् कुर्य्या इति भावः । श्रियाः समुद्रोत्पन्नाया लक्ष्म्याः नियोगादादेशात् इति पूर्वोक्तं गदितुं कथयितुमिव यस्य कीर्त्तिः श्रीसहचरी च अम्बुधिं समुद्रं गता । दुष्टोऽपि सुचारुरेवायं श्लोकः ।

(झ) अत्रेति । वचनं वचनार्थम्, तेनेत्यादिना "तेनास्मि दत्ता भृत्येभ्यः" इत्यनेन । पुनरुपात्तं तेनेति कर्त्रा, अस्मीति कर्म्मणा, भृत्येभ्य इति सम्प्रदानेन च पुनर्गृहीतम् ।

(ञ) रसस्येति । स्वशब्देन रसस्योक्तिरेको दोषः । स पुनर्द्विविधः—रसशब्देन रसस्योक्तिः शृङ्गारादिशब्देन रसस्योक्तिश्चेति । स्थायिसञ्चारिणोर्भावयोरपि स्वशब्देनोक्तिरित्यन्वयः । तेन स्वशब्देन स्थायिभावस्योक्तिः स्वशब्देन सञ्चारिभावस्योक्तिश्चेति द्वौ । परिपन्थी विरोधी यो रसस्तस्य अङ्गम् अङ्गस्वरूपो यो विभावादिस्तस्य परिग्रह उपादानम् । कृच्छ्रात् कष्टात् अनुभावविभावयोः आक्षेपः प्रतीतिः कल्पितः । अकाण्डे अनवसरे रसस्य प्रथनं विस्तारः तथा च्छेदो भङ्गश्च । तथा रसस्य पुनः पुनर्दीप्तिरुद्बोधनम् । अङ्गिनः

(१) अर्थानौचित्यमिति पाठान्तरम् ।

रसस्य स्वशब्दो रसशब्दः शृङ्गारादिशब्दश्च (ट)। क्रमेण यथा—

"तामुद्वीक्ष्य कुरङ्गाक्षीं रसो नः कोऽप्यजायत ॥" (ठ)

"चन्द्रमण्डलमालोक्य शृङ्गारे मग्नमन्तरम् ॥" (ड)

स्थायिभावस्य स्वशब्दवाच्यत्वं यथा—

"अजायत रतिस्तस्यास्त्वयि लोचनगोचरे ॥" (ढ)

व्यभिचारिणः स्वशब्दवाच्यत्वं यथा—

प्रधानरसस्य अननुसन्धानम् अनुद्बोधनम्। अनङ्गस्य अङ्गत्वमप्राप्तस्य रसस्य कीर्त्तनञ्च। अङ्गस्य अङ्गरूपरसस्य अतिविस्तृतिरत्यन्तबाहुल्यकरणम्। प्रकृतीनां नायकादीनां तत्स्वभावानाञ्च विपर्य्ययः अन्यथाकरणम्। अस्य अनौचित्यदोषान्तर्भावेऽपि पृथगुपन्यासस्तन्मध्ये प्राधान्यज्ञापनार्थः, गोवृषन्यायात्। अथ अन्यदन्यप्रकारमनौचित्यञ्चेति दोषा रसगता मताः। तेन रसस्य स्वशब्दवाच्यत्वम्, स्थायिनः स्वशब्दवाच्यत्वम्, सञ्चारिणः स्वशब्दवाच्यत्वम्, विरोधिरसाङ्गग्रहणं कष्टाक्षिप्तानुभावत्वं कष्टाक्षिप्तविभावत्वम्, अकाण्डे रसप्रथनम्, अकाण्डे रसच्छेदः, पुनः पुनारसोद्दीप्तिः, अङ्गिरसाननुसन्धानम्, अनङ्गरसकीर्त्तनम्, अङ्गरसातिविस्तृतिः, प्रकृतिविपर्य्ययः, अनौचित्यञ्चेति नाम चतुर्द्दश रसदोषा ज्ञेयाः।

(ट) रसस्येति। स्वस्य रसस्य वाचकः शब्दः स्वशब्दः, स च विनिगमनाविरहात् सामान्यरसवाचको विशेषरसवाचकश्चेत्युभयमपि ग्राह्यमित्यभिप्रायेण स्वशब्दो रसशब्दः शृङ्गारादिशब्दश्चेति। तत्र रसशब्देन शृङ्गारादिशब्देन वा रसस्योपस्थाप्यत्वं रसस्य स्वशब्दवाच्यत्वम्। एवं स्थायिसञ्चारिणोः स्वशब्दवाच्यत्वेऽपि लक्षणमूह्यम्। सूक्ष्मवसनावृतः कामिनीकुचकलस इव व्यञ्जनावृत्तिगम्यः किञ्चिदायासेनैवानुभूयमानो रसः सुतरामेव मधुरायते, स्फीतालोकमध्यवर्त्ती निर्म्मुक्तपरिस्फुटः स इव च साक्षादुच्यमानो विनायासमनुभूयमानो रसश्चमत्कारिताविहीन इव प्रतिभातीति रसस्य प्रकर्षनाशकत्वादस्य दोषत्वम्। स्थायिसञ्चारिणोः स्वशब्दवाच्यत्वेऽप्येवमेव ज्ञेयम्। अयन्तु नित्य एव दोषः पाठपरिवर्त्तनमन्तरेण समाधानासम्भवात्। एवं स्थायिनः स्वशब्दवाच्यत्वदोषोऽपि।

(ठ) तत्रायमुदाहरति तामिति। अस्य मत्पूरितपूर्व्वार्द्धं यथा—

"वयसा षोड़शीं साक्षादुर्व्वशीमिव सुन्दरीम्।"

नः अस्माकम्, कोऽपि अनिर्व्वचनीयः। अत्र रसशब्दोपादानात् रसस्य स्वशब्दवाच्यत्वम्।

(ड) द्वितीयमुदाहरति चन्द्रेति। अस्य मत्पूरितपूर्व्वार्द्धं यथा—

"कूजत्कोकिल उद्याने सूनसौगन्ध्यसुन्दरे।"

अत्र शृङ्गारशब्दोपादानात् रसस्य स्वशब्दवाच्यत्वम्।

(ढ) अजायतेति। अस्य मत्पूरितपूर्व्वार्द्धं यथा—

"आगते माधवीकुञ्जं मनोभवमनोहरे।"

रतिरनुरागः। अत्र रतिशब्दोपादानात् शृङ्गारस्थायिभावस्य स्वशब्दवाच्यत्वम्।

"जाता लज्जावती मुग्धा प्रियस्य परिचुम्बने ॥" (ण)

अत्र प्रथमे पादे "आसीन्मुकुलिताक्षी सा" इति लज्जाया अनुभावमुखेन कथने युक्तः पाठः (त) ।

"मानं मा कुरु तन्वङ्गि ! ज्ञात्वा यौवनमस्थिरम् ॥" (थ)

अत्र यौवनास्थैर्यनिवेदनं शृङ्गाररसस्य परिपन्थिनः शान्तरसस्याङ्गं शान्तस्यैव च विभाव इति शृङ्गारे तत्परिग्रहो न युक्तः (द) ।

"धवलयति शिशिररोचिषि भुवनतलं लोकलोचनानन्दे ।
ईषत्क्षिप्तकटाक्षा स्मेरमुखी सा निरीक्ष्यतां तन्वी ॥" (ध)

अत्र रसस्योद्दीपनालम्बनविभावावनुभावपर्यवसायिनौ स्थिताविति कष्टकल्पना (न) ।

(ण) जातेति । अस्य मत्पूरितपूर्वार्द्धं यथा—

"श्लिष्टा वामेन हस्तेन दक्षिणेनोन्नमितानना ।"

अत्र लज्जाशब्दोपादानात् व्यभिचारिभावस्य स्वशब्दवाच्यत्वम् । अयन्त्वनित्यो दोषः, "क्वचिदुक्तौ स्वशब्देन न दोषो व्यभिचारिणः" इति वक्ष्यमाणेन प्रतिप्रसवात् ।

(त) समाधानं दर्शयितुमाह अत्रेति । अनुभावमुखेन मुकुलिताक्षत्वरूपानुभावद्वारा । तदानीं नयनमुद्रणस्य लज्जाजन्यतया तदनुभावत्वमिति बोध्यम् । युक्त इति अनुभावेन प्रत्यायितस्य लज्जारूपव्यभिचारिभावस्य यथायथमेव संवृतत्वसत्त्वादित्याशयः ।

(थ) विरोधिरसाङ्गग्रहणमुदाहरति मानमिति । अस्य मत्पूरितपूर्वार्द्धं यथा—

"स्थायी विमलचन्द्रोऽयं स्थिरो मलयमारुतः ।"

(द) अत्रेति । परिपन्थिनो विरोधिनः "शान्तस्तु वीर-शृङ्गार-रौद्र-हास्य-भयानकैः" इति प्रागुक्तन्यायात् अङ्गं निर्वाहकम् । विभाव उद्दीपनविभावः । न युक्त इति । विरोधिपुष्टिकरस्य स्वहानिकरत्वादिति भावः ।

(ध) कष्टाक्षिप्तानुभावत्वमुदाहरति धवलयतीति । अत्र नामानुसारेणैव लक्षणं दोषत्वबीजञ्चोन्नेयम् प्रतिप्रसवाभावादयन्तु नित्य एव दोषः ।

लोकलोचनानामानन्दे आनन्दजनके, शिशिररोचिषि शीतांशौ चन्द्रे, भुवनतलं धवलयति धवलं कुर्वति सति, ईषत् क्षिप्तः कटाक्षस्त्वां प्रति कुटिलदृष्टिर्यया सा, स्मेरं सस्मितं मुखं यस्याः सा तथोक्ता च, या पूर्वं तवाशेषानुनयेनाप्यनपनेयमाना आसीत् सा तन्वी कृशाङ्गी निरीक्ष्यतामवलोक्यताम् । इदानीं चन्द्रदर्शनेनैव क्रमेण क्षीयमाणमाना जायत इत्यनुभूयतामिति भावः ।

(न) अत्रेति । उद्दीपनविभावः—चन्द्र-कटाक्षपात-मन्दहासरूपवितयात्मकः, आलम्बनविभावस्तादृशी नायिका, तावेव अनुभावं नायककर्त्तृकनायिकानिरीक्षणरूपं पर्यवसाययतः पर्यवसाने बोधयत इति । कष्टकल्पना अनुभावस्येत्यर्थः । तथा चात्र नायककर्त्तृकनायिकानिरीक्षणरूपोऽनुभावो वचने

"परिहरति रतिं मतिं लुनीते स्खलतितरां परिवर्त्तते च भूयः ।
इति वत विषमा दशाऽस्य देहं परिभवति प्रसभं किमत्र कुर्म्मः ॥" (प)

अत्र रतिपरिहारादीनां करुणादावपि सम्भवात् कामिनीरूपो विभावः कष्टादाक्षेप्यः (फ) ।

अकाण्डे प्रथनं यथा—वेणीसंहारे द्वितीयेऽङ्के प्रवर्त्तमानानेकवीरसङ्क्षये काले दुर्य्योधनस्य भानुमत्या सह शृङ्गारप्रथनम् (ब) ।

छेदो यथा—वीरचरिते राघवभार्गवयोर्द्धाराधिरूढे संग्रामे (१) "कङ्कणमोचनाय गच्छामि" इति राघवस्योक्तिः (भ) ।

पुनः पुनर्दीप्तिर्यथा—कुमारसम्भवे रतिविलापे (म) ।

नाभिहितः किन्तु चन्द्रादिरूपोद्दीपनविभावेन नायिकारूपालम्बनविभावेन च सम्भवपरतया अनुमातव्य इति कष्टेनानुभावकल्पनात् कष्टाक्षिप्तानुभावत्वम् ।

(प) कष्टाक्षिप्तविभावत्वमुदाहरति परीति । अत्रापि नामानुसारेणैव लक्षणं दोषत्वबीजञ्चोन्नेयम् । अयमपि नित्यो दोषः । दुर्लभनायिकायामनुरक्तस्य वयस्यस्य वयस्यान्तरकर्त्तृकावस्थावर्णनेयम् । अयं सखा रतिमन्यपदार्थेष्वनुरागं परिहरति परित्यजति, मतिं बुद्धिं लुनीते छिनत्ति धैर्य्यसम्पादिनीं बुद्धिमपि त्यजतीत्यर्थः, स्खलतितरामत्यन्तमेव वाक्यस्खलनमाचरति, भूयो वारं वारं परिवर्त्तते शय्यायां पार्श्वपरिवर्त्तनं करोति च । वत खेदे । इति इत्थं विषमा भीषणा दशा अवस्था अस्य वयस्यस्य देहं शरीरं प्रसभं बलेन परिभवति क्लिश्नाति । अत्र वयं किं कुर्म्मः ।

(फ) अत्रेति । करुणादावित्यादिशब्देन विषयवैराग्यजनकशान्तरसस्य ग्रहणम् । विभाव आलम्बनविभावः । कष्टात् प्रकरणपर्य्यालोचनकष्टात्, आक्षेप्य आदेयः ।

(ब) अकाण्डे रसप्रथनमुदाहरति अकाण्ड इति । विरोधिरसाभ्यन्तरे प्राधान्येन रसविशेषप्रसारणम् अकाण्डे रसप्रथनम् । अत्र प्राधान्येनेत्यभिधानात् अङ्गभावेन विरोधिरसोपन्यासे न दोषः । तथा च वक्ष्यति—"विरोधिनोऽपि स्मरणे" इत्यादि । विरोधिरसयोः परस्परोपमर्द्योपमर्द्दकभावेनोभयोरपि चमत्कारिताहानेरस्य दोषत्वम् । अयमपि नित्यो दोषः प्रतिप्रसवाभावात् । प्रवर्त्तमानो विद्यमानः अनेकेषां वीराणां पुत्रभ्रातृप्रभृतीनां सङ्क्षयो यस्मिन् तादृशे । तत्र विरोधिनो वीररसस्याभ्यन्तरे शृङ्गारप्रसारणादकाण्डे रसप्रथनम् ।

(भ) अकाण्डे रसच्छेदमुदाहरति छेद इति । पुष्टिमन्तरेण सहसैव रसभङ्गः अकाण्डे रसच्छेदः । रसभङ्गेन तत्प्रकर्षस्यापि भङ्ग इति दोषत्वमस्य । एषोऽपि नित्य एव दोषः पुष्टिकरणमन्तरेण समाधानासम्भवात् । द्वाराधिरूढे पुरद्वारे उपस्थितप्राये । उक्तिरुक्तिजनितः ।

(म) पुनः पुनारसोद्दीप्तिं दर्शयति पुनरिति । यस्य कस्यापि रसस्य वारं वारमेवोद्दीपनं पुनः पुनर्दीप्तिः । अम्लतस्यापि पुनः पुनरास्वादे विरक्तिरुपजायत इति किमुत रसस्येति दोषत्वमस्य । अयमपि नित्यो

---

(१) द्वारधिरूढे अन्योन्यसंग्रामे, धाराधिरूढे संग्रामे इति पाठभेदौ ।

अङ्गिनोऽननुसन्धानं यथा—रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमने सागरिकाया विस्मृतिः (य)।

अनङ्गस्य कीर्त्तनं यथा—कर्पूरमञ्जर्यां राजनायिकयोः कृतं वसन्तस्य वर्णनमनादृत्य वन्दिवर्णितस्य प्रशंसनम् (१) (र)।

अङ्गस्यातिविस्तृतिर्यथा—किराते सुराङ्गनाविलासादिः (ल)।

प्रकृतयो दिव्या अदिव्या दिव्यादिव्याश्चेति। तेषां धीरोदात्तादिता, तेषामप्युत्तमाधममध्यमत्वम्। तेषु च यो यथाभूतः, तस्यायथावर्णने प्रकृतिविपर्य्ययो दोषः (व)। यथा—धीरोदात्तस्य रामस्य धीरोद्धतवत् छद्मना

दोषः कियतः परित्यागमन्तरेण समाधानासम्भवात्। तथा च कुमारसम्भवचतुर्थसर्गे "अयि जीवितनाथ!" इत्यादिना आरब्धे करुणरसे "मधुरात्मानमदर्शयत् पुरः" इत्यनन्तरम् "तमवेक्ष्य रुरोद सा भृशम्" इत्यादिना पुनरप्युद्दीपनम्।

(य) अङ्गिन इति। अङ्गिनोऽननुसन्धानं प्रधानपात्रानुल्लेखेन प्रधानरसस्यानुद्दीपनम्। आलम्बनोल्लेखे सत्यपि सहसा रसभङ्गे अकाण्डे रसच्छेदः, आलम्बनानुल्लेखेन रसभङ्गे तु अङ्गिनोऽननुसन्धानमित्यनयोर्भेदः। तदानीं रसस्य नाशेनेव तत्प्रकर्षनाशाद्दोषत्वमस्य। अयमपि नित्यो दोषः। बाभ्रव्यस्य तदाख्यस्य कञ्चुकिनः, आगमने। विस्मृतिर्विस्मृतिप्रयुक्तम्।

(र) अनङ्गस्येति। अनङ्गस्य कीर्त्तनं प्रधानरसानुपयोगिनो रसस्योद्दीपनम्। तदवसरे प्रधानरसस्तिरोहित इव भवतीति दोषत्वमस्य। अयमपि नित्यो दोषः। स्वयमात्मभ्याम्। अनादृत्य उपेक्ष्य। प्रशंसनं प्रशंसनप्रयुक्तम्।

(ल) अङ्गस्येति। अङ्गस्यातिविस्तृतिः अङ्गभूतरसस्यातिबाहुल्येनोद्दीपनम्। अनेनापि प्रधानी रसश्छिन्न इव प्रतिभातीति दोषत्वमस्य। अयमपि नित्यो दोषः। किराते किरातार्जुनीये काव्ये। तथा च तत्र वीरः प्रधानो रसः, शृङ्गारादयश्चाङ्गरसाः, किन्तु सप्तमसर्गादारभ्य दशमसर्गं यावत् चतुर्ष्वेव सर्गेषु शृङ्गारवर्णनात् वीरो रसश्छिन्न इव प्रतिभातीति।

(व) प्रकृतिविपर्य्ययदोषं लक्षयितुमादौ प्रकृतीर्विभजते प्रकृतय इति। प्रक्रियते प्रकर्षेण रस उद्बोध्यते आभिरिति प्रकृतयो नायकादयः। ताश्च त्रिविधा इत्याह दिव्या इति। दिवि भवा दिव्याः—देव-दानव-गन्धर्व-यक्ष-राक्षसादयः। अदिव्या दिव्यभिन्नाः—मानुषा दुष्मन्तादयः। दिव्यादिव्याः—दिव्या अपि अदिव्याभिमानिनः श्रीरामचन्द्रादयः। तेषां दिव्यादीनां धीरोदात्तादिता, आदिशब्देन धीरोद्धता-धीरललितता-धीरप्रशान्तता गृह्यन्ते। तेषामपि धीरोदात्तादीनाम्, उत्तमाधममध्यमत्वमपि प्रकृतिरित्यर्थः। एतेन प्रकृतिशब्दोऽत्र स्वभावपरोऽपीति दर्शितम्।

इदानीं लक्षणमाह तेष्विति। यथाभूतः प्रसिद्ध इति शेषः। अयथावर्णने अतद्रूपत्वेन वर्णने।

---

(१) प्रशंसेति पाठान्तरम्।

बालिवधः । यथा वा कुमारसम्भवे उत्तमदेवतयोः पार्वतीपरमेश्वरयोः सम्भोगशृङ्गारवर्णनम् । "इदं पित्रोः सम्भोगवर्णनमिवात्यन्तमनुचितम्" इत्याहुः (श) ।

अन्यदनौचित्यं देशकालादीनामन्यथा यद्वर्णनम् । तथा सति काव्यस्यासत्यताप्रतिभासेन विनेयानामुन्मुखीकारासम्भवः (ष) ।

७ । एभ्यः पृथगलङ्कार-दोषाणां नैव सम्भवः ॥ (स)

एभ्य उक्तदोषेभ्यः । तथाहि—उपमायामसादृश्यासम्भवयोः, उपमानस्य जाति-प्रमाणगत-न्यूनत्वाधिकत्वयोः, अर्थान्तरन्यासे उत्प्रेक्षितार्थसमर्थने चानुचितार्थत्वम् (ह) । क्रमेण यथा—

"ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम् ॥" (क्ष)

एवञ्च काव्यस्य मिथ्यात्वप्रतीत्या श्रोतॄणामश्रद्धोदयेन रसास्वाद एव न जायत इति दोषत्वमस्य । अयमपि नित्यो दोषः, तत्तद्वर्णनपरिवर्त्तनं विना समाधानासम्भवात् ।

(श) उदाहरति यथेति । पित्रोर्मातापित्रोः । आहुः काव्यप्रकाशकारा इति शेषः ।

(ष) प्रकृतिविपर्य्ययेतरत् सामान्यमनौचित्यं लक्षयति अन्यदिति । आदिपदेन जातिवयःप्रभृतीनां ग्रहणम् । अन्यथा वर्णनं विपरीतधर्म्मवर्णनम् । अस्य दोषत्वबीजमाह तथेति । अन्यथा वर्णने सतीत्यर्थः । असत्यताप्रतिभासेन मिथ्यात्वज्ञानेन, विनेयानां काव्याध्यापनेन शिक्षणीयानाम् । इदञ्च श्रोतृसामान्योपलक्षणम् । उन्मुखीकारासम्भवः प्रवृत्त्यसम्भवः । तथा च रसप्रतीतिरेव न स्यादिति भावः । अयमपि नित्यो दोषः तत्तत्परित्यागमन्तरेण परिहारासम्भवात् । उदाहरणं मम—

"हिमाद्रौ सुमहान् ग्रीष्मः पौषे पुष्प्यति पङ्कजम् । अग्निहोत्री स चाण्डालः तरुण्यां रमते शिशुः ॥"

अत्र क्रमेण देश-काल-जाति-वयसामन्यथावर्णनादनौचित्यम् ।

(स) ननु "हीनोपमं भवेच्चान्यदधिकोपममेव च । असदृशोपमञ्चान्यदधिकोपममेव च ॥" इत्यादिना भोजराजादिभिः केषाञ्चिदलङ्कारदोषाणामपि गणितत्वात् प्रधानतो दोषाणां षड्विधत्वसम्भवे कथं त्वया "ते पुनः पञ्चधा मताः" इति पञ्चविधत्वमात्रमभिधीयत इत्याह एभ्य इति । स्पष्टम् । तथा च तैरलङ्कारदोषत्वेन परिगणितानां सर्वेषामेव दोषाणामस्मदुक्तदोषेष्वेवान्तर्भावसम्भवात् तथात्वेन षड्विधत्वकल्पनं गौरवादन्याय्यमित्याशयः ।

(ह) भोजराजादिपरिगणितानामलङ्कारदोषाणां स्वोक्तदोषेष्वन्तर्भावं दर्शयितुमाह तथाहीति । उपमायामुपमालङ्कारे, असादृश्ये साधारणधर्म्माभावात् सादृश्यराहित्ये, असम्भवे तादृशोपमानपदार्थाप्रसिद्धौ, तथा तत्रैवोपमालङ्कारे उपमेयापेक्षया उपमानस्य जातिगते न्यूनत्वे अधिकत्वे च, एवं प्रमाणगते न्यूनत्वे अधिकत्वे च अनुचितार्थत्वमनुचितार्थत्वदोषः । प्रमाणमत्र परिमाणम् । तथा अर्थान्तरन्यासेऽलङ्कारे उत्प्रेक्षितार्थस्य समर्थने च अनुचितार्थत्वमेव दोषः सम्भवतीत्यर्थः । एवञ्च असदृशोपमादिदोषान्तराङ्गीकारस्यानर्थकमेवेति भावः ।

"प्रज्वलज्जलधारावन्निपतन्ति शरास्तव ।" (क)
"चण्डाल इव राजाऽसौ संग्रामेऽधिकसाहसः ।" (ख)
"कर्पूरखण्ड इव राजति चन्द्रबिम्बम् ।" (ग)
"हरवन्नीलकण्ठोऽयं विराजति शिखावलः ॥" (घ)

(च) तत्रोपमायासमसादृश्ये अनुचितार्थत्वमुदाहरति ग्रथ्नामीति ।

"आत्मीयचित्तगगनोदयिनं मनोज्ञं हर्षान्धकारनिकरं द्वियतां हरन्तम् ।
वैधेयबुद्धिकुमुदान्यपि फुल्लयन्तं ग्रथ्नामि काव्यशशिनं विततार्थरश्मिम् ॥"

इति मत्पूरितपूर्वविपादः श्लोकः ।

वितता विस्तृता अर्था रश्मयः किरणा इव यस्य तम्, काव्यं शशीव तम्, ग्रथ्नामि नियध्नामि रचयामीति यावत्। अत्र अर्थरश्म्योः काव्यशशिनोश्च कश्चिदपि साधारणधर्मो नास्तीति सादृश्याभावादुपमायामनुचितार्थत्वदोषः । "न चात्र रूपकसम्भवोऽपीति वाच्यम्, तस्यापि सादृश्यमूलकत्वेन तत्रापि तद्दोषतादवस्थ्यात्" इति रामचरणः, तदसत् ग्रथ्नामीति उपमायाः साधकतया रूपकस्य च बाधकतया रूपकसम्भावनाया एवाभावात् ग्रन्थकारस्योदाहरणानौचित्याच्च ।

(क) उपमायां तादृशोपमानपदार्थासम्भवे अनुचितार्थत्वमुदाहरति प्रज्वलदिति ।

"रक्ताक्तालवङ्गमौ लुठन्त्यरिशिरांसि च ॥" इति मत्पूरितपरार्द्धम् ।

अत्र ज्वलत्काष्ठमित्यादिवत् ज्वलनं नाम वह्निना दह्यमानत्वं तच्च जले असम्भवमेवेति उपमानपदार्थासम्भवादुपमायामनुचितार्थत्वम् ।

(ख) उपमायामुपमानस्य जातिगतन्यूनत्वे अनुचितार्थत्वमुदाहरति चण्डाल इति ।

"सैन्याय दुर्द्धरात्तेन श्रयत्येव जयश्रियम् ॥" इति मत्पूरितपरार्द्धम् ।

अत्रोपमेयभूतक्षत्रियजातीयराजापेक्षया उपमानभूतचण्डालस्य जातिगतं न्यूनत्वं राज्ञोऽपि तद्वदेव नीचत्वं द्योतयतीत्युपमायामनुचितार्थत्वम् ।

(ग) उपमायामुपमानस्य प्रमाणगतन्यूनत्वे अनुचितार्थत्वमुदाहरति कर्पूरेति ।

"नक्षत्रराजिपरिराजितसर्वभागे स्वच्छेऽन्तरीक्षहृदये विशदं सुदृश्यम् ।
श्वेतांशुजालधवलीकृतदिग्विभागं कर्पूरखण्ड इव राजति चन्द्रबिम्बम् ॥"

इति मत्पूरितपूर्वविपादः श्लोकः ।

अत्रोपमेयभूतचन्द्रबिम्बापेक्षया उपमानभूतकर्पूरखण्डस्य प्रमाणगतं न्यूनत्वं चन्द्रबिम्बस्यापि तद्वदेव क्षुद्रत्वं बोधयतीत्युपमायामनुचितार्थत्वम् ।

(घ) उपमायामुपमानस्य जातिगताधिकत्वे अनुचितार्थत्वमुदाहरति हरवदिति ।

"सदा नगवरस्थायी कुमारैश्च निषेवितः ।" इति मत्पूरितपूर्वार्द्धम् ।

हरवत् शिव इव, नीलः कण्ठो यस्य स नीलकण्ठः, अयं शिखा अस्यास्तीति शिखावलो मयूरः, विराजति शोभते ।

"स्तनावद्रिसमानौ ते ।" (ङ)

"दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम् ।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने ममत्वमुच्चैः शिरसां सतीव ॥" (च)

एवमादिषु उत्प्रेक्षितार्थस्य असम्भूततयैव प्रतिभासनं स्वरूपमित्यनुचितमेव तत्समर्थनम् (छ) ।

यमकस्य पादत्रयगतस्याप्रयुक्तत्वं दोषः (ज) । यथा—

"सहसालिजनैः स्निग्धैः सह सा कुञ्जमन्दिरम् ।
उदिते रजनीनाथे सहसा याति सुन्दरी ॥" (झ)

उत्प्रेक्षायां यथाशब्दस्योत्प्रेक्षाद्योतकत्वेऽवाचकत्वम् (ञ) । यथा—

अत्रोपमेयभूतपक्षिजातीयमयूरापेक्षया उपमानभूतदेवजातीयहरस्य जात्या अधिकत्वं सादृश्यं विघटयतीवेत्यनुचितार्थत्वम् ।

(ङ) उपमायामुपमानस्य प्रमाणगताधिकत्वे अनुचितार्थत्वमुदाहरति स्तनाविति ।

"स्तनावद्रिसमानौ ते श्रोण्यौ द्वीपद्वयोपमौ ।
दोलस्तम्भसमा नासा त्वमाश्चर्या वरानने ! ॥" इति मत्पूरितपरत्रिपादं पद्यम् ।

अत्रोपमेयभूतस्तनापेक्षया उपमानभूताद्रेः प्रमाणगतमधिकत्वं पूर्ववदेव सादृश्यं विघटयतीवेत्यनुचितार्थत्वम् ।

(च) उत्प्रेक्षायामुत्प्रेक्षितार्थसमर्थने अनुचितार्थत्वमुदाहरति दिवाकरादिति । कुमारसम्भवप्रथमसर्गे हिमालयवर्णनमिदम् । यो हिमालयः दिवा दिवसात् भीतमिव सन्तं गुहासु लीनं लुक्कायितभावेनावस्थितम् अन्धकारं दिवाकरात् सूर्यात् रक्षति ; सः अस्तीति पूर्वेणान्वयः । तथाहि शरणं प्रपन्ने आगते क्षुद्रे जनेऽपि सतीव सज्जने इव उच्चैःशिरसामुन्नतमस्तकानां महात्मनामित्यर्थः ममत्वं स्नेहः नूनं निश्चितमेव जायत इति शेषः ।

(छ) उदाहृते अनुचितार्थत्वमुपपादयति एवमिति । उत्प्रेक्षितार्थस्य आरोपितविषयस्य दिवसाद्भीतत्वरूपस्य, असम्भूततयैव अनुत्पन्नतयैव, अथवा अचेतने अन्धकारे चेतनधर्म्मस्य भयस्यासम्भवात् मिथ्यात्वेनैवेत्यर्थः, प्रतिभासनं प्रकाशनं ज्ञानमिति यावत्, स्वरूपं स्वभावः, इति हेतोः तस्य उत्प्रेक्षितार्थस्य समर्थनम् अर्थान्तरन्यासेन दृढ़ीकरणं सत्यतया प्रतिपादनमनुचितमेव । अतएवोदाहृते अनुचितार्थत्वदोष इत्याशयः ।

(ज) यमकस्येति । पादत्रयगतस्येति गतशब्दो भावसाधनः ; तेन केवलपादत्रयावस्थितेरित्यर्थः । अप्रयुक्तत्वमिति । तथासम्भवेऽपि कविभिरनादृतत्वादिति भावः ।

(झ) सहसेति । सा सुन्दरी रजनीनाथे निशाकरे उदिते सति स्निग्धैरात्मानं प्रति स्नेहपरायणैः आलिजनैः सखीजनैः सह, हसेन हास्येन सहेति सहसा सहास्यमुखी सती, सहसा तत्क्षणात् कुञ्जमन्दिरं लतादिपिहितस्थानरूपं गृहं याति ।

अत्र तृतीयपादे सहसेति पदाभावेन यमकाभावात् ईदृशत्रिपादगतयमकस्य शास्त्रनिषेधाभावेन सम्भवेऽपि कविभिरनादृतत्वादप्रयुक्तत्वं दोषः ।

"एष मूर्त्तो यथा धर्म्मः क्षितिपो रक्षति क्षितिम् ॥" (ट)

एवमनुप्रासे वृत्तिविरुद्धस्य प्रतिकूलवर्णत्वम् (ठ)। यथा—"ओवट्टइ उल्लट्टइ—" इत्यादौ (४५८ पृष्ठे) (ड)।

उपमायाञ्च साधारणधर्म्मस्याधिकन्यूनत्वयोरधिकपदत्वं न्यूनपदत्वञ्च (ढ)। क्रमेणोदाहरणम्—

"नयनज्योतिषा भाति शम्भुर्भूतिसितद्युतिः ।
विद्युतेव शरन्मेघो नीलवारिदखण्डधृक् ॥" (ण)

अत्र भगवतो नीलकण्ठत्वस्याप्रतिपादनाच्चतुर्थपादोऽधिकः (त)।

"कमलालिङ्गितस्तार-हारहारी मुरं द्विषन् ।
विद्युद्विभूषितो नील-जीमूत इव राजते ॥" (थ)

अत्रोपमानस्य सबलाकत्वं वाच्यम् (द)।

(ञ) उत्प्रेक्षायामिति । उत्प्रेक्षालङ्कारे । उत्प्रेक्षाद्योतकत्वे उत्प्रेक्षाद्योतनाय प्रयुक्तत्वे इत्यर्थः । अवाचकत्वमिति । यथाशब्दस्य सादृश्यमात्रवाचकत्वे न इवशब्दवत् सम्भावनार्थवाचकत्वाभावादिति भावः ।

(ट) एष इति । "शिष्टे दुष्टे प्रयुञ्जानोऽनुग्रहं निग्रहं जने ।" इति मत्पूरितपूर्वार्द्धम् ।

अत्र मूर्त्तो धर्म्म इव इत्यर्थे यथाशब्दप्रयोगादवाचकत्वम् ।

(ठ) एवमिति । अनुप्रासे अलङ्कारे, वृत्तिविरुद्धस्य विरोधिरसगतगुणव्यञ्जकवर्णविन्यासस्य, प्रतिकूलवर्णत्वं तदाख्यो दोषः ।

(ड) ओवट्टइ इति । अत्र टकारसमूहविन्यासस्य प्रकृतशृङ्गाररसविरोधिवीररसगतौजोगुणव्यञ्जकत्वात् प्रतिकूलवर्णत्वम् ।

(ढ) उपेति । किञ्चेति चार्थः । साधारणधर्म्मस्य उपमानोपमेयोभयवृत्तियोग्यधर्म्मस्य, अधिकन्यूनत्वयोः अधिकत्वे न्यूनत्वे चेत्यर्थः । तथा च अधिकत्वे अधिकपदत्वं न्यूनत्वे च न्यूनपदत्वमित्यर्थः ।

(ण) तत्राद्यमुदाहरति नयनेति । भूत्या भस्मना सिता शुभ्रा द्युतिर्दीप्तिर्यस्य स तादृशः शम्भुः शिवः, नीलवारिदखण्डधृक् शरन्मेघो विद्युतेव नयनज्योतिषा तृतीयनेत्रतेजसा भाति ।

(त) अत्रेति । भगवतः शम्भोः । अप्रतिपादनाद्विशेषणविधया अनभिधानात् । न चात्र शम्भुविशेषणतया नीलकण्ठत्वस्यानभिधानान्न्यूनपदत्वमपि सम्भवतीति वाच्यम् । वक्ष्यमाणस्य उक्तानुसारित्वनियमेन उक्ते नीलकण्ठपदानभिधानाद्वक्ष्यमाणेऽपि 'नीलवारिदखण्डधृक्' इत्यनभिधानस्यौचित्यात् तथैव च अधिकपदत्वस्यैव न्याय्यत्वात् । उत्तरवाक्येवमेव नाधिकपदत्वमित्यूहनीयम् ।

(थ) द्वितीयमुदाहरति कमलेति । कमलया लक्ष्म्या आलिङ्गितः, तथा तारेण दीर्घेण हारेण मुक्तामालया हारी मनोहरः, मुरं द्विषन् मुरारिः कृष्णः, विद्युता विभूषितो नीलजीमूतो नीलमेघ इव राजते शोभते ।

अस्यामिवोपमानोपमेययोर्लिङ्गवचनभेदस्य कालपुरुषविध्यादिभेदस्य च भग्नप्रक्रमत्वम् (ध)। क्रमेणोदाहरणम्—

"सुधेव विमलश्चन्द्रः ।" (न)

ज्योत्स्ना इव सीता कीर्त्तिः ।" (प)

"काप्यभिख्या तयोरासीद्व्रजतोः शुद्धवेशयोः ।

हिमनिर्म्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥" (फ)

अत्र तथाभूतचित्राचन्द्रमसोः शोभा न खल्वासीत्, अपि तु सर्वदापि भवति (ब)।

(द) भवेति। उपमानस्य नीलजीमूतस्य, बलाकया बकपङ्क्त्या सहेति सबलाकत्वं नारहारोपमानरूपतया बकपङ्क्तियौयुक्तत्वमित्यर्थः, वाच्यं वक्तव्यम्। तथा च "तड़िद्युक्तो बलाकावान् नीलाब्द इव राजते" इत्युक्ते नोक्तदोष इत्याशयः। किन्तु नीलजीमूतविशेषणतया तदनभिधानादत्र न्यूनपदत्वमिति बोध्यम्।

(ध) दर्श्यप्रभृतीनामुपमागतदोषान्तराणि भग्नप्रक्रमतायामन्तर्भावयितुमाह अस्यामिति। अस्यामिव उपमायामिव। लिङ्गं पुंस्त्वादि। वचनम् एकवचनादि। भेदो वैषम्यम्। कालो वर्त्तमानादिः। पुरुषः प्रथमपुरुषादिः। विधिर्विधिबोधकतिङ्विभक्तिः। आदिशब्दाद्विभक्त्यन्तराणि च। तेषां भेदोऽपि वैषम्यम्। तथा च उपमानपदस्य स्त्रीलिङ्गत्वे उपमेयपदस्य च पुंलिङ्गत्वे तद्विपरीत्ये वा प्रक्रान्तलिङ्गवैषम्याद्भग्नप्रक्रमत्वमित्याद्यर्थ ऊहनीयः।

(न) उपमायामुपमानोपमेययोर्लिङ्गभेदे भग्नप्रक्रमतामुदाहरति सुधेवेति।

"सुधेव विमलश्चन्द्रो वारीव शीतला शिला ।

वीणानाद इवोद्गीतिर्भ्रङ्गानां मधुरा प्रिये ! ॥" इति मत्पूरितपरविपाद्यं पद्यम्।

अत्र सुधेत्युपमानपदं स्त्रीलिङ्गेन प्रक्रम्य चन्द्र इत्युपमेयपदे च पुंलिङ्गाभिधानेन प्रक्रमभङ्गात्तत्र च विमल इति साधारणधर्म्मवाचकपदस्य लिङ्गव्यत्ययावश्यकत्वाद्भग्नप्रक्रमता।

(प) उपमायामुपमानोपमेययोर्वचनभेदे भग्नप्रक्रमतामाह ज्योत्स्ना इति।

"ज्योत्स्ना इव सिता कीर्त्तिः स्थिताः शौरिव कान्तयः ।

शौर्य्याणीव महज्ज्ञानं राजंस्त्वमतुलो भुवि ॥" इति मत्पूरितपरविपाद्यं पद्यम्।

अत्र ज्योत्स्ना इति बहुवचनेनोपमानपदं प्रक्रम्य कीर्त्तिरित्युपमेयपदे चैकवचनाभिधानात्तत्र च सितेति साधारणधर्म्मस्यान्वयाभावावश्यम्भावाद्भग्नप्रक्रमता।

(फ) उपमायामुपमानोपमेययोः कालभेदे भग्नप्रक्रमतामुदाहरति कापीति। रघुवंशप्रथमसर्गस्थमिदं पद्यम्। व्रजतोर्वशिष्ठाश्रमं गच्छतोः, शुद्धवेशयोर्निर्म्मलपरिच्छदयोः, तयोः सुदक्षिणादिलीपयोः, योगे एकत्र गमनवेलायां हिमनिर्म्मुक्तयोर्हेमन्तकालातिक्रान्तयोः, चित्राचन्द्रमसोश्चित्रानक्षत्रचन्द्रयोरिव कापि अनिर्वचनीया अभिख्या शोभा आसीत्।

"लतेव राजसे तन्वि ! ।" (भ)

अत्र लता राजते, त्वन्तु राजसे (म) ।

"चिरं जीवतु ते सूनुर्मार्कण्डेयमुनिर्यथा" । (य)

अत्र मार्कण्डेयमुनिर्जीवत्येव, न खल्वेतदस्य 'जीवतु' इत्यनेन विधेयम् (र) । इह तु यत्र लिङ्गवचनभेदेऽपि न साधारणधर्मस्यान्यथाभावस्तत्र न दोषः (ल) । क्रमेणोदाहरणम्—

(य) अत्र प्रक्रमभङ्गं दर्शयितुमाह अत्रेति । तथाभूतचित्राचन्द्रमसोर्हिमनिर्मुक्तयोश्चित्राचन्द्रमसोः । सर्वदापि हेमन्तकालानन्तरं वर्षे वर्षेऽपि । तथा च तयोरभिख्या आसीदित्यतीतकालिनोपमेयं प्रक्रम्य तादृशचित्राचन्द्रयोर्योगस्य वर्षे वर्षेऽप्यवश्यम्भाविततया तत्रातीतकालान्वयबाधेनोपमाने अस्तीत्यभिधानावश्यकत्वाद्भग्नप्रक्रमतेत्याशयः ।

(भ) उपमायामुपमानोपमेययोः पुरुषभेदे भग्नप्रक्रमतामाह लतेवेति ।

"लतेव राजसे तन्वि ! चूतस्येव ममान्तिके ।

सा शाखयेव बाहुभ्यां कथं नाश्लिष्यसीह माम् ॥" इति मत्पूरितपरत्रिपादं पद्यम् ।

(म) अत्र प्रक्रमभङ्गं दर्शयति अत्रेति । लतेत्युपमानपदस्य नामत्वात् राजत इति प्रथमपुरुषः प्रक्रान्तव्यः, त्वमित्युपमेयपदस्य च युष्मत्त्वान्मध्यमपुरुषः प्रयोक्तव्य इति प्रक्रमभङ्गाद्भग्नप्रक्रमता इत्याशयः ।

(य) उपमायामुपमानोपमेययोर्विधिभेदे भग्नप्रक्रमतां दर्शयति चिरमिति ।

"लभतां सर्वशास्त्रे च विद्यां जीव इव ध्रुवम् ॥" इति मत्पूरितपरार्द्धम् ।

(र) उदाहृते दोषमुपपादयति अत्रेति । जीवत्येवेति । तस्य स्वत एव चिरजीवित्वादिति भावः । एतच्चिरजीवनम्, अस्य मार्कण्डेयस्य, जीवतु इत्यनेन न खलु विधेयम् । अत्रायमाशयः—अप्राप्तप्रापको हि विधिः । ततश्च मार्कण्डेयस्य स्वत एव चिरजीवित्वेन तेन तस्य प्राप्तत्वात् तत्र तद्विध्यसम्भवात् "यथा मार्कण्डेयो मुनिश्चिरं जीवति, तथा ते सूनुश्चिरं जीवतु" इत्यमवश्यं वक्तव्यम् । तथा च सति जीवतीति प्रक्रम जीवत्वित्यस्य वक्तव्यतया प्रक्रमभङ्गाद्भग्नप्रक्रमतेति ।

(ल) प्रतिप्रसवमाह इहेति । उपमागतदोषप्रकरण इत्यर्थः । लिङ्गवचनभेदेऽपि उपमानोपमेयबोधकशब्दयोरित्यर्थः : साधारणधर्मस्य उपमानोपमेयोभयवृत्तिधर्मबोधकशब्दस्य, न अन्यथाभावः युगपदेवोभयान्वयेऽपि न स्वरूपवैषम्यम् । न दोषो न भग्नप्रक्रमतादोषः, रसाद्यपकर्षद्वारा सहृदयानामुद्वेगजनकस्यैव दोषत्वौचित्यात्, ईदृशस्थले तु सर्वसामञ्जस्येन तेषामुद्वेगाजनकतया दोषत्वसामान्यस्यैवाभावादित्याशयः । अतएव दण्ड्याचार्य्योऽप्याह स्म काव्यादर्शे—

"न लिङ्गवचने भिन्ने न हीनाधिकतापि वा ।

उपमादूषणायालं यत्रोद्वेगो न धीमताम् ॥"

एतेन "न दोषो नोपमादोषः । भग्नप्रक्रमत्वस्य तु प्रसक्त्यभावेन तन्निषेधस्यात्र न सम्भवः" इति रामचरणोक्तिहेयम्, उपमागतभग्नप्रक्रमताया एव प्रस्तुततया दोषपदेन तद्ग्रहणस्यैवौचित्यात् "लिङ्गवचनभेदेऽपि" इत्यु...

"मुखं चन्द्र इवाभाति ।" (व)

"तद्वेशोऽसदृशोऽन्याभिः स्त्रीभिर्मधुरताभृतः ।
दधते स्म परां शोभां तदीया विभ्रमा इव ॥" (श)

पूर्वोदाहरणेषु उपमानोपमेययोरेकस्यैव साधारणधर्म्मेणान्वयसिद्धेः प्रक्रान्तस्यार्थस्य स्फुटोऽनिर्वाहः (ष)।

एवमनुप्रासे वैफल्यस्यापुष्टार्थत्वम् (१) (स)। यथा—

ग्रन्थकारस्यापि तथैवाभिप्रायावधारणात्, "सुधेव विमलश्चन्द्रः" इत्यादाविव "मुखं चन्द्र इवाभाति" इत्यादावपि लिङ्गादिभेदेन भग्नप्रक्रमतायाः प्रसक्तौ बाधाभावाच्च ।

(व) लिङ्गभेदेऽपि भग्नप्रक्रमताया अभावं दर्शयति मुखमिति ।

"मुखं चन्द्र इवाभाति रम्भेवोरुर्विराजते ।
चन्द्रिकेव शरीरन्ते तस्य परमसुन्दरी ॥"

इति मत्पूरितपरविपादं पद्यम् ।

अत्रोपमेयोपमानयोर्मुखचन्द्रयोर्लिङ्गभेदेन प्रक्रमभङ्गेऽपि आभातीत्यस्य उभयान्वयेऽपि क्रियात्वेन स्वरूपवैपम्याभावान्न भग्नप्रक्रमता ।

(श) वचनभेदेऽपि भग्नप्रक्रमताया अभावं दर्शयति तद्वेश इति । मधुरताभृतो माधुर्य्यपूर्णो माधुर्य्यवन्तश्च, अन्याभिः स्त्रीभिः अन्यासां स्त्रीणां वेशैरित्यर्थः असदृशः असमानः असमानाश्च, तदीयास्तन्नायिकासम्बन्धिनो विभ्रमा विलासा इव, तस्या नायिकाया वेशः, परामत्यन्तां शोभां दधते धारयति धारयन्ति स्म च ।

अत्र तद्वेश इत्यनेनान्वये असदृश इत्यत्र टक्प्रत्ययान्ततया मधुरताभृत इत्यत्र च भृधातोः क्तप्रत्ययान्ततया अकारान्तत्वादेकवचनम्, दधते इति च दधधातोर्लटः प्रथमपुरुषैकवचनम् । एवं विभ्रमा इत्यनेनान्वये असदृशो मधुरताभृत इत्युभयत्रापि क्विप्प्रत्ययान्ततया व्यञ्जनान्तत्वाद्बहुवचनम्, दधते इति च धाधातोर्लटः प्रथमपुरुषबहुवचनम् । इत्यत्रोपमेयोपमानयोर्वचनभेदेन प्रक्रमभङ्गेऽपि असदृशादिशब्दानां स्वरूपवैषम्याभावान्न भग्नप्रक्रमता ।

(ष) अनयोः पूर्वोदाहरणेभ्यो वैधर्म्यं दर्शयितुमाह पूर्वोदाहरणेष्विति । "सुधेव विमलश्चन्द्रः" इत्यादिष्वित्यर्थः । साधारणधर्म्मेण साधारणधर्म्मबोधकपदेन । प्रक्रान्तस्य प्रथमाभिहितस्य, अर्थस्य सुधादिपदार्थस्य, स्फुटोऽनिर्वाहः स्पष्टा अनिष्पत्तिः आकाङ्क्षितधर्म्मेण सहोपस्थितिर्न स्पष्टेत्यर्थः, विमलादिशब्दानां पुंलिङ्गादिमत्त्वेन केवलचन्द्रादिविशेषणतया पर्य्यवसानात् तेन च सुधादिपदार्थानां धर्म्माकाङ्क्षायाः सत्त्वादिति भावः । अतएवात्र केचिदुपमागतोऽभवन्मतसम्बन्धतादोष एवेति वदन्ति ।

---

(१) वैकल्यस्य इति पाठान्तरम् ।

"अनणुरणन्मणिमेखलमविरलशिञ्जानमञ्जुमञ्जीरम् ।
परिसरणमरुणचरणे ! रणरणकमकारणं कुरुते ॥" (ह)

एवं समासोक्तौ साधारणविशेषणवशात् परार्थस्य प्रतीतावपि पुनस्तस्य शब्देनोपादानस्य अप्रस्तुतप्रशंसायां व्यञ्जनयैव प्रस्तुतार्थावगतेः शब्देन तदभिधानस्य च पुनरुक्तत्वम् (च)। क्रमेणोदाहरणम्—

"अनुरागवन्तमपि लोचनयोर्दधतं वपुः सुखमतापकरम् ।
निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका ॥" (क)

अत्रापरदिगित्येतावतैव तस्या गणिकात्वं प्रतीयते (ख)।

(ङ) एवमिति। अनुप्रासे वैफल्यस्य केवलानुप्रासघटकतया शब्दविशेषवैयर्थ्यस्य। अत्रानुप्रासपदं शब्दालङ्कारमात्रोपलक्षणम्।

(ह) अनणिति। परिभ्रमन्तीं काञ्चिदवलोक्य कस्यचित् कामुकस्योक्तिरियम्। हे अरुणचरणे! अलक्तकरञ्जिततया रक्तवर्णचरणे! अनणु रणन्ती दीर्घं शब्दायमाना मणिमेखला यत्र यत्। तथा अविरलं निरन्तरं शिञ्जानौ अव्यक्तं शब्दं कुर्वन्तौ मञ्जू मनोहरौ मञ्जीरौ नूपुरौ तत्र तत्। परिसरणं तव परिभ्रमणं कर्तृ, अकारणं निरर्थकं रणरणकं कुरुते ममोद्वेगं जनयति। परपुरुषनिस्पृहायास्तव ममाभिलाषपूरणाशक्तत्वादिदं रणरणककरणमनर्थकमेवेति भावः।

मणिमेखलादीनां मृदु रणनमेव मदनोद्वेगं जनयति न पुनर्दीर्घं रणनम्; तेनात्र अनणुपदं केवलमनुप्रासमेव घटयति, न तु रणरणककरणं प्रति किञ्चिदुपकुरुत इति मुख्यानुपकारित्वादपुष्टार्थत्वम्। अत्र रामचरणादीनां कष्टसृष्टव्याख्यान्तराणि सदसत्तया सुधीभिरेव विवेचनीयानि।

(च) एवमिति। समासोक्तौ तदाख्यालङ्कारे। एवमप्रस्तुतप्रशंसायामपि। साधारणविशेषणवशात् उभयोरप्यर्थयोः सम्भवपरविशेषणप्रभावात्, परार्थस्य द्वितीयार्थस्य। पुनरुक्तत्वमिति। एतेन येन केनापि प्रतीतस्यार्थस्य पुनरुक्तावेव पुनरुक्तत्वम्, न तु केवलवाचकपदेनैवोक्तस्य पुनरुक्तौ पुनरुक्तत्वमिति सूचितम्।

(क) तत्र समासोक्तावुदाहरति अन्विति। शिशुपालवधनवमसर्गस्थमिदं पद्यम्। अपरा पश्चिमा दिगेव गणिका वेश्या, अनुरागवन्तम् अस्तकालीनलौहित्यवन्तम् आत्मानं प्रति प्रेमवन्तमपि च, लोचनयोः सुखं सुखकरम्, अतापकरं तेजोविहीनतया शान्तप्रकृतिकतया च सन्तापाजनकम्, वपुः शरीरम्, दधतं धारयन्तम्, अपेतवसुम् अस्तोन्मुखत्वाद्विनष्टकिरणम् आत्मन एव दानान्निर्धनीभूतञ्च, रविं सूर्यं विटञ्च, वियदालयात् आकाशगृहात् निरकासयत् द्वीपान्तरं नीतवती वहिष्कृतवती च।

(ख) अत्रेति। प्रतीयत इति। अनुरागवन्तमपीत्यादिसाधारणविशेषणवशाद्व्यञ्जनयेति शेषः। रविमित्येतावतैव विटमितिवदिति भावः। तेनात्र गणिकापदेन पुनस्तस्या एवाभिधानात् पुनरुक्तत्वदोष इति बोध्यम्।

"आहूतेषु विहङ्गमेषु मशको नायान् पुरो वार्य्यते
मध्ये वा धुरि वा वसंस्तृणमणिर्धत्ते मणीनां धुरम् ।
खद्योतोऽपि न कम्पते प्रचलितुं मध्येऽपि तेजस्विनां
धिक् सामान्यमचेतसं प्रभुमिवानामृष्टतत्त्वान्तरम् ॥" (ग)

अत्राचेतसः प्रभोरभिधानमनुचितम् (घ) ।

एवमनुप्रासे प्रसिद्धग्रभावस्य ख्यातविरुद्धत्वम् (ङ) । यथा—

"चक्राधिष्ठिततां चक्री गोत्रं गोत्रभिदुच्छ्रितम् ।
वृषं वृषभकेतुश्च प्रायच्छद्‌यस्य भूभुजः (१) ॥" (च)

उक्तदोषाणाञ्च क्वचिददोषत्वं क्वचिद्‌गुणत्वमित्याह—(छ)

(ग) अप्रस्तुतप्रशंसायामुदाहरति आहूतेष्विति । पद्यमिदं भल्लटशतके । राजगणेष्वाहूतेषु तव कदाचिदयं कदाचिन्न मध्ये कश्चित् क्षुद्रभूस्वाम्यपि आगत इति तन्निन्दाभिप्रायेणोक्तिरियम् । विहायसा गच्छन्तीति विहङ्गमा मयूरादयः पक्षिणः, तेषु आहूतेषु सत्सु, विहङ्गमम्मन्यो मशकोऽपि पुरोऽग्रत एव आयान् आगच्छन् सन् केनापि न वार्य्यते । तृणमणिः (गाफुरदाना इति ख्यातः) सामान्यमणिविशेषः, मणीनां वास्तविकरत्नानां मरकतादीनां मध्ये वा धुरि अग्रे वा वसन् तिष्ठन् धुरं मणीनामिव भारं धत्ते । सोऽपि न केनचिदपसार्य्यत इति भावः । तथा तेजस्विनामपि चन्द्रनक्षत्रादीनामपि मध्ये खद्योतोऽपि प्रचलितुं न कम्पते न बिभेति । अतएव अनामृष्टम् अविविक्तं तत्त्वान्तरम् आत्मनो यथार्थतो भेदो येन तं तादृशम्, प्रभुं क्षुद्रं भूस्वामिनमिव, अचेतसममनस्विनं स्वपरवैषम्यानभिज्ञं सामान्यं क्षुद्रं मशकादिकं धिक् स्वपरवैषम्यानभिज्ञत्वादेव निन्दामीत्यर्थः ।

(घ) अत्रेति । अनुचितमिति । अप्रस्तुतानां समानां मशकादीनामभिधानादेव व्यञ्जनया प्रस्तुतस्य क्षुद्रतया समस्य प्रभोः प्रतीतेरिति भावः । अतएवात्र व्यञ्जनया प्रतीतस्यापि पुनरभिधानात् पुनरुक्तत्वम् ।

(ङ) एवमिति । अनुप्रासे प्रसिद्धग्रभावस्य केवलानुप्रासघटकतया निबद्धस्य शब्दस्य अभिलषितपदार्थान्वये प्रसिद्धिराहित्यस्येत्यर्थः । अत्राप्यनुप्रासपदं शब्दालङ्कारमात्रोपलक्षणम् ।

(च) चक्रीति । यस्य भूभुजो राज्ञः चक्री चक्रपाणिर्विष्णुः चक्राधिष्ठिततां चक्रवर्त्तित्वं, सार्वभौमत्वम्, गोत्रभिदिन्द्रः उच्छ्रितमुच्चं गोत्रं कुलम्, वृषभकेतुश्च वृषध्वजः शिवश्च वृषं धर्मम्, प्रायच्छत् प्रदत्तवान् । अत्र चक्रिप्रभृतिपदानि केवलमनुप्रासघटनार्थंव निबद्धानि, न तु विष्णोश्चक्रवर्त्तित्वदानम् इन्द्रस्योच्चकुलदानं शिवस्य च धर्मदानं लोके शास्त्रे वा प्रसिद्धमिति ख्यातविरुद्धता ।

(छ) इदानीं केषाञ्चिद्दोषाणामनित्यत्वं प्रतिपादयितुं प्रतिप्रसवमाह उक्तेति । उक्तदोषाणाञ्च मध्ये केषाञ्चिदित्यर्थः । क्वचित् रसादीनामुत्कर्षान्यतरजननाभावस्थले अदोषत्वं दोषत्वगुणत्वोभयेनैव रहितत्वम् । क्वचित् रसादीनामुत्कर्षजननस्थले प्रत्युत गुणत्वमेवेत्यर्थः ।

---

(१) प्रायच्छन्नस्य भूभुजः इति पाठान्तरम् ।

८। वक्तरि क्रोधसंयुक्ते तथा वाच्ये समुद्धते।
रौद्रादौ तु रसेऽत्यन्तं दुःश्रवत्वं गुणो भवेत्॥ (ज)

एषु चास्वादस्वरूपविशेषात्मकतया मुख्यगुणप्रकर्षोपकारित्वाद्गुण इति व्यपदेशो भाक्तः (झ)। क्रमेण यथा—

"तद्विच्छेदकृशस्य कण्ठलुलितप्राणस्य मे निर्दयं
क्रूरः पञ्चशरः शरैरतिशितैर्भिन्दन् मनो निर्भरम्।
शम्भोर्भूतकृपाविधेयमनसः प्रोद्दामनेत्रानल-
ज्वालाजालकरालितः पुनरसावास्तां समस्तात्मना॥" (ञ)

अत्र शृङ्गारे कुपितो वक्ता (ट)।

(ज) तत्र दुःश्रवविविधाश्लीलेत्याद्युद्देशक्रमेण यथासम्भवं दोषान् प्रतिप्रसूते वक्तरीति। वक्तरि क्रोधसंयुक्ते सति तस्य तस्य वाक्यस्य पदस्य वा दुःश्रवत्वं तथा वाच्ये वक्तव्यविषये समुद्धते अतीवभयङ्करे सति तद्वर्णनात्मकस्य वाक्यस्य पदस्य वा दुःश्रवत्वं रौद्रादिरसाभावेऽपि गुणो भवेत्। तु किन्तु रौद्रादौ रसे तद्व्यञ्जकवाक्यगतं दुःश्रवत्वम् अत्यन्तमेव गुणो भवेदित्यर्थः। रौद्रादावित्यादिपदेन वीर-बीभत्स-भयानकानां ग्रहणम्।

(झ) ननु गुणानां रसधर्मत्वस्य वक्ष्यमाणत्वात् एषाञ्च शब्दवृत्तित्वेन रसधर्मत्वासम्भवात् कथं गुणत्वमित्याह एष्विति। एषु गुणतया व्याख्यायमानेषु दुःश्रवत्वादिषु। आस्वाद्यन्त इत्यास्वादा रसभावादयः, तत्स्वरूपविशेषात्मकतया धर्मविशेषरूपतया मुख्यगुणानां माधुर्य्यादीनां प्रकर्षोपकारित्वात् प्रकर्षोत्पत्त्यनुकूलत्वात् गुण इति व्यपदेशः संज्ञा, भाक्तो गौणः।

(ञ) वक्तरि क्रुद्धे दुःश्रवत्वस्य गुणत्वं दर्शयति तद्विच्छेदेति। तस्याः प्रियाया विच्छेदेन कृशस्य कण्ठे लुलिता उपस्थिताः प्राणा यस्य तस्य मे मम मनः, अतिशितैः सुतीक्ष्णैः शरैः निर्दयं निर्भरमत्यन्तं यथा स्यात्तथा भिन्दन् विदारयन् अतएव क्रूरो नृशंसः असौ पञ्चशरः कन्दर्पः, पुनरपि समस्तात्मना सर्वप्रकारेण, भूतेषु प्राणिषु या कृपा तस्या विधेयं वशीभूतं मनो यस्य तस्य शम्भोः शिवस्य, प्रोद्दामो जाज्वल्यमानो यो नेत्रानलस्तृतीयनयनवह्निस्तस्य ज्वालानां शिखानां जालेन समूहेन करालितो दह्यमानतया भीषणीकृत आस्तां भवतु।

(ट) अत्रेति। अनङ्गं प्रति क्रोधस्य मनःक्षोभमात्ररूपतया वास्तविकत्वाभावेन स्थायिभावत्वाभावान्न रौद्रो रसः; किन्तु रतेरेव स्थायिभावत्वात् शृङ्गार एव रस इत्याशयेनाह शृङ्गार इति। कुपितो वक्तेति। तथा च वक्तरि कुपिते रौद्ररसप्रसङ्गेन ओजोगुणावश्यम्भावे विकटवर्णानामावश्यकत्वात् अत्र "अतिशितैर्भिन्दन्" "शम्भोर्भूत" इत्यादौ विद्यमानो विकटवर्णात्मको दुःश्रवत्वदोषः प्रत्युत गुणतामेव भजते इत्याशयः।

"मूर्द्धव्याधूयमानध्वनदमरधुनीलोलकल्लोलजालो-
द्धूताम्भःक्षोददम्भात् प्रसभमभिनभः क्षिप्तनक्षत्रलक्षम् ।
ऊर्द्ध्वन्यस्ताङ्घ्रिदण्डभ्रमिभवरभसोद्यन्नभस्वत्प्रवेग-(१)
भ्रान्तब्रह्माण्डखण्डं प्रवितरतु शिवं शाम्भवं ताण्डवं वः ॥" (ठ)

अत्रोद्धतताण्डवं वाच्यम् (ड)। इदं पद्यं मम ।

रौद्रादिरसे तु एतद्द्वितयापेक्षयापि दुःश्रवत्वमत्यन्तं गुणः (ढ)। यथा—"उत्कृत्योत्कृत्य कृत्तिम्" इत्यादि (२०५ पृष्ठे)। अत्र बीभत्सो रसः ।

९। सुरतारम्भगोष्ठ्यादावश्लीलत्वं तथा पुनः। (ण)

(ठ) उद्धतवक्तव्ये दुःश्रवत्वस्य गुणत्वं दर्शयति मूर्द्धेति। मूर्द्धनि मस्तके व्याधूयमाना शरीरसञ्चलनेन सञ्चाल्यमाना, अतएव ध्वनन्ती शब्दायमाना या अमरधुनी गङ्गा तस्याः, लोलाच्चञ्चलात् कल्लोलजालात् महातरङ्गसमूहात् उद्धूतानामुत्क्षिप्तानाम् अम्भःक्षोदानां जलबिन्दूनां दम्भात् छलात् अभिनभः नभसि प्रसभं हठात् क्षिप्तं विकीर्णं नक्षत्राणां लक्षं समूहो यस्मिन् तत्तथोक्तम्। ऊर्द्ध्वं न्यस्त उत्तोलितः यः अङ्घ्रिदण्डस्तस्य या भ्रमिघूर्णनं तस्मादेव उत्पन्नो यो रभसो वेगस्तेन उद्यन् उत्पद्यमानो यो नभस्वान् वायुस्तस्य प्रवेगेन भ्रान्तं घूर्णितं ब्रह्माण्डखण्डं यस्मिन् तत्तथोक्तञ्च, शम्भोरिदं शाम्भवं ताण्डवम् उद्धतनृत्यं कर्तृ, वो युष्माकं शिवं मङ्गलं प्रवितरतु अर्पयतु।

(ड) अत्रेति। उद्धतताण्डवमतीवभयङ्करनृत्यं वाच्यं वक्तव्यविषयः। तथा चात्र कोमलस्य शिवविषयकरतिभावस्य आस्वाद्यत्वेऽपि वर्णनीयविषयस्य नितान्तविकटत्वात् विकटशब्दैरेव च तत्प्रतिपादने ततोऽप्यतिविकटतया तत्प्रतीतेः साहजिकत्वात् "मूर्द्धव्याधूयमानध्वनत्" इत्यादौ विद्यमानो विकटशब्दात्मको दुःश्रवत्वदोषः प्रत्युत गुण एव पर्य्यवस्यतीति भावः।

(ढ) रौद्रेति। एतद्द्वितयापेक्षया कुपितवक्तृस्थलीयोद्धतवाच्यस्थलीयदुःश्रवत्वापेक्षया। तत्र रौद्ररसे यथा मम बङ्गीयप्रतापनाटके—

"प्रकाण्डभुजमण्डलव्यथितचण्डकोदण्डतो ज्वलज्ज्वलनवज्रवज्जवगतैर्निशातैः शरैः ।
ध्वनन्ननिशमुद्धतं विजययज्ञगर्द्धोऽधुना द्विजोऽपि पतितो यतः क्षितितले ततः पात्यसे ॥"

वीररसे यथा—"भो लङ्केश्वर ! दीयताम्" इत्यादौ 'धनुर्ज्यामन्ध' इत्यत्र ।

भयानकरसे यथा—"अशक्नुवन् सोढुम्" इत्यादौ 'विध्यद्भिवसानि' इत्यत्र ।

(ण) अश्लीलतादोषं प्रतिप्रसूते सुरतेति। सुरतारम्भगोष्ठी आरब्धसुरतविषयकालापः, तथा च विश्वः—"गोष्ठी सभायां संलापे।" आदिशब्दात् शमकथाप्रभृतयश्च तस्मिन् अश्लीलत्वं नाम दोषः, तथा पुनर्गुण एव; अधमोक्तौ ग्राम्यत्वस्येव तत्र तत्र रसप्रकर्षस्यैव जनकत्वादित्याशयः।

---

(१) प्रवेश इति पाठान्तरम्।

तथा पुनरिति गुण एव। यथा—

"करिहस्तेन सम्बाधे प्रविश्यान्तर्विलोड़िते।
उपसर्पन् ध्वजः पुंसः साधनान्तर्विराजते॥" (त)

अत्र हि सुरतारम्भगोष्ठ्यां "द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्तु" इति कामशास्त्रस्थितिः (थ)। आदिशब्दात् शमकथाप्रभृतिषु बोद्धव्यम् (द)।

(त) तत्र व्रीड़ाव्यञ्जकाश्लीलताया गुणत्वमुदाहरति करीति। करिहस्तेन स्वपक्षीयहस्तिनः शुण्डया प्रविश्य, सम्बाधे नराश्वादीनां घनसन्निवेशेन सङ्कीर्णे अन्तर्विपक्षसेनामध्ये विलोड़िते विलोड्यावकाशे कृते सति, पुंसो वीरपुरुषस्य ध्वजः केतुः साधनानां विपक्षसैन्यानाम् अन्तस्तस्मिन्नेवाभ्यन्तरे उपसर्पन् उपगच्छन् सन् विराजते।

द्वितीयार्थस्तु—करिहस्तेन "तर्जन्यनामिकायुक्ता मध्यमा पृष्ठतो यदि। करिहस्त इति प्रोक्तः कामशास्त्रविशारदैः॥" इति तर्कवागीशधृतकामशास्त्रानुसारात् संयुक्ताग्रतर्जन्यनामिकापृष्ठारूढ़मध्यमाङ्गुलीरूपकृत्रिमलिङ्गेन, सम्बाधे स्वभावतः सङ्कुचितेऽपि अन्तर्योनिमध्ये प्रविश्य विलोड़िते विलोड्य प्रसारिते सति, पुंसो रमणप्रवृत्तस्य पुरुषस्य ध्वजी लिङ्गम्, साधनान्तस्तस्मिन्नेव योनिमध्ये उपसर्पन् मुहुरुपगच्छन् विराजते।

अत्रैतस्या व्रीड़ाव्यञ्जकाश्लीलतायाः सहसा श्रोतुरपि रिरंसोद्दीपकतया प्रकृतरसप्रकर्षजनकत्वाद्गुणत्वम्। एवमन्यत्राप्यूह्यम्।

(थ) ननु सुरतविषयकाश्लीलतामात्रे कथं कवीनां द्व्यर्थपदविन्यास इत्याह अत्रेति। सुरतारम्भगोष्ठ्यां सुरतारम्भालापमात्रे। द्व्यर्थैः पदैः, रहस्यवस्तु गोपनीयाङ्गव्यवहारादिकं पिशुनयेत् सूचयेत्, न पुनः स्पष्टमभिदध्यादित्यर्थः। अतएव "हन्तुमेव प्रवृत्तस्य" इत्यादावपि द्व्यर्थपदविन्यास इति बोध्यम्। न चानया रीत्या "हन्तुमेव प्रवृत्तस्य" इत्यादावपि प्रतिप्रसव एवास्तामिति वाच्यम्, तत्र "यथाग्न जायते पातः" इत्यनेन सुरतारम्भाभावस्यैव ज्ञापितत्वात्।

(द) आदिशब्दादिति। अत्रापि प्रभृतिशब्दात् नाटकीयप्रस्तावना-पताका-विशिष्टपात्रकथानां ग्रहणम्। तत्र शमकथायां यथा शान्तिशतके—

"समाश्लिष्यत्युच्चैर्घनपिशितपिण्डं स्तनधिया मुखं लालाक्लिन्नं पिबति चषकं सासवमिव।
अमेध्ये क्लेदार्द्रे पथि च रमते स्पर्शरसिको महामोहान्धानां किमिह रमणीयं न भवति?॥"

अत्र जुगुप्साव्यञ्जकाश्लीलता वैराग्योत्पादकतया गुण एव।

नाटकीयप्रस्तावनायां यथा वेणीसंहारे—

"सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः। निपतन्ति धार्त्तराष्ट्राः कालवशान्मेदिनीपृष्ठे॥"

अत्र दुर्योधनादीनां मरणरूपामङ्गलव्यञ्जकाश्लीलता चमत्कारित्वातिशयसूचनाद्गुण एव।

नाटकीयपताकायां यथा तत्रैव—"देव! भग्नं भग्नम्" इत्यादि।

अत्रापि दुर्योधनोरुभङ्गरूपामङ्गलव्यञ्जकाश्लीलता चमत्कारित्वातिशयसूचनादेव गुणः।

विशिष्टपात्रकथायां यथा चण्ड्याम्—"केचिन्नष्टा महाहवात्।"

१० । स्यातामदोषौ श्लेषादौ निहतार्थाप्रयुक्तते ॥ (ध)

यथा—"पर्वतभेदिपवित्रं जैत्रं नरकस्य बहुमतङ्गहनम् ।
हरिमिव हरिमिव हरिमिव सुरसरिदम्भः पतन्नमत ॥" (न)

अत्र इन्द्रपक्षे पवित्रशब्दो निहतार्थः, सिंहपक्षे मतङ्गशब्दो मातङ्गार्थेऽप्रयुक्तः (प) ।

अत्र पलायनार्थे प्रयुक्तेन नष्टशब्देन विशिष्टानामिवासुराणां मरणसूचनात्ताद्दशामङ्गलव्यञ्जकाश्लीलता गुण एव । अत्र असुराणामिव प्रजाखनत्याचारित्वाद्दुर्योधनादीनां न साधारणस्यैव विशिष्टतेति नाटकीयप्रस्तावनापताकयोः पृथगुपादानम् ।

(ध) स्यातामिति । श्लेषसमासोक्त्याद्यलङ्कारेषु ध्वनिषु च अनेकार्थप्रत्यायनमात्रमिह श्लेषः आदिशब्दात् प्रौढोक्तिश्च तस्मिन्, निहतार्थाप्रयुक्तते निहतार्थत्वम् अप्रयुक्तत्वञ्चैतौ दोषौ अदोषौ स्यातां नापि दोषौ नापि गुणौ स्यातामित्यर्थः । तथा च तत्र तत्र तयोर्दोषत्वाङ्गीकारेण परिहरणीयत्वे श्लेषादिरलङ्कारो ध्वनिस्तत्तत्प्रौढोक्तिश्च प्रायेण न घटत एवेत्यगत्या तयोरदोषत्वम्, चमत्कारितान्तरजननाभावाच्च अगुणत्वमित्याशयः ।

(न) तत्र श्लेषे तयोरदोषत्वमुदाहरति पर्वतेति । पर्वतं क्रौञ्चनामकाचलं भिनत्ति परशुरामरूपेण विदारयतीति पर्वतभेदी स चासौ पवित्रश्चेति तम्, नरकस्य नरकासुरस्य जैत्रं जयशीलम्, बहुमतं सर्वैरादृतम्, गहनं दुर्बोधस्वरूपञ्च, हरिं विष्णुमिव । पर्वतान् भिनत्ति पक्षच्छेदनेन तेषां हृदयं विदारयतीति पर्वतभेदी यः पविर्वज्रस्तं त्रायते हस्तेन पालयति दधातीति पर्वतभेदिपवित्रस्तम्, जैत्रं जिष्णुम्, नरकस्य स्वानुकम्पनीयमनुष्यमात्रस्य बहुमतमनुग्राहकत्वेनात्यादृतम्, गहनं दुर्जयञ्च, हरिमिन्द्रमिव । अत्र पक्षे नरकस्येत्यनुकम्पायां कप्रत्ययः । तथा करप्रहारेण पर्वतमपि भिनत्तीति पर्वतभेदी महाबल इत्यर्थः स चासौ पवित्रो दुर्गाया वाहनत्वात् पूतस्वभावश्चेति तम्, नरकस्य क्षुद्रमानुषस्य जैत्रं जयशीलम्, तथा बह्वन् मतङ्गान् गजान् हन्तीति तञ्च, हरिं सिंहमिव । अत्र पक्षे नरकस्येति अल्पार्थे कप्रत्ययः । पर्वतभेदि हिमालयविदारि गोमुखाख्यहिमालयशृङ्गं भित्त्वा निर्गतमित्यर्थः, पवित्रं पावनम्, नरकस्य निरयस्य जैत्रं जयशीलं निवारकमित्यर्थः, बहुमतं धार्म्मिकजनैरत्यादृतम्, गहनं महावेगम्, पतत् पृथिव्यामवतरत्, सुरसरिदम्भो गङ्गाजलम्, नमत हे लोकाः ! नरकजयाय नमस्कुरुत ।

(प) अत्रेति । निहतः प्रसिद्धेन पावनरूपेणार्थेन उपस्थितौ प्रतिहतः अर्थो वज्रधारिरूपार्थो यस्य सः, पवित्रशब्दः पावनार्थे प्रसिद्धः वज्रधारिरूपे इन्द्रे तु निहतार्थ इत्यर्थः । अतएवात्र पक्षे निहतार्थतादोष इति भावः । अप्रयुक्त इति । मतङ्गजत्वेन लक्षणया प्रसिद्धिसत्त्वेऽपि कविभिर्नोक्त इत्यर्थः । अतएवात्र अप्रयुक्ततादोष इति भावः । किन्तु उभावपि श्लेषविषयत्वाददोषाविति बोध्यम् ।

ध्वनौ यथा—"भुक्तिमुक्तिकृदेकान्त—" इत्यादौ (२४२ पृष्ठे) ।

अत्र मुक्तिशब्दो मोक्षे प्रसिद्धः, विरहवेदनात्यागे तु निहतार्थ इति ।

वक्तुः प्रौढोक्तौ यथा शिशुपालवधे—

११। गुणः स्यादप्रतीतत्वं ज्ञत्वञ्चेद्वक्तृवाच्ययोः। (फ)

यथा—"त्वामामनन्ति प्रकृतिं पुरुषार्थप्रवर्त्तिनीम्।
तद्दर्शिनमुदासीनं (१) त्वामेव पुरुषं विदुः॥" (ब)

१२। स्वयं वापि परामर्श—(भ)

अप्रतीतत्वं गुण इत्यनुषज्यते। यथा—

"युक्तः कलाभिस्तमसां विवृद्ध्यै क्षीणश्च ताभिः क्षतये य एषाम्।
शुद्धं निरालम्बपदावलम्बं तमात्मचन्द्रं परिशीलयामि॥" (म)

"असुरस्त्वया न्यवधि कोऽपि मधुरिति कथं प्रतीयते।
दण्डदलितसरघः प्रथसे मधुसूदनस्त्वमिति सूदयन् मधु॥"

अत्र मधुसूदनशब्दो मधुदैत्यदमनार्थ एव प्रसिद्धः, मधुमक्षिकादलनार्थे तु निहतार्थः।

(फ) गुण इति। चेद्यदि वक्तृवाच्ययोर्वक्तुः श्रोतुश्च ज्ञत्वं तत्तच्छब्दस्य सङ्केताभिज्ञत्वं स्यात्, तदा अप्रतीतत्वं नाम दोषो गुण एव स्यात्। तथा च एकदेशमात्रप्रसिद्धतया तदनभिज्ञस्य वक्तुः श्रोतुश्च प्रतीत्यभावादेव अप्रतीतत्वस्य दोषत्वं वक्तव्यम्, किन्त्विदानीं वक्तुः श्रोतुश्चाभिज्ञतया तदर्थप्रतीतौ सत्यां कथमप्रतीतत्वं कथं वा तस्य दोषत्वमुपपद्यते अपि तु कथमपि न। प्रत्युत गभीरविषयतया चमत्कारित्वातिशयाद्गुणत्वमेवेत्याशयः।

(ब) त्वामिति। कुमारसम्भवद्वितीयसर्गे ब्रह्माणं प्रति देवानां स्तुतिरियम्। हे देव! त्वां पुरुषार्थौ भोगापवर्गौ प्रवर्त्तयति उत्पादयतीति तां तादृशीं प्रकृतिं मूलकारणम् आमनन्ति ब्रुवन्ति। तथा त्वामेव तद्दर्शिनं साक्षित्वेन तस्याः प्रकृतेर्द्रष्टारम्, उदासीनं सर्वतोऽसङ्गं पुरुषं चित्स्वरूपं विदुर्विदन्ति उभयत्रापि योगिन इति शेषः।

अत्र "सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः- -" "नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः। गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति" "द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः" "अकर्त्ता द्रष्टा पुरुषः—" इत्येतेषामर्थानां सांख्य-योगदर्शनयोरेव प्रसिद्धतया तदनभिज्ञवक्तृश्रोतृपक्षे अप्रतीतत्वमेवासीत्, किन्तु वक्तृभिर्देवैः श्रोत्रा च ब्रह्मणा अभिज्ञतया सर्वेषामेवोक्तार्थानां प्रतीतत्वादप्रतीतत्वन्तु न स्यादेव, प्रत्युत गुणत्वमेव

(भ) स्वयमिति। स्वयमात्मना वा परामर्शे उक्तौ। तथा च अभिज्ञस्य वक्तुः स्वगतत्वेनाभिधानेऽपि अप्रतीतत्वं गुण एवेत्यर्थः। अत्रापि पूर्ववदेवाशय ऊहनीयः।

(म) युक्त इति। य आत्मा तमसां तमोगुणजनिताज्ञानानां विवृद्ध्यै विशेषेण वृद्धये, कलाभिः पृथिव्यादिभिः स्वजनितांशैर्युक्तो भवति विराट्स्वरूपेण परिणमते। तथा य आत्मा एषां तमसां क्षतये नाशाय ताभिः कलाभिः क्षीणो विहीनश्च भवति तुरीयब्रह्मरूपेणावतिष्ठते। चन्द्रपक्षे तु तमसामन्धकाराणां

---

(१) तद्दर्शिनमुदासीनमिति पाठान्तरम्।

१३ । कथितञ्च पदं पुनः ॥

विहितस्यानुवाद्यत्वे विषादे विस्मये क्रुधि ।
दैन्येऽथ लाटानुप्रासेऽनुकम्पायां प्रसादने ॥
अर्थान्तरसंक्रमित-वाच्ये हर्षेऽवधारणे । (य)

गुण इत्येव । यथा—"उदेति सविता ताम्रः" इत्यादि (४७४ पृष्ठे) । अत्र विहितानुवादः (र) ।

"हन्त ! हन्त ! गतः कान्तो वसन्ते सखि ! नागतः ।" (ल) । अत्र विषादः ।

"चित्रं चित्रमनाकाशे कथं सुमुखि ! चन्द्रमाः ! ।" (व) । अत्र विस्मयः ।

"सुनयने ! नयने निधेहि ।" (श) इत्यत्र लाटानुप्रासः ।

विहाय कलाभिः षोड़शभागैः क्षीणो विहीनो भवति ; पुनरेषां तमसां क्षतये नाशाय ताभिः कलाभियुक्तश्च भवतीत्यर्थः । निरालम्बपदे आश्रयताशून्यस्थाने खस्मिन् अन्यत्र तु आकाश इत्यर्थः अवलम्बः अवस्थानं यस्य तम्, तम् आत्मा परमात्मा चन्द्र इव तम्, परिशीलयामि सर्वदा विचिन्तयामि ।

अत्र "यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतम्" "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" "प्रज्ञहैन्म,आदिर्वेषिकाम्" "स एष आत्मा अजरः—स्वस्थः" इत्यादीनां शारीरकभाष्यधृतानामर्थानामनभिज्ञैरन्यैरप्रतीतत्वेन दोषोऽपि अभिज्ञस्य वक्तुरात्मनः प्रतीतिविषयत्वाद्गुण एव ।

(य) कथितमिति । किञ्चेति चार्थः । कथितं पदं कथितपदत्वाख्यो दोषः, विहितानुवाद्यत्वादिष्वेकादशस्थानेषु पुनर्गुण एवेत्यर्थः । गुणत्वहेतुस्तु उदाहरणानुपदं द्रष्टव्यः ।

(र) अत्रेति । विहितानुवाद उद्देश्यप्रतिनिर्देश्यत्वम् । तथा च उद्देश्यप्रतिनिर्देश्यस्थले युगपदेकविधशब्दद्वयप्रयोगेण सत्वरमेव शाब्दबोधात् सत्वरमेव रसप्रतीतिर्गुणत्वम् ।

(ल) हन्तेति । "इदानीमन्तकः क्रान्त-जीवनान्तं करोतु मे ॥" इति मत्पूरितपरार्द्धम् ।
अत्र हन्त हन्तेति शब्दद्वयेन कथितपदत्वदोषो विषादाधिक्यसूचनाद्गुणः ।

(व) चित्रमिति । "आकाश एव सर्वाणि ज्योतींषि विचरन्ति चेत् ॥" इति मत्पूरितपरार्द्धम् ।
अत्रापि चित्रं चित्रमिति पदद्वयेन कथितपदत्वं विस्मयाधिक्यसूचनाद्गुणः ।

(श) सुनयने इति । अस्य मत्पूरितसमस्तांशो यथा—

"पत्यौ नते सुनयने ! नयने निधेहि कान्तस्य शून्यहृदये हृदयं विधेहि ।
बाले ! विलासिनि ! तदाशु ममाङ्कमेहि तृष्णातुराय नितरामसृतं प्रदेहि ॥"

अत्र नयने नयने इति पदद्वयेन कथितपदत्वं लाटानुप्रासघटकतया वैचित्र्यविशेषजनकत्वाद्गुणः ।

"नयने तस्यैव नयने च" इत्यादौ (२४० पृष्ठे) अर्थान्तरसंक्रमितवाच्यो ध्वनिः (ष)। एवमन्यत्र (स)।

१४। सन्दिग्धत्वं तथा व्याजस्तुतिपर्य्यवसायि चेत् ॥ (ह)

गुण इत्येव। यथा—

"पृथुकार्त्तस्वरपात्रं भूषितनिःशेषपरिजनं देव!।
विलसत्करेणुगहनं सम्प्रति सममावयोः सदनम् ॥" (च)

(ष) नयने इति। अत्रापि नयने नयने इति पदद्वयेन कथितपदत्वम् अर्थान्तरसंक्रमितवाच्यध्वनि-घटकतया चमत्कारातिशयप्रयोजकत्वाद्गुणः।

(स) एवमिति। अन्यत्र क्रोधादावेवमूह्यमित्यर्थः। तत्र क्रोधे यथा वीरचरिते—

"दुष्ट! दुष्ट! विकृतचेष्ट!" इति।

अत्र क्रोधाधिक्यसूचनात् कथितपदत्वं गुणः।

दैन्ये यथा मम चन्द्रप्रतापे—"कल्याणौ ननु रक्ष रक्ष चपलं कल्याणि! बालापथात्।"

अत्र दैन्यत्रासाधिक्यसूचनात् कथितपदत्वं गुणः।

अनुकम्पायां यथा शाकुन्तले—"आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः।"

अत्राश्रममृगे अनुकम्पातिरेकद्योतनात् कथितपदत्वं गुणः।

प्रसादने यथा अपराधभञ्जनस्तोत्रे—"क्षन्तव्यो मेऽपराधः शिव! शिव! शिव! भोः! श्रीमहादेव! शम्भो!।"

अत्रानुनयातिशयसूचनात् कथितपदत्वं गुणः।

हर्षे यथा मम—"सखि! सखि! मम कान्तः साम्प्रतं प्राप्त एषः।"

अत्र हर्षाधिक्यप्रत्यायनात् कथितपदत्वं गुणः।

अवधारणे यथा शान्तिशतके—

"शृणु हृदय! रहस्यं यत् प्रशस्तं मुनीनां न खलु न खलु योषित् सन्निधिः संविधेयः।"

अत्र योषित् सन्निधेरवश्यवर्ज्जनीयत्वसूचनात् न खलु न खल्विति कथितपदत्वं गुणः।

वस्तुतस्तु विषादाद्यभिधानं कतिपयप्रदर्शनमात्रपरम्, वीप्सामात्र एव कथितपदत्वं गुण इति बोध्यम्। अतएव "आदाय वकुलगन्धानन्धीकुर्वन् पदे पदे भ्रमरान्।" इत्यादौ पदे पदे इत्यादिकं कथितपदत्वमपि गुण एव।

(ह) सन्दिग्धत्वमिति। सन्दिग्धत्वं नाम दोषः, तथा गुण एव; चेद्यदि तत् व्याजस्तुतौ छलेन स्तवे पर्य्यवसायि परिणतं भवेत्।

(च) पृथ्विति। हे देव! राजन्! सम्प्रति आवयोस्तव मम च सदनं भवनम्, समं समानम्। तथा च पृथूनि विशालानि कार्त्तस्वरपात्राणि स्वर्णभाजनानि यस्मिन् तत्तथोक्तम्, भूषिता रत्नादिभिरलङ्कृताः

१५ । वैयाकरणमुख्ये तु प्रतिपाद्येऽथ वक्तरि ।
कष्टत्वं दुःश्रवत्वं वा—(क)

गुण इत्येव । यथा—

"दीधीवेवीङ्समः (१) कश्चिद्गुणवृद्ध्योरभाजनम् ।
क्विप्प्रत्ययनिभः कश्चिद्यत्र सन्निहिते न ते ॥" (ख)

अत्रार्थः कष्टः, वैयाकरणस्य वक्ता (ग) ।

निःशेषाः सर्व एव परिजना यस्मिन् तत्तादृशम्, तथा विलसन्तीभिः परिभ्रमन्तीभिः करेणुभिर्हस्तिनीभिः गहनं दुर्गमम्, तत्र भवनम् । तथा मम भवनमपि पृथुकानां शिशूनाम् आर्त्तस्वरपातं खाद्यपेयाद्यभावात् क्रन्दनध्वनिस्थानम्, भुवि मृत्तिकायाम् उषिता आसनाद्यभावादवस्थिताः निःशेषाः सकलाः परिजना यत्र तत्तादृशम्, तथा विलेषु गर्त्तेषु सीदन्ति अवतिष्ठन्ते ये ते विलसदो मूषिकाः, कुत्सिता विलसद इति विलसत्का दुष्टमूषिकास्तेषां रेणुभिरुद्‌तोलितधूलिभिर्गहनं दुर्गमम् । द्वितीयार्थे विलसत्क इति कुत्सायां कप्रत्ययः ।

अत्र पृथूनि कार्त्तस्वरपात्राणि यस्मिन् तदित्यर्थः ? किंवा पृथुकानामार्त्तस्वरस्य पात्रमित्यर्थः ? इत्यादिसन्देहात् सन्दिग्धत्वदोषो राज्ञो व्याजस्तुतिपर्य्यवसायितया उभयथापि सत्यत्वाद्गुण एव ।

(क) वैयेति । वैयाकरणो मुख्यो मुखमादिर्यस्य तस्मिन् वैयाकरणादिके जने प्रतिपाद्ये बोद्धव्ये श्रोतरीत्यर्थः अथवा वक्तरि, कष्टत्वं दुःश्रवत्वं वा दोषो गुण एव । मुख्यशब्देन नीरस-आर्त्त-तार्किकादि-परिग्रहः ।

(ख) दीधीति । कश्चिज्जनः, दीधीवेवीङ्समः "दीधीङ् दीप्तिदेवनयोः" "वेवीङ् व्यतिना तुल्ये" इत्येताभ्यां धातुभ्यां समस्तुल्यः गुणो दयादाक्षिण्यादिः वृद्धिरभ्युदयस्तयोरभाजनमपात्रम्, अन्यत्र तु "अर् पूर्वे द्वे सन्ध्यक्षरे च गुणः" "आर् उत्तरे च वृद्धिः" इति सूत्राभ्यां सङ्केतिते गुणवृद्धी तयोरभाजनमविषयः "दीधी-वेव्योश्च" इत्यनेन गुणनिषेधेन वृद्धिनिषेधात् गुणआधिका वृद्धिरिति ज्ञापकात् । कश्चिज्जनश्च क्विप्प्रत्ययनिभः क्विप्प्रत्ययेन तुल्यः, विलुप्तस्वरूप इत्यर्थः ; एकत्र ककारपकारयोरनुबन्धत्वेन स्वत एवापगमात् विकारस्य तु "वेर्लोपोऽपृक्तस्य च" इत्यनेन लोपात्, अन्यत्र तु किञ्चिदपि कर्त्तुमक्षमतया सतोऽप्यसत्कल्पत्वादिति भावः । यत्र जने क्विप्प्रत्यये च, ते उक्तप्रकारे उभे अपि गुणवृद्धी न सन्निहिते न प्रसक्ते अपि ; एकत्र "क्ङिति यक्षश्च योक्तवर्जम्" इत्यनेन गुणनिषेधेन वृद्धिनिषेधात्, अन्यत्र तु तत्प्राप्त्युपयोगिप्राक्तनपुण्याभावादिति भावः ।

(ग) अत्रेति । कष्टः साधारणपक्षे कष्टबोध्यः, तत्तद्व्याकरणसूत्रानुसन्धानलभ्यत्वादित्याशयः । वैयाकरणस्य वक्त्रेति । तथा च तस्य तत्तत्सूत्राणां सततमेव स्मृत्युदिततया कष्टप्रयोज्यत्वबोध्यत्वाभावात् व्याकरणे ज्ञानविशेषव्यञ्जकत्वाच्च गुणत्वमित्यभिप्रायः ।

आर्त्तवक्तृत्वे यथा मम वङ्गीयप्रतापे—

(१) दीधीवेवीट्समः इति पाठान्तरम् ।

एवमस्य प्रतिपाद्यत्वेऽपि (घ)।

"अत्रातार्प्सीमुपाध्याय ! (१) त्वामहं न कदाचन ।" (ङ)

अत्र दुःश्रवत्वम् । वैयाकरणो वाच्यः । एवमस्य वक्तृत्वेऽपि (च)।

१६ । ग्राम्यत्वमधमोक्तिषु ॥ (छ)

गुण इत्येव । यथा मम—

"एसो ससहरविम्बो दीसइ हेअङ्गवीणपिण्डो व्व ।
एदे अस्ससमोहा पड़न्ति आमासु दुद्धाधर व्व ॥" (ज)

इयं विदूषकोक्तिः ।

१७ । निर्हेतुता तु ख्यातेऽर्थे दोषतां नैव गच्छति । (झ)

"आत्मनी जननाशौचं शावाशौचन्तु विद्विषाम् । प्रायश्चित्तञ्च सन्दिग्ध-पापिष्वस्तु तव ध्रुवम् ॥"

अत्र आर्त्तवक्तृत्वादेव कष्टत्वं गुण उक्तायुक्तः ।

(घ) एवमिति । अस्य वैयाकरणादेः, प्रतिपाद्यत्वे बोद्धव्यत्वे । यथा मम—

"सोपसर्गं मूलशून्यं केवलप्रत्ययात्मकम् । पौरहित्यं गुरो ! राज्ञः साम्प्रतं व्यतिसे यथा ॥"

अत्र हे गुरो ! 'व्यतिसे' इति पदं यथा व्यतीत्युपसर्गसहितम्, 'अस्' इति मूलधातुना शून्यम्, 'से' इति केवलप्रत्ययस्वरूपञ्च ; तथा राज्ञः पौरहित्यमपि मम उपसर्गेणोपद्रवेण सहितम्, मूलशून्यं दृढ़ताहीनम्, केवलप्रत्ययात्मकं विश्वासविषयमात्रमित्यर्थः कष्टत्वं वैयाकरणबोद्धव्यत्वाद्‌गुण एव । एवं आर्त्तादिप्रतिपाद्यत्वेऽप्युदाहार्य्यम् ।

(ङ) वैयाकरणे बोद्धव्ये दुःश्रवत्वस्य गुणत्वमुदाहरति अत्रेति ।

"अक्राक्षीत्तेन मे विद्यां हन्त ! सैवाकृतज्ञता ॥" इति मत्पूरितपरार्द्धम् ।

अतार्प्सीः दक्षिणादानादिना न तृप्तीकृतवान् । अतार्प्सीरित्यत्र दुःश्रवत्वम् ।

(च) एवमिति । अस्य वैयाकरणादेः । यथा भट्टिकाव्ये—"धनुर्व्यकार्षीद्‌गुरुबाणगर्भम् ।" नीरस-तार्किकवक्तृत्वे कष्टत्वं गुणो यथा मुद्राराक्षसे—"साध्ये निश्चितमन्वयेन" इत्यादि ।

(छ) ग्राम्यत्वमिति । अधमस्य अशिक्षितजनस्य उक्तिषु ग्राम्यत्वं नाम दोषो गुण एव ।

(ज) एसो इति । "एष शशधरविम्बो दृश्यते हैयङ्गवीनपिण्ड इव । एते अस्रसमूहाः पतन्ति आशासु दुग्धधारा इव ॥" इति संस्कृतानुवादः । हैयङ्गवीनपिण्डः पूर्वदिनोत्पन्नदुग्धनिष्पन्नघृतपिण्डः । अस्रसमूहाः शशधरस्यैव किरणजालानि । आशासु दिक्षु ।

अत्र दुग्धधाराशब्दो ग्राम्यः । तथा च अशिक्षितजनस्य नागरोपनागरशब्दप्रयोग एव कथमप्यलीकता प्रतीयते, ग्राम्यशब्दप्रयोगे तु शिशोरस्फुटवाक्य इव योग्यत्वात् कथमपि कौतूहलमुदेतीति नितान्ताशिक्षितविदूषकोक्तेरेवास्य गुणत्वमित्यवधेयम् ।

(१) अत्राप्सीम् इति पाठान्तरम् ।

यथा—"सम्प्रति सन्ध्यासमयश्चक्रद्वन्द्वानि विघटयति।" (ञ)

१८। कवीनां समये ख्याते गुणः ख्यातविरुद्धता॥ (ट)

कविसमयख्यातानि च—(ठ)

१९। मालिन्यं व्योम्नि पापे यशसि धवलता वर्ण्यते हासकीर्त्त्योः
रक्तौ च क्रोधरागौ सरिदुदधिगतं पङ्कजेन्दीवरादि।
तोयाधारेऽखिलेऽपि प्रसरति च मरालादिकः पक्षिसङ्घो
ज्योत्स्ना पेया चकोरैर्जलधरसमये मानसं यान्ति हंसाः॥ (ड)
पादाघातादशोकं विकसति बकुलं योषितामास्यमद्यैः
यूनामङ्गेषु हाराः स्फुटति च हृदयं विप्रयोगस्य तापैः।

(झ) निर्हेतुतेति। ख्यातेऽर्थे लोकप्रसिद्धे विषये निर्हेतुता नाम दोषस्तु नैव दोषतां गच्छति। गुणतामपि नैव गच्छति चमत्कारितान्तरजननाभावादित्यपि बोध्यम्।

(ञ) सम्प्रतीति। चक्रद्वन्द्वानि चक्रवाकदम्पतीन् विघटयति परस्परं वियोजयति। अत्र सन्ध्यासमयस्य चक्रवाकदम्पतीनां परस्परवियोजकत्वं लोकप्रसिद्धमिति हेतोराकाङ्क्षाया असत्त्वान्न निर्हेतुतादोष इति बोध्यम्।

(ट) कवीनामिति। ख्याते प्रसिद्धे कवीनां समये नियमे, ख्यातविरुद्धता नाम प्रागुक्तो दोषः, गुण एव स्यात्।

(ठ) अथ कानि कविसमयख्यातानीत्याह कवीति।

(ड) मालिन्यमिति। निराकारतया सामान्यत एव रूपशून्येऽपि व्योम्नि आकाशे पापे च मालिन्यं कृष्णवर्णो वर्ण्यते कविभिरिति शेषः। ईदृशवर्णनमेव कविसमय इति भावः। एवमन्यत्रापि। "कटाहतलमलिनमाकाशम्" "अमान्धकारीपमसुग्रपापम्।" यशसि हासकीर्त्त्योश्च धवलता वर्ण्यते। "हनूमदाद्यैर्यशसा मया पुनर्द्विषां हसैर्दूतपथः सितीकृतः।" "नलः सितच्छवितकीर्त्तिमण्डलः" "यशः कीर्त्तिः समज्ञा च" इत्यमरोक्त्या यशःकीर्त्त्योः पर्य्यायत्वेऽपि "खड्गादिप्रभवा कीर्त्तिर्विद्यादिप्रभवं यशः" इति कारणभेदेन भेदाङ्गीकारादत्र यशःकीर्त्त्योः पृथगुपन्यासः। क्रोधरागौ रोषानुरागौ रक्तौ वर्ण्येते। "सरागया स्रुतघनघर्म्मतोयया" "सन्ध्यारागसमं स रागनिवहम्।" पङ्कजेन्दीवरादि आदिपदात् शैवालञ्च, सरिदुदधिगतं वर्ण्यते। "पद्मैरनन्वीतवधूमुखद्युत—निम्नगाः।" अखिलेऽपि तोयाधारे जलाशये मरालादिको हंसप्रभृतिः पक्षिसङ्घः प्रसरति सञ्चरति चेति वर्ण्यते। "चुकूज कूले कलहंसमण्डली।" चकोरैः स्वनामख्यातैः पक्षिभिः ज्योत्स्ना पेया पातव्येति वर्ण्यते। "अपि सर्मैष चकोरशिशुर्मुनेः।" जलधरसमये वर्षाकाले हंसाः मानसं सरोवरं यान्ति। "मानसोत्काः—सम्पतस्यन्ते नभसि भवतो राजहंसाः सहायाः॥"

मौर्वी रोलम्बमाला धनुरथविशिखाः कौसुमाः पुष्पकेतोः
भिन्नं स्यादस्य बाणैर्युवजनहृदयं स्त्रीकटाक्षेण तद्वत् ॥ (ढ)
अह्न्यम्भोजं निशायां विकसति कुमुदं चन्द्रिका शुक्लपक्षे
मेघध्वानेषु नृत्यं भवति च शिखिनां नाप्यशोके फलं स्यात् ।
न स्याज्जाती वसन्ते न च कुसुमफले गन्धसारद्रुमाणा-
मित्याद्युन्नेयमन्यत् कविसमयगतं सत्कवीनां प्रबन्धे ॥ (ण)

एषामुदाहरणान्याकरेषु स्पष्टानि (त) ।

२० । धनुर्ज्यादिषु शब्देषु शब्दास्तु धनुरादयः ।
आरूढत्वादिबोधाय—(थ)

(ढ) पादेति । योषितां पादाघातात् अशोकं पुष्पं विकसति इति वर्ण्यते । "सर्वाशोकतरूणाम्" इत्यादि मालविकाग्निमित्रपञ्चमाङ्के । योषितामास्यमद्यैर्मुखोद्गारितमद्यैः वकुलं पुष्पञ्च विकसति इति वर्ण्यते । "वकुलं विचकास योषिताम् ।" यूनामङ्गेषु हारा मुक्तामाला वर्ण्यन्ते । "आसुक्त-मुक्तालतमस्य वक्षः ।" यूनां हृदयञ्च विप्रयोगस्य तापैः प्रियतमाविच्छेदसन्तापैः स्फुटति विदीर्य्यत इति वर्ण्यते । "हा हा देवि ! स्फुटति हृदयम् ।" पुष्पकेतोर्मदनस्य मौर्वी धनुषो गुणः रोलम्बमाला भ्रमरा-वली वर्ण्यते । "अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता ।" पुष्पकेतोरेव धनुः कौसुमं कुसुममयं वर्ण्यते । "पीतोऽसि तन्वा जितपुष्पधन्वा ।" अथ पुष्पकेतोर्विशिखा बाणा अपि कौसुमाः कुसुममया वर्ण्यन्ते । "तव कुसुमशरत्वं शीतरश्मित्वमिन्दोः ।" अस्य पुष्पकेतोर्बाणैः तद्वत् स्त्रीकटाक्षेण युवजनहृदयं भिन्नं विदीर्णं स्यात् । "फलस्तनस्थानविदीर्णरागिहृद्विशच्छुकास्यस्मरकिंशुकाशुगाम् ।" "अवान्तरे जघ्नुरमुं कटाक्षैः ।"

(ण) अह्नीति । उभयोरेवोभयोर्विकासदर्शनेऽपि अह्नि अम्भोजं निशायाञ्च कुमुदं विकसति इति वर्ण्यते । "कुमुदान्येव शशाङ्कः सविता बोधयति पङ्कजान्येव ।" चन्द्रिका शुक्लपक्ष एव वर्ण्यते । "शुक्लं हि पक्षं समुपैति चन्द्रिका ।" अन्यत्र सम्भवेऽपि मेघध्वानेष्वेव शिखिनां नृत्यं भवतीति च वर्ण्यते । "प्रवृत्तनृत्यं कुलमद्य बर्हिणाम् ।" अशोके वृक्षे फलं नापि स्यात् ; वसन्ते काले जातीपुष्पं न स्यात् ; गन्धसारद्रुमाणां चन्दनवृक्षाणां कुसुमफले न च स्याताम् । सर्वत्र कविवर्णनायामिति शेषः । इत्यादि उन्नेयमनुसन्धेयम् । अन्यत् कविसमयगतं कवीनां नियमनिर्द्दिष्टं वर्णनं सत्कवीनां कालिदासादीनां प्रबन्धे उन्नेयमित्यन्वयः । तथा च यशःकीर्त्त्योर्धवलतावत् तद्विपरीतत्वेन दुर्यशोदुष्कीर्त्त्योर्मालिन्यमेव वर्ण्यते । यथा—"वितेनुरङ्गारमिवायशः परे ।" विस्तरस्तु अलङ्कारशेखर-रसगङ्गाधर-काव्यचिन्तामण्यादिष्वनुसन्धेयः ।

(त) एषामिति । आकरेषु सत्कवीनां ग्रन्थेषु । तानि तु यथास्थानं दर्शितान्येव ।

यथा—"पूरिते रोदसीध्वानैर्धनुर्ज्यास्फालनोद्भवैः ।" (द)

अत्र ज्याशब्देनापि गतार्थत्वे धनुःशब्देन ज्याया धनुष्याततीकरणं (१) बोध्यते (ध)।

आदिशब्दात् "भाति कर्णावतंसस्ते ।" अत्र कर्णस्थितत्वबोधनाय कर्णशब्दः। एवं श्रवणकुण्डल-शिरःशेखरप्रभृतिः। एवं निरुपपदो मालाशब्दः पुष्पस्रजमेवाभिधत्त इति स्थितावपि "पुष्पमाला विभाति ते ।" अत्र पुष्पशब्द उत्कृष्टपुष्पबुद्धये (न)। एवं "मुक्ताहारः" इत्यत्र मुक्ताशब्देन अन्यरत्नामिश्रितत्वम् (प)।

२१। प्रयोक्तव्याः स्थिता अमी ॥ (फ)

धनुर्ज्यादयः सत्काव्यस्थिता एव निबद्धव्याः, न त्वस्थिता जघनकाञ्चो-करकङ्कणादयः (ब)।

(थ) क्वचित् पुनरुक्ततादोषं गुणत्वेन प्रतिप्रसूते धनुरिति। धनुर्ज्यादिषु शब्देषु विद्यमाना इत्यर्थः, धनुरादयः शब्दास्तु आरूढ़त्वादिबोधाय धनुरादिषु योजितत्वादिज्ञापनाय प्रयोक्तव्या इत्यन्वयः।

(द) पूरिते इति। "सिंहनादैरमित्राणां भिन्नानि हृदयान्यपि ॥" इति सत्पूरितपरार्द्धम्।

रोदसी द्यावापृथिव्यौ।

(ध) अत्रेति। गतार्थत्वे प्राप्तधनुर्गुणार्थत्वे, "मौर्वी ज्या शिञ्जिनी गुणः" इत्यमरवाक्यादौना तत्रैव सङ्केतग्रहादिति भावः। आततीकरणं विस्तृतीकरणम्।

(न) कारिकायाः प्रथमादिशब्दग्राह्यान् दर्शयितुमाह आदिशब्दादिति। "पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेऽपि शेखरे" इत्यमरकोषात् अवतंसशब्देनैव कर्णभूषणे प्राप्ते कर्णस्थितत्वबोधनाय कर्णशब्द इत्यर्थः। तथा कुण्डलशेखरशब्दाभ्यामेव कर्णभूषणशिरोभूषणयोः प्राप्तावपि तत्र तत्र स्थितत्वबोधनाय श्रवणशिरःशब्दा-विति भावः। पुष्पस्रजमेवाभिधत्त इति। तत्रैव भूरिप्रयोगादित्याशयः।

(प) कारिकाया द्वितीयादिपदग्राह्यं दर्शयितुमाह तृतीय एवमिति। हारशब्देनैव मुक्तामयहार-प्रतीतावपि पुनर्मुक्ताशब्देनेत्यर्थः। अन्येति। एतेन आरूढ़त्वादीत्यादिशब्देन अमिश्रितत्वादिग्रहणमिति सूचितम्।

(फ) प्रयोक्तव्या इति। वृत्तिव्याख्ययैवेदं स्पष्टीभूतम्।

(ब) अमी इत्यस्य विशेष्यमाह धनुर्ज्यादय इति। शब्दा इति शेषः। स्थिता इत्यस्यार्थमाह सदित्यादि। एतदुक्तेर्नियमार्थत्वमाह एवेति। नियमव्यवच्छेद्यमाह न त्विति। अस्थिता इति। सत्काव्येष्विति शेषः। एतेन "उत्क्षिप्तं करकङ्कणद्वयमिदम् ।" इत्यादौ पुनरुक्ततादोष एवेति बोध्यम्।

---

(१) आयतीकरणमिति पाठान्तरम्।

२२ । उक्तावानन्दमग्नादेः स्यान्न्यूनपदता गुणः । (भ)

यथा—

“गाढ़ालिङ्गनवामनीकृतकुचप्रोद्भिन्नरोमोद्गमा
सान्द्रस्नेहरसातिरेकविगलच्छ्रीमन्नितम्बाम्बरा ।
मा मा मानद ! माऽति मामलमिति क्षामाक्षरोल्लापिनी
सुप्ता किं नु मृता नु किं मनसि मे लीना विलीना नु किम् ॥” (म)

अत्र पीड़येति न्यूनम् (य) ।

२३ । क्वचिन्न दोषो न गुणः—(र)

न्यूनपदत्वमित्येव । यथा—

“तिष्ठेत् कोपवशात् प्रभावपिहिता ? दीर्घं न सा कुप्यति
स्वर्गायोत्पतिता भवेत् ? मयि पुनर्भावार्द्रमस्या मनः ।
तां हर्त्तुं विबुधद्विषोऽपि न च मे शक्ताः पुरोवर्त्तिनीं
सा चात्यन्तमगोचरं नयनयोर्यातेति कोऽयं विधिः ? ॥” (ल)

(भ) उक्ताविति । आनन्दमग्नस्य आदिशब्दाद्दुःखमग्नादेश्च उक्तौ न्यूनपदता नाम दोष गुण एव स्यात् । आनन्दादिभिरभिभूततया अन्वयिपदाभिधाने अनवधानसूचनद्वारा आनन्दादीनामत्यन्ताधिक्यसूचनादित्यभिप्रायः ।

(म) गाढ़ेति । श्लोकोऽयममरुशतके । गाढ़ालिङ्गनेन वामनीकृतौ खर्वीकृतौ कुचौ यस्याः सा चासौ प्रोद्भिन्नः प्रकाशितो रोमोद्गमो रोमाञ्चो यस्याः सा चेति परपदस्य विशेष्यत्वविवक्षया कर्मधारये पूर्वपदस्य पुंवद्भावः । सान्द्रेण निविड़ेन स्नेहरसातिरेकेण मां प्रति प्रणयाधिक्येन विगलन्निपतत् श्रीमतः सुन्दरात् नितम्बादम्बरं वसनं यस्याः सा । हे मानद ! मा माम्, मा पीड़य, मां मा अतिपीड़य, अलम् अनेनालिङ्गनव्यापारेणेत्यर्थः, इति क्षामाक्षरोल्लापिनी पीड़येतिपदानभिधानादल्पाक्षरभाषिणी सा प्रियतमेत्यर्थः, किन्नु, सुप्ता परं किमप्यकथनात् किं निद्रिता ? निस्पन्दत्वात् किन्नु, मृता ? भुजद्वयान्तरालाद्बहिर्गमनेन किन्नु, मे मम मनसि लीना ? बहिः सर्वथैवाननुभवात् मनस्येव विलीना विशेषेण लीना किन्नु ? ।

(य) अत्रेति । पीड़येति पदमिति शेषः । एतदुपलक्षणम्, अलमित्यनेनान्वययोग्यम् आलिङ्गनेनेति पदमपि न्यूनमिति बोध्यम् ।

(र) क्वचिदिति । क्वचित्तत्तत्पदस्य अनायासबोध्यत्वस्थले प्रागुक्तं न्यूनपदत्वं न दोषो न वा गुण इत्यर्थः । अनयोर्युक्तिस्तु वृत्तावेव विवृता ।

(ल) तिष्ठेदिति । विक्रमोर्वश्यामुर्वशीतिरोधाने सति पुरूरवस उक्तिरियम् । उर्वशी

अत्र "प्रभावपिहिता" इति "भवेत्" इति च इत्यनन्तरम् "नैतद्यतः" इति पदानि न्यूनानि (व)।

एषां पदानां न्यूनतायामपि एतद्वाक्यव्यङ्ग्यस्य वितर्काख्यव्यभिचारिभावस्योत्कर्षाकरणान्न गुणः, "दीर्घं न सा" इत्यादिवाक्यजन्यया च प्रतिपत्त्या "तिष्ठे"दित्यादिवाक्यप्रतिपत्तेर्बाधः (१) स्फुटमेवावभासत इति न दोषः (श)।

२४। गुणः क्वाप्यधिकं पदम् ॥ (ष)

यथा—"आचरति दुर्जनो यत् सहसा मनसोऽप्यगोचरानर्थान्।
तन्न न जाने जाने स्पृशति मनः किन्तु नैव निष्ठुरताम् ॥" (स)

कोपवशात् मां प्रति कुतश्चित् प्रणयकोपात् प्रभावेण स्वर्गवासित्वमहिम्ना पिहिता प्रच्छन्नदेहा सती क्वापि तिष्ठेत्? किमिति काकुः। अन्यवाप्येवम्। नैतत्, यतः, सा उर्वशी दीर्घं न कुप्यति। तथा च कोपेन प्रच्छन्नापि दीर्घकालस्थायिकोपाभावेन क्षणात् परमेव पुनरागच्छेदिति भावः। तर्हि किं स्वर्गायैव उत्पतिता उद्गता भवेत्? एतदपि न, यतः, अस्या उर्वश्या मनः, मयि पुनर्भावार्द्रं प्रेमस्निग्धम्। अतश्चिरविरहं सती न कुर्य्यादित्याशयः। तर्हि किमसुरैरपहृतेत्याह तामिति। विबुधद्विषोऽपि असुरा अपि मे मम पुरोवर्त्तिनीमग्रतो विद्यमानां तामुर्वशीं हर्त्तुं न च नहि शक्ताः। तेषां तादृशसाहसचरणयोरभावादित्यभिप्रायः। अथ च सा नयनयोरत्यन्तमेव अगोचरमविषयतां याता प्राप्तेत्ययं को नाम विधिर्व्यापारः?।

(व) नन्वत्र कुत्र किं नाम पदं न्यूनमित्याह अत्रेति। इति दीर्घ्येव पदानि न्यूनानीत्यर्थः। अन्यथा दीर्घमित्यादि मयीत्यादि च हेतुतयोपन्यस्तं वाक्यं नोपपद्यत इत्याशयः।

(श) कारिकास्थपाठक्रमस्य केवलच्छन्दःपूरणार्थोपन्यस्तत्वेनाकिञ्चित्करत्वात् गुणदोषयोर्मध्ये प्राग्गुणत्वोपपादनस्यैव अगुणत्वादोषत्वयोर्मध्येऽपि प्रागगुणत्वस्यैवोपपादनौचित्यात् प्रथममगुणत्वं पश्चाद्दोषत्वमुपपादयितुमाह एषामिति। 'न' 'एतत्' 'यतः' इति त्रयाणामित्यर्थः। उत्कर्षाकरणात् "किं वक्षः प्रियया" इत्यादौ "करतले विन्यस्य वक्त्राम्बुजम्" इत्यनेनेव अत्र केनचित् पदान्तरेण पुष्टाकरणादित्यर्थः। प्रतिपत्त्या प्रतीत्या द्वारा। वाक्यप्रतिपत्तेर्वाक्यजन्यप्रतीतेः, बाधो निरासः। तथा च "नैतद्यतः" इति शब्दत्रयप्रतिपाद्यः "तिष्ठेत्" इत्यादिवाक्यार्थबाधनिरासः "दीर्घं न सा कुप्यति" इति वाक्यजन्येनैव बोधेन तदन्वयानुपपत्त्या स्पष्टं प्रतिपादित इति न दोष इत्याशयः।

(ष) गुण इति। क्वापि अवधारणबोधनस्थले अधिकं पदम् अधिकपदता नाम दोषो गुण एव।

(स) आचरतीति। दुर्जनः सहसैव यत् मनसोऽपि अगोचरान् अविषयान् अभावनीयानित्यर्थः,

---

(१) बोध इति पुस्तकान्तरेष्वसङ्गतः पाठः।

६६

अत्र "न न जाने" इत्यनेन अयोगव्यवच्छेदाद्विच्छित्तिविशेषः (१) (ङ)। द्वितीये "जाने" इत्यनेन "अहमेव जाने" इत्यन्ययोगव्यवच्छेदा द्विच्छित्तिविशेषः (२) (च)।

२५। समाप्तपुनरात्तत्वं न दोषो न गुणः क्वचित्। (क)

यथा—"अन्यास्ता गुणरत्न—" इत्यादि (४६४ पृष्ठे)।

अत्र प्रथमार्द्धेन वाक्यसमाप्तावपि द्वितीयार्द्धवाक्यं पुनरुपात्तम् (ख)। एवञ्च विशेषणमात्रस्य पुनरुपादाने समाप्तपुनरात्तत्वम्, न वाक्यान्तरस्ये विज्ञेयम् (ग)।

अर्थात् कार्य्याणि आचरति करोति ; तत् न जाने इति न, अपि तु जाने एव ; एवं जाने अहमेव इत्यर्थः। तर्हि कथं न तद्दैव प्रतिकरोषीत्याह स्पृशतीति। किन्तु मम मनः नैव निष्ठुरतां स्पृ दुर्जनमनोवत् क्रूरतामाश्रयति।

(ङ) अवधारणं नाम द्विविधम्—अयोगव्यवच्छेदः अन्ययोगव्यवच्छेदश्चेति। अत्र तूभयोरेव घट गुणत्वमिति क्रमादाह अत्रेति। आद्ये इत्यूह्यम्। अयोगस्य आत्मनि दुर्जनकार्य्यविषयकज्ञानासम्ब व्यवच्छेदान्निराकरणाद्विच्छित्तिविशेषचमत्कारितातिशयः। तथा च 'जाने' इत्यनेनैवोपपत्तौ नञ्द्वयादि दधिकपदत्वप्रसक्तावपि नञ्द्वयेनैव उक्तविधवैचित्र्यातिशयबोधनात् प्रत्युत गुणत्वमेवेति भावः।

(च) ननु 'न जाने इति न, अपि तु जाने' इत्यर्थे द्वितीयेन जाने इत्यनेनैव अयोगव्यवच्छेद चेत्, नेत्याह द्वितीये इति। द्वितीये अवधारणप्रकारे इत्यर्थः। अन्यस्मिन् जने यो योगः दुर्जनकार्य्यवि ज्ञानसम्बन्धस्तस्य व्यवच्छेदान्निराकरणात् विच्छित्तिविशेषचमत्कारातिशयः तथा च "न न इत्यनेनैवायोगव्यवच्छेदप्रत्यायनात् द्वितीयेन 'जाने' इत्यनेन तु अन्ययोगव्यवच्छेदस्यैव प्रत्यायनमिति अतएवात्राधिकपदत्वसम्भवेऽपि गुणत्वमेवेति बोध्यम्। न चात्र 'न न जाने जाने' इत्येकानुपूर्वीकशब्द मसकृदभिधानात् कथितपदत्वमेवेति वाच्यम्, आनुपूर्वीभेदाभावेऽपि अर्थभेदात् अभिन्नार्थकैकानुपूर्वीकशब्द मसकृदभिधान एव कथितपदत्वदोषव्यवस्थापनात्। किन्तु ईदृशविषये कथितपदत्वमपि गुण एव। चोक्तम्—"कथितञ्च पदं पुनः" इत्यादि।

(क) समाप्तेति। क्वचित् अन्वयस्य समाप्तावपि वाक्यान्तरेण पुनरुपात्तस्थले समाप्तपुनरात्तत्व दोषो न दोषः, न वा गुणः।

(ख) अत्रेति। पुनरुपात्तं यत्रेत्यनेन पूर्ववाक्यसाकाङ्क्षतया पुनर्गृहीतम्। अतएवात्र विशिष्टलक्षणाभावे तद्दोषप्रसक्तौ प्रतिप्रसव इति बोध्यम्। तथा चात्र पूर्ववाक्यसाकाङ्क्षद्वितीयवाक्येन कर्षाजननान्न दोषत्वम्, विच्छित्तिविशेषाजननाच्च न गुणत्वमित्यवधेयम्।

---

(१) अन्ययोगव्यवच्छेदाद्विच्छित्तिविशेषः, अन्ययोगव्यवच्छेदः इति पाठभेदौ।

(२) अत्र न न जाने इत्यन्ययोगव्यवच्छेदाद्विच्छित्तिविशेषः इतिभावः समुदायेन पाठः क्वचित्।

विभावादिपरिपोषस्य प्रकृतरसप्रतिकूलप्रायत्वादित्येषां स्वशब्दाभिधानं च वाच्यम् (ढ)।

२९। सञ्चार्य्यादेर्विरुद्धस्य बाध्यत्वेन वचो गुणः। (ण)

यथा—"क्वाकार्य्यं शशलक्ष्मणः क्व च कुलम्" इत्यादि (२२२ पृष्ठे)।

अत्र प्रशमाङ्गानां वितर्क-मति-शङ्का-धृतीनामभिलाषाङ्गौत्सुक्य-स्मृति-दैन्य-चिन्ताभिस्तिरस्कारः, पर्य्यन्ते चिन्ताप्रधानमास्वादप्रकर्षमाविर्भावयति (त)।

३०। विरोधिनोऽपि स्मरणे साम्येन वचनेऽपि वा ॥
भवेद्विरोधो नान्योन्यमङ्गिन्यङ्गत्वमाप्तयोः। (थ)

भयादीनामवासम्भवात् त्वराद्वारा औत्सुक्यस्यैव विलम्बेन प्रतीतिः स्यादेवेति भावः। अतएव औत्सुक्यस्य न प्रतीतिरित्यनुक्त्वा न झटिति प्रतीतिरित्युक्तम्। क्रियोऽनुभावस्य लज्जाकार्य्यस्य, व्यावर्त्तनस्य वर्त्तनस्य। तथा च व्यावर्त्तनरूपानुभावद्वारा क्रियः प्रतिपादने तस्याय न झटिति प्रतीतिः, व्यावर्त्तनस्य भयादिनापि सम्भवादिति पूर्ववदेवार्थः। अवादिशब्देन भयादीनां परिग्रहः। अतएवात्र गत्यन्तराभावात् व्यभिचारिणः स्वशब्देनोक्तावपि न दोष इत्याशयः।

(ढ) अथ साध्वसहासयोर्विभावाद्यभिधानेनैव प्रतिपादनं युक्तमित्याह साध्वसेति। विभावादिभिः विभावाद्यभिधानैः परिपोषस्तस्य। प्रकृतरसस्य शृङ्गारस्य प्रतिकूलप्रायत्वात् साध्वसस्य विभावादिकृतपरिपोषे भयानकरसत्वप्राप्त्या विरोधित्वात्, हासस्य च विभावादिकृतपरिपोषे हास्यरसत्वप्राप्त्या प्राधान्ये सति शृङ्गारोपमर्द्दकत्वेन तद्विरोधितुल्यत्वादित्यर्थः। इति एतेभ्यो हेतुभ्य इत्यर्थः। एषाम् औत्सुक्य-व्रीडा-साध्वस-हास्यव्यभिचारिभावानाम्।

(ण) ("परिपन्थिरसाङ्गस्य विभावादेः परिग्रहः" इत्यस्य प्रतिप्रसवमाह सञ्चार्य्यादेरिति। विरुद्धस्य विरोधिरसाङ्गभूतस्य सञ्चार्य्यादेर्व्यभिचारिभावादेः, बाध्यत्वेन उपमर्द्यत्वप्रकारेण वचः कथनं गुणः। अवादिना विभावानुभावयोर्ग्रहणम्।)

(त) गुणत्वमुपपादयति अत्रेति। प्रशमाङ्गानां शान्तरसनिर्वाहकानाम्। अभिलाषाङ्गानि शृङ्गारनिर्वाहिकाः या औत्सुक्य-स्मृति-दैन्य-चिन्तास्ताभिः, तिरस्कार उपमर्द्दनमप्रधानीकरणमित्यर्थः; पर्य्यन्ते चिन्तैव प्रधानं यत्र तादृशम्, आस्वादप्रकर्षं रसोत्कर्षम्, आविर्भावयति प्रकाशयति। अतएवास्य गुणत्वमित्याशयः। अत्र "कः खलु युवा धन्योऽधरं पास्यति" इति पर्य्यवसाने चिन्ताया एव धारावाहित्वात् प्रधानत्वमिति बोध्यम्।

(थ) विरोधिरसयोरेकत्र समावेशो दोष एवेति रसानां विरोधाङ्गीकारादेवाङ्गीकृतम्, सम्प्रति तत्रापि प्रतिप्रसवमाह विरोधिनोऽपीति। विरोधिनोऽपि रसस्याङ्गस्य स्मरणे केवलस्मृतौ, अथवा विरोधिनोऽपि रसस्य

(हि)मेण यथा—"अयं स रसनोत्कर्षी—" इत्यादि (२५३ पृष्ठे)। आलम्बनविच्छेदेन रतेररसात्मतया स्मर्यमाणानां तदङ्गानां शोकोद्दीपकतय करुणानुकूलता (द)।

"सरागया स्रुतघनघर्मतोयया कराहतिध्वनितपृथूरुपीठया ।
मुहुर्मुहुर्दशनविलङ्घितोष्ठया रुषा नृपाः प्रियतमयेव भेजिरे ॥" (घ)

अत्र सम्भोगशृङ्गारो वर्णनीयस्य वीरव्यभिचारिणः क्रोधस्यानुभाव-साम्येन विवक्षितः (न)।

"एकं ध्याननिमीलनान्मुकुलितप्रायं द्वितीयं पुनः
पार्वत्या वदनाम्बुजस्तनभरे सम्भोगभावालसम् ।

साम्येन वचने सादृश्येन कथने सादृश्यप्रदर्शनार्थमुपादान इत्यर्थः, तथा अङ्गिनि कस्मिंश्चित् रसे भावादौ प्रधानभावेन स्थिते सति तस्य अङ्गत्वमाप्तयोः प्राप्तयोः कयोश्चिद्विरोधिनो रसयोः, अन्योन्यं परस्परं विरो[धो] नाम दोषो न भवेत् ; किन्तु यथासम्भवं गुण एवेति भावः। आप्तयोरिति द्विवचनमनेकोपलक्षणम्।

(द) अत्रेति। आलम्बनस्य नायकस्य भूरिश्रवसः, विच्छेदेन मरणाच्चिरवियोगेन, रतेरनुराग[स्य] अरसात्मतया शृङ्गाररसरूपेणापरिणततया। एतेन "अत्र शृङ्गारः करुणस्याङ्गम्" इति चतुर्थे यदुक्त[ं] शृङ्गारपदं तदीयस्थायिभावपरम्, तथा रसरूपेण परिणतिस्थले विरोध एवेति च बोध्यम्। तद[ङ्गानां] शृङ्गारानुभावानां रसनोत्कर्षणादीनाम्, शोकोद्दीपकतया चिरविच्छेदे सति प्रियजनकृतोपकारस्म[रणस्य] नितान्तशोकोद्दीपकतायाः स्वाभाविकत्वादिति भावः, करुणानुकूलता प्रकृतकरुणरसस्य पुष्टिजनक[ता]। सम्भाव्यमानः शृङ्गारकरुणयोर्विरोधः प्रत्युत गुण एव पर्यवसित इत्याशयः।

(घ) साम्येन वचने विरोधाभावं दर्शयितुमुदाहरति सरागयेति। शिशुपालवधस्थ[ः] श्लोकोऽयम्। सरागया "रक्तौ च क्रोधरागौ" इति कविसमयात् लौहित्ययुक्तया सानुरागया च, स्रु[त]स्वेदयोगात् स्त्रवीद्रेकाच्च गलितानि घनानि निबिडानि घर्मतोयानि यस्यां यस्याश्च तया करस्य आहत्या आ[घातेन] ध्वनितं शब्दितं पृथु महत् ऊरुपीठम् ऊरुदेशो यस्यां यस्याश्च तया। वीराः क्रोधोदये निजो[रुम्] घ्नन्ति, कामोद्दीपनाय कामिन्य ऊरुदेशञ्च, आघ्नन्तीति प्रसिद्धम्। मुहुर्मुहुर्वारं वारं दशनैर्द[न्तैः] विलङ्घितो दष्टः ओष्ठो यस्यां यस्याश्च तया। रुषा क्रोधेन प्रियतमयेव नृपाः शिशुपालपक्षीया राजानो [भेजिरे] आश्रिताः।

(न) अत्रेति। वीरे वीररसे व्यभिचारिणः सञ्चारिभावरूपस्य क्रोधस्य अनुभावसाम्येन [अनुभाव]सादृश्येन विवक्षितः कविनेति विरोधिनोरपि वीरशृङ्गारयोरेकत्र समावेशो न दोषाय परस्परोपम[र्]द्दाभावादित्याशयः। अत्र वीरव्यभिचारिण इत्यनेन उत्साहस्यैव स्थायिभावत्वाद्वीर एव रसः, [क्रोधस्]तस्यैव सञ्चारी भाव इति सूचनेन क्रोधस्य स्थायिभावत्वाभावात् रुषेत्यनेन तस्योक्तावपि न स्थायिनः स्वशब्द[वाच्यत्व]दोषो न वा रौद्रो रस इति सूचितम्।

२६ । गर्भितत्वं गुणः क्वापि—(घ)

यथा—"दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सापि वदन्त एव हि वयं रोमाञ्चिताः पश्यत ।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मात् प्रादुरभूत् कथाद्भुतमिदं यत्रैव चास्तं गतम् ॥" (ङ)

अत्र "वदन्त एव" इत्यादि वाक्यं वाक्यान्तरप्रवेशात् चमत्कारातिशयं पुष्णाति (च) ।

२७ ।   पतत्प्रकर्षता तथा ॥ (छ)

तथेति क्वचिद्गुणः (ज) । यथा—"चञ्चद्भुज—" इत्यादि (३२४ पृष्ठे) । अत्र चतुर्थपादे सुकुमारार्थतया शब्दाडम्बरत्यागो गुणः (झ) ।

२८ । क्वचिदुक्तौ स्वशब्देन न दोषो व्यभिचारिणः ।
अनुभावविभावाभ्यां रचना यत्र नोचिता ॥ (ञ)

(ग) फलितार्थमाह एवञ्चेति । "अन्यास्ता" इत्यादौ वाक्यान्तरेण पुनरुपादानात् समाप्तपुनरात्तत्वदोषाभावे चेत्यर्थः । वाक्यान्तरस्य पुनरुपादाने तु न समाप्तपुनरात्तत्वमित्यर्थः । अतएवास्माभिस्तत्र तथैव लक्षणमभिहितम् ।

(घ) गर्भितत्वमिति । क्वापि चमत्कारातिशयजननस्थले गर्भितत्वं नाम प्रागुक्तो दोषो गुण एव ।

(ङ) दिङ्मातङ्गेति । प्रभाकरोक्तोऽयं श्लोकः । दिङ्मातङ्गघटया दिग्दन्तिसमूहेन विभक्ता नियमिताः चत्वारः आघाटाः सीमानो यस्याः सा तथोक्ता मही साध्यते आयत्तीक्रियते ; सिद्धापि समस्तराजगणविजयेन आयत्तीभूतापि सा मही, इति वदन्त एव हि वयम् आश्चर्यरसेन रोमाञ्चिता जाता इति यूयं पश्यत ; विप्राय कश्यपाय प्रतिपाद्यते दीयते । अपरं किं ब्रूम इति शेषः । यस्मात् इदं कथाद्भुतम् उक्तवृत्तान्तरूपमाश्चर्यं प्रादुरभूत्, यत्रैव च अस्तं गतम्, यस्मात् परं वीरो दाता च नाभूत् न भविष्यति चेत्यर्थः, तस्मै रामाय भार्गवाय नमः ।

(च) अत्रेति । वाक्यान्तरप्रवेशात् "सिद्धा सापि विप्राय प्रतिपाद्यते" इति वाक्यमध्ये प्रवेशात्, अत्रत्यदानवीररसस्य चमत्कारातिशयं पुष्णाति वक्तुरात्मनो विस्मयातिशयद्योतनेन द्योतयति ।

(छ) पतदिति । पतत्प्रकर्षता नाम दोषः, तथा गुण इत्यर्थः ।

(ज) तथेतीति । क्वचित् अर्थानुरूपशब्दस्थले ।

(झ) अत्रेति । सुकुमारार्थतया प्रियतमाकेशबन्धनरूपकोमलविषयाभिधेयतया । गुण इति । शब्दकोमलतया अर्थस्यापि कोमलताप्रतीतेरिति भावः ।

यत्र अनुभावविभावमुखेन प्रतिपादने विशदप्रतीतिर्नास्ति, यत्र च विभावानुभावकृतपुष्टिराहित्यमेवानुगुणम्, तत्र व्यभिचारिणः स्वशब्देनोक्तौ न दोषः (ट)। यथा—

"औत्सुक्येन कृतत्वरा सहभुवा व्यावर्त्तमाना ह्रिया
तैस्तैर्बन्धुवधूजनस्य वचनैर्नीताभिमुख्यं पुनः।
दृष्ट्वाग्रे वरमात्तसाध्वसरसा गौरी नवे सङ्गमे
संरोहत्पुलका हरेण हसता श्लिष्टा शिवायास्तु वः॥" (ठ)

अत्रौत्सुक्यस्य त्वरारूपानुभावमुखेन प्रतिपादने सङ्गमे (१) न झटिति प्रतीतिः, त्वराया भयादिनापि सम्भवात्, ह्रियोऽनुभावस्य च व्यावर्त्तनस्य (२) कोपादिनापि सम्भवात् (ड)। साध्वस-हासयोस्तु

(ञ) यथासम्भवं शब्दार्थदोषान् प्रतिप्रसूयेदानीं रसदोषानपि तथैव प्रतिप्रसूते क्वचिदिति। क्वचित् व्यभिचारिणः सञ्चारिभावस्य स्वशब्देनोक्तौ न दोषः व्यभिचारिणः स्वशब्दवाच्यत्वं नाम दोषो न भवति गुणोऽपि न भवतीत्यर्थः। क्वचिदिति कुत्रेत्याह अन्विति। यत्र स्थले अनुभावविभावाभ्यां केवलानुभावविभावबोधकैः शब्दैरित्यर्थः, रचना ग्रथनं नोचिता अभिप्रेतार्थप्रत्यायनासम्भवात् न सम्भवपरा।

(ट) यत्रेति। अनुभावविभावमुखेन केवलानुभावविभावबोधकशब्दद्वारा, प्रतिपादने कवेरभिप्रेतार्थप्रतिपादनचेष्टायाम्, विशदप्रतीतिर्नास्ति सहृदयानां सुस्पष्टावगमो न स्यादित्यर्थः। अनुगुणं रसादिप्रतीतेरनुकूलम्।

(ठ) औत्सुक्येनेति। रत्नावलीनाटिकाया एको नान्दीश्लोकोऽयम्। नवे सङ्गमे पत्या सह नवसङ्गमं प्रति औत्सुक्येन उत्कण्ठया कृता त्वरा यस्याः सा सहभुवा सहजया ह्रिया लज्जया व्यावर्त्तमाना पुनर्निवर्त्तमाना, बन्धुवधूजनस्य भ्रातृभार्य्यादिवर्गस्य तैस्तैर्वचनैः, "लज्जां परिहर" "गृहं प्रविश" इत्यादिवाक्यैः, पुनरपि आभिमुख्यं वासगृहगमनायाभिमुखत्वम्, नीता प्रापिता, अग्रे सम्मुखदेशे वरं दृष्ट्वा आत्तः प्राप्तः साध्वसरसो भयं यया सा, हसता च तेन वरेण हरेण श्लिष्टा आलिङ्गिता, तेन च संरोहत्पुलका उत्पद्यमानरोमाञ्चा, गौरी पार्वती, वो युष्माकं शिवाय मङ्गलाय अस्तु।

(ड) उदाहृतपद्ये औत्सुक्य-ह्री-साध्वस-हासाश्चत्वार एव व्यभिचारिभावाः। तेषामौत्सुक्यह्रियौ "निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः"—इत्यादिना परिगणिते, साध्वसहासौ तु "शृङ्गारवीरयोर्हासः" इत्यादिना व्यभिचारिभावत्वेन गृहीतौ। ते चात्र सर्व एव स्वशब्देनोक्ता इति "रसस्योक्तिः स्वशब्देन स्थायिसञ्चारिणोरपि" इति प्रागुक्तनियमेन चत्वार एव व्यभिचारिणः स्वशब्दोक्तिदोषाः प्रसक्तास्तेषां प्रतिप्रसवाय युक्तिं दर्शयितुमाह अत्रेति। त्वरारूपानुभावमुखेन स्वकार्य्यत्वरारूपानुभावद्वारा, प्रतिपादने प्रत्यायनचेष्टायाम्, सङ्गमे हरेण सह सङ्गमविषये, न औत्सुक्यस्य झटिति प्रतीतिः। भयादिना इत्यादिशब्देन हर्षादीनां ग्रहणम्। आद्योपान्तपर्य्यालोचने तु

(१) क्वचित् सङ्गमे इति पाठो न दृश्यते। (२) व्यावर्त्तमानस्य इति क्वचित् पाठः।

अन्यद्दूरविकृष्टचाप-मदन-क्रोधानलोद्दीपितं
शम्भोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥" (प)

अत्र शान्त-शृङ्गार-रौद्र-रसपरिपुष्टा भगवद्विषया रतिः (फ) । यथा वा—(ब)

"क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोऽंशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण ।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥" (भ)

अत्र कविगता भगवद्विषया रतिः प्रधानम् । तस्याः परिपोषकतया भगवतस्त्रिपुरध्वंसं प्रति उत्साहस्यापरिपुष्टतया रसपदवीमप्राप्ततया भावमात्रस्य करुणोऽङ्गम् । तस्य च 'कामीव' इति साम्यबलादायातः शृङ्गारः (म) । एवञ्चाविश्रान्तिधामतया करुणस्याङ्गत्वेनेति द्वयोरपि करुणशृङ्गारयो-

---

(प) अङ्गिनि भावे अङ्गत्वं प्राप्तानां रसानां परस्परविरोधाभावं दर्शयितुमुदाहरति एकमिति । एकं नेत्रम्, ध्यानेन निमीलनात् इन्द्रियाणां स्वस्वकार्य्याचमीकृतत्वात् मुकुलितप्रायं मुद्रितप्रायम्, द्वितीयं पुनर्नेत्रम्, पार्वत्या वदनाम्बुजेन युक्तः स्तनभरः स्तनयोर्विशालतेति स तथोक्तस्तस्मिन् । मध्यपदलोपी समासः, सम्भोगभावेन चुम्बनमर्द्दनाद्यभिलाषेण अलसं निश्चलम् । अन्यत् तृतीयं नेत्रम्, दूरविकृष्टं स्वप्रहाराय पूर्णमाकृष्टं चापं धनुर्येन तस्मिन् मदने क्रोधानलेन उद्दीपितम् । अतएव समाधिसमये योगकाले भिन्नरसं विभिन्नप्रकाररसत्रयव्यञ्जकं शम्भोर्नेत्रत्रयं वो युष्मान् पातु रक्षतु ।

(फ) अत्रेति । प्रथमे पादे शान्तः, द्वितीये शृङ्गारः, तृतीये च रौद्रो रसः । तथा चात्र शम्भुविषयको रतिभावः प्रधानम्, शान्तादयो रसास्तु तदङ्गतां प्राप्ता इति "गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात्" इति पूर्वमीमांसासूत्रन्यायेन तेषामङ्गभूतरसानां सम्भाव्यमानः परस्परविरोधः परस्परसम्बन्धाभावादसम्पन्न इति न दोष इत्याशयः ।

(ब) परम्परया अङ्गत्वं प्राप्तयोरपि रसयोर्न विरोध इति दर्शयितुमाह यथा वेति ।

(भ) क्षिप्त इति । अमरुशतकस्य श्लोकोऽयम् । साश्रूणि एकत्र शोकादन्यत्र ईर्ष्यामानात् सजलानि नेत्रोत्पलानि यासां ताभिः त्रिपुरयुवतिभिः, यः शाम्भवः शराग्निः आर्द्रापराधः सद्यः कृतापराधः कामी पतिरिव, हस्तावलग्नः दाहार्थं मानभञ्जनार्थञ्च हस्तेषु संसक्तः सन्नेव क्षिप्तो दूरमपसारितः, प्रसभमभिहतोऽपि बलेन निराकृतोऽपि अंशुकान्तं वसनप्रान्तम् आददानो गृह्णन्, दाहार्थं चुम्बनार्थञ्च केशेषु गृह्णन् सन्नेव अपास्तस्त्यक्तः, चरणनिपतितः सन्नपि सम्भ्रमेण त्वरया स्वगौरवेण च न ईक्षितो न दृष्टः, आलिङ्गन् सर्वाङ्गं व्याप्नुवन् आश्लिष्यंश्च सन्नेव अवधूतः दूरापसरणेन परित्यक्तः ; स शम्भोरयं शाम्भवः शराग्निः, वो युष्माकं दुरितं पापं दहतु नाशयतु ।

(म) अविरोधमुपपादयितुमाह अत्रेति । भगवद्विषया शम्भुगोचरा, रतिरनुरागः प्रधानम्, तस्या एव-

भगवदुत्साहपरिपुष्टतद्विषयरतिभावास्वादप्रकर्षकतया यौगपद्यसद्भावादङ्गत्वेन न विरोधः (य) ।

ननु समूहालम्बनात्मकपूर्णघनानन्दस्वरूपस्य रसस्य तादृशेनेतररसेन कथं विरोधः सम्भावनीयः ? एकवाक्ये निवेशप्रादुर्भावयोर्यौगपद्यविरहेण परस्परोपमर्द्दकत्वानुपपत्तेः (र) । नाप्यङ्गाङ्गिभावः; द्वयोरपि पूर्णतया स्वातन्त्र्येण विश्रान्तेः (ल) । सत्यमुक्तम् । अतएवात्र प्रधानेतरेषु रसेषु

विश्रामधामत्वादिति भावः । परिपोषकतया अवस्थितस्येति शेषः, उत्साहस्येत्यन्वयः । अपरिपुष्टतया विभावादिभिरकृतपरिपुष्टिकतया । अयन्तु रसपदवीमप्राप्ततां प्रति हेतुः । रसपदवीं वीररसत्वम् । अप्राप्ततयेति च भावमात्रत्वं प्रति हेतुः । भावमात्रस्य केवलभावरूपेण विद्यमानस्य उत्साहस्येति पूर्वेणान्वयः; "उद्बुद्धमात्रः स्थायी च भाव इत्यभिधीयते" इति नियमादिति भावः । तस्य च करुणस्य सम्बन्धे । साम्यबलात् कामिसादृश्यप्रभावात्, आयातौ बुद्धावुपस्थितः ।

(य) एवञ्चेति । साम्यबलात् शृङ्गारस्य आयातत्वे चेत्यर्थः । अविश्रान्तिधामतया आकाङ्क्षाया अनिवृत्तेः स्थानतया । करुणस्य अङ्गिनः सम्बन्धे शृङ्गारस्य अङ्गत्वे चेत्यर्थः शृङ्गारस्य करुणोपजीवित्वादिति भावः । भगवतः शम्भोरुत्साहेन परिपुष्टो यस्तद्विषयरतिभावः कवेः शम्भुविषयकानुरागाख्यो भावः स एव आस्वादो रसंप्रायस्तस्य प्रकर्षकतया पुष्टिजनकत्वेनोत्कर्षजनकतया, यौगपद्यसम्भवात् युगपदेवावस्थानसम्भवात् । तथा चात्र कवेः शम्भुविषया रतिः प्रधानम्, शम्भोरुत्साहस्तु तदङ्गम्, करुणश्च तस्याप्युत्साहस्याङ्गम्, शृङ्गारश्च पुनः तस्यापि करुणस्याङ्गमिति परम्परया अङ्गत्वप्राप्तयोरपि परस्परविरोधिनोः करुणशृङ्गारयोरङ्गत्वादेव न विरोध इति सरलार्थः ।

(र) रसानां परस्परविरोधस्यैवासम्भवेन तद्दोषत्वस्याप्यसम्भवात् तत्प्रतिप्रसवोऽपि निरर्थक एवेत्याशङ्कते नन्विति । समूहालम्बनं युगपद्विभावादिबहुविषयकज्ञानमेव आत्मा स्वरूपं यस्य स चासौ पूर्णः अखण्डः आनन्दान्तरेणासम्मिश्रः घनो निविडश्च आनन्दः स्वरूपं यस्य स चेति तस्य । तादृशेन समूहालम्बनात्मकपूर्णघनानन्दस्वरूपेण । निवेशप्रादुर्भावयोरवस्थानोत्पत्त्योः, यौगपद्यविरहेण एककालीनत्वाभावेन, परस्परोपमर्द्दकत्वानुपपत्तेः अन्योन्यपरिपुष्टप्रतिबन्धकत्वासङ्गतेः । तथा च विरोधो नाम परस्परबाध्यबाधकत्वम्, तच्च एकस्मिन्नेव काले एकस्मिन्नेव च स्थाने अवस्थितानामुत्पन्नानां वा सम्भवति । तेन रसानां ज्ञानानन्दरूपत्वात् क्षणिकतया "अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते" इति सिद्धान्तेन च एकस्मिन्नेव वाक्ये युगपदवस्थानोत्पत्त्योरसम्भवेन निरुक्तविरोधासम्भव इत्याशयः ।

(ल) रसानां परस्पराङ्गाङ्गिभावानुपपत्त्या तेन तद्विरोधदोषप्रतिप्रसवस्याप्यनुपपत्तिरित्याशङ्कते नापीति । अङ्गाङ्गिभावो रसानामिति शेषः । द्वयोरपि रसयोः । द्विशब्दोऽत्रानेकोपलक्षणम् । पूर्णतया अखण्डतया, स्वातन्त्र्येण स्वस्वप्रधानभावेन, विश्रान्तेरवस्थितेः । तथा च प्रधानमङ्गि अप्रधानञ्चाङ्गम् । तेन प्रधानाप्रधानयोरेव परस्परोपकार्य्योपकारकभावे अङ्गाङ्गिभावः सम्पद्यते । अत्र तु उभयोरेव प्रधानत्वात् कथमङ्गाङ्गिभावः, कथं वा तेन तद्विरोधसमाधानमित्यभिप्रायः ।

स्वातन्त्र्यविश्रामराहित्यात् पूर्णरसभावमात्राच्च विलक्षणतया सञ्चारिरसनाम्ना व्यपदेशः प्राच्यानाम् (व)। अस्मत्पितामहानुज-कविपण्डित-मुख्य-श्रीचण्डीदासपादानान्तु खण्डरसनाम्ना (श)। यदाहुः—

"अङ्गं बाध्योऽथ संसर्गी यद्यङ्गी स्याद्रसान्तरे।
नास्वाद्यते समग्रं तत्ततः खण्डरसः स्मृतः ॥" इति (ष)।

ननु "आद्यः करुण-बीभत्स-रौद्र-वीर-भयानकैः" इत्युक्तनयेन विरोधिनोर्वीरशृङ्गारयोः कथमेकत्र—(स)

"कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरस्फारोड्डमरपुलकं वक्त्रकमलम् ।

(व) उक्तानुपपत्तिमङ्गीकृत्य समाधत्ते सत्यमिति। अतएव उक्तरूपानुपपत्तेरेव, अत्र ईदृशि अनेकरसानामेकत्रावस्थितिस्थले। इदमत्रावधेयम्—वाक्यार्थाकाङ्क्षानिवृत्तिपर्य्यन्तस्थायी रसः प्रधानः, तत्पूर्वमेव विरतश्चाप्रधान इति। स्वातन्त्र्यविश्रामराहित्यात् स्वस्य प्रधानभावेनावस्थानाभावात्। अयन्तु विलक्षणतां प्रति हेतुः। पूर्णरसभावमात्रात् केवलपूर्णरसत्वमपेक्ष्य विलक्षणतया विभिन्नरूपतया। अङ्गरसेषु केवलपूर्णत्वांश एव वैलक्षण्यम्, न पुनः समूहालम्बनत्वघनानन्दत्वांशयोरपीति सूचयितुमत्र मात्रपदमुपात्तमिति बोध्यम्। व्यपदेशो नाम, प्राच्यानां प्राचीनानाम्। अत्रायमभिप्रायः—प्राच्यानां यथा व्यभिचारि उन्मग्नः सन् स्थायिभावमुपकृत्य निमग्नो भवतीति स्थायिन उपकाराय सञ्चरणात् सञ्चारिभाव इति व्यपदिश्यते, तथा अङ्गरसोऽपि उत्पन्नः सन् प्रधानरसमुपकृत्य तत्पूर्वमेव विरतो भवतीति प्रधानरसस्योपकाराय सञ्चरणात् सञ्चारिरस इति व्यपदिश्यते।

(श) अस्मदिति। खण्डरसनाम्ना प्रधानेतरेषु रसेषु व्यपदेश इति पूर्वेणान्वयः।

(ष) अङ्गमिति। अङ्गी अन्यत्र प्रधानोऽपि रसः, रसान्तरे अन्यत्र अन्यस्मिन् रसे यदि अङ्गमुपकारितया अप्रधानं स्यात्, अथवा, बाध्यो विरोध्योऽपि केवलस्मृतिविषयतया अवस्थितः स्यात्, अथवा संसर्गी अविरोधितया अनुपकारितया च सम्मिलितः स्यात्; तदा स समग्रं पूर्णं यथा स्यात्तथा न आस्वाद्यते न अनुभूयते; ततः कारणात् स खण्डरसः स्मृतः। समग्रास्वादाभावेनाखण्डत्वाभावात् खण्डत्वमेवेति खण्डरस इति व्यपदेश एव युक्त इत्याशयः। तत्र अङ्गं यथा—"एकं ध्याननिमीलनात्" इत्यादौ शान्तरसाङ्गकं देवविषयरतेरङ्गम्। "अयं स रसनोत्कर्षी" इत्यादौ शृङ्गारः करुणस्य बाध्यः। "कपोले जानक्याः" इत्यादौ शृङ्गारो वीरस्य संसर्गी। त एते शान्तादयः प्राचीनमते सञ्चारिरसाः, चण्डीदासमते तु खण्डरसा इति बोध्यम्।

(स) अथ "विरोधिनोऽपि स्मरणे" इत्यादिना केवलस्मरणादिस्थलवितये विरोधसमाधानं नोपपद्यते, तदधिकस्याप्यावश्यकत्वादित्याशङ्कते नन्विति। एकत्र "इत्यादौ समावेश" इति परेणान्वयः।

मुहुः पश्यन् शृण्वन् रजनिचरसेनाकलकलं
जटाजूटग्रन्थिं द्रढ़यति रघूणां परिवृढः ॥" (छ)

इत्यादौ समावेशः ?। अत्रोच्यते—इह खलु रसानां विरोधितायाः अविरोधितायाश्च त्रिधा व्यवस्था। कयोश्चिदालम्बनैक्येन, कयोश्चिदाश्रयैक्येन, कयोश्चिन्नैरन्तर्य्येण इति (च)। तत्र वीरशृङ्गारयोरालम्बनैक्येन विरोधः, (क) तथा हास्य-रौद्र-बीभत्सैः सम्भोगस्य, (ख) वीर-करुण-रौद्रादिभिर्विप्रलम्भस्य (ग)। आलम्बनैक्येन आश्रयैक्येन च वीरभयानकयोः, (घ) नैरन्तर्य्यविभावैक्याभ्यां शान्तशृङ्गारयोः (ङ)। त्रिधाऽपि अविरोधः—वीरस्याद्भुतरौद्राभ्याम्, शृङ्गारस्याद्भुतेन, भयानकस्य बीभत्सेनेति (च)।

(छ) कपोल इति। रघूणां परिवृढा राघवश्रेष्ठो रामः, करिकलभस्य हस्तिशावकस्य दन्तद्युतिं दशनकान्तिं मुष्णाति अपहरतीति तस्मिन् अत्यन्तनिर्म्मले इत्यर्थः, कपोले कपोलावच्छेदे अरैव कामावेगेन अरा विकसिता: स्फारोद्गमरा: पीवरोच्चाः पुलका रोमाञ्चा यस्मिन् तत्तादृशम्, जानक्याः सीतायाः वक्त्रकमलं मुखपद्मं मुहुर्वारं वारं पश्यन्, इतश्च रजनिचरसेनायाः खरदूषणादिसैन्यस्य कलकलं कोलाहलम्, शृण्वन् सन् जटानां जूटस्य समूहस्य ग्रन्थिं द्रढ़यति युद्धोद्योगाय दृढ़भावेन बध्नाति।

अत्र शृङ्गारे सीता आलम्बनविभावः, तस्यास्तादृशः कपोल उद्दीपनविभावः, वक्त्रकमलदर्शनमनुभावः रतिश्च स्थायी भावः। वीरे तु रजनिचरसेना आलम्बनविभावः, तदीयकोलाहल उद्दीपनविभावः। जटाजूटग्रन्थिदृढ़ीकरणमनुभावः। उत्साहश्च स्थायी भाव इति बोध्यम्।

(च) इदानीं समाधानमाह अत्रेति। उच्यते सिद्धान्त इति शेषः। व्यवस्था नियमः। आश्रयैक्येन नायकैक्येन। नैरन्तर्य्येण नैकट्येन।

(क) तत्रेति। तेष्वपि विरोधिरसेषु मध्ये इत्यर्थः। वीरशृङ्गारयोरिति एकस्मिन्नालम्बने युगपदुत्साहरत्योरसम्भवादिति भावः।

(ख) तथेति। सम्भोगस्य सम्भोगशृङ्गारस्य। तथा आलम्बनैक्येन विरोध इत्यर्थः। सम्भोगकाले हासक्रोधजुगुप्सानामनुदयादित्याशयः। विप्रलम्भकाले तु हासः सम्भवतीति सम्भोगस्येत्युक्तम्।

(ग) वीरेति। आदिपदाद्भयानकबीभत्सयोर्ग्रहणम्। विप्रलम्भस्य शृङ्गारस्य आलम्बनैक्येन विरोध इत्यनुषङ्गः। एकस्मिन्नेवालम्बने अनुरागकाले उत्साहशोकक्रोधभयजुगुप्सानामुत्पत्त्यभावादित्यभिप्रायः।

(घ) आलेति। एकस्मिन्नेव काले एकं प्रति एकस्य उत्साहभययोरनुदयादिति भावः।

(ङ) नैरेति। नैरन्तर्य्यविभावैक्याभ्यां नैकट्येन आलम्बनैक्येन चेत्यर्थः। शमरत्योरव्यवधाने एकस्मिन्नेव चालम्बने उत्पत्त्योरसम्भवादित्यभिप्रायः। अत्र आश्रयैक्येनापि शान्तशृङ्गारयोर्विरोध इति बोध्यम्।

तेनात्र वीरशृङ्गारयोर्भिन्नालम्बनत्वान्न विरोधः (छ)।

एवञ्च वीरस्य नायकनिष्ठत्वेन भयानकस्य प्रतिनायकनिष्ठत्वेन निबन्धे भिन्नाश्रयत्वे न विरोधः (ज)। यच्च नागानन्दे प्रशमाश्रयस्यापि जीमूतवाहनस्य मलयवत्यनुरागो दर्शितः, तत्र "अहो गीतम्? अहो वादित्रम्?" इत्यद्भुतस्यान्तरा निवेशनान्नैरन्तर्याभावान्न शान्तशृङ्गारयोर्विरोधः (झ)। एवमन्यदपि विज्ञेयम् (ञ)।

"पाण्डु क्षामं वदनम्" इत्यादौ च (१७९ पृष्ठे) पाण्डुतादीनामङ्गभावः करुणविप्रलम्भेऽपीति न विरोधः (ट)।

(च) विधापीति। आलम्बनैक्येन आश्रयैक्येन नैरन्तर्येण चेत्यर्थः वीरस्याद्भुतरौद्राभ्यामविरोध एकत्र समावेशसम्भवः, एकस्मिन्नेव जने एकस्यैव जनस्य क्रमश उत्साहविस्मयक्रोधानां सम्भवादित्याशयः। शृङ्गारस्य अद्भुतेन सहाविरोधः, एकस्यामेव नायिकायाम् एकस्यैव नायकस्य युगपदेवानुराग रूपादिजनितरतिविस्मययोरुत्पत्तिदर्शनादित्यभिप्रायः। भयानकस्य बीभत्सेन सहाविरोधः, एकस्मिन्नेव पिशाचादौ एकस्यैव एकदैव च भयजुगुप्सयोरुदयादिति भावः।

(छ) तेनेति। उक्तव्यवस्थानां युक्तियुक्तत्वेनेत्यर्थः। अत्र "कपोले जानक्याः" इत्याद्युदाहृतपद्ये। भिन्नालम्बनत्वादिति। तथा च वीरे उत्साहस्यालम्बनं रजनिचरसेना शृङ्गारे; रतेरालम्बनञ्च सीतेति भिन्नालम्बनद्वये उत्साहरत्योः क्रमेणोत्पत्तौ बाधाभावादिति भावः।

(ज) आश्रयैक्येन वीरभयानकयोर्विरोध इत्युक्तम्, इदानीमाश्रयभेदेन तु तयोर्न विरोध इति दर्शयितुमाह एवञ्चेति। आश्रयैक्येनैव वीरभयानकयोर्विरोधस्य युक्तत्वे चेत्यर्थः। वीरस्य वीररसघटकोत्साहस्य। भयानकस्य भयानकरसघटकभयस्य। भिन्नाश्रयत्वे सतीत्यर्थः। एतेनान्यत्रापि एवंविधविषये न विरोध इति सूचितम्।

(झ) ननु शान्तशृङ्गारयोर्विरोधे सति नागानन्दनाटके एकस्यैव नायकस्य जीमूतवाहनस्य शान्तशृङ्गारौ कथमुपपद्येते इत्याह यच्चेति। प्रशमाश्रयस्यापि शान्तरसघटकशमगुणवतोऽपि। अद्भुतस्य अद्भुतरसस्य, अन्तरा शान्तशृङ्गारयोर्मध्ये। ध्वनिकारोऽप्येवमेवाह स्म। यथा—

"एकाश्रयत्वे निर्दोषो नैरन्तर्ये विरोधवान्। रसान्तरव्यवधिना रसो व्यङ्ग्यः सुमेधसा॥"

(ञ) एवमिति। अन्यदपि अविरोधित्वम्। यथा—शृङ्गारस्य नायकनिष्ठत्वे वीरस्य च प्रतिनायकनिष्ठत्वे न विरोध इत्यादि।

(ट) ननु "पाण्डु क्षामम्" इत्यादौ करुणरसानुभावरूपाणां कथं शृङ्गारेऽप्यनुभावरूपेण प्रवेशः, अङ्गिनोः करुणशृङ्गारयोर्विरोधेन तदङ्गानामपि विरोधौचित्यादित्याह पाण्ड्विति। अङ्गभावोऽङ्गत्वम्। न केवलं करुणे, करुणविप्रलम्भेऽपीत्यर्थः। एतेन विरोधिरसयोः साधारणाङ्गानां समावेशे न विरोधः, किन्तु असाधारणाङ्गानां समावेश एव विरोध इति सूचितम्।

३१ । अनुकारे च सर्वेषां दोषाणां नैव दोषता ॥ (ठ)

सर्वेषां दुःश्रवत्वप्रभृतीनाम् । यथा—

"एष दुश्चयवनं नौमीत्यादि जल्पति कश्चन ।" (ड)

अत्र दुश्चयवनशब्दोऽप्रयुक्तः (ढ) ।

३२ । अन्येषामपि दोषाणामित्यौचित्यान्मनीषिभिः ।

अदोषता च गुणता ज्ञेया चानुभयात्मता ॥ (ण)

(ठ) अन्विति । अनुकारे अनुकरणे केनचिदुक्तस्य शब्दस्य अविकलमेव पुनरुक्तावित्यर्थः, सर्वेषामेव दुःश्रवत्वादीनां दोषाणां नैव दोषता नापि गुणतेत्यपि बोध्यम्, अत्र रसादीनामसम्भवेन तदपकर्षकत्वोत्कर्षकत्वयोरुभयोरेवासम्भवादित्याशयः । एवञ्च अनुकरणशब्दादावदोषत्वम्, अनुकार्य्यशब्दादौ तु नित्यदोषानित्यदोषत्वव्यवस्थेत्यवधेयम् ।

(ड) एष इति । "शिवं शेविति कश्चिच्च ब्रवीत्येष पुनः पुनः ॥" इति तत्पूरितपरार्द्धम् ।

(ढ) अत्रेति । दुश्चयवनशब्द इन्द्रार्थे कोषादौ प्रसिद्धोऽपि कविभिरनादृतत्वादप्रयुक्त इति कथ्यमानोऽप्यप्रयुक्ततादोषः, अत्रानुकरणत्वचिन्तादिदोष एवेति भावः । एवं सिवधातोरात्मनेपदित्वात् "शिवं सेव" इत्यत्रानुकार्य्यस्थले जातोऽपि च्युतसंस्कारतादोषः पूरितप्रकारे अनुकरणत्वचिन्तादिदोष एवेति बोध्यम् ।

एवम्—"चणं विश्रम्यतां जाल्म ! स्कन्धस्ते यदि बाधति ।

न तथा बाधते स्कन्धो यथा बाधति बाधते ॥"

अत्र बाधधातोरात्मनेपदित्वेऽपि बाधतीति परस्मैपदप्रयोगादनुकार्य्यगतत्वाच्च पूर्वार्द्धे च्युतसंस्कारतादोष एव । उत्तरार्द्धे तु बाधतीति प्रयोगस्य पूर्वार्द्धोक्तबाधतीति स्वरूपाविर्भावकतया अनुकरणजातीयत्वान्न दोषः ।

अत्र "शब्दस्यानुकरणे च्युतसंस्कारस्यादोषत्वं यथा—"एश्ये च गवित्याह सुत्रामाणं यजेति च ।" अत्र प्रथमे पादे गोशब्दस्य निर्विभक्तिकतया च्युतसंस्कारत्वम्" इति तानचरणः । अहो ! तदानीवाथ व्याकरणविश्वमस्तकं वागीशस्य । तथा च 'गवित्याह' इत्यादौ विभक्त्यर्थ एव इतिशब्दप्रयोगादुक्तार्थतया न पुनर्विभक्तिः; इदमेवोदाहृतमपि च कातन्त्रपरिशिष्टे श्रीपतिना—"सम्बुद्धौदिति किं गवित्ययमाह ।" तदीयटीकाकृता गोपीनाथेनापि अस्मदुक्तानुरूपमेव सिद्धान्तितम् । प्रयोगाश्चैवं भामतीकारादीनां सहस्रश एव परिलक्ष्यन्ते—'स्वाभाविकेति' 'शिवेति' इत्यादयः । अतः कथम् 'गवित्याह' इत्यत्र निर्विभक्तिकतया च्युतसंस्कारतादोषप्रसङ्ग इति सुधीभिर्विभावनीयम् ।

(ण) अन्येषामिति । इति एवम्, औचित्यादौचित्यानुसारात् युक्त्यनुसारादित्यर्थः. मनीषिभिः अन्येषामपि दोषाणां दोषतया प्रागभिहितानाम्, अदोषता क्वचित् प्रसक्तदोषत्ववैपरीत्येनैव गुणता, क्वचित् स्वभावत एव गुणता, क्वचिच्च अनुभयात्मता दोषत्वगुणत्वोभयशून्यरूपता स्वमतेत्यर्थः ज्ञेया, सर्वत्रैव युक्तिवशादेव दोषगुणादीनां व्यवस्थितेरिति भावः ।

अनुभयात्मता अदोषगुणात्मता (१) (त) ।

इति साहित्यदर्पणे दोषनिरूपणो नाम

सप्तमः परिच्छेदः ॥०॥

—०—

तत्र प्रसक्तदोषत्ववैपरीत्येन गुणता यथा मम—

"रावणे द्रुतमाक्रान्ते देवविद्रावणे रणे । खचक्रे च गतेऽधावत् शूलमादाय माधवः ॥"

अत्र चक्रपाणेः शूलग्रहणस्य अप्रसिद्धत्वेन प्रसक्तोऽपि ख्यातिविरुद्धतादोषस्तत्सम्भ्रमस्य समुन्नतादिद्योतनेन प्रत्युत गुण एव ।

स्वभावत एव दोषस्य गुणता यथा शिशुपालवधे—

"व्रजतः क्व तात ! वजसीति परिचयगतार्थमस्फुटम् ।

धैर्यमभिनदुदितं शिशुना जननीनिभर्त्सनविवृद्धमन्युना ॥"

अत्र "वज व्रज गतौ" इति वजधातोरपि गमनार्थे पाठादप्रसक्त एव अवाचकत्वदोषः ; किन्तु व्रजसीति सरेफोच्चारणासमर्थेन शिशुना तत्स्थले एव 'वजसि' इत्युच्चारितत्वात् सम्भाव्यमानोऽवाचकत्वदोषः शिशोरस्फुटवाक्यतासूचनेन चमत्कारिताविशेषजननात् स्वभावत एव गुणः ।

अनुभयात्मता यथा मम—"एकादश्यां द्विजो भुङ्क्ते भक्ष्यकीटरुजाकुलः ।"

अत्र "एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि" इति स्मृतिशास्त्रविरोधेन प्रसक्तस्य विद्याविरुद्धतादोषस्य भस्मकीटरोगे भोजनाभावे जीवननाशसम्भवाददोषता, कथमप्युत्कर्षाजननाच्च अगुणता । इत्यसम्यवाप्यनुसन्धेयम् ।

(त) उभयशब्दाभिधेयं स्पष्टयितुं व्याचष्टे अन्विति ।

इति महामहोपाध्याय-भारताचार्य्य-श्रीहरिदाससिद्धान्तवागीशभट्टाचार्य्यविरचितायां साहित्यदर्पण-टीकायां कुसुमप्रतिमायां सप्तमः परिच्छेदः ॥०॥

—०—

(१) अनुभयता अदोषगुणता इति पाठान्तरम् ।

अष्टमः परिच्छेदः ।

—:०:—

गुणानाह—(क)

१ । रसस्याङ्गित्वमाप्तस्य धर्म्माः शौर्य्यादयो यथा ।

गुणाः—(ख)

यथा खल्वङ्गित्वमाप्तस्यात्मन उत्कर्षहेतुत्वात् शौर्य्यादयो गुणशब्दवाच्याः, तथा काव्ये अङ्गित्वमाप्तस्य रसस्य धर्म्माः स्वरूपविशेषा माधुर्य्यादयोऽपि स्वसमर्पकपदसन्दर्भस्य काव्यव्यपदेशस्यौपयिकानुगुण्यभाज इत्यर्थः (ग) यथा चैषां रसमात्रस्य धर्म्मत्वं तथा दर्शितमेव (घ) ।

(क) "उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः" इत्युद्देशक्रमेण के नाम गुणा इत्याकाङ्क्षायां प्रस्तौत्येव गुणानाहेत्यर्थः । सामान्यतो गुणान् लक्षयतीति तात्पर्य्यम् ।

(ख) रसस्येति । यथा अङ्गित्वमाप्तस्य शरीरित्वं प्राप्तस्य आत्मनः शौर्य्यम् आदिशब्दादौदार्य्यादयो गुणाः तथा अङ्गित्वमाप्तस्य शब्दार्थादिसमुदायमध्ये प्राधान्यं प्राप्तस्य रसस्य धर्म्मा गुणा उच्यन्ते इत्यत्रापि रस्यत इति व्युत्पत्त्या रसपदेन भावादयोऽपि गृह्यन्त इति बोध्यम् । तथा च स्थिरत्वे सति रसादेः साक्षादुत्कर्षजनकधर्म्मत्वं गुणत्वमिति लक्षणम् । अत्र स्थिरत्वे सतीत्यभिधानादस्थिरेषु रसवदाद्यलङ्कारेषु, साक्षादित्यभिधानात् परम्परयोत्कर्षजनिकासु रीतिषु, तदुभयाभिधानाच्च शब्दार्थालङ्कारेषु नातिव्याप्तिः, रसादीनामुत्कर्षजनकत्वाभावाच्च रसत्वादौ नातिप्रसङ्गः । एतेन गुणानां रसधर्म्मत्वमपि प्रतिपादितम् ।

(ग) यथेति । अङ्गिशब्दश्लेषादङ्गित्वमिति उपमाने उपमेये च योजयति अङ्गित्वमाप्तस्यात्मन इति अङ्गित्वमाप्तस्य रसस्येति च । स्वं रसं समर्पयन्ति व्यञ्जन्तीति स्वसमर्पकाणि यानि पदानि तेषां सन्दर्भः समूहस्य रसव्यञ्जकवाक्यस्येत्यर्थः यः काव्यव्यपदेशस्तस्य औपयिकमुपायभूतमुपयोगीति यावत् यदानुगुण्यमनुकूलता तद्भजन्तीति ते रसव्यञ्जकवाक्यस्य काव्यसंज्ञाया प्रयोजका इति साकल्येन सरलार्थः । एतत्तु काव्यप्रकाशकारमत एवाभिहितम्; तन्मते "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इति काव्यलक्षणे गुणानामपि काव्यत्वप्रयोजकतया काव्यसंज्ञाया अपि प्रयोजकत्वात् । स्वमते तु "वाक्यं रसात्मकं काव्यम्" इति लक्षणात् रसादीनामेव काव्यत्वप्रयोजकतया गुणानां तदप्रयोजकत्वात् काव्यसंज्ञाया अप्रयोजकत्वमेवेति बोध्यम् ।

(घ) ननु वामनादिभिर्गुणानां शब्दार्थधर्म्मत्वस्योक्तत्वात् भवदुक्तं केवलरसधर्म्मत्वं कथमुप

२ । । माधुर्य्यमोजोऽथ प्रसाद इति ते त्रिधा ॥ (ङ)

ते गुणाः । तत्र—

३ । चित्तद्रवीभावमयो ह्लादो माधुर्य्यमुच्यते । (च)

यत्तु केनचिदुक्तम्—"माधुर्य्यं द्रुतिकारणम्" इति, तन्न, द्रवीभावस्य स्वादस्वरूपाह्लादाभिन्नत्वेन तत्कार्य्यत्वाभावात् (छ) ।

द्रवीभावश्च स्वाभाविकानाविष्टत्वात्मक-काठिन्य-मन्यु-क्रोधादिकृत-दीप्तत्व-विस्मय-हासाद्युपहितविक्षेपपरित्यागेन रत्याद्याकारानुविद्धानन्दोद्बोधेन सहृदयचित्तार्द्रप्रायत्वम् (ज) ।

...याह यथा चेति । एषां गुणानाम् । दर्शितमेव, प्रथमपरिच्छेदे काव्यप्रकाशकृतः काव्यलक्षणदूषणप्रकरणे ...र्थः । परमपि यथाकथञ्चिद्दर्शयिष्यते च ।

(ङ) माधुर्य्यमिति । अत्र माधुर्य्यमित्यादिभिस्त्रिभिः शब्दैर्गणनादेव त्रिविधत्वे प्राप्ते पुनस्त्रिधेत्यभिधानं ...दधिकसंख्याव्यवच्छेदार्थम् । यदुक्तं प्राचीनैः—

"श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता । अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥"

(च) तत्र माधुर्य्यं लक्षयति चित्तेति । चित्तस्य द्रवीभावमयो गलितप्रायत्वरूपः, ह्लाद आनन्द-...विशेषो माधुर्य्यं नाम गुण उच्यते ; मधुरस्य रसस्य भाव इति व्युत्पत्तेः । तथा च रसोऽप्यानन्दविशेष ...एव, अस्य तु तदंशरूपत्वात्तद्धर्म्मत्वसिद्धिरिति बोध्यम् ।

(छ) ननु चित्तेत्यादिना चित्तद्रवीभाव एव माधुर्य्यमिति भवतोक्तम्, काव्यप्रकाशकृता तु "आह्लादकत्वं ...माधुर्य्यं शृङ्गारे द्रुतिकारणम्" इत्यनेन चित्तद्रवीभावकारणमेव माधुर्य्यमभिहितमिति परस्परविरोध इत्यतस्तां ...काव्यप्रकाशोक्तिं दूषयितुमाह यत्त्विति । केनचित् काव्यप्रकाशकृता । द्रुतिकारणं चित्तस्य द्रवीभावजनकम् । ...द्रुतिद्रवीभावशब्दयोरभिन्नार्थत्वादाह द्रवीभावस्येति । आस्वादस्वरूपो रसादिरूपो य आह्लादस्तस्य ...अभिन्नत्वेन एकत्वेन तत्कार्य्यत्वाभावात् माधुर्य्यजन्यत्वाभावात् । अत्रायमाशयः—चित्तस्य द्रवीभावाह्लादयो-...र्दशानुभवादभेद एव वाच्यः आह्लादकत्वञ्चाह्लाद एव माधुर्य्यञ्च तत्स्वरूपतयैव लक्षितमिति सर्वेषामेवा-...भेदात् कथं माधुर्य्यं द्रुतिकारणं भवितुमर्हति, कार्य्यकारणयोर्भेदस्यावश्यकत्वादित्यतो युक्तमेवोक्तम्— "चित्तद्रवीभावमयः" इति ।

(ज) ननु द्रवीभावस्य आस्वादस्वरूपाह्लादाभिन्नत्वे भवदुक्तरीत्यैव रसमाधुर्य्ययोरप्यभिन्नत्वमेव न पुन-...र्माधुर्य्यस्य रसधर्म्मत्वमित्याह द्रवीभावश्चेति । स्वाभाविकं सर्वेषामेव स्वभावसिद्धम् अनाविष्टत्वं तत्तत्काव्य-...र्थवणादावमनोयोगित्वमेव आत्मा स्वरूपं यत् स तथोक्तः । विक्षेपविशेषणमेतत् । काठिन्यं तत्तत्काव्य-...पदानां नितान्तदुर्बोधता, मन्युः शोको दैन्यं वा, क्रोधः कुतश्चित् सञ्जातपूर्व एव कोपः, आदिपदात् ...उपद्रवादयश्च तैः कृतं यत् दीप्तत्वं चित्तस्य सर्वतो व्याप्तत्वं तेन, विस्मयेन कुतोऽप्युपस्थितेन आश्चर्य्येण,

तच्च—(झ)

४ । सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥ (ञ)

सम्भोगादिशब्दा उपलक्षणानि, तेन सम्भोगाभासादिष्वप्येतस्य स्थितिर्ज्ञेया (१) (ट) ।

५ । मूर्ध्नि वर्गान्त्यवर्णेन युक्ताष्ट-ठ-ड-ढान् विना ।
र-णौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः ।
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ॥ (ठ)

यथा—"अनङ्गमङ्गलभुवस्तदपाङ्गस्य भङ्गयः ।
जनयन्ति मुहुर्यूनामन्तः सन्तापसन्ततिम् ॥" (ड)

हासेन, आदिशब्दात् आवेगादिना च उपहित उपस्थापितो जनितो यो विक्षेपो विषयान्तरासक्तत्वं तत्परित्यागेन, रतेरनुरागस्य आदिशब्दात् शोकशमयोश्च आकारैः स्वरूपैः अनुविद्धः सम्मिलितो य आनन्दस्तस्य उद्बोधेन आविर्भावेन, सहृदयानां चित्तस्य आर्द्रप्रायत्वं प्रायेण गलितत्वपत्वम् । एवञ्च माधुर्यात्मकताद्रवीभावस्य रस एव जनक इति माधुर्यस्य रसधर्मत्वं सिद्धमेवेति भावः ।

(झ) तच्चेति । तन्माधुर्यञ्चेत्यर्थः ।

(ञ) सम्भोग इति । तच्च माधुर्यं सम्भोगादौ क्रमादधिकम् । तथा च हास्यवत्सलरसादिभ्यः सम्भोगे शृङ्गारे अधिकम्, सम्भोगादपि करुणे रसे अधिकम्, करुणादपि विप्रलम्भे शृङ्गारे अधिकम्, विप्रलम्भादपि शान्ते रसे अधिकमित्यर्थः ।

(ट) सम्भोगेति । सम्भोगादौ माधुर्यगुणः तत्समानप्राये तदाभासादौ किं न स्यादित्याकाङ्क्षायां उपलक्षणबीजमिति बोध्यम् । एतस्य माधुर्यगुणस्य ।

(ठ) माधुर्यगुणव्यञ्जकानाह मूर्ध्नीति । मूर्ध्नि, मस्तके उपरिभागे इत्यर्थः, वर्गाणामन्त्यवर्णैः ङ-ञ-ण-न-म-रूपशेषाक्षरेण युक्ता मिलिताः, ट-ठ-ड-ढान् विना अपरे ककारादयो मकारान्ता वर्णाः, अङ्ग-सङ्ग-सञ्ज इत्यादिरूपाः शब्दा इत्यर्थः, तथा लघू लघुप्रयत्नेनोच्चार्यौ वर्णान्तरेणासंयुक्तावित्यर्थः, र-णौ रेफ-मूर्द्धन्य-णकारौ च, तस्य माधुर्यगुणस्य व्यक्तौ व्यञ्जने प्रकाशे कारणतां गताः, उक्तविधा एव वर्णा माधुर्यगुणव्यञ्जका इत्यर्थः । अवृत्तिः सर्वथा समासरहिता, वा अथवा अल्पवृत्तिरल्पसमासविशिष्टा, मधुरा सुकोमलपदघटितत्वेन सुश्रव्या, रचना शब्दविन्यासश्च, तथा तद्व्यक्तौ कारणतां गता माधुर्यगुणव्यञ्जिका इत्यर्थः ।

(ड) वर्गान्त्यवर्णसंयुक्तवर्णानां माधुर्यव्यञ्जकतामुदाहरति अनङ्गेति । अनङ्गस्य मदनस्य मङ्गलभुवो माङ्गलिकावासभूताः, तस्या नायिकाया अपाङ्गस्य नेत्रप्रान्तस्य भङ्गयो व्यापाराः, यूनामन्तरन्तःकरणे मुहुः सन्तापसन्ततिं कामोत्तापधारां जनयन्ति ।

---

(१) अत्र यथा इति क्वचित् पाठः ।

यथा वा मम—

"लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ॥" (ढ)

९ । ओजश्चित्तस्य विस्तार-रूपं दीप्तत्वमुच्यते ।
वीर-बीभत्स-रौद्रेषु क्रमेणाधिक्यमस्य तु ॥ (ण)

अस्य ओजसः । अत्रापि वीरादिशब्दा उपलक्षणानि, तेन वीराभासादावप्यस्यावस्थितिः ।

अत्र प्रथमार्द्धे कवर्गान्तिमवर्णरूपरिस्थैर्ङकारैः सह संयुक्तास्तद्वर्गीयगकाराः, द्वितीयार्द्धे तवर्गान्तिमवर्णरूपरिस्थैर्नकारैः सह संयुक्तास्तद्वर्गीयतकाराश्च माधुर्य्यगुणं द्योतयन्ति । अल्पा चात्र वृत्तिः ।

(ढ) अवृत्तावल्पवृत्तौ चैकत्रैव उक्तविधवर्गान्तरवर्णानां माधुर्य्यव्यञ्जकतामुदाहरति लतेति । गुञ्जन् रवन् मदवान् मदमत्तश्च अलिपुञ्जोऽभ्रमरसमूहो यत्र तं तादृशं लताकुञ्जं चपलयन् चपलीकुर्वन् सञ्चालयन्, अङ्गं विहारपरायणानां गात्रं समालिङ्गन् संस्पृशन्, अनङ्गं कामं द्रुततरमतिसत्वरं प्रबलयन् प्रबलीकुर्वन् वर्द्धयन्, दलितं प्रस्फुटितम् अरविन्दं पद्मं मन्दं मन्दं तरलयन् तरलीकुर्वन् शनैः शनैः सञ्चालयन्, तथा रजोवृन्दं पुष्पाणां परागसमूहं विन्दन् गृह्णन्, मरुत् वायुः, दिशि दिशि, मकरन्दं पुष्पमधु, किरति विक्षिपति ।

अत्र प्रथमे पादे ञकारजकाराः, द्वितीये ङकारगकाराः, तृतीये नकारदकाराः, चतुर्थे च नकारदकारा माधुर्य्यगुणं व्यञ्जन्ति । प्रथमे चतुर्थे च पादे अल्पा वृत्तिः, द्वितीयतृतीययोस्तु पादयोरवृत्तिरेव ।

लघु-र-णयोरुदाहरणं यथा—"अनणुरणन्मणिमेखलम्" इत्यादि ।

मधुरा रचना यथा—"चलन्नलङ्घ्य महारयं हयं स वाहवाहोचितवेशपेशलः ।
प्रमोदनिष्पन्दतराक्षिपक्ष्मभिर्व्यलोकि लोकैर्नगरालयैर्नलः ॥"

अत्र श्रुतिमात्रतोऽर्थबोधाभावान्न प्रसादगुण इति बोध्यम् ।

टवर्गान्तवर्णेन मूर्द्धि युक्ताष्ट-ठ-ड-ढास्तु माधुर्य्यं न व्यञ्जन्ति । यथा मम—

"वरटने कुण्ठमध्यस्य ! पिण्डीकृत्योभयोर्वसु । वक्त्रं षण्ढीकसानेन किं पुनर्मिश्रितं त्वया ? ॥"

(ण) ओजोगुणं लक्षयति ओज इति । चित्तस्य विस्ताररूपं विस्फारितत्वस्वरूपम्, दीप्तत्वं जायमानविस्मयवशादुज्ज्वलत्वप्रायम् ओजो नाम गुण उच्यते । अत्र व्युत्पत्तिः स्पष्टा । एतेन "दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थिति" इति काव्यप्रकाशलक्षणं कटाक्षितम् । तथा च ओजसश्चित्तविस्तृतिरूपदीप्तत्वाङ्गीकारेणैवोपपत्तौ तद्धेतुत्वरूपधर्मान्तरकल्पने गौरवमेवेति भावः । अस्य ओजोगुणस्य तु वीर-बीभत्स-रौद्रेषु क्रमेणाधिक्यम् । तथा च वीरापेक्षया बीभत्से, बीभत्सापेक्षया च रौद्रे रसे ओजसः प्राचुर्य्यमित्यर्थः । चकारादस्तु हास्याद्भुतभयानकेष्वपि ओजसः स्थितिमाह स्म ।

७। वर्गस्याद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ।
उपर्य्यधो द्वयोर्वा स-रेफः (१) ट-ठ-ड-ढैः सह॥
शकारश्च षकारश्च तस्य व्यञ्जकतां गताः।
तथा समासबहुला घटनौद्धत्यशालिनी॥ (त)

यथा—"चञ्चद्भुज—" इत्यादि (३२४ पृष्ठे) (थ)।

८। चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः।
स प्रसादः समस्तेषु रसेषु रचनासु च॥ (द)

(त) ओजोगुणव्यञ्जकवर्णादीन्निर्दिशति वर्गस्येति। यस्य कस्यचित् सजातीयस्य विजातीयस्य वा वर्गस्य आद्यतृतीयाभ्यां वर्णाभ्यां युक्तौ संयुक्तौ तदन्तिमौ द्वितीयचतुर्थौ वर्णौ तस्य व्यञ्जकतां गतौ। तथा च एकस्यैव वर्गस्य भिन्नस्य वर्गस्य वा प्रथमवर्णेन संयुक्तौ द्वितीयौ वर्णः, किंवा तृतीयवर्णेन संयुक्तश्चतुर्थो वर्ण ओजोगुणव्यञ्जक इत्यर्थः। यथा—द्राक् खनति, द्राग् घर्षति, द्राक् फलति, द्राग् धावति। उपरि सरेफौ वर्णौ यथा—सर्प इति। अधः सरेफौ वर्णौ यथा—दीप्र इति। द्वयोर्युगपदेव उपर्य्यधश्च सरेफौ वर्णौ वा। यथा—आर्द्र इति। इदमुपलक्षणम्। तथा च माधुर्य्यगुणव्यञ्जकभिन्नं संयुक्तवर्णसामान्यं विसर्गयुक्तो वर्णश्च ओजोगुणव्यञ्जक इति महान्तः। माधुर्य्यगुणे ट-ठ-ड-ढा निषिद्धाः, इह तु नेत्याह ट-ठ-ड-ढैः सहेति। तथा च ट-ठ-ड-ढाः संयुक्ता असंयुक्ता वा ओजोगुणव्यञ्जका इत्यर्थः। यथा—कुट्टाकः, विसंष्ठुलः, गड्डलिका, शण्ढः। विकटः, कमठः, डम्बरः, मूढः। वर्णान्तरेणासंयुक्तोऽपि तालव्यः शकारश्च मूर्द्धन्यः षकारश्च इमे तस्य ओजोगुणस्य व्यञ्जकतां गताः प्राप्ताः। यथा—"आस्वादितद्विरदशोणितशोणशोभाम्।" "कर्षति शीर्षशेषः।" तथा समासबहुला घटना असंयुक्तवर्णादिभिरपि दीर्घसमासयुक्ता रचना, तथा औद्धत्यशालिनी घटना दीर्घसमाससंयुक्तवर्णादीनामभावेऽपि विकटार्थबोधिनी रचना ओजोगुणव्यञ्जकतां गतेत्यर्थः। यथा—अविरत-चलित-बाण-निवह-निपतित-वीर-देह-निचय-निचित-भूभागः।" "करिवर-निकराणां छेदभेदौ विधाय" इत्यादि।

(थ) चञ्चदिति। अत्र 'द्भु' इति 'द्ध' इति च तृतीयवर्णयुक्तश्चतुर्थो वर्णः, 'क्षमित' इति अधः-सरेफो वर्णः, 'ण्ड' इति संयुक्तो डकारः, 'शो' 'शो' इति तालव्यशकारौ, अन्ये च संयुक्ता वर्णा ओजोगुणव्यञ्जका इति भावः।

(द) प्रसादगुणं लक्षयति चित्तमिति। अनलः शुष्केन्धनमिव यो गुणः क्षिप्रं शीघ्रं चित्तं व्याप्नोति आविष्टं करोति साकल्येन सम्बध्नाति च, स प्रसादो नाम गुण उच्यत इति पूर्वस्मादनुषज्यते। प्रसादयति स्वसौन्दर्य्यद्वारा विषयान्तरसम्बन्धनिवर्त्तनेन चित्तं प्रसन्नं करोतीति व्युत्पत्तिः। स च प्रसादगुणः समस्तेषु शृङ्गारादिषु रसेषु, समस्तासु रचनासु अद्वृत्तिषु अल्पवृत्तिषु वा पदयोजनासु सम्भवतीति शेषः।

---

(१) सरेफो इति पाठान्तरम्।

व्याप्नोति आविष्टं करोति (१) (ध) ।

९ । शब्दास्तद्व्यञ्जका अर्थ-बोधकाः श्रुतिमात्रतः । (न)

यथा—"सूचीमुखेन सकृदेव कृतव्रणस्त्वं
मुक्ताकलाप ! लुठसि स्तनयोः प्रियायाः ।
बाणैः स्मरस्य शतशो विनिकृत्तमर्म्मा
स्वप्नेऽपि तां कथमहं न विलोकयामि ॥" (प)

१० । एषां शब्दगुणत्वञ्च गुणवृत्त्योच्यते बुधैः ॥ (फ)

शरीरस्य शौर्य्यादिगुणयोग इवेति शेषः (ब) ।

(ध) गुणपदे व्याप्नोतीत्यस्य फलितार्थमाह व्याप्नोतीति । आविष्टं स्वस्मिन्नभिनिविष्टम् । एतेनाऽ चमत्कारितातिशयः सूचितः ।

(न) ननु समस्तास्वेव रचनासु अस्य सम्भवाङ्गीकारे मधुरायाम् अवृत्तिरचनायामल्पवृत्तिरचनायाञ्च माधुर्य्यगुणेन सह साङ्कर्य्यापत्तिरित्याह शब्दा इति । श्रुतिमात्रतः श्रवणानन्तरमेव अर्थबोधकाः शब्दाः तस्य प्रसादगुणस्य व्यञ्जकाः । तथा च अवृत्त्यल्पवृत्तिस्थले सरलशब्दव्यङ्ग्यत्वे प्रसादगुणः, श्रुतिमाधुर्य्ये सति असरल-शब्दव्यङ्ग्यत्वे माधुर्य्यगुणः, विकटार्थबोधकशब्दव्यङ्ग्यत्वे च ओजोगुण इति व्यञ्जकभेदाद्भेद इति भावः ।

(प) सूचीति । हे मुक्ताकलाप ! हारान्तर्गतमुक्तासमूह ! सूच्या मुखेन अग्रभागेन सकृदेक-वारमेव कृतव्रणः कृतच्छिद्रस्त्वम्, प्रियायाः स्तनयोर्लुठसि । अहन्तु स्मरस्य मदनस्य बाणैः शतश एव विनि-कृतमर्म्मा कृतहृदयच्छिद्रोऽपि सन्, स्वप्नेऽपि तां प्रियां कथं न विलोकयामि । यदि कृतच्छिद्रत्वमेव प्रियाप्राप्ति-हेतुस्तदा त्वत्तो बहुधैव कृतच्छिद्रोऽहं कथं त्वमिव प्रियां न प्राप्नोमि, इत्यहो विपन्न एव विधेर्नियम इति भावः अत्र श्रुतिमात्रत एवार्थबोधकशब्दव्यङ्ग्यत्वेन सहसैव चित्तव्यापनात् प्रसादगुणः ।

(फ) ननु "रसस्याङ्गित्वमाप्तस्य धर्म्माः" इत्यनेन गुणानां रसधर्म्मत्वाङ्गीकारे वामनादिप्राचीनसम्मतमेषां शब्दार्थधर्म्मत्वं कथं सङ्गच्छत इत्याह एषामिति । अत्र शब्दपदमर्थोपलक्षणम् । किञ्चेति चार्थः । बुधैर्वामनादिभिः, गुणवृत्त्या गुणवृत्तिवत् (लक्षणावृत्तिवत्) गुरुतरेण स्वाश्रयरसादिव्यञ्जकत्वरूपपरम्परासम्बन्धे-नेत्यर्थः, एषां माधुर्य्यौजःप्रसादगुणानां शब्दगुणत्वं शब्दार्थयोरुभयोरपि धर्म्मत्वमुच्यते । न पुनः साक्षादेव शब्दार्थधर्म्मत्वमभ्युपगम्यते, गुणानां रसादिभिः सहैकास्वादविषयत्वेन रसादिधर्म्मत्वस्यैव वास्तविकतया तेषां शब्दार्थयोर्वृत्तित्वे साक्षात्सम्बन्धासम्भवादिति भावः ।

(ब) शरीरस्येति । आदिशब्देन तेजःप्रभृतीनां ग्रहणम् । तथा च यथा शौर्य्यतेजःप्रभृतयो गुणाः साक्षादात्मन्येव वर्त्तमाना अपि स्वाश्रयाश्रयत्वरूपपरम्परासम्बन्धेन शरीरेऽपि वर्त्तन्ते ; तथा माधुर्य्यादयो गुणाः साक्षात् रसादाविव वर्त्तमाना अपि स्वाश्रयरसादिव्यञ्जकतारूपपरम्परासम्बन्धेन शब्दार्थयोरपि वर्त्तन्त इत्यर्थः ।

---

(१) आविष्करोति इति पाठान्तरम् ।

११ । श्लेषः समाधिरौदार्य्यं प्रसाद इति ये पुनः ।
गुणाश्चिरन्तनैरुक्ता ओजस्यन्तर्भवन्ति ते ॥ (अ)

ओजसि भक्त्या ओजःशब्दवाच्ये (१) शब्दार्थधर्म्मविशेषे (म) ।

तत्र श्लेषो बहूनामपि पदानामेकपदवद्भासनात्मा (य) । यथा—

"उन्मज्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः
सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः ।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायं तथा
प्रायः प्रेङ्खदसंख्यशङ्खधवला वेलेयमुद्गच्छति ॥" (र)

अयं बन्धवैकट्यात्मकत्वादोज एव (ल) ।

(अ) इदानीं वामनादिभिरङ्गीकृतानि गुणान्तराणि स्त्रीकं पु गुणदोषाभावालङ्कारगुणीभूतव्यङ्ग्ये पु अन्तर्भावयितुमाह श्लेष इति । चिरन्तनैः प्राचीनैः, श्लेषः समाधिः ओदार्य्यं प्रसाद इति नामभिये पुनर्गुणा उक्ताः, ते अस्मत्सम्मते ओजसि गुणे अन्तर्भवन्ति ।

(म) ननु ओजःशब्दस्य चित्तविस्ताररूपदीप्तत्व एव शक्तिः कथं तत्र शब्दधर्म्माणां श्लेषादीनामन्तर्भाव इत्याह ओजसीति । भक्त्या उपादानलक्षणया, ओजःशब्देन वाच्ये प्रतिपाद्ये । अतोऽत्र उपादानलक्षणया ओजःशब्देन शब्दार्थधर्म्मविशेषस्य बोधनात् तत्र च शब्दधर्म्माणां श्लेषादीनामन्तर्भावसम्भवान्नोक्तदोष इत्याशयः ।

(य) वामनादिमते श्लेषं लक्षयति तत्रेति । तेषु श्लेषादिषु मध्ये । एकपदवत् एकस्य पदस्येव, भासनात्मा अलक्षितसन्धिकतया प्रतीयमानता । एकेन पदेन अन्यस्य पदस्य अभिन्नभावेन श्लेषणात् श्लेष इति समाख्या । तथा च वामनः—

"यत्रैकपदवद्भावः पदानां भूयसामपि । अनालक्षितसन्धीनां स श्लेषः परमो गुणः ॥"

(र) उन्मज्जदिति । समुद्रस्य पूरारम्भवर्णनेयम् । उन्मज्जतां जलमध्यादुत्तिष्ठतां जलकुञ्जरेन्द्राणां जलहस्तिश्रेष्ठानां रभसेन वेगेन य आस्फालः शरीरान्दोलनं तस्य अनुबन्धेन परम्परया उद्धत उत्थितः, सर्वाः पर्वतानां कन्दरोदरभुवो गुहाभ्यन्तरभूमीः प्रतिध्वानिनीः प्रतिध्वनिमतीः कुर्वन् कुर्वती च, श्रुतिपथस्य कर्णविवरस्य उन्माथी विदारी विदारिणी च, तथा उच्चैर्विशालः अयं ध्वनिर्यथा उच्चरति उत्तिष्ठति ; तथा प्रायो बाहुल्येन प्रेङ्खद्भिः प्रचलद्भिः असंख्यैः शङ्खैः धवला शुभ्रीकृता इयं वेला पूरारम्भे या विक्षतसमुद्रजलम् उद्गच्छति तीरे उत्तिष्ठति ।

अत्र 'उन्मज्जज्जल' 'प्रेङ्खदसंख्य' इति बहूनां पदानां हठादलक्षितसन्धिकतया एकैकपदवत् प्रतीयमानत्वात् वामनादिमते श्लेषो नाम शब्दगुणः ।

(ल) अस्य ओजस्यन्तर्भावमुपपादयति अयमिति । अयं वामनादिमतसिद्धः श्लेषो नाम गुणः,

---

(१) ओजःपदवाच्ये इति पाठान्तरम् ।

समाधिः—आरोहावरोहक्रमः। आरोह उत्कर्षः, अवरोहः अपकर्षः, तयोः क्रमो वैरस्यानावहो विन्यासः। यथा—"चञ्चद्भुज—" इत्यादि। अत्र पादत्रये क्रमेण बन्धस्य गाढ़ता, चतुर्थपादे तु अपकर्षः। तस्यापि च तीव्रप्रयत्नोच्चार्यतया ओजस्विता (व)।

उदारता विकटत्वलक्षणा। विकटत्वञ्च पदानां नृत्यत्प्रायत्वम् (श)।

यथा— "सुचरण-(१) विनिविष्टैर्नूपुरैर्नर्त्तकीनां
झणिति रणितमासीत् तत्र चित्रं कलञ्च॥" (ष)

अत्र च तन्मतानुसारेण रसानुसन्धानमन्तरेणैव शब्दप्रौढ़ोक्तिमात्रेण ओजः (स)।

सन्धवैकल्यात्मकत्वात् बहुतरसंयुक्तवर्णादिघटिततया प्रगाढ़रचनारूपत्वात्। एतेन स्वमते शब्दगत ओजोगुणो विकटशब्दबन्धात्मक एवेति सूचितम्।

(व) वामनादिमते समाधिं लक्षयति समाधिरिति। तथा च वामनः—

"आरोहन्त्यवरोहन्ति क्रमेण यतयो हि यत्। समाधिर्नाम स गुणस्तेन पूता सरस्वती॥"

उक्तलक्षणं व्याचष्टे आरोह इति। उत्कर्षो रचनायाः प्रगाढ़ता, अपकर्षश्च रचनायाः शैथिल्यम्। वैरस्यानावहो विरस्यजनकः; तथा च प्रथमतो रचनायाः प्रगाढ़ता, परञ्च शैथिल्यम् इत्ययमेव आरोहावरोहक्रमः स एव च समाधिरिति सरलार्थः। उक्तरूपेण रचनासमाधानात् समाधिरिति संज्ञा। पादत्रये प्राथमिके इति शेषः। अपकर्षो रचनायाः शैथिल्यम्। ननु चतुर्थपादस्य शैथिल्येऽपि कथं तस्य ओजस्यन्तर्भाव इत्याह तस्यापीति। चतुर्थपादस्यापीत्यर्थः। तीव्रप्रयत्नोच्चार्यतया उच्चारयिष्यतीति पदस्येति शेषः। ओजस्विता ओजोगुणवत्ता।

(श) वामनादिमते औदार्यगुणं लक्षयति उदारतेति। विकटत्वमेव लक्षणं स्वरूपं यस्याः सा तादृशी रचना, उदारता औदार्यं नाम गुणः। पदानां नृत्यत्प्रायत्वरूपोदारतया उदारतेति नाम। ननु विकटत्वञ्चेत् गाढ़त्वम्, तदा तन्मतसिद्धेन ओजसा सह औदार्यस्य साङ्कर्यापत्तिरित्याह विकटत्वञ्चेति।

(ष) सुचरणेति। तत्र नृत्यशालायां नर्त्तकीनां सुचरणयोः सुन्दरयोः पादयोः विनिविष्टैः प्रदत्तैः नूपुरैः 'झण्' इति इत्थं चित्रमाश्चर्यं कलं मधुरास्फुटञ्च रणितं शब्द आसीत्।

(स) अथ सुचरणेत्यादौ नियतस्वसहचरवीरादिरसाभावात् कथमोजोगुणः, तदभावे च कथं प्राचामौदार्यगुणस्य तत्रान्तर्भावः सम्भवतीत्याह अत्र चेति। तन्मतानुसारेण वामनादिमतानुसरणेन। शब्दप्रौढ़ोक्तिमात्रेण केवलरचनाप्रगाढ़तयैव, ओजः ओजोगुणः अस्माभिरप्यङ्गीक्रियत इति शेषः। यदाह वामनः—

---

(१) स्वचरण—इति क्वचित् पाठः।

प्रसाद ओजोमिश्रितशैथिल्यात्मा (ङ)। यथा—

"यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदात् पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।
यो यस्तत्कर्म्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ॥" (च)

१२ । माधुर्य्यव्यञ्जकत्वं यदसमासस्य दर्शितम् ।
पृथक्पदत्वं माधुर्य्यं तेनैवाङ्गीकृतं पुनः ॥ (क)

यथा—"श्वासान् मुञ्चति" इत्यादि (१४१ पृष्ठे) (ख)।

१३ । अर्थव्यक्तेः प्रसादाख्य-गुणेनैव परिग्रहः ।
अर्थव्यक्तिः पदानां हि झटित्यर्थसमर्पणम् ॥ (ग)

"पदन्यासस्य गाढ़त्वं वदन्त्योजः कवीश्वराः । अनेनाधिष्ठिताः प्रायः शब्दाः श्रोत्ररसायनम् ॥"

(ङ) वामनादिमते प्रसादगुणं लक्षयति प्रसाद इति । ओजसा मिश्रितं शैथिल्यमेव आत्मा स्वरू यस्य स तादृशो बन्धः । यस्मिन् बन्धे क्वचित् प्रगाढ़ता क्वचिच्च शिथिलता स तादृशो बन्धः प्रसादो नाम गु इत्यर्थः । सभ्यानां मनसः प्रसादनात् प्रसाद इति व्युत्पत्तिः । तथा च वामनः—

"शथत्वमोजसा मिश्रं प्रसादञ्च प्रचक्षते । अनेन न विना सत्यं स्वदते काव्यपद्धतिः ॥"

(च) यो य इति । पूर्वमेव विवृतमेतत् (३२५ पृष्ठे)। अस्य पद्यस्य सर्वेष्वेव चरणेषु प्रसादगुण स्पष्टप्रदर्शनाय उद्धृतस्यापि पुनः समस्तस्योद्धार इति बोध्यम् ।

अत्र मद इत्यन्ते बन्धस्य गाढ़त्वादोजः, "पाण्डवीनां चमूनाम्" इत्यत्र पुनः शैथिल्यम् । इत्यन्य प्यूह्यम् । अतो वामनादिसम्मतः प्रसादगुणः । सोऽपि च पुनर्गाढ़बन्धांशे स्वसम्मते ओजसि शिथिलबन्ध तु प्रसादे अन्तर्भूत एव इत्याशयः । एवञ्च कारिकायामोजःपदं प्रसादस्याप्युपलक्षणं मन्तव्यम् ।

(क) इदानीं पृथक्पदत्वलक्षणस्य वामनादिसम्मतमाधुर्य्यगुणस्य स्वसम्मते अवृत्तिस्थलीयमाधुर्य्य अन्तर्भावं दर्शयितुमाह माधुर्य्येति । असमासस्य 'अवृत्तिरल्पवृत्तिर्वा' इत्यत्र अवृत्तीत्यनेन समासाभावस् यत् माधुर्य्यव्यञ्जकत्वमस्माभिर्दर्शितम्, तेनैव पृथक्पदत्वम् असमस्तपदत्वरूपं वामनादिसम्मतं माधु मस्माभिरपि पुनरङ्गीकृतम् । अस्मत्सम्मते अवृत्तिस्थलीयमाधुर्य्यगुण एव वामनादिसम्मतशाब्दमाधुर्य्यगु स्यान्तर्भाव इत्याशयः । यदाह वामनः—"बन्धे पृथक्पदत्वञ्च माधुर्य्यमुदितं बुधैः ।"

(ख) श्वासानिति । अत्र 'त्वन्मार्गम्' 'भुजावल्लरीम्' इत्यनयोः किञ्चित्समाससत्त्वेऽपि समासद मंशमादायैव लक्षणं सङ्गमनीयम् । अथवा—"सखि ! नाथ ! विमुञ्च मानिनि ! रुषम्" इत्यादि (११५ पृष्ठे) उदाहर्त्तव्यम् ।

स्पष्टमुदाहरणम् (घ)।

१४। ग्राम्यदुःश्रवतात्यागात् कान्तिश्च सुकुमारता। (ङ)

अङ्गीकृतेति सम्बन्धः (च)। कान्तिरौज्ज्वल्यम्। तच्च ह्यालिकादि-पदविन्यासवैपरीत्येनालौकिकशोभाशालित्वम् (छ)।

सुकुमारता अपारुष्यम् (ज)। अनयोरुदाहरणे स्पष्टे (झ)।

१५। क्वचिद्दोषस्तु समता मार्गाभेदस्वरूपिणी।

अन्ययोक्तगुणेष्वस्या अन्तःपातो यथायथम्॥ (ञ)

(ग) वामनादिसम्मतस्य अर्थव्यक्तिनाम्नो गुणस्य स्वसम्मते प्रसादगुणे अन्तर्भावं दर्शयितुमाह अर्थेति। यस्मात् प्रसादाख्यगुणेनैव अर्थव्यक्तेः परिग्रहः सम्पन्न इति शेषः। तेषामर्थव्यक्तिर्नाम गुणः अस्माकं प्रसादगुण एवान्तर्भूत इत्यर्थः। हि यस्मात्, पदानां झटिति अर्थस्य समर्पणं ज्ञानमेव तन्मते अर्थव्यक्तिर्नाम; अर्थस्य व्यक्तिर्बुद्धौ स्पष्टोपस्थितिरिति व्युत्पत्तेः। तथा च वामनः—

"पश्चादिव गतिर्वाचः पुरस्तादिव वस्तुनः।

यत्रार्थव्यक्तिहेतुत्वात् सोऽर्थव्यक्तिः स्मृतो गुणः॥"

(घ) स्पष्टमिति। "सूचीमुखेन सकृदेव" इत्यादिः प्राग्लादित्याशयः।

(ङ) प्राचां कान्तिसुकुमारताख्ययोरपि गुणयोः स्वमते संग्रहं दर्शयितुमाह ग्राम्येति। ग्राम्य-दुःश्रवयोर्भावौ ग्राम्यदुःश्रवते तयोस्त्यागात्। तथा च ग्राम्यताया दोषत्वाङ्गीकारेण तत्परित्यागसूचनात् कान्तिः, दुःश्रवतायाश्च दोषत्वस्वीकारेण तत्परित्यागस्यापि द्योतनात् सुकुमारता चास्माभिरङ्गीकृतेत्यर्थः।

(च) अङ्गीति। सम्बन्धः "तेनैवाङ्गीकृतं पुनः" इत्यतोऽनुषङ्ग इत्यर्थः।

(छ) कान्तिरिति। औज्ज्वल्यं व्याचष्टे तच्चेति। आदिपदेन अशिक्षितजनमात्रग्रहणम्। ह्यालिका-दीनां पदविन्यासस्य वैपरीत्येन नागरोपनागरशब्दप्रयोगेणेत्यर्थः। तथा च भोजदेवः—"यदुज्ज्वलत्वं बन्धस्य काव्ये सा कान्तिरुच्यते।"

(ज) प्राचीनमते सुकुमारतां लक्षयति सुकुमारतेति। अपारुष्यं बन्धस्य कष्टवर्णराहित्यम्। यदाह कण्ठाभरणे भोजदेवः—"अनिष्ठुराक्षरप्रायं सुकुमारमिति स्मृतम्।"

(झ) अनयोरिति। तत्र ग्राम्यतात्यागेन कान्तिर्यथा—"मध्यस्तो हरते मनः।" दुःश्रवतात्यागेन सुकुमारता यथा—"आमोदं यातु तन्वङ्गी कदानङ्गवशंवदा।"

(ञ) प्राचां समतानामकगुणस्यापि स्वमते व्यवस्थामाह क्वचिदिति। मार्गाभेदस्वरूपिणी उपक्रमोप-संहारयोरेकप्रकाररचनात्मिका, समता नाम गुणः, क्वचित्तु सुकुमारार्थे उत्कटरचनास्थले उत्कटार्थे सुकुमाररचनास्थले च प्रतिकूलवर्णत्वं नाम दोष एव। अन्यथा तादृशवैषम्याभावस्थले अस्याः समतायाः उक्तगुणेषु ओजःप्रभृतिषु मध्ये यथायथं यथासम्भवम् अन्तःपाती भवेत्।

मसृणेन विकटेन वा मार्गेणोपक्रान्तस्य सन्दर्भस्य तेनैव परिनिष्ठानं मार्गाभेदः (ट)। स च क्वचिद्दोषः (ठ)। तथाहि—(ड)

"अव्यूढाङ्गमरूढपाणि-(१) जठराभोगञ्च बिभ्रद्वपुः
पारीन्द्रः शिशुरेष पाणिपुटके सम्मातु किं तावता ।
उद्यद्दुर्द्धरगन्धसिन्धुरशतप्रोद्दाममदानार्णव-
स्रोतःशोषणरोषणात् पुनरितः कल्पाग्निरल्पायते ॥" (ढ)

अत्र उद्धतेऽर्थे वाच्ये सुकुमारबन्धत्यागो गुण एव (ण)। अनेवंविधस्थले माधुर्य्यादावेवान्तःपातः (त)। यथा—"लताकुञ्जं गुञ्जत्—" इत्यादि (५३७ पृष्ठे) (थ)।

(ट) मार्गाभेदशब्दं विवृणोति मसृणेनेति। मसृणेन कोमलेन। मार्गेण रचनाप्रकारेण, उपक्रान्तस्य आरब्धस्य, सन्दर्भस्य वाक्यस्य महावाक्यस्य वा, तेनैव तादृशेनैव मार्गेण, परिनिष्ठानं समापनम्। तथा च वामनः—

"प्रतिपादं प्रतिश्लोकमेकमार्गपरिग्रहः। दुर्बन्धो दुर्विभावश्च समतेति मतो गुणः ॥"

(ठ) स चेति। मार्गाभेदरूपः प्राचीनसम्मतः समताख्यो गुणश्चेत्यर्थः।

(ड) एकेनैव पद्येन उभयोरेव दोषगुणयोरुदाहरणं दर्शयितुमाह तथाहीति।

(ढ) अव्यूढाङ्गमिति। अव्यूढानि अचिरजातत्वादसम्पूर्णानि अङ्गानि करचरणादीनि यस्य तत्, अरूढः अनुत्पन्नः पाणिजठरयोर्हस्तोदरयोराभोगो विस्तारो यस्य तत्तादृशञ्च वपुः शरीरं बिभ्रत् धारयन्, एष शिशुः पारीन्द्रः सिंहः, पाणिपुटके मानुषस्य हस्तप्रसृती, सम्मातु अवस्थातुं योग्यो भवतु, तावता अस्य तादृशक्षुद्रत्वेन किम् ?। उद्यत उपस्थितस्य, दुर्द्धरस्य दुर्द्धर्षस्य गन्धसिन्धुरशतस्य गन्धहस्तिसमूहस्य यत् प्रोद्दामं विशालं दानार्णवस्रोतः मदजलसागरप्रवाहः तस्य शोषणं भयजननद्वारा शुष्कताजनकं रोषणं क्रोधो यस्य तस्मात्तथोक्तात् इतः शिशुपारीन्द्रात् कल्पाग्निः पुनः प्रलयकालीनो वह्निरपि अल्पायते अल्प इवाचरति। अयमाकृतौ क्षुद्रोऽपि बले सुमहानेवेति भावः।

अत्र प्रथमार्द्धे अचिरजातसिंहशिशोर्वर्णनीयतया सुकुमार एवार्थः, किन्तु कविना समतागुणप्रवर्त्तनाय सर्वत्र उत्कटैव रचना प्रवर्त्तितेति प्रथमार्द्धे प्रतिकूलवर्णत्वं नाम दोष एवेति भावः।

(ण) द्वितीयार्द्धे तु उत्कटार्थसद्भावात् उत्कटरचनात्मिका सा समता गुण एवेत्याह अत्रेति। अस्मिन् पद्य इत्यर्थः। उद्धतेऽर्थे द्वितीयार्द्धगते इति शेषः, प्रचण्डक्रोधस्य वर्णनीयत्वादित्याशयः। सुकुमारबन्धत्यागः कोमलरचनाया अकरणम्, गुण एव, अर्थानुरूपत्वादित्यभिप्रायः।

(त) अनेवमिति। सुकुमारार्थे सुकुमाररचनास्थले उत्कटार्थे उत्कटरचनास्थले चेत्यर्थः। माधुर्य्यादावित्यादिपदात् स्वसम्मतप्रसादौजसोर्ग्रहणम्।

(१) अरूढपाणि इति पाठान्तरम्।

१६ । ओजः प्रसादो माधुर्य्यं सौकुमार्य्यमुदारता ।
तदभावस्य दोषत्वात् स्वीकृता अर्थगा गुणाः ॥ (द)

ओजः—साभिप्रायत्वरूपम् । प्रसादः—अर्थवैमल्यम् । माधुर्य्यम्—उक्तिवैचित्र्यम् । सौकुमार्य्यम्—अपारुष्यम् । उदारता—अग्राम्यत्वम् (ध) । एषां पञ्चानामप्यर्थगुणानां यथाक्रममपुष्टार्थाधिकपदानवीकृतामङ्गलरूपाश्लीलग्राम्याणां निराकरणेनैवाङ्गीकारः । स्पष्टान्युदाहरणानि (न) ।

(थ) लतेति । अत्र अर्थस्यापि सुकुमारतया आद्योपान्त-सुकुमाररचनात्मिका समता स्वसम्मतमाधुर्य्यगुण एवान्तर्भूतेति भावः । एवं प्रसादौजसोरप्यनुसन्धेयम् ।

(द) अधुना ओजःश्लेषादिसम्मतानामोजःप्रभृतीनां दशविधानामर्थगुणानामपि स्वमते तदभावानां दोषत्वाङ्गीकारादिभिरेवाङ्गीकारमाह ओज इति । ओजः, प्रसादः, माधुर्य्यम्, सौकुमार्य्यम्, उदारता च एते पञ्च अर्थगा अर्थनिष्ठाः प्राचीनसम्मता गुणाः, तेषामभावस्य असद्भावस्य दोषत्वात् दोषत्वस्वीकारात् स्वीकृता अस्माभिरिति शेषः । अत्रायमाशयः—दोषाः खलु परिहार्य्याः गुणास्तु ग्राह्या इति हि रीतिः । एवञ्च ओजःप्रभृतीनामसद्भावस्य दोषत्वाङ्गीकारेण तस्य परिहार्य्यत्वसूचनात् सद्भावस्य गुणत्वं ग्राह्यत्वञ्च सूचितमेवेति । एवमन्यत्राप्याशयोऽनुसन्धेयः ।

"अर्थप्रौढ़िरोजः" इत्योजसः सामान्यलक्षणम् । अर्थप्रौढ़िस्तु पञ्चविधा—"पदार्थे वाक्यरचना वाक्यार्थे च पदाभिधा । प्रौढ़िर्व्याससमासौ च साभिप्रायत्वमस्य च ॥" इति वामनमतम् ।

(ध) तत्र प्रथमप्रकारचतुष्टयस्य 'क्वचित्' इत्यादिना अगुणत्वं वक्ष्यति । पञ्चमप्रकारन्तु दोषाभावत्वेन गुणतया अङ्गीकुर्वन्नाह ओज इति । साभिप्रायत्वरूपं विशेषणपदार्थस्य मुख्योपयोगित्वेन वक्तुरभिप्रेतत्वम् । अर्थस्य वैमल्यं विशदत्वम् । उक्तेर्वैचित्र्यं क्रोधादावप्यतीव्रत्वम् । अपारुष्यमनिष्ठुरत्वम् । अग्राम्यत्वं हालिकाद्यशिक्षितजनैरप्रयोज्यत्वम् । एवमेवैषां लक्षणानि सरस्वतीकण्ठाभरणादावनुसन्धेयानि ।

(न) एषामिति । तत्र अपुष्टार्थस्य निराकरणेन स्वमते ओजसोऽङ्गीकारः सम्पन्नः । यथा—"विलोक्य पूर्णिमापूर्णं विधुं मुञ्च रुषं प्रिये ! ।" अत्र पूर्णिमापूर्णमिति विशेषणार्थस्य मानत्यागं प्रत्युपयोगित्वेन वक्तुरभिप्रेतत्वात् नापुष्टार्थतादोषः, प्रत्युत साभिप्रायत्वरूपः प्राचीनसम्मत ओजोगुण एव ।

अधिकपदनिराकरणेन प्रसादस्याङ्गीकारः सञ्जातः । यथा—"कुर्य्यां हरस्यापि पिनाकपाणेः ।" अत्र पिनाकपाणिपदेन हरस्य दुर्जयत्वबोधनात् "सदाशिवं नौमि पिनाकपाणिम्" इत्यादिवन्नाधिकपदतादोषः, प्रत्युत अर्थवैमल्यरूपः प्रसादगुण एव ।

अनवीकृतपदनिराकरणेन माधुर्य्यस्याङ्गीकारः प्रतिपन्नः । यथा—"भानुः सकृद्युक्त" इत्यादि । अत्र नवीकृतत्वात् "सदा चरति खे भानुः" इत्यादिवन्नानवीकृतत्वदोषः, प्रत्युत उक्तिवैचित्र्यरूपो माधुर्य्यगुण एव ।

अमङ्गलरूपाश्लीलार्थनिराकरणेन सौकुमार्य्यस्याङ्गीकार आयातः । यथा—"दशास्तु शेषः खलु तद्दशाया, तथा नभः पुष्प्यतु कोरकेण ।" अत्र मृतिपदानभिधानात् नामङ्गलरूपाश्लीलार्थतादोषः, प्रत्युत अपारुष्यरूपः सौकुमार्य्यगुण एव ।

१७। अर्थव्यक्तिः स्वभावोक्त्यलङ्कारेण तथा पुनः ।
रसध्वनिगुणीभूतव्यङ्ग्याभ्यां (१) कान्तिनामकः ॥ (प)

अङ्गीकृत इति सम्बन्धः । अर्थव्यक्तिः—वस्तुस्वभावस्फुटत्वम् । कान्तिः—दीप्तरसत्वम् (फ)। स्पष्टे उदाहरणे (ब)।

१८। श्लेषो विचित्रतामात्रमदोषः समता परम् । (भ)

श्लेषः क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्मा । तत्र—क्रमः क्रियासन्ततिः । विदग्धचेष्टितं कौटिल्यम् । अप्रसिद्धवर्णनाविरहोऽनुल्बणत्वम् । उपपादकयुक्तिविन्यास उपपत्तिः । एषां योगः सम्मेलनं स एव रूपं यस्या घटनायास्तद्रूपः श्लेषो वैचित्र्यमात्रम् । अनन्यसाधारणरसोपकारित्वातिशयविरहादिति भावः (म)। यथा—"दृष्ट्वैकासनसंस्थिते प्रियतमे" इत्यादि (११८ पृष्ठे)।

ग्राम्यार्थनिराकरणेन च उदारताया अङ्गीकारः प्राप्तः । यथा—"निद्रातुमुपकण्ठं मे भज त्वमधुना प्रिय !।" अत्र ग्राम्यार्थपरित्यागात् "स्वपिहि त्वं समीपे मे स्वपिम्येवाधुना प्रिय !।" इत्यादिवन्न ग्राम्यतादोषः, प्रत्युत उदारतागुण एव ।

(प) अर्थेति । स्वभावोक्त्यलङ्कारेण स्वभावोक्त्यलङ्काराङ्गीकारेण, अर्थव्यक्तिर्नाम प्राचीनसम्मतोऽर्थगुणः पुनः तया अङ्गीकृत इत्यर्थः । एवं रसस्य ध्वनिगुणीभूतव्यङ्ग्याभ्यां तयोरङ्गीकाराभ्यामित्यर्थः कान्तिनामकोऽपि प्राचामर्थगुणः अङ्गीकृतः ।

(फ) अर्थेति । वस्तुनः पदार्थस्य स्वभावानां स्वरूपाणां स्फुटत्वं साकल्येन स्पष्टं प्रतीयमानत्वम् । दीप्तरसत्वं स्पष्टप्रतीयमानरसत्वम् । तथा च सरस्वतीकण्ठाभरणे—"अर्थव्यक्तिः स्वरूपस्य साक्षात् कथनमुच्यते । कान्तिर्दीप्तरसत्वं स्यात्—।"

(ब) स्पष्टे इति । तत्रार्थव्यक्तेरुदाहरणं यथा शाकुन्तले—"ग्रीवाभङ्गाभिरामम्" इत्यादि । अत्र स्वभावोक्त्यलङ्कारेणैव अर्थव्यक्तिरूपो गुणः प्राप्तः । कान्तेर्यथा—"शून्यं वासगृहम्" इत्यादि । अत्र शृङ्गाररसध्वनिनैव कान्तिरूपो गुणः संगृहीतः । "अयं स रशनोत्कर्षी" इत्यादौ तु रसस्य गुणीभूतव्यङ्ग्यतया कान्तिरूपो गुणः सम्पादित इति बोध्यम् ।

(भ) इदानीं प्राचीनसम्मतयोः श्लेषसमताख्यगुणयोरगुणत्वमुपपादयितुमाह श्लेष इति । श्लेषो नाम प्राचां गुणः विचित्रतामात्रं केवलं वैचित्र्यमेव, न पुनर्वस्तुत एव गुणः । तथा समता नाम प्राचां गुणः परं केवलम् अदोष एव, न पुनर्गुणः ।

---

(१) व्यङ्ग्यानामिति क्वचित् पाठः ।

अत्र दर्शनादयः क्रियाः । उभयसमर्थनरूपं कौटिल्यम् । लोकसंव्यवहाररूपमनुल्बणत्वम् । "एकासनसंस्थिते" "पश्चादुपेत्य" "नयने पिधाय" "ईषद्वक्रितकन्धर" इति चोपपादकानि, एषां योगः (य) । अनेन च वाच्योपपत्तिग्रहणव्यग्रतया रसास्वादो व्यवहितप्राय इत्यस्यागुणता (र) ।

समता च प्रक्रान्तप्रकृतिप्रत्ययाविपर्य्यासेनार्थस्य (१) विसंवादिताविच्छेदः ; स च प्रक्रमभङ्गरूपदोषविरह एव (ल) । स्पष्टमुदाहरणम् (व) ।

१९ । न गुणत्वं समाधेश्च—(श)

समाधिश्च अयोन्यन्यच्छायायोनिरूपद्विविधार्थदृष्टिरूपः (ष) । तत्रायोनिरर्थो यथा—

(म) अथ श्लेषं लक्षयति श्लेष इति । उक्तलक्षणं स्वयमेव विवृणोति तत्रेति । क्रियायाः सन्ततिः समूहः । विदग्धचेष्टितं निपुणव्यवहारः । अप्रसिद्धवर्णनाया विरहः अभावः । उपपादिका उक्तविषयसमर्थनकारिणी या युक्तिस्तस्या विन्यासः स्थापनम् । अनन्यसाधारणम् अन्यैरसमानं यत् रसोपकारित्वं तस्यातिशयविरहादतिरेकाभावात् । असाधारणभावेनैव यो रसमुपकरोति स एव गुण इत्याशयः ।

(य) अत्रेति । आदिपदेन पश्चादुपगमनादीनां परिग्रहः । उभयसमर्थनरूपं ज्येष्ठानुरञ्जनकनिष्ठावञ्चनयोर्युगपदेव विधानस्वरूपम्, कौटिल्यं चातुर्य्यम् । लोकसंव्यवहाररूपम् अन्यत्रापि लोकानां तथाभूतप्रसिद्धव्यवहारात्मकम् । उपपादकानि तादृशानुरञ्जनवञ्चनयोः सङ्घटनसम्पादकानि । एषां क्रमादीनां योगः सम्मेलनात्मकः प्राचां श्लेषो नाम गुणः सम्पन्न इति शेषः ।

(र) उक्तविधश्लेषस्य अगुणत्वमुपपादयति अनेनेति । उक्तविधश्लेषेण चेत्यथ :, अस्य तु व्यवहितप्राय इति परेणान्वयः । व्यवहितप्रायत्वं प्रति हेतुमाह वाच्योपपत्तीति । वाच्यस्य नयनपिधानादिवक्तव्यविषयस्य उपपत्तिग्रहणं सम्भवपरत्वानुसन्धाने व्यग्रतया श्रोतुर्व्यासक्ततया । व्यवहितप्रायः किञ्चिद्व्यवहित इव, इति हेतोरस्य श्लेषस्य अगुणता न गुणता न वा दोषतेत्यर्थ : । रसस्योत्कर्षाजननान्न गुणता, वास्तविकव्यवधानाजननाच्च न दोषतेति भावः ।

(ल) प्राचां मते समतागुणं निरूप्य स्वमते तस्यादोषमात्ररूपत्वं निर्वक्ति समतेति । प्रक्रान्तयोः प्रथमसमभिहितयोः प्रकृतिप्रत्यययोः अविपर्य्यासेन परस्तादवैषम्येण, अर्थस्य वक्तव्यविषयस्य विसंवादितायाः वैषम्येन प्रतीयमानतायाः विच्छेदः अभावः, यादृशैः प्रकृतिप्रत्ययादिभिरारम्भणं तादृशैरेव तैः समापनं समतेत्यर्थ :। तथा च सरस्वतीकण्ठाभरणे—"अवैषम्यं क्रमवतां समत्वमिति कीर्त्तितम् ।" स च प्राचां समतागुणः, स्वमते प्रक्रमभङ्गरूपदोषस्य विरहः अभाव एव, न पुनरतिरिक्तः कश्चिद्गुण इत्यर्थ :, रसादीनामुत्कर्षाजननाभावादिति भावः ।

(व) स्पष्टमिति । यथा—"न दीयते तया स्वाङ्गं दीयते तु स्मितं परम् ।"

(श) नेति । समाधेश्च प्राचीनसम्मतस्य समाधिनामकस्य अर्थगुणस्यापि च अस्मन्मते न गुणत्वम् ।

(ष) विभागप्रदर्शनगर्भं समाधिं लक्षयति समाधिश्चेति । समाधिरर्थदृष्टिरिति लक्षणम् । अर्थ-

(१) प्रक्रान्तप्रकृतिप्रत्ययविपर्य्यासेन इत्यसङ्गतः पाठः क्वचित् ।

"सद्यो मुण्डितमत्तहूणचिबुकप्रस्पर्द्धि नारङ्गकम्।" (ख)

अन्यच्छायायोनिर्यथा—

"निजनयनप्रतिबिम्बैरम्बुनि बहुशः प्रतारिता कापि।
नीलोत्पलेऽपि विमृशति करमर्पयितुं कुसुमलावी॥" (ङ)

अत्र नीलोत्पलनयनयोरतिप्रसिद्धं सादृश्यं विच्छित्तिविशेषेण निबद्धम् (च)। अस्य चासाधारणशोभानाधायकत्वान्न गुणत्वम्, किन्तु काव्यशरीरमात्रनिर्वर्त्तकत्वम् (१) (क)।

क्वचित् "चन्द्रम्" इत्येकस्मिन् पदार्थे वक्तव्ये "अत्रेर्नयनसमुत्थं ज्योतिः" इति वाक्यवचनम्। क्वचित् "निदाघशीतलहिमकालोष्णसुकुमारशरीरावयवा योषित्" इति वाक्यार्थे वक्तव्ये 'वरवर्णिनी' इति पदाभिधानम्। क्वचिदेकस्य वाक्यार्थस्य किञ्चिद्विशेषनिवेशादनेकैर्वाक्यैरभिधानमित्येवंरूपो व्यासः। क्वचिद्बहुवाक्यप्रतिपाद्यस्य एकवाक्येनाभिधानमित्येवंरूपः समासश्च। इत्येवमादीनामन्येरुक्तानां न गुणत्वमुचितम्, अपि तु वैचित्र्यमात्रावहत्वम् (ख)।

दृष्टिस्यार्थावबोधविशेषः। अर्थश्च द्विविधः—अयोनिरन्यच्छायायोनिश्चेति। तत्र न विद्यते योनिः प्रसिद्धिरूपं कारणं यस्य सः अयोनिः, तथा अन्येषु काव्येषु या छाया प्रतिबिम्बं स्वरूपवर्णनप्रसिद्धिरित्यर्थः सैव योनिः कारणं यस्य सः अन्यच्छायायोनिः।

(ख) सद्य इति। सद्यो मुण्डितं कृतक्षौरं यत् मत्तहूणस्य मद्यपानान्मत्तहूणदेशीयम्लेच्छस्य चिबुकं तस्य प्रस्पर्द्धि तुल्यं नारङ्गकं पक्वं नारङ्गफलम्।

अत्र मत्तहूणचिबुक-पक्वनारङ्गयोः सादृश्यं काव्यान्तरेष्वप्रसिद्धमिति सादृश्यरूपोऽर्थः अयोनिः।

(ङ) निजेति। अम्बुनि जले निजनयनयोः प्रतिबिम्बैः प्रतारिता जले पतितेषु निजनयनप्रतिबिम्बेषु नीलोत्पलभ्रमेण तानि चेतुमुपस्थिता तेषाञ्च छायामात्रतया चेतुमसामर्थ्यात् प्रतारणामापन्नेत्यर्थः, कापि कुसुमं लुनाति चिनोतीति कुसुमलावी कर्मण्यण् प्रत्ययान्तादीप्रत्ययः, मालाकारिणी, यथार्थेऽपि नीलोत्पले करमर्पयितुं विमृशति विवेचनं करोति।

(च) अन्यच्छायायोनित्वं दर्शयितुमाह अत्रेति। अतिप्रसिद्धं काव्यान्तरेषु शतशो निबद्धत्वादिति भावः। तर्हि कथमत्र पुनर्निबद्धमित्याह विच्छित्तीति। विच्छित्तिविशेषेण चमत्कारिसातिशयप्रयोजकत्वेन। तथा च अतिप्रसिद्धमपि सादृश्यमत्र विन्यासविशेषनैपुण्येन नूतनमिव सञ्जातमिति भावः।

(क) इदानीं समाधेरगुणत्वमुपपादयति अस्येति। अस्य समाधेश्च, असाधारणशोभाया रसादीनामनुपमसौन्दर्यस्य अनाधायकत्वादजनकत्वात्। काव्यशरीरमात्रस्य अर्थात्मककेवलकाव्यदेहस्य निर्वर्त्तकत्वं निष्पादकत्वम्।

---

(१) निवर्त्तकत्वम् इति क्वचित् पाठः।

२० । तेन नार्थगुणाः पृथक् ॥ (ग)

तेन उक्तप्रकारेण । अर्थगुणा ओजःप्रभृतयः प्रोक्ताः (घ) ।

इति साहित्यदर्पणे गुणविवेचनो
नामाष्टमः परिच्छेदः ॥०॥

(ख) ननु "पदार्थे वाक्यरचना वाक्यार्थे च पदाभिधा ।
प्रौढ़िर्व्याससमासौ च साभिप्रायत्वमस्य च ॥"

इति वामनोक्तानां पञ्चप्रकाराणामोजसामन्तिमप्रकारस्य साभिप्रायत्वस्य अपुष्टार्थतादोषाङ्गीकारेण वाङ्मीकृतत्वं दर्शितम्, अपरेषां चतुर्णां प्रकाराणां कथमङ्गीकारः सम्पन्न इत्याकाङ्क्षायां तेषामगुणत्वमेव प्रतिपादयितुमाह क्वचिदिति । अगुणत्वप्रतिपादनप्रकरण एव यस्य कस्याप्यगुणत्वप्रतिपादनस्य कर्त्तव्यत्वात् ओजसो व्यवस्थाप्रकरणमुल्लङ्घ्य अस्य सन्दर्भस्यात्रोपन्यास इति द्रष्टव्यम् । क्वचित् रघुवंशादौ । वाक्यस्य वचनमुक्तिः । यथा रघुवंशे—"अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः ।" ब्रह्मणः कश्चित् पुत्रोऽत्रिस्तस्य नयनाच्च जातश्चन्द्र इति पुराणवार्त्ता । क्वचिदुद्भटादौ । निदाघे ग्रीष्मकाले शीतलाः हिमकाले चोष्णाः सुकुमाराश्च शरीरावयवा यस्याः सा । तथा च रुद्रः—"शीते सुखोष्णसर्वाङ्गी ग्रीष्मे या सुखशीतला । भर्त्तृभक्ता च या नारी सा भवेद्वरवर्णिनी ॥" यथा—"उपस्थिता सा वरवर्णिनीयम् ।" क्वचिन्नैषधादौ । किञ्चिद्विशेषनिवेशमभिप्रेत्य व्यासो विस्तरः । यथा—नैषधे द्वितीयसर्गे दमयन्त्युदरस्य कृशत्वरूपवाक्यार्थस्य मेरुदण्डनिम्नताहेमकाञ्चीरूपविशेषाभिप्रायेण "उदरं नत" "उदरं परिमाति" इत्यादिश्लोकद्वयेनाभिधानम् । क्वचित् चाणक्यनीत्यादौ । समासः संक्षेपः । यथा—"मातृवत् परदारेषु परद्रव्येषु लोष्ट्रवत् । आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः ॥" मातरमिव परदारानाद्रियते, मातरमिव परदारान् सम्मानयति, मातरमिव परदारान् नाकाङ्क्षति इत्यादिबहुवाक्यप्रतिपाद्यस्य अर्थस्य "मातृवत् परदारेषु" इत्येकवाक्येनाभिधानम् । अन्यैर्वामनादिभिः । गुणत्वं नोचितमिति । रसादीनामुत्कर्षाजनकत्वादिति भावः ।

(ग) गुणनिरूपणप्रकरणमुपसंहरन्नाह तेनेति । तेन उक्तप्रकारेण, अर्थगुणा वामनोक्ता ओजःप्रभृतयो दण्ड्युक्ता वा अर्थवृत्तयो गुणाः, न पृथक् नातिरिक्ताः ; अपि तु अव्यदुक्त-गुणदोषाभाव-रसध्वनि-गुणीभूतव्यङ्ग्यालङ्कारेष्वेवान्तर्भूता इति भावः ।

(घ) तेनेति । प्रोक्ताः प्राक् प्रदर्शिताः ।

इति महामहोपाध्याय-भारताचार्य-श्रीहरिदाससिद्धान्तवागीशभट्टाचार्य्यविरचितायां साहित्यदर्पण-टीकायां कुसुमप्रतिमायां गुणविवेचनो नाम अष्टमः परिच्छेदः ॥०॥

—०—

नवमः परिच्छेदः ।

——:०:——

अथोद्देशक्रमप्राप्तमप्यलङ्कारनिरूपणं बहुवक्तव्यत्वेनोल्लङ्घ्य रीतिमाह—(क)

१ । पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत् ।

उपकर्त्री रसादीनाम्—[ख]

रसादीनाम् अर्थाच्छब्दार्थशरीरस्य काव्यस्यात्मभूतानाम् (ग) ।

२ । सा पुनः स्याच्चतुर्विधा ॥

वैदर्भी चाथ गौड़ी च पाञ्चाली लाटिका तथा । (घ)

(क) अथ गुणनिरूपणानन्तरम्, उद्देशक्रमेण "उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः" इति नाम-कीर्त्तनक्रमेण प्राप्तमपि आकाङ्क्षितमपि, अलङ्कारनिरूपणम्, बहवो वक्तव्या विषया यत्र तत्त्वेन हेतुना उल्लङ्घ्य अतिक्रम्य अकृत्वा रीतिमाह निरूपयति मूलकार इति शेषः सूचीकटाहन्यायेनेत्याशयः । गुणनिरूपणानन्तर तदभिव्यञ्जकतया रीतेराकाङ्क्षितत्वादत्र प्रसङ्गसङ्गतिरिति द्रष्टव्यम् ।

(ख) रीतिं लक्षयति पदेति । अङ्गसंस्थाविशेषवत् शरीरे यथास्थाने करचरणाद्यवयवसन्निवेश इ शब्दार्थशरीरे काव्ये पदसङ्घटना यथास्थाने पदानां संयोजना रीतिः । अथ तर्हि "गौरपत्यं बलीवर्द्द घासमत्ति मुखेन सः" इत्यादावपि पदसङ्घटनासत्त्वेन रीतिरास्तामित्याह उपेति । आदिपदेन रसाभा भावादीनां ग्रहणम् । उपकर्त्री परम्परया परिपोषिका । एतेन रसाद्यभावस्थले रीतीनामप्यभाव इ सूचयता तासामनियतत्वं सूचितम् । तथा च रसाद्युपकारकः पदविन्यासो रीतिरिति रीतिलक्षणं फलितम् रीयते ज्ञायते गुणविशेषोऽनयेति रीतिः, गत्यर्थकरीधातोः करणे क्तिः । रीतिः, प्रथा, व्यवहार इति पर्यायाः यथास्थानत्वलाभाय कारिकायां विशेषपदमिति बोध्यम् ।

(ग) स्वमतस्य युक्तियुक्तत्वसम्पादनाय "रीतिरात्मा काव्यस्य" इति वामनमते दत्तमपि दोषमत पु सारयितुमाह रसादीनामिति । अर्थात् युक्त्या सम्भावनाविषयत्वात् शब्दार्थावेव शरीरं यस्य तस्य । तथा च "विशिष्टपदरचना रीतिः" इति वामनमते रीतिलक्षणम् । तेन च पदं नाम शब्दविशेषः, शब्दश्च काव्य शरीरमेव । एवञ्च शरीरं कथमात्मा भवितुमर्हतीति "रीतिरात्मा काव्यस्य" इति वामनमतमयुक्तमि भावः ।

(घ) रीतिं विभजते सेति । सा रीतिः पुनश्चतुर्विधा स्यात्—वैदर्भी, गौड़ी, पाञ्चाली, ल

सा रीतिः । अत्र—(ङ)

३ । माधुर्य्यव्यञ्जकैर्वर्णै रचना ललितात्मिका ॥

अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते । [च]

यथा—"अनङ्गमङ्गलभुवः—" इत्यादि (५२६ पृष्ठे) (छ) ।

रुद्रटस्त्वाह—

"असमस्तैकसमस्ता युक्ता दशभिर्गुणैश्च वैदर्भी ।

वर्गद्वितीयबहुला स्वल्पप्राणाक्षरा च सुविधेया ॥" (ज)

अत्र दशगुणास्तन्मतोक्ताः श्लेषादयः (झ) ।

४ । ओजःप्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः ॥

समासबहुला गौड़ी—[ञ]

चेति । तत्र विदर्भाणां विदर्भदेशीयकवीनामियमिति वैदर्भी । गौड़ानां गौड़देशीयकवीनामियमिति गौड़ी । पाञ्चालानां पाञ्चालदेशीयकवीनामियमिति पाञ्चाली । लाटानां लाटदेशीयकवीनामियमिति च लाटी । लाटिकेति तु संज्ञायां कप्रत्ययश्छन्दःपूरणार्थः । विदेहोत्कलादिदेशोद्भवकवीनां रीतयस्तु एतास्वेव यथासम्भवमन्तर्भूता इति ताः पृथङ्न गणिताः । तथापि 'वैदेही' 'औत्कली' इत्यादिसंज्ञामपहाय वैदर्भ्यादिसंज्ञाकरणे बीजन्तु तस्यास्तस्या रीतेस्तत्र तत्र देशे प्रथमाविर्भावः प्राचुर्य्यं वेति प्रतीयते ।

(ङ) तत्रेति । तासु रीतिषु मध्ये इत्यर्थः ।

(च) वैदर्भीं लक्षयति माधुर्य्येति । माधुर्य्यस्य तदाख्यस्य गुणस्य व्यञ्जकैर्वर्णैः, ललितात्मिका शब्दतः अर्थतश्च सुकोमला, अवृत्तिः सर्वथा समासरहिता, अल्पवृत्तिर्द्विवत्रावपदवृत्तिसमासविशिष्टा वा रचना पदयोजना वैदर्भी नाम रीतिरिष्यते कविभिरिति शेषः ।

(छ) अनङ्गेति । अत्र माधुर्य्यगुणव्यञ्जकवर्णद्वारा अनङ्गेत्यादिपदत्रयमात्रवृत्तिसमासविशिष्टसुकुमारार्थकरचनया वैदर्भी रीतिः ।

(ज) असमस्तेति । असमस्ता सर्वथा समासरहिता, एकं सकृन्मात्रं समस्ता पदद्वयमात्रवृत्तिसमासविशिष्टेत्यर्थः, स्वसम्मतैः श्लेषादिभिर्दशभिर्गुणैर्युक्ता, कादिवर्गाणां द्वितीया वर्णा बहुलाः प्रचुरा यस्यां सा, तथा स्वल्पप्राणानि अतीव्रोच्चारणानि अक्षराणि वर्णा यस्यां सा तादृशी वैदर्भी रीतिः सुविधेया कविना सुन्दरभावेन निबद्धव्या ।

वैदर्भ्यास्तु वैदर्भ्याः प्रायेणैव लक्ष्यासम्भवाल्लक्षणमिदमसमञ्जसमित्याशयः । इदानीन्तनपुस्तके तु नेदं रुद्रवचनं दृश्यते ।

(झ) स्वमते काव्यप्रकाशमते च त्रिभ्योऽधिकगुणाभावादाह अत्रेति ।

(ञ) गौड़ीं लक्षयति ओज इति । ओजःप्रकाशकैरोजोगुणव्यञ्जकैः वर्णैः पुनराडम्बर उत्कटो

यथा—"चञ्चद्भुज—" इत्यादि (३२४ पृष्ठे) (ट)।

पुरुषोत्तमस्त्वाह—

"बहुतरसमासयुक्ता सुमहाप्राणाक्षरा च गौड़ीया।
रीतिरनुप्रास-महिम-परतन्त्रा स्तोकवाक्या च (१) ॥" (ठ)

५। वर्णैः शेषैः पुनर्द्वयोः।
समस्त-पञ्चष-पदो बन्धः पाञ्चालिका मता ॥ [ड]

बन्धो रचना गौड़ी; तथा समासबहुला ओजःप्रकाशकवर्णाभावेऽपि केवलबहुतरपदवृत्तिसमासविशिष्ट रचना च गौड़ी नाम रीतिरिति द्विविधमेव गौड़ीलक्षणं मन्तव्यम्, अन्यथा बहुतरसमासविशिष्टकेवलौजोव्यञ्जक वर्णबन्धस्थले ओजःप्रकाशकवर्णशून्यकेवलसमासबहुलस्थले च रीतिमात्रस्यैवाप्रवेशः स्यात्। अतएव रचनेत्यध्याहृत्य व्यपदविशेषणतयैव समासबहुलेति स्त्रीलिङ्गेन निर्दिष्टम्। एकलक्षणाभिप्राये तु बन्ध इत्यस्य विशेषणतया पुंस्त्वेनैव निर्दिश्येत। तत्र ओजःप्रकाशकवर्णबन्धस्थले वीरादिरसानामेव सत्तानियमः, ओजोगुणस्य वीरादिरसेष्वेव व्यवस्थापनात्। समासबाहुल्यस्थले तु न रसनियमः, सर्वेष्वेव रसेषु समासबाहुल्यसम्भवात्।

(ट) चञ्चदिति। अत्र तु ओजःप्रकाशकवर्णद्वारा आडम्बरबन्धसद्भावात् समासबाहुल्यसद्भावाच्च निरुक्तस्य द्विविधस्यैव गौड़ीलक्षणस्य सङ्गतिः।

"उपप्लुतं पातुमदो मदोद्धतैस्त्वमेव विश्वम्भर ! विश्वमीशिषे।
ऋते रवेः क्षालयितुं क्षमेत कः क्षपातमस्काण्डमलीमसं नभः ॥"

अत्र समासबाहुल्याभावेऽपि ओजःप्रकाशकवर्णैः केवलाडम्बरबन्धसद्भावादेव गौड़ी रीतिः।

"विकचकमलगन्धैरन्धयन् भृङ्गमालाः सुरभितमकरन्दं मन्दमावाति वातः।
प्रमदमदनमाद्यद्यौवनोद्दामरामा-रमणरभसखेदस्वेदविच्छेददक्षः ॥"

अत्र प्रथमार्द्धे वैदर्भी रीतिः। द्वितीयार्द्धे तु ओजःप्रकाशकवर्णबन्धाभावेऽपि केवलसमासबाहुल्याद् गौड़ी रीतिः।

(ठ) बहुतरेति। बहुतरसमासयुक्ता, सुमहाप्राणानि अतितीव्रप्रयत्नोच्चार्याणि अक्षराणि वर्णा यस्यां सा, अनुप्रासस्य महिमा बाहुल्यं तस्य परतन्त्रा अधीना तद्विशिष्टेत्यर्थः, तथा स्तोकमल्पं वाक्यं "वाक्यं स्याद्योग्यताकाङ्क्षा—" इत्यादिलक्षणं यस्यां सा तादृशी च रीतिर्गौड़ीया गौड़ी।

अनुप्रासभावस्थले बहुवाक्यस्थले चाव्याप्तेरिदमपि लक्षणमसमञ्जसमित्यभिप्रायः।

(ड) पाञ्चालीं निरूपयति वर्णैरिति। द्वयोर्वैदर्भीगौड्यो रीत्योः शेषैरवशिष्टैः माधुर्यगुणौजोगुणयोर्व्यञ्जकभिन्नैरित्यर्थः वर्णैः पुनः, समस्तानि समासविशिष्टानि पञ्च वा षड् वा परिमाणमेषामिति पञ्चषाणि पदानि यस्मिन् तादृशो बन्धो रचना पाञ्चालिका पाञ्चाली नाम रीतिर्मता। अत्र समस्तपञ्चषपद इति मध्यमपरिमाणसमासविशिष्टपदपरम्।

(१) अस्तोभवाक्या चेति पाठान्तरम्।

द्वयोर्वैदर्भीगौड्योः। यथा—

"मधुरया मधुबोधितमाधवी-मधुसमृद्धिसमेधितमेधया।
मधुकराङ्गनया मुहुरुन्मद-ध्वनिभृता निभृताक्षरमुज्जगे॥" (ढ)

भोजस्त्वाह—"समस्तपञ्चषपदामोजःकान्तिसमन्विताम्।
मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः॥" (ण)

६ ।लाटी तु रीतिर्वैदर्भी-
पाञ्चाल्योरन्तरा (१) स्थिता। (त)

यथा—"अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम्।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्
कुपितकपिकपोलक्रोड़ताम्रस्तमांसि॥" (थ)

(ढ) मधुरयेति। शिशुपालवधषष्ठसर्गे वसन्तवर्णनमिदम्। मधुरया मनोहरया, मधुना वसन्तकालेन बोधिता प्रकाशिता प्रकाशितकुसुमेत्यर्थः या माधवी लता तस्या मधुसमृद्ध्या मधुसम्पदा समेधिता संवर्द्धिता मेधा प्रतिभा यस्यास्तया, तथा उन्मदयतीत्युन्मदस्तं तादृशं ध्वनिं बिभर्त्तीति उन्मदध्वनिभृत् तया, मधुकराङ्गनया भ्रमर्य्या, मुहुरविरतम्, निभृताक्षरमस्पष्टवर्णं यथा स्यात्तथा उज्जगे उच्चैर्गीतम्।

अत्रत्या वर्णा न माधुर्य्यगुणव्यञ्जकाः, न वा ओजोगुणव्यञ्जकाः, समासश्च प्रथमार्द्धे मध्यमपरिमाण एवेति पाञ्चाली रीतिः।

(ण) समस्तेति। कवयः, समस्तानि समासविशिष्टानि पञ्च वा षड् वा परिमाणमेषामिति पञ्चषाणि पदानि यस्यां ताम्, ओजःकान्तिभ्यां तन्नामकाभ्यां गुणाभ्यां समन्विताम्, मधुरां सुश्रव्यां सुकुमारां कोमलाञ्च रीतिं पाञ्चालीं विदुः। इदानीन्तनभोजग्रन्थे सरस्वतीकण्ठाभरणे तु "आश्लिष्टश्लथभावाञ्च पुराणच्छायमाश्रिताम्" इति पूर्वार्द्धे पाठभेदः।

अत्र ओजःकान्तिभ्यां समुचिताभ्यामेवान्वितामित्यर्थकत्वे उक्तोदाहरणे ओजसोऽभावादव्याप्तेरिदमपि लक्षणमसमञ्जसम्। ओजसा कान्त्या वा समन्वितामित्यर्थकत्वे तु ओजोगुणसमन्वितत्वे सुकुमारत्वासम्भवात् लक्षणार्थस्यैवानुपपत्तिरित्याशयः।

(त) लाटीं लक्षयति लाटीति। वैदर्भीपाञ्चाल्योः रीत्योः अन्तरा मध्ये स्थिता रीतिस्तु लाटी। वैदर्भीरीतिघटकैः कतिपयैः पाञ्चालीरीतिघटकैश्च कतिपयैर्वर्णैर्घटिता रचना लाटी रीतिरित्यर्थः।

(१) अन्तरे इति पाठान्तरम्।

७०

कश्चिदाह—"मृदुपदसमाससुभगा युक्तैर्वर्णैर्न चातिभूयिष्ठा ।
उचितविशेषणपूरितवस्तुन्यासा भवेल्लाटी ॥" (द)

अन्ये त्वाहुः—"गौड़ी डम्बरबन्धा स्याद्वैदर्भी ललितक्रमा ।
पाञ्चाली मिश्रभावेन लाटी तु मृदुभिः पदैः ॥" (ध)

७। क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादयः ॥ (न)

वक्त्रादीत्यादिशब्दाद्वाच्यप्रबन्धौ। रचनादीत्यादिशब्दाद्वृत्तिवर्णौ (प)।

तत्र वक्त्रौचित्याद्यथा—

(य) अयमिति। पद्मिनीनां मुद्राभञ्जनः सङ्कुचितभावनाशकः प्रकाशक इत्यर्थः, उदयगिरेर्या वनाली वनश्रेणी तस्या बालमन्दारपुष्पं सद्योविकसितमन्दारकुसुमस्वरूपः अरुणवर्ण इत्यर्थः, विरहेण रात्रौ परस्परविच्छेदेन विधुरं विह्वलं यत् कोकद्वन्द्वं चक्रवाकमिथुनं तस्य बन्धुः पुनःपरस्परमेलनसम्पादनेन बान्धवः, तथा कुपितस्य कपेर्वानरस्य कपोलक्रोड़वत् गण्डमध्यभागवत् ताम्रस्ताम्रवर्णः, अयं सूर्यः, तमांसि अन्धकारान् विभिन्दन् नाशयन् उदयति।

अत्र 'ञ्च' 'न्द' 'न्ध' 'न्धु' 'न्द' इत्येते वर्णा माधुर्य्यव्यञ्जकतया वैदर्भीघटकाः, अपरे च वर्णाः पाञ्चालाघटका इति लाटी रीतिः।

(द) मृद्विति। मृदूनां सुकुमाराणामिव पदानां समासेन सुभगा मनोहरा, युक्तैः संयुक्तैर्वर्णैः अतिभूयिष्ठा अतिबहुला न च बहुतरसंयुक्तवर्णैरविशिष्टेत्यर्थः, तथा उचितैरुपयुक्तैः सार्थकैरिति तात्पर्य्यम्, विशेषणैः पूरितो वस्तुन्यासः अर्थनिर्द्देशो यस्यां सा तादृशी रचना लाटी रीतिर्भवेत्।

मृदुपदानामेव समासावश्यकत्वे सर्ववादिसिद्धलाटीस्थले "अयमुदयति" इत्यादौ "कोकद्वन्द्वबन्धु" "कपोलक्रोड़" इत्युभयत्र प्रगाढ़पदानां समासादव्याप्तिरिति लक्षणमिदमपि न सुष्ठुतरमित्याशयः।

(ध) गौड़ीति। डम्बर उत्कटो बन्धो रचना यस्यां सा तादृशी रीतिर्गौड़ी स्यात्; ललितो मधुरः क्रमः शब्दविन्यासपरम्परा यस्यां सा तथोक्ता रीतिर्वैदर्भी स्यात्; मिश्रभावेन एकत्र गौड़ीवैदर्भ्योः सम्मिश्रणेन सम्पन्ना रीतिः पाञ्चाली स्यात्; तथा मृदुभिरेव पदैस्तु सम्पन्ना रीतिर्लाटी स्यात्।

ईदृशलक्षणस्याङ्गीकारे डम्बरप्रयोगशून्यकेवलसमासबहुलस्थले गौड़ी न स्यात्। वैदर्भी पाञ्चाली च समासे असमासे वा स्यादिति सन्देहः, "अयमुदयति" इत्यादौ च "कोकद्वन्द्वबन्धुः" "कपोलक्रोड़" इत्यनयोः प्रगाढ़पदसत्त्वाल्लाटी न स्यात् इत्यतो नेदमपि लक्षणं सङ्गच्छत इत्यभिप्रायः।

(न) क्वचिदिति। क्वचित्तु वक्त्रादीनां वक्तृप्रभृतीनाम् औचित्यात् स्वभावानुसारेण न्याय्यत्वात्, अन्यद् योग्यविपरीता अपि रचनादयो रीतिप्रभृतयः स्युः। तथात्वे च न प्रतिकूलवर्णतादोष इति भावः।

(प) कारिकायामादिशब्दाभ्यां ग्राह्यान् दर्शयति वक्त्रादीति। वाच्यो वक्तव्यविषयः, प्रबन्धो ग्रन्थविशेषः। वृत्तिश्छन्दः, वर्णोऽक्षरम्।

"मन्थायस्तार्णवाम्भःप्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसंघट्टचण्डः।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताड़ितोऽयम्॥" (फ)

अत्र वाच्यस्य क्रोधाद्यनभिव्यञ्जकत्वेऽपि (१) भीमसेनवक्तृत्वेनोद्धता रचनादयः (ब)। वाच्यौचित्याद्यथोदाहृते—"मूर्द्धव्याधूयमान—" इत्यादौ (५०८ पृष्ठे) (भ)। प्रबन्धौचित्याद्यथा—नाटकादौ रौद्रेऽपि अभिनय-प्रतिकूलत्वेन न दीर्घसमासादयः (म)। एवमाख्यायिकायां शृङ्गारेऽपि न

(फ) मन्थेति। पद्यमिदं वेणीसंहारे। मन्थेन मन्थनेन आयस्तम् उद्वेलितं यदर्णवाम्भः समुद्र-जलं तेन प्लुतं पूर्णं कुहरं रन्ध्रं गुहा यस्य स तादृशश्चलन् भ्राम्यन् यो मन्दरः पर्वतस्तस्य ध्वानः शब्द इव धीरो गम्भीरः, गर्जन्ती या प्रलयघनघटा प्रलयकालीनमेघसमूहः तस्या अन्योन्यसंघट्टवत् परस्परसंघर्षजनित-शब्दवत् चण्डो भयङ्करः। कृष्णाया द्रौपद्याः क्रोधस्य अग्रदूतः प्रथमविज्ञापकदूतस्वरूपः, कुरुकुलनिधनस्य उत्पातनिर्घातवात औत्पातिकनिर्घातवायुशब्दस्वरूप इत्यर्थः, तथा कोणस्य वादनदण्डस्य आघातेषु सत्सु अस्मत्सिंहनादस्य यत् प्रतिरसितं प्रतिध्वनिस्तस्य सखा सदृशः, अयं दुन्दुभिः केन ताड़ितः दुन्दुभिताड़नेन शब्दः कृत इत्यर्थः।

निर्घातमाह तिथितत्त्वे—

"यदाऽन्तरीक्षे बलवान् मारुतो मरुताहतः।
पतत्यधः स निर्घातो जायते वायुसम्भवः॥"

(ब) अत्रेति। वाच्यस्य अर्थस्य। क्रोधादीत्यादिपदेन उत्साहजुगुप्सयोः संग्रहः। भीमेति। एतेन भीमस्योद्धतस्वभावत्वं सूचितम्। रचनादय इत्यादिशब्देन दीर्घसमास-महाप्राणवर्णानां ग्रहणम्। ननूदाहृते तादृशशब्दस्य उद्धतत्वेनैव वाच्योद्धतत्वादुद्धतरचनादयो युज्यन्ते, किमुद्धतस्वभावभीमसेनवक्तृत्व-रूपयुक्तत्वोपायकल्पनयेति चेत्—"भो लङ्केश्वर! दीयतां जनकजा रामः स्वयं याचते" इत्यादिकमेव शुद्धोदा-हरणम्। तथा चात्र वाच्यस्योत्साहाभिव्यञ्जकत्वेऽपि कोमलस्वभावरामवक्तृकत्वेन कोमला रचनादयः।

(भ) वाच्येति। "मूर्द्धव्याधूयमान—" इत्यादौ कोमलस्वभावसूत्रधारवक्तृकत्वेऽपि तादृशताण्डव-स्योद्धततया उद्धतवाच्यत्वादुद्धता रचनादयः।

(म) प्रबन्धेति। नाटकादावित्यादिशब्देन प्रकरणादीनां ग्रहणम्। रौद्रेऽपीति। शृङ्गारादि-कोमलरसेषु का कथा उत्कटे रौद्रादिरसेऽपीत्यर्थः। एतत्तु गद्यपरम्, पद्ये दीर्घसमासादावपि अभिनय-प्रतिकूलत्वासम्भवात्। यथा—"मय्येव भ्रुकुटिधरः संवृत्तः?।" एतेन उत्तररामचरितादौ गद्ये दीर्घ-समासादयः प्रतिकूलवर्णताख्यदोषा एवेति सूचितम्।

(१) क्रोधाद्यभिव्यञ्जकत्वेऽपि इति पुस्तकान्तरेषु पाठः।

मसृणवर्णादयः (य)। कथायां रौद्रेऽपि नात्यन्तमुद्धताः (र)। एवमन्यदपि ज्ञेयम् (ल)।

इति साहित्यदर्पणे रीतिविवेचनो नाम (१)
नवमः परिच्छेदः ॥९॥

(य) एवमिति। मसृणवर्णैः कोमलवर्णैः, आदिशब्दात् यथासम्भवसंयुक्तवर्णमाधुर्य्यव्यञ्जकवर्ण-दीर्घसमासाभावानां ग्रहणम्। यथा दशकुमारचरिते—"किञ्चिद्विकसदिन्दीवरकह्लारकैरवराजीवराजि—" इत्यादि। एतत्तु कदाचित्सम्भवपरत्वेन प्रदर्शनमात्रम्। वस्तुतस्तु एतद्व्यभिचार एव भूयान्। एवमुत्तरत्रापि।

(र) कथायामिति। उद्धता वर्णा इति शेषः। यथा कादम्बर्य्याम्—"निशितत्रिशूलदारितान्धक-महासुरः—" इत्यादि।

(ल) एवमिति। केवलशृङ्गारिनायकस्य कृत्रिमकोपे रौद्रेऽपि नात्यन्तमुद्धता वर्णाः। यथा शाकुन्तले—

"कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।
अयमाचरत्यविनयं मुग्धासु तपस्विकन्यकासु॥"

इति महामहोपाध्याय-भारताचार्य्य-श्रीहरिदाससिद्धान्तवागीशभट्टाचार्य्यविरचितायां साहित्यदर्पण-टीकायां कुसुमप्रतिमायां रीतिविवेचनो नाम नवमः परिच्छेदः ॥९॥

---

(१) रीतिविवेको नाम इत्यपि पाठः।

दशमः परिच्छेदः ।

—:०:—

अथावसरप्राप्तानलङ्कारानाह—(क)

१ । शब्दार्थयोरस्थिरा ये धर्म्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ॥ (ख)

(क) इदानीमलङ्कारनिरूपणे अवसरसङ्गतिं दर्शयति अथेति । अत्राथशब्दः अलङ्कारनिरूपणरूपकार्य्यान्तरारम्भे निरतिशयगहनस्य तस्य मङ्गलार्थं वा, रीतिनिरूपणानन्तर्य्यस्याभिधानक्रमेणैव प्राप्ततया तत्सूचनाय पुनरथशब्दोपादानस्य वैयर्थ्यापत्तेः । कार्य्यान्तराभावोऽवसरः । तथा च "उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः" इत्युद्देशक्रमेण गुणनिरूपणानन्तरं प्राप्तमप्यलङ्कारनिरूपणं सूचीकटाहन्यायेनापहाय कृते रीतिनिरूपणे प्राप्तो योऽवसरस्तेन प्राप्तान् पूर्वोद्दिष्टत्वशान्निरूपणप्रसक्तान् अलङ्कारानाह निरूपयति मूलकार इति शेषः ।

(ख) अज्ञाते सामान्ये तद्विशेषज्ञानासम्भवादादौ सामान्यमलङ्कारलक्षणमाह शब्देति । अत्र शब्दार्थयोरित्युपलक्षणम्, रसादिधर्म्मस्वरूपाणां रसवदाद्यलङ्काराणामपि वक्ष्यमाणत्वात् । तथा शब्दार्थयोरिति साहित्यमभिधानक्रियापेक्षया, गर्गा भोज्यन्तामित्यादिवत् ; न तु तद्धर्मसम्बन्धापेक्षया अनुप्रासादीनां केवलशब्दधर्म्मत्वात् उपमादीनाञ्च केवलार्थधर्म्मत्वात् । अस्थिराः सर्वत्र अस्थायिनः शब्दे अर्थे वा स्थित एव अलङ्कारात्मकतद्धर्म्मैरपि स्थातव्यमिति नियमरहिता इत्यर्थः, निरलङ्कारयोरपि शब्दार्थयोर्बहुलमुपलम्भादिति भावः । शोभां काव्यस्य सौन्दर्य्यम् अतिशाययन्ति अतिशयेनोत्पादयन्तीति शोभातिशायिनः । रसादीनित्यादिशब्देन रसाभास-भाव-भावाभास-सन्धि-शबलतानां तेषामभावस्थले तयोः शब्दार्थयोरपि च ग्रहणम् । एतेन रसाद्यभावस्थले रामचरणेन यदलङ्काराणां गौणत्वमभिहितं तदपास्तम्, मुख्यत्वसम्भवे गौणत्वाङ्गीकारस्यान्याय्यत्वात् । उपकुर्वन्त उत्कर्षयन्तः । अलङ्क्रियते काव्यमेभिरित्यलङ्कारा इति करणव्युत्पन्नोऽयमलङ्कारशब्दः । अङ्गदं केयूरम् आदिशब्दात् हारादीनां ग्रहणम् । अस्थिराः शोभातिशायिनो रसादीनुपकुर्वन्तः शब्दार्थयोर्ये धर्म्मास्ते अङ्गदादिवदलङ्कारा इत्यन्वयः । एतेन—

साक्षात् परम्परया वा रसाद्युत्कर्षजनकत्वे सति अनियतशोभातिशायिकाव्यधर्म्मत्वमलङ्कारत्वम् ।

इत्यलङ्कारलक्षणं पर्य्यवसितम् । तथा च साक्षादेव रसाद्युत्कर्षजनकत्वं रसवदाद्यलङ्काराणाम् । स्वाश्रयव्यञ्जकतारूपपरम्परासम्बन्धेन रसाद्युत्कर्षजनकत्वमनुप्रासोपमादीनाम् । काव्यशब्देन च स्वशरीरभूतौ शब्दार्थौ स्वात्मभूता रसादयश्चेति समुदाय एवोच्यत इति सर्वत्र लक्षणसङ्गतिः । तत्र कालिदासप्रणीतत्वादिरूपकाव्यधर्म्मेष्वतिव्याप्तिवारणाय सत्यन्तदलम् । गुणेष्वतिव्याप्तिवारणाय अनियतेति । शब्दे अर्थे च

यथा—अङ्गदादयः शरीरशोभातिशायिनः शरीरिणमुपकुर्वन्ति, तथाऽनुप्रासोपमादयः शब्दार्थशोभातिशायिनो रसादेरुपकारका ये ते अलङ्कारा: (१) (ग)। अस्थिरा इति नैषां गुणवदावश्यकी स्थितिः (घ)।

शब्दार्थयोः प्रथमं शब्दस्य बुद्धिविषयत्वात् शब्दालङ्कारेषु वक्तव्येषु शब्दार्थालङ्कारस्यापि पुनरुक्तवदाभासस्य चिरन्तनैः शब्दालङ्कारमध्ये लक्षितत्वात् प्रथमं तमेवाह—(ङ)

२। आपाततो यदर्थस्य पौनरुक्त्यावभासनम् (२)।
पुनरुक्तवदाभासः स भिन्नाकारशब्दगः ॥ (च)

यस्य कस्यचिद्गुणस्यावश्यस्थातव्यत्वात्तेषां नियतत्वमेवेति बोध्यम्। रीतिष्वतिव्याप्तिवारणाय च शोभातिशायीति विशेषणम्। रीतीनां शोभामात्रजनकत्वमेव, न पुनः शोभातिशयजनकत्वमित्यवधेयम्।

(ग) कारिकागतानामितरशब्दानां सुगमार्थताभिप्रायेण केवलमङ्गदादिवदिति सादृश्यमात्रं स्पष्टयति यथेति। शरीरस्य शोभातिशायिनः शोभातिशयजनकाः, शरीरिणं तच्छरीरगतमात्मानम्, उपकुर्वन्ति सन्तोषोत्पादनेनानुकूलयन्ति। अनुप्रासादयः शब्दालङ्काराः शब्दशोभाम् उपमादयश्चार्थालङ्कारा अर्थशोभामतिशाययन्तीत्युभयवर्गप्रदर्शनायोभयोपादानम्। शब्दार्थयोः शोभातिशायिनः शोभातिशयजनकाः। उपकारका उत्कर्षजनकाः। ये धर्म्माः।

(घ) अस्थिरा इत्यस्य व्यावृत्तिमाह अस्थिरा इति। एषाम् अलङ्कारत्वेनाभिमतानां शब्दार्थधर्म्माणाम्। आवश्यकी नियता। तथा च रसादिमति शब्दे अर्थे च यस्य कस्यचिद्गुणस्य नियतैव स्थितिः, अलङ्काराणान्तु न तथा, तेषां कादाचित्कत्वादिति अस्थिरा इत्यनेन गुणो व्यावर्त्त्यत इति भावः।

(ङ) प्रथमं शब्दालङ्काराणां लक्षणकरणे युक्तिं प्रदर्शयन् तत्रापि शब्दार्थोभयालङ्काररूपस्य पुनरुक्तवदाभासस्य सर्वप्रथमं लक्षणकरणे युक्तिं प्रदर्शयति शब्दे ति। शब्दार्थयोर्मध्ये। प्रथममर्थज्ञानात् पूर्वम्। शब्दज्ञानानन्तरमेव तत्सङ्केतग्रहद्वारा अर्थस्य ज्ञायमानत्वादिति भावः। प्रथमं शब्दालङ्कारेषु वक्तव्येष्वित्यर्थः। शब्दार्थालङ्कारस्य शब्दार्थोभयनिरूपितालङ्कारस्य। चिरन्तनैः प्राचीनैः। लक्षितत्वात् कृतलक्षणकत्वात्। प्राचीनानां रीतिमनुसरतैव पुनरुक्तवदाभासस्य प्रथमं लक्षणं कृतम्, अन्यथा अस्योभयालङ्कारत्वात् काव्यप्रकाशकारवदुभयालङ्कारमध्य एव लक्षणं क्रियेतेति भावः।

(च) आपातत इति। आपाततः श्रवणमात्रेणैव, न तु पर्य्यालोचनात् परमपीति भावः, अर्थस्य अभिधेयस्य यत् पौनरुक्त्येन पुनरुक्तत्वप्रकारेण अवभासनं प्रतीतिः, भिन्नाकारशब्दगः विभिन्नाकृतिविशिष्टशब्दवर्त्ती, स पुनरुक्तवदाभासो नाम अलङ्कार उच्यत इति शेषः। परत्र पुनरुक्ते ति भावे क्तः। तेन अर्थस्य पुनरुक्तवत् पुनरुक्तत्ववत् आभासात् आपाततः प्रतीतेरेवास्य पुनरुक्तवदाभास इति संज्ञा। अत्र

---

(१) क्वचित् ये ते इति नास्ति। (२) पौनरुक्त्येन भासनमिति पाठान्तरम्।

उदाहरणम्—"भुजङ्गकुण्डली व्यक्त-शशि-शुभ्रांशु-शीतगुः।
जगन्त्यपि सदापायादव्याच्चेतोहरः शिवः॥" (छ)

अत्र भुजङ्गकुण्डल्यादिशब्दानाम् आपातमात्रेण सर्पाद्यर्थतया पौनरुक्त्यप्रतिभासनम्। पर्य्यवसाने तु भुजङ्गरूपं कुण्डलं विद्यते यस्येत्याद्यन्यार्थत्वम् (ज)। पायादव्यादित्यत्र क्रियागतोऽयमलङ्कारः, "पायात्" इत्यस्य "अपायात्" इत्यत्र पर्य्यवसानात् (झ)।

भुजङ्गकुण्डलीतिशब्दयोः प्रथमस्यैव परिवृत्तिसहत्वम्। हरः शिव इति द्वितीयस्यैव। शशि-शुभ्रांशु इति द्वयोरपि। "भाति सदानत्यागः" इति न द्वयोरपीति शब्दपरिवृत्तिसहत्वासहत्वाभ्यामस्योभयालङ्कारत्वम् (ञ)।

भिन्नाकारशब्दग इत्यभिधानात् भिन्नाकारशब्दगतत्वे पुनरुक्तवदाभासः, अभिन्नाकारशब्दगतत्वे तु "स सुरभिं सुरभिं सुमनोभरैः" इत्यादौ यमकमेवेति बोध्यम्।

(छ) शब्दस्य अभङ्गभङ्गाभ्यामयं द्विविधः; तत्र प्रथमं शब्दस्य अभङ्गे उदाहरणं भुजङ्गेति। भुजङ्ग एव कुण्डलमस्यास्तीति भुजङ्गकुण्डली, व्यक्तः प्रकाशितः शशिवत् कर्पूरवत् शुभ्रांशुः श्वेतकिरणः शीतगुः शीतरश्मिश्चन्द्रो यस्मिन् सः "कर्पूरश्चन्द्रसंज्ञकः" इत्यमरः, तथा चेतोहरो मनोहरः, शिवो महादेवः, सदा अपायाद्विपदः न केवलं मां जगन्त्यपि भुवनान्यपि अव्यात् रक्ष्यात् इत्याशीर्विभक्तिः।

अत्र भुजङ्गकुण्डलीति सर्पवाचकयोः शब्दयोः, शशि-शुभ्रांशु-शीतगुरिति चन्द्रवाचकानां शब्दानाम्, पायादव्यादिति रक्षार्थकक्रिययोश्च श्रवणमात्रेणैव तत्तदर्थस्य पुनरुक्ततया प्रतीतिः, पर्य्यालोचने तु उक्तव्याख्यानरूपभेदात् पुनरुक्तवदाभासः।

(ज) उक्तं लक्ष्ये लक्षणं सङ्गमयति अत्रेति। प्रथमादिपदेन शशिशब्दप्रभृतीनां द्वितीयादिपदेन च चन्द्राद्यर्थानां ग्रहणम्। आपातमात्रेण श्रुतावुपस्थितिमात्रेण। पौनरुक्त्यप्रतिभासनं पुनरुक्ततया प्रतीतिः। पर्य्यवसाने तु उपस्थितेः परन्तु अर्थानुसन्धानवेलायान्त्वित्यर्थः। तृतीयादिपदेन कर्पूराद्यन्यार्थानां ग्रहणम्। अन्यार्थत्वमिति। तत्तु व्याख्यायामेव प्रदर्शितम्।

(झ) "भिन्नाकारशब्दगः" इत्यत्र शब्दपदस्य सामान्यमुखप्रवृत्ततया अर्थबोधकशब्दमात्रपरत्वादाह पायादिति। क्रियागतः क्रियावाचकशब्दार्थनिरूपितः। नन्वस्तु क्रियागतः, तथात्वेऽपि कथमनयोरर्थभेद इत्याह पायादिति। इत्यस्य शब्दस्य। इत्यत्र रूपे। पर्य्यवसानात् सन्धौ लुप्तस्य अकारस्य प्रश्लेषकल्पनेन परिणतत्वात्, अन्यार्थत्वमित्यनुषज्यते।

(ञ) ननु कथमस्य शब्दार्थोभयालङ्कारत्वमित्याह भुजङ्गेति। प्रथमस्यैव भुजङ्गशब्दस्यैव। एवशब्देन द्वितीयस्य व्यवच्छेदः। परिवृत्तिसहत्वं सर्पार्थकशब्दान्तरप्रयोगेण परिवर्त्तनेऽपि प्रकृतपुनरुक्तवदाभासघटकत्वम्। अत्रेदमवधेयम्—अन्वयव्यतिरेकाभ्यामेव गुणदोषालङ्काराणां शाब्दत्वस्य आर्थत्वस्य तदुभयरूपत्वस्य च व्यवस्था; अन्यथा शब्दार्थयोर्नित्यसम्बन्धतया सर्वत्रैव सर्वेषामेव शाब्दत्वार्थत्वसङ्करा-

३ । अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् । (ट)

पत्तेस्तद्देव्यवस्थैव न स्यात् । तथा च "भुजङ्गकुण्डली" इत्यत्र भुजङ्गशब्दस्थाने पन्नगशब्दोपादानेऽपि पुनरुक्तवदाभासस्य सम्भव एव, सर्पभिन्नार्थकसुवर्णादिशब्दोपादाने तु तस्य न प्रसक्तिरपि ; इत्यतः सर्परूपार्थसत्त्वे पुनरुक्तवदाभाससत्ता, सर्परूपार्थासत्त्वे तु पुनरुक्तवदाभासासत्ता, इत्यन्वयव्यतिरेकाभ्यां भुजङ्गत्वंशे पुनरुक्तवदाभासस्य आर्थत्वम् । कुण्डलीतिशब्दस्य तु न परिवृत्तिसहत्वम् । तथाहि कुण्डलिशब्दस्थाने सर्पार्थकभुजगशब्दोपादाने सर्पभिन्नार्थकभूषणादिशब्दोपादाने वा पुनरुक्तवदाभासस्यासम्भव एव, आद्ये पर्य्यवसानेऽप्यर्थभेदासम्भवात् द्वितीये आपाततोऽपि पौनरुक्त्यावभासनाभावात् । एवञ्च कुण्डलिशब्दसत्त्वे पुनरुक्तवदाभाससत्ता कुण्डलिशब्दासत्त्वे तु पुनरुक्तवदाभासासत्तेति कुण्डलीत्यंशे पुनरुक्तवदाभासस्य शाब्दत्वम् । तेन चास्य शब्दार्थोभयघटितत्वात्तदुभयालङ्कारत्वम् । एवमेवोत्तरत्रापि पर्य्यालोचनीयम् ।

द्वितीयस्यैव शिवशब्दस्यैव परिवृत्तिसहत्वमित्यनुषङ्गः, न तु हर इत्यस्यापीत्यर्थः । तेन शिव इत्यंशे आर्थत्वं हर इत्यंशे च शाब्दत्वमिति भावः । द्वयोः शब्दयोः अपिशब्दात् तृतीयस्य शीतगुशब्दस्य च परिवृत्तिसहत्वमित्यन्वयः । तेन द्वितीयपादे केवलार्थत्वमेवेत्याशयः । द्वयोरपि दानत्यागशब्दयोर्न परिवृत्तिसहत्वमिति सम्बन्धः । तेनात्र केवलशाब्दत्वमेवेत्यभिप्रायः । इति द्वैतीः, शब्दानां परिवृत्तेः परिवर्त्तनस्य सहत्वमसहत्वञ्च ताभ्याम्, अस्य पुनरुक्तवदाभासस्य ।

भातीति श्लोकसमुदायो यथा काव्यप्रकाशे—

"अरिवधदेहशरीरः सहसारथिसूततुरगपादातः । भाति सदानत्यागः स्थिरतायामवनितलतिलकः ॥"

इदमेव च शब्दस्य भङ्गे उदाहरणम् ।

अस्यार्थः—न विद्यते रथी रथारोही सूतः सारथिः तुरगोऽश्वः पादातं पदातिसमूहश्च यस्य सः अरथिसूततुरगपादातोऽपि सन्, सहसा शीघ्रमेव, अरीणां वधदा विनाशविधायिनी ईहा चेष्टा यस्मिन् तदरिवधदेहं शरीरं यस्य स तथोक्तः स्थिरतायाम् अगः पर्वत इव, तथा अवनितलतिलकश्च भवान्, सत्सु साधुजनेषु आनत्या विशेषनम्रभावेन विद्यमानः सन् भाति राजते ।

अत्र देहशरीरयोः सारथिसूतयोः दानत्यागयोश्च शब्दयोरापाततोऽर्थस्य पुनरुक्ततया प्रतीतेः पर्य्यवसाने तु व्याख्यातरूपभेदात् पुनरुक्तवदाभासः । अत्र देह-सारथि-दानशब्दघटने शब्दान्तराणां भङ्गः ।

(ट) शब्दालङ्कारेष्वपि अतिप्रसिद्धतया प्रथममनुप्रासमेव सामान्येन लक्षयति अन्विति । स्वरस्य वैषम्ये सत्यपि अपिशब्दात् साम्ये सत्यपि च यत् शब्दसाम्यं व्यञ्जनवर्णमात्रसादृश्यम्, सोऽनुप्रास इत्यर्थः । अत्र एकस्थानोच्चार्य्यत्वरूपं साम्यं ग्राह्यम् । एकस्थानोच्चार्य्यत्वञ्च केषाञ्चिद्व्यञ्जनानाम् एकविधाकृतिमत्त्वेन केषाञ्चिद् एकतालव्यत्वादिना सम्भवति । तेन स्वरस्य साम्ये वैषम्ये वा एकस्थानोच्चार्य्यव्यञ्जनावृत्तिरनुप्रास इति फलितम्। तत्र एकतालव्यादिव्यञ्जनावृत्तौ श्रुत्यनुप्रासः, एकविधाकृतिमद्व्यञ्जनावृत्तौ तु अन्ये अनुप्रासा इति सर्वत्र लक्षणसङ्गतिः । एवम् अन्त्यानुप्रासलाटानुप्रासयोः स्वरस्य साम्यमेवावश्यकम्, अन्येषान्तु न तथा ।

न चैवं स्वरव्यञ्जनयोरुभयोरेव साम्ये यमकेऽप्यस्य लक्षणस्य सङ्गतेरतिव्याप्तिरिति वाच्यम्, सामान्यविशेषन्यायेनास्य यमकेतरविषयत्वकल्पनात् तत्रानुप्रासः सामान्यं यमकन्तु विशेष इति ।

स्वरमात्रसादृश्यन्तु वैचित्र्याभावान्न गणितम् (ठ)। रसाद्यनुगतत्वेन प्रकर्षेण न्यासोऽनुप्रासः (ड)।

४। छेको व्यञ्जनसङ्घस्य सकृत्साम्यमनेकधा ॥ (ढ)

छेकश्छेकानुप्रासः (ण)। अनेकधेति स्वरूपतः क्रमतश्च (त)। "रसः सरः" इत्यादिः क्रमभेदेन सादृश्यं नास्यालङ्कारस्य विषयः (थ)। उदाहरणं मम तातपादानाम्—(द)

(ठ) ननु कारिकायां स्वरस्य वैषम्येऽपीत्यभिधानात् शब्दपदेन व्यञ्जनमात्रमेव गृहीतम्, किन्तु केवलस्वराणामपि तद्वदेव साम्यसम्भवे कथं तन्न गृहीतमित्यत आह स्वरेति । स्वरमात्रसादृश्यन्तु केवलस्वराणामेव साम्यन्तु । न गणितम् अनुप्रासत्वेन लक्षितम् । व्यञ्जनसाम्याभावे केवलस्वरसाम्यं नानुप्रास इत्यर्थः । वैचित्र्याभावात् वैचित्र्यस्यैव चालङ्काररूपत्वादिति भावः । तेन "नर पच" इत्यत्र व्यञ्जनसाम्याभावे अकाररूपस्वरचतुष्टयमात्रस्य साम्ये नानुप्रास इति बोध्यम् ।

(ड) अनुप्रासशब्दस्य योगार्थं दर्शयति रसादीति । आदिपदेन रसाभासादीनां ग्रहणम् । रसादीनाम् अनुगतत्वेन अनुकूलकत्वेन इत्यनुशब्दस्यार्थः । प्रकर्षेणेति प्रशब्दस्यार्थः । न्यासः स्थापनं प्रयोग इति आसशब्दस्यार्थः ।

(ढ) छेकानुप्रासं लक्षयति छेक इति । व्यञ्जनसङ्घस्य व्यञ्जनवर्णसमूहस्य सकृत् एकवारमात्रम् अनेकधा अनेकप्रकारेण साम्यं सादृश्यं छेकश्छेकानुप्रासः । समूहो नाम बहूनामेव सम्भवति, न पुनरेकस्य द्वयोर्वा । तेन एकक्रमेणावस्थितानां बहुतरव्यञ्जनवर्णानामेकविधाकृतिमत्त्वरूपमेकवारमात्रसादृश्यं छेकानुप्रास इत्यर्थः । अत्र बहुतरेत्युपादानात् "धृतच्, ताडुर" इत्यत्र केवलतकारद्वयस्य सादृश्ये छेकानुप्रासविषये नातिव्याप्तिः । एकैकस्य दलस्य मध्ये वर्णान्तरव्यवधाने तु सादृश्ये नायमलङ्कारः "सन्निहिते बुद्धिरन्तरङ्गा" इति न्यायात् । यथा—"मुनिर्जयति योगीन्द्रो अब्धिं जिष्णोः पपौ च यः ।" अत्र हि "ज यो" "ज यः" इत्यनयोर्द्वयोरेकैकस्यैव मध्ये वर्णान्तरैर्व्यवधानम् । तेनात्र श्रुत्यनुप्रास एव ।

अत्र सामान्यरूपतया विशेषेतरपरत्वनियमाद्विशेषभूतयोरन्त्यानुप्रासलाटानुप्रासयोर्यथासम्भवं प्राप्तावपि नातिव्याप्तिरित्यवधेयम् ।

(ण) छेक इति । एतेन भीमसेनशब्दस्य भीम इतिवत् छेकानुप्रासशब्दस्य छेक इत्येकदेश एव कारिकायामुपात्तः, लोके छेकानुप्रासशब्दस्यैव प्रसिद्धत्वादित्यभिप्रायः सूचितः ।

(त) अनेकधेतीति । उभयत्रापि तृतीयान्तात्तस् । तेन स्वरूपत एकविधाकृतिमत्त्वेन, क्रमत एकविधपौर्वापर्येण चेत्यर्थः । उत्तरत्राप्येवम् ।

(थ) तत्र एकविधाकृतिमत्त्वरूपसाम्यस्यैव लक्ष्यतया तद्ग्राह्यत्वसम्भवात् क्रमत इत्यस्य व्यावृत्तिमाह रस इति । क्रमभेदेन भिन्नपौर्वापर्येण, सादृश्यं केवलैकविधाकृतिमत्त्वेन साम्यम् । अस्य छेकानुप्रासस्य, न विषयो न स्थानम् ।

"आदाय वकुलगन्धानन्धीकुर्वन् पदे पदे भ्रमरान्।
अयमेति मन्दमन्दं कावेरीवारिपावनः पवनः॥" (ध)

अत्र "गन्धानन्धी" इति संयुक्तयोः, "कावेरीवारि" इत्यसंयुक्तयोः, "पावनः पवनः" इति बहूनां व्यञ्जनानां सकृदावृत्तिः (न)।

छेको विदग्धः, तत्प्रयोज्यत्वादेष छेकानुप्रासः (प)।

५। अनेकस्यैकधा साम्यमसकृद्वाऽप्यनेकधा।
एकस्य सकृदप्येष वृत्त्यनुप्रास उच्यते॥ (फ)

(द) उदात। अत्र तातं गौरवातिशयद्योतनाय तातपादशब्दस्येव तातेति लक्षणा। तद्गौरवार्थं च बहुवचनम्। स्ववंशपरम्पराया एव च कवित्वसुख्यातिं सूचयितुमिदमभिहितम्। तथा चालङ्कारशास्त्रीयोदाहरणानां सम्भवद्विषयतामात्रप्रदर्शनप्रयोजनतया श्रुत्यादिवदाप्तवाक्यत्वावश्यकत्वाभावात् ईदृशमुदाहरणं नाहृद्यमित्यवधेयम्। एवमन्यत्रापि।

(ध) आदायेति। कावेर्या नद्याः वारिणा तद्वारिसंस्पर्शेनेत्यर्थः पावनः पवित्रताजनकः अयं पवनो वायुः, वकुलानां कुसुमानां गन्धानादाय पदे पदे स्थाने स्थाने भ्रमरान् अन्धीकुर्वन् तद्गन्धप्रापणेन तन्मधुपानलोभजननादन्धवन्मुग्धान् कुर्वन् मन्दमन्दम् एति आगच्छति।

(न) उदाहृते लक्षणं योजयति अत्रेति। संयुक्तयोर्न्धकारसंयुक्तयोर्धकारयोः। असंयुक्तयोर्वेरिवारिशब्दयोः। बहूनामसंयुक्तानामिति शेषः। सकृदावृत्तिरेकवारमात्रं पुनरुच्चारणम्। अतएवात्र छेकानुप्रास इति भावः। अत्र संयुक्तयोरसंयुक्तयोरित्यनेन संयोगासंयोगनैरपेक्ष्येण केवलव्यञ्जनसामान्यस्यैव उक्तविधसादृश्ये अयमलङ्कारो भवतीति दर्शितम्। "पदे पदे" "मन्दमन्दम्" इति वीप्सितपदेषु तु उक्तविधसाम्यसत्त्वेऽपि वैचित्र्याभावान्नायमलङ्कार इति बोध्यम्।

(प) इदानीं छेकानुप्रासशब्दस्य व्युत्पत्तिमाह छेक इति। विदग्धः सुरसिकपण्डितः। तथा च रभसः—"छेकस्त्रिषु विदग्धे पुं गृहासक्तमृगाण्डजे।"

(फ) वृत्त्यनुप्रासं लक्षयति अनेकस्येति। अनेकस्य व्यञ्जनवर्णस्य, एकधा स्वरूपत एव सकृत्साम्यं वृत्त्यनुप्रास इत्येकं लक्षणम्। अत्र एकधेत्यभिधानात् छेकानुप्रासे नातिव्याप्तिः। अनेकस्य व्यञ्जनस्य एकधा स्वरूपत एव असकृद्वा साम्यं वृत्त्यनुप्रास इति द्वितीयं लक्षणम्। अत्र तु एकधेति असकृदिति चोक्तत्वात् छेकानुप्रासे नातिप्रसङ्गः। प्रथमे पादे सकृदसकृदित्यनयोरेकस्याप्यनभिधानात् सामान्यत एव तदुभयं लभ्यत इति बोध्यम्। वा अथवा, अनेकस्य व्यञ्जनस्य अनेकधा स्वरूपतः क्रमतश्च असकृत् साम्यं वृत्त्यनुप्रास इति तृतीयं लक्षणम्। अत्र अपिशब्दादनेकस्येत्यनुषज्यते। असकृदिति विशेषणाच्च छेकानुप्रासे न लक्षणसङ्गतिः। एकस्य व्यञ्जनवर्णस्य सकृत् साम्यं वृत्त्यनुप्रास इति चतुर्थं लक्षणम्। अत्राप्यपिशब्दात् असकृदित्यनुषज्यते। तेन एकस्य व्यञ्जनवर्णस्य असकृत् साम्यञ्च वृत्त्यनुप्रास इति पञ्चमं लक्षणम्। अनयोरेकस्येत्यभिधानात् छेकानुप्रासे नातिव्याप्तिः। तथा च वृत्त्यनुप्रासः समुदायेन पञ्चविध इति द्रष्टव्यम्।

एकधा स्वरूपत एव, न तु क्रमतोऽपि। अनेकधा स्वरूपतः क्रमतश्च। सकृदपीत्यपिशब्दादसकृदपि। उदाहरणम्—

"उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-
क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः।
नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-
प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः॥" (ब)

अत्र "रसोल्लासैरमी" इति रसयोरेकधैव साम्यम्, न तु तेनैव क्रमेणापि। द्वितीये पादे (१) कलयोरसकृत् तेनैव क्रमेण च। प्रथमे एकस्य मकारस्य (२) सकृत्, धकारस्य चासकृत् (भ)।

रसविषयव्यापारवती वर्णरचना वृत्तिः, तदनुगतत्वेन प्रकर्षेण न्यसनाद्वृत्त्यनुप्रासः (म)।

अस्यापि सामान्यरूपतया विशेषेतरपरत्वनियमात् विशेषभूतयोरन्त्यानुप्रासलाटानुप्रासयोर्यासम्भवं प्राप्तावपि नातिव्याप्तिरिति चावधेयम्।

(ब) एकेनैव पद्येन निरुक्तपञ्चविधानामेव वृत्त्यनुप्रासानां लक्ष्याणि दर्शयति उन्मीलदिति। वसन्तवर्णनेयं जयदेवस्य। ध्यानं प्रियतमायाश्चिन्तनमेव अवधानं मनोयोगस्तस्य क्षणे समये प्राप्तः प्राणसमाया दयितायाः समागमरसेन सम्भोगानन्देन उल्लास आनन्दो यैस्तथोक्तैः, पथिकैर्विदेशस्थैः कामिभिर्जनैः, उन्मीलत्सु परितः प्रसरत्सु मधुगन्धेषु कुसुमरससौरभेषु लुब्धा ये मधुपा भ्रमरास्तैर्व्याधूतेषु समाकम्पितेषु चूताङ्कुरेषु आम्रमुकुलेषु तत्समीपेष्वित्यर्थः क्रीडतां खेलया विचरतां कोकिलानां याः काकल्यः सूक्ष्मकलरवास्तासां कलकलैः कोलाहलैः उद्गीर्णा उत्पादिताः कर्णेषु ज्वराः सन्तापा येषु ते तादृशाः, अमी वसन्तकालीया वासरा दिवसाः, कथं कथमपि अतिकष्टेनेत्यर्थः नीयन्ते अतिक्रम्यन्ते।

(भ) उदाहृते लक्षणानि सङ्गमयितुमाह अत्रेति। इति इत्यत्र, र-सयो रेफदन्त्यसकारयोः, एकधैव स्वरूपत एव, साम्यं सकृत् सादृश्यम्। न त्विति। "रसो" इत्यत्र रेफस्य पूर्ववर्तित्वात् "सैर" इत्यत्र तु तस्य परवर्तित्वादिति भावः। अतएवात्र प्रथमलक्षणसङ्गतिः। अतएव च पद्यस्य अन्त्यभागमादाय प्रदर्शनारम्भ इति बोध्यम्। "वासराः" इत्यस्य च "सराः" इत्यंशमादाय "रसो" इत्यनेन तद्देव एकधैवासकृत् साम्याद्द्वितीयलक्षणसङ्गतिरित्यनुसन्धेयम्। क-लयोः ककार-लकारयोः, तेनैव क्रमेण वकारात् स्वरूपेण च असकृत् साम्यम्। अतस्तृतीयलक्षणसङ्गतिरित्याशयः। प्रथमे पादे इत्यनुषज्यते। सकृत् साम्यम्। अतश्चतुर्थलक्षणसङ्गतिरित्यभिप्रायः। एकस्य धकारस्य च असकृत् साम्यम्। अतश्च पञ्चमलक्षणसङ्गतिरिति भावः। "उद्गीर्णकर्ण" इत्यत्र तु छेकानुप्रासः। "समा समा" इत्यत्र च यमकमेवेत्यनुसन्धेयम्।

---

(१) क्वचित् पादे तु इति पाठः। (२) तकारस्य इति पाठान्तरम्।

६ । उच्चार्य्यत्वाद्यदेकत्र स्थाने तालुरदादिके ।
साद्दश्यं व्यञ्जनस्यैव श्रुत्यनुप्रास उच्यते ॥ (य)

उदाहरणम्—"दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः ।
विरूपाक्षस्य जयिनीस्ताः स्तुमो वामलोचनाः ॥" (र)

अत्र "जीवयन्ति" इति "याः" इति, "जयिनीः" इति (१) जकार-यकारयोरेकत्र स्थाने तालौ उच्चार्य्यत्वात् साद्दश्यम् (ल) । एवं दन्त्यकण्ठ्याना-मप्युदाहार्य्यम् (व) ।

(म) इदानीं वृत्त्यनुप्रासशब्दस्य योगार्थमाह रसेति । रसविषयव्यापारो रसादीनां पुष्टिनद्रती जनकतासम्बन्धेन तद्विशिष्टा रसादिपुष्टिकारिणीत्यर्थः, वर्णरचना वैदर्भी-गौडी-पाञ्चाली-लाटी सञ्ज्ञक-रीतिरूपा वर्णयोजना । तदनुगतत्वेन तदनुकूलकत्वेन । व्यसनात् स्थापनादभिधानादित्यर्थः ।

(य) श्रुत्यनुप्रासं निरूपयति उच्चार्य्यत्वादिति । रदा दन्ताः । आदिशब्देन ओष्ठ-मूर्द्ध-कण्ठानां ग्रहणम् । तथा च तालुरदादिके एकत्र एकस्मिन् स्थाने उच्चार्य्यत्वात् उच्चार्य्यत्वं पुरस्कृत्य उच्चारणीयत्वरूप-मित्यर्थः, व्यञ्जनस्यैव केवलव्यञ्जनवर्णस्य यत् साद्दश्यम्, तत् श्रुत्यनुप्रास उच्यते । अत्र एकस्थानीयार्य्यत्व-रूपसाद्दश्यग्रहणात् एकविधाकृतिमत्त्वरूपस्वरूपापेक्षा नास्तीति प्रतिपादितम् । एवकारेण च स्वराणामेक-स्थानीयार्य्यत्वरूपं साद्दश्यं वैचित्र्याभावान्न श्रुत्यनुप्रास इति सूचितम् ।

(र) दृशेति । पद्यमिदं विद्धशालभञ्जिकायाम् । या वामलोचनाः, दृशा शिवस्य तृतीयनेत्रेण दग्धं मनसिजं मदनं दृशैव दृष्ट्यैव जीवयन्ति । अतएव विरूपाक्षस्य विषमनेत्रस्य शिवस्य जयिनीर्विजय-कारिणीः, ता वामलोचना महिलाः स्तुमो नुमः ।

(ल) उदाहृते लक्षणं योजयति अत्रेति । तालाविति । "इचवर्ग-चवर्ग-य-शास्तालव्याः" इत्यनु-शासनादिति भावः । साद्दश्यमिति । अतएव श्रुत्यनुप्रास इति शेषः ।

(व) एवमिति । दन्त्यकण्ठ्यानामिति बहुवचनादोष्ठ्यमूर्द्धन्यानामपि ग्रहणम् ।

तत्र दन्त्यानां यथा नैषधे—

"तदहं विदधे तथा तथा दमयन्त्याः सविधे तव स्तवम् ।
हृदये निहितस्तया भवान् अपि नेन्द्रेण यथापनीयते ॥"

अत्र "लृवर्ण-तवर्ग-ल-सा दन्त्याः" इत्यनुशासनात् त-थ-द-ध-न-सकाराणामेकदन्तस्थानीयार्य्यतया साद्दश्यात् श्रुत्यनुप्रासः ।

कण्ठ्यानां यथा शिशुपालवधे—

"हरत्यघं सम्प्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् ॥"

---

(१) इत्यत्र इति पाठान्तरम् ।

एष च सहृदयानामतीवश्रुतिसुखावहत्वाच्छ्रुत्यनुप्रासः (ग) ।

७। व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु ।
आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत् ॥ (घ)

"यथावस्थम्" इति यथासम्भवमनुस्वार-विसर्ग-स्वरसंयुक्ताक्षरविशिष्टम् (ङ)। एष च प्रायेण पादस्य पदस्य चान्ते प्रयोज्यः (च)। पादान्तगो यथा मम—

अत्र "अवर्ण-कवर्ग-ह-विसर्जनीयाः कण्ठ्याः" इति न्यायात् ह-ख-क-गकाराणामेककण्ठस्थानीयोच्चार्यतया सहृदयत्वात् श्रुत्यनुप्रासः ।

ओष्ठ्यानां यथा उद्भटः—

"पिनाक-फणि-बालेन्दु-भस्म-मन्दाकिनीयुता ।
तथापि भव ! ते मूर्त्तिरपवर्गफलप्रदा ॥"

अत्र "उवर्ण-पवर्गोपध्मानीया ओष्ठ्याः" इति नियमात् प-फ-ब-भ-मकाराणामेकौष्ठस्थानीयोच्चार्यतया सहृदयत्वात् श्रुत्यनुप्रासः ।

मूर्द्धन्यानां यथा मम वङ्गीयप्रतापनाटके—

"वमति विषधरश्चेन् साधु पीयूषराशिं विकिरति शिखां वा शीतलश्चेन् खरांशुः ।
नहि खलु खललोकात् सत्प्रथा सा तथापि क्वचिदपि हि जनानां चीयते न स्वभावः ॥"

अत्र "ऋवर्ण-टवर्ग र षा मूर्द्धन्याः" इत्यनुशासनात् ष-र-षकाराणामेकमूर्द्धस्थानीयोच्चार्यत्वात् श्रुत्यनुप्रासः ।

(ग) इदानीं श्रुत्यनुप्रासशब्दस्य योगार्थमाह एष चेति । एषोऽलङ्कारः ।

(घ) अन्त्यानुप्रासं लक्षयति व्यञ्जनमिति । अवस्थां प्रथमोच्चारितव्यञ्जनावस्थामनतिक्रम्य स्थितमिति यथावस्थं व्यञ्जनम्, चेद्यदि, आद्येन प्राथमिकेन प्रथमोच्चारितव्यञ्जनपूर्ववर्त्तिस्वरसमानाकारेण स्वरेण सह, आवर्त्यते पुनरुच्चार्यते ; तत्तदा अन्त्यानुप्रासः । नन्वन्त्यानुप्रास इति संज्ञां प्रति को हेतुरित्याह अन्त्ययोज्यत्वादिति । अन्त एव अन्त्यः स्वार्थे यः । तथा च अन्ते पादस्य पदस्य वा अवसाने योज्यत्वात् योज्यत्वादेव अस्य अन्त्यानुप्रास इति संज्ञेत्याशयः । अत्र यथावस्थमित्यनेन प्रथमोच्चारितव्यञ्जनपरवर्त्तिस्वरमात्रमेव ग्राह्यम्, न तु तदाद्यस्वरोऽपि तस्य तत्पूर्वव्यञ्जनावस्थारूपतयैव प्रसिद्धत्वादित्यत आह आद्येन स्वरेण सहेति ।

(ङ) यथावस्थपदस्यार्थमाह यथेति । अत्रानुस्वारविसर्गौ व्यञ्जनात् पूर्ववर्त्तिनौ परवर्त्तिनौ च ग्राह्यौ, स्वरस्तु व्यञ्जनात् परवर्त्त्येव, संयुक्ताक्षरं स्वस्मिन् सम्मिलितवर्णः, तैर्विशिष्टमिति परोच्चारणीयव्यञ्जन-विशेषणम् ।

(च) भूयोदर्शनं संभाव्युत्पत्तिञ्चानुसृत्य व्यवस्थामाह एष चेति । अन्त्यानुप्रास इत्यर्थः । प्रायेण बाहुल्येन पादस्य अन्ते, क्वचित् पदस्य अन्ते चेत्यर्थः ।

"केशः काशस्तवकविकासः कायः प्रकटितकरभविलासः ।
चक्षुर्दग्धवराटककल्पं त्यजति न चेतः काममनल्पम् ॥" (च)

पदान्तगो यथा—"मन्दं हसन्तः पुलकं वहन्तः" इत्यादि (क) ।

८ । । शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्य्यमात्रतः ।
लाटानुप्रास इत्युक्तो—(ख)

उदाहरणम्—"स्मेरराजीवनयने ! नयने किं निमीलिते ।
पश्य निर्जितकन्दर्पं कन्दर्पवशगं प्रियम् ॥" (ग)

(च) केश इति । जराजीर्णतायामपि अत्यन्तविषयासक्तं कञ्चित् प्रति कस्यचिन्निन्दाव्यञ्जकोक्तिरियम् । केशः, काशस्तवकस्य काशकुसुमगुच्छस्य विकास इव विकासः प्रकाशो यस्य स तथाभूतः, पक्कतया अतीवशुभ्रवर्णः सञ्जात इत्यर्थः ; कायः शरीरम्, प्रकटितो व्यक्तीकृतः करभस्य करिशावकस्य विलास इव विलासो भङ्गी येन स तथोक्तः कुब्जीभूत इति तात्पर्य्यम् । तथा चक्षुः दग्धो यो वराटकः कपर्द्दकस्तत्कल्पं तत्तुल्यम् ; तथापि चेतश्चित्तं कर्त्तृ अनल्पं विशालं कामं विषयासक्तिं न त्यजति । अहो मोहप्रभाव इति भावः ।

अत्र प्रथमपादान्तगत 'आसः' इत्यंशः द्वितीयपादान्ते, तृतीयपादान्तगतश्च 'अल्पम्' इत्यंशश्चतुर्थपादान्ते पुनरुच्चारित इति आद्यस्वरेण सह यथावस्थितव्यञ्जनस्य पुनरुच्चारणादन्त्यानुप्रासः ।

(क) मन्दमिति । अस्य सम्पूरितपरपादद्वयं यथा—

"मन्दं हसन्तः पुलकं वहन्तः प्रत्यग्रकान्ताः श्वरतापतान्ताः ।
वने प्रशान्ते तरुणास्त्रयस्ते चलत्सुचेलं विविशुः सखेलम् ॥"

अत्र "हसन्तः" इति पदान्तगतः 'अन्तः' इत्यंशः "वहन्तः" इति पदस्यान्ते पुनरुच्चारित इति अन्त्यानुप्रासः ।

(ख) लाटानुप्रासं निरूपयति शब्देति । तात्पर्य्यमात्रतस्तात्पर्य्यविषयीभूतात् केवलादन्वयादेव भेदं वक्तुरभिप्रेतसम्बन्धमात्रभेदेनैव शब्दार्थयोर्भेदे सतीत्यर्थः. शब्दार्थयोरुभयोरेव यत् पौनरुक्त्यं पुनरुक्तिः, स लाटानुप्रास इत्युक्तः, कविभिरिति शेषः । अत्र "स्मेरराजीवनयने ! लोचने किं निमीलिते" इत्यादौ अर्थमात्रपौनरुक्त्ये शब्दपौनरुक्त्याभावे अतिव्याप्तिवारणायाह शब्देति । "स सुरभिं सुरभिं सुमनोभरैः" इत्यादौ शब्दमात्रपौनरुक्त्ये अर्थपौनरुक्त्याभावे यमके अतिव्याप्तिवारणायोक्तमर्थेति । "चित्रं चित्रमनाकाशे कथं सुमुखि ! चन्द्रमाः" इत्यादौ चित्रं चित्रमिति शब्दार्थयोरुभयोरेव पौनरुक्त्ये तात्पर्य्यमात्रतोऽपि भेदाभावस्थले अतिव्याप्तिनिरासायाह "भेदे तात्पर्य्यमात्रतः" इति ।

(ग) स्मेरेति । स्मेरं प्रस्फुटं राजीवं पद्ममिव नयनं यस्यास्तत्सम्बोधनम् । नयने नेत्रद्वयं किं निमीलिते मानवशाम्मुद्रिते ? । निर्जितो रूपेण विजितः कन्दर्पो येन तं तादृशं प्रियं पतिं कन्दर्पवशगं कामायत्तं पश्य । अतो मानमपहाय तेन चरितार्थयेति भावः ।

अत्र विभक्त्यर्थस्यापौनरुक्त्येऽपि मुख्यतरस्य प्रातिपदिकांशद्योत्यधर्म्मि-रूपस्य अभिन्नार्थत्वात् (१) लाटानुप्रासत्वमेव (घ)।

"नयने तस्यैव नयने च ।" (२४० पृष्ठे)

अत्र द्वितीयनयनशब्दो भाग्यवत्त्वादिगुणविशिष्टत्वरूपतात्पर्य्यमात्रेण भिन्नार्थः (ङ)। यथा वा—(च)

"यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य ॥" (छ)

अत्र "नयने नयने" इति शब्दार्थयोः "कन्दर्प कन्दर्प" इति शब्दार्थयोश्च पौनरुक्त्यात् पूर्वत्र सम्बोधनविषयत्व-कर्म्मत्वरूपसम्बन्धभेदात् परत्र च कर्म्मत्वसम्बन्धित्वरूपसम्बन्धभेदाच्च लाटानुप्रासः।

(घ) नन्वत्राहते नयनशब्दयोः कन्दर्पशब्दयोश्च पौनरुक्त्येऽपि तदुभयगतविभक्त्यर्थानां भेदेन पौनरुक्त्याभावात् कथं निरुक्तलक्षणसङ्गतिरित्याह अत्रेति। मुख्यतरस्य विभक्त्यर्थापेक्षया प्रथमोपस्थितिकत्वेन स्वातन्त्र्येण च प्रधानतरस्य। एतेन "गौणमुख्ययोर्मुख्ये कार्य्यसम्प्रत्ययः" इति न्यायात् कारिकायां शब्दार्थयोरित्यत्रार्थपदेन मुख्यतरः प्रकृत्यर्थ एव गृहीत इति सूचितम्। प्रातिपदिकांशेन "कृत्तद्धितसमासाश्च" इत्यनेन समस्तस्य पुनः प्रातिपादिकसंज्ञाकरणात् तदेकदेशरूपेण नयनशब्देन कन्दर्पशब्दद्वयेन च, द्योत्य उपस्थाप्यो यो धर्म्मिरूपः तत्तद्व्यक्तिरूपधर्म्मशाली नेत्रादिरूपार्थः, अभिन्नार्थत्वात् अभिन्नपदार्थत्वेन पुनरुक्तत्वात्, लाटानुप्रासत्वमेव अत्र प्रसज्जतोऽलङ्कारस्येत्यर्थः। अत्र एवशब्देन यमकत्वं व्यवच्छिद्यते। तथा च नयने इत्यादेः स्वरव्यञ्जनसंहतेस्तेनैव क्रमेणावृत्तावपि उक्तरीत्या प्रधानस्य प्रातिपदिकार्थस्य पार्थक्याभावाद्य यमकत्वमपीत्याशयः।

(ङ) ननु अर्थान्तरसंक्रमितवाच्यध्वनिस्थले कथं न लाटानुप्रास इत्याह नयने इति। भाग्यवत्त्वादिगुण एव विशिष्टत्वं विशेषणं तद्रूपेण तात्पर्य्यमात्रेण, भिन्नः अर्थः प्रातिपदिकार्थो यस्य सः। तथा चात्र प्रथमनयनशब्दस्य नेत्ररूप एवार्थः, द्वितीयनयनशब्दस्य तु भाग्यवत्त्वादिगुणविशिष्ट एव नेत्ररूपोऽर्थ इति प्रातिपदिकार्थयोरेव भेदेन पौनरुक्त्याभावान्न लाटानुप्रासः, किन्तु अर्थान्तरसंक्रमितवाच्यध्वनिमात्र मत्याशयः। अतएव च "दैन्येऽथ लाटानुप्रासोऽनुकम्पायां प्रसादने। अर्थान्तरसंक्रमितवाच्ये हर्षेऽवधारणे॥" इति कथितपदत्वदोषप्रतिप्रसवे लाटानुप्रासाऽर्थान्तरसंक्रमितवाच्यध्वनिश्च पृथगेवाभिहितः।

(च) इदानीं "पदानां स पदस्यापि" इत्यनेन काव्यप्रकाशकृता यद्बहुपदानामेकपदस्य वा आवृत्तौ लाटानुप्रासस्य भेदद्वयमङ्गीकृतम्, तदपि स्वमते विशेषानभिधानादङ्गीकृतमेवेति भङ्ग्या सूचयन्नाह यथा वेति।

(छ) अत्र बहुपदानामावृत्तौ काव्यप्रकाशधृतमेवोदाहरति यस्येति। यस्य कामिनः सविधे सकाशे दयिता वल्लभा न वर्त्तते, तस्य जनस्य सम्बन्धे तुहिनदीधितिः शीतरश्मिश्चन्द्रोऽपि दवदहनो दवाग्निः, तद्वदेव दारुणसन्तापकरत्वादित्याशयः। चकारस्त्वर्थे। यस्य तु कामिनः सविधे समीपे दयिता वल्लभा

---

(१) भिन्नार्थत्वादित्यपि पाठः।

अत्रानेकपदानां पौनरुक्त्यम् (ञ) ।

एष च प्रायेण लाटजनप्रियत्वाल्लाटानुप्रासः (झ) ।

९ । अनुप्रासः पञ्चधा ततः ॥ (ञ)

स्पष्टम् (ट) ।

१० । सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः ।
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ॥ (ठ)

वर्त्तते, तस्य जनस्य तु सम्बन्धे दवदहनो दावाग्निरपि तुहिनदीधितिः शीतरश्मिश्चन्द्रः ; तस्य सर्वपदार्थेषु शीतत्वस्यानुभवादिति भावः ।

अत्र सविधे इत्यादीनां बहुपदानां तदर्थानाञ्च पौनरुक्त्यात् परन्तु समीपे दयिताया अविद्यमानताविद्यमानतारूपसम्बन्धभावभेदेन भेदात् दवदहनतुहिनदीधित्योः प्रदर्शितप्रकारोद्देश्यविधेयभावरूपरीत्यरूपसम्बन्धभावभेदेन भेदाच्च लाटानुप्रासः ।

(ञ) अत्रेति । पौनरुक्त्यमित्युपलक्षणम्, उक्तविधसम्बन्धभेदश्च । तेनात्र लाटानुप्रास इत्याशयः । न चात्र स्वरव्यञ्जनसंहतेस्तेनैव क्रमेणावृत्तिसत्त्वाद्यमकमेवेति वाच्यम्, प्रातिपदिकार्थानां पार्थक्याभावात् प्रातिपदिकार्थपार्थक्य एव च यमकाङ्गीकारात् ।

एकपदपौनरुक्त्ये यथा शिशुपालवधे—

"शिवः पतिः श्रीमतिशासितुं जगज्जगन्निवासो वसुदेवसद्मनि ।"

अत्र जगज्जगदिति शब्दार्थयोः पौनरुक्त्यात् कर्मत्वसम्बन्धिलरूपसम्बन्धभावभेदाच्च लाटानुप्रासः । तेनात्र मल्लिनाथोक्तो छेकानुप्रासचिन्त्यः, छेकानुप्रासस्य सामान्यरूपतया लाटानुप्रासरूपविशेषितरूपत्वस्यैवौचित्यात् अन्यथा चानयोः साङ्कर्यापत्तेर्दुर्निवारत्वात् ।

अस्य चापरे भेदाः काव्यप्रकाशादावनुसन्धेयाः ।

(झ) इदानीं लाटानुप्रासशब्दस्य योगार्थमाह एष इति । लाटः सुरसिकः ।

(ञ) इदानीमनुप्रासमुपसंहरन् तद्भेदसङ्कलनमाह अन्विति । ततश्च छादिभेदात् । तथा च— छेकानुप्रासः १ । वृत्त्यनुप्रासः २ । श्रुत्यनुप्रासः ३ । अन्त्यानुप्रासः ४ । लाटानुप्रासः ५ । सन्निहितान्येवामीषामुदाहरणानि ।

(ट) स्पष्टमिति । अतो न किञ्चिद्व्याख्यातमित्याशयः ।

(ठ) अनुप्रासानन्तरं यमकस्यैव लोके प्रसिद्धतया इदानीं तदेव लक्षयति सत्यर्थे इति । अर्थे स्थिते सति, पृथग् भिन्नः अर्थः प्रकृतिप्रतिपाद्यमभिधेयं यस्यास्तस्याः, स्वरव्यञ्जनयोः संहतेः समूहस्य, ये क्रमेण पूर्वमुच्चारणम्, परमपि तेनैव क्रमेण आवृत्तिः पुनरुच्चारणम्, यमकं नामालङ्कारो विनिगद्यते । अत्र "सत्यर्थे" इत्यस्य क्रमेण तेनैव इत्यस्य चाभिप्रायं छन्दाविवाह । पृथगर्थाया इत्यभिधानात् लाटानुप्रासे नातिव्याप्तिः । तथा च प्रकृत्यर्थभेदे यमकं प्रकृत्यर्थभेदाभावे केवलतात्पर्यतो भेद एव लाटानुप्रास इति

अत्र द्वयोरपि पदयोः क्वचित् सार्थकत्वं क्वचिन्निरर्थकत्वम्, क्वचिदेकस्य सार्थकत्वमपरस्य निरर्थकत्वम्; अत उक्तं सत्यर्थं इति (ड)। तेनैव क्रमेणेति 'दमो मोदः' इत्यादेर्विविक्तविषयत्वं सूचितम् (ढ)। एतच्च पद-पादार्द्ध-(१) श्लोकावृत्तित्वेन पदाद्यावृत्तेश्च (२) अनेकविधतया प्रभूततमभेदम् (ण)। दिङ्मात्रमुदाह्रियते—(त)

परस्परभेदः। अत्र संहतिरनेकत्वम्; तच्च एकमात्रव्यञ्जनेन सह एकमात्रस्वरस्य सम्मेलनेनापि सम्भवति। तेन—

"नानाकारेण कान्ताभ्रूराराधितमनोभुवा।
विविक्तेन विलासेन ततक्ष हृदयं मम॥"

इति वामनसम्मतवर्णयमकस्थलेऽपि नाव्याप्तिः। न च "केशः काशस्तवकविकासः कायः प्रकटितकरभविलासः" इत्यादौ 'आसः' इति भागमादाय अन्त्यानुप्रासवद्यमकलक्षणस्यापि सङ्गतेरतिव्याप्तिरिति वाच्यम्, अन्त्यानुप्रासस्य पदपादान्तमात्रनियततया विशेषत्वेन यमकस्य तु तदनियततया सामान्यत्वेन यमकस्य अन्त्यानुप्रासेतरविषयकत्वकल्पनात् सामान्यविशेषन्यायात्। "पावनः पवनः" इत्युदाहृते छेकानुप्रासस्थले 'वनः' इति भागमादाय यमकस्यापि प्रवेशस्यानिवार्य्यतया छेकानुप्रासयमकयोरेकाश्रयानुप्रवेशरूपः सङ्करोऽङ्गीकार्य्य एव गत्यन्तराभावात्। यमयति श्रुतिमधुरतया सहृदयानां हृदयमानन्दे नियमयतीति यमकम्। यमकशब्दोऽयं नित्यनपुंसकलिङ्गः स्वभावादपत्यादिशब्दवत्।

(ड) सत्यर्थं इत्यस्याभिप्रायमाह अत्रेति। निरर्थकत्वस्थलं विना अन्येषान्त्वमीषां स्थलानि वृत्तावेवानुपदमाह—सार्थकत्वमिति। सार्थकत्वे पृथगर्थकत्वमावश्यकम्। क्वचिन्निरर्थकत्वमिति। अत्रापि द्वयोरित्यनुषज्यते। यथा—"रभिंसु-रभिंसु—" इति। अत्रापि पर्य्यालोचने समुदायस्य सार्थकत्वमावश्यकमेव, सर्वथा निरर्थकानामप्रयोगात्।

(ढ) क्रमेण तेनैवेत्यस्य व्यावृत्तिमाह तेनैवेति। इत्यादेः स्थलस्य, विविक्तविषयत्वं भिन्नविषयत्वं यमकेतरालङ्कारलक्ष्यत्वमिति यावत्। तथा च 'दमो मोदः' इत्यादौ क्रमभेदान्न यमकम्, किन्तु केवलस्वरूपत एव साम्यात् प्रथमप्रकारो वृत्त्यनुप्रास एवेत्याशयः।

(ण) यमकानामतिप्रचुरतरप्रकारतया साकल्येन प्रदर्शयितुमशक्यत्वात् भोजराजमम्मटादयोऽपि सरस्वतीकण्ठाभरणकाव्यप्रकाशादौ कियतः प्रकारान् प्रदर्शयन्त एव विरताः; तदपेक्षया प्रपञ्चेन तद्भेदप्रदर्शनविरतिरेव वरमिति मन्यमान आह एतच्चेति। यमकञ्चेत्यर्थः। अत्र पदशब्दः पादस्य यत्किञ्चिद्भागपरः, अर्द्धशब्दश्च श्लोकार्द्धपरः। पद-पादार्द्ध-श्लोकानामावृत्तित्वेन रूपेण पदस्य आदिशब्दात् पादादीनां पादाद्य-मध्यान्त्यावयवादीनाञ्च आवृत्तेः पुनरुच्चारणात्। तथा च केवलपदावृत्तित्वरूपेणैव पदावृत्तेः, न तु पदादीनां पादादिष्वन्तर्भावात् पादाद्यावृत्तित्वेन पदाद्यावृत्तेः—इत्यादितात्पर्य्यलाभाय "पद-पादार्द्ध-श्लोका-

(१) पाद-पदार्द्ध इति पाठान्तरम्। (२) पादाद्यावृत्तेश्चेति पाठभेदः।

"नवपलाश-पलाशवनं पुरः स्फुटपराग-परागत-पङ्कजम् ।
मृदुल-तान्त-लतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः ॥" (थ)

अत्र पदावृत्तिः "पलाश-पलाश" इति (द)। "सुरभिं सुरभिम्" इत्यत्र च द्वयोः सार्थकत्वम् । "लतान्त-लतान्त—" इत्यत्र प्रथमस्य निरर्थकत्वम्। "पराग-पराग—" इत्यत्र द्वितीयस्य (ध)। एवमन्यदप्युदाहार्य्यम् (न)।

वृत्तिर्लेनेत्युक्तम् । एवञ्च केवलपदस्य पुनरुच्चारणात्, केवलपादस्य पुनरुच्चारणात् केवलश्लोकार्द्धस्य पुनरुच्चारणात्, केवलश्लोकस्य च पुनरुच्चारणात् एवं पादस्य आद्यमध्यान्ताद्यवयवादीनां पुनरुच्चारणाच्च अनेकविधतया प्रभूततममिदम् अतिबहुतरप्रकारमिति सरलार्थः ।

(त) अतएवाह दिङ्मात्रमिति । एकप्रकारमात्रं पदावृत्तिमात्रमित्यर्थः ।

(थ) नवेति । शिशुपालवधषष्ठसर्गे वसन्तवर्णनमिदम् । स हरिः पुरः पुरतः नवानि नूतनानि पलाशानि पर्णानि यत्र तादृशं पलाशवनं किंशुकविपिनं यस्मिन् तादृशम्, स्फुटानि विकचानि परागैः रजोभिः परागतानि व्याप्तानि च पङ्कजानि पद्मानि यस्मिन् तम्, मृदुलाः सुकुमाराः अतएव तान्ताः आतपतापेन क्लान्ताः लतान्ताः लताप्रान्तभागा यत्र तम्, तथा सुमनोभरैः पुष्पप्राचुर्य्यैः सुरभिं सौरभविशिष्टं सुरभिं वसन्तकालमलोकयत् अपश्यत् ।

(द) उदाहृते पदावृत्तिं प्रदर्शयति अत्रेति । "पलाश-पलाश" इति इत्यादिरूपेणेत्यर्थः पदावृत्तिः । तथा च "पलाश-पलाश" इति "--पराग-पराग-" इति "लतान्त-लतान्त-" इति "सुरभिं सुरभिम्" अथवा "रभिंसु-रभिंसु-" इति च एकैकपदानामेव द्विर्द्विरुच्चारणादत्र पदयमकमिति भावः ।

(ध) "द्वयोरपि पदयोः क्वचित् सार्थकत्वम्" इत्यादिकं यदभिहितं तदिदानीं प्रदर्शयति सुरभिमिति । द्वयोः पदयोरित्यर्थः । सार्थकत्वमिति । एकस्य वसन्तवाचकत्वात् अपरस्य च सौरभविशिष्टबोधकत्वादिति भावः । तथैव च पृथगर्थकत्वमपि द्रष्टव्यम् । निरर्थकत्वमिति । मृदुलशब्दस्य लकारमादायैव "लतान्त" इति प्रथमरूपनिष्पत्तेः, तद्रूपेण च तेन कस्यचिदप्यर्थस्य बोधयितुमशक्यत्वादिति भावः । द्वितीयलतान्तशब्दस्य तु सार्थकत्वमेव । द्वितीयस्येति । निरर्थकत्वमित्यनुषज्यते । परागतशब्दस्य तकारमपहाय "पराग" इति द्वितीयरूपनिष्पत्तेः तद्रूपेण च तेनापि कस्यचिदप्यर्थस्य बोधयितुमशक्यत्वादित्याशयः । तत्रापि प्रथमपरागशब्दस्य सार्थकत्वमेवेति बोध्यम् । द्वयोरेव पदयोर्निरर्थकत्वन्तु "—रभिंसु-रभिंसु—" इत्यत्र इति दर्शितमेव ।

(न) एवमिति । तत्र पादावृत्तिर्यथा मम रुक्मिणीहरणमहाकाव्ये—

"विद्धास्त्रं स वपुः पातिशिलीमुखकदम्बकम् । वहन्निवागात् क्वाणं स शिलीमुखकदम्बकम् ॥"

अर्द्धावृत्तिर्यथा तत्रैव—

"सह तेन समुद्युक्ताः समिते समयादरम् । सहते न समुद्युक्ताः समिते समयादरम् ॥"

श्लोकावृत्तिर्यथा काव्यप्रकाशे—

"स त्वारम्भरतोऽवश्यमबलं विततारवम् । सर्वदा रणमानैषीदवानलसमस्थितः ॥

सत्वारम्भरतोऽवश्यमबलम्विततारवम् । सर्वदारणमानैषीदवानलसमस्थितः ॥"

"यमकादौ भवेदैक्यं डलोर्बवोर्लरोस्तथा।"

इत्युक्तनयात् "भुजलतां जड़तामबलाजनः" इत्यत्र न यमकत्वहानिः (प)।

११। अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद्यदि।

अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा॥ (फ)

पादाद्यावृत्तिर्यथा शिशुपालवधे—

"राजीवराजी-वशलोलभृङ्गं मुष्णन्तमुष्णन्ततिभिस्तरूणाम्।
कान्तालकान्ता ललनाः सुराणां रक्षोभिरक्षोभितमुद्वहन्तम्॥"

पादमध्यावृत्तिर्यथा सरस्वतीकण्ठाभरणे—

"दधतमाकरिभिः करिभिः क्षतैः समवतारसमैरसमैस्तटैः।
विविधकामहिता महिताम्भसः स्फुटसरोजवना जवना नदीः॥"

पादान्तावृत्तिर्यथा तत्रैव—

"व्यथितसिन्धुमनीरशनैः शनैः अमरलोकवधूजघनैर्घनैः।
फणभृतामभितो विततं ततं दयितरम्यलताबकुलैः कुलैः॥"

अपरे च कियन्तो भेदाः सरस्वतीकण्ठाभरणादावनुसन्धेयाः।

(प) क्वचिद्वर्णयोर्भेदेऽपि पारिभाषिकमभेदमङ्गीकृत्य यमकादीनुपपादयितुमाह यमकादाविति। आदिपदेन श्लेषानुप्रासादीनां ग्रहणम्। ड लोर्डकारलकारयोः, बवोर्वर्गीयवकारान्तस्थवकारयोः, तथा ल-रोः लकाररेफयोरैक्यं वस्तुतः स्वरूपादिभेदेऽपि अभेदो भवेत्।

इत्युक्तात् नयात् रीतेः। "जलतां जड़ताम्" इत्यत्र कपिलिकादित्वात् लत्वाभावपक्षे लकारडकारयोर्भेदेन प्रसक्तापि यमकत्वहानिर्न त्वर्थः। श्लोकसमुदायो यथा रघुवंशनवमसर्गे—

"अनुभवन् नवदोलमृतूत्सवं पटुरपि प्रियकण्ठजिघृक्षया।
अनयदासनरज्जुपरिग्रहे भुजलतां जड़तामबलाजनः॥"

श्लेषे डकारलकारयोरैक्यं यथा—

"तृष्णापहारी विमलो द्विजावासो जनप्रियः।
ह्रदः पद्माकरः किन्तु बुधस्त्वं स जड़ाशयः॥"

उद्द्योतकारस्तु एतदतिरिक्तमपि परिभाषितवान्। यथा—

"यमकादौ भवेदैक्यं डलयोरलयोर्बवोः।
श-षयोर्न-णयोश्चान्ते सविसर्गाविसर्गयोः।
सबिन्दुकाबिन्दुकयोः स्यादभेदप्रकल्पनम्॥"

(फ) वक्रोक्तिं लक्षयति अन्यस्येति। अन्यस्य प्रथमवक्तुः अन्यार्थकं स्वाभिमतापरार्थबोधक

द्विधेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च (य)। क्रमेणोदाहरणम्—

"के यूयम्? स्थल एव सम्प्रति वयम्, प्रश्नो विशेषाश्रयः,
किं ब्रूते विहगः, स वा फणिपतिर्यत्रास्ति सुप्तो हरिः?।
वामा यूयम्, अहो विडम्बरसिकः कीदृक् स्मरो वर्त्तते?
येनास्मासु विवेकशून्यमनसः पुंस्वेव योषिद्भ्रमः॥" (भ)

अत्र विशेषपदस्य 'विः पक्षी' 'शेषो नागः' इत्यर्थद्वययोगात् सभङ्गश्लेषः। अन्यत्र त्वभङ्गः (म)।

वाक्यम्, अन्यः प्रथमश्रोता जनो यदि श्लेषेण अनेकार्थाभिधायकतया काक्वा विकृतस्वरेण वा, अन्यथा वक्तुरभिप्रेतभिन्नार्थकत्वेन योजयेत् परिणमयेत्, तदा सा वक्रोक्तिर्नामालङ्कारः। ततः श्लेषवशात् काकुवशाच्च सा द्विधा द्विप्रकारा। प्रथमश्रोतुरुक्तेर्वक्रतावशादस्य वक्रोक्तिरिति संज्ञा। श्लेषेणैवोत्थापिततया शुद्धश्लेषस्यापवादोऽयम्। अयन्तु उक्तिप्रत्युक्तिस्थलं विनापि अन्यार्थबोधनेच्छया उच्चारितस्य वाक्यस्य तदन्यार्थप्रतिपादनमात्र एव सम्भवति। काव्यप्रदीपकारोऽप्येवम्। अतएव नैषधचतुर्थसर्गे—

"क्रिमसुभिर्ग्लपितैर्जड! मन्यसे मयि निमज्जतु भीमसुतामनः।
मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः॥"

अत्र "मनश्चन्द्रे निलीयते" इति श्रुतौ ग्रहरूपचन्द्रबोधनेच्छया उच्चारितस्य चन्द्रपदस्य दमयन्त्या नलमुखचन्द्रपरत्वेन योजनात् वक्रोक्तिरेव। एतेन यत् केचिदुक्तिप्रत्युक्तिस्थल एवायमलङ्कार इति ब्रुवते, तदपास्तम्; कारिकयापि तन्मात्राबोधनादिति सुधीभिर्भाव्यम्।

(य) द्विधेति। श्लेषवक्रोक्तिरपि द्विधा—अभङ्गश्लेषमूला सभङ्गश्लेषमूला चेति।

(भ) तत्र तां द्विविधामपि श्लेषवक्रोक्तिमेकोदाहरणेनाह के यूयमिति। कस्यचिदागन्तुकैः कैश्चित् सह उक्तिप्रत्युक्तिरूपमिदं पद्यम्। आगन्तुकानवलोक्य "ननु के यूयम्" इति प्रथमवक्तुर्जिज्ञासा। अत्र प्रश्नार्थे किंशब्दरूपतया प्रयुक्तं "के" इति पदम्, "मारुते वेधसि ब्रध्ने पुंसि कः कं शिरोऽम्बुनोः" इत्यमरोक्तेः सप्तम्यन्त-"क-"शब्दरूपतया जलार्थपरतया योजयित्वा तत्र च काकुवशात् प्रश्नार्थकत्वं प्रतिपाद्य प्रथमश्रोतॄणामुत्तरम्—"स्थल एव सम्प्रति वयम्" इति। तत्र विरक्तः प्रथमवक्ता पुनराह—"प्रश्नो विशेषाश्रयः" इति। विशेषाश्रयः किंशब्दाश्रयः 'के यूयम्' इति किंशब्दप्रतिपाद्य एव मम प्रश्न इत्यर्थः। प्रथमश्रोतारस्तु विशेषाश्रयपदस्यापि 'विः पक्षी'; 'शेषोऽनन्तनागः' इति सभङ्गश्लेषेण वक्तुरभिप्रेतभिन्नार्थ योजयित्वा प्रत्युत्तरयन्ति किं ब्रूत इति। विहगो यः कोऽपि पक्षी, यत्र च हरिर्नारायणः सुप्तोऽस्ति, स फणिपतिर्नागराजोऽनन्तो वा; अनयोर्विषये मम प्रश्नः—इति किं भवान् ब्रूते ब्रवीति?। इत्यत्र प्रतिहतप्रश्नोद्यमः प्रथमवक्ता साक्षेपमाह—यूयं वामाः मम प्रश्नस्य यथावदुत्तरदाने प्रतिकूलाः। अत्रापि वामाशब्दस्य स्त्रीरूपमर्थं योजयित्वा प्रथमश्रोतारः प्रत्युत्तरयन्ति अहो इत्यादि। अहो आश्चर्यः खलु भवान् विडम्बरसिको रमणीकदर्थनाभिलाषी दृश्यत इति शेषः। कीदृक् च भवतः स्मरः कामावेगो वर्त्तते? येन स्मरेण विवेकशून्यमनसो भवतः अस्मासु पुंस्वेव पुरुषेष्वेव योषिद्भ्रमः स्त्रीभ्रान्तिरभवत्।

"काले कोकिलवाचाले सहकारमनोहरे।
कृतागसः परित्यागात् तस्याश्चेतो न दूयते॥" (य)

अत्र कयाचित् सख्या निषेधार्थे नियुक्तो नञ्, अन्यथा काक्का दूयत एवेति विध्यर्थे घटितः (र)।

१२। शब्दैरेकविधैरेव भाषासु विविधास्वपि।
वाक्यं यत्र भवेत् सोऽयं भाषासम इतीष्यते॥ (ल)

यथा मम—

"मञ्जुलमणिमञ्जीरे कलगम्भीरे विहारसरसीतीरे।
विरसासि केलिकीरे किमालि! धीरे च गन्धसारसमीरे?॥" (व)

(न) उदाहृते श्लेषस्य सभङ्गत्वमभङ्गत्वञ्च दर्शयितुमाह अत्रेति। इति इत्थं शब्दभङ्गद्वारा, अर्थद्वयस्य [...]नात् सम्बन्धात्। "वि-विष्किर-पतत्रयः" इति "शेषोऽनन्तो वासुकिस्तु" इति चामरोक्तेरिति भावः।

(य) काकुवक्रोक्तेरुदाहरणमाह काले इति। सखीं प्रति सख्यन्तरस्योक्तिरियम्। कोकिला वाचाला [अ]विरतशब्दकारिणो यत्र तस्मिन्, सहकारेण आम्रेण आम्रमुकुलविकासेन मनोहरे काले वसन्तसमये, [कृ]तागसः कृतापराधस्य पत्युः परित्यागात्, तस्याः सख्याः चेतश्चित्तं न दूयते कामतापेन न सन्तप्यते।

(र) उदाहृते उक्तार्थस्य अन्यथा योजनप्रदर्शनद्वारा वक्रोक्तिमुपपादयितुमाह अत्रेति। निषेधार्थे [अ]भावार्थे, नियुक्तः प्रयुक्तः। काक्का "तस्याश्चेतो न दूयते?" इति विकृतस्वरेण। विध्यर्थे भावार्थे [घ]टितः परिणमितः।

ननु द्वितीयपरिच्छेदे "वक्तृबोद्धव्यवाक्यानाम्" इत्यादिना काकुवैशिष्ट्ये आर्थव्यञ्जना अङ्गीकृता, तयैव [अ]र्थान्तरप्रत्यायनमिति काकुवक्रोक्तेरर्थालङ्कारत्वमेवोचितमिति चेत्, न; वक्रोक्तिघटिकायाः काकोः शब्द-[ध]र्मत्वात्, काकुवक्रोक्तेरपि शब्दधर्मतया शब्दालङ्कारत्वस्यैवौचित्यात्।

(ल) भाषासममलङ्कारं निरूपयति शब्दैरिति। एकविधैरेव शब्दैः, विविधास्वपि संस्कृत-[प्रा]कृतादिषु नानाप्रकारास्वपि भाषासु, यत्र यत् वाक्यं भवेत्, सः अयं भाषासम इति नाम अलङ्कारः कविभि-[रि]ष्यते। भाषासु समः समानरूप एव शब्दो यत्रेति व्युत्पत्तेः। अतएवायं शब्दालङ्कारः। अत्र [वि]विधासु भाषास्वित्यभिधानात् भाषाद्वयात्मकभाषाश्लेषे नातिव्याप्तिः। तथा च एकविधैरेव शब्दैर्बहुतर-[भा]षासु वाक्यनिष्पत्तिस्थले भाषासमः, केवलभाषाद्वये वाक्यनिष्पत्तिस्थले तु भाषाश्लेष इति भेदः।

(व) मञ्जुलेति। मानवशान्निवृत्तसकलव्यापारां सखीं प्रति सख्यन्तरस्योक्तिरियम्। हे आलि! [स]खि! कलो मधुरास्फुटः गम्भीरो मन्द्रश्च तस्मिन् तादृशध्वनिकारिणीत्यर्थः मञ्जुलमणिमञ्जीरे सुन्दरमणि-[नू]पुरे, विहारसरसीतीरे केलिसरोवरतटे, केलिकीरे खेलोपकरणीभूतशुके, धीरे मन्दमन्दसञ्चारिणि [गन्ध]सारसमीरे चन्दनस्पर्शिवायौ च, किं कथं विगतानुरागा असि?।

अत्र एकविधैरेव शब्दैः संस्कृतादिविविधभाषासु वाक्यनिष्पत्तेर्भाषासमः।

एष श्लोकः संस्कृत-प्राकृत-शौरसेनी-प्राच्यावन्ती-नागरापभ्रंशेषु एकविध एव (ञ)।

"सरसं कइण कव्वं" इत्यादौ तु 'सरसम्' इत्यत्र संस्कृतप्राकृतयोः साम्येऽपि वाक्यगतत्वाभावे वैचित्र्याभावान्नायमलङ्कारः (ट)।

१३। श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते।
वर्ण-प्रत्यय-लिङ्गानां प्रकृत्योः पदयोरपि।
श्लेषाद्विभक्ति-वचन-भाषाणामष्टधा च सः॥ (ठ)

(ञ) एष इति। श्लोकः श्लोकात्मकं वाक्यम्।

(ट) ननु कारिकायां "पदं यत्र भवेत्" इत्यनुक्त्वा "वाक्यं यत्र भवेत्" इति व्यापकवचने का युक्तिरित्यपेक्षायां वाक्यपदव्यावृत्तिमाह सरसमिति। "सरसं कवेः काव्यम्" इति संस्कृतानुवादः। संस्कृत-प्राकृतयोरित्युपलक्षणम्। शौरसेन्यादावपि द्रष्टव्यम्। साम्येऽपि एकविधपदत्वेऽपीत्यर्थः। वैचित्र्यस्यैवा-लङ्कारपदार्थत्वादिति बोध्यम्। एवञ्च वैचित्र्यप्रतिपत्त्यर्थमेव वाक्यमिति व्यापकवचनमिति भावः।

(ठ) श्लेषं लक्षयति श्लिष्टैरिति। श्लिष्टैरनेकेनार्थेनालिङ्गितैः वाच्यतासम्बन्धेन सम्बद्धैः एको-च्चारणेनैव युगपदेवानेकार्थवाचकैरित्यर्थः, पदैः सुबन्तैस्तिङन्तैर्वा, अनेकार्थाभिधाने अभिधया वृत्त्या युगपदेव एकाधिकार्थबोधने श्लेषो नामालङ्कार इष्यते। पदैरिति बहुवचनमविवक्षितम्, "सूत्रं लिङ्गं संख्या कालश्चातन्त्राणि" इति न्यायात् कारिकायाश्च सूत्ररूपत्वात्। एतेन—

अनेकार्थवाचकपदेन अनेकार्थाभिधानं श्लेषः।

इति लक्षणं पर्यवसितम्। उक्तया च रीत्या एकस्मिन्नेव पदे अनेकार्थानां परस्परश्लेषणात् श्लेष इति संज्ञाव्युत्पत्तिसिद्धिः।

न च "सकृदुच्चरितः शब्दः सकृदर्थं गमयति" इत्यादिकं रामचरणोक्तं युक्तमिति वाच्यम्, उक्तन्यायस्य श्लेषेतरविषयत्वात्। किञ्च, "यावन्तोऽर्थास्तावन्त एव शब्दा एकप्रयत्नेनोच्चार्यन्ते, युगपन्नानाशब्दोच्चारणेऽपि तेषां भेदोपलम्भो न भवति।" अहो! अपूर्वोऽयं खलु सिद्धान्तवादः; यत्, शब्दश्च द्विरुच्चारितो भवेत् श्रुतिश्च तयोरेकैव स्यादिति। अथ पृच्छ्यते—दूरे तावदास्तां भवान्, योगेन वशीकृतरसना योगिनोऽपि किं कश्चिदपि शब्दं युगपदेव द्विरुच्चारयितुमर्हन्ति?। अथ अर्हन्ति चेत्, श्रुतिभेदोऽपि तर्हि तयोरावश्यक एव। अन्यथा यमकालङ्कारलोपस्यैव प्रसङ्गः, द्विःश्रवणाभावात्। अथ द्विरेव श्रूयतेऽपीति चेत् "प्रतिकूलता-मुपगते हि विधौ" इत्यादौ विधौ विधाविति द्विःश्रवणात् सर्वत्रैव छन्दोभङ्गप्रसङ्गः। किञ्च, उक्तविधकष्ट-कल्पनापेक्षया "सर्वदा नानार्थव्यवहारस्तु श्लेषकाव्यादौ" इति लिखितस्वं आर्त्तोक्तैः व्युत्पत्तिवादे तर्कवागीशगदाधरोक्तैः, "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ" इत्यमरसिंहस्य "एकयोक्त्या" इति स्पष्टमभि-धानाच्च "एकोच्चारणेनैव युगपदनेकार्थवाचकैः" इति सिद्धान्त एव ज्यायानिति सुधीभिरवधेयम्।

तत्र एकतरार्थस्य प्रकरणादिभिर्नियमितत्वाभावे श्लेषः, तस्य तैर्नियमितत्वे तु ध्वनिरेवेति बोध्यम्।

क्रमेणोदाहरणम्—

"प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।
अवलम्बनाय दिनभर्तुरभूत् न पतिष्यतः करसहस्रमपि॥" (ङ)

अत्र विधाविति विधु-विधिशब्दयोरुकारेकारयोर्वर्णयोरौकाररूपत्वात् श्लेषः (च)।

ननु अनेकार्थावाचकैः पदैरनेकार्थानामभिधातुमशक्यत्वात् कथं श्लिष्टैरित्यभिहितम्?। न च ध्वनावतिव्याप्तिवारणार्थेति वाच्यम्, 'अभिधाने' इत्यनेनैव अभिधावृत्तिप्रतिपाद्यत्वलाभेन ध्वनावतिव्याप्तिवारणात् ध्वनेस्तु व्यञ्जनाप्रतिपाद्यत्वात्। सत्यम्, अर्थश्लेषे अतिव्याप्तिवारणाय श्लिष्टैरित्यभिहितम्। तथा च अनेकार्थवाचकैः पदैरनेकार्थाभिधाने शब्दश्लेषः, एकार्थवाचकैरेव पदैरनेकार्थाभिधाने तु अर्थश्लेष इति भेदः। तेन भिन्नप्रवृत्तिनिमित्तकत्वेनानेकार्थोपस्थापकः शब्दः शब्दश्लेषप्रयोजकः, एकप्रवृत्तिनिमित्तकत्वेन अनेकार्थोपस्थापकः शब्दस्तु अर्थश्लेषप्रयोजक इति समाधेयम्।

एवञ्च तादृशतादृशशब्दसत्त्वे श्लेषसत्त्वात् तदसत्त्वे च तदसत्त्वादस्य श्लेषस्य शब्दालङ्कारत्वम्।

प्राचीनमतानुसारेण श्लेषं विभजते वर्णेति। वर्णौ यत्किञ्चिदक्षरद्वयम्, विभक्तेः पृथगभिधानात् प्रत्ययौ विभक्तिभिन्नौ यौ कौचित्, तथा स्त्रीपुंनपुंसकानां मध्ये यत्किञ्चिल्लिङ्गद्वयं तेषाम्, प्रकृत्योर्धातुभूतयोः प्रातिपदिकभूतयोस्तदुभयोर्वा, पदयोः सुबन्तयोस्तिङन्तयोस्तदुभयोर्वा, विभक्ती सुब्द्वयं तिङ्द्वयं तदुभयं वा, वचने एकवचन-द्विवचनबहुवचनानां मध्ये यत्किञ्चित् द्वयम्, भाषे यत्किञ्चिद्भाषाद्वयञ्च तासामपि च श्लेषादेकवन्नेनानेकार्थाभिधानात् स श्लेषः अष्टधा। तथा च वर्णश्लेषः, प्रत्ययश्लेषः, लिङ्गश्लेषः, प्रकृतिश्लेषः, पदश्लेषः, विभक्तिश्लेषः, वचनश्लेषः, भाषाश्लेषश्चेति।

तत्र च यत्श्लेषेण वैचित्र्यातिशयः सम्पद्यते, तन्नाम्नैव तद्व्यपदेशोऽङ्गीकार्य्यः। अन्यथा सर्वत्र पदश्लेषप्रसङ्गः।

(ङ) वर्णश्लेषं दर्शयति प्रतीति। शिशुपालवधे नवमसर्गे सन्ध्यावर्णनमिदम्। विधौ दैवे चन्द्रे च, प्रतिकूलतां विरोधित्वं विपरीतदिग्वर्त्तित्वञ्च उपगते प्राप्ते सति, बहूनि साधनानि फलनिष्पादनोपाया यस्य तस्य भावः सा बहुतरोपायवत्त्वमपीत्यर्थः, हि निश्चितम्, विफलत्वम् एति प्राप्नोति। तथा च पतिष्यतः अस्तं पतनपातस्य दिनभर्त्तुः सूर्य्यस्य, कराणां रश्मीनां हस्तानाञ्च सहस्रमपि अवलम्बनाय आकाशे आश्रयणाय नाभूत् उपायो नाभवत्।

(च) उदाहृते वर्णश्लेषमुपपादयितुमाह अत्रेति। औकाररूपत्वात् औकाररूपप्राप्तेः, श्लेषो मेलनेनानेकार्थाभिधानम्। तथा च विधुशब्दात् विधिशब्दाच्च सप्तम्येकवचने कृते "ङिरौ सपूर्वः" इत्यनेन विधुशब्दस्य उकारेण विधिशब्दस्य च इकारेण सह तस्य स्थाने औकारविधानात् 'विधौ' इति शब्दे विधुरूपार्थस्य विधिरूपार्थस्य च मेलनेन 'विधौ' इति शब्देनैव च तदुभयार्थाभिधानात् तादृशवर्णस्यैव च वैचित्र्यातिशयजनकत्वाद्वर्णश्लेष इति सरलार्थः।

"किरणा हरिणाङ्कस्य दक्षिणश्च समीरणः।
कान्तोत्सङ्गजुषां नूनं सर्व एव सुधाकिरः॥" (क)

अत्र 'सुधाकिरः' इति क्विप्-क-प्रत्यययोः (ख)। किञ्च, अत्र बहुवचनैकवचनयोरैकरूप्याद्वचनश्लेषोऽपि (ग)।

"विकसन्नेत्रनीलाब्जे तथा तन्व्याः स्तनद्वयी।
तव दत्तां सदामोदं लसत्तरलहारिणी॥" (घ)

अत्र नपुंसकस्त्रीलिङ्गयोः श्लेषो वचनश्लेषोऽपि (ङ)।

(क) प्रत्ययश्लेषं दर्शयति किरणा इति। हरिणाङ्कस्य शशाङ्कस्य किरणाः, दक्षिणो दक्षिणाया दिश आगतः, समीरणो वायुश्च एवं सर्व एव, कान्तानां प्रेयसां प्रेयसीनां वा उत्सङ्गानङ्कान् जुषन्ते सेवन्त इति तासां प्रेयसीनां तेषां प्रेयसां वा नूनं निश्चितं सुधाकिरः अमृतवर्षका अमृतवर्षकश्च।

(ख) अत्रेति। क्विप्-क-प्रत्यययोः श्लेष इत्यनुषज्यते। तथा च किरणा इत्यनेनान्वये सुधां किरन्तीति सुधाकिरः, "कॄ विक्षेपे" इति कॄधातोः "क्विप् च" इति क्विप्प्रत्ययान्तात् प्रथमाया बहुवचनम्। समीरण इत्यनेनान्वये तु सुधां किरतीति सुधाकिरः, तस्मादेव कॄधातोः "नाम्युपध प्री-कॄ-गॄ-ज्ञां कः" इति कप्रत्ययान्तात् प्रथमाया एकवचनमिति भावः।

(ग) किञ्चेति। अपि चेत्यर्थः। अत्र "सर्व एव" इत्यत्र 'सुधाकिरः' इत्यत्र च। अपि च 'कान्तोत्सङ्गजुषाम्' इत्यत्र स्त्रीपुंलिङ्गयोरैकरूप्यात् लिङ्गश्लेषोऽपि द्रष्टव्यः। तथापि तु क्विप्-क-प्रत्यययोः श्लेषेणैव वैचित्र्यातिशयजननादत्र प्रत्ययश्लेषत्वेनैव व्यपदेश इत्याशयः।

(घ) लिङ्गश्लेषमाह विकसदिति। तन्वी कृशाङ्गी तस्याः, विकसन्नेत्रनीलाब्जे इत्यस्य विशेषणपक्षे लसन्ती प्रकाशमाने तरले चञ्चले हारिणी सुन्दरे चेति लसत्तरलहारिणी, द्वयोर्द्वयोः पदयोः क्रमात् कर्म्मधारयः, ततश्च क्लीवलिङ्गे प्रथमाया द्विवचनम्। स्तनद्वयी इत्यस्य विशेषणपक्षे तु लसन् शोभमानः तरलो मध्यमणिर्यस्य स तथोक्तो हारो मुक्तामाला अस्या अस्तीति लसत्तरलहारिणी। "तरलो हारमध्यगः" इत्यमरः। विकसन्ती प्रकाशमाने नेत्रे चक्षुषी एव नीलाब्जे नीलपद्मयुगलम्, तथा स्तनद्वयी कुचयुगलञ्च, सदा तव आमोदमानन्दं दत्तां वितरतां वितरतु च। विकसदित्यादिना अन्वयकाले दत्तामिति दाधातोर्लोटः परस्मैपदद्विवचनम्, स्तनद्वयी इत्यनेनान्वयकाले तु दत्तामिति दाधातोर्लोट आत्मनेपदस्यैकवचनम्, दाधातोरुभयपदित्वात्।

ननु स्तनद्वयीविशेषणपक्षे लसत्तरलहारिणीत्यत्र कथं मत्वर्थीय इन्प्रत्ययः "न कर्म्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः" इत्यनेन निषेधादिति चेन्न, अत्र प्रशंसार्थे इन्प्रत्ययविधानात् तदर्थस्य तु बहुव्रीहिणा प्रतिपादयितुमशक्यत्वात्। अतएव तु "बहुव्रीहिश्चेदर्थप्रतिपत्तिकरः" इत्यभिहितम्। तेन संसर्गार्थ एवायं मत्वर्थीयप्रत्ययनिषेधः पर्य्यवसित इत्यवधेयम्।

(ङ) अत्रेति। उक्तरीत्या नपुंसकस्त्रीलिङ्गयोः श्लेषः 'लसत्तरलहारिणी' इत्यत्र, वचनश्लेषस्तु 'दत्ताम्' 'लसत्तरलहारिणी' इत्युभयत्र, अपिशब्दात् 'हारिणी' इत्यत्र णिनिप्रत्ययस्य इन्प्रत्ययस्य च श्लेषात् प्रत्यय-

"अयं सर्वाणि शास्त्राणि हृदि ज्ञेषु च वक्ष्यति।
सामर्थ्यकृदमित्राणां मित्राणाञ्च नृपात्मजः॥" (च)

अत्र 'वक्ष्यति' इति वहि-वच्योः, 'सामर्थ्यकृत्' इति कृन्तति-करोत्योः प्रकृत्योः (छ)।

"पृथुकार्त्तस्वरपात्रम्" इत्यादि (५१४ पृष्ठे) (ज)।

अत्र पदभङ्गे विभक्तिसमासयोरपि वैलक्षण्यात् पदश्लेषः, न तु प्रकृतिश्लेषः (झ)। एवञ्च—(ञ)

"नीतानामाकुलीभावं लुब्धैर्भूरिशिलीमुखैः।
सदृशे वनवृद्धानां कमलानां तदीक्षणे॥" (ट)

श्लेषोऽप्युन्नेयः। तथापि तु लिङ्गश्लेषस्यैव वैचित्र्यातिशयजननात् लिङ्गश्लेषत्वेनैव व्यपदेश इति भावः।

(च) प्रकृतिश्लेषोदाहरणमाह अयमिति। अयं नृपात्मजः, हृदि स्वहृदये ज्ञेषु पण्डितसमाजेषु च, सर्वाणि शास्त्राणि वक्ष्यति धारयिष्यति कथयिष्यति चेति यथासंख्येनार्थः। तथा अमित्राणां विपक्षाणां मित्राणां स्वपक्षाणाञ्च सामर्थ्यकृत् प्रभावेण शक्तिनाशकारी साहाय्येन शक्तिकारी च भविष्यतीति शेषः। अत्रापि यथासंख्येनार्थः।

(छ) अत्रेति। वहि-वच्योः प्रकृत्योरिति परेणान्वयः। प्रकृत्योः श्लेष इति पूर्वस्मादनुषज्यते। तथा च 'हृदि' इत्यनेनान्वये 'वक्ष्यति' इति वहधातोर्लृट्स्यतौ प्रयोगः; 'ज्ञेषु' इत्यनेनान्वये तु 'वक्ष्यति' इति वचधातोर्लृट्स्यतौ प्रयोगः। तथा अमित्राणामित्यनेनान्वये 'सामर्थ्यकृत्' इति सामर्थ्यं कृन्तति छिनत्ति नाशयतीत्यर्थे कृत्धातोः क्विपि प्रयोगः, मित्राणामित्यनेनान्वये तु 'सामर्थ्यकृत्' इति सामर्थ्यं करोतीत्यर्थे कृधातोः क्विपि प्रयोगः। एवञ्चात्र पदापेक्षया प्रकृतिश्लेषस्यैव वैचित्र्यातिशयजननात् प्रकृतिश्लेषत्वेनैव व्यपदेश इत्यभिप्रायः।

(ज) पदश्लेषं दर्शयति पृथ्विति। व्याख्यातपूर्वमिदं पद्यम्।

अत्र पृथुकार्त्तस्वरादिपदानामेव श्लेषेण वैचित्र्यातिशयजननात् पदश्लेषत्वेन व्यपदेशः।

(झ) ननु पृथुकार्त्तस्वरेत्यादौ पृथु-पृथुकादिशब्दानां प्रातिपदिकरूपप्रकृतित्वात् कथं न प्रकृतिश्लेष इत्याह अत्रेति। पदानां भङ्गे पृथुकार्त्तस्वर इत्यादौ 'पृथु' इत्यादिरूपेण 'पृथुक' इत्यादिरूपेण च विश्लेषणे, पृथूनि कार्त्तस्वरपात्राणि यस्मिन्निति राजपक्षे, पृथुकानामार्त्तस्वरस्य पात्रमिति दरिद्रपक्षे, इत्यादिरूपेण न केवलं पदानामेव वैलक्षण्यात् किन्तु विभक्तिसमासयोरपि वैलक्षण्यात् वैषम्यात्। तथा च यथासम्भवपदभङ्गे विभक्तिसमासयोर्वैलक्षण्ये च पदश्लेषः, तदवैलक्षण्ये तु प्रकृतिश्लेष इति भेद इत्याशयः।

(ञ) एवञ्चेति। यथासम्भवं पद-विभक्ति-समासवैलक्षण्यस्थल एव पदश्लेषस्वीकारे चेत्यर्थः।

(ट) प्रकारान्तरेण प्रकृतिश्लेषमेवोदाहरति नीतानामिति। कस्याश्चिन्नायिकाया नयनवर्णनमिदम्।

अत्र लुब्धशिलीमुखादिशब्दानां श्लिष्टत्वेऽपि विभक्तेरभेदात् प्रकृतिश्लेषः। अन्यथा सर्वत्र पदश्लेषप्रसङ्गः (ठ)।

"सर्वस्वं हर सर्वस्य त्वं भव च्छेदतत्परः।
नयोपकारसाम्मुख्यमायासि तनुवर्त्तनम् ॥" (ड)

अत्र 'हर' इति पक्षे शिवसम्बोधनमिति सुप्, पक्षे च हृधातोस्तिङिति विभक्तेः। एवं 'भव' इत्यादौ (ढ)।

अस्य च भेदस्य प्रत्ययश्लेषेणापि गतार्थत्वे प्रत्ययान्तरासाध्यसुबन्त-तिङन्तगतत्वेन विच्छित्तिविशेषाश्रयणात् पृथगुक्तिः (ण)।

भूरयः प्रचुराः शिलीमुखाः शरा येषां तैस्तादृशैः लुब्धैर्व्याधैः, आकुलीभावं भयविह्वलत्वं नीतानां प्रापितानाम्, वने कानने वृद्धानां वृद्धिं प्राप्तानाम्, कमलानां हरिणानां हरिणनयनानामित्यर्थः सदृशे तुल्ये तस्या नायिकाया ईक्षणे नयनद्वयम्, वर्त्तत इति शेषः। पक्षान्तरे तु—लुब्धैर्मधुपानलोभिभिः, भूरिशिलीमुखैर्बहुतरभ्रमरैः, आकुलीभावं व्याप्ततां नीतानां प्रापितानाम्, वने जले वृद्धानां वृद्धिं प्राप्तानाम्, कमलानां पद्मानां सदृशे तस्या नायिकाया ईक्षणे नयनद्वयम्।

"अलिबाणौ शिलीमुखौ" "वने सलिलकानने" "स्यात् कुरङ्गेऽपि कमलः" इति चामरः। "लुब्धो व्याधे लोलुपे च" इति गोपालः।

(ठ) अत्रेति। आदिशब्देन वन-कमलशब्दयोर्ग्रहणम्। विभक्तेरभेदादेकादृशविभक्तेः। अन्यथा विभक्त्यादीनामभेदस्थलेऽपि पदश्लेषाङ्गीकारे, सर्वत्र वर्णादिश्लेषस्थलमात्रे, पदश्लेषप्रसङ्गः। तथा च श्लेषस्य प्रकारान्तराङ्गीकारः प्राचामसङ्गत एव स्यादिति भावः।

(ड) विभक्तिश्लेषोदाहरणमाह सर्वस्वमिति। महेश्वरं प्रति तद्भक्तस्य, चौरं प्रति तन्मातुश्चोक्तिरियम्। हे हर! महेश्वर! त्वं सर्वस्य लोकस्य सर्वस्वं समग्रधनस्वरूपः, प्राणपणेनापि सर्वदैवोपास्यत्वादिति भावः। तथा त्वं सर्वस्य त्वद्भक्तजनस्य भवच्छेदतत्परो जन्मबन्धदूरीकरणपरायणः। तथा त्वम् नयेन नीतेरुपदेशेन य उपकारस्तस्मिन् साम्मुख्यमुद्यमो यस्य तत्तथोक्तम्, तनुवर्त्तनं शङ्कराचार्यादिदेहधारणम् आयासि प्राप्नोषि। पक्षान्तरे तु—हे पुत्र! त्वं सर्वस्य जनस्य सर्वस्वं समस्तमेव धनं हर अपहर, तत्र यदि कश्चित् तव प्रतिबन्धको भवेत्तदा तस्य छेदतत्परः अङ्गप्रत्यङ्गादिच्छेदनप्रवृत्तो भव। तथा आयासि परिश्रमविशिष्टम्, तनुवर्त्तनं सन्धिद्वारादिना परगृहे शरीरप्रवेशनम्, उपकारसाम्मुख्यं परधनप्राप्तिरूपोपकाराय उपयोगिताम्, नय प्रापय, परकीयधनग्रहणाय सन्धिद्वारेण भित्तिरन्ध्रादिना वा तद्गृहे स्वशरीरं प्रवेशयेत्यर्थः। अत्र हरेत्यादौ सर्वत्रैव विध्यर्थे लोट्।

(ढ) अत्रेति। पक्षे एकस्मिन्निति शेषः। पक्षे च अपरस्मिन्निति शेषः। विभक्तेः श्लेष इति पूर्वेणान्वयः। आदावित्यनेन 'नय' 'आयासि' इत्यनयोर्ग्रहणम्। तथा च 'भव' इति शिवपक्षे सम्बन्धिपदमिति सुप्, चौरपक्षे तु भूधातोस्तिङ्। एवमन्ययोरप्यूह्यम्।

"महदे सुरसन्धम्मे तमव समासङ्गमागमाहरणे।
हर बहुसरणं तं चित्तमोहमवसर उमे सहसा॥" (त)

अत्र संस्कृतमहाराष्ट्रयोः (थ)।

१४। पुनस्त्रिधा सभङ्गोऽथाभङ्गस्तदुभयात्मकः। (द)

(ण) ननु सुप्तिङोरपि प्रत्ययत्वेन प्रत्ययश्लेष एवायमास्ताम्, किं विभक्तिश्लेषान्तराङ्गीकारेण इत्याह ...रेति। भेदस्य विभक्तिश्लेषरूपप्रकारस्य, गतार्थत्वे चरितार्थत्वे प्राप्तविषयत्वेऽपीत्यर्थः। प्रत्ययान्तरैः ...रैभिः असाध्यमनिष्पाद्यं यत् सुबन्तं तिङन्तञ्च हरादिपदं तद्‌गतत्वेन, विच्छित्तिविशेषाश्रयणात् चमत्...रितातिशयावलम्बनात्।

(त) भाषाश्लेषमुदाहरति महदेति। पार्वतीं प्रति भक्तहृदयस्योक्तिरियम्। महमुत्सवं ददातीति ...दा तत्सम्बोधनम्। हे उमे! पार्वति! सुराणां देवानामपि सन्धा कर्त्तव्यत्वेन प्रतिज्ञा यस्मिन् तम्, ...गमाहरणे शास्त्रीयज्ञानार्जने मे मम तं पूर्वजातम्, समासङ्गं सम्यगासक्तिम् अव चिरायैव रक्ष। तथा ...हरे, यथासमये बहुसरणं बहुव्यापकं तं पूर्वजातं चित्तमोहं सहसा शीघ्रं हर विनाशय।

"मम देहि रसं धर्म्मे तमोवशामाशां गमागमात् हर नः।
हरवधु! शरणं तं चित्तमोहम् अपसरतु मे सहसा॥"

इति महाराष्ट्रीतः संस्कृतानुवादः। हे हरवधु! भवानि! धर्म्मे मम रसमनुरागं देहि। नः अस्माकम्, ...छति प्रतिष्ठते यस्मात् आगच्छति पुनरुपतिष्ठते च यस्मिन्निति गमागमः पार्थिवं जगत् तस्मात्, तमोवशां ...गुणाधीनाम् अज्ञानजनितामित्यर्थः आशां पार्थिवसुखाभिलाषं हर दूरीकुरु। शरणं रक्षिका भवती, ...त्वा मे मम तं चिरोत्पन्नं चित्तमोहम्, अपसरतु विनाशयत्विति सकर्म्मकत्वविवक्षा।

(थ) अत्रेति। भाषयोरिति शेषः। श्लेष इत्यनुषज्यते। उत्कृष्टप्राकृतभाषैव महाराष्ट्रीति दण्डी। ...क्तं तेनैव—"महाराष्ट्राश्रयां भाषां प्रकृष्टं प्राकृतं विदुः।"

तत्र भाषासमलक्षणे "भाषासु विविधास्वपि" इत्यभिधानात् एकविधैरेव शब्दैर्यदितरभाषासु वाक्य...पत्तिस्थले भाषासमः, केवलभाषाद्वये वाक्यनिष्पत्तिस्थले तु भाषाश्लेष इति भेद इति तूक्तमेव। तर्कवागीशस्तु—...भाषासमे तु भाषाणामैकरूप्यमेव, न त्वर्थभेदः इह त्वर्थभेदोऽपीति भेदः" इत्याह स्म।

संस्कृतवङ्गभाषयोः श्लेषो यथा मम वङ्गीयप्रतापनाटके शङ्करगाने—

"हे सन्तान! तव जननी, धनजनसमन्विता केन अनाथिनी।
परमुखे दृष्टिकरी, परद्वारे भिक्षाकरी, यथा दीनहीननारी जीविता विषादिनी।
अतिनिद्रापरायण-निरुद्यमपुत्रगण आलस्यवशजीवन आकुला गौरविणी।"

तर्कवागीशमते तु अत्रापि भाषासम एवालङ्कारः।

(द) पुनरपि श्लेषं विभजते पुनरिति। तत्र सभङ्गः शब्दविश्लेषणनिष्पन्नः अभङ्गः शब्दसारूप्ये

एतद्भेदत्रयञ्च उक्तभेदाष्टके यथासम्भवं ज्ञेयम् (ध) ।

यथा वा—(न)

"येन ध्वस्तमनोभवेन बलिजित्कायः पुरा स्त्रीकृतो
यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गाञ्च योऽधारयत् ।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यञ्च नामामराः
पायात् स स्वयमन्धकक्षयकरस्त्वां सर्वदो माधवः ॥" (प)

अत्र "येन ध्वस्त—" इत्यादौ सभङ्गश्लेषः, "अन्धक—" इत्यादौ अभङ्गः,

---

सति अनेकार्थाभिधानमात्रेण सिद्धः, तदुभयात्मकः सभङ्गाभङ्गोभयरूपः स तु वाक्ये क्वचिदंशे सभङ्गः क्वचिदंशे चाभङ्ग इत्येवंरूपः । तत्र पदश्लेष-विभक्तिश्लेष-भाषाश्लेषा एतत्त्रिविधा एव सम्भवन्ति, अन्ये वर्णश्लेषादयस्तु पञ्च केवलाभङ्गरूपा एव । तेन वर्णश्लेषादयः पञ्च, पदश्लेषास्त्रयः, विभक्तिश्लेषास्त्रयः, भाषाश्लेषास्त्रय इति समुदायेन चतुर्दशप्रकाराः श्लेषा इत्युन्नेयम् ।

(ध) एतदिति । "पृथुकार्त्तस्वरपात्रम्" इत्यादौ 'महदे' इत्यादौ च केवलसभङ्गः, 'प्रतिकूलताम्' इत्यादौ केवलाभङ्गः, "सर्वस्वं हर सर्वस्य" इत्यादौ तु सभङ्गाभङ्गोभयरूपः ।

(न) शिष्यानुसन्धानसौकर्य्यार्थमेकोदाहरणेनैव सभङ्गादिभेदत्रयं दर्शयितुमाह यथा वेति ।

(प) येनेति । हरिहरोभयद्वारेवायमाशीर्वादश्लोकः । न विद्यते भवो जन्म यस्य तेन, येन माधवेन अनः शकटं शकटरूपधारी असुरविशेषः ध्वस्तं चरणोद्घट्टनेन विनष्टम् । बलिजित् छलेन विरोचनसुतस्य जेता कायो वामनदेहः पुरा देवासुरेभ्यः अमृतपरिवेशनसमये स्त्रीकृतो मोहिनीमूर्त्या परिणमितः, यः उद्वृत्तमुद्धतस्वभावं भुजङ्गं भुजङ्गरूपधारिणम् अघासुरं हन्तीति उद्वृत्तभुजङ्गहा, अरेरिदमिति आरम् अरिसम्बन्धि बलं सैन्यं याति आक्रमितुं गच्छतीति आरवलयः, यश्च अगं गोवर्द्धनपर्वतं गां पृथिवीञ्च अधारयत् कृष्णरूपेण कूर्म्मरूपेण चेत्यर्थः ; अमरा देवाश्च यस्य शशिनं चन्द्रं मथ्नाति पीड़यतीति शशिमत् राहुः तस्य शिरो हरति तस्मिन्नेवामृतपरिवेशनसमये चक्रेण छिनत्तीति शशिमच्छिरोहर इति स्तुत्यं स्तवार्हं नाम आहुः ब्रुवन्ति ; स्वयमात्मनैव निजकूटव्यवहारेणैव अन्धकानां यदुवंशीयानां क्षयकरः प्रभासयज्ञे विनाशकरः सर्वं सर्वाभीष्टं ददातीति सर्वदः, स मायाः लक्ष्म्याः धवः पतिर्नारायणः, त्वां पायात् रक्ष्यात् ।

शिवपक्षे तु—ध्वस्तो विनष्टो मनोभवः कामदेवो यस्मात्तेन, येन शिवेन, पुरा त्रिपुरासुरविनाशकाले बलिजितो वामनरूपेण बलिविजयिनो नारायणस्यापि कायः शरीरम्, अस्त्रीकृतः शरः कृतः ; यश्च उद्वृत्ताः उत्कर्षेण वर्त्तमानः भुजङ्गः सर्प एव हारो वलयश्च यस्य स तादृशः ; यश्च गङ्गां भागीरथीं मस्तके अधारयत्, अमरा देवाश्च यस्य शशी अस्यास्तीति शशिमत् शिरो मस्तकं यस्य स शशिमच्छिराः स चासौ हरश्चेति शशिमच्छिरोहरः, इति इत्थं स्तुत्यं स्तवार्हं नाम आहुः ; अन्धकक्षयकरः अन्धकाख्यासुरविनाशकारी, स उमाधवः पार्वतीपतिः स्वयं सर्वदा त्वां पायात् रक्ष्यात् ।

अत्रोभयपक्षीयाः पौराणिकवार्त्ताः स्वयमनुसन्धेयाः ।

अनयोश्चैकत्र सम्भवात् सभङ्गाभङ्गात्मको ग्रन्थगौरवभयात् पृथङ् नोदाहृतः (फ) ।

इह केचिदाहुः—"सभङ्गश्लेष एव शब्दश्लेषविषयः । यत्रोदात्तादिस्वरभेदाद्भिन्नप्रयत्नोच्चार्य्यत्वेन भिन्नयोः शब्दयोर्जतुकाष्ठन्यायेन श्लेषः । अभङ्गस्तु अर्थश्लेष एव । यत्र स्वराभेदादभिन्नप्रयत्नोच्चार्य्यतया शब्दाभेदादर्थयोरेकवृन्तगतफलद्वयन्यायेन श्लेषः । यो हि यदाश्रितः, स तदलङ्कार एव, अलङ्कार्य्यालङ्करणभावस्य लोकवदाश्रयाश्रयिभावेनोपपत्तिः" इति (ब) ।

तदन्ये न मन्यन्ते (१) । तथाहि—अत्र ध्वनि-गुणी-भूतव्यङ्ग्यदोष-गुणालङ्काराणां शब्दार्थगतत्वेन व्यवस्थितेरन्वयव्यतिरेकानुविधायित्वेन नियम इति (भ) । न च "अन्धकक्षय—" इत्यादौ शब्दाभेदः, "अर्थभेदेन शब्दभेदः" इति दर्शनात् (म) ।

(फ) अत्रेति । प्रथमादिपदेन "उच्चैः" इत्यादीनां ग्रहणम् । द्वितीयादिपदेन च "शशिमच्छिरोहरः" इत्यस्य ग्रहणम् । एकत्र उदाहृतश्लोकरूपैकवाक्ये । ननु स्पष्टार्थं पृथगुदाहरणमवोचितमित्याह ग्रन्थेति ।

(ब) शिष्यबुद्धिप्रसारार्थं स्वमतयुक्ततासूचनार्थञ्च क्रमात् परमतद्वयमाह इहेति । श्लेषप्रस्ताव इत्यर्थः । केचिद्वामनादयः । उदात्तादीत्यादिपदेन अनुदात्तसमाहारयोर्ग्रहणम् । एकप्रयत्नेनोच्चारणे एकविधस्वरस्यैव सम्भवात् स्वरभेदस्थले भिन्नप्रयत्नेनोच्चारणमावश्यकमिति भावः । जतु लाक्षा काष्ठञ्च तत्-संसक्तं दारु, तयोर्न्यायेन तुलनया । अर्थयोः शब्दसापेक्षयोरित्यर्थः । एकस्मिन् वृन्ते गतं स्थितं यत् फलद्वयं तस्य न्यायेन तुलनया । नन्वेवं व्यवस्थायां किं विनिगमकमित्याह यो हीति । अलङ्करणमिति करणसाधनः शब्दः । तथा च अलङ्कार्य्यालङ्करणभावस्य अलङ्कार्य्यालङ्कारयोरित्यर्थः । लोकवत् लौकिका-लङ्कार्य्यालङ्कारवत्, आश्रयाश्रयिभावेन आधाराधेयभावेन, उपपत्तिः शब्दश्लेषार्थश्लेषयोर्व्यवस्था । अत्र तेषा-मयमाशयः—यथा लोके कर्णाश्रितं कुण्डलं कर्णालङ्कार उच्यते, यथा वा हस्ताश्रितो वलयो हस्तालङ्कारोऽभि-धीयते; तथा उक्तयुक्तेः शब्दमात्राश्रितः सभङ्गश्लेषः शब्दश्लेष इत्याख्यायते, अर्थमात्राश्रितः अभङ्गश्लेषस्तु अर्थश्लेष इत्युच्यते । एवञ्च "ध्वस्तमनोभवेन" इत्यादौ शब्दश्लेषः "अन्धकक्षयकरः" इत्यादौ च अर्थश्लेष इति ।

(भ) तदिति । अन्ये काव्यप्रकाशकारादयः न मन्यन्ते युक्तियुक्ततया नाङ्गीकुर्वन्ति । तत्र हेतुमाह तथाहीति । अत्र अलङ्कारशास्त्रे । शब्दार्थगतत्वेन शाब्दत्वेन आर्थत्वेन च व्यवस्थितेर्व्यवस्थायाः अन्वयव्यतिरेकयोरनुविधायित्वेन अनुसारित्वेन नियमो निश्चयः । तथा च तत्सत्त्वे तत्सत्ता अन्वयः, तदसत्त्वे तदसत्ता च व्यतिरेकः । तेन यत्र तत्तच्छब्दसत्त्वे ध्वन्यादिसत्ता तदसत्त्वे च तदसत्ता, तत्र ध्वन्यादीनां शाब्द-त्वम्; इतरथा तु आर्थत्वम् । एवञ्च शब्दभङ्गाभङ्गोभयस्थलेऽपि तत्तच्छब्दसत्त्व एव श्लेषसत्त्वात् तदसत्त्वे च तदसत्त्वात् तदुभयस्थलेऽपि शब्दश्लेष एवेत्याशयः ।

---

(१) अमन्ते इति क्वचित् पाठः ।

किञ्च, अत्र शब्दस्यैव मुख्यतया वैचित्र्यबोधोपायत्वेन कविप्रतिभयोट्टङ्कनात् शब्दालङ्कारत्वमेव (य)। विसदृश-शब्दद्वयस्य बन्धे चैवंविधस्य वैचित्र्यस्याभावात् (१) वैचित्र्यस्यैव चालङ्कारत्वात् (र)। अर्थमुखप्रेक्षितया चार्थालङ्कारत्वे अनुप्रासादीनामपि रसादिपरत्वेन अर्थमुखप्रेक्षितया अर्थालङ्कारत्वप्रसङ्गः (ल)। शब्दस्याभिन्नप्रयत्नोच्चार्य्यत्वेनार्थालङ्कारत्वे "प्रतिकूलतामुपगते हि विधौ" इत्यादौ शब्दभेदेऽपि अर्थालङ्कारत्वं तत्रापि प्रसज-

(म) अथ यथा भवन्तोऽन्वयव्यतिरेकाभ्यां श्लेषादीनां शाब्दत्वमार्थत्वञ्च नियमयन्ति, तथा वयमपि शब्दभेदाभेदाभ्यां तेषां तन्नियमयामः। तेन च—

"यत्रोभयोः समो दोषः परीहारश्च यः समः। नैकस्तत्रानुयोज्यः स्यात्तादृगर्थविनिश्चये॥"

इति न्यायादस्मन्मतानङ्गीकारे को नाम विशेषो हेतुरित्याह न चेति। शब्दाभेद इति वाच्यमिति शेषः। दर्शनात् "यावन्त एवमर्थाः स्युः शब्दास्तावन्त एव हि" इति मीमांसकनय इति शेषः। एवञ्च मीमांसकमतविरोध एव भवन्मतानङ्गीकारे विशेषो हेतुः। तेन च हरिपक्षे यादवार्थकत्वात् हरपक्षे च असुरविशेषार्थकत्वात् अर्थभेदेन अन्धकशब्दस्यापि भेदावश्यकतया "अन्धकक्षयकरः" इत्यादावपि शब्दश्लेषत्वमेवानिच्छतापि भवता वाच्यमित्याशयः।

(य) ननु "अर्थभेदेन शब्दभेदः" इति मीमांसकानामेव सिद्धान्तः, शाब्दिकानान्तु "एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ" इत्यादिशाब्दिकधुरीणामरसिंहादिवचनप्रामाण्यात् "अर्थभेदेऽपि न शब्दभेदः" इत्येव सिद्धान्तः। तथा चालङ्कारिकाणां शब्दमात्रावलम्बितया प्रागुक्तयुक्त्या उक्तमीमांसकमतस्य विचारासहतया च शाब्दिकमतानुसरणस्यैवौचित्यात् "अन्धकक्षयकरः" इत्यादावर्थश्लेष एवाङ्गीकार्य्य इत्याह किञ्चेति। अत्र अभङ्गश्लेषस्थलेऽपीत्यर्थः। मुख्यतयेति। तादृशशब्दाभावे वैचित्र्यबोधाभावादिति भावः। कवेः प्रतिभया असाधारणबुद्धिनैपुण्येन, उट्टङ्कनात् प्रकाशनात् शब्दस्यैवेति पूर्वेणान्वयः। शब्दालङ्कारत्वमेवेति। गौणमुख्यन्यायादिति भावः।

(र) अथ अर्थस्यापि वाच्यतया मुख्यत्वात् कविप्रतिभयैवोट्टङ्कनाच्च अर्थालङ्कारत्वमेवास्तामित्युक्तौ को दोष इत्याह विसदृशेति। किञ्चेति चार्थः। विसदृशशब्दद्वयस्य बन्धे "यादवक्षयकरः" "अन्धकक्षयकरः" इत्यादिरूपविभिन्नशब्दद्वयस्य योजने। ननु अस्तु नाम वैचित्र्यस्याभाव इत्याह वैचित्र्यस्यैवेति। तथा चोक्तरीत्या अर्थयोर्मुख्यत्वाङ्गीकारेऽपि वैचित्र्याभावान्नार्थालङ्कारत्वमिति भावः।

(ल) ननु सभङ्गस्थले अर्थनैरपेक्ष्येण केवलमेलनादेव शब्दालङ्कारत्वमास्ताम्, अभङ्गस्थले तु अर्थसापेक्षतया अर्थालङ्कारत्वमेवोचितमित्याह अर्थमुखेति। अत्रापि किञ्चेति चार्थः। अर्थस्य मुखं वदनं प्रेक्षत इत्यर्थमुखप्रेक्षी तस्य भावस्तया किञ्चिन्मात्रार्थसम्बद्धतयेत्यर्थः। सोल्लुण्ठनोक्तिरियम्। तथा च

(१) वैचित्र्याभावादिति समस्तः पाठः क्वचित्।

तीति (१) उभयत्रापि शब्दालङ्कारत्वमेव (व)। यत्र तु शब्दपरिवर्त्तनेऽपि न श्लेषत्वखण्डना, तत्र—(श)

"स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम्।
अहो! सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च॥" (ष)

इत्यादावर्थश्लेषः।

अभङ्गस्थलेऽपि न सर्वथैवार्थसापेक्षत्वम्, किन्तु निरर्थकानामप्रयोगात्तावन्मात्रेणैवार्थसापेक्षत्वम्; तथापि च शब्दश्लेषणमेव श्लेषप्रयोजकमित्याशयः। अर्थालङ्कारत्वे अङ्गीकर्त्तव्ये इति शेषः। अनुप्रासादीनामित्यादिशब्देन यमकादिशब्दालङ्कारमात्रग्रहणम्। रसादिपरत्वेन रसादिप्रकर्षजननाय प्रयुक्तत्वेन। अत्रादिशब्देन रसाभासभावादीनां संग्रहः। अर्थमुखप्रेक्षितया तथैव किञ्चिन्मात्रार्थसम्बद्धतया। अर्थसम्बन्धाभावे रसादेरेवासम्भवेन तत्प्रकर्षस्याप्यसम्भवादिति भावः।

(व) स्वमतदृढत्वाय पुनरपि "यत्र स्वराभेदादभिन्नप्रयत्नोच्चार्य्यतया" इत्यादिपरोक्तिं दूषयति शब्देति। अर्थालङ्कारत्वे अङ्गीकर्त्तव्ये इति शेषः। शब्दभेदेऽपीति। "विधौ" इत्यत्र समासाभावेन स्वरभेदाभावादभिन्नप्रयत्नोच्चार्य्यतया भवन्मते शब्दाभेदसम्भवेऽपि अर्थद्वयदर्शनादेव शब्दाभेदावश्यम्भावेऽपीत्यर्थः। तत्रापि मत इति शेषः। इति हेतोः। उभयत्रापि "येन ध्वस्तमनोभवेन" इत्यादौ सभङ्गस्थले "अन्धकक्षयकरः" इत्यादावभङ्गस्थलेऽपीत्यर्थः।

(श) अथ तर्हि क्वार्थश्लेष इत्याह यत्रेति। श्लेषत्वस्य खण्डना हानिः। तत्र अर्थश्लेष इति परेणान्वयः।

(ष) स्तोकेनेति। तुलाकोटिः खलश्च, स्तोकेन अल्पभारदानेन अल्पधनदानेन च उन्नतिम् ऊर्द्ध्वगमनम् अभ्युदयञ्च, आयाति लभते; स्तोकेन पुनरल्पभारापसारणेन अल्पधनक्षयेण च अधोगतिम् अधोगमनं दैन्यञ्च आयाति प्राप्नोति। अतएव, अहो आश्चर्य्यम्! तुलाकोटेस्तोलनदण्डाग्रभागस्य खलस्य दुर्जनस्य च, सुसदृशी सर्वथा समाना वृत्तिरवस्था।

अथ "अल्पेनोद्गतिमाप्नोति अल्पेनाप्नोत्यधःस्थितिम्" इत्येवं शब्दपरिवर्त्तनेऽपि उक्तार्थद्वयसत्त्वे श्लेषसत्त्वात् उक्तविधार्थासत्त्वे च श्लेषासत्त्वात् अर्थश्लेष एवेत्याशयः।

"इह केचिदाहुः" "तदन्ये न मन्यन्ते" इत्युक्तिद्वयभङ्ग्या ग्रन्थकृता विश्वनाथेन अनयोरेकतरोऽपि पक्षः साकल्येन नाङ्गीक्रियत इति प्रत्येतव्यम्। किन्तु "शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्" इति वक्ष्यमाणार्थश्लेषलक्षणात् "स्वभावादेकार्थैरिति शब्दश्लेषादवच्छेदः" इति तत्र वृत्तावभिधास्यमानत्वाच्च स्वभावादनेकार्थैः शब्दैरनेकार्थाभिधाने शब्दश्लेषः, स्वभावादेकार्थैः शब्दैरनेकार्थाभिधाने तु अर्थश्लेष अनेकार्थैः शब्दैरनेकार्थाभिधाने शब्दश्लेषः एकार्थैः शब्दैरनेकार्थाभिधाने तु अर्थश्लेष इति परमत इत्येतदेवास्य मतमिति प्रत्येतव्यम्। तेन सभङ्गस्थले शब्दश्लेष इति पूर्वमतपरिग्रहः, अभङ्गस्थले तु अनेकार्थैः शब्दैरनेकार्थाभिधाने शब्दश्लेषः, एकार्थैः शब्दैरनेकार्थाभिधाने तु अर्थश्लेष इति परमतसंग्रहः।

---

(१) प्रसज्यतीति पाठान्तरम्।

"अस्य चालङ्कारान्तर-विविक्तविषयताया असम्भवात् विद्यमानेष्वलङ्कारान्तरेषु अपवादत्वेन तद्बाधकतया तत्प्रतिभोत्पत्तिहेतुत्वम्" इति केचित् (स)।

इत्यमत्र विचार्य्यते—समासोक्त्यप्रस्तुतप्रशंसादौ द्वितीयार्थस्यानभिधेयतया नास्य गन्धोऽपि (ह)। "विद्वन्मानसहंस!" इत्यादौ श्लेषगर्भे रूपकेऽपि मानसशब्दस्य चित्तसरोरूपोभयार्थत्वेऽपि रूपकेण श्लेषो बाध्यते, सरोरूपस्यैवार्थस्य विश्राम-(१) धामतया प्राधान्यात्; श्लेषे हि अर्थद्वयस्यापि समकक्षत्वम् (च)। "सन्निहितबालान्धकारा भास्वन्मूर्त्तिश्च" इत्यादौ

(स) अन्यालङ्काराभावस्थल एव श्लेषव्यपदेश इत्युपपादयितुं खण्डनाभिप्रायेण मतान्तरमाह अस्येति। श्लेषस्येत्यर्थः। अलङ्कारान्तरविविक्तविषयताया अन्यालङ्कारविषयताभिन्नविषयताया असम्भवात् अन्यालङ्कारसम्भवस्थल एवास्य सम्भवादित्यर्थः। अपवादत्वेन विशेषरूपत्वेन, तेषां सामान्यरूपाणामलङ्कारान्तराणां बाधकतया हेतुना, तेषामलङ्कारान्तराणां या प्रतिभा प्रकाशस्तस्या उत्पत्तेर्हेतुत्वं जनकत्वम्। अत्रायं सरलार्थः—यत्र यत्र अन्येषामलङ्काराणां सम्भवः, तत्र तत्रैव श्लेषस्य सम्भवः न पुनरन्यालङ्कारविषयपरित्यागेण श्लेषोऽवतिष्ठतामिति वाच्यम्, सर्वथैवान्यालङ्कारशून्यविषयासम्भवेन श्लेषस्यैवासम्भवात्। तेन च श्लेषो विशेषरूपतया अपवादरूपः, अन्यान्यालङ्कारास्तु सामान्यरूपतया उत्सर्गरूपाः, तेनैकत्र विद्यमानानप्यन्यान्यालङ्कारान् बाधित्वा श्लेष एव प्रथमं व्यपदेश्यो भवति, पश्चादन्यान्यालङ्कारप्रतीतिः श्लेषप्रतीतिप्रतिपाद्येति। केचिद्वामनादयः।

(ह) उक्तमतसमर्थनाय तैर्यद्विचारितं तदपि दूषयितुमुत्थापयति इत्थमिति। अत्र प्रदर्शितस्वमते, इत्थं वक्ष्यमाणप्रकारम्, विचार्य्यते तैरेवेति शेषः। आदिशब्देन आर्थपरिसंख्या-विध्याभासादीनां ग्रहणम्। द्वितीयार्थस्य परप्रतीतिविषयीभूतार्थस्य, अनभिधेयतया अभिधया वृत्त्या अप्रतिपाद्यतया व्यञ्जनामात्रबोध्यतयेत्यर्थः। अस्य श्लेषस्य गन्धो लेशोऽपि न प्रसक्तिरेव नास्तीत्यर्थः, श्लेषे हि उभयार्थस्यैव वाच्यतानियमादिति भावः। ततश्च समासोक्त्यादिव्यञ्जनाप्रतिपाद्यालङ्कारविषये न श्लेषस्य सम्भव इत्यवधेयम्।

(च) अथ श्लिष्टपरम्परितरूपके उभयार्थस्यैव वाच्यतया श्लेषः सम्भवत्वित्याह विद्वदिति। अयं श्लोकसमुदायो यथा काव्यप्रकाशे—

"विद्वन्मानसहंस! वैरिकमलासङ्कोचदीप्तद्युते!
दुर्गामार्गणनीललोहित! समित्स्वीकारवैश्वानर!।
सत्यप्रीतिविधानदक्ष! विजयप्राग्भावभीम! प्रभो!
साम्राज्यं वरवीर! वत्सरशतं वैरिञ्चमुच्चैः क्रियाः॥"

(१) विश्रान्ति इति पाठान्तरम्।

विरोधाभासेऽपि विरुद्धार्थस्य प्रतिभातमात्रस्य प्ररोहाभावान्न श्लेषः (क)। एवं पुनरुक्तवदाभासेऽपि (ख)। तेन "येन ध्वस्त—" इत्यादौ प्राकरणिकयोः, "नीतानाम्" इत्यादावप्राकरणिकयोरेकधर्म्माभिसम्बन्धात् तुल्ययोगितायाम् (ग)।

"स्वेच्छोपजातविषयोऽपि न याति वक्तुं
देहीति मार्गणशतैश्च ददाति दुःखम्।
मोहात् समुत्क्षिपति जीवनमप्यकाण्डे
कष्टं प्रसूनविशिखः प्रभुरल्पबुद्धिः॥" (घ)

विदुषां पण्डितानां मानसं चित्तमेव मानसं मानसाख्यः सरोवरस्तत्र हंसी हंसस्वरूप उभयत्रापि सततावस्थानादिति भावः। विश्रामधामतया प्रतीतिपर्य्यवसानस्थलतया विधेयतयेत्यर्थः। समकक्षत्वं समानबलत्वम्। तथा च विदुषां चित्ते हंसस्य विचरणासम्भवात् हंसेन सह मानसस्यान्वयोपपत्तये चित्ते सरोवरत्वारोप आवश्यक एव, स चारोप एव रूपकं प्रतीतिपर्य्यवसानस्थलत्वेन विधेयत्वात् प्रबलश्च; श्लेषस्तु प्राक्प्रतीतिविषयत्वेनोद्देश्यत्वात् दुर्बल एवेति रूपकेण श्लेषो बाध्यते; तथा उक्तरीत्या चित्तरूपार्थस्य दुर्बलतया अर्थद्वयस्य समकक्षत्वाभावात् स्वतोऽपि न श्लेषप्रवेश इति नात्रापि श्लेषप्रसङ्ग इत्याशयः।

(क) अथ तर्हि श्लिष्टविरोधाभासालङ्कारे अर्थद्वयस्यैव समकक्षतया श्लेष एवास्तामित्याह सन्निहितेति। सन्निहितो निकटवर्त्ती बालो नवीनोऽन्धकारो यस्याः सा तथाभूता, भास्वतः सूर्य्यस्य मूर्त्तिरिति विरोधः। सन्निहितो विधिना अवस्थापितः बालः केशः अन्धकार इव गाढ़कृष्णवर्ण इत्यर्थः यस्याः सा, तथा भास्वती लावण्यद्युतिमती मूर्त्तिः शरीरं यस्याः सा तथोक्ता चेति तद्विरोधसमाधानम्। विरुद्धार्थस्य सूर्य्यान्तिके अन्धकारसन्निधानरूपस्य, प्रतिभातमात्रस्य शब्दशक्त्या बुद्धावुपस्थितमात्रस्य प्ररोहाभावादसम्भवत्वेन अङ्कुरवत् क्षणमपि स्थायित्वाभावात् न श्लेषः, विरुद्धार्थस्य असम्भवत्वात् प्ररोहाभावेन अनेकार्थस्यैवाभावादित्याशयः।

(ख) ननु तर्हि पुनरुक्तवदाभासे उक्तविधासम्भवत्वाभावात् श्लेषः सम्भवत्वित्याह एवमिति। तथा च "भुजङ्गकुण्डली" इत्यादौ कुण्डलीत्यत्र सर्परूपार्थस्य प्रतिभातमात्रस्य पुनरुक्तताज्ञानेनैव प्ररोहाभावात् पूर्ववदेव न श्लेष इत्यभिप्रायः। एवञ्च एतेषु समासोक्त्यप्रस्तुतप्रशंसारूपकादिषु न श्लेषव्यपदेश इति ग्रन्थाशयः।

(ग) अथ तदा कुत्रान्यानलङ्कारान् बाधित्वा प्रथमं श्लेषव्यपदेश इत्याह तेनेति। उदाहृतेषु उक्तरीत्या श्लेषासम्भवेनेत्यर्थः। प्राकरणिकयोः प्रकरणेन स्पष्टयोः प्रस्तुतयोर्द्वयोरपि हरिहरयोरित्यर्थः, एकधर्म्माभिसम्बन्धादिति परेणान्वयः, कर्त्तृत्वसम्बन्धेनैकरक्षणक्रियायां सम्बन्धादित्यर्थः। अप्राकरणिकयोः नयनस्यैव प्रस्तुतत्वेन अप्रस्तुतयोः पद्महरिण्योः, एकधर्म्माभिसम्बन्धात् सादृश्यरूपैकगुणसम्बन्धात् प्राप्तायामिति शेषः, तुल्ययोगितायां तदाख्यालङ्कारे "विद्यमानायामपि" इति परेणान्वयः।

इत्यादौ च प्राकरणिकाप्राकरणिकयोरेकधर्म्माभिसम्बन्धाद्दीपके (ङ)।

"सकलकलं पुरमेतज्जातं सम्प्रति सुधांशुबिम्बमिव।" (च) इत्यादौ चोपमायां विद्यमानायामपि श्लेषस्यैतद्विषयपरिहारेणासम्भवात्, एषाञ्च श्लेषविषयपरिहारेणापि स्थितेः, एतद्विषये श्लेषस्य प्राधान्येन (१) चमत्कारित्वप्रतीतेश्च श्लेषेणैव व्यपदेशो भवितुं युक्तः; अन्यथा तद्व्यपदेशस्य सर्वथा अभावप्रसङ्गाच्च इति (छ)।

(घ) स्वेच्छोपजातेति। अपराधिभ्रमेण दण्डितायाः प्रजाया वर्वरं राजानमुद्दिश्योक्तिरियम् स्वेच्छया निजेच्छामात्रानुसरणेन उपजातविषयोऽपि सञ्जातवाग्विषयोऽपि, वक्तुं न याति वाग्विषयतां प्राप्नोति, अन्याय्याचरणेन किञ्चिद्वक्तव्योऽपि दण्डेन तद्वाक्यावसरं न ददातीत्यर्थः। कामपक्षे तु—स्वेच्छया निजेच्छामात्रेणैव उपजातः सम्भूतः विषयो लक्ष्यं यस्य सः, अतएव कमपि जनं वक्तुं न याति "त्वं लक्ष्यो भव" इति कथयितुं न गच्छति। देहि राजग्राह्यं करमर्पय इति कृत्वा मार्गणशतैर्निजानुचरैः बहुतरयाचनैः प्रजाभ्यो दुःखञ्च ददाति। कामपक्षे तु—देही कामी जनो देहधारी इति हेतोः, मार्गणशतैः शरसमूहैर्दुःखं ददाति च। आत्मवद्देहाभावे तु शरशतैर्दुःखदानासम्भव इति भावः। मोहाद्दुर्बुद्धित्वात् अकाण्डे अनवसरे हठादेवेत्यर्थः, प्रजानां जीवनं समुत्क्षिपति विनाशयति। कामपक्षे तु—मोहं मोहं जनयित्वा अकाण्डे अकाले कामिजनस्य जीवनं समुत्क्षिपति संहरति। अतएव प्रसूनविशिख पुष्पबाणः कामः अल्पबुद्धिः प्रभू राजा च कष्टं जनानां निरतिशयकष्टजनकः।

(ङ) इत्यादाविति। प्राकरणिकाप्राकरणिकयोः प्रस्तुताप्रस्तुतयोः राज-कामयोः एकधर्म्माभिसम्बन्धात् कष्टत्वरूपैकगुणसम्बन्धात् दीपके वक्ष्यमाणलक्षणे दीपकालङ्कारे, विद्यमानेऽपीति वक्ष्यमाणेन लिङ्गव्यत्ययेन अन्वयः।

(च) सकलेति। एतत् पुरम्, सम्प्रति सुधांशुबिम्बं चन्द्रमण्डलमिव, कलकलेन कोलाहलेन सह विद्यमानमिति सकलकलं कोलाहलयुक्तम्, अन्यत्र तु सकलाः कलाः षोड़शभागा यस्मिन् तत्तादृशं जातम्।

(छ) इत्यादाविति। एतेषां तुल्ययोगितादीनां ये विषयाः स्थलानि तेषां परिहारेण परित्यागेन असम्भवात् स्थलाभावेन समावेशाप्राप्तेः। एतेन श्लेषस्य विशेषरूपत्वेनापवादत्वं सूचितम्। एषां तुल्ययोगितादीनाञ्च श्लेषविषयपरिहारेणापि श्लेषस्थलपरित्यागेनापि, स्थितेः, समावेशसम्भवात्। एतेन तुल्ययोगितादीनां सामान्यरूपत्वेनोत्सर्गरूपत्वं द्योतितम्। एतद्विषये तुल्ययोगितादीनां स्थले। प्राधान्येन आधिक्येन। व्यपदेशः "अत्र श्लेषोऽलङ्कारः" इत्येवं नामनिर्द्देशः। अन्यथा उदाहृततुल्ययोगितादिस्थलेष्वपि श्लेषव्यपदेशानङ्गीकारे, तद्व्यपदेशस्य श्लेषसंज्ञायाः श्लेषाख्यालङ्कारान्तरस्येत्यर्थः, अभावप्रसङ्गात् सर्वत्रैव प्रसक्त्यभावेन विलोपप्राप्तेः श्लेषस्वीकारस्य वैयर्थ्यापत्तेरित्यर्थः। इतिशब्दस्तदीयविचारसमाप्तिद्योतनार्थः।

---

(१) प्राबल्येन इति पाठान्तरम्।

अत्रोच्यते—न तावत् परमार्थतः श्लेषस्यालङ्कारान्तराविविक्तविषयता, "येन ध्वस्त—" इत्यादिना विविक्तविषयत्वात् (ज)। न चात्र तुल्ययोगिता, तस्याश्च द्वयोरप्यर्थयोर्वाच्यत्वनियमाभावात् । अत्र हि माधवोमाधवयोरेकस्य वाच्यत्वनियमेऽपरस्य व्यङ्ग्यत्वं स्यात् (झ) ।

किञ्च, तुल्ययोगितायामप्येकस्यैव धर्म्मस्यानेकधर्म्मिसम्बद्धतया प्रतीतिः; इह त्वनेकेषां धर्म्मिणां पृथक् पृथग् धर्म्मसम्बद्धतया (ञ)।

तेन तुल्ययोगितादिस्थले श्लेषसत्त्वे श्लेषनाम्नैव व्यपदेशः, तदसत्त्वे तु तुल्ययोगितादिनाम्नेति तेषां मते चितम् ।

(ज) इदानीमुक्तमते-दोषं प्रदर्शयन् स्वसिद्धान्तमभिधातुमाह अत्रोच्यत इति । अत्र इदानीम् च्यते उक्तमते दोषः स्वसिद्धान्तश्चेति शेषः । परमार्थतो वस्तुतः । अलङ्कारान्तरविविक्तविषयता न लङ्कारविषयाभिन्नविषयता न, अन्यान्यालङ्काराणामपि यदैव स्थलं श्लेषस्यापि तदैव स्थलम् इति र्थः । इत्यादिना उदाहरणेन, विविक्तविषयत्वात् अन्यान्यालङ्कारविषय-भिन्नविषयताया दर्शितत्वा- र्थः । तथा च "येन ध्वस्त—" इत्यादौ अन्येऽलङ्कारा न विद्यन्ते, श्लेषस्तु विद्यत एवेति अलङ्कारान्तर- विक्तविषयतायाः सम्भवात् "अस्य चालङ्कारान्तरविविक्तविषयताया असम्भवात्" इति यदुक्तं तदपास्तमिति : ।

(झ) ननु पायादित्येकरक्षणक्रियायां माधवोमाधवयोः कर्तृत्वसम्बन्धेनाभिसम्बन्धात् "येन ध्वस्त—" दौ तुल्ययोगितैवास्तीति कथमुच्यते "इत्यादिना विविक्तविषयत्वात्" इति अत आह न चेति । तस्या- ल्ययोगितायाः सम्बन्धे । एतदुपलक्षणं दीपकस्यापि बोध्यम् । वाच्यत्वनियमाभावादिति । एकस्य च्यत्वनियमात् अपरस्य चावाच्यत्वनियमादित्यर्थः । तेन "येन ध्वस्त—" इत्यादौ द्वयोरप्यर्थयोर्वाच्यत्वादेव तुल्ययोगितेति भावः । अथ अत्रापि प्रकरणादिना एकस्यैव वाच्यत्वमस्तु इत्याह अत्रेति । व्यङ्ग्यत्वं दिति । तथा च सति श्लेष एव न स्यात्, श्लेषे हि द्वयोरप्यर्थयोर्वाच्यत्वनियमादित्याशयः ।

(ञ) ननु "वाच्यत्वनियमाभावात्" इति यदुक्तं तदप्रमाणमिति "येन ध्वस्त—" इत्यादौ द्वयोरप्यर्थयो- च्यत्वेऽपि तुल्ययोगितैवास्तामित्याह किञ्चेति । धर्म्मस्य गुणक्रियान्यतररूपस्य । अनेकधर्म्मिसम्बद्धतया नेकान्वयसम्पृक्ततया । इह तु "येन ध्वस्त—" इत्यादौ तु । पृथक् पृथग् धर्म्मसम्बद्धतया प्रतीतिरिति शेषान्वयः । तथा च योगावलम्बिशिवरूपधर्म्मिणो ध्वस्तमनोभवत्वरूपधर्म्मेण बालकक्षणरूपधर्म्मिणो ध्वस्त- शकटत्वरूपधर्म्मेण, योद्धृशिवरूपधर्म्मिणः अस्त्रीकरणरूपधर्म्मेण नारायणरूपधर्म्मिणश्च स्त्रीकरणरूपधर्म्मेण, इत्यादिरूपेण अनेकेषां धर्म्मिणां भिन्न-भिन्न-धर्म्मसम्बद्धतया प्रतीतेः "येन ध्वस्त—" इत्यादौ कथमपि न तुल्ययोगिता, किन्तु केवलः श्लेष एवेत्याशयः ।

एतेन "स्वेच्छोपजातविषयोऽपि—" इत्यादावपि इत्थमेवानेकेषां धर्म्मिणां पृथक् पृथग् धर्म्मसम्बद्धतया प्रतीतेर्नैतं दीपकम्, किन्तु केवलः श्लेष एव इत्यपि सूचितमिति बोध्यम् ।

"सकलकलम्" इत्यादौ च नोपमाप्रतिभोत्पत्तिहेतुः श्लेषः, पूर्णोपमाया निर्विषयत्वापत्तेः। "कमलमिव मुखं मनोज्ञमेतत्" इत्याद्यस्ति पूर्णोपमाया विषय इति चेन्न; यदि "सकलकलम्" इत्यादौ शब्दश्लेषतया नोपमा, तत् किमपराद्धं "मनोज्ञम्" इत्यादावर्थश्लेषेण (ट)।

"स्फुटमर्थालङ्कारावेतावुपमासमुच्चयौ किन्तु।
आश्रित्य शब्दमात्रं सामान्यमिहापि सम्भवतः॥" (ठ)

इति रुद्रटोक्तदिशा गुणक्रियासाम्यवच्छब्दसाम्यस्याप्युपमाप्रयोजकत्वात् (ड)।

ननु गुणक्रियासाम्यस्यैव उपमाप्रयोजकता युक्ता, तत्र साधर्म्यस्य वास्तवत्वात्। शब्दसाम्यस्य तु न तथा, तत्र साधर्म्यस्य अवास्तवत्वात्। ततश्च पूर्णोपमाया अन्यथाऽनुपपत्तेर्गुणक्रियासाम्यस्यैवार्थश्लेषविषयतापरित्यागे पूर्णोपमाविषयता युक्ता, न तु "सकलकलम्" इत्यादौ शब्दसाम्यस्यैवेति चेन्न; "साधर्म्यमुपमा" इत्येवाविशिष्टस्य उपमालक्षणस्य शब्दसाम्यादावप्यावृत्ते-

---

(ट) इदानीमवशिष्टं श्लेषेण पूर्णोपमाया बाध्यत्वं निरसितुमाह सकलेति। उपमायाः प्रतिभा-प्रकाशः प्रतीतिरिति यावत् तस्या उत्पत्तेर्हेतुः कारणं "सकलकलम्" इत्यादौ नोपमा, किन्तूक्तरीत्या श्लेष एवेति न वाच्यमित्यर्थः। निर्विषयत्वापत्तेरिति। श्लेषं विना पूर्णोपमाया असम्भवात् श्लेषेण पूर्णोप-माया बाध्यत्वे पूर्णोपमाङ्गीकारवैयर्थ्यापत्तेरिति भावः। अस्तीति। कमलमित्यादौ शब्दश्लेषासम्भवादिति भावः। अपराद्धमिति। तथा च शब्दश्लेषेण उपमा बाध्येत, अर्थश्लेषेण तु न, इत्यत्र विनिगमनाभावात् "कमलमिव" इत्यादावपि अर्थश्लेषेण पूर्णोपमाया बाध्यत्वात्तस्या निर्विषयत्वमेवेत्याशयः।

(ठ) स्वमते वृद्धसंवादमाह स्फुटमिति। एतौ उपमासमुच्चयौ स्फुटं स्पष्टम् अर्थालङ्कारौ अर्थप्रयोज्यतया अर्थालङ्कारत्वेन सर्वैरेव स्पष्टं प्रतीयमानावित्यर्थः। किन्तु तथापि सामान्यमुभयगत-धर्म्मबोधकम्, शब्दमात्रं केवलमेकानुपूर्वीकं शब्दम् आश्रित्य इह श्लेषविषयेऽपि सम्भवतः प्रसजतः; "साधर्म्यमुपमा" "गुणयौगपद्यं समुच्चय" इति लक्षणद्वये सामान्यत एव साधर्म्य-गुणयौगपद्ययोराश्रयणा-दिति भावः।

"जनी नवीने तपने च रागः" इत्यादौ रागोऽनुरागो रक्तिमा चेति श्लिष्टशब्दप्रतिपाद्यगुणद्वययौगपद्येऽपि समुच्चय इति रुद्रटमतम्। तेन "समुच्चयपदमत्र तुल्ययोगितादीपकपरञ्च" इति रामचरणस्य निरर्थक-लक्षणाकल्पना हेया।

(ड) इतीति। रुद्रटोक्तया दिशा प्रकारेण। उपमाप्रयोजकत्वादिति। "कमलमिव" इत्यादिवत् "सकलकलम्" इत्यादावपि पूर्णोपमैवेति शेषः।

रभावात् (ढ)। यदि च शब्दसाम्ये साधर्म्यमवास्तवत्वान्नोपमाप्रयोजकम्, तदा कथं "विद्वन्मानस—" इत्यादौ आधारभूते चित्तादौ सरोवराद्यारोपो राजादेर्हंसाद्यारोपप्रयोजकः (ण)।

किञ्च, यदि वास्तवसाम्य एवोपमाऽङ्गीकार्य्या, तदा कथं त्वयापि "सकलकलम्" इत्यादौ बाध्यभूता उपमा अङ्गीक्रियते (त)। किञ्चात्र श्लेषस्यैव साम्यनिर्वाहकता, न तु साम्यस्य श्लेषनिर्वाहकता, श्लेषबन्धतः प्रथमं

(ढ) श्लेषव्यपदेशवादी पुनः शङ्कते नन्विति। वास्तवत्वादयथार्थत्वात्। तथा च साधर्म्यं नाम तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वम्। तच्च "कमलमिव मुखं मनोज्ञम्" इत्यादौ कमलगतसौन्दर्य्यात्मकधर्म्मवत्त्वरूपं मुखे यथायथमेव विद्यत इत्याशयः। न तथा नोपमाप्रयोजकता युक्तेत्यर्थः। अवास्तवत्वात् मिथ्याभूतत्वात्। तथाहि "सकलकलम्" इत्यादौ तात्पर्य्यविषयीभूतमुक्तविधं किमपि चन्द्रबिम्बसाधर्म्यं पुरे नास्त्येवेति भावः। ततश्च उक्तयुक्तेश्च। अन्यथाऽनुपपत्तेः अर्थश्लेषस्यापि विषयपरित्यागे असम्भवात्। एतेन पूर्णोपमाया अर्थश्लेषापवादकत्वमभिहितम्। गुणक्रियासाम्यस्यैव पूर्णोपमाविषयता युक्तेत्यन्वयः। अर्थश्लेषस्य स्वविषयतायाः परित्यागे सतीत्यर्थः। तथा च सामान्यस्य विशेषेतरपरत्वनियमात् "कमलमिव मुखं मनोज्ञम्" इत्यादिकं स्वयोग्यमपि विषयं परिहृत्य सामान्यरूपे अर्थश्लेषे "प्रवर्त्तयन् क्रियाः साध्वीः—" इत्यादौ वक्ष्यमाणे पूर्णोपमाया अविषये स्थिते सति, विशेषरूपा पूर्णोपमा "कमलमिव" इत्यादौ समाविशतीति सरलार्थः। शब्दसाम्यस्यैवेति। पूर्णोपमाविषयता युक्तेति पूर्वेणान्वयः। अविशिष्टस्य वास्तवत्वावास्तवत्वरूपविशेषरहितस्य सामान्यत एव काव्यप्रकाशकारेणोक्तस्य वास्तविकतया सर्वेषामेवाभिमतस्य चेत्यर्थः। शब्दसाम्याद्यावृत्तेरभावात् विनिगमकाभावेन "सकलकलम्" इत्यादिकं शब्दसाम्यस्थलमपहाय अन्यत्र नियमनासम्भवादित्यर्थः।

(ण) ननु शब्दसाम्यस्य अवास्तवत्वमेव उक्तनियमे विनिगमकमित्याह यदि चेति। आधारभूते उपमेयत्वेन विषयरूपे। अत्र सरोवरपदं सरोवरत्वपरम्। एवं हंसपदमपि हंसत्वपरम्। तत्तदारोपरूपः कथमत्र श्लिष्टपरम्परितरूपकालङ्कार इत्याशङ्कार्थः। तथा च "सकलकलम्" इत्यादौ शब्दसाम्ये साधर्म्यमवास्तवत्वादयथा नोपमाप्रयोजकम्, तथा "विद्वन्मानस—" इत्यादौ श्लिष्टपरम्परितरूपकप्रयोजकमपि न स्यात् साधर्म्यवत्तया उपमानोपमेययोरभेदज्ञानस्यैव रूपकालङ्कारत्वात् तस्य च साधर्म्यस्य "विद्वन्मानस—" इत्यादावपि अवास्तवतया समानन्यायादित्याशयः।

(त) ननु आरोपात्मकतया रूपकस्यैवावास्तवत्वात् तत्प्रयोजकं साधर्म्यमप्यवास्तवं भवितुमर्हति; उपमायास्तु वास्तवतया तत्प्रयोजकसाधर्म्यस्यापि वास्तवत्वमेवापेक्षितमित्याह किञ्चेति। वास्तवसाम्य एव गुणक्रियासाम्यादयथार्थसाधर्म्य एव। अङ्गीकार्य्या त्वयेति शेषः। बाध्यभूता शब्दश्लेषेण बाधनीयरूपा। तथा च "सकलकलम्" इत्यादौ साधर्म्यस्य अवास्तवतया उपमाप्रयोजकत्वाभावात्तस्याः प्रसक्तिरेव नास्ति,

साम्यस्यासम्भवात्, इत्युपमाया एवाङ्गित्वेन व्यपदेशो ज्यायान्, "प्रधानेन हि व्यपदेशा भवन्ति" इति न्यायात् (१) (थ)।

ननु शब्दालङ्कारविषये अङ्गाङ्गिभावसङ्करो नाङ्गीक्रियते, तत् कथमत्र श्लेषोपमयोरङ्गाङ्गिभावः सङ्कर इति चेन्न; अर्थानुसन्धानविरहिण्यनुप्रासादाविव तथाऽनङ्गीकारात् (द)। एवं दीपकादावपि ज्ञेयम् (ध)।

तथापि कथं त्वया शब्दश्लेषेण उपमाया बाध्यत्वादित्यभिप्रायेण "श्लेषेणैव व्यपदेशो भवितुं युक्तः" इत्यभिहितमित्याशयः।

(थ) नन्वास्तां तावदवास्तवसाधर्म्येऽप्युपमा, तथापि "सकलकलम्" इत्यादौ "श्लेषस्य प्राधान्येन श्लेषेणैव व्यपदेशो भवितुं युक्तः" इत्युक्तिरेव मे युक्तिसहेत्याह किञ्चेति। साम्यनिर्वाहकता अभिन्नानुपूर्वीकशब्दोपस्थाप्यत्वरूपसादृश्यघटकता। श्लेषसम्बतः "सकलकलम्" इत्यनेकार्थकशब्दयोजनायाः, प्रथमं पूर्वम्। तेन च अन्यथासिद्धिशून्यनियतपूर्ववर्त्तिनः कारणत्वात् साम्यनिर्वाहं प्रति तन्नियतपूर्ववर्त्तिनः श्लेषस्यैव कारणत्वमिति भावः। उपमायाः पूर्णोपमाया एव, अङ्गित्वेन कार्य्यतया उद्देश्यत्वात् प्रधानत्वेन, व्यपदेशः "अत्र पूर्णोपमालङ्कारः" इत्येवं संज्ञानिर्द्देशः, ज्यायान् श्रेयान् उचित इत्यर्थः। काव्यप्रकाशकारोऽप्येवम्।

एतेन "सकलकलम्" इत्यादौ वामनादिमते "अत्र श्लेषोऽलङ्कारः, अत्र श्लेषोपमालङ्कारः" इत्येवं व्यपदेशः, काव्यप्रकाशकार-साहित्यदर्पणकारयोर्मते तु "अत्र पूर्णोपमालङ्कारः" इत्येवं व्यपदेश इति व्यपदेशभेद एव एतावद्विचारफलमिति बोध्यम्।

(द) "उपमाया एवाङ्गित्वेन" इत्युक्तिं प्रति तृतीयः शङ्कते नन्विति। नाङ्गीक्रियत इति। अङ्गाङ्गिभावो हि निर्वाहकनिर्वाह्यभावः। एवञ्च अनुप्रासादिशब्दालङ्कारास्तादृशं शब्दालङ्कारान्तरं कदापि न निर्वाहयन्तीति युक्तेरिति बोध्यम्। अत्र "सकलकलम्" इत्यादौ। अर्थानुसन्धानविरहिणि अर्थावधारणनिरपेक्षे केवलशब्दावृत्तिसापेक्षे इत्यर्थः। अनुप्रासादावित्यादिशब्देन यमकभाषासमयोर्ग्रहणम्। तथाऽनङ्गीकारात् अङ्गाङ्गिभावसङ्करास्वीकारात्। तत्रैवोक्तयुक्तेः सामञ्जस्यात्, श्लेषोपमयोस्तु अर्थानुसन्धानसापेक्षत्वेन निर्वाह्यनिर्वाहकभावस्यावश्यम्भावादङ्गाङ्गिभावः सङ्करः सम्भवत्येवेत्यभिप्रायः।

(ध) एवमिति। आदिशब्देन तुल्ययोगितादीनां ग्रहणम्। यथा "सकलकलम्" इत्यादौ शब्दश्लेषसत्त्वेऽपि प्राधान्यात् पूर्णोपमाव्यपदेशः, तथा "स्वेच्छोपजातविषयोऽपि—" इत्यादौ शब्दश्लेषसत्त्वेऽपि प्राधान्यात् दीपकव्यपदेशः "लोकेनोन्नतिमायाति" इत्यादौ च अर्थश्लेषसत्त्वेऽपि प्राधान्यात् तुल्ययोगिताव्यपदेश इत्यर्थः।

---

(१) इत्युक्तन्यायादिति क्वचित् पाठः।

"सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः ।
निपतन्ति धार्त्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥" (न)

अत्र शरद्वर्णनया प्रकरणेन धार्त्तराष्ट्रादिशब्दानां हंसाद्यर्थाभिधाने नियमात् दुर्योधनादिरूपोऽर्थः शब्दशक्तिमूलो वस्तुध्वनिः (प)। इह च प्रकृतप्रबन्धाभिधेयस्यार्थस्य सूचतयैव विवक्षितत्वादुपमानोपमेयभावो न विवक्षित इति नोपमाध्वनिर्न वा श्लेष इति सर्वमवदातम् (फ)।

(न) मतान्तरद्वयं निरसितुमुदाहरति सत्पक्षा इति। वेणीसंहारनाटकप्रस्तावनायां नटस्योक्तिरियम्। सन्तः सुन्दराः पक्षाः पतत्राणि येषां ते, मधुराः सुश्रव्या गिरो रवा येषां ते, प्रसाधिताः स्वावस्थानेनालङ्कृता आशा दिशो यैस्ते, तथा मदेन आनन्देन उद्धता उत्कटा आरम्भा विहारादिव्यापारा येषां ते तथाभूताश्च, धार्त्तराष्ट्राः कृष्णवर्णचञ्चुचरणविशिष्टा हंसविशेषाः, कालवशात् शरत्कालप्रभावात्, मेदिनीपृष्ठे निपतन्ति वर्षासमयप्राप्तमानससरोवरादागत्य भूमण्डले विचरन्तीत्यर्थः। "धार्त्तराष्ट्राः सितेतरैः" इत्यमरः।

द्वितीयोऽर्थस्तु—सन्तो महावीरत्वादिना अभ्यर्हिताः पक्षा भीष्मद्रोणादयः सहाया येषां ते, मधुरगिरः प्रियवचनाः, प्रसाधिताशा आयत्तीकृतसर्वदिशः, तथा मदेन अहङ्कारेण उद्धता विकटा आरम्भा युद्धादिव्यवहारा येषां ते तादृशाः, धृतराष्ट्रस्य राज्ञोऽपत्यानीति धार्त्तराष्ट्रा दुर्योधनादयः, कालवशात् कालप्राप्तिवशात् मरणादित्यर्थः मेदिनीपृष्ठे भूतले निपतन्ति अवलुण्ठन्ति।

अत्र धार्त्तराष्ट्रा दुर्योधनादय इव धार्त्तराष्ट्रा हंसा निपतन्तीति "हिममुक्तचन्द्ररुचिरः" इत्यादिवदुपमाध्वनिरिति केचित्। अपरे तु द्वितीयार्थस्यापि प्रकृतप्रबन्धाभिधेयत्वेनाभिधानात् "गीतानामाकुलीभावम्" इत्यादिवदेव प्रकृतश्लेष इत्याहुः।

(प) तत्र स्वमतमाह अत्रेति। शरद्वर्णनया शरद्वर्णनारूपेण। प्रथमादिपदेन पक्षादिशब्दानाम्, द्वितीयादिपदेन च पतत्राद्यर्थानां ग्रहणम्। नियमात् "संयोगो विप्रयोगश्च" इत्याद्युक्तन्यायेन नियमितत्वात्। वस्तुध्वनिरिति। "पन्थिअ ण एत्थ सत्थरमत्थि" इत्यादिचतुर्थपरिच्छेदोदाहृतवदिति भावः।

(फ) प्रदर्शितमतद्वयं निरस्यति इह चेति। किञ्चेति चार्थः, इह "सत्पक्षाः" इत्यादिश्लोके। प्रकृतप्रबन्धाभिधेयस्य प्राक् प्रस्तुत-वेणीसंहाराख्यग्रन्थवाच्यस्य, अर्थस्य दुर्योधनादिपतनरूपस्य, सूचतयैव अत्यन्तचमत्कारिताविधानार्थमवश्यव्यङ्ग्यतयैव। न विवक्षित इति। अत्रायमाशयः—सर्वत्रैव आवश्यकभावेनोपमेयं वर्णयता कविना तस्य दृढत्वभावं सम्पादयितुमनावश्यकभावेनैव उपमानं प्रदर्श्यते; अत्र तु अत्यन्तचमत्कारिताविधानाय दुर्योधनादिपतनरूपस्य द्वितीयार्थस्य आवश्यकभावेनैव द्योतयितुमभिप्रेतत्वादुपमानत्वं न विवक्षितम्, तदविवक्षया च उभयोरुपमानोपमेयभाव एव न विवक्षित इति। न वा श्लेष इति। शरद्वर्णनारूपप्रकरणवशेन प्रथमार्थस्यैव वाच्यत्वनियमेन द्वितीयार्थस्य केवलं व्यङ्ग्यतया वाच्यत्वाभावादिति भावः। अवदातं निर्मलं सर्वं एव विषयः परिष्कृत इत्यर्थः।

१५ । पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ॥ (व)

आदिशब्दात् खड्ग-मुरज-चक्र-गोमूत्रिकादयः (भ)। अस्य च तथाविधलिपि-सन्निवेश-विशेषवशेन चमत्कारविधायिनामपि वर्णानां तथाविध-श्रोत्राकाश-समवाय-विशेषवशेन चमत्कारविधायिभिर्वर्णैरभेदेनोपचाराच्छब्दालङ्कारत्वम् (म)। तत्र पद्मबन्धो यथा मम—(य)

"मारमा सुषमा चारु-रुचा मारवधूत्तमा ।
मात्तधूर्त्तमावासा सा वामा मेऽस्तु मा रमा ॥" (र)

एतेन प्रकरणादिनियमाभावादुभयार्थस्यैवाभिधेयत्वे श्लेषः, एकतरस्यार्थस्य अभिधेयत्वे अन्यतरस्य तु व्यङ्ग्यत्वं तयोश्चोपमानोपमेयभावसत्त्वे उपमाध्वनिः, तदसत्त्वे तु शब्दशक्तिमूलवस्तुध्वनिप्रभृतिरित्यवधेयम् ।

(व) चित्रं नामालङ्कारं लक्षयति पद्मेति। वर्णानामकारादीनां पत्रादौ लिखितानामित्यर्थः पद्माद्याकारहेतुत्वे पद्मप्रभृत्याकृतिसम्पादकत्वे चित्रं नामालङ्कार उच्यते। पत्रादौ पद्माद्याकृतिसम्पादको वर्णविन्यासश्चित्रालङ्कार इत्यर्थः। अस्य चित्रसम्पाद्यतया चित्रमिति नाम ।

(भ) आदीति। अत्राप्यादिशब्दात् लता-वृक्षादीनां ग्रहणम् ।

(म) ननु पत्रादौ पद्माद्याकृतिसम्पादकवर्णविन्यासस्य चित्रालङ्कारत्वे शब्दरूपत्वाभावात् कथमस्य शब्दालङ्कारत्वम्, येन शब्दालङ्कारप्रकरणे गणनमुपपद्यत इत्याह अस्य चेति। चित्रालङ्कारस्य चेत्यर्थः। तथाविधः पद्मादिप्रकारो यो लिपिसन्निवेशविशेषः पत्रादौ चित्रविन्यासविशेषः तस्य वशेन प्रभावेण चमत्कारविधायिनां वर्णानां चित्ररूपाणामित्यर्थः। तथाविधः पद्मादिप्रकारो यः श्रोत्राकाशसमवायविशेषः कर्णविवरे सम्बन्धविशेषस्तद्वशेन चमत्कारविधायिभिर्वर्णैः शब्दात्मकैः सह अभेदेनोपचारात् तादात्म्येन व्यवहारात्। चित्रभूतानामपि वर्णानामुच्चारणकाले शब्दरूपतयाविर्भावात् तेषां चित्रितानां वर्णानां तदुच्चारणेनोत्पन्नानां शब्दरूपवर्णानाञ्च कारण-कार्य्यरूपतया परस्परमभेदमङ्गीकृत्य चित्रालङ्कारस्य शब्दालङ्कारत्वं व्यवस्थाप्यत इत्यर्थः।

(य) अत्रेति। चित्रालङ्कारमध्ये इत्यर्थः। पद्मबन्धो वर्णरचना पद्माकृतिसम्पादको वर्णविन्यास इत्यर्थः। अन्यत्राप्येवम् ।

(र) मारेति। इष्टदेवतान्तिके आत्मानं प्रति लक्ष्मीदेव्या अप्रतिकूलताचरणप्रार्थनेयम्। मारस्य कन्दर्पस्य, मा माता, सुषमा सुन्दरी, चारुरुचा सुन्दरप्रभया मारवध्वा रतिदेवीतोऽपि उत्तमा उत्कृष्टा, तथा मा आत्तो न गृहीतो धूर्त्तमस्य अत्यन्तदुष्टजनस्य आवासो गृहं यया सा तथोक्ता, सा प्रसिद्धा रमा लक्ष्मीदेवी, मे मम वामा कदापि प्रतिकूला, मा अस्तु न भवतु। "मा च मातरि माने च" इति रभसः। "सुषमं साधु शोभनम्" इत्यमरः।

एषोऽष्टदलपद्मबन्धो दिग्दलेषु निर्गमप्रवेशाभ्यां श्लिष्टवर्णः, किन्तु विदिग्दलेष्वन्यथा, कर्णिकाक्षरन्तु श्लिष्टमेव (ल)।

एवं खड्गबन्धादिकमप्यूह्यम् (व)।

(ल) एष इति। अष्टभिर्दलैः पर्णैः पद्मबन्धः पद्माकृतिसम्पादको वर्णविन्यासः। तद्विन्यास-पाठयोः प्रकारमाह दिगिति। दिग्दलेषु पूर्व-दक्षिण-पश्चिमोत्तरदिग्वर्त्तिपर्णेषु, निर्गमप्रवेशाभ्यां यथा-सम्भवं बहिर्गमनान्तर्गमनाभ्याम्, श्लिष्टवर्णः द्विः पठनीयतया श्लिष्टवर्णद्वयविशिष्टः। विदिग्दलेषु आग्नेय-नैरृत-वायव्यैशानकोणस्थपर्णेषु, अन्यथा क्वचित् प्रवेश एव क्वचिच्च निर्गम एव, तथा अश्लिष्टवर्णश्च। कर्णिकाक्षरन्तु मध्यवर्त्ती वर्णस्तु श्लिष्टमेव, बहुवारपठनीयत्वादिति भावः। तथा चास्य विशेषलक्षणं सरस्वतीकण्ठाभरणे—

"कर्णिकायां न्यसेदेकं द्वे द्वे दिक्षु विदिक्षु च। प्रवेशनिर्गमौ दिक्षु कुर्य्यादष्टदलाम्बुजे॥"


एवम्भूतलक्षणस्य दिङ्मात्रप्रदर्शनपरतया चमत्कारिताविधायित्वे प्रकारान्तरेणापि पद्मबन्धादिकं भवतीत्युन्नेयम्।

उदाहृतपद्मबन्धचित्रं यथा—(१)



पूर्वं दिक्।

प्रकारान्तरपद्मबन्धचित्रं यथा मम—(२)




(२) श्लोको यथा—"हरः शिवी मे सुरमानसौका रिष्टं हरेन्मां सुतवत् समव्य।

दाता च भूयात् सुखमार्त्तिघाती सदा तदा स्वां सुकृती कृतार्थः॥"

अस्य उद्धारस्तु—दलाग्र-'ह'-कारादारभ्य सरलभावेन द्वि-द्वि-दलवर्णाः क्रमशः पठनीयाः एवञ्च कर्णिकाक्षरं श्लिष्टं स्यात् चमत्कारिताविशेषस्तु दलाग्र-'ह'-कारादारभ्य दक्षिणावर्त्तेन दलाग्रवर्णानां क्रमशः पाठे "हरिदासकाव्यतीर्थः" इति कविनाम भवतीति।

(व) एवमिति। ऊह्यं काव्यप्रकाश-सरस्वतीकण्ठाभरणादिष्विति शेषः।

(१) तत्र खड्गबन्धचित्रं यथा काव्यप्रकाशे—




(१) श्लोको यथा—

"मारारिशक्र-रामेभ-मुखैरासाररंहसा ।
सारारब्धस्तवा नित्यं तदार्त्तिहरणक्षमा ॥
माता नतानां संघट्टः श्रियां बाधितसम्भ्रमा ।
मान्याथ सीमा रामाणां शं मे दिश्यादुमाद्रिजा ॥"

अनयोर्व्याख्या तु काव्यप्रकाशीयमहेश्वरटीकायां रामचरणटीकायां वानुसन्धेया ।

(२) मुरजबन्धचित्रं यथा मम रुक्मिणीहरणमहाकाव्ये—

(मुरजो मृदङ्गस्तद्वद्बन्धो वर्णविन्यासो मुरजबन्धः ।)



(२) श्लोको यथा—

"सहसोच्चतमानश्रीः
साहसोर्जितमानसः ।
सहसोद्दर्धमानश्रीः
सहसोच्चतमाननः ॥"

उच्चतमाना उत्कर्षेण याचमाना श्रीर्लक्ष्मीदेवी यं स उच्चतमानश्रीः आरूढवानर इत्यादिवद्बहुव्रीहिः । सहसा तत्क्षणादेव साहसेन ऊर्जितमुत्तेजितं मानसं मनो यस्य सः । सहसा बलेन उद्दर्धमाना श्रीर्वीरशोभा यस्य सः । तथा सहसं हास्ययुक्तम् उच्चतमुन्नतञ्च आननं यस्य स तादृशः कृष्णः, अव्यात्तदिति परश्लोकेनान्वयः ।

चक्रबन्धः शिशुपालवधीनविंशसर्गे अनुसन्धेयः ।

(३) गोमूत्रिकाबन्धचित्रं यथा मम रुक्मिणीहरणमहाकाव्ये—



(३) अस्य श्लोकस्तु वामतो यथारीतिपाठेनैव सम्पद्यत इति द्रष्टव्यम् ।

काव्यान्तर्गडुभूततया तु नेह प्रपञ्च्यते (१) (अ)।

१६। रसस्य परिपन्थित्वान्नालङ्कारः प्रहेलिका।
उक्तिवैचित्र्यमात्रं सा च्युतदत्ताक्षरादिका॥ (ष)

च्युताक्षरा दत्ताक्षरा च्युतदत्ताक्षरा च (स)। उदाहरणम्—

"कूजन्ति कोकिलाः साले यौवने फुल्लमम्बुजम्।
किं करोतु कुरङ्गाक्षी वदनेन निपीड़िता॥" (ह)

अत्र "रसाले" इति वक्तव्ये "साले" इति "रः" च्युतः। "वने" इत्यत्र

एषां लक्षणानि सरस्वतीकण्ठाभरणादावनुसन्धेयानि। चित्रान्तरोदाहरणानि तु शिशुपालवध-किरातार्जुनीय-मदीयरुक्मिणीहरणादिषु यथेष्टं दर्शनीयानि।

(अ) ननु महाकविकाव्यनिवहेषु बाहुल्येनैव निबद्धश्चित्रालङ्कारो भोजराजादिभिरपि प्रायेणैव लक्षणोदाहरणाभ्यां प्रपञ्चितः, भवता तु कथं न प्रपञ्च्यत इत्याह काव्यान्तरिति। काव्यस्यान्तर्मध्ये गडुभूततया ग्रन्थिरूपतया ग्रन्थिरूपत्वे नात्यन्तकठिनत्वान्नीरसतयेत्यर्थः, इह साहित्यदर्पणे न प्रपञ्च्यते लक्षणोदाहरणाभ्यां न विस्तरतो विरच्यते, चित्रालङ्कार इति शेषः। प्राचीनानुरोधेनैव स्पृशतापि इक्षुदण्डस्य दृढ्भाग इव नितान्तकाठिन्यात् रसाविष्कारदुष्करतया चित्रालङ्कारः परित्यज्यत इत्याशयः। काव्यप्रकाश-कृताप्येवमेव परित्यक्तः।

(ष) अथ "प्रहेलिका सकृत्प्रश्नः" इति भोजराजलक्षणात् "अभिप्रेतार्थसंवरणकारिवचनविन्यासः प्रहेलिका" इति साम्प्रदायिकलक्षणात् "प्रहेलिका तु सा ज्ञेया वचः संवृतिकारि यत्" इति प्राचीनान्तर-लक्षणाच्च प्रहेलिकाया अलङ्कारतया तल्लक्षणं भवताप्यवश्यमभिधेयमित्याह रसस्येति। रसस्य परिपन्थित्वात् आस्वादविलम्बजनकत्वेन विरोधित्वात् प्रहेलिका नालङ्कारः। किन्तु च्युतदत्ताक्षरादिका सा प्रहेलिका उक्तिवैचित्र्यमात्रं केवलोक्तिगताश्चर्य्यमात्रप्रयोजिकेत्यर्थः। तथा च रसास्वादविलम्बजनकतया दोषत्वस्यैव सम्भवेऽपि उक्तिवैचित्र्यमादायैव प्राचां प्रहेलिकायामलङ्कारपदप्रयोगः, स पुनर्गौण एवेत्याशयः।

(स) आदिशब्दग्राह्यं दर्शयति च्युतेति। च्युतं दत्तञ्च अक्षरं यस्यां सा। भोजराजस्तु अक्षर-मुष्टिः बिन्दुमती अर्थवती चेत्यधिकं भेदत्रयं मन्यमानः साकल्येन प्रहेलिकां षड्विधामाह स्म।

(ह) एकोदाहरणेनैव च्युताक्षरादिभेदत्रयं दर्शयति कूजन्तीति। सखीं प्रति सख्यन्तरस्योक्ति-रियम्। कोकिलाः साले रसाले चूततरौ कूजन्ति अव्यक्तं शब्दायन्ते, यौवने वने जले अम्बुजं पद्मं फुल्लं प्रस्फुटितम्, वदनेन मदनेन निपीड़िता कुरङ्गाक्षी हरिणलोचना सा नायिका पतिविरहादिदानीं किं करोतु। इति ब्रूहीति भावः।

---

(१) काव्यान्तर्गडुभूता या सा तु नेह प्रपञ्च्यते इति मूलकारिकारूपः पाठः क्वचित्।

"यौवने" इति "यौ" दत्तः । "वदनेन" इत्यत्र "मदनेन" इति "मः" च्युतः "वः" दत्तः (च) ।

आदिशब्दात् क्रियाकारकगुप्त्यादयः (क) । तत्र क्रियागुप्तिर्यथा—

"पाण्डवानां सभामध्ये दुर्य्योधन उपागतः ।
तस्मै गाश्च हिरण्यञ्च सर्वाण्याभरणानि च ॥" (ख)

अत्र "दुर्य्योधनः" इत्यत्र "अदुर्य्योऽधनः" इति "अदुः" इति क्रियागुप्तिः (ग) । एवमन्यत्रापि (घ) ।

अथावसरप्राप्तेष्वर्थालङ्कारेषु प्राधान्यात् सादृश्यमूलेषु लक्षितव्येषु तेषामप्युपजीव्यत्वेन प्रथममुपमालङ्कारमाह—(ङ)

१७ । साम्यं वाच्यमवैधर्म्म्यं वाक्यैक्य उपमा द्वयोः । (च)

(च) उदाहृते च्युताक्षरत्वादिस्थलं दर्शयितुमाह अत्रेति ।

(क) आदिशब्दस्य व्यवस्थावाचित्वात् पुनरपि तद्व्याख्यान् दर्शयितुमाह आदिशब्दादिति । अत्राप्यादिशब्दात् सम्बोधनगुप्त्यादीनां ग्रहणम् ।

(ख) पाण्डवानामिति । राजसूययज्ञसमाप्तौ दानवर्णनमिदम् । पाण्डवानां सभाया मध्ये यः अधनो दरिद्र उपागत उपस्थित आसीत्, तस्मै गाश्च हिरण्यं सुवर्णञ्च, सर्वाणि आभरणानि च अदुर्दत्तवन्तः, दाननियुक्ताः कर्णादय इति शेषः ।

(ग) नन्वत्र कथं क्रियागुप्तिरित्याह अत्रेति । तथा चापाततः "दुर्य्योधनः" इति धृतराष्ट्रज्येष्ठपुत्रस्यैव प्रतीतेः क्रियागुप्तिरिति भावः ।

(घ) एवमिति । अन्यत्र कारकगुप्त्यादावप्येवमुदाहरणमूह्यमित्यर्थः । यथा—पाण्डवानामित्यत्रैव "उपागतः" इत्यस्य "अधनः" इति कर्त्तृकारकगुप्तिः । विस्तरस्तु सरस्वतीकण्ठाभरणकाव्यादर्शादावनुसन्धेयः ।

(ङ) इदानीमर्थालङ्काराणां निरूपणे सङ्गतिं तत्रापि चोपमाया एव प्रथमाभिधाने युक्तिञ्चाह अथेति । अथशब्दोऽयमर्थालङ्कारनिरूपणारम्भे, शब्दालङ्कारनिरूपणानन्तर्य्यस्याभिधानक्रमेणैव प्राप्तत्वात्तदैयर्थ्यापत्तेः । अवसरप्राप्तेषु शब्दालङ्कारनिरूपणस्य संक्षेपेणैव समापिततया कार्य्यान्तराभावादवसरः प्राप्तस्तेन निरूपणीयेषु अर्थालङ्कारेषु लक्षितव्येष्विति परेणान्वयः । प्राधान्यादिति । चमत्कारविशेषविधायितया प्रचुरतया चेति भावः । एतच्च सादृश्यमूलेषु प्रथमं लक्षितव्येषु इत्येतत् प्रत्येवहेतुः । लक्षितव्येषु लक्षणादिभिर्निरूपयितव्येषु सत्सु, तेषामपि सादृश्यमूलानामलङ्काराणामपि, उपजीव्यत्वेन प्राधान्यादाश्रयणीयत्वेन ।

(च) साम्यमिति । वाक्यस्य ऐक्ये एकत्वे सति, द्वयोरुपमानोपमेयभावेनाभिमतयोः अवैधर्म्म्यं तात्पर्य्यविषयीभूतविरुद्धधर्म्मरहितम्, वाच्यम् इवादिभिः शब्दैः क्यङादिभिः प्रत्ययैः उपमितादिभिः समासैर्वा स्पष्टप्रतिपाद्यम्, साम्यं सादृश्यम् उपमा । ननु "मुखं तव तथा भाति यथा राजति चन्द्रमाः"

रूपकादिषु साम्यस्य व्यङ्ग्यत्वम् (छ)। व्यतिरेके च वैधर्म्म्यस्याप्युक्तिः (ज)। उपमेयोपमायां वाक्यद्वयम् (झ)। अनन्वये च एकस्यैव साम्योक्तिः (ञ)। इत्यस्या भेदः (ट)।

इत्यादौ वाक्यद्वये अव्याप्तिरिति चेन्न, वाक्यैक्य इत्यनेन साकाङ्क्षवाक्यगतत्वे इत्यस्याभिप्रेतत्वात्, अत्र तूभयोरपि वाक्ययोः साकाङ्क्षत्वात्। एतेनोपमेयोपमायां द्वयोरपि वाक्ययोः परस्परनिराकाङ्क्षतया नातिव्याप्तिरपीति द्रष्टव्यम्। इत्यञ्च—

तात्पर्य्यविषयीभूतविरुद्धधर्म्माभाववत्त्वे सति इवादिप्रतिपाद्यसाकाङ्क्षवाक्यगतोभयसादृश्यत्वमुपमात्वमिति लक्षणं पर्य्यवसितम्।

"या गम्याः सत्सहायानां यासु खेदो भयं यतः। तासां किं यन्न दुःखाय विपदामिव सम्पदाम्॥"

इति किरातार्जुनीयपद्यादौ विपत्त्व-सम्पत्त्वयोः सर्वथा विरुद्धयोरपि धर्म्मयोर्विरुद्धत्वेन कवेस्तात्पर्य्य-विषयीभूतत्वाभावान्नाव्याप्तिः।

"हसति यामपि शक्रभर्त्तृकाम्" इत्यादौ हसतीत्यादीनां साम्यप्रतिपादकतया दण्डिनाभिहितत्वा-न्नाव्याप्तिः। "राजपुरुषः" इत्यादौ लुप्तविभक्तेरिव "विधवति मुखाब्जम्" इत्यादावपि प्राचीनमते लुप्तक्यङादेरर्थ-वाचकत्वाङ्गीकारात् साम्यस्य वाच्यतया लक्षणसङ्गतिः। "मुखशशी" इत्यादावुपमितसमासेन "शशाङ्कवदना" इत्यादौ च बहुव्रीहिसमासेन साम्यस्य प्रतिपादितत्वादुपमोपपत्तिः। तथा द्वयोरिति उभयेति चानेकोप-लक्षणम्। तेन "हरिमिव हरिमिव हरिमिव सुरसरिदम्भः पतन्नमत" इत्यादौ बहूनां सादृश्ये नाव्याप्तिः। "रूपानुरूपं वसनम्" इत्यादौ चोपमानोपमेयभावाभावात् वैचित्र्याभावाच्च नातिव्याप्तिरिति सारसंक्षेपः।

(छ) रूपकादिभिः सहोपमाया भेदप्रदर्शनच्छलेन वाच्यमित्यादिविशेषणपदानां कारिकापाठक्रमेण व्यावृत्तिमाह रूपकादिष्विति। आदिपदेन परिणामप्रतिवस्तूपमादीनां ग्रहणम्। तथा च व्यङ्ग्यसाम्य-व्यवच्छेदार्थमेव वाच्यमिति विशेषणमित्याशयः। एवञ्च लक्षणाप्रतिपाद्यसाम्यस्थलेऽपि उपमैवेति ग्रन्थकृ-दभिप्रायो बोध्यः। यथा—"सरसिजप्रत्यर्थि पाणिद्वयम्।" अत्र प्रत्यर्थिशब्देन सदृशं लक्ष्यत इति नव्याः।

(ज) अवैधर्म्म्यमित्यस्य व्यावृत्तिमाह व्यतिरेके चेति। "अकलङ्कं मुखं तस्या न कलङ्की विधुर्यथा" इत्यादिव्यतिरेकालङ्कारस्थले चेत्यर्थः। वैधर्म्म्यस्य उदाहृते अकलङ्कत्वकलङ्कित्वरूपस्य। तथा च व्यति-रेकस्थले अतिव्याप्तिवारणार्थम् अवैधर्म्म्यमिति विशेषणमिति भावः।

(झ) वाक्यैक्य इत्यस्य व्यावृत्तिं दर्शयति उपेति। अत्रोपमेयोपमापदं रसनोपमाया अप्युप-लक्षणम्। तथा चोपमेयोपमायां रसनोपमायाञ्च वाक्यद्वयं परस्परनिराकाङ्क्षमनेकवाक्यमित्यर्थः। तत्रोप-मेयोपमायां यथा—"कमलेव मतिः" इत्येकं वाक्यम्, "मतिरिव कमला" इति च द्वितीयम्। रसनोपमायां यथा—"चन्द्रायते शुक्लरुचापि हंसः" इत्येकं वाक्यम्, "हंसायते चारुगतेन कान्ता" इत्यादिकञ्च द्वितीयादि। एवञ्चात्र वाक्यैक्य इत्यभिधानात् उपमेयोपमायां रसनोपमायाञ्च साम्यस्य परस्परनिराकाङ्क्षानेकवाक्यगतत्वा-दुपमालक्षणस्य नातिव्याप्तिरित्यभिप्रायः। एतदुक्तिवशेन "साधर्म्म्यमुपमाभेदे" इति काव्यप्रकाशलक्षणं कटाक्षितमिति बोध्यम्।

१८। सा पूर्णा यदि सामान्य-धर्म्म औपम्यवाचि च।
उपमेयञ्चोपमानं भवेद्वाच्यम्—(ठ)

सा उपमा। साधारणधर्म्मौ द्वयोः सादृश्यहेतू गुणक्रिये मनोज्ञत्वादि (ड)। औपम्यवाचकमिवादि (ढ)। उपमेयं मुखादि। उपमानं चन्द्रादि (ण)।

(ञ) द्वयोरित्यस्य व्यावृत्तिमाह अनन्वये चेति। तथा च "राजीवमिव राजीवम्" इत्यादावेकमात्र-पदार्थस्य साम्ये अनन्वयालङ्कारस्थले अतिव्याप्तिनिरासार्थमत्र द्वयोरित्यभिहितमित्याशयः।

(ट) इतीति। इति अनया रीत्या, अस्या उपमायाः, भेदौ रूपकादिभ्यः पार्थक्यम्।

(ठ) उपमा च पूर्णालुप्ताभेदेन प्रधानतो द्विविधेति दर्शयन् प्रथमं पूर्णां लक्षयति सेति। यदि सामान्यधर्म्म उपमानोपमेयोभयवृत्तिधर्म्मबोधकं पदम्, औपम्यवाचि सादृश्यवाचकं पदञ्च प्रयुक्तं भवेदित्यर्थः तथा उपमेयमुपमानञ्च वाच्यमुल्लिखितं भवेत्; तदा सा उपमा पूर्णा पूर्णोपमाभिधाना स्यादित्यर्थः। सर्वाङ्गपूर्णत्वादित्याशयः।

(ड) सामान्यधर्म्मादिपदानि क्रमशो विवरीतुमाह साधारणेति। सामान्यसाधारणशब्दयोः पर्य्यायतया सामान्यधर्म्म इत्यस्य स्थाने साधारणधर्म्म इति प्रयोगेऽपि न दोषः। द्वयोरुपमानोपमेयत्वेनाभिमतयोः पदार्थयोः, सादृश्यस्य हेतू घटकौ। तथा च तद्भिन्नत्वे सति तद्गतानेकधर्म्मवत्त्वं नाम सादृश्यम्। तेन च स धर्म्मस्तस्य सादृश्यस्य घटक एव भवति, धनमिव धनिलस्येति भावः। गुणश्च क्रिया चेति गुणक्रिये। एतच्चोपलक्षणम्, एकविधशब्दोपस्थाप्यत्वमपि शाब्दः सामान्यधर्म्म इत्युन्नेयम्। मनोज्ञत्वादिपदेन भातिप्रभृति-क्रियायास्सादृश्यशाब्दधर्म्मस्य च ग्रहणम्। तथा च "कमलमिव सुखं मनोज्ञम्" इत्यादौ मनोज्ञत्वादिरूपो गुणः सामान्यधर्म्मः। "मुखं चन्द्र इवाभाति" इत्यादौ आभातीत्यादिरूपा क्रिया सामान्यधर्म्मः। "सकलकलं पुरमेतज्जातं सम्प्रति सुधांशुबिम्बमिव" इत्यादौ सकलकलमित्येकविधशब्दोपस्थाप्यत्वरूपः स्वरूपविशेषः सामान्यधर्म्मः।

(ढ) औपम्येति। एतच्च अव्ययानामपि केषाञ्चिच्छब्दानां वाचकत्वमङ्गीकुर्वतां वैयाकरणैकदेशीयानां मतमाश्रित्याभिहितमिति बोध्यम्। आदिशब्देन यथादिशब्दानां वदादिप्रत्ययानां बहुब्रीहिसमासस्य च ग्रहणम्। दण्डिना तु—"इव-वद्वा-यथा-शब्दाः" इत्यादिना औपम्यवाचकाः कियन्तः शब्दाः परिगणिता उन्नेयाः।

(ण) उपेति। उपमीयते सदृशीक्रियते यत्तदुपमेयं सादृश्याश्रयः पदार्थः। यस्य दृष्टान्तो मुखादिति। "चन्द्रवन्मुखम्" इत्यादौ मुखादिकमित्यर्थः। उपमीयते सदृशीक्रियते येन तदुपमानं सादृश्यस्य नियतसम्बन्धी पदार्थः। तत्र दृष्टान्तश्चन्द्रादीति। "चन्द्रवन्मुखम्" इत्यादौ चन्द्रादिक-मित्यर्थः।

१९ । द्वयं पुनः ॥

श्रौती यथेववाशब्दा इवार्थो वा वतिर्यदि ।
आर्थी तुल्यसमानाद्यास्तुल्यार्थो यत्र वा वतिः ॥ (त)

यथेववादयः शब्दा उपमानानन्तरप्रयुक्ततुल्यादिपदसाधारणा अपि श्रुतिमात्रेणोपमानोपमेयगतसादृश्यलक्षणसम्बन्धं बोधयन्तीति तत्सद्भावे श्रौती उपमा (थ)। एवं "तत्र तस्येव" इत्यनेन इवार्थे विहितस्य वतेरुपादाने (द)।

तुल्यादयस्तु—"कमलेन तुल्यं मुखम्" इत्यादावुपमेय एव, "कमलं मुखस्य तुल्यम्" इत्यादावुपमान एव, "कमलं मुखञ्च तुल्यम्" इत्यादावुभयत्रापि विश्राम्यन्तीति, अर्थानुसन्धानादेव साम्यं प्रतिपादयन्तीति तत्सद्भावे

(त) श्रौतीरूपेण आर्थीरूपेण च पूर्णोपमां द्विधा विभजते द्वयमिति। द्वयं पुनः पूर्णोपमा, यदि यथाशब्दः इवशब्दः, "वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये" इति विश्वकोषदर्शनात् उपमावाचको वाशब्दः, बहुवचनात् इवार्थे 'व'-निपातश्च इवार्थो वतिः प्रत्ययो वा वर्त्तते, तदा श्रौतीत्याख्यायते ; श्रुतिमात्रेण सादृश्यावगमात्। यत्र तु तुल्यः, समानः, आद्यशब्दात् सदृशादयः, शब्दाश्च वर्त्तन्ते, तुल्यार्थो वतिः प्रत्ययो वा वर्त्तते, तत्र आर्थीत्यभिधीयते ; अर्थानुसन्धानेनैव सादृश्यावगमात्।

(थ) ननु यथादयस्तुल्यादयश्च शब्दाः सादृश्यप्रत्यायने समानसमर्था एवेति कथं तत्तच्छब्दमात्रमादायैव श्रौत्यार्थीरूपद्विविधभेदकल्पनेत्याह यथेवेति। उपमानानन्तरम् उपमानबोधकशब्दात् परं प्रयुक्तानि विन्यस्तानि यानि तुल्यादिपदानि तेषां साधारणाः समाना अपि, श्रुतिमात्रेण षष्ठीवत् श्रवणमात्रेणैव उपमानोपमेयगतं सादृश्यलक्षणं साम्यस्वरूपं सम्बन्धं बोधयन्ति शब्दशक्तिमहिम्ना प्रत्याययन्ति, इति हेतोः, तेषां यथेववादिशब्दानां सद्भावे विद्यमानत्वे।

(द) एवमिति। "तत्र तस्येव" इति (५। १। ११६) पाणिनिसूत्रम्। तत्रेति सप्तम्यन्तात् तस्येति षष्ठ्यन्ताच्च शब्दादिवार्थे वतिप्रत्ययो भवतीत्यर्थः। वतेर्वतिप्रत्ययस्य उपादाने श्रौती उपमेति पूर्वेणान्वयः।

(ध) इदानीमार्थीति संज्ञामुपपादयितुमाह तुल्यादय इति। शब्दा इति पूर्वेणान्वयः। आदिशब्दात् समान-सदृश-हसति-प्रत्यर्थि प्रभृतिशब्दानां ग्रहणम्। उपमेये मुख एव, विश्राम्यन्तीति परेणान्वयः। तुल्यमिति मुखमिति चानयोः समानविभक्तिकत्वादिति भावः। एवमुत्तरयोरपि। मुखस्येति "दीर्घं काथाजलम्" इत्यादिवदधिकरणतासम्बन्धे षष्ठी। उपमाने कमले एव। न चात्र कमलशब्दतुल्यशब्दयोः समानविभक्तिकत्वात् कमलस्योपमेयत्वमेवेति वाच्यम्, मुखकमलशब्दयोः समभिव्याहारस्थले कमलस्योपमानतया चिरप्रसिद्धत्वात्। काव्यप्रकाशटीकायां महेश्वरोऽप्येवमेवाह स्म। विश्राम्यन्ति अवतिष्ठन्ते समानविभक्तिक-

आर्थी (ध)। एवं "तेन तुल्यम्" इत्यादिना तुल्यार्थे विहितस्य वतेरुपादाने (न)।

२० । द्वे तद्धिते समासेऽथ वाक्ये —(प)

द्वे श्रौती आर्थी च। उदाहरणम्—

"सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ।
हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले ! ॥" (फ)

अत्र क्रमेण त्रिविधा श्रौती (ब)।

त्वाद्विशेष्यताप्रत्यायनेन प्राधान्यं प्रत्याययन्तीत्यर्थः। साम्यम् उपमेयत्वप्रतिपादकं विशेष्यीभूतं सादृश्यमित्यर्थः। तेषां तुल्यादिशब्दानां सद्भावे विद्यमानत्वे, आर्थी उपमेत्यन्वयः।

(न) एवमिति। इत्यादिना "तेन तुल्यं क्रिया चेद्वतिः" (५। १। ११५) इति पाणिनिसूत्रेणेत्यर्थः। तथा च तेनेति तृतीयान्तात् तुल्यमित्यर्थे वतिप्रत्ययो भवति, तत्तुल्यं चेत् क्रिया क्रियाविशेषणत्वेन क्रियारूपं भवतीत्यर्थः। यथा—ब्राह्मणेन तुल्यमधीते ब्राह्मणवदधीते चत्रियः। वतेर्वतिप्रत्ययस्य उपादाने आर्थी उपमेति पूर्वेणान्वयः। काव्यप्रकाशकारोऽप्येवम्।

(प) श्रौत्यार्थीभेदेन द्विविधाया अपि तस्याः पूर्णोपमायाः पुनस्त्रिविधत्वमाह द्वे इति। द्वे पूर्वोक्ते पूर्णोपमे श्रौत्यार्थीभेदेन द्विविधापि पूर्णोपमेत्यर्थः, प्रत्येकमेव तद्धिते समासे अथ तथा वाक्ये च सम्भवत इत्यर्थः।

(फ) सौरभमिति। हे बाले ! तव मुखस्य सौरभम् अम्भोरुहवत् पद्मस्येव, स्तनौ कुम्भाविव पीनौ स्थूलौ। एवं यथा शरदिन्दुः हृदयं मदयति, तथा तव वदनं कर्तृ हृदयं मदयति आनन्दयति।

(ब) अत्रेति। तथा च प्रथमवाक्ये सामान्यधर्मः सौरभम्, अम्भोरुहमुपमानम्, मुखमुपमेयम्, वतिप्रत्ययश्चौपम्यवाचीति पूर्णोपमायाः सामान्यलक्षणसङ्गतिः। एवमन्यत्राप्यूह्यम्। सा चात्र पूर्णोपमा "तत्र तस्येव" इत्यनेन इवार्थे वतिप्रत्ययविधानात् तद्धितगता श्रौती।

द्वितीयवाक्ये "कुम्भाविव" इत्यत्र "इवेन समासो विभक्त्यलोपश्च" इति वार्त्तिकोक्त्या समासाश्रयणात् समासगता श्रौती पूर्णोपमा।

द्वितीयार्द्धस्य तु वाक्यरूपत्वात् यथाशब्दस्य श्रौतीघटकत्वाच्च वाक्यगता श्रौती पूर्णोपमा।

ननु प्रथमद्वितीययोरपि वाक्यत्वेन वाक्यगता श्रौत्या पूर्णोपमा तद्धितगता-समासगतयोस्तयोः साङ्कर्यापत्तिः। न चापि तयोः क्रियाभावाद्वाक्यत्वाभाव इति वाच्यम्, अवश्यमेव क्रियाया अध्याहरणीयत्वात् अन्यथा आकाङ्क्षानिवृत्त्यसम्भवेन अन्वयसमाप्त्यसम्भवात् "चकितमृगलोचनाभ्याम्" इत्यादिवक्ष्यमाणस्य क्रियाभावे वाक्यगतत्वे उदाहरणत्वासम्भवाच्चेति चेन्न, तद्धितगता-समासगतयोर्विशेषरूपत्वेनापवादरूपतया सामान्यरूपाया वाक्यगताया बाधकत्वाङ्गीकारात्।

"मधुरः सुधावदधरः पल्लवतुल्योऽतिपेलवः पाणिः ।
चकितमृगलोचनाभ्यां सदृशी च चपले लोचने तस्याः ॥" (भ)

अत्र क्रमेण त्रिविधा आर्थी (म) ।

२१ । पूर्णा षडेव तत् । (य)

स्पष्टम् (र) ।

२२ । लुप्ता सामान्यधर्म्मादेरेकस्य यदि वा द्वयोः ॥
त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्ववत् । (ल)

सा लुप्ता । तद्भेदमाह—

२३ । पूर्णावद्धर्म्मलोपे सा विना श्रौतीन्तु तद्धिते ॥ (व)

(भ) मधुर इति । तस्यास्तरुण्याः अधरः सुधावन्मधुरः, पाणिः पल्लवतुल्योऽतिपेलवः अतिशयेन कोमलः, तथा लोचने च चकितमृगस्य त्रस्तहरिणस्य लोचनाभ्यां सदृशी चपले चञ्चले ।

अत्र पेलवशब्दस्य आद्याक्षरे अश्लीलेति पदांशगताश्लीलतादोषो भवत्येव, अन्यथा "पाणिः पल्लवपेलवः" इति सप्तमपरिच्छेदोदाहरणेऽप्यसौ दोषो न स्यात् समानन्यायात् । अतः "न दोषः" इति रामचरणोक्तं चिन्त्यम् । तथापि न किञ्चिदुद्वेजनीयं दोषस्यालङ्कारप्रतिबन्धकत्वाभावात् ।

(म) अत्रेति । तथा च प्रथमवाक्ये अधरः सुधातुल्यमेव मधुरतया आस्वाद्यते इत्यर्थविवक्षया "तेन तुल्यं क्रिया चेद्वतिः" इत्यनेन तुल्यार्थे वतिप्रत्ययात् तद्धितगता आर्थी पूर्णोपमा । द्वितीयवाक्ये पल्लवेन तुल्य इति समासात् समासगता आर्थी पूर्णोपमा । द्वितीयार्द्धस्य च वाक्यरूपत्वात् चकितमृगलोचनाभ्यामित्यत्र, समासे सत्यपि सदृशी इत्यनेन समासाभावाच्च वाक्यगतैव आर्थी पूर्णोपमा । अत्रापि पूर्ववदेव पूर्ववाक्ययोर्न वाक्यगता आर्थी पूर्णोपमेत्यूहनीयम् ।

(य) सङ्कलयति पूर्णेति । तत्तस्मात् उक्तविधभेदनिरूपणादित्यर्थः, पूर्णा पूर्णोपमा षडेव षट्प्रकारैव । ते च प्रकारा अनुपदमेवोक्ता अनुसन्धेयाः ।

(र) स्पष्टमिति । इदं वाक्यं सुबोधमित्यर्थः । अतो न किञ्चिद्व्याख्यातमित्याशयः ।

(ल) लुप्तोपमां लक्षयति लुप्तेति । सामान्यधर्म्मादेरिति "द्वन्द्वः सामासिकस्य च" इति वतिवन्निर्द्धारण एव षष्ठ्या एकवचनम् । आदिशब्देन उपमानस्य उपमेयस्य औपम्यवाचकानामिवादिशब्दानाञ्च ग्रहणम् । तथा च सामान्यधर्म्मादेर्मध्ये यस्य कस्यचिदेकस्य, यदि वा अथवा ययोः कयोश्चित् द्वयोः, किंवा येषां केषाञ्चित् त्रयाणाम् अनुपादाने अनभिधाने लुप्ता लुप्तोपमा भवति । सामान्यधर्म्मादीनां मध्ये एकप्रभृतेरनुपादानरूपलोपादेवास्या लुप्तोपमेति संज्ञा । ∵ लुप्तोपमापि पूर्ववत् पूर्णोपमावत् श्रौती आर्थी चेति प्रथमतो द्विविधेत्यर्थः ।

(व) पूर्वकारिकायां "सामान्यधर्म्मादेः" इति धर्म्मस्य प्रथमनिर्द्देशात् धर्म्मलोप एव लुप्तोपमां प्रथमं

सा लुप्तोपमा धर्म्मस्य साधारणगुणक्रियारूपस्य लोपे पूर्णावदिति पूर्वोक्त-रीत्या षट्प्रकारा, किन्त्वत्र तद्धिते श्रौत्या असम्भवात् पञ्चप्रकारा (अ)।

उदाहरणम्—

"मुखमिन्दुर्यथा पाणिः पल्लवेन समः प्रिये ! ।
वाचः सुधा इवौष्ठस्ते (१) विम्बतुल्यो मनोऽश्मवत् ॥" (ष)

विभजते पूर्णावदिति । सा लुप्तोपमा धर्म्मलोपे सामान्यधर्म्मस्यानुपादाने सति तद्धिते श्रौतीं विना तु श्रौतीरूपं भेदं विहाय तु पूर्णावत् पूर्णोपमासमसंख्यकप्रकारा भवतीत्यर्थः ।

(अ) धर्म्मस्येति । साधारण उपमानोपमेयोभयवृत्तिर्यो गुणक्रियारूपस्तस्य । पूर्वोक्तरीत्या श्रौती तद्धितगता समासगता वाक्यगता चेति त्रिविधा, आर्थी च तथैव त्रिविधेति प्रागुक्तप्रकारेण, षट्प्रकारा षड्-विधा भवितुं योग्यापीत्यर्थः । अत्र सामान्यधर्म्मलोपे सति । असम्भवादिति । अत्रायमभिप्रायः—"तत्र तस्येव" इत्यनेन सप्तम्यन्तात् षष्ठ्यन्ताच्च वतिप्रत्ययो विधीयते, सा पुनः सप्तमी षष्ठी च विभक्तिर्यं कञ्चित् सामान्यधर्म्ममपेक्ष्यैव सम्भवति । एवञ्च सामान्यधर्म्मानुपादाने तस्याः सप्तम्याः षष्ठ्याश्चासम्भवात् तदन्त एव प्रसक्तस्य वतिप्रत्ययस्याप्यसम्भवेन सामान्यधर्म्मलोपे श्रौत्या अप्यसम्भव एव । तथा च "सौरभमम्भोरुहवन्मुखस्य" इत्यत्र सौरभरूपसामान्यधर्म्मानुपादाने न खलु केवलम् "अम्भोरुहस्य" इति षष्ठी विभक्तिस्तदन्ते वतिप्रत्ययो वा उपपद्यत इति । अतएवाह पञ्चप्रकारेति । तथाहि सामान्यधर्म्मलोपे समासगता वाक्यगता चेति द्विविधा श्रौती, तद्धितगता समासगता वाक्यगता चेति त्रिविधा च आर्थीति मिलित्वा समुदायेन पञ्चविधा लुप्तोपमा ।

(ष) मुखमिति । हे प्रिय ! तव मुखम् इन्दुर्यथा चन्द्र इव । अत्र यथाशब्दस्योपादानात् आनन्दयतीति क्रियारूपसामान्यधर्म्मस्य चानुपादानात् वाक्यगता श्रौती लुप्तोपमा ।

पाणिः पल्लवेन सम इति समशब्दस्योपादानात् कोमल इति गुणरूपसामान्यधर्म्मस्य चानुपादानात् वाक्यगता आर्थी लुप्तोपमा ।

वाचः सुधा इव इति इवशब्दस्योपादानात् मधुरा इति सामान्यधर्म्मस्य चानुपादानात् इवशब्देन सह प्रागुक्तन्यायेन समासाच्च समासगता श्रौती लुप्तोपमा ।

ते तव ओष्ठो विम्वतुल्य इति तुल्यशब्दस्योपादानात् लोहितवर्ण इति सामान्यधर्म्मस्य चानुपादानात् विम्बशब्देन सह तुल्यशब्दस्य समासाच्च आर्थी समासगता लुप्तोपमा ।

तथा मनः अश्मवत् पाषाणवत् इति तृतीयान्तादश्मशब्दात् तुल्यार्थे वतिप्रत्ययविधानात् कठिनमिति सामान्यधर्म्मस्य चानुपादानात् तद्धितगता आर्थी लुप्तोपमा ।

अत्र पञ्चानामेव स्थलानां वाक्यत्वेन सर्वत्रैव वाक्यगत-लुप्तोपमात्वप्रसक्तावपि तद्धितगतायाः समास-गतायाश्च विशेषरूपत्वेन तदपवादरूपत्वात् तद्धितगता-समासगतयोर्व्यतिरिक्तस्थल एव वाक्यगतायाः प्रवृत्तिरिति पूर्वमप्युक्तम् ।

(१) इवौष्ठस्ते इति क्वचित् पाठः ।

२४। आधारकर्म्मविहिते द्विविधे च क्यचि क्यङि।
कर्म्म-कर्त्रोर्णमुलि च स्यादेवं पञ्चधा पुनः॥ (ख)

धर्म्मलोपे लुप्तेत्यनुषज्यते (ङ)। क्यच्-क्यङ्-णमुलः कलापमते यिन्नायिणमः (च)। क्रमेणोदाहरणम्—

"अन्तःपुरीयसि रणेषु सुतीयसि त्वं
पौरं जनं तव सदा रमणीयते श्रीः।
दृष्टः प्रियाभिरमृतद्युतिदर्शमिन्द्र-
सञ्चारमत्र भुवि सञ्चरसि क्षितीश!॥" (छ)

(ख) पुनरपि लुप्तोपमामेव प्रकारान्तरेण विभजते आधारेति। आधारकर्म्मविहिते क्यचि द्विविधे लुप्तोपमे अधिकरणकारकाद्विहिते क्यचि एकविधा, कर्म्मकारकाद्विहिते क्यचि च एकविधेति मिलित्वा एकस्मिन् क्यचेव द्विविधे लुप्तोपमे इत्यर्थः। आधारकर्म्मविहिते द्विविधे क्यचि द्विविधा लुप्तोपमा इत्यन्वयो वा। क्यङि प्रत्यये एकविधा, तथा कर्म्म-कर्त्रोर्णमुलि कर्म्मणि णमुलि कर्त्तरि णमुलि च प्रत्येकमेकैकविधतया द्विविधा एवमित्थं मिलित्वा सामान्यधर्म्मलोपे लुप्तोपमा समुदायेन पुनः पञ्चधा स्यादित्यर्थः।

(ङ) धर्म्मेति। पूर्वकारिकातो "धर्म्मलोपे" इति "सा" तत्पदवाच्य "लुप्ता" इति च अनुषज्यते अनुकृष्यते, आकाङ्क्षितत्वादिति भावः।

(च) सर्वैरपि वैयाकरणैरलङ्कारशास्त्रस्यादरणीयत्वात् पाणिनीय-क्यजादिप्रत्ययस्वरूपाणि कालापिकानवबोधयितुमाह क्यजिति। अत्र यथासंख्येनान्वयः। मुग्धबोधमते तु क्य-ञ्य-णम इत्यवधेयम्।

(छ) एकपद्येनैव निरुक्तपञ्चविधलुप्तोपमायाः क्रमेणोदाहरणमाह अन्तरेति। हे क्षितीश! राजन्! त्वं रणेषु अन्तःपुरीयसि अन्तःपुरेष्विवाचरसि अन्तःपुरेष्विव सुखं विहरसीत्यर्थः। अत्र अन्तःपुरेत्यधिकरणात् पाणिनिमते "उपमानादाचारे" इत्यत्र "अधिकरणाच्च" इति वार्त्तिकोक्त्या क्यच्, कलापमतेऽपि "उपमानादाचारे" इत्यत्र "आधारादपि स्यात्" इति दुर्गसिंहोक्त्या यिन्, मुग्धबोधमते "ढडोपमानादाचारे क्यः" इति सूत्रेण च क्यः प्रत्ययः।

पौरं जनं सुतीयसि सुतं पुत्रमिवाचरसि पुत्रतुल्यं स्नेहनिर्भरास्पदं मन्यसे इत्यर्थः। अत्रापि सुतमिति कर्म्मपदात् मतत्रये उक्तसूत्रत्रयेण क्रमात् क्यच् यिन् क्यश्च प्रत्ययः।

श्रीर्लक्ष्मीः सदा तव रमणीयते रमणी वनितेवाचरति वनितेव सुखभोगं सम्पादयतीत्यर्थः। अत्र रमणीति कर्त्तृपदात् पाणिनिमते "कर्त्तुः क्यङ् सलोपश्च" इत्यनेन क्यङ्, कलापमते "कर्त्तुरायिः सलोपश्च" इत्यनेनायिः, मुग्धबोधमते तु "घान्ङ्यक्ती सलोपश्च" इत्यादिना ञ्यप्रत्ययः।

प्रियाभिरमृतद्युतेरिव दर्शनममृतद्युतिदर्शं त्वं दृष्टः चन्द्रवन्नयनानन्दकरत्वेन दृष्ट इत्यर्थः। अत्र अमृतद्युतीति कर्म्मण्युपपदे दृश्धातोः पाणिनिमते "उपमाने कर्म्मणि च" इत्यनेन णमुल्, कलापमते "कर्म्मणि

अत्र "अन्तःपुरीयसि" इत्यत्र सुखविहारास्पदत्वस्य, "सुतीयसि" इत्यत्र स्नेहनिर्भरत्वस्य च साधारणधर्मस्य लोपः (ख)। एवमन्यत्र (ग)।

इह च यथादि-तुल्यादि-विरहात् श्रौत्यादिविशेषचिन्ता नास्ति (घ)।

इदञ्च केचिदौपम्यप्रतिपादकस्य इवादेर्लोपे (१) उदाहरन्ति, तदयुक्तम्; क्यङादेरपि तदर्थं विहितत्वेन औपम्यप्रतिपादकत्वात् (ङ)। ननु क्यङादिषु सम्यगौपम्यप्रतीतिर्नास्ति, प्रत्ययत्वेनास्वतन्त्रत्वात् इवादिप्रयोगाभावाच्चेति न वाच्यम्; कल्पवादावपि तथाप्रसङ्गात् (च)। न च कल्पवादीनामिवादि-तुल्यतया औपम्यस्य वाचकत्वम्, क्यङादीनान्तु द्योतकत्वम्; इवादीनामपि

चोपमाने" इत्यनेन णम्, मुग्धबोधमते तु "चणम् वाभीक्ष्ण्ये पूर्वकाले" इत्यनेनैव वाशब्दस्य व्यवस्थावाचित्वात् चणम्प्रत्ययः।

तथा च भुवि इन्द्र इव सञ्चरणमितीन्द्रसञ्चारं सञ्चरसि ऐश्वर्यातिशयादिन्द्र इवाप्रतिहतं सञ्चरसीत्यर्थः। अत्रापि इन्द्रेति कर्त्तर्थ्युपपदे स पूर्वकचरधातोस्तवर्थेऽप्युक्तसूत्रद्वयेण क्रमात् णमुल्, णम्, चणम् वा प्रत्ययः।

(ख) ननूदाहृतप्रयोगेषु कुत्र कीदृशस्य सामान्यधर्मस्य लोपः, येन तेषु लुप्तोपमाविशेषाः स्युरित्याह अत्रेति। सुखविहारास्पदत्वस्य, "अन्तःपुरीयसि रणेषु" इत्यत्र अनायासविचरणाश्रयत्वरूपस्य, साधारणधर्मस्येति परेणान्वयः।. उपमानोपमेयभूतयोरुभयोरपि रणान्तःपुरयोस्तादृशधर्मस्य सत्त्वादिति भावः। एवमुत्तरत्रापि। स्नेहनिर्भरत्वस्य "पौरं जनं सुतीयसि" इत्यत्र वात्सल्यातिशयाश्रयत्वस्य।

(ग) एवमिति। अन्यत्र "रमणीयते श्रीः" इत्यादिषु त्रिषु स्थलेष्वपि एवमूह्यमित्यर्थः। तथा च "रमणीयते श्रीः" इत्यत्र सुखभोगसम्पादकत्वस्य, "प्रियाभिरमृतद्युतिदर्शम्" इत्यत्र नयनानन्दकरत्वस्य, "इन्द्रसञ्चारं सञ्चरसि" इत्यत्र अप्रतिहतसञ्चरणस्य च सामान्यधर्मस्य लोपः।

(घ) नन्वमीषां पञ्चानामेव पुनः श्रौत्यार्थीरूपभेदद्वयेन पुनर्द्विविधत्वात् समुदायेन दशविधत्वे प्राप्ते कथं पञ्चेतिमात्रमुक्तमित्याह इह चेति। काजादिप्रत्ययमात्रघटितलुप्तोपमायाश्चेत्यर्थः। आदिशब्देन आर्थीग्रहणम्। तथा च श्रुतिमात्रेण सादृश्यबोधकानां यथादिशब्दानामभावात् श्रौतीरूपभेदचिन्ता नास्ति। एवमर्थानुसन्धानेन सादृश्यप्रतिपादकानां तुल्यादिशब्दानामभावात् आर्थीरूपभेदचिन्तापि नास्तीति सरलार्थः। श्रौतीभिन्नाया एवार्थीत्वाङ्गीकारे तस्या आर्थीत्वमस्त्येवेति बोध्यम्।

(ङ) "वादेर्लोपे समासे सा कर्माधारक्यचि क्यङि। कर्मकर्त्रोर्णमुलि—" इति काव्यप्रकाशकारमतं दूषयितुमाह इदञ्चेति। "अन्तःपुरीयसि रणेषु" इत्यादिसदृशञ्चेत्यर्थः, काव्यप्रकाशे "पौरं सुतीयति जनम्" इत्याद्युदाहरणदर्शनात। केचित् काव्यप्रकाशकाराः। लोपे अनुपादाने। आदिपदेन क्यज्णमुलोर्ग्रहणम्। तदर्थं विहितत्वेन इवार्थविहितत्वेन। औपम्येति। "यो यत्र प्रत्ययो जातः" इत्यादिन्यायादिति भावः।

---

(१) वतेर्लोपे, इवादेर्लोपम् इति पाठभेदौ।

वाचकत्वे निश्चयाभावात् (छ)। वाचकत्वे वा "समुदितं पदं वाचकम्" "प्रकृतिप्रत्ययौ स्वस्वार्थबोधकौ" इति च मतद्वयेऽपि वत्यादि-क्यङाद्योः साम्यमेवेति (ज)।

यच्च केचिदाहुः—"वत्यादय इवाद्यर्थेऽनुशिष्यन्ते, क्यङादयस्त्वाचारार्थे" इति, तदपि न। न खलु क्यङादय आचारमात्रार्थाः अपि तु सादृश्याचारार्था इति (झ)।

तदेवं धर्म्मलोपे दशप्रकारा लुप्ता (ञ)।

(च) उक्तस्वमतं प्रति शङ्कते.नन्विति। अस्वतन्त्रत्वात् स्वार्थस्यापि प्रत्यायने अस्वाधीनत्वात् प्रकृतिसाहाय्येनैव स्वार्थस्यापि प्रत्यायनादित्यर्थः। तथा चोक्तं कातन्त्रपरिशिष्टे श्रीपतिना—"प्रत्ययास्तु नियोगतः प्रकृतीरनुगच्छन्तस्तदार्थाविषये व स्वार्थानभिदधानाः" इति। कल्पबादाविति। पाणिनिमते "ईषदसमाप्तौ कल्पप्-देश्यदेशीयरः" इति सूत्रेण पकारानुबन्धः "कल्पप्" इति प्रत्ययः। कलापमते तु अकारान्त एव कल्पप्रत्ययः। आदिपदेन देश्य-देशीययोर्ग्रहणम्। तथा प्रसङ्गात्. औपम्यप्रतीत्यभावप्रसङ्गात्। तथा च सति "इन्द्रकल्पो नृपः सोऽयम्" इत्यादावुपमाया अध्यमावप्रसङ्ग इत्याशयः।

(छ) पुनः शङ्कते न चेति। इत्यादि तुल्यतयेति। "देशीय-देश्य-कल्पादिः" इति सादृश्यवाचकशब्दप्रदर्शनप्रकरणे दण्ड्युक्तेरिति भावः। क्यङादीनामित्यादिपदेन क्यच्णमुलोर्ग्रहणम्। द्योतकत्वमिति। वाच्यमिति शेषः, तस्य च न चेत्यनेनान्वयः। तेषामिवाद्यर्थे विधानाभावात्, किन्तु आचाराद्यर्थे विधानेन उपमानपदसमभिव्याहारमात्रादौपम्यस्य द्योतकत्वमात्रमित्याशयः। निश्चयाभावादिति। "अव्यया हि द्योतका न तु वाचकाः" इति केषाञ्चिन्नियमाभिधानादित्यभिप्राय।

(ज) ननु भवतामपि इवादीनामौपम्यावाचकत्ववादिमतावलम्बने "चन्द्र इव मुखम्" इत्यादावुपमायामव्याप्तिः "औपम्यवाचकमिवादि" इति स्वोक्तिविरोधश्चेत्याह वाचकत्वे वेति। आलङ्कारिकैरिवादीनामौपम्यावाचकत्वाङ्गीकारे वेत्यर्थः। समुदितं प्रकृतिप्रत्ययसमुदायात्मकमेव पदं वाचकं युगपदेवोभयार्थबोधकम्, न तु प्रकृतिमात्रं प्रत्ययमात्रं वा वाचकमित्यर्थः। स्वस्वार्थबोधकौ क्रमेण निज-निजार्थबोधकौ। साम्यमेवेति। उभयोरपि सादृश्यसम्बन्धिप्रत्ययत्वादिति भावः।

(झ) काव्यप्रकाशकारमतानुयायिनां चण्डीदासादीनामपि मतं दूषयितुमाह यच्चेति। अनुशिष्यन्ते "तत्र तस्येव" इत्यादिना शास्त्रेण विधीयन्ते। तथा च वत्यादीनामिवाद्यर्थे विधानादौपम्यवाचकत्वम्, क्यङादीनान्तु आचाराद्यर्थे विधानादाचारार्थवाचकत्वम्, "यो यत्र प्रत्ययो जातः" इत्यादिन्यायात्। तेन क्यङादिप्रत्ययस्थले औपम्यप्रतिपादकलोपाभिधानमेव सङ्गच्छत इति तेषामाशयः। सादृश्याचारार्थाः सादृश्यस्य व्यवहारार्थाः। तथा च रमणीवाचरति सुतमिवाचरति इत्येवमाद्यर्थे "रमणीयते" "सुतीयति" इत्यादौ राजनि श्रिया रमणीसदृशाचरणस्य पौरजने च राज्ञः पुत्रतुल्याचरणस्य प्रतीतेः क्यङादीनां सादृश्याचरणमेवार्थः, न पुनः केवलाचरणमर्थं इति "अन्तःपुरीयसि रणेषु" इत्यभ्युतानामिवादेर्लोपे काव्यप्रकाशकृतामुदाहरणमयुक्तमेवेति भावः।

२५ । उपमानानुपादाने द्विधा वाक्यसमासयोः । (ट)

उदाहरणम्—

"तस्या मुखेन सदृशं रम्यं नास्ते न वा नयनतुल्यम् ।" (ठ)

अत्र मुख-नयन-प्रतिनिधि-वस्त्वन्तरयोर्गम्यमानत्वादुपमानलोपः (ड)। अत्रैव च "मुखेन सदृशम्" इत्यत्र "मुखं यथेदम्" इति, "नयनतुल्यम्" इत्यत्र "दृगिव" इति पाठे श्रौत्यपि सम्भवतीति अनयोर्भेदयोः प्रत्येकं श्रौत्यार्थीत्व-भेदेन चतुर्विधत्वसम्भवेऽपि प्राचीनानां रीत्या द्विप्रकारत्वमेवोक्तम् (ढ) ।

(ञ) धर्म्मलोपे लुप्तोपमामुपसंहरन् समुदायेन तत्सङ्कलनमाह तदेवमिति । पूर्णेवदित्याद्युक्ता पञ्चप्रकारा आधारेत्याद्युक्ता च पञ्चप्रकारेति मिलित्वा समुदायेन दशप्रकारेत्यर्थः । तर्कवागीशस्तु एकस्या आर्थ्या एव तद्धितादिगतत्वेन क्वङादिगतत्वेन च षट्प्रकारत्वमङ्गीकृत्य पुनः धर्म्मलोपालोपाभ्यां द्वैविध्यात् समुदायेन षोड़शप्रकारत्वमङ्गीकृतवान् । तत्तु "इह च यथादितुल्यादिविरहात् श्रौत्यादिविशेषचिन्ता नास्ति" इत्युक्त्या ग्रन्थकर्त्तुरनभिप्रेतत्वात् तादृशभेदानामन्यथापि सम्भवाच्चोपेक्षणीयम् ।

(ट) धर्म्मलोपे लुप्तोपमामभिधायेदानीमुपमानोपमेययोरुपमानस्यैव प्रथमं बुद्धिविषयत्वात्तल्लोप एव लुप्तोपमामाह उपेति । उपमानस्य अनुपादाने अनभिधाने वाक्यसमासयोर्वाक्यगतत्वेन समासगतत्वेन च पुनर्द्विधा लुप्तोपमेत्यनुषज्यते । इदमत्रावधेयम्—उपमानपदानुपादाने तदुत्तरप्रयोज्यानां श्रौतीप्रतिपादकानामिवादिशब्दानामुपादानासम्भवात् श्रौतीभेदसामान्यस्यैवासम्भवः । न खलु चन्द्रपदानुपादाने "इव मुखम्" इतिमात्रः प्रयोगः सम्भवति । तथा उपमानपदानुपादानेनैव तदुत्तरमात्रकर्त्तव्यवतिप्रत्ययादीनामसम्भवादार्थीभध्येऽपि तद्धितगतभेदस्यासम्भव एवेति पारिशेष्यादुपमानानुपादाने आर्थीमध्ये केवलेन वाक्यगतत्वेन समासगतत्वेन च लुप्तोपमा द्विधेति ।

(ठ) तस्या इति । "तदतुलना ललनासु प्रतिभाति सा मे मनोरमा ॥" इति मत्पूरितपरार्द्धम् ।

अत्र नास्ते इत्यन्तवाक्ये उपमानानुपादानात् वाक्यगता लुप्तोपमा । तथा नवा नयनतुल्यमित्यत्र तु तुल्यशब्देन समासात् उपमानानुपादानाच्च समासगता लुप्तोपमा ।

न चात्र मुखनयनयोर्भिन्नविभक्तिकतया उपमानत्वमेवेत्याशङ्कनीयम्, चन्द्रोत्पलयोरुपमानत्वेन मुखनयनयोस्तु तदुपमेयत्वेन सहृदयसमाजेऽत्यन्तप्रसिद्धत्वात्, प्रतीपालङ्कारे तु प्रौढ़िवशादेव तद्विपरीत्यकल्पनात्, अत्र तु तादृशप्रौढ़े रप्यभावात् ।

(ड) नन्वनुपादानं नाम विद्यमानस्य वस्तुनोऽनभिधानम्, तेनात्र मुखसदृशरम्यस्य नयनतुल्यरम्यस्य चोपमानभूतवस्तुन आकाशकुसुमादिवदत्यन्तमेवाविद्यमानत्वे तयोरनुपादानासम्भवात् कथमिदमुदाहरणं सङ्गच्छत इत्याह अत्रेति । मुखनयनयोः प्रतिनिधिनी उपमानत्वेन सदृशे ये वस्त्वन्तरे चन्द्रोत्पलरूपावन्यपदार्थौ तयोर्गम्यमानत्वात् सर्वथा विद्यमानत्वेन व्यञ्जनया प्रतीयमानत्वात् उपमानयोस्तयोर्लोपः अनुपादानं सम्भवतीति शेषः । अतो न काचिदनुपपत्तिरिति भावः ।

२६ । औपम्यवाचिनो लोपे समासे क्विपि च द्विधा ॥ (ण)

क्रमेणोदाहरणम्—

"वदनं मृगशावाक्ष्याः सुधाकरमनोहरम् ।" (त)

"गर्दभति श्रुतिपरुषं व्यक्तं निनदन् महात्मनां पुरतः ।" (थ)

अत्र 'गर्दभति' इत्यत्र औपम्यवाचिनः क्विपो लोपः (द) । न चेह उपमेयस्यापि लोपः, 'निनदन्' इत्यनेनैव निर्देशात् (ध) ।

(ड) ननूपमानपदानुपादानात्तदुत्तरप्रयोज्यानामिवादिशब्दानां वत्यादिप्रत्ययानाञ्चासम्भवदुक्तरीत्या द्विविधैवास्तु, किन्तु मुखाद्युपमेयपदोत्तरमिवादिशब्दप्रयोगसम्भवात् श्रौतीरूपभेदसम्भवेन चतुर्विधैव सम्भवतीत्यह अत्रैव चेति । अनयोर्वाक्यसमासगतयोः ।

(ण) औपम्येति । औपम्यवाचिनः सादृश्यवाचकमात्रस्य इवादिशब्दस्य तुल्यादिशब्दस्य च लोपे अनुपादाने समासे क्विपि प्रत्यये च द्विधा लुप्तोपमेत्यनुषज्यते ।

अत्रापीदमवधेयम्—इवादिशब्दाभावात् श्रौतीसामान्यस्यैवासम्भवः, तुल्यादिशब्दाभावाच्च तुल्यार्थवतिप्रत्ययासम्भवात् तद्धितगताया आर्थ्या अप्यसम्भवः, अपवादरूपायाः समासगतायाः प्रसक्त्या च वाक्यगताया आर्थ्या अप्रसक्तिरिति पारिशेष्यात् आर्थी समासगतैकविधा क्विप्प्रत्ययगता चैकविधेति मिलित्वा औपम्यवाचिनो लोपे लुप्तोपमा केवलद्विविधेति ।

(त) वदनमिति । "कदलीसुन्दरावूरू मृणालमृदुलौ भुजौ ॥" इति मत्पूरितपरार्द्धम् ।

मृगशावस्य हरिणशिशोरक्षिणी इव अक्षिणी चक्षुषी यस्यास्तस्या वदनं सुधाकरमनोहरं चन्द्रवत् सुन्दरम् । अत्र सुधाकर इव मनोहरमिति वाक्ये "उपमानानि सामान्यवचनैः" इत्यनेन कर्मधारयसमासे औपम्यवाचिनो लोपे समासगता लुप्तोपमा ।

(थ) गर्दभतीति । "कुक्कुरति च परपदानि विलिहन् परदत्तमावार्थी ॥" इति मत्पूरितपरार्द्धम् ।

महात्मनां पुरतः समीपे व्यक्तं स्पष्टं श्रुतिपरुषं श्रवणकर्कशं यथा स्यात्तथा निनदन् शब्दायमानो गर्दभति गर्दभ इवाचरति ।

(द) अत्रेति । "सर्वप्रातिपदिकेभ्यः क्विप् वा वक्तव्यः" इति वार्त्तिकोक्त्या विहितस्य "क्विपः सर्वापहारी"त्यादिना लोप इत्यर्थः । "निनदन्" इत्यनेन निर्द्देशात् सामान्यधर्म्मस्य तु न लोप इत्यवधेयम् । अतश्चात्र क्विप्प्रत्ययगता लुप्तोपमा ।

(ध) नेति । लोप इति वाच्यमिति शेषः । अनिर्द्देशादिति भावः । निर्द्देशात् उपमेयस्याप्युपादानात् । विशेषणनिर्द्देशेनैव विशेष्यस्याप्युपस्थितत्वादित्याशयः ।

ननु विशेषणमात्रोपादानेनैव विशेष्यस्याप्युपादानसिद्धाङ्गीकारे "तस्या मुखेन सदृशं रम्यं नास्ते" इत्यत्रापि रम्यमिति विशेषणेन तद्विशेष्योपादानसिद्ध्या उपमानोपादानसिद्धेः उपमानानुपादाने "तस्या मुखेन" इत्याद्युदाहरणं कथं सङ्गच्छत इति चेत् "गर्दभति" इत्यादौ "व्यक्तम्" इत्यत्र "सोऽयम्" इति पठित्वा उपमेयमुपादेयमिति दिक् ।

२७ । द्विधा समासे वाक्ये च लोपे धर्म्मीपमानयो: । (न)

"तस्या मुखेन" इत्यादौ "रम्यम्" इति स्थाने "लोके" इति पाठे अनयो-रुदाहरणम् (प) ।

२८ । क्विप्समासगता द्वेधा धर्म्मेवादिविलोपने ॥ (फ)

उदाहरणम्—"विधवति मुखाब्जमस्याः ।" (ब)

अत्र "विधवति" इति मनोहरत्व-क्विप्प्रत्यययोर्लोपः (भ) । "मुखाब्जम्" इति च समासगा (म) । केचित्त्वत्रापि प्रत्ययलोपमाहुः (य) ।

(न) इत्यन्येकैकलोपे लुप्तोपमामुक्त्वा इदानीं द्बिविलोपे लुप्तोपमां दर्शयति द्विधेति । धर्म्मः सामान्यधर्म्मः उपमानञ्च एतयोर्लोपे युगपदुभयोरेवानुपादाने समासे वाक्ये च द्विधा लुप्तोपमेत्यनुषज्यते ।

अत्रापि प्रागुक्तयुक्तेरेव पारिशेष्यात् समासगता वाक्यगता चेति द्विविधेत्यनुसन्धेयम् ।

(प) उदाहरणान्तरान्वेषणपरिश्रमपरिहारार्थम् उदाहृतमेव किञ्चित् परिवर्त्योदाहरति तस्या इति । "तस्या मुखेन तद्दृशं लोके नास्ते" इति पाठे रम्यमिति सामान्यधर्म्मानुपादानात् उपमानानुपादानाच्च वाक्यगता अवत्या लुप्तोपमा । "न वा नयनतुल्यम्" इत्यस्य तु यथास्थितमेव पाठे रम्यमित्यनुषञ्जनीयसामान्य-धर्म्मानुपादानात् उपमानानुपादानात् तुल्यशब्देन समासाच्च अवत्या लुप्तोपमेत्यभिप्रायः ।

न चेद्दृशपाठेऽपि पूर्वोक्तया सहास्याः साङ्कर्यापत्तिरिति वाच्यम्, पूर्वस्याः केवलोपमानानुपादान एव विषयत्वात्, अस्यास्तु धर्म्मोपमानयोरुभयोरेवानुपादाने विषयत्वादिति ।

(फ) क्विपीति । धर्म्मः सामान्यधर्म्मः, इवादिः सादृश्यवाचकः, एतयोरुभयोरेव विलोपने युगपदनुपा-दाने क्विप्प्रत्ययगता समासगता चेति द्वेधा पुनर्द्विविधा लुप्तोपमेत्यनुषङ्गः । अत्रापि सम्भवपरत्वात् क्विप्प्रत्यय-गतत्वमतिरिक्तमुपादीयते पूर्वोक्तयुक्तेः पारिशेष्याच्च श्रौत्यार्थीमध्ये केवलसमासगतत्वमदीयत इति ध्येयम् ।

(ब) विधेति । "विधवति मुखाब्जमस्याः कुन्दति नितरां तनुतनुदशनाली ।

चम्पकति निखिलमङ्गं तदिदं किमपि तरुणीरत्नम् ॥"

इति मत्पूरितपरविपादः पद्यसमुदायः ।

(भ) अत्रेति । विधुरिवाचरतीति विधवति । एवञ्च मनोहरत्वरूपसामान्यधर्म्मस्य लोपोऽनुपादानम् । "सर्वप्रातिपदिकेभ्यः क्विप् वा वक्तव्यः" इति वार्त्तिकोक्त्या विहितस्य सादृश्यवाचकस्य क्विप्प्रत्ययस्य च सर्वाप-हारिलोपः । कलापमते तु "कर्त्तुरायिः सलोपश्च" इत्यनेन विहितस्य आयेः "आयिलोपश्च विज्ञेयः" इति दुर्गसिंहोक्त्या लोपः ।

(म) मुखाब्जमिति । मुखमब्जमिव इति विग्रहे "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इत्यनेन कर्म्मधारयसमासात् मनोहरत्वरूपसामान्यधर्म्मलोपात् इवादिलोपाच्च समासगता लुप्तोपमेयमित्यर्थः । न च मुखमेवाब्जमिति मयूरव्यंसकादित्वात् रूपकसमास आशङ्कनीयः, पद्मस्य चन्द्रतुल्याचरणासम्भवेन विधवतीत्यस्य उपमायाः साधकत्वात् रूपकस्य च बाधकत्वात् । चन्द्रमुखीति [illegible] द्रष्टव्यः ।

२९ । उपमेयस्य लोपे तु स्यादेका प्रत्यये क्यचि । (र)

यथा—"अरातिविक्रमालोक-विकस्वरविलोचनः ।
कृपाणोदग्रदोर्दण्डः स सहस्रायुधीयति ॥" (ल)

अत्र सहस्रायुधमिवात्मानमाचरतीति वाक्ये उपमेयस्यात्मनो लोपः (व) । न चेह औपम्यवाचकलोपः, उक्तादेव न्यायात् (श) ।

अत्र केचिदाहुः—"सहस्रायुधेन सह वर्त्तत इति ससहस्रायुधः स इवाचरतीति वाक्यात् ससहस्रायुधीयतीति पदसिद्धौ विशेष्यस्य शब्दानुपात्तत्वादिहोपमेयलोपः" इति । तन्न विचारसहम्, कर्त्तरि क्यचोऽनुशासन-विरुद्धत्वात् (ष) ।

(य) केचिदिति । न केवलं गर्दभतीति पूर्वोदाहरणे विधवतीत्यत्रापीत्यर्थः, क्विप्‌प्रत्ययलोपात् प्रत्ययलोपमेवाहुः, न पुनः सादृश्यवाचकलोपमिति तात्पर्य्यम् । अत्रास्वरसताबीजन्तु केवलप्रत्ययत्वेन प्रत्ययस्योपादानमनुपादानं वा उपमाया अप्रयोजकमेव सादृश्याभिधानाभावात् । सादृश्यवाचिप्रत्ययलोपाभिधाने तु स्वपक्षनिक्षेप एवेति ।

(र) उपमानलोपे उपमानसंसृष्टधर्म्मवादिलोपे च लुप्तोपमामभिधायेदानीमुपमेयलोपे तत्संसृष्टधर्म्मलोपे च लुप्तोपमामभिधत्ते उपेति । उपमेयस्य लोपे अनुपादाने तु क्यचि प्रत्यये, कलापमते यिनि, मुग्धबोधमते च क्ये, एका एकविधा लुप्तोपमा स्यात् ।

अत्रेयं युक्तिरवधेया—क्यजादौ "इह च यथादि-तुल्यादि-विरहात् श्रौत्यादिविशेषचिन्ता नास्ति" इति प्रागुक्तेः षड्‌विधत्वसम्भावनाया एवाभावात् तद्विलक्षण्येकविधेति । केचित्तु श्रौतीभिन्नाया एवार्थीत्वाभ्युपगमात् अर्थानुसन्धानेनैव सादृश्यावगमाच्च इयमपि लुप्तोपमा आर्थीविशेष एवेति वदन्ति ।

(ल) अरातीति । अरातिविक्रमस्य शत्रुपराक्रमस्य आलोकेन दर्शनेन विकस्वरे समरोत्साहेन विस्तारप्राप्ते विलोचने विशालनयनद्वयं यस्य सः, तथा कृपाणेन असिना उदग्रौ वीरसमाजे उन्नतौ दोर्दण्डौ बाहुदण्डौ यस्य सः, स राजा सहस्रायुधीयति सहस्रमायुधानि यस्य स तादृशः पुरुषस्तमिवात्मानमाचरति, एककृपाणेनैव सहस्रसंख्यकायुधकार्य्यकरणादिति भावः ।

(व) नन्वरातीत्यादौ स इति तत्पदेनैवोपमेयनिर्द्देशादुपमेयलोपे कथमिदमुदाहरणं सङ्गच्छत इत्याह अत्रेति । तथा च सहस्रायुधांशे उपमेयभूतस्यात्मनो लोपमादायैव इदमुदाहरणमित्यभिप्रायः । न चात्र सामान्यधर्म्मस्यापि लोप इति वाच्यम्, पूर्वार्द्धेनैव तस्य निर्द्देशात् ।

(श) नेति । इह सहस्रायुधीयतीत्यत्र, औपम्यवाचकस्य इवादेर्लोप इति वाच्यमिति शेषः । उक्तादेव न्यायात् "इदञ्च केचित्" इत्यादिप्रागुक्तयुक्तेः ।

(ष) उक्तोदाहरणे प्रकारान्तरेणोपमेयलोपवादिनां मतं दूषयितुमाह अत्रेति । पदसिद्धौ सत्याम् । विशेष्यस्य ससहस्रायुधीयतीति क्रियायाः कर्त्तुः, शब्दानुपात्तत्वात् केनचित् शब्देनानुपादानात् । कर्त्तरि कर्त्तृपदे स्वाव्यवहितपूर्वे सति कर्त्तृकारकादित्यर्थः, क्यचः कलापमते यिनः, अनुशासनविरुद्धत्वात्

३० । धर्म्मोपमेयलोपेऽन्या—(स)

यथा—"यशसि प्रसरति भवतः चीरोदीयन्ति सागराः सर्वे ।" (ह)

अत्र चीरोदमिवात्मानमाचरन्तीति उपमेय आत्मा साधारणधर्म्मः शुक्लता च लुप्तौ (च) ।

३१ । विलोपे च समासगा ॥ (क)

यथा—"राजति मृगलोचना ॥" (ख)

अत्र मृगस्य लोचने इव चञ्चले लोचने यस्या इति समासे उपमाप्रतिपादक-साधारणधर्म्मोपमानानां लोपः (ग) ।

३२ । तेनोपमाया भेदाः स्युः सप्तविंशतिसंख्यकाः ॥ (घ)

पूर्णा षड्विधा, लुप्ता चैकविंशतिविधेति मिलित्वा सप्तविंशतिप्रकारोपमा (ङ) ।

सूत्राभावादित्यर्थः । तथा च "उपमानादाचारे" इत्यनुशासनेन कर्म्मभूतादेव नाम्नः क्यच् विधीयत इति कर्त्तृभूतात् ससहस्रायुधशब्दात् क्यच् प्रत्ययस्यासम्भव एवेति भावः ।

(स) धर्म्मेति । धर्म्मः सामान्यधर्म्म उपमेयञ्च, एतयोर्लोपे युगपदनुपादाने अन्या अपरैकविधा लुप्तोपमा स्यादित्यनुषज्यते ।

अत्रापि प्रागुक्तयुक्त्यैवैकविधेति भाव्यम् ।

(ह) यशसीति । "प्रवहति वितरणसलिले नदीयन्ति मरुभूमयश्च ॥" इति मत्पूरितपरार्द्धम् ।

(च) अत्रेति । अत्रापि चीरोदांशे आत्मन उपमेयत्वमिति बोध्यम् ।

(क) इदानीम् इवाद्युपमानोपमेयसामान्यधर्म्माणां मध्ये यावत्सम्भवं लोपे लुप्तोपमामाह विलोप इति । त्रयाणाम् उपमान-सादृश्यवाचकशब्द-साधारणधर्म्माणां लोपे अनुपादाने समासगा समासगता अन्या एकविधा लुप्तोपमा स्यादित्यनुषङ्गः ।

उक्तानां त्रयाणामनुपादाने समासं विना अन्यत्रासम्भवादियमप्येकविधैवेति बोध्यम् ।

(ख) राजत इति । "गजेन्द्रगमना श्यामा कोमला कोकिलस्वना ।
हंसवाणी प्रिया सेयं राजते मृगलोचना ॥" इति मत्पूरितपूर्वत्रिपादं पद्यम् ।

(ग) अत्रेति । उपमाप्रतिपादक इवशब्दः, साधारणधर्म्मश्चञ्चलत्वम्, उपमानञ्च प्रथमलोचनपदम्, एषां लोपोऽनुपादानम्, अतएवात्र विलोपे समासगा लुप्तोपमेति भावः । एकशेषतया द्वितीयलोचनपदस्थितेर्नोपमेयलोप इत्यवधेयम् ।

(घ) उपमाप्रकरणमुपसंहरन्निदानीं समुदायेनोपमायाः सङ्कलनमाह तेनेति । उक्तविधभेदसमूहसम्भवेनेत्यर्थः ।

(ङ) पृथक्कृत्य भेदानां सप्तविंशतिसंख्यकत्वं दर्शयति पूर्णेति । तथा च—

नामानि । उदाहरणानि ।

- पूर्णोपमा ६
  - श्रौती ३—
    - तद्धितगता १ ··· सौरभमम्भोरुहवन्मुखस्य ।
    - समासगता १ ··· कुम्भाविव स्तनौ पीनौ ।
    - वाक्यगता १ ··· हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले ! ।
  - आर्थी ३—
    - तद्धितगता १ ··· मधुरः सुधावदधरः ।
    - समासगता १ ··· पल्लवतुल्योऽतिपेलवः पाणिः ।
    - वाक्यगता १ ··· चकितमृगलोचनाभ्यां सदृशौ चपले च लोचने तस्याः ।
- लुप्तोपमा २१
  - सामान्यधर्म्मलोपे ५
    - श्रौती २—
      - समासगता १ ··· वाचः सुधा इव ।
      - वाक्यगता १ ··· मुखमिन्दुर्यथा ।
    - आर्थी ३—
      - तद्धितगता १ ··· मनोऽज्ञवत् ।
      - समासगता १ ··· ओष्ठस्ते बिम्बतुल्यः ।
      - वाक्यगता १ ··· पाणिः पल्लवेन समः ।
  - प्रत्यये ५
    - क्यचि २—
      - आधारात् क्यचि १ ··· अन्तःपुरीयसि रणेषु ।
      - कर्म्मणः क्यचि १ ··· पौरं जनं सुतीयसि ।
    - क्यङि १—
      - कर्त्तुः क्यङि १ ··· श्रीस्तव रमणीयते ।
    - णमुलि २—
      - कर्म्मणि णमुलि १ ··· अमृतद्युतिदर्शं दृष्टः ।
      - कर्त्तरि णमुलि १ ··· इन्द्रसञ्चारं सञ्चरसि ।
  - उपमानलोपे २—
    - वाक्यगता १ ··· तस्या मुखेन सदृशं रम्यं नास्ति ।
    - समासगता १ ···न वा नयनतुल्यं रम्यमास्ते ।
  - इवादिलोपे २—
    - समासगता १ ··· सुधाकरमनोहरं वदनम् ।
    - क्विप्प्रत्ययगता १ ··· गर्द्दभति श्रुतिपरुषं व्यक्तं विनदन् महात्मनां पुरतः ।
  - सामान्यधर्म्म उपमानञ्च एतयोरुभयोर्लोपे २—
    - समासगता १ ··· लोके न वा नयनतुल्यमास्ते ।
    - वाक्यगता १ ··· तस्या मुखेन सदृशं रम्यं लोके नास्ति ।
  - सामान्यधर्म्म इवादिश्च एतयोरुभयोर्लोपे २—
    - क्विप्प्रत्ययगता १ ··· विधवति मुखाब्जमस्याः ।
    - समासगता १ ··· मुखाब्जमस्याः ।
  - उपमेयलोपे क्यचि १—
    - कर्म्मणः क्यचि १ ···विकस्वरविलोचनः ससहस्रायुधीयति ।
  - सामान्यधर्म्म उपमेयञ्च एतयोरुभयोर्लोपे १—
    - कर्म्मणः क्यचि १ ··· क्षीरोदीयन्ति सागराः ।
  - उपमानम्, इवादि, सामान्यधर्म्मश्च एषां सर्वेषां लोपे १—
    - समासगता १ ··· राजते मृगलोचना ।

एषु चोपमाभेदेषु मध्ये अलुप्तसाधारणधर्म्मेषु भेदेषु विशेषः प्रतिपाद्यते (च)।

३२। एकरूपः क्वचित् क्वापि भिन्नः साधारणो गुणः।
भिन्ने विम्बानुविम्बत्वं शब्दमात्रेण वा भिदा॥ (छ)

तत्र (१) एकरूपे यथोदाहृतम्—"मधुरः सुधावदधरः" इत्यादि (ज)। विम्बप्रतिविम्बत्वे यथा—

"भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम्।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव॥" (झ)

अत्र "श्मश्रुलैः" इत्यस्य "सरघाव्याप्तैः" इति दृष्टान्तवत् प्रतिविम्बनम् (ञ)। शब्दमात्रेण भिन्नत्वे यथा—

(च) इत्थञ्च लुप्तसाधारणधर्म्मत्वेन अलुप्तसाधारणधर्म्मत्वेन च सर्वा एवोपमा द्विविधा भवितुमर्हन्ति तत्राह एषु चेति।

(छ) एकेति। साधारणो गुणः सामान्यो धर्म्मः क्वचित् एकरूप एकप्रकारो न पुनर्वस्तुत एवैक इत्याशयः, क्वापि कुत्रापि भिन्नो वस्तुतः प्रकारतश्च भेदविशिष्ट एव। ननु भिन्नत्वे तस्य सामान्यधर्म्मत्वमेव नोपपद्यते उपमानोपमेयोभयवृत्तित्वासम्भवादित्याह भिन्न इति। भिन्ने सामान्यधर्म्मे विम्बानुविम्बत्वं विम्बप्रतिविम्बत्वभावत्वम्। तथा च यथा मुखादिविम्बस्य दर्पणादिप्रतिविम्बस्य च विम्बत्वेन प्रतिविम्बत्वेन च भेदः सौसादृश्यवत्तया पुनरभेदः, तथात्रापि उपमानोपमेयगतधर्म्मयोर्वस्तुतो भेदः सौसादृश्यवत्तया पुनरभेद इत्याशयः। एवमन्यत्रापि। निष्कर्षस्तु—विम्बानुविम्बत्वं प्रणिधानगम्यसाम्यत्वम्। प्रणिधानञ्च तात्पर्य्यपर्य्यालोचनम्। वा अथवा शब्दमात्रेण केवलेन शब्देनैव भिदा न पुनर्वस्तुतोऽपि भिदा भेदः। एवञ्च वस्तुतो भिन्नत्वेऽपि सौसादृश्यवत्तया अभिन्नत्वात् शब्दमात्रेण भिन्नत्वेऽपि वस्तुतः अभिन्नत्वाच्च सामान्यधर्म्मत्वोपपत्तिरिति भावः।

(ज) तत्रेति। तेषु मध्य इत्यर्थः। अत्रायमाशयः—सुधायां मधुरत्वं नाम सुस्वादुत्वेन सकलप्रियत्वम्, अधरे तु चुम्बनसुखसम्पादकत्वेन कामिमात्रप्रियत्वमिति प्रियत्वरूपः प्रकार एक एव, वास्तविकस्वादांशे तु भिन्न एवेति। इदन्तु गुणस्यैकरूपत्वे उदाहरणम्। क्रियाया एकरूपत्वे यथा—"स्त्रीवद्व्यवहरत्येष दुर्बलः प्रबले नरे।"

(झ) भल्लेति। रघुवंशचतुर्थसर्गे श्लोकोऽयम्। स रघुः, भल्लेन स्वनामख्यातेनास्त्रेण अपवर्जितैः स्कन्धान्निपातितैः, श्मश्रुलैः श्मश्रुविशिष्टैः, तेषां यवनानां शिरोभिर्मस्तकैः, सरघाव्याप्तैर्मधुमक्षिकापूर्णैः क्षौद्रपटलैर्मधुचक्रसमूहैरिव महीं भूमिम्, तस्तार आच्छादयामास।

---

(१) अत्र इति क्वचित् पाठः। क्वचित्तु द्वयमपि न दृश्यते।

"स्मेरं विधाय नयनं विकसितमिव नीलमुत्पलं मयि सा ।
कथयामास कृशाङ्गी मनोगतं निखिलमाकूतम् ॥" (ट)

अत्र एके एव स्मेरत्वविकसितत्वे प्रतिवस्तूपमावच्छब्दभेदेन निर्दिष्टे (ठ) ।

३४ । एकदेशविवर्त्तिन्युपमा वाच्यत्वगम्यते ।
भवेतां यत्र साम्यस्य—(ड)

यथा—"नेत्रैरिवोत्पलैः पद्मैर्मुखैरिव सरःश्रियः ।
पदे पदे विभान्ति स्म चक्रवाकैः स्तनैरिव ॥" (ढ)

(ञ) उदाहृते बिम्बानुबिम्बत्वं दर्शयितुमाह अत्रेति । प्रतिबिम्बनं प्रणिधानपरायणपद्धे सदृशीकरणम् । तथा च यथा सरघाभिः चौद्राणां श्यामत्वं तथा श्मश्रुभिः शिरसां श्यामत्वमिति प्रणिधानेनैवो भयोः साम्यं गम्यमिति भावः ।

(ट) स्मेरमिति । सख्युः समीपे कस्यचिज्जनस्याभीष्टरमण्या वर्णनमिदम् । सा कृशाङ्गी विकसितं नीलमुत्पलमिव मयि नयनं स्मेरं विधाय विस्फारितं कृत्वा मनोगतं निखिलम् आकूतम् अभिप्रायं कथयामास कथनवत् सूचयामास ।

(ठ) अत्रेति । एके एव उभयोरपि विस्फाररूपत्वादभिन्ने एव । अत्र एकविस्फाररूपपदार्थस्य स्मेरमिति विकसितमिति च शब्दद्वयोपस्थाप्यत्वयोर्द्वित्वात् 'एके' इति द्विवचनोपपत्तिः, "अग्रेः सम्बुद्धावित्येके" इति कातन्त्रवृत्तौ एकमतावलम्बियहुत्वार्थत्वात् 'एके' इति बहुवचनोपपत्तिवत्, "द्वयं गतं सम्प्रति शोचनीयताम्" इति कुमारादौ द्वित्वविशिष्टयोः पार्वतीचन्द्रकलयोरेकविधशोच्यत्वार्थकत्वात् 'द्वयम्' इत्येकवचनोपपत्तिवत्, "द्वयां द्वयेषामपि मेदिनीभृताम्" इति माघादौ द्वित्वविशिष्टयोः राजगण-पर्वतगणयोर्बहुत्वात् 'द्वयेषाम्' इति बहुवचनोपपत्तिवच्च । अतोऽत्र "संख्यार्थादेकशब्दात् द्विवचनासम्भवात्" इत्याद्युक्ता रामचरणस्य पाठान्तरकल्पनं धर्मविजृम्भितमेवेति सुधीभिर्भाव्यम् । शब्दभेदेन निर्दिष्टे स्मेरमिति विकसितमिति च भिन्नशब्दाभ्यामभिहिते ।

(ड) शुद्धोपमानिरूपणात् परमेव उपमाविशेषस्याकाङ्क्षोदयात् काव्यप्रकाशकारादिभिरनङ्गीकृतानपि विशेषलक्ष्यतया युक्तियुक्तत्वादिदानीमुपमाविशेषान् लक्षयन् प्रथममेकदेशविवर्त्तिनीमुपमां लक्षयति एकेति । यत्र स्थले साम्यस्य वाच्यत्वगम्यते भवेतां सादृश्यस्य अभिधावोध्यत्वं व्यञ्जनावोध्यत्वञ्च स्यात्, तत्र, एकदेशविवर्त्तिनी नामोपमा भवेदित्यर्थः, एकदेशे साम्यस्य वाच्यत्वभागे विवर्त्तते मूललक्षणगमनाद्विशेषेणावतिष्ठत इति व्युत्पत्तेः । एकदेशविवर्त्तिरूपकस्थल एव तेन सहास्या भेदं दर्शयिष्यामः ।

(ढ) नेत्रैरिति । शरद्वर्णनेयम् । सरःश्रियो जलाशयशोभाः, नेत्रैरिव उत्पलैः कुवलयैः, मुखैरिव पद्मैः, स्तनैरिव चक्रवाकैः पक्षिभिश्च पदे पदे स्थाने स्थाने विभान्ति स्म । अत्र विभान्तीत्यत्र वाक्यसमाप्तावपि चतुर्थपादेन पुनरात्तत्वात् समाप्तपुनरात्ततादोषः ।

अत्र उत्पलादीनां नेत्रादीनां सादृश्यं वाच्यम्, सरःश्रोणाद्याङ्गना-सादृश्यं (१) गम्यम् (ण) ।

३५ । कथिता रसनोपमा (२) ॥

यथोर्द्ध्वमुपमेयस्य यदि स्यादुपमानता । (त)

यथा—"चन्द्रायते शुक्लरुचापि हंसो हंसायते चारुगतेन कान्ता ।
कान्तायते स्पर्शसुखेन वारि वारीयते स्वच्छतया विहायः ॥" (थ)

(ण) लक्ष्ये लक्षणं सङ्गमयितुमाह अत्रेति । नेत्रादीनां नेत्रादिभिः सहेत्यर्थः । वाच्यमिति सर्वत्र इवशब्दसत्त्वादित्याशयः । गम्यं व्यञ्जनया बोध्यम्, सरःश्रिय इत्यत्र इवशब्दाभावादिति भावः । उदाहृते नेत्राद्युपमानत्वे नोत्पलादीनां प्रसिद्धिसत्त्वेऽपि प्रधानानां सरःश्रीणामङ्गनोपमानत्वेन प्रसिद्ध्यभावान्न प्रतीपालङ्कारप्रसङ्गः ।

(त) कथितेति । ऊर्द्ध्वमनतिक्रम्येति यथोर्द्ध्वम् "शास्त्रे ह्यथवद्व्यवहारः" इति न्यायात् परपरमित्यर्थः, उपमेयस्य यदि उपमानता स्यात्, तदा सा रसनोपमा कथिता । तथा च यथा रसनायां काञ्चीदाम्नि स्वर्णादि-गुटिकानामेकैकस्यैव आपेक्षिकं पूर्वपूर्वत्वं परपरत्वञ्च, तथात्रापि पौर्वापर्य्येण एकैकपदार्थस्य आपेक्षिक-मुपमेयत्वमुपमानत्वञ्चेति रसनाविन्यासादस्या रसनोपमेति संज्ञा ।

(थ) चन्द्रेति । हंसः, शुक्लरुचापि न केवलं शान्तमूर्त्तितया शुभ्रप्रभयापि चन्द्रायते चन्द्र इवाचरति । कान्ता कमनीयाङ्गी रमणी चारुगतेन मनोहरगमनेन हंसायते स हंस इवाचरति । वारि जलम्, स्पर्श-सुखेन सुखजनकस्पर्शेन, कान्तायते सा कान्तेवाचरति । विहाय आकाशञ्च स्वच्छतया निर्म्मलतया वारीयते तद्वारीवाचरति ।

अत्र चन्द्रापेक्षया उपमेयभूतस्य हंसस्य कान्तापेक्षया उपमानत्वम्, कान्तायाश्च वार्य्यपेक्षया उपमानत्वम्, वारिणश्च विहायोऽपेक्षया उपमानत्वमिति लक्षणसङ्गतिः ।

इदन्तु शुक्लरुक्प्रभृतिसाधारणधर्म्मभेदे उदाहरणम् । साधारणधर्म्मस्याभेदेऽपि रसनोपमा सम्भवति । यथा तर्कवागीशधृतम्—

"महीभृतो वदान्यस्य भारतीवामला मतिः । चेष्टा मतिरिव स्वच्छा चेष्टेव गुणसन्ततिः ॥"

अत्र स्वच्छत्वरूपः साधारणधर्म्म एक एव । क्वचित् साधारणधर्म्मानुक्तावपीयं सम्भवति । यथा रघुवंशे—"आकारसदृशप्राज्ञः प्रज्ञया सदृशागमः । आगमैः सदृशारम्भ आरम्भसदृशोदयः ॥"

सरस्वतीकण्ठाभरणकारास्तु रसनागत-गुटिका-श्रेणीक्रमेणोत्तरोत्तरमुपमाप्रत्ययमात्रेणैव रसनोपमा स्यादिति मन्यन्ते । तथा च तन्मते इदमप्युदाहरणम् । यथा कादम्बर्य्याम्—

"कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन, नवयौवनेन पदम् ।"

---

(१) अङ्गनासाम्यमिति पाठान्तरम् । (२) रशनोपमेति तालव्यमध्यः पाठः क्वचित् ।

३६ । मालोपमा यदेकस्योपमानं बहु दृश्यते ॥ (द)

यथा—"वारिजेनेव सरसी शशिनेव निशीथिनी ।
यौवनेनेव वनिता नयेन श्रीर्मनोहरा ॥" (ध)

क्वचिदुपमानोपमेययोर्द्वयोरपि प्रकृतत्वं दृश्यते—(१) (न)

"हंसश्चन्द्र इवाभाति जलं व्योमतलं यथा ।
विमलाः कुमुदानीव तारकाः शरदागमे ॥" (प)

अतएवास्माभिरपि कादम्बरीटीकायामुदाहृतवाक्ये रसनोपमैव निवेशिता । वस्तुतस्तु ईदृशलक्ष्यव्यापनार्थं ...ङ्कारस्यापि रसनोपमाभिदान्तराङ्गीकरणमावश्यकमेव । किञ्च उदाहृते मालोपमाप्रसिद्धलक्ष...णत्वात् सातिशयवैचित्र्यं पश्याच्च मालोपमाङ्गीकारेणाकाङ्क्षानिवृत्तिः साधीयसी न स्यादिति प्रकृतवैचित्र्...र्वं विवेचनीयम् ।

ननु "चन्द्रायते" इत्यादौ प्रकृतोपमा अस्ति न वा ? अस्ति चेत् कथं न तया व्यपदेशः ? नास्ति चेत् ...लक्षणव्यापनात् कथं नास्ति ?। उच्यते—यथा अगृहीतकुण्डलादिभावस्य स्वर्णस्य स्वर्णत्वेन व्यपदेशः, ...हीतकुण्डलादिभावस्य तु कुण्डलादित्वेनैव व्यपदेशो न पुनः स्वर्णत्वेन, तथात्रापि साधारणोपमाया रस...नाभावमापन्नत्वे असाधारणरसनोपमात्वेनैव व्यपदेशो युक्तः । तथा चोक्तं शारीरकशाङ्करभाष्यटीकायां ...स्पतिमिश्रैः—"असाधारण्येन हि व्यपदेशा भवन्ति । यथा—क्षिति-जल-पवन-वीजादि-सामग्री-समव...जन्मापङ्कुरः शालिवीजत्वेन व्यपदिश्यते शाल्यङ्कुर इति न क्षित्याद्यङ्कुर इति तेषां कार्य्यान्तरेऽपि ...रणत्वात् ।"

(द) एकत्रानेकोपमायाः समावेशे वैचित्र्यं लक्षणान्नासवं लक्षणेन तामेव लक्षयति मालोपमेति । ...च उपमेयस्य यत् बहु बहुत्वमनेकमित्यर्थः, उपमानं दृश्यते तन्मालोपमा स्यात्, मालया अनेकत्वेनोपमा ...नेमेति व्युत्पत्तेः ।

(ध) वारिजेनेति । नयेन नीतिप्रयोगेन श्रीः सम्पत्, वारिजेन पद्मेन सरसी सरोवर इव, शशिना ...दिनी रात्रिरिव यौवनेन वनितेव च मनोहरा जायते ।

...कोपमेयभूतायाः श्रियाः सरसी-निशीथिनी-वनितारूपबहूपमानत्वान्मालोपमा ।

...त्र श्लिष्टस्य अनेकार्थपरत्वविवक्षणादुपमानद्वयमात्रदर्शनेऽपि मालोपमैव । यथा कुमारसम्भवे—

"तां हंसमालाः शरदीव गङ्गां महौषधिं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले प्रपेदिरे प्राक्तनजन्मविद्याः ॥"

वारिजेनेत्यादौ गुणस्य तामित्यादौ च क्रियायाः साधारणधर्मत्वं ज्ञेयम् ।

(न) क्वचिदिति । प्रकृतत्वं प्रस्तुतत्वेन वर्णनायोग्यत्वमित्यर्थः । एतेन उपमेयस्यैव प्रकृतत्वम्, ...रुपमानस्येति प्राचां नियमाभिधानं प्रायिकमेवेति सूचितम् ।

---

(१) कुत्रचित् यथा इत्यधिकः पाठो दृश्यते ।

"अस्य राज्ञो गृहे भान्ति भूपानां ता (१) विभूतयः ।
पुरन्दरस्य भवने कल्पवृक्षभवा इव ॥" (फ)

अत्रोपमेयभूतविभूतिभिः "कल्पवृक्षभवा इव" इत्युपमानभूता विभूतय आक्षिप्यन्त इत्याक्षेपोपमा । अत्रैव "गृहे" इत्यस्य "भवने" इत्यनेन प्रतिनिर्द्देशात् प्रतिनिर्द्देश्योपमा (ब) इत्यादयश्च न लक्षिताः, एवंविध-वैचित्र्यस्य सहस्रधा सन्दर्शनात् (भ) ।

३७ । उपमानोपमेयत्वमेकस्यैव त्वनन्वयः । (म)

अर्थादेकवाक्ये (य) । यथा—

(प) हंस इति । शरदागमे शरत्कालप्रवृत्तौ, हंसश्चन्द्र इव आभाति परिष्कृतवर्णत्वेन प्रकाशते, व्योमतलमाकाशतलं यथा तथैव जलं निर्म्मलमित्यर्थः, तथा तारका नक्षत्राणि कुमुदानीव विमला जायन्ते ।

अत्र शरदो वर्णने तदङ्गानामुपमेयोपमानभूतानामुभयेषामपि हंसचन्द्रादीनां प्रकृतत्वेन वर्णनायोग्यत्वा-दृर्णनमित्याशयः । तथा "विमलाः कुमुदानीव तारकाः" इत्यत्र "सुधेव विमलश्चन्द्रः" इत्यादिवत् लिङ्गभेदे भग्नप्रक्रमतादोषः । तथापि न किञ्चिदुद्वेजनीयम्, दोषाणामलङ्कारप्रतिबन्धकत्वाभावात् ।

(फ) मतान्तरे उपमाभेदान्तरप्रदर्शनायोदाहरति अस्येति । अस्य राज्ञो गृहे भूपानामन्येषां राज्ञां ता युद्धजिता विभूतयः सम्पदः, पुरन्दरस्य भवने देवराजस्य गृहे, कल्पवृक्षभवा विभूतय इव भान्ति ।

(ब) प्राचामुपमाभेदान्तराणि दर्शयति अत्रेति । "उपमेयभूताविभूतिभिः ता विभूतयः" इत्यनेनोक्ताभि-रित्यर्थः । आक्षिप्यन्ते शब्दानुपात्ता अपि व्यञ्जनया प्रत्याय्यन्ते, इति हेतोः, आक्षेपोपमा नामोपमाभेद इत्यर्थः । प्रतिनिर्द्देशादुपमानत्वेन प्रत्यवस्थापनात्, प्रतिनिर्द्देश्योपमा नामोपमाभेद इति तात्पर्य्यम् ।

(भ) इदानीमीदृशभेदान्तरलक्षणकरणमयुक्तमित्याशयेनाह इत्यादयश्चेति । न लक्षिता लक्षणादिभिर्न निरूपिताः । सहस्रधा असंख्यप्रकारैरित्यर्थः । तथा च तैर्यथा उक्तेतरभेदा न लक्षिताः, तथाऽस्माभिरपि तदुक्ताक्षेपोपमादिभेदो न लक्षिता इत्याशयः ।

(म) अनन्वयं नामालङ्कारं लक्षयति उपेति । एकस्यैव तु पदार्थस्य उपमानोपमेयत्वं युगपदेव उपमानत्वमुपमेयत्वञ्च कल्पितञ्चेत् तदा अनन्वयो नामालङ्कारः स्यात् । तथा च उपमेयत्वं नाम उपमान-भिन्नत्वे सति उपमानगतसम्भाव्यमानानेकधर्म्मवत्त्वम् । तेनोभयत्वाप्युभयभेदास्यावश्यकत्वादेकस्मिन्नेव पदार्थे युगपदुपमानत्वोपमेयत्वयोः सत्तासम्बन्धोऽसम्भव एवेति न विद्यते अन्वयः सत्तासम्बन्धो यस्मिन्निति व्युत्पत्त्या अनन्वय इति संज्ञासिद्धिः ।

(य) ननु "चन्द्रायते शुक्लरुचापि हंसः" इत्यादौ एकस्यैव हंसादेश्चन्द्राद्यपेक्षया उपमेयत्वं कान्ताद्य-पेक्षया चोपमानत्वम्, तथा "कमलेव मतिर्मतिरिव कमला" इत्यादावपि एकस्यैव मत्यादेरुपमेयत्वमुपमानत्व-ञ्चेति रशनोपमायाम् उपमेयोपमायाञ्च अस्य अनन्वयलक्षणस्यातिव्याप्तिरित्याह अर्थादिति । सामान्यविशेष-

---

(१) भूपानीत इति पाठान्तरम् ।

"राजीवमिव राजीवं जलं जलमिवाजनि।
चन्द्रश्चन्द्र इवातन्द्रः शरत्समुदयोद्यमे॥" (र)

अत्र राजीवादीनामनन्यसदृशत्वप्रतिपादनार्थमुपमानोपमेयभावो वैवक्षिकः (ल)। "राजीवमिव पाथोजम्" इति चास्य लाटानुप्रासाद्विविक्तो विषयः (व)। किन्त्वत्रोचितत्वादेकशब्दप्रयोग एव श्रेयान्। तदुक्तम्—(श)

"अनन्वये च शब्दैक्यमौचित्यादानुषङ्गिकम्।
अस्मिंस्तु लाटानुप्रासे साक्षादेव प्रयोजकम्॥" (ष)

न्यायादित्यर्थः। तथा च अनेकवाक्यं विना रसनोपमाया उपमेयोपमायाश्चासम्भव एवेति तयोरनेकवाक्यमेव विषयः, अस्य तु एकवाक्ये अनेकवाक्ये च सम्भवात् सामान्यविशेषन्यायेन एकवाक्यमेव विषयः कल्प्यत इत्याशयः।

(र) राजीवमिति। शरदः कालस्य समुदयेन सम्पूर्णभावेन उद्यमे प्रवृत्तौ आविर्भावे सति, राजीवं राजीवमिव पद्मं पद्ममिव अतन्द्रं वर्षापङ्कादिकृतमालिन्यहीनम् अजनि; जलं जलमिव अतन्द्रं कर्दमादिमलहीनमजनि; तथा चन्द्रश्च चन्द्र इव अतन्द्रो घनावरणरूपमलशून्यः अजनि जातः।

अत्रैकस्यैव राजीवादेरुपमानत्वादुपमेयत्वाच्च अनन्वयः। अयन्तु उपमावदेव पूर्णो लुप्तस्तद्धितादिगततया षड्विधः पञ्चविधः क्यजादिप्रत्ययप्रतिपाद्यश्च सम्भवतीत्युन्नेयम्।

(ल) ननूक्तरीत्या उपमानोपमेययोः परस्परभेदस्यावश्यकत्वात् कथमेकस्मिन्नेवासावुपमानोपमेयभावः सम्भवतीत्याह अत्रेति। वैवक्षिकः कविना विवक्षयैवारोपितः, न पुनर्वास्तविक एव स इति भावः।

(व) अथानन्वयस्थलमात्र एव लाटानुप्रासलक्षणव्यापनादनयोर्नियतसाङ्कर्यापत्तिरित्याह राजीवमिति। पाथोजमपि पद्मम्। अस्य अनन्वयस्य, लाटानुप्रासात् लाटानुप्रासविषयात्, विविक्तो विभिन्नः। तथा च "राजीवमिव पाथोजम्" इत्यादौ शब्दस्य पौनरुक्त्याभावान्न लाटानुप्रासप्रसक्तिः, उभयोरेव शब्दयोर्वाच्यस्य एकपद्मरूपपदार्थस्य तु उपमानत्वादुपमेयत्वाच्च अनन्वयप्रसक्तिरस्त्येवेति विषयभेदसम्भवान्नानयोर्नियतसाङ्कर्यापत्तिरित्याशयः।

(श) ननु तर्हि कथमनन्वयस्य कुत्रापि स्थले "राजीवमिव पाथोजम्" इतिवद्भिन्नशब्दप्रयोगो न दृश्यत इत्याह किन्त्विति। अत्र अनन्वये। उचितत्वादिति। तथा च शब्दयोरभेदस्थल एव श्रवणमात्रमेकस्योपमानोपमेयभावप्रतीतिः सम्पद्यते, शब्दभेदे तु अर्थानुसन्धानात् परमेवोपमानोपमेयभावप्रतीतिरिति उचितत्वमिति भावः। एकशब्दप्रयोगः अभिन्नानुपूर्वीकशब्दद्वयविन्यासः। श्रेयान् प्रशस्ततमः। अत्र प्राचीनसंवादमाह तदुक्तमिति।

(ष) अनेति। अनन्वये अलङ्कारे, औचित्यात् प्रदर्शितहेतुना सङ्गतत्वात् शब्दयोरैक्यमभिन्नानुपूर्वीकत्वम्, आनुषङ्गिकमनियतम्, "राजीवमिव पाथोजम्" इत्यादौ विषयतासम्भवादिति भावः। अस्मिन् लाटानुप्रासे तु शब्दैक्यं साक्षादेव प्रयोजकं सर्वथैव नियतम्, अन्यथा लाटानुप्रासासम्भवादित्यभिप्रायः।

३८। पर्य्यायेण द्वयोरेतदुपमेयोपमा मता ॥ (ख)

एतदुपमानोपमेयत्वम् । अर्थाद्वाक्यद्वये (ह) । यथा—

"कमलेव मतिर्मतिरिव कमला तनुरिव विभा विभेव तनुः ।
धरणीव धृतिर्धृतिरिव धरणी सततं विभाति वत यस्य (१) ॥" (च)

अथ तर्हि "राजीवमिव राजीवम्" इत्यादौ शब्दैक्ये अनन्वयस्थले लाटानुप्रासस्साङ्कर्य्यमनिवार्य्यमेवेति चेन्न, इवाद्यौपम्यप्रतिपादकसत्त्वे अनन्वयः तदसत्त्वे तु लाटानुप्रास इति विषयविभागस्य सर्वथा सुवचत्वात् ।

(ख) पर्य्यायेणेति । द्वयोः पदार्थयोः पर्य्यायेण विपर्य्यासेन परिवर्त्तनेनेति यावत्, एतदुपमानोपमेयत्वम्, उपमेयोपमा नामालङ्कारो मता । तथा च पूर्ववाक्ये यदुपमानं परवाक्ये तच्चेदुपमेयं स्यात् एवं पूर्ववाक्ये यदुपमेयं परवाक्ये तच्चेदुपमानं स्यात् तदा उपमेयोपमा नामालङ्कारो भवेदिति सरलार्थः । अतएव काव्यप्रकाशे—"विपर्य्यास उपमेयोपमा तयोः" इत्यत्र विपर्य्यास इति वृत्तौ च परिवृत्तिरित्युक्तम् । पूर्ववाक्यस्थेन उपमानेन परवाक्ये उपमेयेन सता निष्पादिता उपमा उपमेयोपमा इति हि व्युत्पत्तिः । अत्र पर्य्यायेणेत्यभिधानात् "मुखं तव तथा भाति यथा राजति चन्द्रमाः" इत्यादावुपमानोपमेयभावापरिवर्त्तनस्थले नातिव्याप्तिः । न च "मुखमिव कमलम्" इत्यादौ युगपदेव द्वयोरुपमानोपमेयत्वमिति तद्वारणाय पर्य्यायेणेति" इति रामचरणोक्तं युक्तमिति वाच्यम्, मुखमिव कमलमित्यस्य एकमात्रवाक्यतया "अर्थाद्वाक्यद्वये" इति वृत्त्युक्तिविरोधात् । "चन्द्रायते" इत्यादौ रसनोपमायां वाक्यद्वयसत्त्वात् हंस इत्यादेरुपमेयोपमानभावपरिवर्त्तनसत्त्वाच्च तत्रातिव्याप्तिनिरासाय द्वयोरित्युक्तम् ।

"सन्निहिते बुद्धिरन्तरङ्गा" इति न्यायादुपमानोपमेयभावस्य सन्निहितपरिवृत्तिस्थल एवायमलङ्कारः । तेन "मुखं शशीव कान्ताया दिवसे मामतीपयत् । रात्रौ तोपयते सोऽयं शशी मुखमिवाधुना ॥" इत्यादौ व्यवहितपरिवर्त्तने उपमाद्वयमेव ।

"राजा सूर्य्य इवाधृष्यः सूर्य्यो राजेव राजते । कमलेव मतिस्तस्य लक्ष्मीः सापि च धीरिव ॥" इत्यादौ साधारणधर्म्मभेदे शब्दभेदे च उपमानोपमेयभावपरिवृत्तिप्रतीतिः स्थगितेव स्यादिति नोपमेयोपमा ।

(ह) अर्थादिति । योग्यत्वादित्यर्थः । तथा च वाक्यद्वयं विना द्वयोरुपमानोपमेयभावपरिवृत्तिर्न सम्भवतीति भावः । काव्यप्रकाशकारोऽप्येवम् ।

(च) कमलेवेति । अत्र हर्षे वतशब्दः । यस्य राज्ञः सततम्, कमला राजलक्ष्मीरिव मतिर्बुद्धिः, सा मतिरिव च सा कमला, राजलक्ष्मीर्यथा असाधारणी बुद्धिरपि तथैव असाधारणीत्यर्थः, एवमन्यत्रापि । तनुः शरीरमिव विभा कान्तिः, सा विभेव च सा तनुः । धरणी आयत्तीकृता भूमिरिव धृतर्धैर्य्यम्, सा धृतिरिव च सा धरणी, विभाति वर्त्तते ।

अत्र पूर्ववाक्ये कमलाया उपमानत्वं मतेश्चोपमेयत्वम्, परवाक्ये तु तस्याः कमलाया उपमेयत्वं मतेश्चोपमानत्वमित्याद्युपमानोपमेयभावपरिवृत्ते रुपमेयोपमा ।

---

(१) विभाति तव यस्य वत इति क्वचित् पाठः ।

अत्रास्य राज्ञः श्रीवृद्ध्यादिसदृशं (१) नान्यदस्तीत्यभिप्रायः (क)।

३९। सदृशानुभवाद्वस्तुस्मृतिः स्मरणमुच्यते। (ख)

यथा—"अरविन्दमिदं वीक्ष्य खेलत्खञ्जनमञ्जुलम्।
स्मरामि वदनं तस्याश्चारुचञ्चललोचनम्॥" (ग)

"मयि सकपटम्" इत्यादौ च (१६६ पृष्ठे) स्मृतिः सादृश्यानुभवं विनो-त्थापितत्वान्नायमलङ्कारः (घ)। राघवानन्दमहापात्रास्तु वैसादृश्यात् स्मृतिमपि स्मरणालङ्कारमिच्छन्ति। तत्रोदाहरणं तेषामेव (ङ)। यथा—

"शिरीषमृद्वी गिरिषु प्रपेदे यदा यदा दुःखशतानि सीता।
तदा तदाऽस्याः सदनेषु सौख्यलक्षाणि दध्यौ गलदश्रु रामः॥" (च)

(क) अत्र कवेरीदृशोपमानोपमेयभावपरिवर्त्तने अभिप्रायमाह अत्रेति। आदिशब्देन तनुविभादीनां ग्रहणम्।

(ख) वाच्यसाम्यघटितानलङ्कारानभिधायेदानीं व्यङ्ग्यसाम्यघटितानभिधातुं तत्र स्मरणालङ्कारगतव्यङ्ग्य-साम्यस्य अन्यान्यालङ्कारगतव्यङ्ग्यसाम्यापेक्षया स्पष्टप्रतीयमानत्वेन प्रधानत्वात्तमेव स्मरणालङ्कारं प्रथममाह सदृशेति। सदृशस्य वस्तुनः अनुभवात् दर्शनादिप्रत्यक्षात् जायमाना, वस्तुनः पूर्वानुभूतपदार्थस्य स्मृतिः स्मरणं नामालङ्कार उच्यते। अत्र स्मरणमिति भावे प्रत्ययात् व्युत्पत्तिः स्पष्टा।

(ग) अरविन्दमिति। खेलता उपरि सञ्चरता खञ्जनेन पक्षिणा मञ्जुलं सुन्दरम्, इदमरविन्दं पद्मं वीक्ष्य दृष्ट्वा, अहम्, चञ्चले लोचने यत्र तत्तादृशं चारु स्वभावसुन्दरम्, तस्याः कामिन्या वदनं स्मरामि।

अत्र खेलत्खञ्जनयुक्तलोचनसदृशः अरविन्दस्य स्वभावत एव मुखसदृशमिति सर्वथैव मुखसदृशस्य अरविन्दस्य दर्शनाज्जायमानायास्तादृशमुखस्मृतेः स्मरणालङ्कारः।

(घ) ननु "सदृशज्ञानचिन्ताद्यैर्भ्रूसमुन्नमनादिकृत्। स्मृतिः पूर्वानुभूतार्थविषयज्ञानमुच्यते॥" इति प्रागुक्तलक्षणा सामान्यतो वस्तुस्मृतिरेव स्मरणालङ्कार उच्यताम्, किं सदृशानुभवादिति स्मृतेः कारणनिर्देशेनेत्याह मयीति। उत्थापितत्वात् चिन्ताजन्यसंस्कारेणाविर्भावितत्वात्। अयं स्मरणाख्यः। तथा चास्मन्मते संस्कारोद्बोधनद्वारा सदृशवस्तुज्ञानजन्या स्मृतिरेव स्मरणालङ्कारः, न पुनश्चिन्तादिजन्या स्मृतिरपि। अतएव सदृशानुभवादिति स्मृतेः कारणनिर्देश इत्याशयः। काव्यप्रकाशकारोऽप्येवम्।

(ङ) अतएवानभिप्रेतं मतमाह राघवेति। वैसादृश्यात् विसदृशपदार्थानुभवाज्जायमानामित्यर्थः, स्मृतिं वैचित्र्यवतीमेव। तेषां राघवानन्दमहापात्राणामेव।

(च) शिरीषेति। शिरीषमृद्वी शिरीषकुसुमवत् कोमलाङ्गी सीता, गिरिषु पर्वतेषु यदा यदा दुःख-शतानि सर्वेष्वेव व्यापारेषु बहुतरदुःखानि प्रपेदे प्राप। तदा तदैव रामः, सदनेषु राजधानीस्थगृहेषु अस्याः

(१) श्रीवृद्ध्यादिसदृशम् इत्यपि क्वचित् पाठः।

४० । रूपकं रूपितारोपः (१) विषये निरपह्नवे ॥ (क)

सीतायाः सौख्यलवाणि सर्वेष्वेव व्यापारेषु असंख्यसुखानि, गलन्ति निर्गच्छन्ति अश्रूणि यस्मिन् कर्म्मणि तद्यथा तथा दध्यौ सस्मार ।

अत्र विसदृशानां दुःखशतानामनुभवात् तद्वैपरीत्यसम्बन्धेन सम्बन्धिनां सुखलवाणां स्मृतेर्वैचित्र्यसत्त्वाच्च स्मरणालङ्कार इति राघवानन्दमहापात्राणामाशयः ।

एतन्मतेऽपि "बहु विचिन्त्य परं स्मृतवान् कथाम्" इत्यादौ वैचित्र्याभावान्नायमलङ्कार इति बोध्यम् ।

(क) व्यङ्ग्यसाम्येष्वलङ्कारेषु रूपकस्यान्यतमप्रधानत्वादतिप्रसिद्धत्वाच्चेदानीं सामान्यतो रूपकं लक्षयति रूपकमिति । निरपह्नवे शब्दतस्तात्पर्यतो वा प्रतिषेधरहिते, विषये उपमेयपदार्थे, रूपितस्य निरूपितस्य रूपकघटकत्वेनावधारितस्य उपमानाभिदस्य उपमानपदार्थतादात्म्यस्येति यावत्, आरोपः सादृश्यातिशयवशात् प्रागुक्तया सारोपाख्यलक्षणया आरोपणं रूपकम् ।

यथास्थिते उपमेये उपमानस्याभेदारोपो रूपकालङ्कार इति सरलार्थः । रूपयति उपमानोपमेययोरभेदारोपणं करोतीति रूपकमिति व्युत्पत्तिः । अस्मिन्नर्थे रूपकमिति नित्यनपुंसकलिङ्गः शब्दः कारकमितिवत् ।

इदमवावधेयम्—"मुखचन्द्रः" इत्यादौ समासस्थले रूपके मुखमेव चन्द्र इति मयूरव्यंसकादित्वात् रूपककर्म्मधारयः ; उपमायान्तु मुखं चन्द्र इवेति "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इत्यनेन उपमितकर्म्मधारयः। तत्र रूपके आरोप्यमाणत्वेन विशेष्यतया उपमानपदार्थ एवोपमेयं तिरोधाय क्रियायामन्वेति ; उपमायान्तु आरोपभावेन वर्णनामुख्योद्देश्यत्वेन च विशेष्यतया उपमेयपदार्थ एवोपमानं तिरोधाय क्रियया सम्बध्यते। तेन "मुखचन्द्रः प्रकाशते" इत्यादौ प्रकाशस्य प्रभारूपतया चन्द्रे सम्भवात् मुखे चासम्भवात् प्रकाशत इति पदं रूपकस्य साधकम् उपमायास्तु बाधकमिति रूपकमेव । "युवा प्रियाया मुखचन्द्रं चुम्बति" इत्यादौ चुम्बनस्य वक्त्रसंयोगरूपतया मुखे सम्भवात् चन्द्रे चासम्भवात् चुम्बतीति पदमुपमायाः साधकं रूपकस्य च बाधकमित्युपमैव एवं "सुन्दरं वदनाम्बुजम्" इत्यादौ सौन्दर्य्यरूपसामान्यधर्म्मप्रयोगेण "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" इत्यनेनोपमितसमासासम्भवात् सुन्दरमितिपदमुपमाया बाधकमेवेति पारिशेष्यात् रूपकमेव। "मुखचन्द्रं पश्यति" इत्यादौ तु मुखस्य चन्द्रस्य च दर्शनसम्भवेन उभयोरपि साधकबाधकाभावात् उपमारूपकयोः सन्देहसङ्कर एव । एतच्च वृत्तावपि किञ्चित् परस्ताद्वक्ष्यति ।

उपमेये उपमानाभेदप्रतीतेः सारोपाख्यलक्षणामूलकत्वे रूपकम्, साध्यवसानाख्यलक्षणामूलकत्वे तु अतिशयोक्तिः । अतएव द्वितीयपरिच्छेदे "विषयस्यानिगीर्णस्य" इत्यादिकारिकावृत्तौ "इयमेव रूपकालङ्कारस्य बीजम्" इत्युक्तम् । तथा च उपमेयस्य कथञ्चिदप्यनपलापे सति उपमानाभेदारोपेण रूपकम्, उपमेयस्य कथञ्चिदप्यवलोपे सति उपमानाभेदारोपेण अतिशयोक्तिरिति भेदः ।

---

(१) रूपितारोपादिति पाठान्तरम् ।

"रूपित" इति परिणामाद्व्यवच्छेदः (ज)। एतच्च तत्प्रस्तावे (१) विवेचयिष्यामः (झ)। "निरपह्नवे" इत्यपह्नुतिव्यवच्छेदार्थम् (ञ)।

४१। तत् परम्परितं साङ्गं निरङ्गमिति च त्रिधा। (ट)

तद्रूपकम्। तत्र—(ठ)

४२। यत्र कस्यचिदारोपः परारोपणकारणम्॥
तत् परम्परितं श्लिष्टाश्लिष्टशब्दनिबन्धनम्।
प्रत्येकं केवलं मालारूपञ्चेति चतुर्विधम्॥ (ड)

तत्र श्लिष्टशब्दनिबन्धनं केवलपरम्परितं यथा—

(ज) रूपितपदस्याकृत्तिमाह रूपितेति। परिणामात् परिणामालङ्कारविषयात् व्यवच्छेदो रूपकस्य व्यावृत्तिः। तथा च रूपितस्य प्रागुक्तभावेन उपमानाभेदमात्रस्य आरोप एव रूपकम् न तु तत्र प्रकृतोपयोगित्वमपि प्रयोजकमिति भावः। एवञ्च उपमेये केवलोपमानाभेदारोप एव रूपकम्, उपमेये आरोप्यमाणस्य उपमानाभेदस्य प्रकृतोपयोगित्वे तु परिणाम इत्यनयोर्भेद इति सिद्धम् एतच्चोपरिष्टाद् तावपि वक्ष्यति।

(झ) नन्वनयोर्विभिन्नत्वं विहत्याभिधीयताम्, कथमन्यथा परिणामाद्व्यवच्छेदः स्पष्टमवबुध्यते इत्याह एतच्चेति। रूपकपरिणामयोर्विभिन्नत्वमित्यर्थः। तत् प्रस्तावे परिणामप्रकरणे। तथा चेदानीमपि परिणामस्वरूपानवगततया तद्भेदप्रदर्शनमसम्भवमेवेति तत्प्रकरण एवोभयोर्भेदं प्रदर्शयिष्याम इति भावः।

(ञ) "निरपह्नवे" इत्यस्य व्यवच्छेद्यमाह निरपह्नव इति। अपह्नुतिव्यवच्छेदार्थं कारिकायामभिहितमिति शेषः। तथा च शब्दतस्तात्पर्यतो वा प्रतिषेधोऽपह्नवः। इत्यञ्च निरपह्नवे उपमेये उपमानस्याभेदारोपो रूपकम्, सापह्नवे तूपमेये उपमानस्याभेदारोपोऽपह्नुतिरित्यनयोरपि भेदः।

(ट) रूपकं विभजति तदिति। तत् रूपकसामान्यम्। परम्परा कार्य्यकारणभावश्रेणी अस्य सञ्जातेति परम्परितम्। तारकादित्वादितच्। अङ्गैः समस्तप्रतिपादकैः सहेति साङ्गम्। निरङ्गम् एकेनापि प्रतिपादकेन हीनम्।

(ठ) तत्रेति। तेषु त्रिविधेषु रूपकेषु मध्ये इत्यर्थः।

(ड) परम्परितं लक्षयन् विभजते यत्रेति। यत्र स्थले कस्यचिदेकस्य आरोपः, परस्य अन्यस्य आरोपणे आरोपे कारणं निमित्तं भवति, तत्तत्र परम्परितं रूपकं ज्ञेयमिति शेषः। एतेन रूपकत्वे सति आरोपान्तरनिमित्तीभूत आरोपः परम्परितमिति फलितम्। तच्च परम्परितं प्रथमं द्विधा विभजते श्लिष्टेति। निबध्यते प्रयोज्यते अनेनेति निबन्धनं प्रयोजकमित्यर्थः। तथा च श्लिष्टाश्लिष्टौ शब्दौ निबन्धने प्रयोजकौ यस्य तत्। एवञ्च श्लिष्टशब्दनिबन्धनम् अश्लिष्टशब्दनिबन्धनञ्चेति प्रथमं द्विविधम्। तयोश्च प्रत्येकम् एकैकमेव केवलमेकमात्रभूतं मालारूपमनेकभूतञ्चेति मिलित्वा समुदायेन परम्परितरूपकं चतुर्विधमित्यर्थः।

---

(१) परिणामप्रस्तावे इति क्वचित् पाठः।

"आहवे जगदुद्दण्ड ! राजमण्डलराहवे ।
श्रीनृसिंहमहीपाल ! स्वस्त्यस्तु तव बाहवे ॥" (ढ)

अत्र राजमण्डलं नृपसमूह एव चन्द्रबिम्बमित्यारोपो राजबाहो राहुत्वारोपे निमित्तम् (ण) ।

मालारूपं (त) यथा—

"पद्मोदयदिनाधीशः सदागतिसमीरणः ।
भूभृदावलिदम्भोलिरेक एव भवान् भुवि ॥" (थ)

(ढ) आहव इति । राजस्तुतिरियम् । जगति उत्कृष्टं दण्डं सैन्यं यस्य स जगदुद्दण्डः । हे जगदुद्दण्ड ! श्रीनृसिंहमहीपाल ! आहवे समरे, राजमण्डलं विपक्षनृपसमूह एव राजमण्डलं चन्द्रबिम्बं तस्य राहवे विमर्द्दनात् राहुस्वरूपाय, तव बाहवे भुजाय स्वस्ति कुशलमस्तु । "दण्डो यमे मानभेदे लगुडे दमसैन्ययोः ।" इत्यादिविश्वः । अत्र "हवे हवे" इति यमकस्य पादत्रयगतत्वात् "सहसालिजनैः स्निग्धैः" इत्यादिवदप्रयुक्ततादोषोऽपि ज्ञेयः ।

(ण) लक्ष्ये लक्षणं सङ्गमयितुमाह अत्रेति । "राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ । यक्षे शक्रेऽपि पुंसि स्यात्" इति मेदिनी । अत्र नृपसमूहे चन्द्रबिम्बत्वारोपं विना राजबाहौ राहुत्वारोपः सादृश्याभावान्न सम्भवतीति पूर्वारोपः परारोपं प्रति निमित्तम्, राजमण्डलेति श्लिष्टशब्दप्रयोज्यश्च पूर्वारोपः, कार्य्यकारणभावश्चैकमात्र इत्यतः श्लिष्टशब्दनिबन्धनं केवलपरम्परितमित्याशयः ।

एवमत्र केवलपरारोपे उभयारोपे च श्लिष्टशब्दनिबन्धनत्वं सम्भवति । यथा मम—

"रणदुर्दिनसम्प्राप्तौ प्रच्छन्नं राजमण्डलम् । इने तवोदयं प्राप्ते जाता च कमलोन्नतिः ॥"

अत्र दुर्द्दिनं मेघान्धकारः । इनो राजा सूर्य्यश्च । कमला सम्पत् कमलञ्च पद्मम् । तेन युद्धे दुर्द्दिनत्वारोपो नृपतिसमूहे चन्द्रमण्डलत्वारोपे निमित्तम्, राजमण्डलेति श्लिष्टशब्दश्च परारोपप्रयोजकः । तथा राजनि सूर्य्यत्वारोपः सम्पदि पद्मत्वारोपं प्रति निमित्तम्, इनेति कमलेति श्लिष्टशब्दद्वयञ्च उभयारोपप्रयोजकम् । एवमुत्तरत्रापि ज्ञेयम् ।

(त) मालेति । अत्रापि श्लिष्टशब्दनिबन्धनमिति परम्परितमिति च सम्बध्यते ।

(थ) पद्मेति । इयमपि राजस्तुतिः । हे राजन् ! भुवि भवानेक एव, पद्मायाः सम्पदः उदय उन्नतिरेव पद्मानामुदयो विकासस्तत्र दिनाधीशः सूर्य्यः । यथा एकः सूर्य्य एव पद्मविकासं विधत्ते, तथा एको भवानेव पृथिव्यामसाधारणसम्पत्तिवृद्धिं करोतीति भावः । सतां सज्जनानाम् आगतिरागमनमेव सदा सर्वदा गतिर्गमनं तत्र समीरणो वायुः । "श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः" इत्यमरप्रामाण्यात् यथा वायुः सर्वदा गमनं करोति, तथा भवानपि दानमानाभ्यां साधूनामागमनं सम्पादयतीत्याशयः । तथा भूभृतो विपक्षा राजान एव भूभृतः पर्वतास्तेषाम् आवलौ समूहे दम्भोलिर्वज्रः । इन्द्रस्य वज्रो यथा पर्वतानुपमर्द्दितवान्, भवानपि तथा विपक्षान् राज्ञ उपमर्द्दितवानित्यभिप्रायः । "लक्ष्मीः पद्मालया पद्मा" "वा पुंसि पद्मम्" इति चामरः । "भूभृन्नरेन्द्रे शैले च" इति विश्वः ।

अत्र पद्मायाः उदय एव पद्मानामुदयः, सतामागतिरेव सदागमनम्, भूभृतो राजान एव पर्वता इत्याद्यारोपो राज्ञः सूर्य्यत्वाद्यारोपे (१) निमित्तम् (द)।

अश्लिष्टशब्दनिबन्धनं केवलं यथा—

"पान्तु वो जलदश्यामाः शार्ङ्गज्याघातकर्कशाः।
त्रैलोक्यमण्डपस्तम्भाश्चत्वारो हरिबाहवः॥" (ध)

अत्र त्रैलोक्यस्य मण्डपत्वारोपो हरिबाहूनां स्तम्भत्वारोपे निमित्तम् (न)।

मालारूपं (प) यथा—

"मनोजराजस्य सितातपत्रं श्रीखण्डचित्रं हरिदङ्गनायाः।
विराजते (२) व्योमसरःसरोजं कर्पूरपूरप्रभमिन्दुबिम्बम्॥" (फ)

अत्र मनोजादेः राजत्वाद्यारोपश्चन्द्रबिम्बस्य सितातपत्रत्वाद्यारोपे

(द) अत्रेति। अत्र प्रथमादिशब्दः प्रकारार्थे। "सामीप्येऽथ व्यवस्थायां प्रकारेऽवयवे तथा। चतुर्थ्वर्थेषु मेधावी आदिशब्दन्तु लक्षयेत्॥" इति कातन्त्रपञ्जीप्रामाण्यात्। द्वितीयादिशब्दस्तु गणावयवार्थे। तेन च समीरणत्वदम्भोलित्वयोर्ग्रहणम्। अत्र पूर्वपूर्वारोपः परपरारोपं प्रति निमित्तमिति परम्परितत्वम्, पद्मोदय-सदागतिभूभृच्छब्दाः श्लिष्टा इति श्लिष्टशब्दनिबन्धनत्वम्, कार्य्यकारणभावाश्च त्रय इति मालारूपत्वञ्च ज्ञेयम्।

(ध) पान्त्विति। जलदश्यामा मेघवत् श्यामवर्णाः, शार्ङ्गज्यायाः शृङ्गनिर्म्मितधनुषो गुणस्य आघातेन कर्कशाः कठिनीभूताः, तथा त्रैलोक्यं त्रिभुवनमेव मण्डपं गृहविशेषस्तस्य स्तम्भाः सततमेव धारणात् स्तम्भरूपाः, चत्वारो हरेर्बाहवो भुजाः, वो युष्मान् पान्तु पालयन्तु।

(न) अत्रेति। निमित्तमिति। अतएवास्य रूपकस्य परम्परितत्वम्, न कोऽपि शब्दः श्लिष्ट इत्यश्लिष्टशब्दनिबन्धनत्वम्, तथा कार्य्यकारणभाव एकमात्र इति केवलत्वञ्चेति भावः।

(प) मालेति। अश्लिष्टशब्दनिबन्धनं परम्परितमित्यनुषज्यते।

(फ) मनोजेति। मनोजः कन्दर्प एव राजा सर्वत्राप्रतिहतप्रभावान्नृपतिस्तस्य, सितातपत्रं प्रायेण सहचारित्वात् श्वेतच्छत्रस्वरूपम्; हरित् स्वाश्रिता दिगेव अङ्गना लिङ्गसाम्यात् स्त्री तस्याः, श्रीखण्डचित्रं वर्त्तुलत्वात् श्वेतचन्दनतिलकस्वरूपम्; तथा व्योम आकाशमेव सरः स्वच्छत्वात् जलाशयस्तस्य सरोजम् आह्लादकसुन्दरवर्त्तुलत्वात् पद्मम्; कर्पूरस्य पूरप्रभं स्तूपतुल्यम्, इन्दुबिम्बं चन्द्रमण्डलं विराजते।

---

(१) सूर्य्यत्वारोपे निमित्तम्, सूर्य्यत्वारोपनिमित्तम् इति पाठभेदौ।

(२) विराजति इति पाठान्तरम्।

निमित्तम् (ब)। तत्र च "राजभुजादीनां राहुत्वाद्यारोपो राजमण्डलादीनां चन्द्रमण्डलत्वाद्यारोपे निमित्तम्" इति केचित् (भ)।

४३। अङ्गिनो यदि साङ्गस्य रूपणं साङ्गमेव तत् ।
समस्तवस्तुविषयमेकदेशविवर्त्ति च ॥ (म)

तत्र—

४४। आरोप्याणामशेषाणां शाब्दत्वे प्रथमं मतम् । (य)

प्रथमं समस्तवस्तुविषयम् । यथा—

"रावणावग्रहक्लान्तमिति वागमृतेन सः ।
अभिवृष्य मरुच्छस्यं कृष्णमेघस्तिरोदधे ॥" (र)

(ब) अत्रेति। प्रथमादिपदेन हरिद्रोणौ:, द्वितीयादिपदेन अङ्गनात्वसरस्वत्यौ, तृतीयादिपदेन च श्रीखण्डचित्रत्व-सरोजत्वयोर्ग्रहणम् । निमित्तमिति । अतएव अतत्यरूपकस्यापि परम्परितत्वम्, सर्व्व एवाश्लिष्टाः शब्दा इत्यश्लिष्टशब्दनिबन्धनत्वम्, तयश्च कार्य्यकारणभावा इति मालारूपत्वञ्चावधेयमित्याशयः ।

(भ) अत्र परम्परितप्रकरणे मतान्तरे आरोपेषु स्वप्रदर्शितकार्य्यकारणभाववैपरीत्यमाह तत्र चेति। "तेषु आहवे जगदुद्दण्ड !" इत्याद्युदाहृतेषु सकलपद्येषु चेत्यर्थः । अत्रापि प्रथमादिपदेन "पद्मोदय-दिनाधीशः" इत्यादिषु राजादीनाम्, द्वितीयादिपदेन दिनाधीशत्वादीनाम्, तृतीयादिपदेन पद्माया उदया दीनाम्, चतुर्थादिपदेन च पद्मानामुदयत्वादीनां ग्रहणम् । एतन्मते अस्वरसतावीजानि तु कारणीभूतारोपाणां कारणतयैव प्राक् प्रतीत्यौचित्येऽपि पाठक्रमेण परप्रतीतिविषयीकरणम्, परप्रतीतियोग्यानाञ्च कार्य्यभूतारोपाणां प्राक् प्रतीतिविषयीकरणम्, राजमण्डलादिषु च एकानुपूर्वीकशब्दवाच्यत्वरूपसादृश्यसत्त्वात् सुघट एव नृपसमूहादौ चन्द्रविम्बत्वाद्यारोपः सादृश्याभावाद्दुर्घटं राजभुजादौ राहुत्वाद्यारोपं घटयितुमर्हति, न त्वेतद्वैपरीत्यमपि, कार्य्यकारणयोः कारणस्यैव सुघटतया सिद्धत्वावश्यकत्वादिति ।

(म) सविभागं साङ्गरूपकलक्षणमाह अङ्गिन इति। साङ्गस्य आकाङ्क्षिताङ्गसमेतस्य अङ्गिनः प्रधानस्य उपमानस्य यदि रूपणं तथैव साङ्गे उपमेये अभेदारोपणं स्यात्, तदा तदेव साङ्गं नाम रूपकम्, साङ्गे उपमेये साङ्गस्यैवोपमानस्य अभेदारोपः साङ्गं रूपकमित्यर्थः । अङ्गिन आरोपवदाकाङ्क्षितानां तदङ्गानामप्यारोपसत्त्वादस्य साङ्गमिति संज्ञा । तच्च द्विविधम्—एकं समस्तवस्तुविषयम्, अपरञ्च एकदेश-विवर्त्तीति । तत्र समस्तान्येव वस्तूनि अङ्गाङ्गिसमुदाय एव विषयाः शाब्दत्वादाश्रया तस्य तत् समस्तवस्तु-विषयम् । एकदेशे विवर्त्तते शाब्दत्वांशे विशेषेणावतिष्ठत इति एकदेशविवर्त्ति ।

(य) समस्तवस्तुविषयं लक्षयति आरोप्याणामिति । अशेषाणां सर्वेषामेव आरोप्याणामारोपविषयी-भूतानाम् उपमेयानामुपमानानाञ्च शाब्दत्वे शब्दोपस्थाप्यत्वेन पुनः कस्यचिदप्यार्थत्वे इत्याशयः, प्रथमं समस्तवस्तुविषयं नाम रूपकं मतम् ।

अत्र कृष्णस्य मेघत्वारोपे वागादीनामम्तत्वादिकमारोपितम् (ल)।

४५। यत्र कस्यचिदार्थत्वमेकदेशविवर्त्ति तत्॥ (व)

कस्यचिदारोप्यमाणस्य। यथा—

"लावण्यमधुभिः पूर्णमास्यमस्या विकस्वरम्।
लोकलोचन-रोलम्ब-कदम्बैः कैर्न पीयते?॥" (श)

अत्र लावण्यादौ मधुत्वाद्यारोपः (१) शाब्दः, मुखे पद्मत्वारोप आर्थः (ष)। न चेयमेकदेशविवर्त्तिन्युपमा, विकस्वरत्वधर्मस्य आरोप्यमाणे पद्मे मुख्यतया वर्त्तनात्, मुखे चोपचरितत्वात् (स)।

(र) रावणेति। रघुवंशदशमसर्गस्थमिदं पद्यम्। सः कृष्णो नारायण एव मेघः श्यामलत्वादभिवर्षित्वाच्च घनः, इति पूर्वोक्तप्रकारा वागेव वाक्यमेव अमृतम् आर्द्रकारित्वाज्जलं तेन, रावणो लङ्काधिपतिरेव अवग्रहो बाधकत्वात् वृष्टिबन्धस्तेन क्लान्तं शुष्कप्रायम्, मरुत् देवगण एव सस्यं स्वसेवकोपकारित्वात् धान्यादिकं तत्, अभिवृष्य संसिच्य, तिरोदधे अन्तर्दधौ। "वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ" इत्यमरः।

(ल) अत्रेति। मेघत्वारोपे कर्त्तव्ये सत्येव, वागादीनां तदङ्गानामित्यर्थः। अत्रेदमवधेयम्—वर्षणक्रियायां यावन्त एवाङ्गाङ्गिपदार्था आकाङ्क्ष्यन्ते, अत्र तावन्त एव यथायथं विद्यन्ते; यथा कर्त्ता करणं कर्म चेति। तत्र च उपमेयभूतः कृष्णः उपमानभूतो मेघश्च कर्त्तृतया स्वतन्त्रत्वादङ्गी, वागमृतादीनि तु तत्प्रयोज्यत्वात् तत्सम्पाद्यवर्षणसम्पादकत्वाच्च अङ्गानि, तेषाञ्चात्र सर्वेषामेव शब्दोपात्तत्वमिति।

किञ्च, कारिकाणां सूत्ररूपत्वात् "सूत्रे लिङ्गं संख्या कालश्चातन्त्राणि" इति न्यायेनात्र "आरोप्याणाम्" इत्यादिबहुवचनमविवक्षितम्। तेन अङ्गाङ्गिद्वितयमात्ररूपणेऽपि साङ्गरूपकमेव यथा—"सुन्दरि! मुखचन्द्रस्ते वर्षतीदं स्मितामृतम्।"

(व) यत्रेति। यत्र रूपणे कस्यचिदारोप्यमाणस्य उपमानभेदस्य आर्थत्वमर्थवशाल्लभ्यत्वम्। एतेनान्येषां शाब्दत्वमेवावश्यकमिति सूचितम्। तद् रूपणम् एकदेशविवर्त्ति नाम साङ्गं रूपकं मतमित्यनुषज्यते।

(श) लावण्येति। कैः, लोकानां जनानां लोचनानि नयनान्येव रोलम्बा भ्रमरास्तेषां कदम्बैः समूहैः, लावण्यान्येव मधूनि मकरन्दास्तैः पूर्णं विकस्वरं हास्येन समयप्रभावेण च प्रकाशशीलम्, अस्याः कामिन्याः आस्यं वदनं न पीयते सादरं न दृश्यते? अपि तु सर्वैरेव पीयत इत्यर्थः; परमरमणीयत्वादिति भावः।

(ष) अत्रेति। प्रथमादिपदेन लोचनस्य द्वितीयादिपदेन च रोलम्बत्वस्य ग्रहणम्। आर्थो विकस्वरपदप्रयोगतात्पर्य्यलभ्यः। अत्रापि पूर्ववदेव साङ्गत्वमूहनीयम्।

(स) नन्वत्र लावण्यानि मधूनीव लोकलोचनानि रोलम्बा इव इत्युपमितसमासाश्रयणेन तत्र तत्र साम्यस्य वाच्यत्वात् मुखे पद्मसाम्यस्य च गम्यत्वादेकदेशविवर्त्तिन्युपमैवास्तामित्याह न चेति। आरोप्यमाणे

(१) मधुत्वारोपः, मध्वाद्यारोपः, इति पाठभेदौ।

४६। निरङ्गं केवलस्यैव रूपणं तदपि द्विधा।
माला-केवल-रूपत्वात्—(ङ)

तत्र मालारूपं निरङ्गं यथा—

"निर्म्माणकौशलं धातुश्चन्द्रिका लोकचक्षुषाम्।
क्रीड़ागृहमनङ्गस्य सेयमिन्दीवरेक्षणा॥" (च)

केवलं यथा—"दासे कृतागसि भवत्युचितः प्रभूणां
पादप्रहार इति सुन्दरि! नात्र (१) दूये।
उद्यत्-कठोर-पुलकाङ्कुर-कण्टकाग्रै-
र्यत्खिद्यते मृदुपदं ननु सा व्यथा मे॥" (क)

उपमानत्वेनारोपविषयीभूते। मुख्यतया अभिधाप्रतिपाद्यतया। उपचरितत्वात् लक्षणया आरोपितत्वात्। अत्रायमाशयः—विकस्वरत्वं नाम प्रस्फुटितत्वम्; तच्च प्रकाशसङ्कोचशालिनि पद्म एव मुख्यतया सम्भवति, न पुनः सर्वदैव एकरूपे मुखे। एवञ्च सम्भवति मुख्यार्थत्वे लक्षणाया अयोगात् "मुखचन्द्रः प्रकाशते" इत्यादिवदेवात्र विकस्वरमिति पदमेव रूपकस्य साधकमुपमायाश्च बाधकमिति एकदेशविवर्त्ति रूपकमेवेति। एतेन उक्तोदाहरणे "विकस्वरम्" इत्यत्र "मनोहरम्" इति पाठे साधकबाधकप्रमाणाभावात् "मुखचन्द्रं पश्यति" इत्यादिवदेव एकदेशविवर्त्त्युपमारूपकयोः सन्देहसङ्कर एवेति सूचितम्। "नेत्रैरिवोत्पलैः पद्मैः" इत्यादौ तु इवादिवाचकसत्त्वेनारोपस्यैवाभावान्न एकदेशविवर्त्ति रूपकमिति बोध्यम्।

किञ्च, साम्यस्य अंशयोर्वाच्यत्वे अंशतश्च व्यङ्ग्यत्वे एकदेशविवर्त्तिन्युपमा, साम्यस्य सर्वत्रैव व्यङ्ग्यत्वे तु एकदेशविवर्त्ति रूपकमिति भेदः। अतएव उपमालक्षणटीकायां "रूपकादिषु साम्यस्य व्यङ्ग्यत्वम्" इत्युक्तम्।

(ङ) सविभागं निरङ्गं रूपकं लक्षयति निरङ्गमिति। केवलस्यैव अङ्गरहितस्यैव उपमानस्य रूपणं निरङ्गे उपमेये अभेदारोपणं निरङ्गम्। तथा च निरङ्गे उपमेये निरङ्गस्यैवोपमानस्य अभेदारोपो निरङ्गं नाम रूपकमित्यर्थः। अतएव निरङ्गमिति संज्ञाप्युपपद्यते। तन्निरङ्गं रूपकमपि मालारूपत्वादनेकारोपयुक्तत्वात् केवलरूपत्वादेकमात्रारोपयुक्तत्वाच्च द्विधा।

(च) निर्म्माणेति। सा पूर्वं दृष्टा इयमिन्दीवरेक्षणा नीलोत्पलनयना, धातुर्विधातुः निर्म्माणकौशलं वराङ्गनासृष्टेश्चरमनैपुण्यरूपा। लोकचक्षुषां जननयनानां चन्द्रिका ज्योत्स्नारूपा, तद्वदेवानन्दजनिकेति भावः; तथा अनङ्गस्य कन्दर्पस्य क्रीड़ागृहं विहारभवनरूपा, दर्शनमात्रेणातीवकामोद्दीपिकेत्याशयः।

अत्र इन्दीवरेक्षणारूपे निरङ्गे एवोपमेये निर्म्माणकौशलादीनां निरङ्गाणामेव बहूनामुपमानानामभेदारोपणात् मालारूपं निरङ्गं रूपकम्। निर्म्माणकौशलस्योपमानत्वानङ्गीकारे तु आरोपद्वयस्याप्यनेकत्वान्मालारूपत्वमक्षतमेव।

(क) दास इति। मानिन्या प्रियाया मानभङ्गाय तत्पादपतितस्य तयैव च पादेन प्रहृतस्य नायकस्य

---

(१) नास्मि इत्यपि पाठः क्वचित्।

४७ । तेनाष्टौ रूपके भिदाः ॥ (ख)

चिरन्तनैरुक्ता इति शेषः ।

क्वचित् परम्परितमप्येकदेशविवर्त्ति (ग) । यथा—

"खड्गः क्ष्मासौविदल्लः समिति विजयते मालवाखण्डलस्य (१) ॥" (घ)

प्यैव पुनः सपेमोक्तिरियम् । हे सुन्दरि ! कृतागसि विहितापराधे दासे प्रभूणां पादप्रहार उचितो दण्ड एव भवति, इति हेतोः, अत्र तव पादप्रहारे अहं न दूये न सन्तप्तो न व्यथितो भवामि । किन्तु इदानीमेव पादस्पर्शमात्रेणैवोत्पद्यमानाः कठोराः कठिनाः पुलकाङ्कुरा अङ्कुरवत् क्षुद्रक्षुद्रा रोमाञ्चा एव कण्टकानि तेषामग्रैरग्रभागैः, तव मृदु कोमलं पदं चरणतलं यद्भिद्यते विदार्यते नन्वित्यवधारणे, सा सैव मम व्यथा वेदना ।

अत्र पुलकाङ्कुररूपे निरङ्ग एवैकस्मिन्नुपमेये कण्टकरूपस्य निरङ्गस्यैवैकस्य उपमानस्य एवमात्रारोपात् केवलरूपं निरङ्गं रूपकम् ।

इदमत्रावधेयम्—एकस्य आरोपस्य कार्यकारणभावेन आरोपान्तरसापेक्षत्वे परम्परितम्, अङ्गाङ्गिभावेन आरोपान्तरसापेक्षत्वे साङ्गम्, सर्वथैवारोपान्तरनिरपेक्षत्वे च निरङ्गं रूपकमिति ।

(ख) इदानीं शुद्धरूपकभेदनिरूपणमुपसंहरन् समुदायेन तत् सङ्कलनमाह तेनेति । उक्तविधभेदप्रपञ्चनेनेत्यर्थः, रूपके शुद्धरूपकालङ्कारे अष्टौ भिदा भेदाः । तथा च—

म्परितम् ४	श्लिष्टशब्दनिबन्धनम्	केवलम्	१…"आहवे जगदुद्दण्ड !" इत्यादि ।
		मालारूपम्	१…"पद्मोदयदिनाधीशः" इत्यादि ।
	अश्लिष्टशब्दनिबन्धनम्	केवलम्	१…"पान्तु वो जलदश्यामाः" इत्यादि ।
		मालारूपम्	१…"मनोजराजस्य" इत्यादि ।
ङ्गम् २	समस्तवस्तुविषयम्		१…"रावणावग्रहक्लान्तम्" इत्यादि ।
	एकदेशविवर्त्ति		१…"लावण्यमधुभिः पूर्णम्" इत्यादि ।
रङ्गम् २	मालारूपम्		१…"निर्माणकौशलं धातुः" इत्यादि ।
	केवलरूपम्		१…"दासे कृतागसि" इत्यादि ।

(ग) क्वचिदिति । न केवलं साङ्गं रूपकमेकदेशविवर्त्ति, किन्तु परम्परितमप्येकदेशविवर्त्ति भवतीत्यर्थः; तत्रापि कस्यचिदारोपस्यार्थत्वसम्भवादिति भावः । तथापि तु परम्परितस्य चतुरधिको भेदो नाङ्गनीयः, अस्य तेष्वेवान्तर्भावात् प्राचीनैः परम्परितस्य उक्तभेदचतुष्टयमात्राङ्गीकारादिति बोध्यम् ।

(घ) खड्ग इति । अस्य पूर्वं पादत्रयं यथा—"पर्यङ्को राजलक्ष्म्या हरितमणिमयः पौरुषाब्धेस्तरङ्गः, भग्नप्रत्यर्थिवंशोल्वणविजयकरिस्त्यानदानाम्बुपट्टः । संग्रामत्रासताम्यन्मुरलपतियशोहंसनीलाम्बुवाहः" इति ।

मालवाखण्डलस्य मालवेन्द्रस्य मालवदेशाधिपतेः, क्ष्माया महिषीरूपायाः पृथिव्याः सौविदल्लः कञ्चुकिरूपः, अन्तःपुरनियुक्तकञ्चुकिनामकरक्षकव्राह्मणेन महिष्या इव खड्गेन पृथिव्या रक्षणादिति भावः । खड्ग-

---

(१) क्वचित् मानवाखण्डलस्येति पाठः, क्वचित्तु सम्पूर्णपद्यस्यैव च पाठः ।

अत्रार्थः छायां महिषीत्वारोपः खड्गे सौविदल्लत्वारोपे निमित्तम्(१) (ङ)। अस्य भेदस्य पूर्ववन्मालारूपत्वेऽप्युदाहरणं मृग्यम् (च)।

४८। दृश्यन्ते क्वचिदारोप्याः श्लिष्टाः साङ्गेऽपि रूपके। (छ)

तत्रैकदेशविवर्त्ति श्लिष्टं यथा मम—

"करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य।
विकसितकुमुदेक्षणं विचुम्बत्ययममरेशदिशो मुखं सुधांशुः॥" (ज)

मरवारिः, समिति युद्धे विजयते सर्वोत्कर्षेण वर्त्तते। "सौविदल्लाः कञ्चुकिनः" "समित्याजिसमिद्युधः" इति चामरः।

(ङ) उदाहृते एकदेशविवर्त्ति परम्परितरूपकं समर्थयितुमाह अत्रेति। आर्थं तात्पर्यवशाल्लभ्यः। निमित्तमिति। छायां महिषीत्वारोपं विना खड्गे सौविदल्लत्वारोपस्य तयोः सादृश्याभावेनासम्भवादित्याशयः। अत्र तु—

"खड्गः क्ष्मासौविदल्लो जयति परिचरन्नुत्करो मालवस्य।"

इति पाठे—मालवस्य मालवदेशाधिपतेः। उच्छिन्नः करः किरणा एव करो हस्तो येन सः। तथा परिचरन् सर्वतः सञ्चरन्निव परिचरन् परिचर्य्यां कुर्वन् इत्येवमर्थे च परम्परितश्लिष्टसाङ्गैकदेशविवर्त्ति-रूपकयोरेकाश्रयानुप्रवेशरूपः सङ्कर एवेति द्रष्टव्यम्।

(च) अस्येति। एकदेशविवर्त्तिपरम्परितरूपकप्रकारस्येत्यर्थः। मृग्यमन्वेष्यम्। यथा—

"कन्दर्पदेवस्य सितातपत्रं श्रीखण्डचित्रं हरितो मनोज्ञम्।
विराजते व्योमसरोजमेतत् कर्पूरपूरप्रभमिन्दुबिम्बम्॥"

अत्र कन्दर्पदेवे राजत्वारोपः, हरिति (दिशि) अङ्गनात्वारोपः; व्योम्नि सरोवरत्वारोपश्च आर्थः चन्द्रबिम्बे शाब्दं सितातपत्रत्वारोपं श्रीखण्डचित्रत्वारोपं सरोजत्वारोपञ्च प्रति निमित्तमिति एकदेशविवर्त्ति मालारूपं परम्परितरूपकम्।

(छ) उक्तवृत्तिसन्दर्भेण परम्परितरूपके एकदेशविवर्त्तिताख्यां साङ्गरूपकच्छायां प्रदर्श्य इदानीं साङ्गरूपकेऽपि श्लिष्टशब्दनियन्त्रणलक्षणां परम्परितरूपकच्छायां प्रदर्शयितुमाह दृश्यन्त इति। न केवलं परम्परिते रूपके, किन्तु साङ्गे रूपकेऽपि क्वचित् आरोप्या आरोपणीयोपमानवाचकाः शब्दाः, श्लिष्टा अनेकार्थाः, दृश्यन्ते अतो लक्षणादीनां लक्ष्यानुसारित्वादिदमप्यङ्गीकरणीयमेवेति भावः।

(ज) करमिति। अयं सुधांशुश्चन्द्रः, अमरेशदिशः इन्द्राधिपतिकायाः पूर्वस्या दिशः गलितं व्रीडया-दैवापसृतं तमःपटलमन्धकारसमूह एव अंशुकं वसनं यस्मात्तादृशे उदयमहीधरे उदयपर्वत एवोन्नत-पीवरत्वात् स्तनस्तस्य अग्रे उपरिभागे, करं मयूखमेव करं हस्तम्, निवेश्य विन्यस्य, विकसितं स्फोटयेनानन्देन च प्रकाशितं कुमुदमेव ईक्षणं चक्षुर्यत्र तत्तादृशम्, मुखमाद्यभागमेव मुखं वदनम्, विचुम्बति स्पृशति निजवदनेन संयोजयति च।

---

(१) हेतुरिति पाठान्तरम्।

समस्तवस्तुविषयं यथा अत्रैव—"विकसित" इत्यादौ चुचुम्बे, "हरिदबलामुखमिन्दुनायकेन" इति पाठे (झ)।

न चात्र श्लिष्टपरम्परितम्, तत्र हि "भूभृदावलीदम्भोलिः" इत्यादौ राजादौ पर्वतत्वादिरूपणं (१) विना वर्णनीयस्य राजादेर्दम्भोलितादिरूपणं (२) सर्वथैव सादृश्यासम्भवादसङ्गतम् (ञ)। तर्हि कथं "पद्मोदयदिनाधीशः" इत्यादौ परम्परितम्, राजादेः सूर्यादिना सादृश्यस्य तेजस्वितादिहेतुकस्य सम्भवादिति न वाच्यम्; तथाहि, राजादेस्तेजस्वितादिहेतुकं सुव्यक्तं

अत्र नायकरूपं सुधांशुरश्मी तमःपटलांशुकगलनादीनि च तदङ्गतया विवक्षितानीति साङ्गरूपकत्वम्; तथा तमःपटले अंशुकत्वाद्यारोपाः शाब्दाः, अपरदिशि नायिकात्वारोपः सुधांशौ नायकत्वारोपश्च आर्थ इत्येकदेशविवर्त्तिता; कर-मुखशब्दौ च श्लिष्टाविति श्लिष्टशब्दनिबन्धनत्वम्; इत्यतः श्लिष्टशब्दनिबन्धनैकदेशविवर्त्तिरूपं साङ्गरूपकमलङ्कार इत्याशयः।

(झ) कारिकायां "साङ्गेऽपि रूपके" इति साङ्गरूपकसामान्याभिधानात् तदन्तर्गतावुभावपि भेदौ श्लिष्टशब्दनिबन्धनयोग्यत्वे विषयीकरोतीत्याशयेनाह समस्तेति। अत्रैव "करमुदय—" इत्यादिश्लोक एव। इत्यादौ भागे इत्यर्थः। तथा च—

"विकसितकुमुदेक्षणं चुचुम्बे, हरिदबलामुखमिन्दुनायकेन।"

इत्येवं द्वितीयार्द्धपाठकल्पने इत्यर्थः। ईदृशपाठे तु प्रागुक्तहेतुतः सर्वेषामेवारोपाणां शाब्दत्वाच्छ्लिष्टशब्दनिबन्धनं समस्तवस्तुविषयं साङ्गरूपकं स्यादित्यभिप्रायः।

(ञ) आशङ्काविशेषमुत्थाप्य तन्निरस्यति न चेति। अत्र "करमुदय—" इत्यादिश्लोके, किरणादौ हस्तत्वाद्यारोपस्य महीधरादौ स्तनत्वाद्यारोपं प्रति कथमपि कारणत्वात् श्लिष्टपरम्परितं रूपकमिति वाच्यं न इत्यर्थः। हि यस्मात्। तत्र श्लिष्टपरम्परितविषये राजादौ विपक्षनृपादौ। दम्भोलितादिरूपणं वज्रत्वाद्यारोपः सादृश्यासम्भवात् वज्रादिना सह वर्णनीयस्य राजादेरित्यर्थः।

(ट) उक्तयुक्तौ पूर्वापरयोरसामञ्जस्यसन्देहस्य निरासाभिप्रायेण "तत्र हि—सादृश्यासम्भवादसङ्गतम्। इह तु महीधरादिः" इत्याद्यंशग्रन्थस्य मध्य एव आशङ्कान्तरमवतार्य तदपि निरस्यति तर्हीति। तेजस्वितादीत्यादिपदेन सर्वाभिभावितादेर्ग्रहणम्। सम्भवादिति। तथा च तेजस्वितादिहेतुकसादृश्येनैव राजादौ सूर्यत्वाद्यारोपस्य, घटिततया कारणान्तरानपेक्षत्वादुभयारोपणं परस्परकार्यकारणभावाभावेन कथं "पद्मोदय-दिनाधीशः" इत्यादौ परम्परितरूपकमिति भावः। न तु नहि। प्रकृते "पद्मोदयदिनाधीशः" इत्यादौ। विवक्षितमिति। तथात्वे तु परस्परसंस्रवाभावेन पद्मोदयपदप्रयोगस्य उन्मत्तप्रलापत्वप्रसङ्ग इति भावः। द्वयो राजसूर्ययोः। विवक्षितत्वादिति। अत्रायमाशयः—सूर्यो यथा प्रकाशकरणेन पद्मानामभ्युदयं करोति, वर्णनीयो राजापि तथैव विपक्षान् विजित्य धनाद्यर्जनेन पद्मायाः अभ्युदयं करोति; इत्येव हि कविना

---

(१) पर्वतत्वाद्यारोपमिति पाठान्तरम्। (२) दम्भोलितादिरूपाणामित्यसङ्गतः पाठः क्वचित्।

सादृश्यं न तु प्रकृते विवक्षितम्, पद्मोदयादेरेव द्वयोः साधारणधर्म्मतया विवक्षितत्वात् (ट)। इह तु महीधरादेः स्तनादिना सादृश्यं पीनोत्तुङ्गत्वादिना सुव्यक्तमेवेति न श्लिष्टपरम्परितम् (ठ)।

क्वचित् समासाभावेऽपि रूपकं दृश्यते (ड)। यथा—

"मुखं तव कुरङ्गाक्षि! सरोजमिति नान्यथा।" (ढ)

क्वचिद्वैयधिकरण्येऽपि (ण)। यथा—

"विदधे मधुपश्रेणीमिह भ्रूलतया विधिः॥" (त)

क्वचिद्वैधर्म्येऽपि। यथा—

विवक्षितोऽर्थः। तेन च पद्मोदय एव द्वयो राजसूर्य्ययोः साधारणधर्म्मः। एवम्, इन्द्रस्य वज्रो यथा पर्वतान् विमर्द्दितवान्, वर्णनीयो राजापि तथैव विपक्षराजान् विमर्द्दयति; इत्येव च कविना विवक्षितोऽर्थः। तेन च भूभृद्विमर्द्दनमेव द्वयो राजवज्रयोः साधारणधर्म्मः। एवञ्च पूर्वारोपान् विना परारोपा न सम्भवन्तीत्युभयारोपाणामेव परस्परकार्य्यकारणभावसद्भावात् "भूभृदावलिदम्भोलिः" "पद्मोदयदिनाधीशः" इत्युभयथापि श्लिष्टपरम्परितत्वे न किञ्चिदसामञ्जस्यमिति।

(ठ) प्रपञ्चशेषमाह इह त्विति। "करमुदय—" इत्यादौ श्लोके त्वित्यर्थः। सुव्यक्तमेवेतीति। तथा च तादृशं सादृश्यमेव महीधरादौ स्तनत्वाद्यारोपं घटयतीति। किरणादौ हस्तत्वाद्यारोपस्य तत्कारणतया नापेक्षेति न श्लिष्टपरम्परितं रूपकमित्यर्थः। एतेन यत्र आरोपं स्वोत्पत्तौ सादृश्यमात्रमपेक्षते तत्र साङ्गं रूपकम्, यत्र तु विवक्षितसादृश्यासम्भवेन आरोपान्तरमपेक्षते तत्र परम्परितमिति सूचितम्।

(ड) इदानीं रूपकस्य विषयविशेषेषु कादाचित्कं सद्भावं क्रमादाह क्वचिदिति। प्रायेण सर्व्वत्रैव समाससद्भावे, क्वचित् समासाभावेऽपीत्यर्थः। एतेन "समस्तं व्यस्तमुभयं सविशेषणमित्यपि" इति सरस्वतीकण्ठाभरणादौ व्यस्तसमस्तयोः सामान्यतोऽभिधानं कदाचित्कमिति बोध्यम्। एवमुत्तरत्रापि।

(ढ) मुखमिति। "अधरः पल्लवदलं मृणालञ्च भुजद्वयम्॥" इति मत्पूरितपरार्द्धम्।

अत्र समासाभावेऽपि मुखे सरोजत्वारोपात् निरङ्गं केवलं रूपकम्।

(ण) क्वचिदिति। वैयधिकरण्यमत्र भिन्नविभक्तिकत्वम्। अतश्च "भ्रूलतयेत्यभेदे तृतीया अन्यथा तादात्म्यारोपो न स्यात्।" इति सुष्ठूक्तं तर्कवागीशेन।

(त) विदध इति। "नवं सरसिजं फुल्लं चकार वदनेन यत्।" इति मत्पूरितपूर्वार्द्धम्।

विधिर्विधाता इह वदनसरसिजे भ्रूलतया मधुपश्रेणीं भ्रमरपङ्क्तिं विदधे निर्म्ममौ। अत्रापि भिन्नविभक्तिकपदोपस्थाप्यायां भ्रूलतायां मधुपश्रेणीत्वारोपात् निरङ्गं केवलं रूपकम्।

अवच्छेदभेदेनैकस्यानेकधा रूपणेऽपि रूपकमेव। यथा मम विराजसरोजिनीनाटिकायाम्—

"शशिकला सकला तनुमण्डले नयनयोरनयोरसितोत्पले।

विकसितञ्च सितं कमलं मुखे समुदये च सुवर्णलता मता॥"

"सौजन्याम्बुमरुस्थली सुचरितालेख्यद्युभित्तिर्गुण-
ज्योत्स्नाकृष्णचतुर्दशी सरलतायोगश्वपुच्छच्छटा।
यैरेषापि दुराशया कलियुगे राजावली सेविता
तेषां शूलिनि भक्तिमात्रसुलभे सेवा कियत् कौशलम्॥" (थ)

इदं मम। अत्र च केषाञ्चिद्रूपकाणां शब्दश्लेषमूलत्वेऽपि रूपक-विशेषत्वादर्थालङ्कारमध्ये गणनम् (द)।

एवं वक्ष्यमाणालङ्कारेषु बोद्धव्यम् (ध)।

(थ) सौजन्येति। सौजन्यं सज्जनत्वं एवाम्बु जलं तत्र मरुस्थली मरुभूमिः, मरुभूमिर्यथा जलशून्या राजावल्यपि तथैव सौजन्यशून्येति भावः। सुचरितं सच्चरित्रमेव आलेख्यं चित्रं तत्र द्युभित्तिराकाशभित्तिः, आकाशे यथा चित्रं कर्तुं न शक्यते राजावल्यामपि तथैव सुचरितमुदाहर्तुं न शक्यते इत्याशयः। गुणो दयादाक्षिण्यादिरेव ज्योत्स्ना तत्र कृष्णा कृष्णपक्षीया चतुर्दशी; कृष्णचतुर्दश्यां ज्योत्स्ना यथा उदितमात्रैव विलुप्यते न तु लोकैर्दृश्यते, राजावल्यामपि दयादाक्षिण्यादिर्गुणस्तथैव उदितमात्र एव विलुप्यते, न पुनर्लोकैरनुभूयत इत्यभिप्रायः। गुणः खलु राजावल्यां मानुषस्वभावात् कदाचित् किञ्चिदुत्पद्यत एव न तु तिष्ठतीति सूचनाय अमावस्येत्यनुक्त्वा 'चतुर्दशी'त्युक्तम्। सरलतायोगे ऋजुतासम्पर्के सरलव्यवहार इत्यर्थः। श्वपुच्छच्छटा कुक्कुरलाङ्गूलस्वरूपा, कुक्कुरलाङ्गूल इव राजावल्यां सरलताया लेशोऽपि नास्तीति भावः। एषा एवम्भूतापि कलियुगे राजावली कलियुगीयनृपतिश्रेणी, दुराशया दुष्टधनलाभलोभिन यैः सेविता, तेषां जनानां भक्तिमात्रेणैव सुलभे शूलिनि महादेवे महादेवस्येत्यर्थः सेवा आराधनं कियत् कौशलं कीदृक्-कौशलसाध्या? अपि तु कौशलसाध्यैव न अतीवानायाससाध्यैवेत्यर्थः। अतस्त्वाहशराजावलीसेवामपहाय हरिसेवैव विधेयेति भावः।

अत्र मरुस्थल्याम्बुनः, द्युभित्तावालेख्यस्य, कृष्णचतुर्दश्यां ज्योत्स्नायाः, श्वपुच्छे च सरलतायाः, असम्भवान्मरुस्थल्यादिषु अम्बुप्रभृतीनां विधर्मत्वमुन्नेयम्। तेन प्रथमविशेषणत्रये अश्लिष्टशब्दनिबन्धनं माला-रूपं परम्परितरूपकम्; चतुर्थविशेषणे च निरङ्गं केवलं रूपकम्।

(द) ननु "राजमण्डलराहवे" इत्यादीनां श्लिष्टपरम्परितरूपकाणां "करमुदयमहीधरस्तनाग्रे" इत्यादीनाञ्च श्लिष्टशब्दनिबन्धनानां साङ्गरूपकाणां शब्दश्लेषघटितत्वात् शब्दालङ्कारमध्य एव गणनमुचितमित्याह अत्रेति। रूपकविशेषत्वादर्थालङ्कारतया प्रसिद्धस्य रूपकस्य प्रकारविशेषत्वात्। तथा च अवयविनोऽर्थालङ्कारतया प्रसिद्धौ तदवयवविशेषस्यापि अर्थालङ्कारतयैव प्रसिद्धेरौचित्यात् सुधीसमाजे कस्यचिन्मूर्खस्यापि दृष्टान्तेनैवेति भावः। एतेन श्लिष्टपरम्परितरूपकादौ शब्दार्थोभयालङ्कारत्वमेव वास्तविकमिति सूचितम्। सरस्वतीकण्ठाभरणे त्वेषामुभयालङ्कारत्वेनैव गणनं दृश्यते। यथा—

"शब्देभ्यो यः पदार्थेभ्य उपमादिः प्रतीयते। विशिष्टोऽर्थः कवीनां स उभयालङ्क्रिया मता॥
उपमा रूपकं साम्यं संशयोक्तिरपह्नुतिः।" इत्यादि।

४९ । अधिकारूढवैशिष्ट्यं रूपकं यत्तदेव तत् । (न)

तदेव अधिकारूढवैशिष्ट्यसंज्ञकरूपकम् (१) । यथा मम—

"इदं वक्त्रं साक्षाद्विरहितकलङ्कः शशधरः
सुधाधाराधारश्चिरपरिणतं बिम्बमधरः ।
इमे नेत्रे रात्रिन्दिवमधिकशोभे कुवलये
तनुर्लावण्यानां जलधिरवगाहे सुखतरः ॥" (प)

अत्र कलङ्कराहित्यादिना अधिकं वैशिष्ट्यम् (फ) ।

(ध) एवमिति । वक्ष्यमाणेषु श्लेषमूलकेषु अपह्नुतिव्यतिरेकादिषु । इदमुपलक्षणम् । उक्तायां शब्दश्लेषमूलायां पूर्णोपमायामप्येवं योजनीयम् । तेन सरस्वतीकण्ठाभरणे उपमापदं पूर्णोपमापरम् ।

(न) निरुक्तभेदसमुदायविलक्षणम् अधिकारूढवैशिष्ट्यं नाम रूपकं तदेव लक्षयति अधिकेति । यद् रूपकं अधिकमत्यन्तम् आरूढं स्वस्मिन्नधिरूढं वैशिष्ट्यं चमत्कारिता यस्मिन्, तत्तादृशं भवति ; तद् रूपकं तदेव अधिकारूढवैशिष्ट्यसंज्ञकमेव भवतीत्यर्थः । उपमाने उपमेये वा सन्तमपि यं कञ्चिद्धर्मनवरोप्य असन्तमपि च यं कञ्चिद्धर्ममारोप्य वा रूपक एवेदं वैशिष्ट्यमधिकमारूढं भवतीति द्रष्टव्यम् ।

(प) इदमिति । इदमवलोक्यमानं नायिकाया वक्त्रं मुखम्, विरहितकलङ्कः साक्षात् सन्निधान-प्रत्यक्षगोचरः शशधरश्चन्द्रः । सुधाधाराया अमृतप्रवाहस्य आधार आश्रयः अधर ओष्ठः, चिरपरिणतं चिरेण परिपक्वं बिम्बं बिम्बफलम् । इमे दृश्यमाने नेत्रे, रात्रिन्दिवमहोरात्रमेव अधिका शोभा ययोस्तादृशे कुवलये नीलोत्पलद्वयम् । तथा तनुर्देहः, अवगाहे अवगाहने सुखतरः सातिशयसुखजनकः, लावण्यानां जलधिः समुद्रः ।

(फ) अत्रेति । आदिपदेन सुधाधाराधारत्वादेर्ग्रहणम् । तथा च उपमाने शशधरे सन्तमपि कलङ्क-मनवरोप्य मुखे तस्य रूपणम् । अधरे उपमेये असन्तमपि सुधाधाराधारत्वधर्ममारोप्य, तथा कन्यानधिरु-परमेव परिचितियोग्ये बिम्बे उपमाने असन्तमपि चिरपरिणतत्वधर्ममारोप्य तत्र तस्य रूपणम् । तथा रात्र-वेवाधिकशोभे कुवलये उपमाने असन्तमपि रात्रिन्दिवमधिकशोभत्वधर्ममारोप्य नेत्रे तस्य रूपणम् । एवमुप-माने जलधौ असन्तमपि लावण्यसम्बन्धमारोप्य तनौ तस्य रूपणम् । कण्ठाभरणकारस्तु "परम्पराऽथ रश-नामाला रूपकरूपकम्" इत्याचक्षाणो रशनारूपकं नाम रूपकान्तरमङ्गीकुर्वन्निदमुदाजहार—

"किसलयकरैर्लतानां करकमलैः कामिनीं मनो जयति ।
नलिनीनां कमलमुखैर्मुखेन्दुभिर्योषितां मदनः ॥"

काव्यप्रकाशकारस्तु—"इत्यादि रशनारूपकं न वैचित्र्यवदिति न लक्षितम्" इत्यभिदधानस्तदिदं न मन्यते । दर्पणकारस्याप्यत्र तूष्णीम्भावादिदमनभिमतमेवेति मन्तव्यम् ।

---

(१) ...संज्ञरूपकम्...संज्ञकम्, इति पाठभेदौ ।

५० । विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि ।
परिणामो भवेत्तुल्यातुल्याधिकरणो द्विधा ॥ (व)

आरोप्यमाणस्यारोपविषयात्मतया परिणमनात् परिणामः (भ)। यथा—

"स्मितेनोपायनं दूरादागतस्य कृतं मम ।
स्तनोपपीड़माश्लेषः कृतो द्यूते (१) पणस्तया ॥" (म)

अन्यत्रोपायनपणौ वसनाभरणादिभावेनोपयुज्येते, अत्र तु नायक-सम्भावन-द्यूतयोः स्मिताश्लेषरूपतया (य)। प्रथमार्द्धे वैयधिकरण्येन प्रयोगः, द्वितीये सामानाधिकरण्येन (र)।

(व) रूपकनिरूपणानन्तरं तत्सजातीयतया परिणामालङ्कारं निरूपयति विषयेति। आरोप्ये आरोपणीये पदार्थे उपमाने इति यावत्, विषयात्मतया आरोपविषयतादात्म्येन उपमेयाभिन्नत्वेन हेतुना, प्रकृतार्थस्य प्रस्तुतविषयस्य उपयोगिनि साधनोपयोगिनि सति, परिणामो नामालङ्कारो भवेत्।

तथा च प्रस्तुतविषयसाधनोपयोगितया उपमेये उपमानाभेदारोपः परिणाम इत्यर्थः। स च द्विधा—तुल्याधिकरणः, अतुल्याधिकरणश्चेति। तत्र उपमानोपमेययोः समानविभक्तिकत्वं तुल्याधिकरणत्वम्, असमानविभक्तिकत्वञ्च अतुल्याधिकरणत्वम्। रूपकेण सहास्य भेदस्तु प्रागेव दर्शितः, वृत्तौ चात्र दर्श्यते।

(भ) परिणामशब्दस्य व्युत्पत्तिमाह आरोप्येति। आरोप्यमाणस्य उपमानस्य, आरोपविषयात्मतया उपमेयरूपत्वेन परिणमनात् पर्य्यवसितत्वात्। एवञ्च परिपूर्वकनमधातोर्भावे घञिति दर्शितम्।

(म) स्मितेनेति। सख्युरन्तिके निजप्रियतमाया व्यवहारवर्णनेयम्। तया प्रियतमया स्मितेन ईषद्धास्येन, दूरादागतस्य मम उपायनमुपहारः कृतम्। तथा द्यूते पाशक्रीड़ायाम्, स्तनाभ्यामुपपीड्येति स्तनोपपीड़म्, "उपपीड़रुधकर्षश्च" इति णम्। आश्लेष आलिङ्गनम्, पणः कृतः। दूरादागताय जनाय बन्धुजनेन यः कश्चिदुपहारो दीयत इति, पाशक्रीड़ायाञ्च यः कश्चित् पणो रच्यत इति च लौकिकी रीतिः। एवञ्च दूरादागते मयि प्रियतमया मे ईषद्धास्यरूप एव स उपहारो दत्तः, तथा "पाशक्रीड़ायां मया हारिते स्तनोपपीड़मालिङ्गनं दातव्यम्" इत्युक्त्वा पाशक्रीड़ायां स्तनोपपीड़ालिङ्गनरूप एव पणो रचित इति सरलार्थः।

तेनात्र उपमेयभूते स्मिते उपमानभूतोपायनाभेदारोपस्य प्रकृतनायकाभ्यर्थनासाधनोपयोगित्वात् उपमेयभूते तादृशालिङ्गने च उपमानभूतपणाभेदारोपस्य प्रकृतद्यूतक्रीड़ासाधनोपयोगित्वाच्च परिणामालङ्कारः।

तथा "कृतम्" "कृतः" इति कृतशब्दस्यैव द्विःपाठात् कथितपदतादोषः। अस्मादेव च कथितपदतादोषभयात् "कृतः" इत्यत्र "ततः" इति पाठं कल्पयतो रामचरणस्य नूपुरपूरणाय खञ्जचरणे चरणान्तरयोजनचेष्टा किमभीष्टाऽऽसीत्?। इदानीन्तननिखिलपुस्तकेष्वेव कृत इति पाठदर्शनात् तत इति कल्पनैव प्रतीयते।

(य) उपलक्ष्ये लक्षणं सङ्गमयितुमाह अन्यत्रेति। उदाहृतेतरस्थल इत्यर्थः। वसनाभरणादि-

---

(१) ततो द्यूते इति तर्कवागीशकल्पितः पाठः।

रूपके "मुखचन्द्रं पश्यामि" इत्यादौ आरोप्यमाणचन्द्रादेरुपरञ्जकतामात्रम्, न तु प्रकृते दर्शनादावुपयोगः । इह तु उपायनादेर्विषयेण तादात्म्यम्, प्रकृते च नायकसम्भावनादावुपयोगः । अतएव रूपके आरोप्यस्यावच्छेदकत्वमात्रेणान्वयः, अत्र तु तादात्म्येन (ल) ।

"दासे कृतागसि" इत्यादौ रूपकमेव, न तु परिणामः, आरोप्यमाणकण्टकस्य पादभेदनकार्य्यस्याप्रस्तुतत्वात् (व) । न खलु तत् कस्यचिदपि प्रस्तुतकार्य्यस्य घटनार्थमनुसन्धीयते (श) ।

भावेन वस्त्रालङ्कारादिरूपत्वेन, उपयुज्येते लोकसम्भावन-द्यूतक्रीड़योः साधनोपयोगिनौ भवतः । अत्र तु "स्मितेनोपायनं दूरात्" इत्यादौ तु, नायकसम्भावनद्यूतयोः नायकाभ्यर्थन-पाशक्रीड़योः, स्मिताक्षेपरूपतया उपयुज्येते इति पूर्वेणान्वयः । अत्र उपायनपणौ यथाक्रमं स्मिताक्षेपरूपतया प्रकृतयोर्नायकसम्भावन-द्यूतयोः साधनोपयोगिनौ भूताविति समुदायार्थः । अतएवोक्तलक्षणसङ्गतिरित्याशयः ।

(र) ननु परिणामोऽयं कुत्र तुल्याधिकरणः कुत्र वा अतुल्याधिकरण इत्याह प्रथमेति । वैयधिकरण्येनेति । "स्मितेनोपायनम्" इत्युपमेयोपमानयोः परस्परं भिन्नविभक्तिकत्वादिति भावः । द्वितीये अर्द्धे । वैयधिकरण्येनेति । "आक्षेपः पणः" इत्युपमेयोपमानयोः समानविभक्तिकत्वादित्याशयः ।

(ल) इदानीं रूपक-परिणामयोर्भेदमाह रूपक इति । आरोप्यमाणस्य मुखेन सह अभेदारोपे उपमानीक्रियमाणस्य चन्द्रादेः, उपरञ्जकतामात्रम् अभेदारोपात् मुखादौ केवलसौन्दर्य्यप्रतिपादकत्वम् । दर्शनादावुपयोगो दर्शनादिसाधनोपयोगित्वम्, मुखादौ चन्द्राद्यभेदारोपं विनापि दर्शनसम्भवादिति भावः । इह तु स्मितेनेत्यादौ परिणामस्थले तु । विषयेण उपमेयेन स्मितेन आक्षेपेण च सहेत्यर्थः, तादात्म्यम् अभिन्नत्वम्, प्रकृते प्रस्तुते, नायकसम्भावनादौ नायकसंवर्द्धन-द्यूतपणयोः, उपयोगः साधनोपयोगित्वम् । अतएव रूपक इत्याद्युक्तयुक्तेरेव, आरोप्यस्य आरोपणीयस्य चन्द्रादेरुपमानपदार्थस्य, अवच्छेदकमात्रेण इतरव्यावर्त्तकत्वमात्रेण, अन्वय उपमेयभूतमुखादावभेदसम्बन्धः, अत्र तु परिणामे तु, तादात्म्येन प्रकृतविषय-साधनोपयोगितया अभेदेन, अन्वय इति सम्बध्यते ।

अत्रायमाशयः—"मुखचन्द्रं पश्यामि" इत्यादौ रूपके उपमेयभूतमुखादौ सादृश्यवशादभेदेनारोप्यमाणोऽपि चन्द्रादिरुपमानपदार्थो वस्तुत एवाभिन्नो न प्रतीयते किन्तु कुत्सितमुखादिभ्यवर्त्तकतया सुन्दरादि-विशेषणवदेवावगम्यते ; "स्मितेनोपायनम्" इत्यादौ परिणामे तु स्मितोपायनादिरुभयपदार्थ एव अभेदारोपवशात् नायकसंवर्द्धनादिरूपैककार्य्यकारित्वाच्च वस्तुत एवाभिन्न इव प्रतीयत इति ।

अलङ्कारशेखरकारस्तु मन्यते—यत्रोपमानप्रतियोगिकाभेदप्रतीतिस्तत्र रूपकम्, यत्र तूपमेयप्रतियोगिकाभेदप्रतीतिस्तत्र परिणाम इति ।

(व) अथ तर्हि "दासे कृतागसि" इत्यादौ पुलकाङ्कुरे आरोप्यमाणस्य कण्टकस्य प्रस्तुतपादभेदनकार्य्य-साधकत्वात् परिणामस्यैव सम्भवे कथमस्य रूपके उदाहरणमित्याह दास इति । आरोप्यमाणकण्टकस्य यत् पादभेदनकार्य्यं तस्याप्रस्तुतत्वादित्यर्थः । मानिन्या मानभङ्गाय नायकानुनयनस्यैव तत्र प्रस्तुतत्वादित्याशयः ।

अयमपि रूपकवदधिकारूढवैशिष्ट्ये दृश्यते (प)। यथा—

"वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः॥" (त)

अत्र प्रदीपानामोषध्यात्मतया प्रकृते सुरतोपयोगिन्यन्धकारनाशे उपयोगः, अतैलपूरत्वेनाधिकारूढवैशिष्ट्यम् (द)।

५१। सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः।
शुद्धो निश्चयगर्भोऽसौ निश्चयान्त इति त्रिधा॥ (ध)

(अ) ननु प्रस्तुतघटकस्यापि प्रस्तुतत्वमेवेत्याह न खल्विति। तत् पादभेदनकार्थम्। अपि-
...दस्य घटनार्थमिति परिणान्वयः। तथा च घटनार्थमपि सम्पादनार्थमपि जातमिति न खल्वनुसन्धीयते
...नुसन्धयापि नैवावगम्यते। तथा हि, अत्रानुनय एव प्रस्तुतः, तद्घटकन्तु पादपतनमेतादृग्वाक्यस ;
...दभेदनन्तु प्रत्युतदुःखजनकत्वादनुनयप्रतिबन्धकमेवेति पादभेदनस्य प्रस्तुतघटकतयापि न प्रस्तुतत्वमिति
...वः।

(प) अयमिति। परिणामोऽपीत्यर्थः। अस्यापि पूर्ववदेवाधिकारूढवैशिष्ट्यलक्षणमूह्यम्।

(त) वने इति। कुमारसम्भवप्रथमसर्गे हिमालयवर्णनमिदम्। यत्र हिमालये, रजन्यां दरीगृहोत्-
...सङ्गेषु गुहागृहाभ्यन्तरेषु निषक्ताः संलग्ना भासो दीप्तयो यासां तास्तथाविधा ओषधयो लताविशेषाः, वनिता-
...सखानां सस्त्रीकाणां वनेचराणां किरातानाम्, अतैलपूरास्तैलपूरणशून्याः सुरतप्रदीपा रमणसाधकदीपा
...भवन्ति।

(द) अत्रेति। प्रदीपानाम् ओषधिष्वभेदेनारोप्यमाणानामित्यर्थः, ओषध्यात्मतया ओषधि-
...रूपतया हेतुना। सुरतोपयोगिनि रतावावश्यके। उपयोगस्तत्साधनोपयोगित्वम्। अतएवात्र परिणामो-
...लङ्कार इत्याशयः। ननु तथाप्यधिकारूढवैशिष्ट्यं कुत इत्याह अतैलेति। उपमाने प्रदीपे
...ऽसम्भवदपि तैलपूरत्वधर्म्मनवरोप्य तस्य रूपणादिति भावः।

(ध) अथ खलूपमानोपमेयघटितालङ्कारप्रकरणत्वादिदानीमुपमेये उपमानसंशयघटितं सन्देहा-
...लङ्कारं लक्षयति सन्देह इति। प्रकृते उपमेये, प्रतिभोत्थितः कविप्रौढोक्तिमात्रनिष्पन्नः, न पुनः पदार्थ-
...स्वभावसिद्ध इत्यर्थः, अन्यस्य उपमानस्य संशयः सन्देहो नामालङ्कारो भवेदित्यनुषज्यते। तुल्यरूपेणोभय-
...पक्षज्ञानं संशयः, एकपक्षाधिक्येन उभयपक्षज्ञानं सम्भावना। तेन सम्भावनारूपायामुत्प्रेक्षायां नाति-
...व्याप्तिः। "ससन्देहस्तु भेदोक्तौ तदनुक्तौ च संशयः" इति काव्यप्रकाशे "अनन्वयससन्देहौ उपमास्वेव
...दर्शितौ" इति काव्यादर्शे च ससन्देह इति नामदर्शनेऽपि "उपमानोपमेयसंशयः सन्देहः" इति प्राचीनतम-
...वामनसूत्रे सन्देह इति नामदर्शनात् ससन्देह इति नामापेक्षया लाघवाच्च सन्देह इति नामनिर्द्देशः। असौ
सन्देहस्त्रिधा—शुद्धः, निश्चयगर्भः, निश्चयान्तश्चेति।

यत्र संशय एव पर्य्यवसानं स शुद्धः (क)। यथा—

"किं तारुण्यतरोरियं रसभरोद्भिन्ना नवा वल्लरी ?
वेलाप्रोच्छलितस्य किं लहरिका लावण्यवारां निधेः ?।
उद्गाढ़ोत्कलिकावतां स्वसमयोपन्यासविस्रम्भिणः
किं साक्षादुपदेशयष्टिरथवा देवस्य शृङ्गारिणः ?॥" (ख)

यत्रादावन्ते च संशय एव मध्ये च निश्चयः, स निश्चयमध्यः (ग)। यथा—

"अयं मार्त्तण्डः किम् ? स खलु तुरगैः सप्तभिरितः,
कृशानुः किम् ? सर्वाः प्रसरति दिशो नैष नियतम्।
कृतान्तः किं साक्षात् ? महिषवहनोऽसाविति चिरं (१)
समालोक्याजौ त्वां विदधति विकल्पान् प्रतिभटाः॥" (घ)

(क) यत्रेति। संशये सत्येव, पर्य्यवसानं वाक्यसमाप्तिः। शुद्धः केवल इत्यभिन्नोऽर्थः।

(ख) किमिति। काञ्चित् सुन्दरीमवलोक्य कस्यचिदुक्तिरूपः श्लोकोऽयं यन्नुकविकृतः। इयं दृश्यमाना तरुणी, तारुण्यं यौवनमेव तरुस्तस्य, रसभरेण क्षीरातिशयेन शृङ्गारातिशयेन च उद्गता नवा नूतना वल्लरी मञ्जरी किम् ?। युवतिरियं यौवनोच्चसीमारूढ़ेत्यर्थः। वेलायां तीरे प्रोच्छलितस्य पूरातिरेकादुच्छितस्य, लावण्यवारां निधेर्लावण्यसमुद्रस्य लहरिका तरङ्गः किम् ?। अतीवलावण्यवतीयमिति तात्पर्य्येम्। अथवा उद्गाढ़ा सातिशया उत्कलिका, प्रियतमासङ्गमार्थोत्कण्ठा एषामस्तीति तेषां जनानां सम्बन्धे स्वसमये निजप्रवर्त्तितव्यवहारस्य उपन्यासे प्रचारे विस्रम्भिणः प्रणयिनः अभिलाषिण इत्यर्थः. शृङ्गारिणो देवस्य कामदेवस्य, साक्षात् उपदेशयष्टिः शिक्षादण्डः किम् ?। यथा पाठशालायां शिक्षकमहाशयः शिक्षादण्डप्रदर्शनेन स्वप्रवर्त्तितव्यवहारे शिशुच्छात्रान् प्रवर्त्तयति, तथा कामदेवोऽपि अस्याः प्रदर्शनेन स्वप्रवर्त्तितव्यवहारे कामिजनान् प्रवर्त्तयतीति भावः।

अत्र उपमेयभूतायां सुन्दर्य्याम् उपमानभूतानां तादृश-वल्लरी-लहरिकोपदेशयष्टीनां संशयात् तस्मिन् सत्येव च वाक्यसमाप्तेः शुद्धसन्देहोऽलङ्कारः।

(ग) यत्रेति। यस्मिन् पद्ये गद्ये वेत्यर्थः। दक्षिणेन चक्षुषा पश्यतीत्युक्ते वामेन न पश्यतीति प्रतीतिवत् निश्चयगर्भ इत्युक्ते आदावन्ते च संशय इति प्रतीतेः स्वाभाविकत्वादाह आदावित्यादि। गर्भशब्दस्य मध्यार्थकत्वादाह निश्चयमध्य इति।

(घ) अयमिति। कस्यचिद्राज्ञः प्रशंसेयम्। अयं दृश्यमानः पदार्थः किं मार्त्तण्डः सूर्यः ! इति संशयः। स खलु मार्त्तण्डः सप्तभिस्तुरगैरश्वैः इतो गतो भवति, अयन्तु एकेनैव तुरगेण गत इति नायं मार्त्तण्ड इति पुनर्निश्चयः। तर्हि किं कृशानुर्वह्निः ? इति संशयः। एष कृशानुः नियतं

(१) पुनरिति पाठान्तरम्।

अत्र मध्ये मार्त्तण्डाद्यभावनिश्चयः, राजनिश्चये द्वितीयसंशयोत्थानासम्भवात् (ङ)।

यत्रादौ संशयः अन्ते च निश्चयः, स निश्चयान्तः। यथा—

"किं तावत् सरसि सरोजमेतदारात्?
आहोस्विन्मुखमवभासते तरुण्याः?।
संशय्य क्षणमिति निश्चिकाय कश्चित्
विव्वोकैर्बकसहवासिनां परोक्षैः॥" (च)

अप्रतिभोत्थापिते तु "स्थाणुर्वा पुरुषो वा" इत्यादिसंशये नायमलङ्कारः (छ)।

निश्चितमेव सर्वां दिशां न प्रसरति न गच्छति; अयन्तु सर्वा एव दिशः प्रसरतीति न कृशानुरपीति पुनर्निश्चयः। तर्हि किं साक्षात् कृतान्तो यमः? इति संशयः। असौ कृतान्तः, महिषो वहनं वाहनं यस्य स तादृशः, अयन्तु अश्ववाहन इति न कृतान्तोऽपि; तर्हि कः पुनरयमिति भावः। हे राजन्! आजौ युद्धे त्वां समालोक्य प्रतिभटा विपक्षयोद्धारः, चिरं यावत् इति इत्थं विकल्पान् विविधसंशयान् विदधति कुर्वन्ति।

अत्र उपमेयभूते राजनि उपमानभूतानां मार्त्तण्ड-कृशानु-कृतान्तानां संशयात् आदावन्ते च तस्यावस्थानात् मध्ये चोक्तविधनिश्चयात् निश्चयगर्भः सन्देहोऽलङ्कारः।

(ङ) अत्रेति। मार्त्तण्डादीनामभावस्य अन्योन्याभावस्य भेदस्येति यावत् निश्चयः अनुमानेनावधारणम्। अथ राजनिश्चयः किं न स्यादित्याह राजेति। राज्ञः त्वामिति युष्मत्पदोपस्थाप्यस्य नृपतेः, निश्चये अनुमानेनावधारणे द्वितीयसंशयोत्थानासम्भवात् "कृशानुः किम्" इति द्वितीयसंशयोत्पत्त्यसम्भवात् सामग्र्यभावादिति भावः। एतदुपलक्षणम्। द्वितीयेऽपि राजनिश्चये तृतीयसंशयोत्थानासम्भवात्, तृतीये च राजनिश्चये विकल्पानिति प्रयोगानुपपत्तेरित्यपि बोध्यम्। एतेनान्तेऽपि च संशयस्थितिरपेक्षितैवेति लक्षणसङ्गतिर्द्रष्टव्या।

(च) किमिति। शिशुपालवधाष्टमसर्गस्थमिदं पद्यम्। सरसि सरोवरे आरात् दूरे "आराद्दूरसमीपयोः" इत्यमरः, एतत् दृश्यमानम्, तावत् किं सरोजं पद्मम्?। आहोस्वित् अथवा तरुण्याः कस्याश्चिद् युवत्याः, मुखम् अवभासते राजते? इति क्षणं संशय्य संशयं कृत्वा कश्चित् कामसहचरः, बकसहवासिनां बकपक्षिभिः सहावस्थायिनां बकसहवासित्वेन सर्वथैव विलासानभिज्ञानामित्यर्थः पद्मानाम्, परोक्षैरतीन्द्रियैरविदितैरिति यावत् विव्वोकैः "विव्वोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः" इति प्रागुक्तलक्षणविव्वोकव्यञ्जकैस्तदनतैर्भावविशेषैरित्यर्थः, निश्चिकाय "तरुण्या मुखमेवेदम्" इति निश्चितवान्।

अत्र उपमेये तरुण्या मुख आदावुपमानस्य पद्मस्य संशयादन्ते च तन्मुखत्वेन निश्चयान्निश्चयान्तः सन्देहोऽलङ्कारः।

"मध्यं तव सरोजाक्षि ! पयोधरभरार्द्दितम् ।
अस्ति नास्तीति सन्देहः कस्य चित्ते न भासते ? ॥ (ज)

अत्रातिशयोक्तिरेव, उपमेये उपमानसंशयस्यैव तदलङ्कारविषयत्वात् (झ) ।

५२ । साम्यादतस्मिंस्तद्बुद्धिर्भ्रान्तिमान् प्रतिभोत्थिता । (ञ)

यथा—"मुग्धा दुग्धधिया गवां विदधते कुम्भानधो वल्लवाः
कर्णे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि ।

(ङ) अथ प्रतिभोत्थित इति विशेषणं किमर्थमित्याह अप्रतीति । अप्रतिभया कविप्रौढोक्तिभिन्नेन केवलवस्तुस्वभावेनेत्यर्थः उत्थापिते उत्पादिते । नन्वत्र यथा संशयो न प्रतिभोत्थितः तथा उपमानोपमेयभावोऽपि नास्तीति हाङ्गविकलत्वात् कथमिदमुदाहरणं सङ्गच्छत इति चेन्न, स्थाणुपुरुषयोः समानाकृतिमत्तया उपमानोपमेयभावस्य सत्त्वात् तेनैव च संशयस्योत्थापनात् अन्यथा च संशयाभावात् । अथ तथापि "स्थाणुर्वा पुरुषो वा" एवम्भूतविषये वैचित्र्याभावादलङ्कारसामान्यलक्षणस्यैवासङ्गतेः कथं सन्देहालङ्कार इति चेत्, "तं धनूंषि विनम्यन्ते शिरांसि वेति संशयः" इत्यादौ अप्रतिभोत्थापिते स्वाभाविकसंशये नमनक्रियामादाय चोपमानोपमेयभावविवक्षायामतिव्याप्तिवारणाय प्रतिभोत्थापित इति विशेषणम् । अथवा तद्वैचित्र्यसत्तासूचनार्थमेवैतद्विशेषणम् ।

(ज) ननु तथापि "प्रकृतेऽन्यस्य" इति कथमभिहितमित्याह मध्यमिति । हे सरोजाक्षि ! पयोधरभरेण स्तनभारेण अर्द्दितं पीडितं तव मध्यमुदरभागः, अस्ति वर्त्तते, नास्ति न वर्त्तते वा इति सन्देहः, कस्य जनस्य चित्ते न भासते प्रकाशते ? अपि तु सर्वस्यैव चित्ते भासत इत्यर्थः ; निरतिशयक्षीणत्वादिति भावः ।

(झ) अत्रेति । चित्ते तादृशसन्देहभासनासम्बन्धेऽपि तत्सम्बन्धोक्तेरसम्बन्धे सम्बन्धरूपा अतिशयोक्तिरेवेत्यर्थः । न पुनर्निरुक्तसन्देहालङ्कार इत्येवशब्दार्थः । तत्र हेतुमाह उपमेय इति । एतदलङ्कारः सन्देहालङ्कारः । तथा च प्रकृतपदेन उपमेयस्य अन्यपदेन चोपमानस्य ग्रहणमित्याशयः ।

(ञ) ननु निरुक्तसन्देहवदलङ्कारान्तरमप्रमास्वरूपमस्ति न वेत्यपेक्षायां भ्रमस्वरूपं भ्रान्तिमन्तं नामालङ्कारं निरूपयति साम्यादिति । साम्यात् सादृश्यवशात् अतस्मिन् तद्भिन्नवस्तुनि, प्रतिभोत्थिता कविप्रौढोक्तिमात्रनिष्पन्ना, तद्बुद्धिस्तद्वस्तुत्वप्रकारकं ज्ञानम्, भ्रान्तिमान् नाम अलङ्कारो भवेत् । नन्वेवं लक्षणे सति सन्देह इति संज्ञावत् भ्रमो भ्रान्तिर्वेति संज्ञासम्भवे कथं भ्रान्तिमानिति संज्ञा कल्पात इति चेन्न, ईदृशसंज्ञा[illegible]स्य प्राचीनपरम्पराप्राप्तत्वात् । अतएव तादात्म्येन भ्रान्तिरस्यास्तीति भ्रान्तिमानिति व्युत्पत्तिः । तथा चोक्तम्—

"प्रमातरधीर्भ्रान्तिरूपा यस्मिन्ननूद्यते । स भ्रान्तिमानितिख्यातोऽलङ्कारे त्वौपचारिकः ॥"

एकस्मिन्नन्यस्य आरोपस्थले रूपकम्, एकस्मिन्नन्यस्य अध्यवसायस्थले अतिशयोक्तिः, एकस्मिन्नन्यस्य भ्रमस्थले तु भ्रान्तिमानिति भेदः । आरोपाध्यवसायभ्रमाणां भेदस्तु प्राग एवेति सरलः संक्षेपः ।

कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाकाङ्क्षया
सान्द्रा चन्द्रमसो न कस्य कुरुते चित्तभ्रमं चन्द्रिका ॥" (ट)

अस्वरसोत्थापिता (१) भ्रान्तिर्नायमलङ्कारः । यथा—"शुक्तिकायां रजतम्" इति (ठ) । न चासादृश्यमूला (ड) । यथा—

"सङ्गमविरहविकल्पे वरमिह विरहो न सङ्गमस्तस्याः ।
सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे ॥" (ढ)

५३ । क्वचिद्भेदाद्ग्रहीतॄणां विषयाणां तथा क्वचित् ।
एकस्यानेकधोल्लेखो यः स उल्लेख इष्यते ॥ (ण)

(ट) मुग्धा इति । मुग्धाः सरलबुद्धयः, वल्लवा गोपाः, दुग्धधिया तत्र पतितायां चन्द्रिकायां दुग्धबुद्ध्येव गवामधः धेनूनां स्तनतले कुम्भान् दोहनकलसान् विदधते विन्यस्यन्ति । कान्ताः स्त्रियोऽपि, कैरवबुद्ध्या चन्द्रिकापातात् श्वेतोत्पलभ्रमेण कर्णे कुवलयं नीलोत्पलं कुर्वन्ति अर्पयन्ति । तथा शबरी किरातस्त्री, मुक्ताफलाकाङ्क्षया मुक्तालाभाशया, कर्कन्धूफलं बदरीफलम्, उच्चिनोति संगृह्णाति । अतएव सान्द्रा निविड़ा, चन्द्रमसश्चन्द्रिका चन्द्रस्य ज्योत्स्ना, कस्य जनस्य चित्तभ्रमं न कुरुते ? अपि तु सर्वस्यैव कुरुत इत्यर्थः ।

अत्र चन्द्रिकायां दुग्धस्य, कुवलये कैरवस्य, बदरीफले च मुक्ताफलस्य ज्ञानात् भ्रान्तिमानलङ्कारः ।

(ठ) प्रतिभोत्थिता इत्यस्य व्यावृत्तिमाह अस्वरसेति । अस्वरसेन अस्वेच्छया कवेरनिच्छयेति यावत् उत्थापिता वस्तुस्वभावेनैवोत्पादितेत्यर्थः । अयं भ्रान्तिमान् । इति वाक्ये । अत्रापि शुक्तिकारजतयोः समानोज्ज्वलतया साम्यसत्त्वान्न दाष्टान्तिकत्वमिति, तथा पूर्ववदेव वैचित्र्यविशेषसत्तावश्यकताद्योतनार्थमेव प्रतिभोत्थितेति विशेषणमिति चावधेयम् ।

(ड) ननु तथापि साम्यादिति किमर्थमभिहितमित्याह न चेति । असादृश्यमूला भ्रान्तिश्च नायमलङ्कार इति पूर्वानुषङ्गेणात्र सम्पूर्णवाक्यनिष्पत्तिरत्र वा ।

(ढ) सङ्गमेति । सख्युरन्तिके कस्यचिद्विरहिणः सानुतापोक्तिरियम् । तस्याः प्रियतमायाः सङ्गमविरहयोः संयोगवियोगयोः, विकल्पे अन्यतरस्य वरत्वविवेचने कर्त्तव्ये सति, विरह एव वरम्, न पुनः सङ्गमः, इत्येव विवेचनीयमिति भावः । कुतो विरहस्य वरत्वमित्याह सङ्ग इति । सङ्गे सङ्गमे, सा प्रियतमा, तदा प्रत्यक्षगोचरीभूता एकैव ; किन्तु विरहे त्रिभुवनमपि तन्मयं प्रियतमामयं भवति । अतो विरहस्यैव वरत्वमिति भावः ।

अत्र विरहदशायामुत्कटभावनावशात् त्रिभुवनस्थेषु सर्वेष्वेव वस्तुषु कविप्रौढ़ोक्तिमात्रनिष्पन्ने प्रियतमाभ्रमे सत्यपि तस्य सादृश्यमूलकत्वाभावान्न भ्रान्तिमानलङ्कार इत्याशयः ।

---

(१) स्वरसोत्थापिता इति पाठान्तरम् ।

क्रमेणोदाहरणम्—

"प्रिय इति गोपवधूभिः शिशुरिति वृद्धैरधीश इति देवैः ।
नारायण इति भक्तैर्ब्रह्मेत्यग्राहि योगिभिर्देवः ॥" (त)

अत्रैकस्यापि भगवतस्तत्तद्गुणयोगादनेकधोल्लेखे गोपवधूप्रभृतीनां रुच्यादयो यथायोगं प्रयोजकाः (थ) । यदाहुः—

"यथारुचि यथार्थित्वं यथाव्युत्पत्ति भिद्यते ।
आभासोऽप्यर्थ एकस्मिन्ननुसन्धानसाधितः ॥" (द)

अत्र भगवतः प्रियत्वादीनां वास्तवत्वाद्ग्रहीतृभेदाच्च न मालारूपकम्, न च भ्रान्तिमान् (ध) । न चायमभेदे भेद इत्येवं रूपातिशयोक्तिः । तत्र

(ण) भ्रान्तिमदलङ्कारनिरूपणानन्तरं प्रायेण तच्छायाग्राहितया उल्लेखालङ्कारं निरूपयति क्वचिदिति। क्वचित् स्थले ग्रहीतॄणां ज्ञातॄणां भेदात् पार्थक्यात्, क्वचिद्वा विषयाणां व्यावर्त्तकधर्म्मादीनाम्, ज्ञातव्यपदार्थानां तथा भेदात् पार्थक्यादित्यर्थः एकस्य पदार्थस्य यः अनेकधा अनेकप्रकारेण उल्लेख उपादानं स उल्लेखो नामालङ्कार इष्यते । अत्र व्युत्पत्तिः स्पष्टा ।

(त) तत्र ग्रहीतृभेदेनोदाहरणं दर्शयति प्रिय इति । गोपवधूभिर्गोपीभिः प्रियो वल्लभ इति, वृद्धैः प्राचीनैर्नन्दादिभिः शिशुर्बालक इति, देवैरिन्द्रादिभिः अधीशोऽधिपतिरिति, भक्तैरनुरक्तैर्नारदादिभिर्नारायण इति, तथा योगिभिः कपिलादिभिर्ब्रह्मपरमात्मेति कृत्वा देवः अग्राहि अज्ञायि ।

अत्र गोपवधूप्रभृतिग्रहीतृभेदादेकस्य कृष्णस्य प्रियत्वादिना अनेकेन प्रकारेण उल्लेखादुल्लेखोऽलङ्कारः ।

(थ) नन्वेकस्यैव कृष्णस्य इत्थमनेकधा प्रतीतौ किं नाम प्रयोजकमित्याह अत्रेति । भगवतः कृष्णस्य तत्तद्गुणयोगात् प्रियत्वशिशुत्वादिधर्म्माणां सत्त्वात् । रुचिर्मनोवृत्तिः आदिशब्देन यथार्थित्वं यथाव्युत्पत्ति च गृह्यते । यथायोगं यथासम्भवम् । तथा च कृष्णे गोपवधूनां वल्लभत्वसत्त्वात् तत्प्रकारकरुचिप्रयुक्तं तासां प्रिय इति ज्ञानम् । एवमन्यत्राप्यूहनीयम् ।

(द) तथेति । रुचिं मनोवृत्तिमनतिक्रम्येति यथारुचि, अर्थित्वं प्रयोजनमनतिक्रम्येति यथार्थित्वम्, व्युत्पत्तिमवधारणमनतिक्रम्येति यथाव्युत्पत्ति । तथा च एकस्मिन्नपि अर्थे वस्तुनि, यथारुचि रुच्यनुसारेण, यथार्थित्वं प्रयोजनानुसारेण, यथाव्युत्पत्ति अवधारणानुसारेण च अनुसन्धानेन भावनया साधित उत्पादितः, आभासो ज्ञानं भिद्यते भिन्नभिन्नो भवति । तथा च यथा एकस्मिन्नेव पुरुषे तत्पत्न्या रुच्यनुसारेण भावनया प्रिय इति ज्ञानम्, स्वामिनः प्रयोजनानुसारेण भावनया दास इति ज्ञानम्, प्रतिवेशिनस्तु अवधारणानुसारेण भावनया चौर इति ज्ञानम् ; तथा एकस्मिन्नेव कृष्णे गोपवधूनां नन्दादीनाञ्च रुच्यनुसारेण भावनया प्रिय इति शिशुरिति च ज्ञानम्, देवानां भक्तानाञ्च प्रयोजनानुसारेण भावनया अधीश इति नारायण इति च ज्ञानम्, योगिनान्तु अवधारणानुसारेण भावनया ब्रह्मेति ज्ञानमित्याशयः ।

(ध) ननु मुखपद्ममित्यत्र मुखे पद्मत्वारोपवत् प्रिय इत्यादौ निर्विकारादिरूपे कृष्णे प्रियत्वा-

हि "अन्यदेवाङ्गलावण्यम्" इत्यादौ लावण्यादेर्विषयस्य पृथक्त्वेनाध्यवसानम्; न चेह भगवति गोपवधूप्रभृतिभिः प्रियत्वाद्यध्यवसीयते, प्रियत्वादेर्भगवति तत्काले तात्त्विकत्वात् (न)।

केचिदाहुः—"अयमलङ्कारो नियमेन (१) अलङ्कारान्तरविच्छित्तिमूलः; उक्तोदाहरणे च शिशुत्वादीनां नियमाभिप्रायात् प्रियत्वादेर्भिन्नत्वाध्यवसाय इत्यतिशयोक्तिरस्ति; तत्सद्भावेऽपि च ग्रहीतृभेदेन (२) नानात्वप्रतीतिरूपो विच्छित्तिविशेष उल्लेखाख्यभिन्नालङ्कारप्रयोजकः (प)।

दनेकारोपान्मालारूपकम्, अथवा सर्वथा क्रियागुणविहीने ब्रह्मरूपे कृष्णे प्रीणातीति व्युत्पत्त्या गोपवधूनां प्रीतिजनकत्वस्य, जगद्वन्द्ये नन्दादीनां शिशुत्वस्य, नन्दाद्यधीने देवानामधीशत्वस्य, वसुदेवनन्दने भक्तानां नारायणत्वस्य, मानवाकारे योगिनां ब्रह्मत्वस्य च भ्रमाद्भ्रान्तिमानलङ्कार एवास्ताम्, किमर्थं वादिभिरुल्लेखाख्यमलङ्कारान्तरमङ्गीक्रियत इत्याह अत्रेति। वास्तवत्वादयथार्थत्वात्, ग्रहीतृभेदात् ज्ञातृणां भिन्नत्वात्। एतयोरुभयमुभयं प्रत्येव हेतुरिति बोध्यम्। तथा च भूमेर्भारावतारणाय जन्मविकारादिवर्त्मनि कृष्णे गोपवधूप्रभृत्यपेक्षया प्रियत्वादीनां सर्वेषामेव धर्माणां सर्वथा वास्तविकत्वेन आरोपाभावात् तादृशमूलकल्पनाभावाच्च ग्रहीतृभेदाच्च न मालारूपकं न वा भ्रान्तिमान् सम्भवति। नहि केनापि वस्तुत एव पद्मे पद्मत्वारोपः पद्मत्वभ्रमो वा क्रियते। न वा "मुखपद्मम्" इत्यादौ मुखे पद्मत्वारोपज्ञाने "शुक्तिकायां रजतम्" इत्यादौ च शुक्तिकायां रजतत्वप्रकारकभ्रमज्ञाने वा ज्ञातृभेदः सम्भवतीति भावः।

(न) अथ तर्हि अभिन्ने कृष्णे प्रियत्व-शिशुत्वादिरूपभेदाध्यवसायादतिशयोक्तिरेवास्तामित्याह न चेति। एवंरूपातिशयोक्तिरिति वाच्यं न चेत्यर्थः। हि यस्मात्। तत्र अभेदे भेदाध्यवसायरूपायामतिशयोक्तौ पृथक्त्वेनाध्यवसानं सामान्यलावण्यादिभ्यो भिन्नत्वेनाध्यवसायः। तत्काले कृष्णगोपवधूप्रभृतीनां सत्तासमये, तात्त्विकत्वात् यथार्थत्वात्। तत्र नियतसत्ताकस्य वस्तुन आरोपवदध्यवसायस्याप्यसम्भवादित्याशयः।

(प) केचिदिति। अयमुल्लेखो नाम, नियमेन आवश्यकभावेन, अलङ्कारान्तरविच्छित्तिरन्यालङ्कारकृतं वैचित्र्यमेव मूलं कारणं यस्य सः, अन्येन येन केनचिदलङ्कारेण जनिताद्वैचित्र्यविशेषादेवायमलङ्कारो जायते, न पुनः स्वत इति भावः। नियमाभिप्रायात् कृष्णो गोपवधूनामन्तिके प्रिय एव, नन्दादिवृद्धानामन्तिके च शिशुरेव इत्यादिनियमाभिप्रायेणाभिधानात्, प्रियत्वादेः सकाशात् शिशुत्वादीनां भिन्नत्वस्य भेदस्य अध्यवसाय इति हेतोः, अभेदे भेदाध्यवसायमूला अतिशयोक्तिरस्तीत्यर्थः। अथ तर्हि तयैव व्यपदेशोऽस्तामित्याह तत्सद्भावेऽपि चेति। तादृश्यातिशयोक्तिसत्त्वे चेत्यर्थः। ग्रहीतृभेदेन ज्ञातृपार्थक्येन। विच्छित्तिविशेषः अन्यविधं वैचित्र्यम्। अत्र "न चेह भगवति" इत्याद्युक्तयुक्तिरेव अस्वरसबीजमित्यनुसन्धेयम्।

(१) आवश्यकभावेन इत्यधिकः पाठः क्वचित्। (२) प्रत्येतृभेदेन इत्यपि पाठः।

श्रीकण्ठजनपदवर्णने—"वज्रपञ्जरमिति शरणागतैः, अम्बरविवरमिति वातिकैः" इत्यादिश्चातिशयोक्तेर्विविक्तो विषयः । इह च रूपकालङ्कार-योगः ।" (फ) ।

वस्तुतस्तु "अम्बरविवरम्" इत्यादौ भ्रान्तिमन्तमेवेच्छन्ति (१) न रूपकम्, भेदप्रतीतिपुरःसरस्यैवारोपस्य गौणीमूलरूपकादिप्रयोजकत्वात् (ब)। यदाहुः शारीरकमीमांसाभाष्यव्याख्याने श्रीमद्वाचस्पतिमिश्राः—"अपि च परशब्दः परत्र लक्ष्यमाणगुणयोगेन वर्त्तत इति । यत्र प्रयोक्तृ-सम्प्रतिपत्तौ

(फ) श्रीकण्ठेति । बाणभट्टकृतहर्षचरिते श्रीकण्ठो नाम यो जनपदो देशस्तस्य वर्णने । शरणागतैः शत्रुभयेनागत्य रक्षकत्वेनाश्रितैः वज्रपञ्जरमिति महावीररक्षिततया शत्रूणां प्रवेशासम्भवादिति भावः। वातिकैः सङ्कीर्णस्थानस्थिततया वातव्याधिविशिष्टैर्जनैः. अम्बरविवरम् आकाशात्मकमहाशून्यस्थानस्वरूपम्, इच्छानुसारेण यत्र तत्रापि विचरणसम्भवादिति भावः । अनन्यतेत्थं परक्रियया अन्वयः । "वातिको वातजो व्याधिः" इति राजनिर्घण्टः । वातिक एषामस्तीति अर्श आदित्वादतिवातिकैरिति रूपम् । विविक्तो भिन्नः, कस्यचिदप्यध्यवसायाभावादिति भावः । ननु तर्हि "नियमेनालङ्कारान्तरविच्छित्तिमूलः" इति पूर्वोक्त-व्यभिचार इत्याह इह चेति । वज्रपञ्जरमित्यादावुभयत्र चेत्यर्थः, रूपकालङ्कारयोगः देशे वज्रपञ्जरत्वाम्बर-विवरत्वयोरारोपादित्याशयः । तथा च वज्रपञ्जरमित्यादौ रूपककृतविच्छित्तिमूल एवोल्लेखालङ्कार इति तेषां मतम् ।

(ब) उदाहृते रूपकयोगमसहमान आह वस्तुतस्त्विति । आदिपदेन वज्रपञ्जरमित्यस्य ग्रहणम् । एतेन तदभिधायिना तदानीन्तनहर्षचरितपुस्तके "अम्बरविवरमिति वातिकैः, वज्रपञ्जरमिति शरणागतैः" इत्यमेवोक्तविपरीतः पाठक्रमो दृष्ट इति प्रतीयते । भ्रान्तिमन्तं भ्रान्तिमदलङ्कारम्, इच्छन्ति अलङ्कारतत्त्वज्ञा इति शेषः । गौणी सादृश्यसम्बन्धघटिता सारोपा लक्षणैव मूलं यस्य तादृशस्य रूपकादेः । आदिशब्देन परिणामग्रहणम् । प्रयोजकत्वात् तादात्म्येन घटकत्वात् । तथा च "मुखपद्मम्" इत्यादौ प्रथममुभयोरेव मुखपद्मयोः शब्दोपात्ततया परस्परं भेदप्रतीतिः, परश्च मुखमेव पद्ममित्यारोपस्तादात्म्येन रूपकं घटयति; तस्य मूलन्तु मुखरूपविषयस्य अनिगीर्णतया सादृश्यसत्तया सारोपाख्या गौणी लक्षणैव । अत्र तु देशरूप-विषयस्य सन्निधाने शब्दानुपात्ततया न परस्परं भेदप्रतीतिः, तथैव च तस्य निगीर्णरूपतया न मूलीभूता सारोपाख्या गौणी लक्षणापीति कथमपि न रूपकं सम्भवति; किन्तु "मुग्धा दुग्धधिया" इत्यादिवत् देशे अम्बरविवरादिभ्रमाद्भ्रान्तिमानेवेति भावः ।

(भ) रूपकालङ्कारमूलीभूतसारोपाख्यगौणीरूपलक्षणाया एव भेदप्रतीतिपुरःसरत्वं प्रमाणयितुमात्मनश्च बहुदर्शितां प्रकटयितुं भामतीकारोक्तिं प्रमाणयति यदाहुरिति । आहुः—आरम्भात् कियदनन्तरमेव

(१) इच्छति इति पाठान्तरम् ।

सम्प्रतिपत्तिः स गौणः, स च भेदप्रत्ययपुरःसरः" इति (भ)। इह तु वातिकानां श्रीकण्ठजनपदवर्णने भ्रान्तिकृत एव अम्बरविवरत्वाद्यारोपः (१) इति (म)। अत्रैव च "तपोवनमिति मुनिभिः, कामायतनमिति वेश्याभिः" (२) इत्यादौ च परिणामालङ्कारयोगः (य)।

"गाम्भीर्य्येण समुद्रोऽसि गौरवेणासि पर्वतः।" (र)

इत्यादौ चानेकधोल्लेखे गाम्भीर्य्यादिविषयभेदः प्रयोजकः। अत्र च रूपकयोगः (ल)।

"गुरुर्वचसि, पृथुरुरसि, अर्जुनो यशसि" इत्यादि च (३) अस्य

...भाष्यव्याख्याने भामत्याम्। परशब्दः अन्यवाचकः शब्दः, परत्र अन्यस्मिन्नर्थे, लक्ष्यमाण उभयोः ...मानधर्मतया ज्ञायमानो यो गुणो धर्म्मस्तस्य योगेन सम्बन्धेन, वर्त्तते उपस्थापकतासम्बन्धेनेति शेषः। यत्र ...स्मिन् शब्दव्यापारे सति, प्रयोक्तृसम्प्रतिपत्त्रोर्वक्तृश्रोत्रोः, सम्प्रतिपत्तिः सामान्यधर्म्मस्य समानमेव सम्यग्ज्ञानं ...यते, स गौणो नाम शब्दव्यापार इत्यर्थः। तथा च "गौर्वाहीकः" इत्यादौ प्रथमतो गोवाहीकयोः परस्परं ...प्रतीतिः, परञ्च गोशब्दो जाड्यमान्द्यादिसामान्यधर्म्मयोगेन वाहीकार्थे वर्त्तते; तत्र च वक्तृश्रोत्रोस्ताद्दश...मान्यधर्म्मज्ञानं समानमेव जायत इति। दायभागटीकायां श्रीकृष्णतर्कालङ्कारोऽप्याह स्म—"शक्यस्य ...सादृश्यात्मकः सम्बन्धो गुणस्तदधीना या लक्षणा सा गौणी तद्योगाद्गौणः।"

(म) इदानीं विवादास्पदे अम्बरविवरमित्यादौ भ्रान्तिमन्तमेवालङ्कारं समर्थयितुमाह इह त्विति। ...न्तिकृत एव यथेच्छमसारसाम्याद्भ्रमजनित एव।

(य) क्वचिदुदाहृतत्वं चास्य दर्शयितुमाह अत्रैव चेति। पूर्वं चरितस्यश्रीकण्ठजनपदवर्णन एव ...त्यर्थः। परिणामालङ्कारयोग इति। आरोप्यमाणयोस्तपोवनत्वकामायतनत्वयोः प्रकृततपस्याकामोपभोग...साधनोपयोगित्वादित्याशयः।

(र) विषयभेदादुल्लेखालङ्कारं दर्शयति गाम्भीर्य्येणेति। तर्कवागीशधृतमस्योत्तरार्द्धं यथा—

"कामदत्वाच्च लोकानामसि त्वं कल्पपादपः॥" इति।

(ल) इत्यादाविति। अनेकधा उल्लेखे एकस्यैव राज्ञः समुद्राद्यनेकप्रकारेणोपादाने गाम्भीर्य्यादि...विषयाणां समुद्रत्वाद्यारोपप्रयोजकधर्म्माणां भेदः, प्रयोजक उल्लेखालङ्कारस्येति शेषः। रूपकयोग इति। ...इन्नि समुद्रत्वाद्यारोपस्य भेदप्रतीतिपुरःसरत्वात् सारोपाख्यगौणीरूपलक्षणामूलत्वाच्चेति भावः। अत्र ...समुद्रपदेनोपस्थापितस्य राज्ञः अनिगीर्णरूपतया लक्षणायाः सारोपात्वं गाम्भीर्य्यादिसादृश्यसम्बन्धाच्च गौणी...त्वमित्यवधेयम्।

---

(१) अम्बरविवराद्यारोप इति पाठान्तरम्। (२) सङ्गीतशालेति लासकैः इत्यधिकः पाठः क्वचित्। (३) इत्यादिषु च इत्यपि पाठः।

रूपकादिविविक्तो विषय इति (व)। अत्र हि श्लेषमूलातिशयोक्ति-योगः (श)।

५४। प्रकृतं प्रतिषिध्यान्य-स्थापनं स्यादपह्नुतिः। (ष)

इयं द्विधा, क्वचिदपह्नवपूर्वक आरोपः, क्वचिदारोपपूर्वकोऽपह्नव इति (स)। क्रमेणोदाहरणम्—

"नेदं नभोमण्डलमम्बुराशि र्नैताश्च तारा नवफेनभङ्गाः।
नायं शशी कुण्डलितः फणीन्द्रो नासौ कलङ्कः शयितो मुरारिः॥" (ह)

(व) प्रकारान्तरेण विषयभेद एवोदाहरणान्तरमाह गुरुरिति। वचसि वाक्ये गुरुर्महानेव गुरुर्बृहस्पतिः, उरसि वक्षसि पृथुर्विशाल एव पृथुस्तदाख्यो राजा, यशसि अर्जुनो धवल एवार्जुनस्तृतीयपाण्डवः कार्त्तवीर्य्यो वा। इत्यादि वाक्यस्येत्यर्थः, अस्य उल्लेखालङ्कारस्य, रूपकात् रूपकालङ्कारविषयात्, विविक्तो विभिन्नः, विषयः स्थलम्। गुरुप्रभृतीनां विषयाणां निगीर्णरूपतया रूपकमूलीभूतसारोपालक्षणाया एवासम्भवादिति भावः।

(श) तर्हि किमत्र न कश्चिदपरालङ्कार इत्याह अत्रेति। हि तथाहि, अत्र गुरुरित्यादौ। श्लेषेति। महद्बृहस्पत्यादीनां भेदेऽपि श्लेषेणाभेदाध्यवसायादित्याशयः। एतेन विषयभेदेनोल्लेखालङ्कारस्थले नियमेनालङ्कारान्तरयोग इत्यात्मनोऽपि मतमिति सूचितम्।

(ष) उपमानोपमेयघटितालङ्कारनिरूपणस्य प्रकृतत्वात् प्रकारान्तरेण तद्घटितमेवापह्नुत्यलङ्कारं निरूपयति प्रकृतमिति। प्रकृतं वर्णनायां प्रस्तुतम् उपमेयमित्यर्थः, प्रतिषिध्य शब्दतस्तात्पर्य्यतो वा अपोह्य, अन्यस्य प्रकृतभिन्नस्य उपमानस्येत्यर्थः, स्थापनं विन्यासः, अपह्नुतिर्नाम अलङ्कारः स्यात्। वास्तविकस्योपमेयस्यापह्नवादस्य अपह्नुतिरिति संज्ञा।

(स) कारिकायां प्रतिषिध्येति क्त्वाप्रत्ययार्थस्य आनन्तर्य्यस्य सौविकुत्वादविवक्षितत्वमभिप्रेत्याह इयं द्विधेति। अपह्नवपूर्वक आरोप उपमेयप्रतिषेधपूर्वकमुपमानस्थापनम्। आरोपपूर्वकोऽपह्नव उपमानस्थापनपूर्वक उपमेयप्रतिषेधः। तथा मालारूपत्वात् केवलरूपत्वाच्च पुनर्द्विधेति समुदायेन चतुर्विधा अपह्नुतिर्बन्धानुसारात्।

(ह) तत्रापह्नवपूर्वकारोपे मालारूपामुदाहरति नेदमिति। इदं दृश्यमानं नभोमण्डलमाकाश-मण्डलं न, किन्तु अम्बुराशिः समुद्र एव समानादेव विशालत्वान्निर्म्मलत्वाच्चेति भावः। एताः दृश्यमानाः तारा नक्षत्राणि न, अपि तु नवफेनभङ्गा नूतनाः समुद्रफेनखण्डाः, तुल्यादेव शुभ्रक्षुद्रत्वादित्याशयः। अयमव-लोक्यमानः पदार्थः शशी चन्द्रो न, किन्तु कुण्डलितः सञ्जातकुण्डलीभावो नक्षलीकृतदेह इत्यर्थः, फणीन्द्रो मुरारेरेव शय्याभूतः अनन्तनागः, समानादेव शुभ्रत्वाद्गोलाकारत्वाच्चेत्यभिप्रायः। असौ तन्मध्ये दृश्यमानः कृष्णवर्णः पदार्थः, कलङ्कश्चन्द्रगतं हरिणचिह्नं न, अपि तु शयितः शयानो मुरारिः कृष्णः, समानकृष्णवर्णत्वात् सम्भवपरत्वाच्चेति भावः।

"एतद्विभाति चरमाचलचूडचुम्बि
हिण्डीर-पिण्ड-रुचि-शीतमरीचि-बिम्बम् ।
प्रज्वालितस्य (१) रजनीं मदनानलस्य
धूमं दधत् प्रकटलाञ्छनकैतवेन ॥" (घ)

इदं पद्यं मम (२)। एवम्—(क)

"विराजति व्योमवपुः पयोधिस्तारामयास्तत्र च फेनभङ्गाः (३)।" (ख)

इत्याद्याकारेण च प्रकृतनिषेधः बोध्यः (४) (ग)।

अत्र नभोमण्डलाद्युपमेयप्रतिषेधेन अम्बुराश्याद्युपमानस्थापनात् तस्य चानेकत्वान्मालारूपापह्नुतिरलङ्कारः। तथा नञ्चतुष्टयोपादानान् शब्दत एव प्रकृतप्रतिषेध इति द्रष्टव्यम्।

अपह्नवपूर्वकारोपे केवलरूपा यथा काव्यप्रकाशे—

'अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये! कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि।
अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ॥"

(घ) आरोपपूर्वकापह्नवे केवलरूपामुदाहरति एतदिति। चरमाचलचूडचुम्बि अस्ताचलशिखरावलम्बि, हिण्डीरपिण्डस्य फेनस्तूपस्य रुचिरिव रुचिर्दीप्तिर्यस्य तत्तादृशम्, एतद्दृश्यमानम्, शीतमरीचिबिम्बं चन्द्रमण्डलम्, प्रकटलाञ्छनकैतवेन सुस्पष्टहरिणचिह्नच्छलेन रजनीं रात्रिं व्याप्य विधिना प्रज्वालितस्य मदनानलस्य धूमं दधत् धारयत् सत्, विभाति प्रकाशते। "हिण्डीरोऽब्धिकफः फेनः" इत्यमरः।

अत्र प्रथमं धूमरूपमुपमानमारोप्य पश्चात् कलङ्करूपोपमेयापह्नवादपह्नुतिः; सा चारोपस्यैकत्वात् केवलरूपा। तथा कैतवेनेत्यभिधानात् नञाद्यनुपादानात् तात्पर्यत एव प्रकृतप्रतिषेध इत्युन्नेयम्।

आरोपपूर्वकापह्नवे तात्पर्यतः प्रकृतप्रतिषेधे मालारूपा यथा मम—

"सरोजमेतन्मुखकैतवाच्चिरं मधुव्रती लोचनरूपधारिणी।
तिलप्रसूनं किल नासिकात्मना स्थितं कचच्छलाच्च भुजङ्गमण्डलादिदम् ॥"

(क) प्रकारान्तरेण तात्पर्यत एव प्रकृतप्रतिषेधे उदाहर्तुमाह एवमिति।

(ख) विराजतीति। "फणीश्वरोऽयं द्विजराजमूर्त्तिर्न चाम्बुदश्रीर्न तु तस्य लक्ष्म ॥" इत्युत्तरार्द्धम्। व्योम आकाशमेव वपुः शरीरमाकारो यस्य स तादृशः पयोधिः समुद्रो विराजति प्रकाशते; तत्र तादृशे च पयोधौ, तारामया नक्षत्राकाराः फेनभङ्गाः फेनखण्डा विद्यन्त इति शेषः।

(ग) इतीति। इत्याद्याकारेण एवमादिप्रकारेण। तथा च उदाहृते वपुःशब्दप्रयोगेण मयट्प्रत्ययविधानेन च प्रकृतयोर्व्योमतारयोरपह्नवे वस्तुतात्पर्य्यात् पयोधिफेनभङ्गयोरुपमानयोः स्थापनाच्च अपह्नुतिरेव; न तु रूपकम्, तत्र "विषये निरपह्नवे" इत्यभिधानादित्याशयः।

(१) उज्ज्वालितस्य इति पाठान्तरम्। (२) इदं मम, इमे पद्ये मम इति पाठभेदौ।
(३) टीकालिखितमुत्तरार्द्धं क्वचिन्मूल एव दृश्यते। (४) बोद्धव्य इति पाठान्तरम्।

५५ । गोपनीयं कमप्यर्थं द्योतयित्वा कथञ्चन ।
यदि श्लेषेणान्यथा वान्यथयेत् साप्यपह्नुतिः ॥ (घ)

श्लेषेण यथा—

"काले वारिधराणामपतितया नैव शक्यते स्थातुम् ।
उत्कण्ठितासि तरले ! नहि नहि सखि ! पिच्छिलः पन्थाः ॥" (ङ)

अत्र "अपतितया" इत्यत्र "पतिं विना" इत्युक्त्वा पश्चात् "पतनाभावेन" इत्यन्यथा कृतम् (१) (च) ।

अश्लेषेण यथा—

"इह पुरोऽनिलकम्पितविग्रहा
मिलति का न वनस्पतिना लता ।

(घ) उपमेयनिषेधोपमानस्थापनयोरभावेऽपि अपह्नुतिप्रकारणादेव निरुक्तविलक्षणां काञ्चिदपह्नुतिं लक्षयति गोपनीयमिति । यः कोऽपि वक्ता गोपनीयं लज्जादिना गोपनयोग्यम्, कमपि अर्थं विषयम्, कथञ्चन केनापि प्रकारेण व्यञ्जनयेत्यर्थः द्योतयित्वा सूचयित्वा, यदि श्लेषेण, अन्यथा अश्लेषेण वा अन्यथयेत् अन्यथा कुर्यात् द्योतितभिन्नरूपं विदध्यादित्यर्थः, तदा सापि अपह्नुतिर्नामालङ्कारो भवेत् ; आत्मनैव द्योतितविषयस्य आत्मनैव पुनरपह्नवात् ।

(ङ) काल इति । वर्षाकाले सख्या सह पथि गच्छन्त्याः कस्याश्चिद्विरहिण्या उक्तिरियम् । वारिधराणां मेघानां काले अस्मिन् वर्षासमये, अपतितया पतिरहिततया हेतुना, मया स्थातुं नैव शक्यते, दारुणमदनवेदनावशादिति भावः ; अन्यत्र तु अपतितया अस्मिन् पथि गमनसमये अस्खलितया मया स्थातुं नैव शक्यते, पथः पिच्छिलत्वादिति भावः । इदमाकर्ण्य सहचारिण्याह उत्कण्ठितेति । हे तरले ! चपले ! त्वं किं पतिनिमित्तमुत्कण्ठितासि । इत्युक्त्वा विरहिणी पुनराह नहीति । हे सखि ! नहि न पतिनिमित्तं न खलु उत्कण्ठितास्मीत्यर्थः । तर्हि कथमिदमुक्तमित्याह पिच्छिल इति । पन्थाः आवयोरयं गमनपथः पिच्छिलो जलपातेन स्निग्धः । अतएवावश्यपतनसम्भवादपतितयेत्याद्युक्तमिति भावः ।

(च) उदाहृते लक्षणं सङ्गमयति अत्रेति । इत्युक्त्वा उक्तिवत् स्पष्टं द्योतयित्वेत्यर्थः । तथा च न अविद्यते विद्यते पतिर्यस्याः सा अपतिः । "बहुव्रीहौ" इत्यत्र "सपूर्वस्य वा" इत्यतो वाधिकारात् "पत्युर्नो यज्ञसंयोगे" इतीप्रत्ययस्य नकारस्य चाभावः । तस्या भावः अपतिता तया । अन्यत्र तु न पतिता अपतिता तयेति श्लेषः ।

(छ) इहेति । वर्षाकाले सख्या सह विरहिण्या उक्तिप्रत्युक्तिरूपमिदं पद्यम् । इह वर्षासमये,

---

(१) पतनाभावेनान्यथाकृतमिति पाठभेदः ।

स्मरसि किं सखि ! कान्तरतोत्सवम् ?
नहि घनागमरीतिरुदाहृता ॥" (छ)

वक्रोक्तौ परोक्तेरन्यथाकारः, इह तु स्वोक्तेरेवेति भेदः (ज)। गोपनकृता गोपनीयस्यापि प्रथममभिहितत्वाच्च व्याजोक्तेः (झ)।

५६। अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः। (ञ)

अनिलेन वायुना कम्पितौ देहौ यस्याः सा तादृशी का नाम लता, वनस्पतिना वृक्षेण सह, पुरोऽग्रतः स्थुरत इत्यर्थः, न मिलति न संयुज्यते ? अपि तु सर्वैव मिलतीत्यर्थः। "वनस्पतिर्वृक्षमात्रे" इति विश्वः। कामाविर्भावात् कम्पाख्यसात्त्विकभाववती का नाम कामिनी कान्तेन सह न मिलतीति च द्योत्यते। इदमाकर्ण्य सखी पृच्छति स्मरसीति। हे सखि ! किं कान्तस्य पत्युः रतोत्सवं सुरतामोदम्, स्मरसि लतावनस्पत्योरिदं मिलनं दृष्ट्वेति भावः। इति पृष्टा विरहिणी पुनराह नहीति। कान्तरतोत्सवं नहि स्मरामीत्यर्थः। तर्हि किमिदमुक्तमित्याह घनेति। घनागमस्य वर्षासमयस्य रीतिरवस्था उदाहृता अभिहिता। अत्र प्रथमार्द्धेन स्वयमेव द्योतितस्य कान्तरतोत्सवस्मरणस्य अग्रिमेन घनागमेत्यादिना पुनः स्वयमेवा-न्यथाकरणादपह्नुतिः।

(ज) ननूदाहृतप्रथमलक्ष्ये अन्यार्थकवाक्यस्य श्लेषेणान्यथा योजनात् प्रागुक्तया वक्रोक्त्या सह, निरुक्त-सङ्कीर्णापत्तिरित्याह वक्रोक्ताविति। अन्यथाकारः परकर्तृकमन्यथाकरणम्। इह द्वितीयापह्नुतौ स्वेद इति। अतएव वक्रोक्तिलक्षणे "अन्यस्य" इति "अन्यः" इति चान्यपदद्वयं प्रयुक्तम्, इह चैककर्तृकत्वलाभाय 'द्योतयित्वा' इति क्त्वाप्रत्ययः कृत इति भावः।

(झ) अथ तर्हि उद्भिन्नस्य पतिरहिततयेत्यर्थस्य कान्तरतोत्सवस्मरणस्य च "नहि नहि सखि !" इत्यादिना "नहि घनागम—" इत्यादिना च व्याजेन गोपनात् "व्याजोक्तिर्गोपनं व्याजादुद्भिन्नस्यापि वस्तुनः" इति वक्ष्यमाणलक्षणया व्याजोक्त्या सह उभयत्रापि नियतसाङ्कर्यमापद्यत एवेत्याह गोपनेति। गोपनकृता गोपन-कारिणा वक्तृजनेन, गोपनीयस्यापि पतिरहिततयेत्यर्थस्य कान्तरतोत्सवस्मरणस्य च। अभिहितत्वात् अभि-हितवत् स्पष्टं द्योतितत्वात्, व्याजोक्तेर्भेद इत्यनुषज्यते। तथा च व्याजोक्तौ गोपनकारिणा गोपनीयविषयः स्वयं नाभिधीयते, इह त्वसावभिधीयत एवेति भेदादनयोर्न नियतसाङ्कर्यापत्तिरित्याशयः।

(ञ) अथ प्रकृतं निषिध्यान्यस्थापनेनापह्नुतिवत् अन्यन्निषिध्य प्रकृतस्थापनेन किञ्चिदलङ्कारान्तरं भवति न वेत्याकाङ्क्षायामप्राचीनसम्मतमपि युक्तिसिद्धत्वात् प्रसिद्धालङ्कारान्तरभिन्नत्वाच्च निश्चयाख्यं नूतनं कञ्चिदलङ्कारमाह अन्यदिति। अतएव चात्रापह्नुतिवैपरीत्यद्योतनार्थः पुनःशब्दप्रयोग इत्यवधेयम्। अन्यत् इन्दीवरादितरद्वस्तु उपमानमिति तात्पर्य्यम्, निषिध्य अपोह्य, प्रकृतस्य वर्णनायां प्रस्तुतस्य उपमेयस्येत्यर्थः। स्थापनं विन्यासो निश्चयो नामालङ्कारः स्यात्। प्रकृतस्यैव निश्चयादस्य निश्चय इत्येव संज्ञा। अत्रापि क्त्वाप्रत्ययार्थाविवक्षणात् पूर्ववदयमपि द्विविध एव प्रकृतस्थापनपूर्वकोऽन्यनिषेधः अन्यनिषेधपूर्वकं प्रकृत-स्थापनञ्चेति।

निश्चयाख्योऽयमलङ्कारः । अन्यदित्यारोप्यमाणम् (ट) । यथा मम—

"वदनमिदं न सरोजं, नयने नेन्दीवरे एते ।

इह सविधे मुग्धदृशो भ्रमर ! मुधा किं परिभ्रमसि ? (१) ॥" (ठ)

यथा वा—(ड)

"हृदि बिसलताहारो नायं भुजङ्गमनायकः

कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः ।

मलयजरजो नेदं भस्म प्रियारहिते मयि

प्रहर न हरभ्रान्त्याऽनङ्ग ! क्रुधा किमु धावसि ॥" (ढ)

(ट) ननु प्राचीनालङ्कारग्रन्थेषु निश्चयनामकालङ्कारादर्शनात् भवदुक्तलक्षणो निश्चयो नाम किमित्याह निश्चयाख्योऽयमलङ्कार इति । नूतन इति शेषः । अलङ्कारप्रकरणेऽभिधानादिति भावः । आरोप्यमाणं सौसादृश्यमहिम्ना आरोपयोग्यतां नीयमानमुपमानमित्यर्थः ।

(ठ) तत्र प्रकृतस्थापनपूर्वकान्यनिषेधे उदाहरति वदनमिति । सुन्दरीवदनसमीपे भ्रमन्तं कञ्चिद्‌भ्रमरमवलोक्य कस्यचित् रसिकस्योक्तिरियम् । हे भ्रमर ! इदं दृश्यमानं वस्तु वदनम्, किन्तु सरोजं तव पानयोग्यमधुविशिष्टं पद्मं न । तथा एते दृश्यमाने वस्तुनी नयने किन्तु इन्दीवरे तथैव नीलोत्पलयुगलं न । अतएव मुग्धदृशः सुन्दरनयनाया अस्या नायिकायाः, इह वदननयनसम्बन्धिनि सविधे समीपे किं कथं मुधा व्यर्थं परिभ्रमसि ? अनयोः पद्मत्वेन्दीवरत्वाभावेन तव पानयोग्यमध्वभावादिति भावः ।

अत्रोपमेयभूत-वदन-नयन-पूर्वकादुपमानभूत-सरोजेन्दीवरनिषेधान्निश्चयोऽलङ्कारः ।

(ड) ननु नूतनं कञ्चिदलङ्कारं प्रचारयितुं भूयसा प्रयासेन स्वकल्पितं लक्ष्यं न खलु प्राचीनलक्षणविलक्षणं किमपि लक्षणं प्रयोजयति, अप्रमाणत्वात् ; सति तु प्रसिद्धे लक्ष्ये तत्सदृशतया स्वकल्पितमपि लक्ष्यं तादृशं लक्षणं प्रयोजयत्येव तत्प्रामाण्येन तस्यापि प्रामाण्यादित्यतः प्रसिद्धं लक्ष्यं दर्शयितुमाह यथा वेति ।

(ढ) हृदीति । कामार्त्तस्य कस्यचिद्वियोगिनः खेदेनोक्तिरियम् । हे अनङ्ग ! मन्मथ ! अयं मम हृदि वक्षसि बिसलताहारो मृणालवल्लीनिर्म्मितो हारः, किन्तु भुजङ्गमनायको मृणालतुल्यशुभ्रवर्णोऽनन्तनागो न ; कण्ठे गलदेशे कुवलयदलश्रेणी नीलोत्पलपत्रमाला, किन्तु सा प्रसिद्धा गरलद्युतिः कालकूटविषस्य कृष्णवर्णा दीप्तिर्न ; तथा इदं गात्रे दृश्यमानं मलयजरजः श्वेतचन्दनरेणुः, किन्तु भस्म न । अतएव प्रियया रहिते वियुक्ते मयि हरभ्रान्त्या शिवभ्रमेण स प्रहर न स्मरं ताड़य । तथा हरत्वाभावान्मां प्रति क्रुधा कोपेन किमु कथं प्रहर्त्तुं धावसि ।

---

(१) मधुकर ! न मुधा परिभ्रम्य इति चतुर्थचरणे पाठभेदः ।

न ह्ययं निश्चयान्तः सन्देहः, तत्र संशय-निश्चययोरेकाश्रयत्वेनावस्थानात् । अत्र तु भ्रमरादेः संशयो नायकादेर्निश्चयः (ण) । किञ्च, न भ्रमरादेरपि संशयः, एककोट्यधिके (१) ज्ञाने, तथा समीपागमनासम्भवात् (त) । तर्हि भ्रान्तिमानस्तु । अस्तु नाम भ्रमरादेर्भ्रान्तिः, न चेह तस्याश्चमत्कारविधायित्वम्, अपि तु तथाविधनायकाद्युक्तेरेवेति सहृदयसंवेद्यम् (थ) । किञ्च, अविवक्षितेऽपि भ्रमरादेः पतनादौ भ्रान्तौ वा नायिका-

---

यत्रापि बिसलतादीनामुपमेयानां स्थापनपूर्वकात् भुजङ्गमनायकादीनामुपमानानां निषेधान्निश्चयोऽलङ्कारः ।

अत्रनिषेधपूर्वकमप्रकृतस्थापने यथा मम—

"न मृणाली, भुजावेतौ ; तिलपुष्पं न, नासिका ।
नेदं पल्लवमोष्ठोऽयम् ; न बिल्वे च, कुचाविमौ ॥"

(ण) इदानीमस्य प्रसिद्धालङ्कारान्तरभिन्नत्वं दर्शयितुं सम्भाव्यमानेष्वलङ्कारान्तरेषु सन्देहालङ्कारभेदाद्यवादादौ तदभिन्नत्वमेव दर्शयति न हीति । अयं नवनिबद्धो निश्चयो नामालङ्कारः । "वदनमिदं न सरोजम्" इत्यादौ निश्चयसत्त्वात् मध्ये निश्चयाभावाच्च शुद्ध-निश्चयगर्भरूपयोः सन्देहालङ्कारभेदयोरसम्भवादाह निश्चयान्तः सन्देह इति । वदने भ्रमरस्य सरोजसंशयं नायकस्य च वदननिश्चयमादाय निश्चयान्तसन्देहालङ्कारो नहीत्यर्थः । अत्र सन्देहालङ्कारे । एकाश्रयत्वेनावस्थानात् एकस्मिन्नधिकरणे एवावस्थाननियमात् । अत्र तु "वदनमिदं न सरोजम्" इत्यादौ तु । तथा चात्र संशयनिश्चययोर्भिन्नाधिकरणावस्थानान्न निश्चयान्तः सन्देह इत्याशयः ।

(त) ननु निश्चयान्तसन्देहालङ्कारे संशयनिश्चययोरेकाधिकरणावस्थाननियमे प्रमाणाभावाद्वदनमित्यादौ निश्चयान्तसन्देहालङ्कारो निर्बाध एवेत्याह किञ्चेति । नायकादेः संशयः कथमपि न, किन्तु भ्रमरादेरपि न संशय इत्यर्थः । आदिपदेन चञ्चरीकादेर्ग्रहणम् । एककोट्यधिके द्विकोटिके वदनसरोजभयविषयके ज्ञाने भ्रमरस्य संशय इत्यर्थः । तथा समीपागमनासम्भवात् वदननयनयोरत्यन्तनिकटे तस्य भ्रमरस्य गमनासम्भवात् । तथा च न खलु "इदं वदनं सरोजं वा" इति संशयानो मधुपिपासुर्भ्रमरस्तस्यात्यन्तमन्तिकमुपैति ; नहि "तृष्णातुरः कश्चित् जलं मरीचिका वा" इति सन्दिहानस्तदन्तिकं याति ; प्रत्युत तत्प्राप्तिनिश्चयाभावेन गमनप्रयासस्वीकारासम्भवात् किन्तु सरोजमेवेदमित्यादिभ्रमदर्शनेनैव तदन्तिके तस्य गमनसम्भवादिति भावः । अत्र रामचरणव्याख्यानं सुधीभिरेव सदसत्तया विवेचनीयम् ।

(थ) "सरोजमेवेदम्" इत्यादिभ्रमरादिभ्रमाङ्गीकारमाश्रित्याशङ्कते तर्हीति । वदनादौ भ्रमरादीनां सरोजादिभ्रमस्त्वङ्गीकार इत्यर्थः । भ्रान्तिमानस्तु, तल्लक्षणव्याप्तेर्भ्रमस्य निश्चयरूपतया भ्रमरादेस्तत्समीपगमनादिसम्भवाच्चेति भावः । तथाविधा वदनमिदमित्यादिरूपा या नायकाद्युक्तिस्तस्या एव चमत्कार-

---

(१) एककोट्यनधिके इति रामचरणसम्मतः पाठः ।

चाट्वादिरूपेणैव सम्भवति तथाविधोक्तिः (द)। न च रूपकध्वनिरियम्, मुखस्य कमलत्वेनानिर्द्धारणात् (ध)। न चापह्नुतिः, प्रस्तुतस्यानिषेधादिति पृथगेवायमलङ्कारश्चिरन्तनोक्तालङ्कारेभ्यः (न)।

शुक्तिकायां रजतधिया पतति पुरुषे "शुक्तिकेयम्, न रजतम्" इति कस्यचिदुक्तिर्नायमलङ्कारो वैचित्र्याभावात् (प)।

५७। भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना ॥ (फ)

विधायित्वमिति पूर्वेणान्वयः। नायिकासन्तोषकत्वात् कौतुकव्यञ्जकत्वाच्चेति भावः। तेन तादृशभ्रान्तिमादाय भ्रान्तिमानलङ्कारो न सम्भवति चमत्कारविधायिन एवालङ्कारत्वौचित्यादिति चाशयः।

(द) अथ न खल्विदं दृष्टं श्रुतं वा, यद्भ्रमरादयः सरोजादिसंशयेन नायिकावदनाद्युपरि पतन्ति, तत्र सरोजादित्वेन भ्रमं वा कुर्वन्तीति। ततश्च वक्त्रा नायकेन भ्रमरादीनां पतनादिकं तद्भ्रान्तिर्वा न विवक्षितैवेति तन्मूला तथाविधोक्तिरेव न सम्भवति, कुतस्तत्र चमत्कारविधायित्वं कुतो वा तच्चमत्कारमूलको निश्चयाख्यो नवीनालङ्कार इत्याह किञ्चेति। अविवक्षितेऽपि नायकेनेति शेषः। प्रथमादिपदेन द्वितीयश्लोकोक्तानङ्गादेर्ग्रहणम्। द्वितीयादिपदेन च तदनङ्गकृतप्रहारादेः परिग्रहः। भ्रान्तौ वा अविवक्षितायामित्यन्वयः। चाटुः प्रियभाषणम्। तृतीयादिपदेन स्ववेदनाधिक्यप्रकाशादीनां ग्रहणम्। तथाविधा "वदनमिदम्" इत्यादिरूपा "हृदि बिसलताहारः" इत्यादिरूपा च। तथा च नायिकाया वदनादेः सरोजादितुल्यत्वव्यञ्जकतया नितान्तसन्तोषकरत्वात् "वदनमिदम्" इत्यादिरूपा स्वकीयमदनवेदनातिशयव्यञ्जकत्वाच्च "हृदि बिसलताहारः" इत्यादिरूपा चोक्तिः सम्भवतीति तदीयचमत्कारितामूलको निश्चयालङ्कारोऽपि सम्भवत्येवेति भावः।

(ध) ननु तर्हि वदनादौ सरोजत्वाद्यारोपाणां व्यञ्जनागम्यत्वादयं रूपकालङ्कारध्वनिरेवास्तामित्याह न चेति। अनिर्द्धारणादनिश्चयात्। इदमुपलक्षणम्, नयनादीनामिन्दीवरादित्वेनानिर्द्धारणादित्यपि बोध्यम्। तथा च "मुखकमलम्" इत्यादौ श्रोतारो मुखादीन् कमलादिरूपत्वेन निर्द्धारयन्ति, अत्र तु तन्निर्द्धारणं दूर एवास्ताम्, प्रत्युत न सरोजमित्याद्यभिधानात् सरोजादिभिन्नत्वेनैव वदनादीन् निर्द्धारयन्तीति न रूपकगन्धोऽपीत्याशयः।

(न) अथ तदा सरोजादिनिषेधेन वदनादिस्थापनादपह्नुतिरेवेयं भवत्वित्याह पुनर्न चेति। प्रस्तुतस्य प्रकृतस्य उपमेयस्येत्यर्थः। तथा चापह्नुतौ उपमेयस्यैव निषेधनियमादत्र तु उपमानस्यैव निषेधादुपमेयस्य चानिषेधादपह्नुतेरपि प्रसक्तो नास्तीति भावः। पृथक् अतिरिक्तः, अयं निश्चयनाम्ना नवनिरुक्तः। चिरन्तनाः प्राचीनाः।

(प) क्वचिदतिव्याप्तिमाशङ्क्य निरस्यति शुक्तिकायामिति। रजतधिया रौप्यभ्रमेण, पतति तद्ग्रहणाय गच्छति। अयमलङ्कार एतदलङ्कारविषयः वैचित्र्याभावात्, वैचित्र्यस्यैव चालङ्कारत्वादित्याशयः।

(फ) प्रकृतस्थापनात्मकनिश्चयालङ्कारनिरूपणादनन्तरं निश्चयात्मकालङ्कारान्तरे जिज्ञासोदयात्

वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता।
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः॥
जातिर्गुणः क्रिया द्रव्यं यदुत्प्रेक्ष्यं द्वयोरपि।
तदष्टधापि प्रत्येकं भावाभावाभिमानतः॥
गुणक्रियास्वरूपत्वान्निमित्तस्य पुनश्च ताः।
द्वात्रिंशद्विधतां यान्ति—(ब)

इयन्निश्चयात्मकमुत्प्रेक्षालङ्कारं निरूपयति भवेदिति। अत्र सम्भावना नाम द्वयोरंशयोरेकतरांशस्य ग्रहणमपि दृढं ज्ञानम्। यथा—"सम्भावयामि स्थाणुरेवायम्" इति। अत्र हि केनापि कारणेन ज्ञानस्य स्थाण्वंशे दृढता पुरुषांशे तु दुर्बलता। अतएव सम्भावना अंशविशेषे किञ्चिन्निश्चयरूपः समुदाये तु संशयविशेष एव। शुद्धसंशयस्तु द्वयोरेवांशयोः समानबलमेव ज्ञानम्। यथा—"स्थाणुर्वा पुरुषो वा" इति। अत्र हि ज्ञानस्य स्थाण्वंशे पुरुषांशे च समानबलतैव। तेन सम्भावनम्, मनसि करणम्, मननम्, धारणम्, तर्कणा इत्यादयः सम्भावनायाः पर्यायाः। तथा च प्रकृतस्य वर्णनायां प्रस्तुतस्य उपमेयस्येति तात्पर्यम्, परात्मना तद्भिन्नभावेन उपमानरूपेणेत्यर्थः सम्भावना मनसि करणम् उत्प्रेक्षा नामालङ्कारो भवेत्। उत् ऊर्द्धदिग्गामिनी प्रेक्षा दृष्टिर्यस्यां सा उत्प्रेक्षा। यं कञ्चिदपि पदार्थं सम्भावयतो जनस्य हि दृष्टेः ऊर्द्धदेशे गमनदर्शनादीदृशी नाम व्युत्पत्तिरित्यवधेयम्।

एतेन उपमेयस्योपमानरूपेण सम्भावना उत्प्रेक्षेति लक्षणनिष्कर्षः।

उपमायामुपमानपदार्थस्य वास्तविकतया निरुक्तसम्भावनाया अभाव एव, इह तूपमानपदार्थस्य अवास्तविकतया तादृशसम्भावनायाः सद्भाव एवेति भेदः। अतएवास्या अभूतोपमेति ग्रन्थान्तरे नामान्तरम्, "चन्द्र इव मुखम्" इत्यादौ च नातिव्याप्तिः। रूपके आरोपस्य, भ्रान्तिमति भ्रमस्य, अतिशयोक्तावध्यवसायस्य च निश्चयरूपता, इह तु सम्भावनायाः संशयरूपता। किञ्च, रूपकं सारोपाख्यलक्षणामूलम्, अतिशयोक्तिश्च साध्यवसानाख्यलक्षणामूला, इयन्तु न लक्षणामूला। सन्देहः केवलसंशयरूपः इदन्तु सम्भावनात्मकसंशयरूप इत्येते भेदाः समुन्नेयाः। ग्रन्थकारस्तु अन्यथैव भेदान् दर्शयिष्यति। अतएव रूपकादिष्वपि नातिव्याप्तिः।

(ब) एवं लक्षयित्वोत्प्रेक्षां विभजते वाच्येति। वाच्या शाब्दी प्रतीयमाना चार्थी इत्येवं सा उत्प्रेक्षा प्रथमं द्विविधा मता। तत्र इवादीनां वक्ष्यमाणानां वाचकानां शब्दानां प्रयोगे वाच्या स्यात्, इवादीनामप्रयोगे पुनः परा प्रतीयमाना स्यात्। यद्यस्मात् द्वयोरपि वाच्यप्रतीयमानयोरुत्प्रेक्षाभेदयोः विषये जातिर्जातिविशिष्टो यः कश्चिदर्थः गुणः, क्रिया, द्रव्यञ्च, एतत् सर्वमेव उत्प्रेक्ष्यमुत्प्रेक्षणीयं सम्भावनीयं सम्भवति; तस्मात् एतावता समुदायेनोत्प्रेक्षा अष्टधा अष्टप्रकारा स्यात्। चतुर्णां द्वैगुण्येन अष्टानां सम्भवात्। अपि च तेषामष्टानामेव प्रकाराणां प्रत्येकमेव प्रकारः भावाभावयोरभिमानतः जात्या-

तत्र वाच्योत्प्रेक्षायामुदाहरणं दिङ्मात्रम् (भ)। यथा—

"ऊरुः कुरङ्गकदृशश्चञ्चलचेलाञ्चलो भाति।
सपताकः कनकमयो विजयस्तम्भः स्मरस्येव॥" (म)

अत्र विजयस्तम्भस्य बहुवाचकत्वाज्जात्युत्प्रेक्षा (य)।

"ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव॥" (र)

अत्र सप्रसवत्वं गुणः (ल)।

दीनां चतुर्णां प्रत्येकमेषु भावरूपाणां सम्भावनया तेषाञ्च प्रत्येकमेवाभावसम्भावनया च द्विधा द्विधा भवतीति समुदायेन तावता षोडशप्रकारा उत्प्रेक्षाः। ताश्च पुनः षोडशप्रकारा उत्प्रेक्षाः, निमित्तस्य उत्प्रेक्षणकारणस्य गुण-क्रियास्वरूपत्वात् गुणस्वरूपत्वात् क्रियास्वरूपत्वाच्च प्रत्येकप्रकारस्यैव द्वैविध्येन समुदायेन द्वात्रिंशद्विधतां यान्ति प्राप्नुवन्ति।

(भ) तत्रेति। तासु द्वात्रिंशद्विधासु उत्प्रेक्षासु मध्ये इत्यर्थः। दिङ्मात्रमेकं कथ्यते।

(म) ऊरुरिति। चञ्चल वायुवेगेन चलाचलीभूतं चेलाञ्चलं वसनप्रान्तो यस्य स तादृशः, कुरङ्गकदृशो बालहरिणनयनायाः, ऊरुः, पताकया सहेति सपताकः, कनकमयः स्वर्णनिर्मितः स्मरस्य कामस्य विजयस्तम्भ इव भाति शोभते; कामोद्दीपकत्वादिति भावः। विजयिना वीरेण विजितदेशे विजयचिह्नस्वरूपो यः स्तम्भः समारोप्यते, स विजयस्तम्भः। कुरङ्गक इत्यल्पार्थे कप्रत्ययः।

(य) अत्रेति। विजयस्तम्भस्य विजयस्तम्भशब्दस्य, बहुवाचकत्वाद्विजयस्तम्भसामान्यबोधकत्वात् जात्युत्प्रेक्षा जातिविषयकोत्प्रेक्षालङ्कारः; विजयस्तम्भत्वजातिविशिष्ट स्मर-सम्बन्धि-विजयस्तम्भोत्प्रेक्षणादिति भावः। अत्रेदमवधेयम्—ऊरुरुपमेयं विजयस्तम्भश्चोपमानम्, तथा कामस्यैव सुरताभिलाषभावरूपत्वाच्छरीरत्वे अलीकत्वेन तद्विजयस्तम्भस्याप्यलीकत्वमेवेति उपमानपदार्थस्य अवास्तविकत्वम्; इवशब्दप्रयोगादुत्प्रेक्षाया वाच्यरूपता, विजयस्तम्भरूपभावपदार्थोत्प्रेक्षणाद्भावाभिमानता, नायिकाया ऊरुदेशस्य रूपस्वरूपो गुणश्च निमित्तमिति। एवमन्यत्राप्यूह्यम्।

(र) ज्ञान इति। रघुवंशप्रथमसर्गे दिलीपवर्णनमिदम्। तस्य दिलीपस्य ज्ञाने सर्वविषयकबोधशक्तौ सत्यपि मौनम् अनावश्यके विषये मौनावलम्बनम्, न पुनर्वाचालवत्तत्रापि बहुभाषितेति भावः। शक्तौ सामर्थ्ये सत्यपि क्षमा सहिष्णुता, तथा त्यागे दाने सत्यपि श्लाघाविपर्यय आत्मप्रशंसाराहित्यम्, आसीदिति शेषः। अतएव तस्यैते ज्ञानादयो गुणाः, गुणानुबन्धित्वात् लोकप्रियत्वादिगुणान्तरप्रयोजकत्वात् समानएककालदेवोदराज्जाततया तुल्यः प्रसवो येषां ते सप्रसवाः सहोदरा इव आसन्निति शेषः। तथैवोपकारित्वादिति भावः।

(ल) अत्रेति। मत्वर्थीयप्रत्ययादिव बहुव्रीहेरनन्तरमपि भावविहितप्रत्ययस्य सम्बन्धिसम्बन्धान्तरबोधकतया व्युत्पत्तिसिद्धत्वेनात्रापि सप्रसवत्वशब्दस्य प्रसवरूपसम्बन्धिबोधकत्वात् प्रसवस्य च भूषणादरयो-

"गङ्गाम्भसि सुरत्राण ! तव निर्याणनिस्वनः (१)।
स्नातीवारिवधूवर्ग-गर्भपातनपातकी ॥" (ब)

अत्र स्नातीति क्रिया (ग)।

"मुखमेणीदृशो भाति पूर्णचन्द्र इवापरः।" (ष)

अत्र चन्द्र इत्येकव्यक्तिवाचित्वाद्द्रव्यशब्दः (स)।

एते भावाभिमाने (ह)। अभावाभिमाने (च)। यथा—

"कपोलफलकावस्याः कष्टं भूत्वा तथाविधौ।
अपश्यन्ताविवान्योन्यमीदृक्षां क्षामतां गतौ ॥" (क)

विभागरूपत्वात् विभागस्य च "संयोगश्च विभागश्च" इत्यनेन गुणतया गणनादित्याशयः। सप्रसवत्वं गुण इति तस्य चोत्प्रेक्षणादेव गुणोत्प्रेक्षेति तात्पर्य्यम्। एवमुत्तरत्रापि बोध्यम्। इदन्तु शक्यतावच्छेदकमादाय गुणोत्प्रेक्षायामुदाहरणम्। शक्यार्थमादायोदाहरणन्तु—"विश्लेषदुःखादिव बद्धमौनम्" इति। अत्र दुःखमेव गुणः।

(ब) गङ्गेति। कृपाणस्य प्रतापप्रशंसेयम्। हे सुरत्राण ! दैत्यानां वधेन देवानां रक्षक ! अरिवधूवर्गस्य शत्रुस्त्रीसमूहस्य गर्भपातनेन भयजननद्वारा गर्भपातकरणेन पातकमस्यास्तीति स तादृशः, तव निर्याणनिस्वनः शत्रुनगराक्रमणाय निर्गमनकालीनदुन्दुभिप्रभृतिशब्दः, गङ्गाया अम्भसि जले स्नातीव, तत्-पातकक्षालनार्थमिति भावः।

(ग) अत्रेति। निर्याणनिस्वनस्य गङ्गापर्य्यन्तगमनक्रिया स्नानक्रियारूपेणोत्प्रेक्षितेति क्रियोत्प्रेक्षेयम्। अतएव काव्यप्रकाशेऽपि—"लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।" इत्यादौ व्यापनादि लेपनादिरूपतया सम्भावितम्" इत्युक्तम्।

(ष) मुखमिति। "संसक्तमिव नीलाब्जं नेत्रयाव विराजते ॥" इति मत्पूरितपरार्द्धम्। एणीदृशो हरिणीनयनसदृशनयनायाः।

(स) अत्रेति। एकव्यक्तिवाचित्वादेकमात्रव्यक्तिवाचित्वे नानेकव्यक्तिनियतजातिवाचित्वाभावादित्यर्थः। द्रव्यशब्द इति। अतएव तदुपस्थाप्यद्रव्योत्प्रेक्षा इत्याशयः।

(ह) एत इति। उदाहृता विजयस्तम्भादयः प्रयोगा इत्यर्थः, भावाभिमाने भावपदार्थसम्भावनायाम्, द्रष्टव्या इति शेषः; तेषां भावरूपत्वादिति भावः।

(च) अभावेति। अभावाभिमाने जाति-गुण-क्रिया-द्रव्याणामभावसम्भावनायाम्।

(क) कपोलेति। पत्युः समीपे तद्विरहिण्याः प्रियाया अवस्थावर्णनेयं कस्यचित्। अस्या आलोच्य-मानाया रमण्याः, कपोलफलकौ गण्डयुगलम्, तथाविधौ परमसुन्दरौ भूत्वापि अन्योन्यं परस्परम् अपश्यन्ता-विव उन्नतनासिकया व्यवधानादनवलोकयन्ताविव सन्तौ, ईदृशामीदृशीं क्षामतां क्षीणतां गतौ प्राप्तौ, अन्योरदर्शने दुःखस्य क्षीणताया अवश्यम्भावादिति भावः। इत्येतदेव कष्टमित्यर्थः।

---

(१) निःशाननिस्वन इति तर्कवागीशधृतः पाठः।

अत्रापश्यन्ताविति क्रियाया अभावः (ख)। एवमन्यत् (ग)।

निमित्तस्य गुणक्रियारूपत्वे यथा—"गङ्गाम्भसि" इत्यादौ "स्नातीव" इत्युत्प्रेक्षानिमित्तं पातकित्वं गुणः। "अपश्यन्ताविव" इत्यादौ चामता-गमनरूपं निमित्तं क्रिया (घ)। एवमन्यत् (ङ)।

(ख) अत्रेति। क्रियाया दर्शनक्रियायाः, अभावः सम्भावित इति शेषः। अतएवात्र अभावाभि-मानिनी क्रियोत्प्रेक्षा इत्याशयः।

(ग) एवमिति। अन्यत्—जाति-गुण-द्रव्याणां प्रत्येकमभावाभिमाने उदाहरणम्, एवमनुसन्धेयमित्यर्थः। तत्र जातेरभावाभिमाने यथा मम—

"अभावादिव पद्मिन्या हेमन्तेऽस्मिन् हिमच्छलात्।
नितान्तकातराकारो विवस्वानश्रु मुञ्चति॥"

अत्र पद्मिनीति बहुव्यक्तिवाचित्वाज्जातिशब्दः।

गुणस्याभावाभिमानेऽपि यथा ममैव—

"इन्दोरयोगादिव लुण्ठिताङ्गीं दिने द्विरेफो मधु पातुमिच्छन्।
कुमुद्वतीं मुद्रियुतामुपैति प्रायो वियुक्तां हि विटः प्रयाति॥"

अत्र इन्दोः संयोगरूपगुणस्याभाव उत्प्रेक्षितः।

द्रव्यस्याभावाभिमानेऽपि यथा मम वियोगवैभवखण्डकाव्ये—

"समुचितनवसन्ध्यारक्तवासो वसाना मलिनमुखसरोजा लब्धताराक्षमाला।
विगलितशिशिराश्रुः सा दिनश्रीरभावात् सवितुरिव विषण्णा मत्यं धाम व्यमुञ्चत्॥"

अत्रैकव्यक्तिमात्रवाचकसवितृशब्दवाच्यस्य सूर्यरूपद्रव्यस्याभाव उत्प्रेक्षितः।

(घ) एवं जात्यादीनां चतुर्णां भावाभिमाने भेदचतुष्टयमभावाभिमाने च भेदचतुष्टयमित्यष्टौ वाच्योत्प्रेक्षाया भेदान् दर्शयित्वा इदानीं तेषामेव प्रत्येकतो गुणनिमित्तकत्वेन क्रियानिमित्तकत्वेन च प्रत्येकत एव पुनर्द्वौ द्वौ भेदौ दर्शयितुमाह निमित्तस्येति। गुणरूपत्वे क्रियारूपत्वे च क्रमादुदाहरणे इत्यर्थः। पातकित्वं नाम पातकं तच्च पतनजनकत्वात् पापमेव, पापञ्च गुणविशेष एव "अदृष्टं शब्द एव च" इत्यनेन गुणत्वेन गणनात् "धर्माधर्मावदृष्टं स्यात्" इति तद्विभागाच्च। तस्य च पापस्य ज्ञानसम्बन्धेन गङ्गास्नानक्रियाया हेतुत्वादित्याशयः। चामतेति। चामताप्राप्तिहेतुकादेव "अपश्यन्ताविव" इत्युत्प्रेक्षणा-दित्यभिप्रायः।

"निष्पन्दमरविन्दाक्षि! नेत्रद्वन्द्वमिदं तव।
चिरविश्लिष्टमेकान्तं कान्तमाध्यायति ध्रुवम्॥"

इत्यत्रापि विभागात्मकचिरविच्छेदरूपो गुण एव ध्यानक्रियोत्प्रेक्षाया निमित्तं निर्बाधमेव। अतो राम-चरणस्य गुणक्रियेतरपदार्थस्यापि उत्प्रेक्षानिमित्तत्वकल्पनमनावश्यकतया हेयमेव।

(ङ) एवमिति। अन्यत्—वाच्योत्प्रेक्षाया गुणनिमित्तकं क्रियानिमित्तकञ्च अपरमुदाहरणम्।

प्रतीयमानोत्प्रेक्षा यथा—

"तन्वङ्ग्याः स्तनयुग्मेन मुखं न प्रकटीकृतम्।
हाराय गुणिने स्थानं न दत्तमिति लज्जया॥" (च)

अत्र लज्जयेवेति इवाद्यभावात् प्रतीयमानोत्प्रेक्षा (छ)। एवमन्यत् (ज)।

ननु ध्वनिनिरूपणप्रस्तावे अलङ्काराणां सर्वेषामपि व्यङ्ग्यत्वं भवतोक्तम्, सम्प्रति पुनर्विशिष्य कथमुत्प्रेक्षायाः प्रतीयमानत्वम्?। उच्यते—व्यङ्ग्योत्प्रेक्षायाम् (झ)।

...नुक्तमित्यर्थः। तथा च "ऊरुः कुरङ्गकदृशः" इत्यादौ ऊरौ रूपं गुणः, "ज्ञाने मौनम्" इत्यादौ ...न्तरजननरूपा क्रिया। "मुखमेणीदृशः" इत्यादौ सौन्दर्य्याद्यतिशयरूपो गुणः, स चानुक्तः। एवमन्यत्रा-...ह्यम्।

(च) तन्वङ्ग्या इति। तन्वङ्ग्याः स्वभावत एव कृशदेहाया अस्या रमण्याः स्तनयुग्मेन गुणिने ...दर्शने सूत्रग्रथितायेत्यर्थः विद्या-गौरवादिगुणविशिष्टाय जनायेति च व्यज्यते, स्थानं न दत्तं नितान्तघन-...त्वेन दवस्थितिप्रदेशो न दत्त इति हेतोर्लज्जयेव, मुखं वदनम् अग्रदेशद्वयञ्च न प्रकटीकृतं न प्रकाशित...त्वेन जने न दर्शितमित्यर्थः, एकत्र उक्तया लज्जया अन्यत्र तु वसनावृततयेति भावः। अन्योऽपि विद्यादि-...दर्शने जनाय कुतोऽपि कारणात् स्थानमदत्त्वा लज्जया लोकसमाजे मुखं न प्रकाशयति।

(छ) अत्रेति। आदिशब्देन मन्ये प्रभृत्युत्प्रेक्षावाचकान्तराणां ग्रहणम्। प्रतीयमानोत्प्रेक्षेति। ...च लज्जाया गुणविशेषत्वाद्भावरूपत्वात् हेतुरूपत्वाच्च हेतुभूतगुणोत्प्रेक्षणरूपा भावाभिमानिनी।

(ज) एवमिति। अत्र प्रतीयमानायां जातिरूपहेतूत्प्रेक्षायां यथा मम—

"शार्ङ्गं युवीरसा युद्धे कठिनात्मा जयार्जनात्। वीरत्वाद्भजतेऽत्यन्तं तुङ्गत्वं तरुणीस्तनः॥"

अत्र इवाद्यभावात् वीरत्वादिवेति हेतुभूतवीरत्वजातेरुत्प्रेक्षणाच्च प्रतीयमाना जात्युत्प्रेक्षा। प्रतीयमानगुणोत्प्रेक्षायान्तु "तन्वङ्ग्याः" इत्याद्युदाहृतमेव। "रावणस्यापि" इत्यादौ "इव" इत्यत्र ...तु" इति पाठे प्रतीयमाना आख्यातुमिति फलभूतक्रियोत्प्रेक्षा। प्रतीयमाना द्रव्योत्प्रेक्षा यथा मम—

"यामिन्याः प्रथमे यामे द्रुतं प्रवसता सता। एकान्तस्मरसन्तप्ता त्वया सा भुवि शायिता॥"

अत्रापि इवाद्यभावात् त्वयेत्येकव्यक्तिवाचित्वात् हेतुभूतत्वाच्च त्वयेवेति प्रतीयमाना हेतुभूतद्रव्योत्प्रेक्षा। ...माना स्वरूपोत्प्रेक्षा तु न सम्भवतीति परस्ताद्वक्ष्यति। एवमभावाभिमानेऽपि प्रतीयमानोत्प्रेक्षा ...या।

(झ) ननु "तन्वङ्ग्याः स्तनयुग्मेन" इत्यादावुत्प्रेक्षालङ्कारध्वनेरङ्गीकारेणैवोपपत्तौ किमर्थमुत्प्रेक्षायाः ...मानात्वमिदसामान्यमेवाङ्गीक्रियत इत्याशङ्कते नन्विति। उक्तमिति। "वस्तु वालङ्कृतिर्वाऽपि" इत्यने-

"महिलासहस्सभरिए तुह हिअए सुहअ! सा अमाअन्ती।
अणुदिणमणस्सकम्मा अङ्गं तणुअं पि तणुएइ॥" (ञ)

इत्यादावुत्प्रेक्षणं विनापि वाक्यविश्रान्तिः, इह तु स्तनयोर्लज्जाया असम्भवात् लज्जयेवेत्युत्प्रेक्षयैवेति व्यङ्ग्य-प्रतीयमानोत्प्रेक्षयोर्भेदः (ट)।

अत्र वाच्योत्प्रेक्षायाः षोड़शसु भेदेषु विशेषमाह—

५८। तत्र वाच्याभिदाः पुनः।
विना द्रव्यं त्रिधा सर्वाः स्वरूप-फल-हेतुगाः॥ (ठ)

तत्रोक्तेषु वाच्यप्रतीयमानोत्प्रेक्षयोर्भेदेषु मध्ये ये वाच्योत्प्रेक्षायाः षोड़शभेदास्तेषु च जात्यादीनां त्रयाणां ये द्वादशभेदास्तेषां प्रत्येकं स्वरूप-फल-हेतु-गतत्वेन द्वादशभेदतया षट्त्रिंशद्भेदाः, द्रव्यस्य स्वरूपोत्प्रेक्षणमेव सम्भवतीति चत्वार इति मिलित्वा चत्वारिंशद्भेदाः (ड)।

नेति शेषः। उच्यते सिद्धान्त इत्यर्थः। व्यङ्ग्योत्प्रेक्षायामुत्प्रेक्षालङ्कारध्वनौ "इत्यादावुत्प्रेक्षणं विनापि वाक्यविश्रान्तिः" इति परेणान्वयः।

(ञ) महिलेति। चतुर्थपरिच्छेद एवैतदनूदितं व्याख्यातञ्च द्रष्टव्यम् (२३७ पृष्ठे)। अत्र अमान्तीवेति अभावाभिमानि प्रतीयमान-क्रियोत्प्रेक्षाध्वनिरवगन्तव्यः। किञ्चात्र, विशेषोक्तिध्वनिरपि तत्प्रस्तावे दर्शितः।

(ट) इत्यादाविति। उत्प्रेक्षणम् "अमान्तीव" इति सम्भावनाम्। वाक्यस्य विश्रान्तिः समाप्तिः सम्भवतीति शेषः। अनुपपत्तिलेशस्याप्यभावादिति भावः। इह तु "तन्वङ्ग्याः स्तनयुग्मेन" इत्यादौ तु। असम्भवादिति। स्तनयोरचेतनत्वादिति भावः। उत्प्रेक्षयैवेति। उत्प्रेक्षावाचकस्य इवशब्दस्य अध्याहार-कल्पनयैवेत्यर्थः, वाक्यविश्रान्तिरिति पूर्वेणान्वयः। व्यङ्ग्य-प्रतीयमानोत्प्रेक्षयोरुत्प्रेक्षाध्वनि-प्रतीयमानोत्प्रेक्षयोः। तथा च तत्रोत्प्रेक्षणं विना अन्वयानुपपत्तिस्तत्र प्रतीयमानोत्प्रेक्षा, यत्र तु अन्वयोपपत्तिस्तत्र उत्प्रेक्षाध्वनिरिति भेदात् प्रतीयमानोत्प्रेक्षासामान्यमङ्गीकर्त्तव्यमेवेति भावः।

(ठ) वाच्योत्प्रेक्षाः पुनर्विभजते तत्रेति। तत्र तेषु वाच्योत्प्रेक्षा-प्रतीयमानोत्प्रेक्षयोर्भेदेषु मध्ये, द्रव्यं वाच्यां द्रव्योत्प्रेक्षां विना, अन्याः सर्वा वाच्याया उत्प्रेक्षाया भिदा भेदाः स्वरूप फल-हेतुगाः सत्यः, पुनस्त्रिधा त्रिविधा भवन्ति। स्वरूपस्य फलस्य हेतुश्च गच्छन्तीति तात्पर्थोक्ताः। "तादर्थ्यचतुर्थ्यन्तेन तुमुनन्तेन वा पदेन यत्रोत्प्रेक्षा सा फलोत्प्रेक्षा। हेतुविभक्त्यन्तपदेनोत्प्रेक्षा हेतूत्प्रेक्षा। ताभ्यामितरा स्वरूपोत्प्रेक्षा" इति तर्कवागीशः।

(ड) स्फुटमेव कारिकार्थं विवृणोति तत्रेति। त्रयाणां जाति-गुण-क्रियारूप पदार्थानाम्। "विना द्रव्यम्" इत्यस्य हेतुगर्भं निष्कर्षमाह द्रव्यस्येति। स्वरूपोत्प्रेक्षणमेव, न तु फलतया हेतुतया वा उत्प्रेक्षणम्

अत्र स्वरूपोत्प्रेक्षा यथा पूर्वोदाहरणेषु "स्मरस्य विजयस्तम्भः" इति, "अप्रसवा इव" इत्यादयो जातिगुणस्वरूपगाः (१) (ड)। फलोत्प्रेक्षा यथा—

"रावणस्यापि रामास्तो भित्त्वा हृदयमाशुगः।
विवेश भुवमाख्यातुमुरगेभ्य इव प्रियम्॥" (ण)

अत्र "आख्यातुम्" इति भूप्रवेशस्य फलं क्रियारूपमुत्प्रेक्षितम् (त)। हेतूत्प्रेक्षा यथा—

"सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम्।
अदृश्यत त्वच्चरणारविन्द-विश्लेषदुःखादिव बद्धमौनम्॥" (थ)

अत्र दुःखरूपो गुणो हेतुत्वेनोत्प्रेक्षितः (द)। एवमन्यत् (ध)।

…देशब्दार्थः, तथात्वे वैचित्र्यासम्भवादित्याशयः। इदन्तु वाच्योत्प्रेक्षामात्रनियतम्, प्रतीयमानोत्प्रेक्षायान्तु …रूपोत्प्रेक्षणमेव न सम्भवति, किन्तु फलोत्प्रेक्षणं हेतूत्प्रेक्षणञ्च सम्भवत्येव; वैचित्र्यसम्भवात् "प्रतीय-…भेदाश्च प्रत्येकं फलहेतुगाः" इति वक्ष्यमाणात् "स्वरूपोत्प्रेक्षाप्यत्र न भवति" इत्यभिधास्यमानाच्च।

(ड) अत्रेति। पूर्वोदाहरणेषु "ऊरुः कुरङ्गकदृशः" इत्यादिषु। आदिशब्देन "ज्ञातेव" "पूर्णचन्द्र-…नः" इत्यनयोर्ग्रहणम्। तेन "जातिगुण" इत्यनन्तरमप्यादिशब्दान्तरमध्याहर्त्तव्यम्।

(ण) रावणस्येति। रघुवंशद्वादशसर्गे श्लोकोऽयम्। रामेण अस्तो विक्षिप्तः, आशुगो बाणः, …णस्य हृदयं भित्त्वापि, उरगेभ्यः पातालवासिभ्यः सर्पेभ्यः, प्रियं रावणवधरूपं प्रीतिजनकवृत्तान्तम्, रावणस्य …वासिष्वपि कृतात्याचारत्वादिति भावः, आख्यातुं वक्तुमिव भुवं विवेश।

(त) अत्रेति। उत्प्रेक्षितमिति। केवल एव भूप्रवेश आख्यानफलकत्वेन सम्भावित इत्यर्थः।

(थ) सैषेति। रघुवंशत्रयोदशसर्गे श्लोकोऽयम्। एषा दृश्यमाना सा स्थली स्थानम्, यत्र स्थल्याम्, …त्वां विचिन्वता अन्विष्यता मया, उर्व्यां भूतले भ्रष्टं तव चरणारविन्दादेव विच्युतम्, एकं नूपुरम्, …चरणारविन्दयो विश्लेषो विच्छेदस्तेन यत् दुःखं तस्मादिव हेतोः, बद्धमौनं मौनावलम्बि निःशब्द-…ति यावत्, अदृश्यत दृष्टम्।

(द) अत्रेति। हेतुत्वेन बद्धमौनत्वस्येत्यर्थः। उत्प्रेक्षितः सीताचरणविश्लेष एव तज्जन्यदुःख-…त्वेन सम्भावितः।

(ध) एवमिति। तत्र गुणरूपफलोत्प्रेक्षा यथा काव्यप्रकाशे—

"उन्मेषं यो मम न सहते जातिवैरी निशायामिन्दोरिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः।
नीतः शान्तिं प्रसभमनया वक्त्रकान्त्येति हर्षात् लग्ना मन्ये ललिततनु! ते पादयोः पद्मलक्ष्मीः॥"

अत्र हर्षफलं पादसंयोगात्मकगुणरूपमुत्प्रेक्षितम्।

---

(१) जातिगुणरूपाः, जातिगुणरूपगा इति पाठभेदौ।

५९ । उक्त्यनुक्त्योर्निमित्तस्य द्विधा तत्र स्वरूपगाः । (न)

तेषु चत्वारिंशत्संख्यकेषु भेदेषु मध्ये ये स्वरूपगाः षोड़शभेदाः, ते उत्प्रेक्षानिमित्तस्योपादानानुपादानाभ्यां द्वात्रिंशद्भेदा इति मिलित्वा षट्-पञ्चाशद्भेदा वाच्योत्प्रेक्षायाः (प) ।

तत्र निमित्तस्योपादानं यथा पूर्वोदाहृते "स्नातीव" इत्युत्प्रेक्षायां निमित्तं पातकित्वमुपात्तम् । अनुपादाने यथा—"चन्द्र इवापरः" इत्यत्र तथाविध-सौन्दर्य्याद्यतिशयो नोपात्तः (फ) । हेतुफलयोस्तु नियमेन निमित्तस्योपादान-मेव । तथाहि "विश्लेषदुःखादिव" इत्यत्र यन्निमित्तं बद्धमौनत्वम् "आख्यातु-मिव" इत्यत्र च भूप्रवेशस्तयोरनुपादाने असङ्गतमेव वाक्यं स्यात् (ब) ।

प्रतीयमानायाः षोड़शसु भेदेषु विशेषमाह—(भ)

हेतुभूतजात्युत्प्रेक्षा यथा—"स्वाङ्गं युवोरसा युद्धे कठिनात्मा जयार्जितात् ।
वीरत्वादिव सम्प्राप्तस्तुङ्गत्वं तरुणीस्तनः ॥"

अत्र तुङ्गत्वप्राप्तिहेतुर्वीरत्वजातिरुत्प्रेक्षिता । एवमन्यदप्यनुसन्धेयम् ।

(न) तत्रापि स्वरूपोत्प्रेक्षाः पुनर्विभजते उक्तीति । तत्र प्रागुक्तेषु प्रकारेषु मध्ये स्वरूपगा उत्प्रेक्षाप्रकाराः, निमित्तस्य स्वस्वकारणस्य उक्तौ अनुक्तौ च द्विधा पुनर्द्विप्रकारा भवन्ति ।

(प) तेष्विति । षोड़शभेदा इति । जातेर्भावाभिमाने एकः अभावाभिमाने चैकः, तयोश्च प्रत्येकं गुणनिमित्तकत्वात् क्रियानिमित्तकत्वाच्च पुनर्द्वैविध्येन चत्वारः, एवं गुणस्य चत्वारः, क्रियायाश्चत्वारः, द्रव्यस्य च चत्वार इति मिलित्वा स्वरूपोत्प्रेक्षाः षोड़शभेदाः । प्राक्प्रदर्शितचत्वारिंशद्भेदेभ्यश्च तेषां षोड़शभेदानां पृथक्करणे चतुर्विंशतिभेदाः अवशिष्यन्त इत्यवधेयम् । ततश्च पुनस्तेषां षोड़शानां स्वरूपोत्प्रेक्षाणां निमित्तस्योपादानेन अनुपादानेन च प्रत्येकं द्वैविध्यात् द्वात्रिंशद्भेदतया तेषाञ्च द्वात्रिंशद्भेदानां तैश्चतुर्विंशति-भेदैः सह मेलने षट्पञ्चाशद्भेदा भवन्तीति ।

(फ) तत्रेति । तथाविधो मुखचन्द्रोभयगतः । आदिपदेनाह्लादकत्वादेर्ग्रहणम् ।

(ब) हेत्विति । हेतुफलयोस्तु उत्प्रेक्षणे इति शेषः । नियमेन अवश्यम्भावेन । तत्र हेतूत्प्रेक्षायां फलमेव निमित्तम्, फलोत्प्रेक्षायाञ्च हेतुरेवेति बोद्धव्यम् । "येन विना यन्न भवति तत्तस्य निमित्तम्" इति लक्षणात् फलं विना हेतूत्प्रेक्षणस्य हेतुं विना च फलोत्प्रेक्षणस्य सर्वथैवासम्भवात् । निमित्त-मुत्प्रेक्षणकारणीभूतं यद्बद्धमौनत्वमित्यर्थः । भूप्रवेश इत्यत्रापि यच्छब्दस्य लिङ्गव्यत्ययेन यन्निमित्तमित्यनु-षज्यते । तथा च आख्यातुमिवेत्युत्प्रेक्षणनिमित्तीभूतो यश्च भूप्रवेश इत्यर्थः । तयोर्बद्धमौनत्वभूप्रवेशयोः । असङ्गतमेवेति । तथा च "त्वच्चरणारविन्दविश्लेषदुःखादिव अद्दश्यत" इति मात्रस्य "आशुग उरगेभ्यः प्रिय-माख्यातुमिव" इति मात्रस्य चोक्तौ आकाङ्क्षितपदाभावेन वाक्यमभिप्रेतार्थबोधनासमर्थमेव स्यादिति भावः ।

(भ) प्रतीयेति । चतुर्णां जाति-गुण-क्रिया-द्रव्याणां भावाभिमाने चत्वारः अभावाभिमाने च

६० । प्रतीयमानाभेदाश्च प्रत्येकं फलहेतुगाः ॥ (म)

यथोदाहृते "तन्वङ्ग्याः स्तनयुग्मेन" इत्यत्र "लज्जयेव" इति हेतुरुत्-[प्रे]क्षितः (य)।

अस्यामपि निमित्तस्यानुपादानं न सम्भवति, इवाद्यनुपादाने निमि-[त्त]स्य चाकीर्त्तने उत्प्रेक्षणस्य प्रमातुर्निश्चेतुमशक्यत्वात् (र)। स्वरू-[पो]त्प्रेक्षाप्यत्र न भवति, धर्मान्तर-(१) तादात्म्यनिबन्धनायामस्यामिवाद्य-[प्र]योगे विशेषणयोगे सत्यतिशयोक्तेरभ्युपगमात् (ल)। यथा—"अयं राजा

[...]र इत्यष्टौ भेदाः, तेषाञ्च पुनर्गुणनिमित्तकत्वात् क्रियानिमित्तकत्वाच्च प्रत्येकमेव द्वैविध्येन प्रतीयमानोत्-[प्रेक्षा]या अपि मौलिकाः षोडशभेदा इत्यवधेयम् ।

(म) तानपि भेदान् पुनर्विभजते प्रतीयमानेति । प्रतीयमानाया उत्प्रेक्षाया उक्ताः षोडशभेदाश्च [...]व्येव, फलं हेतुञ्च गच्छन्तीति फलहेतुगाः फलगता हेतुगताश्चेति द्विविधाः सन्तः समुदायेन द्वात्रिंशद्भेदा [भव]न्तीत्यर्थः ।

(य) यथेति । तत्र प्रतीयमानोत्प्रेक्षा फलगता यथा—"रावणस्यापि" इत्यादौ "उरगेभ्यः किल [...]" इति पाठे । तथा चात्र इवाद्यभावात् प्रतीयमानता आख्यातुमिवेति फलोत्प्रेक्षणाच्च फलगतेति [ज्ञेय]म् ।

(र) अस्यामिति । न केवलं वाच्यायां हेतुफलयोरुत्प्रेक्षायाम्, अस्यां प्रतीयमानायामपि हेतुफलयो-[रि]त्यर्थः । उत्प्रेक्षणस्य सम्भावनायाः, प्रमातुर्बोद्धुः श्रोतुरिति यावत् । तथा च—"तन्वङ्ग्या [...]न मुखं न प्रकटीकृतम् । हाराय गुणिने स्थानं पीवरेण न चार्पितम् ॥" इति पाठे काचिदपि [उत्प्रेक्षा अ]स्तीति केनापि निश्चेतुं न शक्यत एवेति भावः ।

(ल) ननु पूर्ववदत्र कारिकायामपि स्वरूपेति कथं नोक्तमित्याह स्वरूपोत्प्रेक्षापीति । अत्र [प्रतीयमा]नोत्प्रेक्षायाम् । धर्मान्तरस्य उपमानभूतस्य अपरस्य विशेष्यपदार्थस्य यत्तादात्म्यम् उपमेयभूत-[धर्मे]ण सहाभेदस्तदेव निबन्धनं प्रयोजकं यस्यास्तस्याम् । इदन्तु अतिशयोक्तेरभ्युपगमं प्रति हेतुभूतं [विशेषण]म् । अस्यामुत्प्रेक्षायाम् । विशेषणयोगे असम्भवार्थकविशेषणपदसमभिव्याहारे । अभ्युप-[गमा]ङ्गीकारात् । तथा च उपमानोपमेययोरभेदप्रतिपत्तिनिबन्धना रूपकोत्प्रेक्षातिशयोक्तयस्तिस्र एव ; [तत्र इवा]द्यभावे असम्भवविशेषणाभावे च आरोपमात्रप्रतीते रूपकमेव, संशयविशेषरूपायाः सम्भावनाया [द्योतक]मिवादीनां योगे असम्भवविशेषणयोगे च सम्भावनाया एव प्रतीतेरुत्प्रेक्षैव, तादृशसम्भावना-[द्योतक]मिवादीनामयोगे असम्भवविशेषणयोगे च सिद्धरूपतया निश्चयरूपस्याध्यवसायस्यैव प्रतीतेरति-[शयोक्ति]रेव, स्वस्वलक्षणव्याप्तेरितरस्य चाव्याप्तेरित्याशयः ।

(व) तादृशस्थले अतिशयोक्तिमुदाहर्त्तुमाह यथेति । अत्र राजेत्युपमेयम्, पाकशासन इत्युप-

---

(१) धर्मान्तर इति रामचरणसम्मतः पाठः ।

अपरः पाकशासनः” इति (व)। विशेषणाभावे च रूपकस्य; यथा—“राजा पाकशासनः” इति (श)। तदेवं द्वात्रिंशत्प्रकाराः प्रतीयमानोत्प्रेक्षाः।

६१। उक्त्यनुक्त्योः प्रस्तुतस्य प्रत्येकं ता अपि द्विधा। (ष)

ता उत्प्रेक्षाः। उक्तौ यथा—“ऊरुः कुरङ्गकदृशः” इति (स)। अनुक्तौ यथा मम प्रभावत्याम्—“प्रद्युम्नः। इह हि सम्प्रति प्रतिदिगन्तमाच्छादयता तिमिरपटलेन—(ह)

घटितमिवाञ्जनपुञ्जैः पूरितमिव मृगमदक्षोदैः।
ततमिव तमालतरुभिर्वृतमिव नीलांशुकैर्भुवनम्॥” (च)

अत्र अञ्जनेन घटितत्वादेरुत्प्रेक्षणीयस्य विषयव्याप्तत्वं नोपात्तम् (क)। यथा वा—(ख)

मानम्, द्वितीयस्य पाकशासनस्याभावादपर इति चासम्भवं विशेषणम्। एवञ्चात्र सम्भावनावाचका- मिवादीनामभावात् असम्भवविशेषणयोगाच्च अध्यवसायस्यैव प्रतीतेरतिशयोक्तिरेवेति भावः।

(श) विशेषणेति। विशेषणाभावे असम्भवविशेषणाभावे चकारादिवाद्यभावे च; रूपकस्य अभ्यु- गमादिति पूर्वेणान्वयः। तत्र तूक्तादेव हेतोरारोपमात्रप्रतीते रूपकमेवेत्यभिप्रायः। एवञ्च इवादि- सम्भवपरविशेषणयोगेऽपि च रूपकमेव। यथा—“अयं राजा पाकशासनः” “राजा महाप्रभावः पाक- शासनः” इति। पाकशासनस्तु इन्द्रः।

(ष) वाच्य-प्रतीयमानयोरुभयोरपि सर्वानेव भेदान् पुनरपि द्वैविध्येन विभजते उक्तीति। त- पूर्वोक्तभेदभिन्नाः सर्वा अपि उत्प्रेक्षाः प्रत्येकमेव, प्रस्तुतस्य प्रकृतस्य उपमेयस्येत्यर्थः, उक्त्यनुक्त्योः उपा- दानानुपादानयोः सम्भवन्तीति द्विधा पुनर्द्विविधा भवन्तीत्यर्थः। तेन षट्पञ्चाशत्प्रकारा वाच्योत्प्रेक्षा द्वात्रिंशत्प्रकाराश्च प्रतीयमानोत्प्रेक्षा इति मिलित्वा अष्टाशीतिप्रकारा उत्प्रेक्षाः, पुनश्च प्रस्तुतस्य उपा- दानानुपादानाभ्यां प्रत्येकमेव द्वैविध्येन समुदाये एकशतषट्सप्ततिप्रकाराः सम्पन्नाः। एतेन काव्य- प्रकाशकृतः “सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्” इत्येकप्रकारमात्राभिधानं कटाक्षितम्। न च ता इत्यनेन सन्निहिताः प्रतीयमानोत्प्रेक्षा एव ग्राह्या इति वाच्यं “ता उत्प्रेक्षाः” इति वृत्तौ सामान्योत्प्रेक्षाणाम् एवाभिधानात् “ऊरुः कुरङ्गकदृशः” इति वाच्योत्प्रेक्षाया उदाहरणाच्च।

(स) उक्ताविति। प्रस्तुतस्येति शेषः। अत्र नायिकाया ऊरुः प्रस्तुत उपमेय उक्तः।

(ह) अनुक्ताविति। अत्रापि प्रस्तुतस्येति शेषः। प्रतिदिगन्तं सर्वा दिश इत्यर्थः। तिमिरपटलेन अन्धकारसमूहेन हेतुनेत्यर्थः।

(च) घटितमिति। भुवनं जगन्मण्डलम्, अञ्जनपुञ्जैः कज्जलस्तूपैः, घटितं विहितमिव; मृगमदक्षोदैः कस्तूरीरेणुभिः पूरितं सम्भृतमिव; तमालतरुभिस्ततं व्याप्तमिव; तथा नीलांशुकैर्नील- वर्णवसनैः, वृतमावृतमिव।

"लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।" (ग)

अत्र तमसो लेपनस्य व्यापनरूपो विषयो नोपात्तः, अञ्जनवर्षणस्य तमःसम्पातः (घ)। अनयोरुत्प्रेक्षानिमित्तञ्च तमसोऽतिबहुलत्वं धारारूपेणाधःसंयोगश्च यथासंख्यम् (ङ)।

केचित्तु "अलेपनकर्त्तृभूतमपि तमोलेपनकर्त्तृत्वेनोत्प्रेक्षितं व्यापनञ्च निमित्तम्; एवं नभोऽपि वर्षणक्रियाकर्त्तृत्वेन" इत्याहुः (च)।

(क) अत्रेति। उत्प्रेक्षणीयस्य अञ्जनघटितत्वादेरित्यन्वयः, उपमानभूतस्येत्यर्थः। विषयः प्रकृतमुपमेयमिति यावत् यद्व्याप्तत्वं तत्र उपात्तमुक्तम्। तथा च उक्तपद्ये तिमिरपटलेन भुवनव्यापनरूपमुपमेयं नोक्तमिति सरलार्थः।

(ख) ननु शिष्टैरपरिगृहीतमर्वाचीनं भवत्कृतपद्यमप्रमाणमित्याह यथा वेति।

(ग) लिम्पतीति। "असत्पुरुषसेवेव दृष्टिर्विफलतां गता॥" इति मृच्छकटिकप्रकरणे परार्द्धम्। तमोऽन्धकारः, अङ्गानि लिम्पतीव; तथा नभ आकाशः, अञ्जनं कज्जलं वर्षतीव।

(घ) अत्रेति। लेपनस्य उपमानस्य, व्यापनरूपः सर्वेष्वङ्गेषु निविड़सम्बन्धरूपः, प्रस्तुतमुपमेयम्। अञ्जनवर्षणस्य च उपमानस्य, तमःसम्पातः अन्धकारपतनरूपो विषयः प्रस्तुतमुपमेयमिति यावत्, नोपात्त इति पूर्वेणानुषज्यते।

(ङ) ननु किं तावदनयोरुत्प्रेक्षणनिमित्तमित्याह अनयोरिति। "लिम्पतीव" इत्यस्य "वर्षतीव" इत्यस्य चेत्यर्थः। यथासंख्यमिति। "लिम्पतीव तमोऽङ्गानि" इत्यत्र उत्प्रेक्षानिमित्तं तमसोऽतिबहुलत्वम् अतिबहुलत्वाद्घनभावेन अङ्गसंयोगः; "वर्षतीवाञ्जनं नभः" इत्यत्र च तमसो धारारूपेण अविच्छिन्नभावेन अधःसंयोग इत्यर्थः। इदन्तु अन्धकारस्य द्रव्यत्ववादिमतमाश्रित्याभिहितमिति बोध्यम्; अन्धकारस्य आलोकसामान्याभावरूपत्ववादिमते तु तस्य संयोगासम्भवात्, "गुणादिर्निर्गुणक्रियः" इत्यभिधानात्। तथा चोक्तम्—

"तमस्तमालवर्णाभं चलतीति प्रतीयते। रूपवत्त्वात् क्रियावत्त्वात् द्रव्यन्तु दशमं तमः॥" इति।

(च) केचिदिति। अलेपनकर्त्तृभूतमपीति। तैलादिवत्तमसस्तरलत्वाभावेन तत्कर्त्तृकलेपनासम्भवादिति भावः। व्यापनं तमसः सर्वाङ्गसम्बन्धः। नभोऽपीति निष्क्रियत्वादसम्भवाच्च अनञ्जनवर्षणकर्त्तृभूतमपि नभ इत्यर्थः। अञ्जनस्य वर्षणक्रियाकर्त्तृत्वेन उत्प्रेक्षितमिति पूर्वेणान्वयः। अत्र तेषामयमाशयः—लिम्पतीत्यत्र वर्षतीत्यत्र च धातूपस्थापिता लेपनक्रिया वर्षणक्रिया च, तिङुपस्थापितश्च तयोः कर्त्ता, कर्त्तुश्च प्रयोजकत्वात् प्राधान्यम्। तेन क्रियाकर्त्रोर्द्वयोरेवोत्प्रेक्षणसम्भवे "अव्यक्तं प्रधानगामि" इति पूर्वमीमांसासूत्रन्यायेन उभयत्रापि कर्त्तुरेवोत्प्रेक्षणमिति जात्युत्प्रेक्षैवेति। ग्रन्थकारस्तु मन्यते कर्त्तुः कारकान्तरप्रयोजकत्वात् तेभ्य एव प्राधान्यम्, न तु क्रियातः। किञ्च, क्रियायाः प्रतीतिपर्यवसानस्थानत्वात्तस्या एव विशेष्यत्वेन शाब्दबोधे प्राधान्यमिति लेपनवर्षणयोरुत्प्रेक्षणस्यैव न्याय्यत्वात् क्रियोत्-

६२। अलङ्कारान्तरोत्था सा वैचित्र्यमधिकं वहेत् (१)॥ (छ)

तत्र सापह्नवोत्प्रेक्षा (ज) यथा मम—

"अश्रुच्छलेन सुदृशो हुतपावक-धूम-कलुषाक्ष्याः।
अप्राप्य मानमङ्गे विगलति लावण्यवारिपूर इव॥" (झ)

श्लेषहेतुगा (ञ) यथा—

"मुक्तोत्करः सङ्कटशुक्तिमध्याद्विनिर्गतः सारसलोचनायाः।
जानीमहेऽस्याः कमनीयकम्बु-ग्रीवाधिवासाद्गुणवत्त्वमाप॥" (ट)

अत्र गुणवत्त्वे श्लेषः, कम्बुग्रीवाधिवासादिवेति हेतूत्प्रेक्षाया हेतुः (ठ)। अत्र "जानीमहे" इत्युत्प्रेक्षावाचकम् (ड)। एवम्—(ढ)

प्रेक्षैवेति। तदयमेवाखरसः कैचिदित्यनेन सूचितः। काव्यप्रकाशकृतापि "व्यापनादि लेपनादिरूपतया सम्भावितम्" इत्युक्त्वा क्रियोत्प्रेक्षैव स्वाभिमतेति द्योतितम्। रामचरणतर्कवागीशस्तु—"नभसोऽञ्जनवर्षण-कर्त्तृत्वेन सम्भावनायां प्रकृतस्योपमेयस्य तमसो बोधो दुर्घट इत्यखरसः कैचिदित्यनेन सूचितः" इत्याह स्म।

(छ) इदानीं कश्चित् फलितार्थमाह अलङ्कारेति। सा उत्प्रेक्षा, अलङ्कारान्तरात् उत्था समुत्थानमुत्-पत्तिर्यस्याः सा तादृशी सती, अधिकं वैचित्र्यं वहेत् बिभृयात्।

(ज) तत्रेति। अपह्नवेन अपह्नुत्या सहितेति सापह्नवा अपह्नुत्यलङ्कारमूलेत्यर्थः।

(झ) अश्र्विति। यज्ञे प्रवृत्तस्य सपत्नीकस्य कस्यचित् पत्न्या अश्रुपातमवलोक्योक्तिरियम्। हुत-पावकस्य प्राप्तघृताहुतेर्यज्ञीयवह्नेः धूमेन कलुषे आविले अक्षिणी चक्षुषी यस्यास्तस्यास्तथोक्तायाः सुदृशः सुलोचनाया अस्याः, अश्रुच्छलेन नयनजलव्याजेन लावण्यवारिणः पूरः प्रवाहः, अङ्गे मानम् अवस्थिति-स्थानम्, अप्राप्येव विगलति।

अत्र प्रकृतमश्रु प्रतिषिध्य उपमानभूतलावण्यवारिपूरस्थापनादपह्नुतिः, तन्मूला चेयं क्रियोत्प्रेक्षा अधिकवैचित्र्यावहेत्यनुभाव्यम्।

(ञ) श्लेषेति। श्लेष एव हेतुरुत्थापकस्तं गच्छतीति श्लेषहेतुगा श्लेषमूलेत्यर्थः। उत्प्रेक्षेत्यनु-षज्यते।

(ट) मुक्तोत्कर इति। सङ्कटं स्वर्गेपरिपूर्णत्वादवकाशशून्यं यत् शुक्तेर्मध्यमभ्यन्तरदेशस्तस्मात्, विनिर्गतो मुक्तानामुत्करः पुञ्जः, सारसे पद्मे इव लोचने यस्यास्तस्याः अस्या दृश्यमानायाः कामिन्याः, कमनीया मनोज्ञा या कम्बुग्रीवा शङ्खसदृशी गलदेशस्तस्याम् अधिवासादवस्थानात्, गुणवत्त्वं सूत्रवत्त्वम् उत्कृष्टस्थाने निवासादुत्कर्षधर्मवत्त्वञ्च आप लब्धवान् इति जानीमहे वयं सम्भावयामः।

(ठ) अत्रेति। गुणवत्त्वे गुणवत्त्वशब्दे श्लेषः सूत्रवत्त्वोत्कर्षवत्त्वरूपार्थद्वययोगः। हेतुरिति। तादृशहेतूत्प्रेक्षाया उत्थापकत्वादिति भावः।

(१) भवेदिति पाठान्तरम्।

६३। मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः (१)। (ण)

क्वचिदुपमोपक्रमोत्प्रेक्षा (त) यथा—

"पारेजलं नीरनिधेरपश्यन्मुरारिरानीलपलाशराशीः ।

वनावलीरुत्कलिकासहस्र-प्रतिक्षणोत्कूलितशैवलाभाः ॥" (थ)

इत्यत्र आभाशब्दस्य उपमावाचकत्वादुपक्रमे उपमा, पर्य्यवसाने तु जलधितीरे शैवालस्थितेः सम्भावनानुपपत्तेः सम्भावनोत्थानम् (२) इत्युत्प्रेक्षा (द)। एवं विरहवर्णने—"केयूरायितमङ्गदैः" इत्यत्र "विकासिनीलोत्पलति स्म कर्णे मृगायताक्ष्याः कुटिलः कटाक्षः" इत्यादौ च ज्ञेयम् (ध)।

(ड) अत्रेति। अतएवात्र वाच्योत्प्रेक्षा इत्याशयः।

(ढ) एवमिति। "जानीमहे" इतिवत् उत्प्रेक्षावाचकाः शब्दा इत्यर्थः।

(ण) मन्य इति। अवादिशब्दात् इव, किम्, न खलु इत्यादीनां ग्रहणम्।

(त) क्वचिदिति। उपमा उपक्रमे प्रारम्भे यस्याः सा तथोक्ता उत्प्रेक्षा।

(थ) पारे इति। पद्यमिदं शिशुपालवधतृतीयसर्गे। मुरारिर्हरिः नीरनिधेः सागरस्य पारेजलं जलस्य पारे तीरे इत्यर्थः, आनीलाः गाढ़नीलवर्णाः पलाशराशयः पत्रपुञ्जा यासां ताः, तथा उत्कलिकासहस्रेण तरङ्गसमूहेन, प्रतिक्षणं क्षणं क्षणं उत्कूलितानां कूलमुन्नीतानां शैवलानाम् आभेव आभा यासां तास्तथोक्ताः वनानामावलीः श्रेणीः अपश्यत्।

(द) इतीति। सम्भावनाया मनसि करणस्य अनुपपत्तेरसम्भवात्, शैवालानां जल एवावस्थानादिति भावः। सम्भावनाया उत्प्रेक्षाघटिकाया इत्यर्थः, उत्थानमाविर्भावः। तथा च जलस्थितानां शैवालानां तीरस्थिततया सम्भावनेति भावः।

(ध) एवमिति। अङ्गदैर्वलयैः केयूरायितं भुजमध्यभागधारणीयकेयूरवदाचरितम्। अत्र आयिप्रत्ययस्य उपमावाचकतया उपक्रमे उपमा, पर्य्यवसाने तु अङ्गदानां भुजमध्यभागे धारणासम्भवेन सम्भावनाया उत्थानादुत्प्रेक्षेत्याशयः।

विकासीति। मृगस्येव आयते दीर्घे लोचने यस्यास्तस्याः, कुटिलो वक्रः कटाक्षो दृष्टिपातः, कर्णे, विकासि प्रस्फुटितं यत् नीलोत्पलं तद्वदाचरति स्म।

---

(१) अत्र "उत्प्रेक्षावाचकाः शब्दाः" इत्येवमनभिधानात् "इत्युत्प्रेक्षावाचकम्।" एवम्, "मन्ये शङ्के" इति वृत्तिपाठेन समन्वयाच्च "मन्ये" इत्यादिको वृत्तिपाठ एवेति प्रतीयते। तथापि तु सर्वेष्वेव पुस्तकेषु कारिकाभावेन विन्यासदर्शनादस्माभिरपि तथैव विन्यस्तम्।

(२) सम्भावनोत्थापनमिति पाठभेदः।

भ्रान्तिमदलङ्कारे "मुग्धा दुग्धधिया—" इत्यादौ भ्रान्तानां वल्लवादीनां विषयस्य चन्द्रिकादेर्ज्ञानमेव नास्ति, तदुपनिबन्धनस्य कविनैव कृतत्वात्। इह तु सम्भावनाकर्त्तुर्विषयस्यापि ज्ञानमिति द्वयोर्भेदः (न)। सन्देहे तु समकक्षतया कोटिद्वयस्य प्रतीतिः, इह तु उत्कटा सम्भाव्यभूतैका कोटिः (प)। अतिशयोक्तौ विषयिणः प्रतीतस्य पर्य्यवसाने असत्यता प्रतीयते, इह तु प्रतीतिकाल एवेति भेदः (फ)।

अत्रापि क्विप्प्रत्ययस्य आयिलोपस्य च उपमावाचकतया उपक्रमे उपमा, परन्तु कर्णे कटाक्षावस्थितेरसम्भवात् सम्भावनाया उत्थानेन उत्प्रेक्षेति भावः।

(न) ननु "ऊरुः कुरङ्गकदृशः" इत्यादौ नायिकोरुप्रभृतौ स्मरविजयस्तम्भप्रभृतिभ्रमाद्भ्रान्तिमानलङ्कारः किं न स्यादित्याह भ्रान्तिमदिति। भ्रान्तानां भ्रमविशिष्टानाम्। विषयस्य उपमेयस्य। नास्तीति। शुक्तिकादौ रजतादिभ्रान्तिमतः शुक्तिकादिज्ञानवदिति भावः। अथ तर्हि कुतोऽस्माभिश्चन्द्रिकादिर्ज्ञायत इत्याह तदुपनिबन्धनस्येति। विषयभूतचन्द्रिकादेरुल्लेखस्येत्यर्थः। इह तु उत्प्रेक्षायान्तु। विषयस्यापि न केवलं विषयिण उपमानस्य स्मरविजयस्तम्भप्रभृतेः, किन्तु ऊरुप्रभृतेरुपमेयस्यापीत्यर्थः। तथा च शुक्तिकामवलोक्य 'रजतमिदम्' इति ज्ञानरूपे भ्रमे केवलं रजतमेवावभासते, न तु शुक्तिका; भ्रमस्य निश्चयरूपतया एकमात्रविषयकत्वात्। स्थाणुपुरुषोभयरूपतया सन्दिह्यमानं पदार्थं दूरतो विलोक्य कुतश्चित् कारणात् "मन्ये स्थाणुरेवायम्" इति ज्ञानरूपायां सम्भावनायान्तु स्थाणुः कथमपि निश्चितरूपत्वेनावभासते पुरुषस्तु अनिश्चितरूपत्वेन, सम्भावनायाः संशयविशेषरूपतया अनेकविषयकत्वात्। तेन च भ्रमसम्भावनयोर्भेदेन यत्र वाक्योपात्तस्य प्राणिनो भ्रमस्तत्र भ्रान्तिमान्, यत्र तु सम्भावना तत्रोत्प्रेक्षेत्याशयः।

(प) ननु सम्भावनायाः संशयरूपत्वे "ऊरुः कुरङ्गकदृशः" इत्यादौ सन्देहालङ्कार एवास्तामित्याह सन्देहे त्विति। समकक्षतया समानभावेन, कोटिद्वयस्य विषयद्वयस्य। इह तु उत्प्रेक्षायान्तु, उत्कटा कथञ्चिन्निश्चितरूपा। एतदेव परिष्कर्त्तुमाह सम्भाव्यभूतेति। सम्भवपरत्वेन ज्ञायमानेत्यर्थः। एका कोटिरेको विषयः। अतः सन्देहोत्प्रेक्षयोर्भेदात् "ऊरुः कुरङ्गकदृशः" इत्यादौ स्मरविजयस्तम्भादिरूपे एकस्मिन्नेव विषये उत्कटप्रतीतेश्च उत्प्रेक्षैवेति भावः।

(फ) अथ तर्हि अध्यवसायस्यापि सम्भावनारूपतया ऊरुरित्यादावतिशयोक्तिरस्त्वित्याह अतिशयोक्ताविति। विषयिण उपमानस्य, प्रतीतस्य अन्वयबोधकाले सत्यतया ज्ञातस्य सतः पर्य्यवसाने सम्पूर्णान्वयबोधादनन्तरमित्यर्थः, असत्यता प्रतीयते; साक्षादसत्यताप्रतिपादकानामिवादिशब्दानामन्वयानुपपत्तेश्चाभावात् परन्तु पर्य्यालोचनया असम्भवबोधादिति भावः। इह तु उत्प्रेक्षायान्तु, प्रतीतकाल एव विषयिणः असत्यता प्रतीयत इति पूर्वेणान्वयः; वाच्योत्प्रेक्षायां साक्षादसत्यताप्रतिपादकानामिवादिशब्दानां प्रतीयमानोत्प्रेक्षायान्तु अन्वयानुपपत्तेः सत्त्वादित्याशयः। अतश्च भेदात् "ऊरुः कुरङ्गकदृशः" इत्यादौ शाब्दबोधसमानकाल एव स्मरविजयस्तम्भादेरसत्यताप्रतीतेरुत्प्रेक्षैवेति बोध्यम्।

"रञ्जिता नु विविधास्तरुशैला नामितं नु गगनं स्थगितं नु ।
पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण ॥" (ब)

इत्यत्र यत्तर्वादौ तिमिराक्रान्तता रञ्जनादिरूपेण सन्दिह्यत इति सन्देहालङ्कार इति केचिदाहुः ; तन्न, एकविषये समानबलतया अनेककोटिस्फुरणस्यैव सन्देहत्वात् । इह तु तर्वादिव्याप्तेः प्रतिसम्बन्धिभेदो व्यापनादेर्निगरणेन रञ्जनादेः स्फुरणाच्च (भ) । अन्ये तु "अनेकत्वनिर्द्धारणरूपविच्छित्त्याश्रयत्वेनैककोट्यधिकोऽपि (१) भिन्नोऽयं सन्देहप्रकारः" इति वदन्ति स्म (म) । तदप्ययुक्तम् ; निगीर्णस्वरूपस्यान्यतादात्म्य-

(ब) अलङ्कारसर्वस्वकारमतं निरसितुमुदाहरति रञ्जितेति । किरातार्ज्जुनीयनवमसर्गस्थमिदं पद्यम् । तिमिरेण अन्धकारेण, विविधास्तरुशैला उच्चनीचादिनानाप्रकारा वृक्षपर्वताः, रञ्जिता नु लिप्ताः किम् ? । गगनमाकाशं नामितं नु भूतलपर्य्यन्तं पातितं किम् ? । अथवा स्थगितं नु संवृतं किम् ? । धरित्री भूमण्डलं विषमेषु उच्चनीचदेशेषु पूरिता नु पूरणेन समीकृता किम् ? । ककुभो दिशश्च संहृता नु सङ्कोचिताः किम् ? ।

(भ) इत्यत्रेति । यत् आहुरिति परेणान्वयः । रञ्जनादिरूपेणेति । "अयं मार्त्तण्डः किम् ?" इत्यादौ राजा मार्त्तण्डादिरूपेणेवेति भावः । केचिदलङ्कारसर्वस्वकारादयः । एकस्मिन् विषये स्थले । अनेककोटिस्फुरणस्यैव अनेकपक्षकज्ञानस्यैव । तर्वादिव्याप्तेस्तिमिरकर्त्तृकतरुप्रभृतिव्यापनस्य, प्रतिसम्बन्धिषु तरु-शैलप्रभृतिप्रत्येकसम्बन्धिपदार्थेषु भेदो रञ्जनाद्येकैकरूपेणैव भिन्नत्वम्, न पुनर्ज्ञानस्य क्वाप्यनेककोटिकत्वमित्यतो नायं सन्देह एवेति भावः । ननु "व्याप्ता नु रञ्जिता नु" "व्याप्तं नु नामितं नु" इत्याद्यनेककोटिकज्ञानरूपा बहव एवामी सन्देहा इति मालोपमादिवत् मालासन्देहालङ्कार एवास्तामित्याह व्यापनादेरिति । निगरणेन अनुक्तिवशादपलापेन । स्फुरणं प्रकाशो ज्ञानमिति यावत् । मुख्यसन्देहे तु एकस्याः कोटेर्निगरणम् अपरस्याश्च स्फुरणमित्येवं वैषम्यमेव न भवति, तत्र हि कोटिद्वयस्य समानभावेनैव प्रतीतिनियमात् । अतश्चात्र न सन्देहः, किन्तु सम्भावनैवेत्याशयः ।

(म) अन्ये त्विति । अनेकत्वेन रञ्जन-नामनादिबहुतरप्रकारेण निर्द्धारणरूपा ज्ञानरूपा या विच्छित्तिश्चमत्कारिता तस्या आश्रयत्वेन हेतुना । अयन्तु अलङ्कारावश्यकतां प्रति हेतुरिति बोध्यम् । एकस्यां कोटौ रञ्जनादिपक्षे अधिकोऽपि प्रबलोऽपि, भिन्नः साधारणसन्देहाद्विजातीयः । अत्रायं सरलार्थः—समानभावेन द्विकोटिकं ज्ञानमेव संशय इति वयमप्यङ्गीकुर्म्म एव, "रञ्जिता नु" इत्यादौ तु ज्ञानस्य व्यापनादिपक्षे दुर्बलत्वात् रञ्जनादिपक्षे च प्रबलत्वात् तादृशसंशयरूपः सन्देहालङ्कारो न भवत्येव इत्यपि स्वीकुर्म्म एव; किन्तु तथापि नानाप्रकारं विकल्प्यापि अनिश्चितत्वेन चमत्कारिताविशेषावगमात् कस्यचिदलङ्कारस्यावश्यकत्वात् अन्यस्य चासम्भवात् एकस्यां कोटौ प्रबलीभूतसंशयरूपः कश्चिद्विजातीय एवात्र सन्देहालङ्कार इति ब्रूम इति ।

(१) एककोट्यधिकोऽपि इति पाठान्तरम् ।

प्रतीतिर्हि सम्भावना, तस्याश्चात्र स्फुटतया सद्भावात् नुशब्देन च इवशब्दवत् तस्या द्योतनादुत्प्रेक्षैवेयं भवितुं युक्ता, अलमदृष्टसन्देहप्रकारकल्पनया (य)।

"यदेतच्चन्द्रान्तर्जलद-लव-लीलां वितनुते
तदाचष्टे लोकः शशक इति नो मां प्रति तथा।
अहन्त्विन्दुं मन्ये त्वदरिविरहाक्रान्ततरुणी
कटाक्षोल्कापात-व्रण-किण-कलङ्काङ्कित-तनुम् ॥" (र)

इत्यत्र 'मन्ये'-शब्दप्रयोगेऽपि उक्तरूपायाः सम्भावनाया अप्रतीतेर्वितर्कमात्रम्, नासावपह्नवोत्प्रेक्षा (ल)।

(य) एतन्मतमपि दूषयति तदपीति। निगीर्णस्वरूपस्य येन केनापि प्रकारेण तिरस्कृतस्य अप्रधानीकृतस्य उपमेयस्येत्यर्थः, अन्यतादात्म्यप्रतीतिरुपमानेन सहाभेदज्ञानम्। अयन्तु उत्प्रेक्षाघटिकाया एव सम्भावनायाः परिचयः, सामान्यसम्भावनाया लक्षणन्तु प्रागेवाभिहितमिति द्रष्टव्यम्। स्फुटतया सद्भावात् स्पष्टरूपेण विद्यमानत्वात्। तथा च "रञ्जिता नु" इत्यादौ उपमेयभूतं तिमिरकर्तृकव्यापनम् उपादानाभावान्निगीर्णस्वरूपम्, उपमानभूतं रञ्जनादिकन्तु शब्देनोपादानात् प्रधानम्, तयोश्चाभेदप्रतीतिरूपा सम्भावना स्पष्टमेवानुभवगम्येति भावः। द्योतनादिति। एतेनातिशयोक्तिनिरासः सूचितः। न दृष्टः कुत्रापि नावलोकितो यः सन्देहप्रकार एककोटिप्रबलरूपो विजातीयः सन्देहस्तस्य कल्पनया अलम्। क्लृप्तेनैवोपपत्तौ नूतनकल्पनाया अनावश्यकत्वाद्गौरवाच्चेति भावः।

(र) सरस्वतीकण्ठाभरणकारमतं दूषयितुं तदुक्तमेवोदाहरति यदेतदिति। चन्द्रस्य अन्तर्मध्ये यदेतद्दृश्यमानं मलिनं वस्तु, जलदलवलीलां क्षुद्रमेघखण्डविभ्रमम्, वितनुते प्रसारयति; लोको जनः तद्वस्तु शशक इति आचष्टे ब्रवीति; मां प्रति तु तथा आख्यानं नो मम तु तथा न प्रतीतिरित्यर्थः। अहन्तु इन्दुं चन्द्रम्, तव अरीणां वैरिणां विरहेण वियोगवेदनया आक्रान्ता अभिभूता यास्तरुण्यस्तासां कटाक्षा एव उल्का रेखाकारास्तेजःपदार्थविशेषास्तासां पातेन पतनेन यो व्रणः क्षतं तस्य यः किणश्चिह्नं स एव च कलङ्को लाञ्छनं तेन अङ्किता चिह्निता तनुर्देहो यस्य तं तादृशं मन्ये मनसि करोमि। इति राज्ञः स्तुतिः।

"अयं मताभिधाने उत्प्रेक्षाया एव प्रकारः" इति सरस्वतीकण्ठाभरणम्।

(ल) इत्यत्रेति। उक्तरूपाया "निगीर्णस्वरूपस्य अन्यतादात्म्यप्रतीतिर्हि सम्भावना" इति प्रागुक्तायाः अप्रतीतेरिति। उदाहृते शशक-तादृशकिणकलङ्कयोरुपमेयोपमानभावाभावात् निगीर्णस्वरूपस्योपमेयस्य उपमानेन सह तादात्म्यप्रतीतेरेव सम्भावनापदार्थत्वादिति भावः। वितर्कमात्रं केवलो वितर्काख्यव्यभिचारी भावः। नासावपह्नवोत्प्रेक्षेति। तथा च शशक-तादृशकिरणकलङ्कयोरुपमेयोपमानभावाभावात् शशकप्रतिषेधेन तादृशकलङ्कस्थापनेऽपि नापह्नुतेः प्रसङ्गः सम्भावनाया अभावाच्च नोत्प्रेक्षाया इत्याशयः। किन्तु वितर्काख्यव्यभिचारिभावो राजविषयरतिभावस्याङ्गमिति रसवदलङ्कारः।

अथोत्प्रेक्षाभेदसङ्कलनम् ।

प्रथमं वाच्या प्रतीयमाना चेति द्वौ भेदौ । तत्र—

वाच्याः—११२

स्वरूपगताः—३२

जातेः—	भावाभिमाने एकः, अभावाभिमाने चैक इति द्वौ ; तयोश्च प्रत्येकमेव गुणनिमित्तकत्वात् क्रियानिमित्तकत्वाच्च द्वैविध्येन चत्वारः ।	४
गुणस्य—उक्तरूपेण	... ...	४
क्रियायाः "	... ...	४
द्रव्यस्य "	... ...	४
		१६

तेषाञ्च षोड़शानां निमित्तस्य उपादानेन अनुपादानेन च द्वैविध्यात् द्वाविंशत्-प्रकाराः—३२ ।

फलगताः—१२

जातेः—भावाभिमानादिनोक्तक्रमेण	...	४
गुणस्य "	... ...	४
क्रियायाः "	... ...	४
(द्रव्यस्य तु फलोत्प्रेक्षा नास्ति)		१२

हेतुगताः—१२

५६

जातेः—भावाभिमानादिनोक्तक्रमेण	...	४
गुणस्य "	... ...	४
क्रियायाः "	... ...	४
(द्रव्यस्य हेतूत्प्रेक्षापि नास्ति)		१२

तेषाञ्च षट्पञ्चाशद्भेदानां प्रत्येकमेव प्रस्तुतस्य उक्त्या अनुक्त्या च पुनर्द्वैविध्येन द्वादशाधिकशतभेदाः सम्पद्यन्ते—११२ ।

प्रतीयमानाः—६४

फलगताः—१६

जातेः—भावाभिमानादिनोक्तक्रमेण	...	४
गुणस्य "	... ...	४
क्रियायाः "	... ...	४
द्रव्यस्य "	... ...	४
(प्रतीयमानायां स्वरूपोत्प्रेक्षा नास्ति)		१६

हेतुगताः—१६

३२

जातेः—भावाभिमानादिनोक्तक्रमेण	...	४
गुणस्य "	... ...	४
क्रियायाः "	... ...	४
द्रव्यस्य "	... ...	४
		१६

तेषाञ्च द्वाविंशद्भेदानां प्रत्येकमेव पूर्ववत् प्रस्तुतस्य उक्त्या अनुक्त्या च पुनर्द्वैविध्येन चतुःषष्टिभेदाः सम्पद्यन्ते—६४ ।

समुदायेन—१७६

६४ । सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते ॥ (व)

विषयनिगरणेनाभेदप्रतिपत्तिर्विषयिणोऽध्यवसायः (श)। अस्य चोत्प्रेक्षायां विषयिणोऽनिश्चितत्वेन निर्देशात् साध्यत्वम्, इह तु निश्चितत्वेनैव प्रतीतिरिति सिद्धत्वम् (ष)। विषयनिगरणञ्चोत्प्रेक्षायां विषयस्याधःकरणमात्रेण, इहापि "मुखं द्वितीयश्चन्द्रः" इत्यादौ (स)।

(व) निरुक्तसम्भावनारूपामुत्प्रेक्षां निरूप्येदानीं किञ्चिद्विभिन्नतत्सम्भावनारूपामेवातिशयोक्तिं निरूपयति सिद्धत्व इति। अध्यवसायस्य यथार्थे वस्तुनि अयथार्थवस्तुरूपेण निरुक्तसम्भावनाया एव सिद्धत्वे निश्चयरूपतया निष्पन्नत्वे कविप्रौढ़ोक्तिवशात् संशयभागे विलीन इव केवलनिश्चयरूपतया परिणतत्वे सतीत्यर्थः। अतिशयोक्तिर्नाम अलङ्कारो निगद्यते। अतएव च अतिशयेन सम्भवातिरेकेण योग्यतातिक्रमेण वा उक्तिरतिशयोक्तिरिति व्युत्पत्तिः। तथा चोक्तं काव्यादर्शे—

"विवक्षा या विशेषस्य लोकसीमातिवर्त्तिनी। असावतिशयोक्तिः स्यादलङ्कारोत्तमा यथा॥"

अग्निपुराणे च—"लोकसीमातिवृत्तस्य वस्तुधर्म्मस्य कीर्त्तनम्।
भवेदतिशयो नाम सम्भवोऽसम्भवो द्विधा॥"

एतेन यथार्थस्य अयथार्थरूपेण निश्चयरूपा सम्भावना अतिशयोक्तिरिति लक्षणं फलितम्।

यथार्थस्य निगीर्णस्वरूपस्य। सम्भावनाया निश्चयरूपत्वञ्च प्रतीतिकाल एवेति शाब्दबोधादनन्तरं मिथ्यात्वप्रतीतावपि न दोषः। सा अत्र सम्भावना साध्यवसानाख्यलक्षणयैव सम्पद्यत इति चावधेयम्। तेन सारोपाख्यलक्षणामूलके रूपके नातिव्याप्तिः। उत्प्रेक्षायां वाच्यायामिवादिशब्दसद्भावात् प्रतीयमानायाञ्च अन्वयानुपपत्तेः सम्भावना संशयरूपा, इह तु इवादिशब्दाभावादन्वयोपपत्तेश्च सम्भावना निश्चयरूपेत्युत्प्रेक्षायां नातिप्रसङ्गः। निश्चयान्तसन्देहे हि प्रथमं संशयसद्भावः, इह तु कविप्रौढ़ोक्तिवशेन सर्वदैव संशयाभाव इति तादृशसन्देहालङ्कारेऽपि नातिव्याप्तिः। "मुग्धा दुग्धधिया" इत्यादौ भ्रमस्य एककोटिकतया भ्रान्तानां वल्लवादीनां चन्द्रिकादेर्यथार्थपदार्थस्य ज्ञानं नास्त्येव, इह तु सम्भावनाया द्विकोटितया सम्भावनाकर्त्तुर्यथार्थायथार्थयोरुभयोरेव पदार्थयोर्ज्ञानमस्तीति भ्रान्तिमदलङ्कारेऽपि नातिप्रसङ्ग इत्यवधेयम्।

(श) अध्यवसायं निरूपयति विषयेति। यस्मिन्नध्यवसीयते स विषयो यथार्थं वस्त्वित्यर्थः, तन्निगरणेन अधःकरणेन यथा कथञ्चिदप्रधानीकरणेनेति यावत्, यः खल्वध्यवसीयते स विषयी अयथार्थं वस्त्वित्यर्थः, तस्य अभेदप्रतिपत्तिरभेदसम्भावना अध्यवसायः, निगीर्णरूपेण यथार्थवस्तुना सह अयथार्थस्य वस्तुनः अभेदज्ञानमध्यवसाय इत्यर्थः।

(ष) सिद्धत्वे इत्यस्य व्यावृत्तिप्रदर्शनमुखेन उत्प्रेक्षातः अस्या भेदान्तरं प्रदर्शयति अस्येति अध्यवसायस्य चेत्यर्थः। विषयिणः अयथार्थवस्तुनः अनिश्चितत्वेन, संशयविशेषरूपसम्भावनाप्रतिपादकानामिवादिशब्दानां सत्त्वात् संशयितत्वेन निर्देशात् व्यवस्थापनात्, साध्यत्वं युक्त्यादिना निष्पाद्यत्वम्; इह अतिशयोक्तौ तु, निश्चितत्वेनैव प्रतीतिर्विषयिण इति सम्बन्धः, इति हेतोः, सिद्धत्वं स्वयमेव निष्पन्नत्वम्

यदाहुः—(ङ) "विषयस्यानुपादानेऽप्युपादानेऽपि सूरयः।
अधःकरणमात्रेण निगीर्णत्वं प्रचक्षते॥" (च)

६५। भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्य्ययौ।
पौर्वापर्य्यात्ययः कार्य्यहेत्वोः सा पञ्चधा ततः॥ (क)

यथा च लोके दूरतः पुरुषवद्दृश्यमाने वस्तुनि "अयं पुरुषो न वा" इति सन्देहे क्रमिक-करचरणादिदर्शनेन "अयं पुरुष एव" इत्यभेदप्रतिपत्तिः प्रागसिद्धा साध्यते, किन्तु शुक्तिकामवलोक्य "इदं रजतम्" इति निश्चये तु अभेदप्रतिपत्तिः सिद्धैवेति न तस्याः साधनापेक्षा, तद्वदिहापीति भावः। एतेन अभेदप्रतिपत्तेः साध्यत्व-सिद्धत्वाभ्यामुत्प्रेक्षातिशयोक्त्योरुक्तातिरिक्तः कश्चिद्भेदोऽपि दर्शितः।

(ङ) ननु उत्प्रेक्षायां विषयनिगरणाभावादेव विषयनिगरणघटितस्य अस्य लक्षणस्यातिव्याप्तिर्न भविष्यति किं पुनः सिद्धत्व इति विशेषणेनेत्याह विषयेति। विषयस्य यथार्थपदार्थस्य, अधःकरणमात्रेण केवलेनाप्रधानीकरणेन। इयमभेदे तृतीया। तथा च विषयस्याधःकरणरूपं विषयनिगरणम् उत्प्रेक्षायां "मुखं द्वितीयश्चन्द्रः" इत्यादौ इह अतिशयोक्तावपि च विद्यत एवेत्यर्थः। एवञ्च समानविषयतया उत्प्रेक्षायामतिव्याप्तिसम्भवात् तद्वारणाय सिद्धत्व इति विशेषणं देयमेवेति भावः। अवेदमवधेयम्—यथा घटे पत्रवारोपणे घटस्याधःकरणं सम्पद्यते, तथा यथार्थे वस्तुनि अयथार्थवस्तुनः सम्भावनायाम् अध्यवसाये च सति यथार्थवस्तुनः अधःकरणमुपजायते। तत्र "ऊरुः कुरङ्गकदृशः" इत्यादौ नायिकाया ऊरुरूपे यथार्थे वस्तुनि "सम्भावयामि यदयं स्मरस्य विजयस्तम्भः" इत्येवंरूपम्, "मुखं द्वितीयश्चन्द्रः" इत्यादौ च नायिकाया मुखरूपे यथार्थे वस्तुनि "मन्ये यदयं द्वितीयश्चन्द्र एव" इत्येवंरूपञ्च।

(ङ) विषयस्याधःकरणमेव विषयनिगरणमित्यर्थे प्राचीनसंवादं दर्शयितुमाह यदाहुरिति।

(च) विषयस्येति। सूरयः पण्डिताः, विषयस्य यथार्थपदार्थस्य अनुपादाने अनुल्लेखेऽपि उपादाने उल्लेखेऽपि वा सति, अधःकरणमात्रेण केवलेन विषयस्य अप्रधानीकरणेनैव, इयमपि पूर्ववदभेद एव तृतीया, निगीर्णत्वं विषयस्य निगरणं प्रचक्षते ब्रुवन्ति।

(क) इदानीमतिशयोक्तिं विभजते भेद इति। भेदेऽपि अभेदः यथार्थादयथार्थस्य भिन्नत्वेऽपि तदभिन्नत्वेन सम्भावना, यथार्थस्य सम्बन्धेऽपि असम्बन्धः असम्बन्धसम्भावना, तयोर्विपर्य्ययौ वैपरीत्यद्वयम्, तथा च यथार्थायथार्थयोरभेदेऽपि भेदसम्भावना, यथार्थस्य असम्बन्धेऽपि सम्बन्धसम्भावनेत्यर्थः, तथा कार्य्यहेत्वोः कार्य्यकारणयोः पौर्वापर्य्यात्ययः पूर्ववर्त्तित्व-परवर्त्तित्वयोर्वैपरीत्यम्, अत्र आसत्तिक्रमेणैवान्वयो न तु यथासंख्येनेति बोध्यम्। तथा च कारणस्य पूर्ववर्त्तित्वं कार्य्यस्य च परवर्त्तित्वं नियतमेव तत्र यदि कारणात् कार्य्यस्य पूर्ववर्त्तित्वसम्भावना समकालवर्त्तित्वसम्भावना वा स्यात् तदेत्यर्थः; ततः कारणात् सा अतिशयोक्तिः पञ्चधा पञ्चप्रकारा स्यात्। तथा च भेदे अभेदः, अभेदे भेदः, सम्बन्धे असम्बन्धः, असम्बन्धे सम्बन्धः, कार्य्यकारणयोः पौर्वापर्य्यविपर्य्ययश्चेति।

तद्विपर्य्ययौ अभेदे भेदः, असम्बन्धे सम्बन्धः। सा अतिशयोक्तिः। अत्र (ख) भेदे अभेदो यथा मम—

"कथमुपरि कलापिनः कलापो विलसति तस्य तलेऽष्टमीन्दुखण्डम्।
कुवलययुगलं ततो विलोलं तिलकुसुमं तदधः प्रवालमस्मात्॥" (ग)

अत्र कान्ताकेशपाशादेर्मयूरकलापादिभिरभेदेनाध्यवसायः (घ)। यथा वा—(ङ) "विश्लेषदुःखादिव बद्धमौनम्।" अत्र चेतनगतं मौनित्वमन्यत्, अचेतनगतञ्चान्यदिति द्वयोर्भेदेऽप्यभेदः (च)।

एवम्—(छ) "सद्धाधरदलेनास्या यौवने रागभाक् प्रियः।" (ज)

(ख) अत्रेति। एषु पञ्चसु भेदेषु मध्ये इत्यर्थः।

(ग) कथमिति। कस्याश्चिन्नायिकायाः केशादिवर्णनमिदम्। उपरि भागे मस्तक इत्यर्थः, कलापिनो मयूरस्य कलापः पुच्छं कथम्, केशपाशं मयूरपुच्छमिव सम्भावयामीत्यर्थः। कथमिति सम्भावनार्थकमव्ययम्। तथा च मेदिनी—"कथं हर्षे च गर्हायां प्रकारार्थे च सम्भ्रमे। प्रश्ने सम्भावनायाञ्च।" तस्य कलापस्य तले अधोभागे अष्टम्यास्तिथेः इन्दुखण्डं चन्द्रस्यार्द्धभागः, विलसति शोभते कथम्, ललाटदेशम् अर्द्धचन्द्रमेव सम्भावयामीत्यर्थः। ततस्तस्मादधोदेशे च विलोलं चञ्चलम्, कुवलययुगलम् इन्दीवरद्वयं विलसति कथम्, नयनयुगलं कुवलययुगलमेव सम्भावयामीत्यर्थः। तस्य च कुवलययुगलस्य अधः, तिलकुसुमं कथम्, नासिकायां तिलकुसुममेव सम्भावयामीति तात्पर्य्यम्। अस्मात् तिलकुसुमादधश्च प्रवालं विद्रुमः कथम्, ओष्ठञ्च प्रवालमेव सम्भावयामीत्यर्थः।

(घ) अत्रेति। उदाहृते नायिकायाः केशपाशादिरूपेणैव प्रत्यक्षगोचरतया केशपाशादय एव यथार्थाः कलापादिरूपेण तु अप्रत्यक्षया ते पुनरयथार्था इति केशपाशादीनां कलापादिरूपेणाध्यवसायान्मूललक्षणसङ्गतिः। तथा केशपाशादिभ्यः कलापादीनां भेदेऽपि अभेदाध्यवसायात् भेदे अभेदाध्यवसायरूपातिशयोक्तिरिति च बोध्यम्।

(ङ) स्वरचितस्याप्रामाण्याशङ्कया प्राचीनमुदाहर्त्तुमाह यथा वेति।

(च) अत्रेति। अत्र परस्परात्यन्तभेदद्योतनाय अन्यशब्दोद्वयोपादानम्। तथा च मुनेर्भावो मौनं तदस्यास्तीति मौनी तस्य भावो मौनित्वं तदपि च मौनमेव, "तद्धितस्य त्व-तलभ्यां क्वचित् सम्बन्धाभिधानं क्वचित् सम्बन्धिनश्च" इत्यभिधानात्। अतो बद्धमौनमित्यनेन सह नोक्तिवैषम्यम्। एवञ्च मनुष्यात्मकचेतनगतं मौनित्वं नाम वाक्यशून्यत्वं तच्च अभिधयैव प्रतिपाद्यम्, नूपुराद्यचेतनगतं मौनित्वञ्च शब्दमात्रशून्यत्वं तच्च लक्षणया बोध्यम्; ततश्चोभयोर्भेदेऽपि श्लेषादिस्थले युगपद्वृत्तिद्वयास्वीकारेण शब्दबोध्यस्यैव यथार्थस्य शब्दशून्यत्वरूपमौनित्वस्य शब्दबोध्येनैव अयथार्थेन वाक्यशून्यत्वलक्षणमौनित्वरूपेण सम्भावनया अभेदाध्यवसायादतिशयोक्तिरिति भावः।

(छ) इत्यञ्च शक्तिलक्षणोभयनिष्पादितश्लेषेणोदाहृत्य केवलशक्तिनिष्पादितश्लेषेणाप्युदाहर्त्तुमाह एवमिति।

अत्र अधरस्य रागो लौहित्यम्, प्रियस्य रागः प्रेम, द्वयोरभेदः (झ) ।

अभेदे भेदो यथा—

"अन्यदेवाङ्गलावण्यमन्याः सौरभसम्पदः ।
तस्याः पद्मपलाशाक्ष्याः सरसत्वमलौकिकम् ॥" (ञ)

सम्बन्धे असम्बन्धो यथा—

"अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजड़ः कथं नु विषयव्यावृत्तकौतूहलो
निर्म्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥" (ट)

(ज) सहेति । "सुस्मितेन समं प्रायो मानसे शुचिमानपि ॥" इति मत्पूरितपरार्द्धम् ।
प्रियो वल्लभः, यौवने अस्या नायिकायाः, अधरदलेन ओष्ठपल्लवेन सह रागं लौहित्यं प्रेम च भजत इति रागभाक्, ओष्ठदलं यथा रक्तं प्रियोऽपि तथैव रक्त इत्यर्थः ।

(झ) अत्रेति । लौहित्यप्रेम्णाभेदेऽपि शक्तिप्रतिपाद्यरागशब्दश्लेषेण प्रिये यथार्थस्य प्रेमरूपरागस्य प्रिये अयथार्थेन लौहित्यलक्षणरागरूपेण सम्भावनया अभेदाध्यवसायादतिशयोक्तिरित्याशयः ।

(ञ) अन्यदेवेति । तस्याः पद्मस्य पलाशे दले इव अक्षिणी चक्षुषी यस्यास्तस्याः नायिकायाः, अङ्गानां लावण्यम् अन्यत् साधारणनायिकालावण्यतो भिन्नम् ; सौरभसम्पदः अङ्गानां सौगन्ध्यसमृद्धयः, अन्याः साधारणविलक्षणाः, सरसत्वं रसिकता च अलौकिकं मर्त्त्यलोकातीतम् ।

अत्र अन्यासु नायिकासु यज्जातीयं लावण्यादिकं तस्यां नायिकायामपि तज्जातीयमेव लावण्यादिकमिति लावण्यादेरभेदेऽपि यथार्थस्य साधारणलावण्यादेरयथार्थेन असाधारणलावण्यादिरूपेण सम्भावनया भेदाध्यवसायादतिशयोक्तिरिति भावः ।

(ट) अस्या इति । विक्रमोर्वशीत्रोटके उर्वशीमवलोक्य पुरूरवसो वितर्कोऽयम् । अस्या उर्वश्याः, सर्गविधौ सृष्टिकार्य्ये, कान्तिप्रदः सौन्दर्य्याधायकः, चन्द्रो नु किं प्रजापतिः सृष्टिकर्त्ता अभूत् ? कथमन्यथा ईदृशमस्याः सौन्दर्य्यं भवेदिति भावः । अथवा शृङ्गार एव एको रसो यस्यास्तादृशः स्वयं मदनः कामदेवो नु किं प्रजापतिरभूत् ? इतरथा तु कथमियमीदृशी शृङ्गारोद्दीपिनी स्यादित्याशयः । अथवा पुष्पाकरो मासश्चैत्रो नु किं प्रजापतिरभूत् ? अन्यथा तु कथमस्या अङ्गानामीदृशी पुष्पवल्लोभनीयता सम्भवेदित्यभिप्रायः । ननु भगवान् नारायण ऋषिरेवैनां निजादूरुदेशादुत्पादितवानिति पुराणप्रसिद्धिसत्त्वे कथमीदृक् वितर्कित इत्याह वेदेति । वेदानामभ्यासेन सर्वदा तत्तात्पर्य्यपर्य्यालोचनेनेत्यर्थः जड़ो विषयान्तरेषु मूर्खः, अतएव च विषयेभ्यो भोग्यपदार्थेभ्यो व्यावृत्तं निवृत्तं कौतूहलं कौतुकं यस्य स तादृशः, पुराणो वृद्धतमः, एतेन चिरविलुप्तरसानुभवशक्तिरिति सूचितम्, मुनिर्नारायण ऋषिः इदं मनोहरं रूपं निर्म्मातुं कथं प्रभवेत् शक्नुयात् अपि तु कथमपि नेत्यर्थः । नहि गुणानभिज्ञा गुणवन्तं निर्म्मातुमर्हन्तीति भावः ।

अत्र पुराणप्रजापतिनिर्म्माणसम्बन्धेऽप्यसम्बन्धः (ठ) ।

असम्बन्धे सम्बन्धो यथा—

"यदि स्यान्मण्डले सक्तमिन्दोरिन्दीवरद्वयम् ।
तदोपमीयते तस्या वदनं चारुलोचनम् ॥" (ड)

अत्र यद्यर्थबलादाहृतेन सम्बन्धेन सम्भावनया सम्बन्धः (ढ) ।

कार्य्यकारणयोः पौर्वापर्य्यविपर्य्ययश्च द्विधा भवति, कारणात् प्रथमं कार्य्यस्य भावे, द्वयोः समकालत्वेन च (ण) । क्रमेण यथा—

"प्रागेव हरिणाक्षीणां चित्तमुत्कलिकाकुलम् ।
पश्चादुद्भिन्नबकुल-रसालमुकुलश्रियः ॥" (त)

(ठ) अत्रेति । यथार्थस्य पुराणप्रजापतिनिर्म्माणसम्बन्धस्य अयथार्थेन तन्निर्म्माणासम्बन्धरूपेण सम्भावनया मूललक्षणसङ्गतिरपि द्रष्टव्या । अत्र अन्यस्य निर्म्माणकर्त्तृत्वे दृढनिश्चयाभावादेव परार्द्धेन प्रजापतेर्निर्म्माणकर्त्तृत्वव्यावृत्तिरपि सन्दिग्धैवेति काव्यप्रकाशकृता शुद्धसन्देहालङ्कारे इदमुदाहृतमपि युक्तमेव । तेन शुद्धसन्देहातिशयोक्त्योरेकाश्रयानुप्रवेशरूपः सङ्कर एवेति तत्त्वम् ।

(ड) यदीति । यदि इन्दोश्चन्द्रस्य मण्डले, इन्दीवरद्वयं कुवलययुगलं सक्तं कुतोऽपि कारणात् लग्नं स्यात्, तदा चारुणी सुन्दरे लोचने चक्षुषी यत्र तत्तादृशं तस्या नायिकाया वदनम्, उपमीयते तेन इन्दुमण्डलेन उपमाविषयीक्रियते, इतरथा तु नैत्याशयः ।

(ढ) नन्विन्दुमण्डले इन्दीवरद्वयस्य सक्तत्वाभावप्रतीतिः सर्वदैव स्वाभाविकीति कुतस्तत्र सम्बन्धः, येनासम्बन्धे सम्बन्धस्येदमुदाहरणमुपपद्यत इत्याह अत्रेति । यद्यर्थबलात् यदिशब्दार्थसामर्थ्यात्, आहृतेन आनीतेन कल्पितेनेत्यर्थः, सम्बन्धेन सक्तत्वसम्बन्धेन सम्भावनया अध्यवसायेन सम्बन्धः प्रतीयत इति शेषः । तथा च इन्दुमण्डले यथार्थस्य इन्दीवरासक्तत्वस्य अयथार्थेन सक्तत्वरूपेणाध्यवसायान्मूललक्षणसङ्गतिः ।

(ण) कार्य्येति । कारणात् कारणोत्पत्तेः, प्रथमं पूर्व्वम् । भावे उत्पत्तौ । द्वयोः कार्य्यकारणयोः, समकालत्वेन एककालीनत्वेन च भावे इति पूर्व्वेणान्वयः । नन्वित्थं कार्य्यकारणयोः पौर्वापर्य्यविपर्य्ययस्य द्वैविध्याङ्गीकारे समुदायेनातिशयोक्तेः षड्विधत्वसम्भवेऽपि "सा पञ्चधा" इति पञ्चविधत्वोक्तिः कथं सङ्गच्छत इति चेन्न, प्राचीनमतानुरोधेन तयोः पौर्वापर्य्यविपर्य्ययत्वरूपेण एकविधत्वस्यैव ग्रहणात् ।

(त) कारणात् पूर्व्वं कार्य्यस्योत्पत्तावुदाहरति प्रागेवेति । हरिणाक्षीणां तरुणीनां चित्तम्, प्रागेव उत्कलिकया सुरतोत्कण्ठया आकुलं विह्वलं भवति, पश्चात्तु उद्भिन्नानां प्रस्फुटितानाम्, बकुलरसालयोर्वकुलाम्रयोः, मुकुलानां कुड्मलानां श्रियः शोभाः प्रसरन्तीति शेषः ।

वकुलाम्रयोः प्रस्फुटितमुकुलदर्शनेनैव कामिनीनां चित्ते सुरतोत्कण्ठा उत्पद्यत इति तादृशमुकुलश्रीणां कारणतया पूर्व्वं भावित्वं तदुत्कण्ठायाश्च कार्य्यतया परभावित्वमेव हि यथार्थम् । ततस्तु यथार्थायाः परभाविता-

"सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यं मण्डलञ्च महीक्षिताम् ॥" (थ)

इह केचिदाहुः—"केशपाशादिगतो लौकिकोऽतिशयोऽलौकिकत्वेनाध्यवसीयते, केशपाशादीनां कलापादिभिरध्यवसाये "अन्यदेवाङ्गलावण्यम्" इत्यादिप्रकारेष्वव्याप्तिर्लक्षणस्ये"ति (द)। तन्न, तत्रापि ह्यन्यदङ्गलावण्यमन्यत्वेनाध्यवसीयते (ध)। तथाहि "अन्यदेव" इति स्थाने "अन्य-

---

द्भुतच्छायाः कवेः प्रौढ़ोक्तिवशादेव अयथार्थेन पूर्वभावित्वेनाध्यवसायादत्र कार्यकारणयोः पौर्वापर्यविपर्ययरूपा अतिशयोक्तिः। अत्र कारणस्य परभावित्वेनाध्यवसायोऽपि एवमेवोहनीयः।

(थ) कार्यकारणयोः समकालोत्पत्तावुदाहरति सममिति। रघुवंशचतुर्थसर्गस्थमिदं पद्यम्। द्विरदगामिना हस्तिवत् सलीलमन्दगमनशीलेन, तेन रघुणा, पित्र्यं पितृत आगतं सिंहासनम्, महीक्षितां राज्ञां मण्डलं चक्रञ्च, एतत् द्वयं समं युगपदेव समाक्रान्तं गृहीतमायत्तीकृतञ्च।

राजानो हि पैतृकं सिंहासनं गृहीत्वैव क्रमशस्तद्बलेन परराजमण्डलमायत्तीकुर्वन्तीति पैतृकसिंहासनग्रहणस्य कारणतया पूर्वभावित्वं परराजमण्डलायत्तीकरणस्य च कार्य्यतया परभावित्वमेव यथार्थम्। ततस्तु तयोः पूर्वापरभावित्वेनैव यथार्थयोः कवेः प्रौढ़ोक्तिवशादयथार्थेन समकालभावित्वेनाध्यवसायादत्रापि कार्य्यकारणयोः पौर्वापर्य्यविपर्य्ययरूपा अतिशयोक्तिः।

"धुनोति चासिं तनुते च कीर्त्तिम्" इत्यादावपि ईदृशैवातिशयोक्तिस्तन्मूलश्च समुच्चय इति समुच्चयालङ्कारप्रकरणे स्वयमेव वृत्तौ वक्ष्यते। तेन "केचित्तु" इत्यादिरामचरणोक्तिस्तद्दूषितोक्तिश्च तद्वृत्तिग्रन्थापर्य्यालोचनयैव सञ्जातेति तद्द्वयमपि हेयम्।

(द) इहेति। "कथमुपरि कलापिनः कलापः" इत्यादिश्लोके केशपाशादिगत इत्यर्थः, लौकिकस्तन्नायिकालोकयोग्यः, अतिशयो लम्बितत्वमसृणत्वाद्यतिरेकः, अलौकिकत्वेन कलापादिसौसादृश्यवशात् तन्नायिकालोकायोग्यत्वेन स्वर्गीयत्वेनेत्यर्थः। अतएवात्रापि अभेदे भेदाध्यवसायरूपैवातिशयोक्तिः, न तु पूर्वंवदुक्ता भेदे अभेदाध्यवसायरूपेति तेषामाशयः। ग्रन्थकृता तु भेदे अभेदाध्यवसायरूपायामेव "कथमुपरि कलापिनः कलापः" इत्यादिकमुदाहृतमिति पूर्वत्र द्रष्टव्यम्। ननु तत्र भेदे अभेदाध्यवसाये को दोष इत्याह केशेति। कलापादिभिः सह अभेदाध्यवसाये अभिमते इत्यर्थः। आदिशब्देन "अन्यल्लावण्यमेव च कापि वर्त्तनच्छाया" इति काव्यप्रकाशोदाहृतादेरभेदे भेदाध्यवसायस्थलमात्रस्यैव ग्रहणम्। तदस्य अभेदे भेदाध्यवसायस्थले अतिशयोक्तिलक्षणस्य। अत्र तेषामयमाशयः—"अन्यदेवाङ्गलावण्यम्" इत्यादौ तन्नायिकालावण्यादिषु नायिकान्तरलावण्यादीनां भेदस्यैव सत्त्वेन अभेदाभावात् अभेद एव भेदाध्यवसायो न स्यादित्यव्याप्तिर्दुर्वारैव; किन्तु लौकिकत्वेनाभिन्ने तन्नायिकालावण्यादौ अलौकिकत्वेन भिन्नानां लावण्यादीनामध्यवसाये तु लक्षणसङ्गतिः स्यादेव। अतो भेदे अभेदाध्यवसायस्थले च लौकिकत्वालौकिकत्वाभ्यामेव भेदाभेदयोर्ग्रहणस्यौचित्यात् "कथमुपरि—" इत्यादावपि तथैव अभेदे भेदाध्यवसायरूपा एवातिशयोक्तेरौचित्यमिति।

दिव" इति पाठे अध्यवसायस्य साध्यत्वमेवेत्युत्प्रेक्षाङ्गीक्रियते। "प्रागेव हरिणाक्षीणाम्" इत्यत्र वकुलादिस्त्रीणां प्रथमभावितापि पश्चाद्भावित्वेनाध्यवसिता, अतएवात्रापि इवशब्दप्रयोगे उत्प्रेक्षा (न)। एवमन्यत्र (प)।

६६। पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत्।
एकधर्म्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता॥ (फ)

(ध) उक्तमतं दूषयति तन्नेति। तत्रापि "अन्यदेवाङ्गलावण्यम्" इत्यादावपि। अन्यत् नायिकान्तरासाधारणम्। अन्यत्वेन नायिकान्तरासाधारणत्वेन केवलतन्नायिकानिष्ठत्वेनेत्यर्थः। एवञ्च, उक्तस्थले धर्मि-भेदाध्यवसायरूपातिशयोक्तेर्लक्षणसङ्गतेर्नाव्याप्तिरिति भावः।

(न) नन्वस्तु, तथापि मदुक्तरीत्यङ्गीकारे का क्षतिरित्याह तथाहीति। साध्यत्वमेव इवशब्दोपादानात् संशयद्योतनेन प्रागुक्तरीत्या निष्पाद्यत्वमेव। पश्चाद्भावित्वेनेति। एवं चित्तोत्कलिकायाः पर-भावितापि पूर्वभावित्वेनाध्यवसितेत्यपि बोध्यम्। 'प्रागिव' 'पश्चादिव' इत्यमिवशब्दप्रयोग इत्यर्थः। अत्र ग्रन्थकर्त्तुरयमभिप्रायः—उत्प्रेक्षातिशयोक्त्योः समान एव विषयः सर्वसम्मतः; अतएवोक्तरीत्या तत्र तत्र इवशब्दप्रयोगे उत्प्रेक्षापि सर्वसम्मतैव। तेन "अन्यदेव" इत्यादौ "अन्यदिव" इति पाठे मन्मते 'असाधारण-मिव' इत्याद्यर्थकतयेव भवन्मतेऽपि 'अलौकिकमिव' इत्याद्यर्थकतया उत्प्रेक्षा सम्भवत्येव; किन्तु "उदरि कलापिनः कलाप इव" इति पाठे 'अलौकिक इव' इत्यर्थस्यानुपस्थित्या उत्प्रेक्षातिशयोक्त्योर्विषयभेदापत्ति-र्दुर्वारैवेति भवदुक्तरीत्यङ्गीकारे महत्येव क्षतिरिति।

(प) एवमिति। अन्यत्राप्येवमुत्प्रेक्षा ऊह्येति शेषः। तथा च "सममेव समाक्रान्तम्" इत्यादावपि "सममिव" इति पाठे उत्प्रेक्षैवेति भावः।

(फ) अथ सादृश्यमूलकालङ्काराभिधानस्य प्रकृतत्वात् विशेषातिदिष्टया चातिशयोक्त्या तद्बाधा-असम्भवात् सादृश्यवत्तयैवानुभवात् "यो दीपकतुल्ययोगितादिषु उपमाद्यलङ्कारो व्यङ्ग्यः" इति चतुर्थपरिच्छेदे ग्रन्थकृदुक्तत्वाच्च सादृश्यमूलकाविव तुल्ययोगितादीपकालङ्कारावभिधातुं तयोः प्रसिद्धत्वात् प्रथमे तुल्ययोगिता-मभिधत्ते पदार्थानामिति। यदा प्रस्तुतानां पदार्थानामेकधर्म्माभिसम्बन्धो भवेत्, वा अथवा अप्रस्तुतानां पदार्थानामेकधर्म्माभिसम्बन्धो भवेत्, इति लक्षणद्वयम्, तदा तुल्ययोगिता स्यात्। तथा च यदि प्रस्तुतैरेव पदार्थैः सह प्रस्तुतानामेव पदार्थानाम् एकेन धर्म्मेण गुणरूपेण क्रियारूपेण वा अभिसम्बन्धः कर्त्तृतया कर्म्मतया करणतादिरूपेण वा सम्पर्को भवेत्, अथवा यदि अप्रस्तुतैरेव पदार्थैः सह अप्रस्तुतानामेव पदार्थानां तथैव एकधर्म्माभिसम्बन्धो भवेत्, तदा तुल्ययोगिता नाम अलङ्कारः स्यादित्यर्थः।

अतएव अप्रस्तुतेन सह प्रस्तुतस्य प्रस्तुतेन सह अप्रस्तुतस्य वा एकधर्म्माभिसम्बन्धरूपाद्दीपकादस्य भेदः। तुल्यो योग उक्तरूप एकधर्म्माभिसम्बन्धः अस्यास्तीति तुल्ययोगी अर्थस्तस्य भावस्तुल्ययोगितेति व्युत्पत्तिः। कारिकायाः सूत्ररूपत्वात् "सूत्रे लिङ्गं संख्या कालश्चातन्त्राणि" इति न्यायेन पदार्थानामिति बहुवचन-मविवक्षितम्। तेन द्वयोरपि तादृशयोः पदार्थयोरेकधर्म्माभिसम्बन्धे तुल्ययोगिता ज्ञेया।

अन्येषामप्रस्तुतानाम् । धर्म्मो गुणक्रियारूपः । उदाहरणम्—

"अनुलेपनानि कुसुमान्यबलाः कृतमन्यवः पतिषु दीपदशाः (१) ।
समयेन तेन सुचिरं शयितप्रतिबोधितस्मरमबोधिषत (२) ॥" (ब)

अत्र सन्ध्यावर्णनस्य प्रस्तुतत्वात् प्रस्तुतानामनुलेपनादीनामेकबोधन-क्रियाभिसम्बन्धः (भ) ।

"त्वदङ्गमार्दवं द्रष्टुः कस्य चित्ते न भासते ।
मालती-शशभृल्लेखा-कदलीनां कठोरता ॥" (म)

इत्यत्र मालत्यादीनामप्रस्तुतानां कठोरतारूपैकगुणसम्बन्धः (य) ।

एवम्—(र) "दानं वित्तादृतं वाचः कीर्त्तिधर्म्मौ तथायुषः ।
परोपकरणं कायादसारात् सारमाहरेत् ॥" (ल)

(ब) प्रस्तुतैः सह प्रस्तुतानामेकक्रियासम्बन्धे उदाहरति अनुलेपनानीति । शिशुपालवधनवमसर्गे सन्ध्यावर्णनेयम् । तेन समयेन सन्ध्याकालेन अनुलेपनानि कुङ्कुमचन्दनादीनि, कुसुमानि पुष्पाणि, पतिषु कृतमन्यवो विहितप्रणयकोपाः अबलाः स्त्रियः, तथा दीपानां दशा वर्त्तिकाश्च, सुचिरं शयितः पूर्वं सुप्तो निवृत्त-व्यापारः परञ्च प्रतिबोधितो जागरितः प्रवृत्तव्यापारः स्मरः कामो यस्मिन् कर्म्मणि तद्यथा तथा, अबोधिषत बोधिताः । अबोधिषतेत्यस्य यथासङ्गतमर्था अनुसन्धेयाः ।

(भ) अत्रेति । प्रस्तुतानामिति । भोगिजनस्य अनुलेपनादीनां सन्ध्याकालीनोपकरणत्वादिति भावः । अभिसम्बन्धः कर्म्मतासम्बन्धेन सम्बन्ध इत्यर्थः ।

(म) अप्रस्तुतानामेकगुणाभिसम्बन्धे उदाहरति त्वदङ्गेति । तव अङ्गानां मार्दवं कोमलतां द्रष्टुः साधुदर्शनकारिणः कस्य जनस्य चित्ते, मालती-शशभृल्लेखा-कदलीनां जातीकुसुम-चन्द्रलेखा-रम्भास्तम्भानां कठोरता कठिनत्वं न भासते न प्रकाशते अपि तु सर्वस्यैव भासत इत्यर्थः । तवाङ्गानां कोमलता मालत्या-दिभ्योऽप्यधिकेति भावः । द्रष्टुरिति साधुकारिण्यर्थे तृन्प्रत्ययात् त्वदङ्गमार्दवमित्यत्र "न निष्ठादिषु" इति षष्ठीनिषेधात् द्वितीयैव ।

(य) इत्यत्रेति । अप्रस्तुतानामिति । नायिकावर्णनस्यैव प्रस्तुतत्वादिति भावः । कठोरतारूपेण एकेन गुणेन सम्बन्धः अधिकरणतासम्बन्धेनाभिसम्बन्ध इत्यर्थः ।

(र) एतौ च गुणक्रिययोरेकैकाभिसम्बन्धे उदाहृत्य इदानीं ताभ्यां द्वाभ्यामेव युगपदभिसम्बन्धे उदा-हर्त्तुमाह एवमिति ।

(ल) दानमिति । असारादिति ईषदर्थे नञ्, अभावार्थकत्वे तु सारमाहरेदिति नोपपद्यते सर्वथा साररहितपदार्थतः साराहरणासम्भवात् । तथा च असारात् दानोपयोगिताऽपकिञ्चिदुत्कृष्टांश-

(१) दीपशिखाः इतीदानीन्तनमूलपुस्तकेषु पाठः ।

(२) समयेन तेन चिरसुप्तमनोभवबोधनं सममबोधिषत इतीदानीन्तनपुस्तकेषु पाठः ।

अत्र दानादीनां कर्म्मभूतानां सारतारूपैकगुणसम्बन्ध एकाहरणक्रिया-सम्बन्धः (व)।

६७। अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते।

अथ कारकमेकं स्यादनेकासु क्रियासु चेत्॥ (श)

विशिष्टात् वित्तात् धनात् सारं तदुत्कृष्टांशप्रयोज्यं दानम्, आहरेदुद्धरेत्। एवमन्यत्राप्युन्नेयम्। असाराया वाचो वाक्यात्, सारम् ऋतं सत्यम्, आहरेत्। असारादायुषः सारौ कीर्त्तिधर्म्मौ आहरेत्। तथा असारात् कायात् शरीरात् सारं परोपकरणं परोपकारम् आहरेत्। सर्वत्र बुद्धिमान् जन इति शेषः।

(व) अत्रेति। दानादीनां प्रस्तुतानामप्रस्तुतानां वा। सारतारूपेण एकेन गुणेन सम्बन्धे अधि-करणतासम्बन्धेन सम्बन्धे सतीत्यर्थः, एकया आहरणक्रियया सम्बन्धः कर्म्मतासम्बन्धेन सम्बन्धः। असारादिति ईषदर्थे नञोऽङ्गीकारेण असारतारूपैकगुणसम्बन्धश्च बोध्यः। एतेन युगपदेकधर्म्मसम्बन्धेऽपि तुल्ययोगिता स्यादेव बाधकाभावादिति सूचितम्। द्वयोः प्रस्तुतयोः पदार्थयोरेकधर्म्माभिसम्बन्धे यथा नैषधे—

"जितस्त्वयास्येन विधुः स्मरः श्रिया कृतप्रतिज्ञौ मम तौ वधे कुतः।

तवेति कृत्वा यदि तज्जितं मया न मोघसङ्कल्पधराः किलामराः॥"

अत्र "प्रसूनबाणोपनिषन्निशम्यताम्" इति पूर्वमभिहितत्वात् स्मरस्य तदुपकरणत्वाद्विधोश्च प्रस्तुतत्वमिति प्रस्तुतयोर्विधुस्मरयोर्जित इत्येकक्रियया कर्म्मतासम्बन्धेन सम्बन्धात् तुल्ययोगिता। एवमप्रस्तुतयोरप्यूह्यम्। "चैत्रो मैत्रश्च गच्छतः" इत्यादौ तु चैत्रमैत्रयोरेकगमनक्रियासम्बन्धेऽपि वैचित्र्याभावान्न तुल्ययोगिता।

(श) उक्तायुक्तेरवशिष्टं दीपकालङ्कारं लक्षयति अप्रस्तुतेति। अप्रस्तुतप्रस्तुतयोस्तु पदार्थयोरेक-धर्म्माभिसम्बन्ध इत्यनुकृष्यते दीपकं नामालङ्कारो निगद्यते। अत्र "तु" इत्यव्ययनिपातस्य नानार्थतया साम्य-वाचक-वैधर्म्म्ययोरभावे सतीति विशेषणञ्च लभ्यते। एवञ्च।

अप्रस्तुतेन सह प्रस्तुतस्य प्रस्तुतेन वा सहाप्रस्तुतस्य पदार्थस्य साम्यवाचकवैधर्म्म्ययोरभावे सत्येकधर्म्माभि-सम्बन्धो दीपकमिति लक्षणं पर्य्यवसितम्।

तेन प्रस्तुतैः सह प्रस्तुतानामप्रस्तुतैः सह चाप्रस्तुतानामेकधर्म्माभिसम्बन्धरूपायां तुल्ययोगितायां नाति-व्याप्तिः। तथा "कमलमिव मुखं मनोज्ञम्" इत्यादौ अप्रस्तुतप्रस्तुतयोः कमलमुखयोर्मनोज्ञत्वरूपैकगुण-सम्बन्धेऽपि साम्यवाचकस्य इवशब्दस्य सत्त्वान्नातिप्रसङ्गः। "पौरं जनं सुतीयसि" इत्यादौ "यो यत्र प्रत्ययो जातः समासो यत्र वा भवेत्। स एनं वक्ति" इति न्यायेन साम्यवाचकस्य क्यच्प्रत्ययस्य "विराजते चन्द्र-मुखी किलेयम्" इत्यादौ च साम्यवाचकस्य उपमितसमासस्य सत्त्वान्नातिप्रसक्तिः। एवं "तृष्णापहारी विमलो द्विजावासो जनप्रियः। ह्रदः पद्माकरः किन्तु बुधस्त्वं स जलाशयः॥" इत्यादौ वैधर्म्म्यस्यापि सत्त्वान्नातिव्याप्तिः।

विशिष्टं लक्षणान्तरमाह अथेति। अथशब्द एव तद्वैशिष्ट्यं सूचयति। चेद्यदि अनेकासु क्रियासु एकं यत् किञ्चित् कारकं स्यात्, तदा तदपि दीपकमेव निगद्यत इत्यर्थः।

तथा च दीपयति अप्रस्तुतमपि पदार्थं बुद्धाववभासयतीति दीपकम्। अस्मादेव च प्रमाणादत्रार्थे दीपकशब्द एष कारकशब्द इव नित्यक्लीबलिङ्ग इति बोध्यम्।

क्रमेणोदाहरणम्—"बलावलेपादधुनापि पूर्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा ।
सती च योषित् प्रकृतिश्च निश्चला (१)
पुमांसमभ्येति भवान्तरेष्वपि ॥" (य)

अत्र प्रस्तुताया निश्चलायाः प्रकृतेरप्रस्तुतायाश्च सत्या योषित एकानुगमनक्रियासम्बन्धः (र) ।

"दूरं समागतवति त्वयि जीवनाथे
भिन्ना मनोभवशरेण तपस्विनी सा ।
उत्तिष्ठति स्वपिति वासगृहं त्वदीय-
मायाति याति हसति श्वसिति क्षणेन ॥" (ल)

इदं मम । अत्रैकस्या नायिकाया उत्थानाद्यनेकक्रियासम्बन्धः ।

अत्र च गुणक्रिययोरादिमध्यावसानसद्भावेन त्रैविध्यं न लक्षितम्, तथाविधवैचित्र्यस्य सर्वत्रापि सहस्रधा सम्भवात् (व) ।

(य) आद्यमुदाहरति बलेति । शिशुपालवधप्रथमसर्गस्थमिदं पद्यम् । जिगीषुणा जेतुमिच्छुना तेन शिशुपालेन, बलस्य स्वसामर्थ्यस्य अवलेपाद्दर्पात्, अधुनापि अस्मिन् जन्मन्यपि पूर्ववत् पूर्वपूर्वजन्मनीव, जगत् प्रबाध्यते अतीव पीड्यते । कथमेतदित्याह सतीति । सती योषित् स्त्री च, निश्चला सुस्थिरा प्रकृतिः स्वभावश्च, भवान्तरेष्वपि जन्मान्तरेष्वपि पुमांसं पुरुषम् अभ्येति प्राप्नोति ।

(र) अत्रेति । प्रस्तुताया इति । शिशुपालवधस्य प्रस्तुतत्वेनैव तत्प्रकृतेरपि प्रस्तुतत्वमिति भावः ।

(ल) द्वितीयमुदाहरति दूरमिति । पत्युरन्तिके नायिकादूत्या उक्तिरियम् । जीवनाथे प्राणेश्वरे त्वयि, दूरं समागतवति सति, सा तपस्विनी शोच्या तव कान्तेत्यर्थः, मनोभवशरेण मदनबाणेन भिन्ना विदीर्णा सती, क्षणेन उत्तिष्ठति दण्डायमाना भवति, क्षणेन स्वपिति शेते, क्षणेन त्वदीयं वासगृहम् आयाति, पुनः क्षणेनैव याति ततो वासगृहाद्गच्छति, क्षणेन हसति, क्षणेन च श्वसिति श्वासान् मुञ्चति ।

अत्रापि प्रागुक्तयुक्तेरप्रस्तुतयोरिति प्रत्येकगतैकत्वेन द्वित्वमविवक्षितम् । तेन तयोः प्रत्येकगतानेकत्वेऽपि दीपकमेव । यथा मम रुक्मिणीहरणमहाकाव्ये—

"विदधदपि जपं यत्तव कश्चिद्विपश्चिद्युवतिजनमपश्यन्नाल्पशः सोऽस्य दोषः ।
हरति हि नवनारी कौमुदी पद्मिनी वा नयनमवहितानामप्यकस्मात् स्वभावात् ॥"

अत्र नवनारी प्रस्तुता कौमुदीपद्मिन्यौ तु अप्रस्तुते, तासाञ्च सर्वासां हरतीत्येकक्रियासम्बन्धाद्दीपकम् । किञ्चात्र कौमुदीपद्मिन्योरप्रस्तुतयोर्हरतीत्येकक्रियासम्बन्धात्तुल्ययोगिता चेत्यनयोरेकाश्रयानुप्रवेशरूपः सङ्करः ।

---

(१) सतीव योषित् प्रकृतिः सुनिश्चला इतीदानीन्तनशिशुपालवधपुस्तकेषु पाठः ।

९८ । प्रतिवस्तूपमा सा स्याद्वाक्ययोर्गम्यसाम्ययोः ।
एकोऽपि धर्म्मः सामान्यो यत्र निर्द्दिश्यते पृथक् ॥ (क)

यथा—"धन्यासि वैदर्भि ! गुणैरुदारै-
र्यया समाकृष्यत नैषधोऽपि ।
इतः स्तुतिः का खलु चन्द्रिकाया
यदब्धिमप्युत्तरलीकरोति ॥" (ख)

अत्र समाकर्षणमुत्तरलीकरणञ्च क्रिया एकैव, पौनरुक्त्यनिरासाय भिन्नवाचकतया निर्द्दिष्टा (ग) । इयञ्च मालयापि दृश्यते (घ) । यथा—

(घ) अत्र चेति । सर्वत्रापि सर्वेष्वेवालङ्कारेष्वपि ।

(क) अथ सादृश्यमूलकालङ्कारनिरूपणस्य प्रक्रान्तत्वात् प्रकारान्तरसादृश्यमूलकं प्रतिवस्तूपमालङ्कारं निरूपयति प्रतीति । यत्रेति यदित्यर्थकमव्ययम् । तथा च गम्यं तात्पर्य्यपर्य्यालोचनयैव बोध्यं न पुनर्वाच्यमित्यर्थः साम्य सादृश्यं ययोस्तयोस्सादृश्ययोः, वाक्ययोर्वाक्यार्थद्वयस्य, एकोऽपि अभिन्नोऽपि सामान्यः साधारण उपमानोपमेयोभयवृत्तिरित्यर्थः । धर्म्मो गुणः क्रिया वा, यत्र यत् पृथक् निर्द्दिश्यते एकार्थकभिन्नानुपूर्वीकशब्देन प्रत्याय्यते, सा प्रतिवस्तूपमा नाम अलङ्कारः स्यात् ।

प्रतिवस्तु प्रतिपदार्थम् उपमा सादृश्यमिति प्रतिवस्तूपमा । तथाहि उदाहरणे चन्द्रिकया सह दमयन्त्याः अब्धिना सह च नैषधस्य सादृश्यादुक्तव्युत्पत्तिसिद्धिः ।

अत्र गम्यसाम्ययोरित्यभिधानात् "अम्बुजं मृदु, मुखञ्च कोमलम्" इत्यादौ साम्यप्रतीत्यभावान्नातिप्रसङ्गः । गम्येत्यभिधानात् "मुखं तव तथा भाति यथा राजति चन्द्रमाः" इत्यादौ वाच्यसाम्ये नातिव्याप्तिः । एकोऽपीत्यभिधानात् अनेकधर्म्मे दृष्टान्ते न प्रसक्तिः । पृथगित्यभिधानाच्च न कथितपदतादोषः ।

(ख) धन्येति । नैषधचरिततृतीयसर्गस्थमिदं पद्यम् । हे वैदर्भि ! दमयन्ति ! त्वं धन्यासि, यथा त्वया, उदारैर्महद्भिर्गुणैः सौन्दर्य्यादिभिः, नैषधो नलोऽपि समाकृष्यत सम्यगाकृष्टः । तथा च चन्द्रिकाया ज्योत्स्नायाः, इतः अस्या उच्यमानाया अधिकेत्यर्थः का खलु स्तुतिः स्तुतियोग्यो महिमा सम्भवतीति शेषः, यत् अब्धिं समुद्रमपि उत्तरलीकरोति चञ्चलं करोति ।

(ग) अत्रेति । एकैवेति । नैषधस्य समाकर्षणमपि कामोत्पादनेन अस्थिरीकरणम्, समुद्रस्य उत्तरलीकरणमपि च पूरोत्पादनेन तदस्थिरीकरणमेवेति भावः । पौनरुक्त्यनिरासाय कथितपदतादोषाप्रसङ्गाय, भिन्नवाचकतया भिन्नानुपूर्वीकशब्देन । तथा दमयन्तीचन्द्रिकयोर्नलसमुद्रयोश्च साम्यं तात्पर्य्यपर्य्यालोचनया प्राप्तमित्यपि बोध्यम् ।

(घ) इयञ्चेति । प्रतिवस्तूपमा चेत्यर्थः । मालयापि एकत्वानेकत्वेनापीति तात्पर्य्यम् । एतेन कारिकायां "वाक्ययोः" इति द्विवचनमनेकोपलक्षणमिति सूचितम् ।

"विमल एव रविर्विशदः शशी प्रकृतिशोभन एव हि दर्पणः।
शिवगिरिः शिवहाससहोदरः सहजसुन्दर एव हि सज्जनः॥" (ङ)

अत्र विमलविशदादिरर्थत एक एव (च)। वैधर्म्ये यथा—

"चकोर्य्य एव चतुराश्चन्द्रिकापानकर्म्मणि (१)।
विनावन्तीर्न निपुणाः सुदृशो रतनर्म्मणि (२)॥" (छ)

६९। दृष्टान्तस्तु सधर्म्मस्य वस्तुनः प्रतिबिम्बनम्॥ (ज)

(ङ) विमल इति। रविः सूर्य्यो विमल एव तेजोमयतया निर्म्मल एव; शशी चन्द्रो विशद एव तेजोमयतयैव निर्म्मल एव; दर्पण आदर्शोऽपि प्रकृत्या स्वभावेन शोभन एव हि अत्यन्तोज्ज्वलतया अत्यन्त-निर्म्मल एव; शिवगिरिः कैलासपर्वतः शिवस्य महादेवस्य यो हासो हास्यं तस्य सहोदरः सदृश एव, तत्-सदृशतया निर्म्मल एवेत्यर्थः; तथा सज्जनोऽपि सहजसुन्दर एव स्वभावतो निर्म्मल एव। अत्र "यः कौमार-हरः स एव हि वरः" इत्यादिवत् एवहीति-शब्दद्वयमत्यन्तमेव नियमं द्योतयति। किन्तु शिवशब्दस्य द्विःपाठात् कथितपदतादोषः।

(च) अथोदाहृते प्रत्येकवाक्य एव भिन्नभिन्नो धर्म्म इति कथं लक्षणसङ्गतिरित्याह अत्रेति। विमल-विशदादिर्विमलविशदादिशब्दप्रतिपाद्यो धर्म्म इत्यर्थः, अर्थतस्तात्पर्य्यतः, एक एव अभिन्न एव, सर्व्वेषामेव निर्म्मलताऽपत्वादिति भावः। किन्तु केवलकथितपदतादोषनिरासाय भिन्नभिन्नशब्देन निर्द्दिष्ट इति वाक्यशेषः। अत्रापि रविप्रभृतीनां साम्यं तात्पर्य्यपर्य्यालोचनयैव प्राप्तमित्यवधेयम्।

(छ) चकोर्य्य इति। चन्द्रिकाया ज्योत्स्नायास्तद्गतजलबिन्दूनामित्यर्थः। पानकर्म्मणि चकोर्य्यस्तदाख्याः, पक्षिणीविशेषा एव चतुरा दक्षाः। तथा च आवन्तीः अवन्तिदेशोद्भवा रमणीर्विना अन्याः सुदृशो रमण्यः, रतनर्म्मणि रतिलीलायां न निपुणा न दक्षाः, केवलमावन्त्य एव दक्षा इत्यर्थः।

अत्र चातुर्य्यरूपो नैपुण्यरूपस्य धर्म्म एक एव, किन्तु कथितपदतादोषनिरासाय केवलं शब्दभेदेन निर्द्दिष्टः; तत्र च नञ उपादानात् नैपुण्ये चातुर्य्यवैपरीत्यं सञ्जातमिति वैधर्म्म्यम्। अथवा "विना-वन्तीर्न निपुणाः" इत्युक्तिभङ्ग्या आवन्त्य एव निपुणा इत्येव प्रतीयते तन्नैपुण्यं चातुर्य्यञ्च एक एव धर्म्मः शब्दभेदेन निर्द्दिष्टः, तत्र च "न निपुणाः" इत्यनैपुण्यं नाम वैधर्म्म्यम्; तात्पर्य्यपर्य्यालोचनया च चकोरीणामावन्तीनाञ्च साम्यमुपलब्धमिति प्रतिवस्तूपमेत्याशयः।

(ज) दृष्टान्तस्यापि प्रस्तुतसमर्थकतया प्रतिवस्तूपमासजातीयत्वात् प्रतिवस्तूपमानिरूपणानन्तरं दृष्टान्तं निरूपयति दृष्टान्त इति। तुशब्दः प्रतिवस्तूपमाभेदद्योतनार्थः। समानः सदृश एव न पुनः प्रतिवस्तूपमा-वदभिन्न इत्यर्थः धर्म्मो गुणः क्रिया वा यस्य स सधर्म्मस्तस्य सधर्म्मस्य सदृशस्येत्यर्थः वस्तुनः पदार्थस्य, प्रतिबिम्बनं प्रतिबिम्बभावेन स्थापनं प्रस्तुतसमर्थनाय तात्पर्य्यलभ्यसाम्यकतया वाक्यान्तरेणोपादानमित्यर्थः, दृष्टान्तो नामालङ्कारः स्यात्। एतेन—

---

(१) चन्द्रिकाचामकर्म्मणि इति पाठान्तरम्। (२) रतकर्म्मणि इति पाठभेदः।

सधर्म्मस्येति प्रतिवस्तूपमाव्यवच्छेदः (झ) ।

अयमपि साधर्म्म्यवैधर्म्म्याभ्यां द्विधा । क्रमेणोदाहरणम्—

"अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम् ।
अनधिगतपरिमलापि हि हरति दृशं मालतीमाला ॥" (ञ)

समानधर्म्मिणः प्रणिधानगम्यसाम्यकतया वाक्यान्तरेणोपादानं दृष्टान्त इति लक्षणं फलितम् ।

अत्र समानत्वं नाम समर्थनीयसमर्थकयोरुभयोरेव सामान्यत्वेन विशेषत्वेन वा सजातीयत्वं बोध्यम् । इत्यञ्च, प्रतिवस्तूपमायामभिन्नो धर्म्मः, इह तु भिन्नो धर्म्मः सम्भवद्वस्तुसम्बन्धरूपायां निदर्शनायामर्थान्तरन्यासे च कदाचित् समर्थनीयस्य सामान्यत्वं समर्थकस्य तु विशेषत्वम्, कदाचिद्वा समर्थनीयस्य विशेषत्वं समर्थकस्य तु सामान्यत्वम्; इह तु समर्थनीयसमर्थकयोरुभयोरेव कदाचिदेकं सामान्यत्वमेव कदाचिदेकं विशेषत्वमेव वा । तेन च समानधर्म्मिण इत्युपादानादुक्तेषु प्रतिवस्तूपमादिषु नातिव्याप्तिः । प्रणिधानगम्यसाम्यकतयेत्यभिधानात् "मुखं तव तथा भाति यथा राजति चन्द्रमाः" इत्यादौ वाच्यसाम्यायामुपमायां नातिप्रसक्तिः । वाक्यान्तरेणेत्युक्तेश्च "मुखं धाम्नि विधुर्व्योम्नि भाति भाग्येन साम्प्रतम्" इत्यादावेकवाक्ये प्रणिधानगम्यसाम्ये दीपके नातिप्रसङ्गः । न च "अत्रापि वाक्ययोरित्यनुवर्त्तते । तेन भल्लापवर्जितैरित्यत्र नातिव्याप्तिरेकवाक्यत्वात्" इति रामचरणोक्तमपि युक्तमिति वाच्यम्, "भल्लापवर्जितैस्तेषाम्" इत्यादौ इवशब्दोपादानेन साम्यस्य वाच्यतया प्रणिधानगम्यत्वाभावादेवातिव्याप्तेर्वारणात् ।

दृष्टोऽवगतः अन्तः समर्थनीये समर्थकस्य स्वरूपं सादृश्यं यस्मिन् स दृष्टान्त इति व्युत्पत्तिः । तथा च मेदिनी—"अन्तःस्वरूपे नाशे ना न स्त्री शेषेऽन्तिके त्रिषु ।"

प्रतिबिम्बस्य करणमिति प्रतिबिम्बनं करोत्यर्थे नन्तात् प्रतिबिम्बशब्दाद्भावे युट् ।

(झ) ननु प्रतिबिम्बनमित्यनेनैवोपपत्तौ किमर्थं सधर्म्मस्येत्युपादानमित्याह सधर्म्मस्येति । इति अनेन विशेषणेनेत्यर्थः, प्रतिवस्तूपमाया व्यवच्छेदो व्यावृत्तिः । तथा च प्रतिवस्तूपमायां समर्थ्यसमर्थकयोर्निरुक्तरूपेण अभिन्न एव धर्म्मः; इह तु समानत्वेन भिन्न एव धर्म्मः, तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वस्य समानपदार्थत्वादिति भावः ।

(ञ) साधर्म्म्ये उदाहरति अविदितेति । वासवदत्तास्थमिदं पद्यम् । सतां श्रेष्ठानां कवीनां भणितिरुक्तिः, अविदितगुणापि अज्ञातरसभावादिरपि श्रुतमात्रापीत्यर्थः, कर्णेषु मधुनो धारां वमति उद्गिरति । तथाहि मालतीमाला मालतीकुसुमस्रक्, अनधिगतपरिमलापि अलब्धसौरभापि दृशं नयनं हरति आकर्षति ।

अत्र दृग्हरणरूपधर्म्मेण समानधर्म्मिरूपया मालतीमालया द्वितीयार्द्धे वाक्येनोपादानात् तया च मालतीमालया सह प्रथमवाक्यगतसत्कविभणितेः साम्यस्य वाचकाभावात् प्रणिधानेनैव गम्यत्वाच्च दृष्टान्तः । तथा वमनहरणयोरुभयोरेव भावपदार्थतया साधर्म्म्यम् । एवं समर्थनीयं पूर्वार्द्धं समर्थकमुत्तरार्द्धं चेत्युभयमपि विशेषरूपमेवेति बोध्यम् ।

"त्वयि दृष्टे कुरङ्गाक्ष्याः स्रंसते मदनव्यथा ।
दृष्टानुदयभाजीन्दौ ग्लानिः कुमुदसंहतेः ॥" (ट)

"वसन्तलेखैकनिबद्धभावं परासु कान्तासु मनः कुतो नः ? ।
प्रफुल्लमल्लीमधुलम्पटः किं मधुव्रतः काङ्क्षति वल्लिमन्याम् ? ॥" (ठ)

इदं पद्यं मम । अत्र "मनः कुतो नः" इत्यस्य "काङ्क्षति वल्लिमन्याम् ?" इत्यस्य चैकरूपतयैव पर्य्यवसानात् प्रतिवस्तूपमैव (ड)। इह तु कर्णे मधुधारावमनस्य नेत्रहरणस्य च साम्यमेव, न त्वैकरूप्यम् (ढ)।

(ट) वैधर्म्ये उदाहरति त्वयीति । नायकं प्रति नायिकादूत्या उक्तिरियम् । त्वयि नायके दृष्टे सति, कुरङ्गाक्ष्या हरिणनयनायास्तव कान्ताया इत्यर्थः, मदनव्यथा कामवेदना, स्रंसते अपैति । तथा च इन्दौ चन्द्रे अनुदयभाजि उदयमलब्धवति सति, कुमुदसंहतेः कैरवगणस्य ग्लानिः प्रफुल्लताहानिः दृष्टा ।

अत्रापि नायकदर्शनेन प्रफुल्लतया समानधर्म्मिरूपायाः कुमुदसंहतेर्द्वितीयार्द्धवाक्ये नोपादानात् तया च कुमुदसंहत्या सह कुरङ्गाक्ष्याः साम्यस्य वाचकाभावात् प्रणिधानेनैव गम्यत्वाच्च दृष्टान्तः । पूर्वार्द्धे मदनव्यथाया भ्रंशः, परार्द्धे तु ग्लानिरित्यभावभावाभ्यामुभयोर्वैधर्म्यम् । तथा पूर्ववदुभयमपि विशेषमेव । तेन चेदमुभयमेवोदाहरणं समर्थ्यसमर्थकयोर्विशेषरूपत्व एव ज्ञेयम् ।

उभयोरेव सामान्यरूपत्वे यथा मम रुक्मिणीहरणमहाकाव्ये—

"अपरप्रथितं निजं यशो न यशस्वी स्वयमेव भाषते ।
स्वविरोधकप्रत्ययोदये प्रविपर्य्येति विभक्तिरर्थभाक् ॥"

इदं साधर्म्ये । वैधर्म्ये तूह्यम् ।

(ठ) स्थलविशेषे दृष्टान्तप्रतिवस्तूपमयोः सन्देहनिरासायोदाहरति वसन्तेति । वसन्तलेखायां तदाख्ये नायिकाविशेषे एकं केवलं निबद्धो भावोऽनुरागो येन तत्तादृशं नः अस्माकं मनः, परासु वसन्तलेखाभिन्नासु कान्तासु सुन्दरीषु, कुतः कथं गच्छति ? अपि तु कथमपि नेत्यर्थः । तथाहि प्रफुल्लायाः प्रस्फुटितायाः मल्ल्या मल्लिकाकुसुमस्य, मधुलम्पटो मधुपानलोभी, मधुव्रतो भ्रमरः, किम् अन्यां वल्लिं लतां काङ्क्षति ? अपि तु कथमपि नेत्यर्थः ।

(ड) नन्वत्र प्रदर्शितेनार्थापत्तिद्वयेन एकस्मिन्नभाव एव वाक्यार्थपर्य्यवसानात् किं प्रतिवस्तूपमा ? किंवा मनोगमन-मधुव्रताकाङ्क्षयोर्धर्म्मयोः साम्याद्भेदाच्च दृष्टान्त इत्याशङ्कायामाह अत्रेति । एकरूपतयैवेति । तथा च तादृशपरकान्ताविषयकमनोगमनाकाङ्क्षयोः प्रतियोगिनोरभेदात्तदभावयोरप्यभेद एवाङ्गीक्रियते लाघवादित्याशयः । एतेन प्रतिवस्तूपमालक्षणे धर्म्मपदं वृत्तिमत्पदार्थमात्रोपलक्षणमिति सूचितम् ।

(ढ) दृष्टान्ते धर्म्मस्य साम्यमेव न त्वभेद इति दर्शयति इह त्विति । "अविदितगुणापि" इत्यादौ

अत्र समर्थ्यसमर्थकवाक्ययोः सामान्यविशेषभावोऽर्थान्तरन्यासे (१), प्रतिवस्तूपमा-दृष्टान्तयोस्तु न तथेति भेदः (थ)।

७०। सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वापि कुत्रचित्।
यत्र विम्बानुविम्बत्वं बोधयेत् सा निदर्शना ॥ (त)

त्वित्यर्थः। साम्यमेवेति। कर्णावच्छेदेन नेत्रावच्छेदेन चात्मनि प्रीतिजनकत्वस्यैव साधारणधर्मत्वादिति भावः। न त्वेकरूप्यं न त्वभिन्नधर्मत्वं वस्तुत एव कारकक्रिययोर्भेदादित्याशयः।

(थ) ननु प्रतिवस्तूपमायां दृष्टान्ते अर्थान्तरन्यासे च सर्वत्रैव प्रथमवाक्यं प्रति द्वितीयवाक्यस्य समर्थकत्वदर्शनादर्थान्तरन्यासेन सह प्रतिवस्तूपमादृष्टान्तयोः को भेद इत्याह अत्रेति। युक्तिप्रदर्शनद्वारा वाक्यान्तरेण यद्वाक्यं दृढीक्रियते तत् समर्थ्यं वाक्यम्; यच्च वाक्यं युक्तिप्रदर्शनद्वारा वाक्यान्तरं दृढीकरोति तत् समर्थकं वाक्यम्। सामान्यविशेषभावो व्यापकव्याप्यभावः। तथा चार्थान्तरन्यासे समर्थ्यवाक्यस्य सामान्यत्वम् इतरस्य विशेषत्वम्, किंवा समर्थकवाक्यस्य सामान्यत्वमितरस्य तु विशेषत्वम् आवश्यकमित्यर्थः। किन्तु प्रतिवस्तूपमादृष्टान्तयोः समर्थ्यसमर्थकवाक्ययोः, न तथा न सामान्यविशेषभावः। तथा च प्रतिवस्तूपमादृष्टान्तयोरपि अर्थान्तरन्यासवदेव वाक्यद्वयस्य परस्परं समर्थ्यसमर्थकभावो विद्यत एव; किन्तु अर्थान्तरन्यासवत् तयोर्वाक्ययोराद्यस्य सामान्यत्वं द्वितीयस्य विशेषत्वम्, किंवा आद्यस्य विशेषत्वं द्वितीयस्य सामान्यत्वम् इति न विद्यते; अपि तु द्वयोरेव वाक्ययोः सामान्यत्वं किंवा विशेषत्वमित्येव विद्यत इति सरलार्थः। एतेन "न तथा न सामान्यविशेषभावो न वा समर्थ्यसमर्थकभावः" इति रामचरणोक्तमपास्तम्। प्रतिवस्तूपमादृष्टान्तयोरपि वाक्यद्वये समर्थ्यसमर्थकभावस्य स्पष्टमेव प्रतीयमानत्वात्, अन्यथा चोपमानवाक्यस्य वैयर्थ्यापत्तेर्दुर्निवारत्वात्, अस्याश्च वृत्तिपङ्क्तौ "न तथा" इत्यनेन प्रथमान्ततया "सामान्यविशेषभावः" इत्यस्यैव सम्बन्धयोग्यत्वेन ग्रन्थकारस्यापि तथैवाभिप्रायावधारणाच्चेति सुधीभिर्विभावनीयम्।

(त) प्राकरणिकसादृश्यप्रयुक्तमेव निदर्शनालङ्कारं लक्षयति सम्भवन्निति। अत्रापि यत्रेति यदित्यर्थकमव्ययम्। तथा च वस्तुसम्बन्धः पदार्थानामन्वयः कुत्रचित् सम्भवन् कस्या अपि बाधाया अभावादुपपद्यमानः सन्, कुत्रचिद्वापि असम्भवन् कयाचिद्बाधया अनुपपद्यमानः सन्, यत्र तत् विम्बानुविम्बत्वं विम्बप्रतिविम्बभावम् उपमानोपमेयभावमिति यावत्, बोधयेद्व्यञ्जनया प्रतिपादयेत् सा निदर्शना नाम अलङ्कारः स्यात्।

एतेन सादृश्यकल्पनायां पर्यवसितौ वाक्यार्थौ निदर्शनेति संक्षिप्तसरलार्थः।

तथा च सम्भवद्वस्तुसम्बन्धा असम्भवद्वस्तुसम्बन्धा चेति द्विविधा निदर्शना। तत्र दृष्टान्ते वाक्ययोर्न सामान्यविशेषभावः सम्भवद्वस्तुसम्बन्धरूपनिदर्शनायामर्थान्तरन्यासे च वाक्ययोः सामान्यविशेषभावः। अर्थान्तरन्यासे द्वितीयवाक्यं पूर्ववाक्यसमर्थकम्, सम्भवद्वस्तुसम्बन्धायान्तु न तथा। असम्भवद्वस्तुसम्बन्ध-

---

(१) अर्थान्तरन्यास इति प्रथमान्तः पाठोऽपि दृश्यते।

तत्र सम्भवद्वस्तुसम्बन्धनिदर्शना यथा—

"कोऽत्रभूमिवलये जनान् मुधा तापयन् सुचिरमेति सम्पदम् ?।
वेदयन्निति दिनेन भानुमान् आससाद चरमाचलं ततः॥" (थ)

अत्र रवेरीदृशार्थवेदनक्रियायां कर्त्तृत्वेनान्वयः सम्भवत्येव, ईदृशार्थज्ञापनसमर्थचरमाचलप्राप्तिरूपधर्म्मवत्त्वात् (१)। स च रवेरस्ताचलगमनस्य परतापिनां विपत्प्राप्तेश्च बिम्बप्रतिबिम्बभावं बोधयति (द)।

असम्भवद्वस्तुसम्बन्धनिदर्शना त्वेकवाक्यानेकवाक्यगतत्वेन द्विविधा। तत्रैकवाक्यगा यथा—

"कलयति कुवलयमाला-ललितं कुटिलः कटाक्षविक्षेपः।
अधरः किसलयलीलामाननमस्याः कलानिधेर्विलासम्॥" (ध)

निदर्शनायान्तु वाक्यार्थानुपपत्तिः, दृष्टान्ते अर्थान्तरन्यासे च न तथेति भेदः। ग्रन्थकृता त्वन्यथा भेदोऽपि दर्शयिष्यते।

निदर्शयति निश्चयेनोपमानोपमेयभावं बोधयतीति निदर्शना। निपूर्वकदृशधातोः "ईषिश्रन्थ्यासी"-त्यादिना स्वाधिकारे युप्रत्ययः।

(थ) क इति। अत्र भूमिवलये पृथिवीमण्डले को जनः, मुधा अनर्थकं जनान् तापयन् सन्, सुचिरं बहुकालं सम्पदं समृद्धिम् एति प्राप्नोति, अपि तु कोऽपि नेत्यर्थः। भानुमान् सूर्यः, दिनेन इति वेदयन् बोधयन् सन्, ततो दिनावसाने चरमाचलम् अस्तम्, आससाद जगाम।

(द) उदाहृते लक्षणं सङ्गमयितुमाह अत्रेति। ईदृशार्थस्य कोऽपि जनो निरर्थकं जनान् तापयन् दीर्घकालं सम्पदं न प्राप्नोति इति प्रथमार्द्धोक्तस्य अर्थस्य, वेदनक्रियायां बोधनक्रियायाम्। ननु रवेरचेतनत्वात् कथं वेदनक्रियायां कर्त्तृत्वेनान्वयः सम्भवतीत्याह ईदृशार्थेति। ईदृशार्थस्य उक्तपूर्वार्द्धार्थस्य ज्ञापनसमर्थो बोधनयोग्यो यश्चरमाचलप्राप्तिरूपो धर्म्मस्तद्वत्त्वात् रवेरित्यर्थः। स च वेदनक्रियायां सम्भवन् कर्त्तृत्वेनान्वयश्च। बिम्बप्रतिबिम्बभावम् उपमानोपमेयभावम्। तथा च "यथा रविरनर्थकं परान् तापयन्नस्तं प्राप्नोति, तथा परेऽपि पराननर्थकं तापयन्तो विपदं प्राप्नुवन्ति" इत्युपमानोपमेयभावं सोऽन्वयः सूचयतीत्यर्थः।

(ध) कलयतीति। अस्या नायिकायाः, कुटिलो वक्रः, कटाक्षविक्षेपो नयनप्रान्तेन दृष्टिपातः कुवलयमालाया नीलोत्पलश्रेण्याः ललितं सौन्दर्य्यम्, अधर ओष्ठः किसलयस्य पल्लवस्य लीलां विलासम्, तथा आननं मुखम्, कलानिधेश्चन्द्रस्य विलासं शोभां कलयति दधाति।

---

(१)·· कर्म्मवत्त्वादिति पाठान्तरम्।

अत्र अन्यस्य धर्म्मं कथमन्यो वहत्विति कटाक्षविक्षेपादीनां कुवलयमालादिगतललितादीनां कलनमसम्भवत् तल्ललितादिसदृशं ललितादिकमवगमयत् कटाक्षविक्षेपादेः कुवलयमालादेश्च बिम्बप्रतिबिम्बभावं बोधयति (न)। यथा वा—(प)

"प्रयाणे तव राजेन्द्र ! मुक्ता वैरिमृगीदृशाम् ।
राजहंसगतिः पद्भ्यामाननेन शशिद्युतिः ॥" (फ)

अत्र पादाभ्यामसम्बद्धराजहंसगतेस्त्यागोऽनुपपन्न इति तयोस्तत्सम्बन्धः कल्प्यते, स चासम्भवन् राजहंसगतिमिव गतिं बोधयति (ब)।

अनेकवाक्यगा यथा—

"इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति ॥" (भ)

अत्र यत्तच्छब्दनिर्द्दिष्टवाक्यार्थयोरभेदेनान्वयोऽनुपपद्यमानस्तादृशवपुषस्तपःक्षमत्वसाधनेच्छा नीलोत्पलपत्रधारया शमीलताच्छेदनेच्छेवेति बिम्बप्रतिबिम्बभावे पर्य्यवस्यति (म)। यथा वा—(य)

(न) अत्रेति। "अन्यस्य धर्म्मं कथमन्यो वहतु" इति कलनं प्रति बाधायाः प्रदर्शनम्। कटाक्षविक्षेपादीनामिति कर्त्तरि षष्ठी। ललितादीनामिति च कर्म्मणि षष्ठी, कलनं धारणम्, असम्भवत् अनुपपद्यमानं सत्। अवगमयत् बोधयत् सत्। बिम्बप्रतिबिम्बभावं सादृश्यम्। बोधयति सूचयति।

(प) भाव उदाहृत्य इदानीमभावेऽप्युदाहर्त्तुमाह यथा वेति।

(फ) प्रयाण इति। हे राजेन्द्र ! तव प्रयाणे आक्रमणाय यात्रायां सत्याम्, वैरिमृगीदृशां शत्रुस्त्रीणाम्, पद्भ्यां पदाभ्यां राजहंसगतिः तथा आननेन मुखेन शशिद्युतिश्चन्द्रकान्तिः, मुक्ता परित्यक्ता। भयेन शत्रुस्त्रीणां सलीलं मन्दमन्दगमनं मुखोज्ज्वलत्वञ्च नष्टमित्यर्थः।

(ब) अत्रेति। असम्बद्धा पादयोरस्थिता या राजहंसगतिस्तस्याः। अनुपपन्नः असम्भवः, त्यागस्य स्वत्वमूलकत्वेन स्वकीयस्यैव तत्सम्भवात् अत्र तु राजहंसगतेः राजहंसीयत्वेन परकीयत्वादिति भावः। तयोः पादयोः, तत्सम्बन्धी राजहंसगतिसम्बन्धः, कल्प्यते कल्पयितुं युज्यते, स च पादयो राजहंसगतिसम्बन्धश्च, असम्भवन्, अन्यत्र अन्यदीयगतेः स्थित्ययोगादित्याशयः। एवं शशिद्युतिरित्यत्राप्यूह्यम्।

(भ) इदमिति। शकुन्तलाप्रथमाङ्कस्थमिदं पद्यं प्रागेव व्याख्यातम् (२७२ पृष्ठे)।

(म) अत्रेति। यत्तच्छब्दनिर्द्दिष्टवाक्यार्थयोः पूर्वार्द्धपरार्द्धगतवाक्यद्वयान्तर्गतयोः "यः सः" इत्यनयोः, अभेदेन ऐक्येन, अन्वयः सम्बन्धः, अनुपपद्यमानः असम्भवन्, नीलोत्पलपत्रधारया शमीलताच्छेदनव्यवसायस्याकरणात् कण्वमुनेरनुन्मत्तत्वादिति भावः। तादृशवपुषः शकुन्तलाया नितान्तसुकुमारदेहस्य। तपः

"जन्मेदं बन्ध्यतां नीतं भवभोगोपलिप्सया ।
काचमूल्येन विक्रीतो हन्त ! चिन्तामणिर्मया ॥" (र)

अत्र भवभोगलोभेन जन्मनो व्यर्थतानयनं काचमूल्येन चिन्तामणिविक्रय इवेति पर्य्यवसानम् (ल)। एवम्—(व)

"क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥" (श)

अत्र मन्मत्या सूर्य्यवंशवर्णनमुडुपेन सागरतरणमिवेति पर्य्यवसानम् (ष)।

इयञ्च क्वचिदुपमेयवृत्तस्योपमाने असम्भवेऽपि भवति (स)। यथा—

"योऽनुभूतः कुरङ्गाक्ष्यास्तस्या मधुरिमाधरे ।
समास्वादि स मृद्वीका-रसे रसविशारदैः ॥" (ह)

क्रमत्वमिति स्वार्थे त्वप्रत्ययः। शशीलताच्छेदनेच्छेव अनुचितेति शेषः। विम्बप्रतिविम्बभावे उपमानोपमेयभावे।

(य) प्रकारान्तरेण वस्तुसम्बन्धस्यासम्भवतां दर्शयितुमाह यथा वेति।

(र) जन्मेति। शान्तिशतकस्यायं श्लोकः। मया भवभोगोपलिप्सया तुच्छसांसारिकसुखभोगलोभेन, इदं जन्म बन्ध्यतां निष्फलत्वं नीतं प्रापितम्। हन्त खेदे। काचमूल्येन चिन्तामणिस्तदाख्यो दुर्लभमहामूल्यरत्नविशेषो विक्रीतः।

(ल) अत्रेति। व्यर्थतानयनं निष्फलताप्रापणम्। अत्र वक्तुः काचमूल्येन चिन्तामणिविक्रयस्याकरणात् विक्रीत इति विक्रयसम्बन्धोऽसम्भव इति द्रष्टव्यम्।

(व) उक्तस्यापि वैधर्म्येणासम्भवद्वस्तुसम्बन्धतां दर्शयितुमाह एवमिति।

(श) क्वेति। रघुवंशप्रथमसर्गस्थमिदं पद्यम्। सूर्य्यात् प्रभव उत्पन्नो वंशः कुलं क्व कुत्र, अल्पविषया स्तोकमात्रविषयावगाहिनी मतिर्मम बुद्धिश्च क्व कुत्र। तथा च मोहाच्चित्तवैकल्यात् उडुपेन प्लवेन क्षुद्रतरण्या, दुस्तरं सागरं तितीर्षुस्तर्त्तुमिच्छुरस्मि।

(ष) अत्रेति। उडुपमादाय कालिदासो न खलु सागरं तितीर्षुरासीदिति अस्मीत्यनेन तितीर्षुरित्यस्य कर्त्तृत्वसम्बन्धोऽसम्भवन्नीदृशं सादृश्यं बोधयतीति बोध्यम्।

(स) इयञ्चेति। असम्भवद्वस्तुसम्बन्धा निदर्शना चेत्यर्थः। उपमेये वृत्तस्य स्थितस्य।

(ह) य इति। तस्याः कुरङ्गाक्ष्या हरिणनयनायाः, अधरे ओष्ठे यो मधुरिमा माधुर्य्यम्, अनुभूतः, रसविशारदै रसास्वादाभिज्ञैः, स मधुरिमा, मृद्वीकारसे द्राक्षारसे, समास्वादि सम्यगनुभूतः।

अत्र प्रकृतस्याधरस्य मधुरिमधर्म्मस्य द्राक्षारसे असम्भवात् पूर्ववत् साम्ये पर्य्यवसानम् (च)। मालारूपापि (क) यथा मम—

"क्षिपसि शुकं वृषदंशकवदने मृगमर्पयसि मृगादनरदने।
वितरसि तुरगं महिषविषाणे निदधच्चेतो भोगवितानें॥" (ख)

इह बिम्बप्रतिबिम्बताक्षेपं विना वाक्यार्थापर्य्यवसानम्, दृष्टान्ते तु पर्य्यवसितेन वाक्यार्थेन सामर्थ्याद्बिम्बप्रतिबिम्बताप्रत्यायनम् (ग)। नापीयमर्थापत्तिः, तत्र "हारोऽयं हरिणाक्षीणाम्" इत्यादौ सादृश्यपर्य्यवसानाभावात् (घ)।

(च) अत्रेति। प्रकृतस्य प्रकृतत्वेन उपमेयस्येत्यर्थः. अधरस्य यो मधुरिमधर्म्मस्तस्य द्राक्षारसे उपमाने, असम्भवात् स्थित्ययोगात्, अन्यधर्म्मस्यान्यत्र वृत्तित्वासम्भवादिति भावः। साम्ये पर्य्यवसानमिति। तथा च मृद्वीकारसे सः अधरमधुरिमेति अभेदसम्बन्धः असम्भवन् अधरमधुरिमेव मधुरिमेति सादृश्यं बोधयतीति भावः।

(क) मालेति। मालारूपापि एकत्रानेकापि असम्भवद्वस्तुसम्बन्धा निदर्शनेत्यर्थः।

(ख) क्षिपसीति। कस्यचिज्ज्ञानिनः संसारासक्तजनं प्रति तत्त्वकथियम्। भोगवितानें सांसारिकसुखभोगबाहुल्ये, चेतश्चित्तं निदधत् स्थापयन् त्वम्, वृषदंशकस्य मार्जारस्य वदने मुखे शुकं पक्षिणं क्षिपसि अर्पयसि; मृगादनस्य व्याघ्रविशेषस्य रदने दन्ते मृगं हरिणम् अर्पयसि ददासि; तथा महिषस्य विषाणे शृङ्गे, तुरगं घोटकं वितरसि अर्पयसि।

अत्र भोगवितानें चित्तं निदधानो जनो न खलु वृषदंशकवदनादौ शुकादिकमर्पयतीति कर्तृसामभेदसम्बन्धोऽसम्भवन् भोगवितानें चित्तनिधानं वृषदंशकवदनादौ शुकक्षेपादिकमिव अनर्थमूलमिति बिम्बप्रतिबिम्बभावं बोधयतीत्यसम्भवद्वस्तुसम्बन्धा निदर्शना। तस्य च बिम्बप्रतिबिम्बभावबोधनस्यानेकत्वात् सा निदर्शनात्र मालारूपा।

(ग) ननु दृष्टान्तवदस्यां निदर्शनायामपि एकविधैव साम्यस्य प्रणिधानगम्यतेत्यनयोः को भेद इत्याह इहेति। असम्भवद्वस्तुसम्बन्धरूपायां निदर्शनायामित्यर्थः। बिम्बप्रतिबिम्बताक्षेपम् उपमानोपमेयभावकल्पनां विना, वाक्यार्थस्य अपर्य्यवसानमनुपपद्यमानत्वादपरिसमाप्तिः। पर्य्यवसितेन उपपद्यमानत्वात् स्वयमेव परिसमाप्तेन। सामर्थ्याद्योग्यत्वात्, बिम्बप्रतिबिम्बताप्रत्यायनम् उपमानोपमेयभावबोधनम्। तथा चासम्भवद्वस्तुसम्बन्धरूपायां स्वतः स्थितानुपपत्तिवशादुपमानोपमेयभावकल्पनयैव वाक्यार्थोपपत्तिः, दृष्टान्ते तु अनुपपत्त्यभावात् स्वयमुपपद्यमानेनैव वाक्यार्थेन योग्यतया उपमानोपमेयभावकल्पनेति उपमानोपमेयभावकल्पनायाः पौर्वापर्य्येणैवानयोर्भेद इत्याशयः। दृष्टान्तेन सह सम्भवद्वस्तुसम्बन्धरूपाया निदर्शनाया भेदस्तु प्रागेव दर्शितः।

(घ) अथ तदा वाक्यार्थानुपपत्तिवशेनैव बिम्बप्रतिबिम्बभावरूपस्यार्थस्य आपतनादियमर्थापत्तिरेवास्तु-

७१। आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा।
व्यतिरेकः (१) एक उक्ते हेतौ नोक्ते स च त्रिधा (२)॥
चतुर्विधोऽपि साम्यस्य बोधनाच्छब्दतोऽर्थतः।
आक्षेपाच्च द्वादशधा श्लेषेऽपीति त्रिरष्टधा।
प्रत्येकं स्यान्मिलित्वाष्टचत्वारिंशद्विधः पुनः॥ (ङ)

मित्याह नापीति। इयं निदर्शना। तत्र अर्थापत्तौ। सादृश्यपर्य्यवसानाभावात् अत्र तु सादृश्यपर्य्यव-सानादिति वाक्यशेषः। तथा च सादृश्यरूपार्थस्य आपतने निदर्शना, तदितरार्थस्य आपतने तु अर्थापत्तिः सामान्यविशेषन्यायादित्याशयः।

(ङ) प्रकृतसादृश्यमूलकत्वादेव व्यतिरेकालङ्कारं लक्षयति आधिक्यमिति। उपमानादुपमेयस्य आधिक्यं येन केनापि प्रकारेणोत्कर्षः, अथवा उपमानादुपमेयस्य न्यूनता येन केनापि प्रकारेण निकर्षो निकृष्टता व्यतिरेको नामालङ्कारः स्यात्। एतेन—

उपमानोपमेययोर्यत्किञ्चिद्वैधर्म्यं व्यतिरेक इति लक्षणं फलितम्।

वैधर्म्याच्च उपमानापेक्षया उपमेयस्य उत्कर्षेण अपकर्षेण वा भवतीति बोध्यम्। अतएवोपमाया-मवैधर्म्यम्, इह तु वैधर्म्यमेवेति भेदः। तथा व्यतिरिच्यते उपमानादुपमेयं किञ्चिद्वैधर्म्येणावगम्यते येन स व्यतिरेक इति व्युत्पत्तिसिद्धिश्च। स च प्रथमं द्विविधः—उपमानापेक्षया उपमेयस्याधिक्ये एकः, उप-मानापेक्षया उपमेयस्य न्यूनतायाञ्चापर इति।

तयोः प्रत्येकमेव पुनर्विभजते एक इति। तत्र उपमानादुपमेयस्याधिक्यप्रकारे स व्यतिरेकश्च हेतौ उपमेयोत्कर्षकारणे च उक्ते एकः तयोरुभयोरेवोक्तत्वरूपेणैकविधः; तथा हेतौ नोक्ते त्रिधा हेतोरनुक्तत्व-रूपेण त्रिविधः—तथा च केवले उपमेयोत्कर्षकारणे अनुक्ते एकविधः, केवले उपमानापकर्षकारणे अनुक्ते एकविधः, तयोरुभयोरेव उत्कर्षापकर्षकारणयोरनुक्तयोश्चैकविध इति त्रिविध इत्यर्थः। एवञ्च हेतोरुक्तत्व-रूपत्वेन एकविधेन सह हेतोरनुक्तत्वसम्पन्नस्य त्रिविधस्य मेलने एतावता चतुर्विधः सम्पद्यत इति सरलार्थः। ...न च त्रिभिः शब्दार्थाक्षेपैः प्रतिपाद्यानां हेतूनां सम्भवात् "प्रत्येकं व्यतिरेकस्यापि वैविध्यमिति वर्णनमज्ञान-...जृम्भितमेव, तादृशवैविध्यावैविध्यात् तदनुक्तौ समुदायेन वानुक्तौ त्रिविधः" इति वृत्तिविरोधाच्च। उक्ता-...त्मा चतुर्विधोऽपि स व्यतिरेकः, साम्यस्य सादृश्यस्य शब्दतः शब्दात्, अर्थतः समानसदृशादिशब्दानामर्थ-...त्वात् आक्षेपादिव्यञ्जनावशाच्च बोधनात् प्रतीतेः, द्वादशधा द्वादशविधः, चतुर्णां त्रिभिर्गुणने द्वादशसम्भवात्।

---

(१) व्यतिरेक इत्यनन्तरम् "स च" इति वृत्तिपाठः क्वचित्। (२) एक उक्तेऽनुक्ते हेतौ पुनस्त्रिधा ...ति पाठभेदः।

उपमेयस्योपमानादाधिक्ये हेतुरुपमेयगतमुत्कर्षकारणम्, उपमानगतं निकर्षकारणञ्च (च)। तयोर्द्वयोरप्युक्तावेकः, प्रत्येकं समुदायेन वानुक्तौ त्रिविध इति चतुर्विधोऽपि (१) अस्मिन्नुपमानोपमेयस्य निवेदनं शब्देनार्थेनाक्षेपेण चेति द्वादशप्रकारोऽपि श्लेषे अपिशब्दादश्लेषेऽपि चतुर्विंशतिप्रकारः (छ)। उपमानान्न्यूनतायामप्यनयैव भङ्ग्या चतुर्विंशतिप्रकारतेति मिलित्वा अष्टचत्वारिंशत्प्रकारो व्यतिरेकः (ज)। उदाहरणम्—

"अकलङ्कं मुखं तस्या न कलङ्की विधुर्यथा।" (झ)

अत्रोपमेयगतमकलङ्कत्वमुपमानगतञ्च कलङ्कित्वं हेतुद्वयमप्युक्तम्। यथाशब्दप्रतिपादनाच्च शाब्दमौपम्यम् (ञ)।

अत्रैव "न कलङ्कि विधूपमम्" इति पाठे आर्थम् (ट)। "जयतीन्दुं कलङ्किनम्" इति पाठे तु इवादिवत्तुल्यादि (२) पदविरहादाक्षिप्तम् (ठ)।

स च द्वादशविधः, श्लेषे अपिशब्दादश्लेषे च सम्भवतीति पुनर्द्वैविध्येन विरष्टधा चतुर्विंशतिविधः। उक्तरीत्या उपमानादुपमेयस्य न्यूनताप्रकारेऽपि व्यतिरेकश्चतुर्विंशतिविधः समुन्नेयः। तेन च प्रत्येकमुभयं प्रदर्शितं द्विविध इत्यर्थः व्यतिरेकः पुनर्मिलित्वा समुदायेन अष्टचत्वारिंशद्विधः स्यात्, चतुर्विंशतेर्द्विगुणे अष्टचत्वारिंशत्सम्भवात्।

(च) उपमेयस्येति। निकर्षो निकृष्टता तत्कारणञ्च।

(छ) तयोरिति। प्रत्येकमिति। केवलोपमेयगतोत्कर्षकारणस्य केवलोपमानगतनिकर्षकारणस्य वेत्यर्थः। समुदायेन तयोरुभयोरेव वा इति तात्पर्य्यम्। अस्मिन् व्यतिरेकसामान्ये। निवेदनं बोधनम्। अर्थेन समानसदृशादिशब्दानामर्थेन, आक्षेपेण व्यञ्जनया।

(ज) उपमानादिति। उपमेयस्येति शेषः। भङ्ग्या रीत्या।

(झ) अकलङ्कमिति। "अशीतञ्च भुजद्वन्द्वं न शीतन्तु मृणालवत्॥" इति सत्पूरितपरार्द्धम्।

(ञ) अत्रेति। हेतुद्वयं मुखोत्कर्षस्य विधुनिकर्षस्य च यथासंख्यं कारणद्वयम्। यथाशब्देन प्रतिपादनादभिधानात्, शाब्दं शब्दप्रतिपाद्यम्। अस्य युक्तिस्तु उपमाप्रकरणे दर्शिता।

(ट) संक्षेपार्थमुदाहृतमेव पाठपरिवर्त्तनेनोदाहरति अत्रैवेति। अकलङ्कं मुखमित्यादावेवंविधः आर्थमर्थवशादुपलभ्यम्, औपम्यमिति पूर्वेणान्वयः। अस्या युक्तिरप्युपमाप्रकरणे दर्शिता।

(ठ) जयतीति। इवादिवत् शाब्दौपम्यप्रतिपादकस्य इवप्रभृतिशब्दस्येव, तुल्यादिपदस्य आर्थौपम्यप्रतिपादकतुल्यादिशब्दस्य विरहादभावात् आक्षिप्तमाकृष्टं व्यञ्जनयोपलभ्यमित्यर्थः, अत्रापि औपम्यमिति पूर्वेणा-

(१) चतुर्विधेऽपि इति पाठान्तरम्। (२) इववत्तुल्यादि इति पाठान्तरम्।

अत्र वाकलङ्कपदत्यागे उपमेयगतोत्कर्षकारणानुक्तिः, कलङ्किपदत्यागे चोपमानगतनिकर्षकारणानुक्तिः, द्वयोरनुक्तौ द्वयोरनुक्तिः (ड)।

श्लेषे यथा—"अतिगाढ़गुणायाश्च नाब्जवद्भङ्गुरा गुणाः ॥" (ढ)

अत्र वार्थे वतिरिति शाब्दमौपम्यम्। उत्कर्षनिकर्षकारणयोर्द्वयो-रप्युक्तिः। गुणशब्दः श्लिष्टः (ण)। अन्ये भेदाः पूर्ववदूह्याः (त)। एतानि चोपमेयस्योपमानादाधिक्ये उदाहरणानि।

न्यूनत्वे दिङ्मात्रं यथा—(थ)

"क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्द्धते नित्यम्।
विरम प्रसीद सुन्दरि! यौवनमनिवर्त्ति यातन्तु ॥" (द)

नयः। तथा च जयो नासायत्तीकरणम्; तेन मुखकर्तृकचन्द्रायत्तीकरणस्यासम्भवात् जयत्यर्थवैशिष्ट्येन व्यञ्जनया औपम्यमाक्षिप्यते इति भावः।

(ड) हेतोरुक्तावेतावदुदाहृत्य इदानीं संक्षेपेणैव हेतोरनुक्तावप्युदाहर्त्तुमाह अत्रैवेति। अकलङ्क-पदत्यागे "एतद्भाति मुखं तस्या न कलङ्की विधुर्यथा" इति पाठ इत्यर्थः। उपमेयगतोत्कर्षकारणस्य अकलङ्कत्वस्य अनुक्तिरित्येकविधः। कलङ्किपदत्यागे "अकलङ्कं मुखं तस्या भाति नैष विधुर्यथा" इत्येवं पाठ इत्यर्थः। उपमानगतनिकर्षकारणस्य कलङ्कित्वस्य अनुक्तिरिति द्वितीयविधः। द्वयोरकलङ्कपद-कलङ्किपदयोः, अनुक्तौ त्यागे "एतद्भाति मुखं तस्या न त्वाकाशे विधुर्यथा" इत्येवं पाठ इत्यर्थः, द्वयोरुपमेय-गतोत्कर्षकारणोपमानगतनिकर्षकारणयोरनुक्तिरिति तृतीयविधः। तथा चोक्तरूपपाठेऽपि उपमानभूत-चन्द्रसादृश्यप्रतिषेधादेव उपमेयभूतमुखस्य आधिक्यमवगम्यत एवेति ध्येयम्।

(ढ) अतीति। "स्थिरा भूतिर्महादेव्या नास्थिरा हरमूर्त्तिवत्।" इति मत्पूरितपूर्वार्द्धम्। अतिगाढ़ा अतीवदृढ़ाश्चिरस्थायिन इत्यर्थः, गुणाः सौन्दर्य्यविनयादयः सूत्राणि च यस्यास्तस्या नायिकायाः, गुणास्त एव सौन्दर्य्यविनयादयः सूत्राणि च, अब्जवत् पद्मस्येव न भङ्गुरा न च्छिदुराः।

(ण) अत्रेति। उत्कर्षनिकर्षकारणयोः उपमेयभूतनायिकागतोत्कर्षकारणस्य अतिगाढ़गुणत्वस्य, उपमानभूतपद्मगतनिकर्षकारणस्य भङ्गुरत्वस्य चेत्यर्थः।

(त) अन्य इति। ऊह्याः स्वयमुन्नेयाः। तथा च अब्जवदिति तुल्यार्थे वतिप्रत्यये आर्थमौपम्यम्। "जयत्येषा गाढ़गुणा विनश्वद्गुणमम्बुजम्" इति पाठे इवादितुल्यादिपदाभावादौपम्यमाक्षिप्तम्। "अस्या नृपतिकान्ताया नाब्जवद्भङ्गुरा गुणाः" इति पाठे उपमेयगतोत्कर्षकारणानुक्तिः। "अतिगाढ़गुणायाश्च दृश्यन्ते नाब्जवद्गुणाः" इति पाठे उपमानगतनिकर्षकारणानुक्तिः। "अस्या नृपतिकान्ताया दृश्यन्ते नाब्जवद्गुणाः" इति पाठे च उपमेयोपमानगतयोरुत्कर्षनिकर्षकारणयोर्द्वयोरप्यनुक्तिरित्यनुसन्धेयम्।

(थ) न्यूनत्व इति। उपमेयस्योपमानादपकर्षे इत्यर्थः। दिङ्मात्रमेकप्रकारमात्रमिति तात्पर्य्यं प्रकारान्तरोदाहरणानि तूह्यानीत्यभिप्रायः।

"अत्रोपमेयभूतयौवनाख्ये र्थस्याधिक्यम् । तेनात्र "उपमानादुपमेयस्याधिक्ये विपर्य्यये वा व्यतिरेकः" इति केषाञ्चिल्लक्षणे विपर्य्यये वेति पदमनर्थकम्" इति यत् केचिदाहुः (ध)। तन्न विचारसहम् । तथाहि, अत्राधिकन्यूनत्वे सत्त्वासत्त्वे एव विवक्षिते । अत्र च चन्द्रापेक्षया यौवनस्यासत्त्वं स्फुटमेव (न)। अस्तु वा अत्रोदाहरणे यथाकथञ्चिद्‌गतिः (प)।

"हनूमदाद्यैर्यशसा मया पुन-
र्द्विषां हसैर्दूतपथः सितीकृतः ॥" (फ)

(द) क्षीण इति । काव्यालङ्कारग्रन्थे रुद्रटधृतं पद्यमेतत् । मानेन, विमुखीं प्रियां प्रति प्रत्युक्तिरियम् । हे सुन्दरि । शशी चन्द्रः, कृष्णपक्षे नित्यं प्रतिदिनमेव क्षीणः क्षीणः सन्नपि, पुनः, शुक्लपक्षे भूयो भूयः पुनः पुनरभिवर्द्धते । किन्तु यौवनं यातं गतं गच्छत्येवेत्यर्थः, किन्तु अनिवर्त्ति अपुनःप्रत्यावर्त्ति, अतएव विरम प्रणयकोपाद्विरता भव, प्रसीद मां प्रति प्रसन्ना च भव ।

अत्र उपमानभूतस्य चन्द्रस्य पुनः पुनर्वृद्धिराधिक्यहेतुः, उपमेयभूतस्य यौवनस्य च अपुनर्वृद्धिर्न्यूनत्वहेतुरिति द्वितीयप्रकारो व्यतिरेक इति ग्रन्थकारस्याशयः । अत्र द्वयोरप्युत्कर्षनिकर्षकारणयोरुक्तिः । तदनुक्तौ तु वैविध्यम् अपरभेदादिकञ्चोहनीयम् ।

(ध) उक्तस्वकीयव्यतिरेकलक्षणस्य अलङ्कारसर्वस्वकृत्कृतव्यतिरेकलक्षणानुरूपतया तत्रालङ्कारकौस्तुभकृदुक्तदूषणं स्वकीयलक्षणेऽपि प्रसजतीति तामलङ्कारकौस्तुभकृदुक्तिं दूषयितुमुत्थापयति अत्रोपमेयेति । अत्र "क्षीणः क्षीणः" इत्यादिश्लोके । आधिक्यम् उपमानभूतचन्द्राख्यैर्थापेक्षयेति शेषः, यौवनाख्यैर्थस्य दीर्घकालवर्त्तित्वात् चन्द्राख्यैर्थस्य तु कतिपयदिनमात्रस्थायित्वादिति भावः । तेन उपमानादुपमेयस्याधिक्यमात्रोक्तावेव सर्वत्र सामञ्जस्येन, अत्र व्यतिरेकप्रसङ्गे । विपर्य्यये तदाधिक्यवैपरीत्ये न्यूनत्वे इत्यर्थः । केषाञ्चिदलङ्कारसर्वस्वकृताम् । केचिदलङ्कारकौस्तुभकाराः ।

(न) दूषयति तन्नेति । विचारसहं वितर्कभारवहनक्षमम्, अयुक्तत्वं न दुर्बलत्वादिति भावः । अत्र व्यतिरेकलक्षणे, अधिकन्यूनत्वे आधिक्यं न्यूनत्वञ्च, सत्त्वासत्त्वे एव उत्कर्षापकर्षावेव, विवक्षिते अलङ्कारसर्वस्वकृता मया चेति शेषः । अथ तथाप्युदाहृते सत्त्वासत्त्वयोः किमस्तीत्याह अत्र चेति । "क्षीणः क्षीणः" इत्यादौ चेत्यर्थः । असत्त्वमपकर्षः । स्फुटमेवेति । अपुनर्वृद्धियशालित्वादिति भावः ।

(प) ननु विवक्षाया अनियतत्वात् युष्माकमुत्कर्षरूपेणाधिक्यविवक्षावत् अस्माकमस्थैर्यादिधर्मान्तरेणाप्याधिक्यविवक्षा सम्भवति । तथा च "क्षीणः क्षीणः—" इत्यादौ यौवनस्थैर्यस्यैव प्रकृतमानभङ्गोपयोगितया आधिक्यरूपेण विवक्षाया औचित्यमित्याह अस्तु वेति । अत्रोदाहरणे "क्षीणः क्षीणः—" इत्यादौ, यथाकथञ्चित् यौवनस्यार्थस्थैर्यरूपेणाधिक्यविवक्षया, गतिर्लक्षणसङ्गमनोपायः ।

(फ) हनूमदिति । नैषधचरितनवमसर्गे दमयन्तीसन्निधावात्मानं प्रकाशयतो नलस्य सनिर्वेदोक्तिरियम् । "स्वनाम यन्नाम सुधाय्यधामहं महेन्द्रकार्य्यं महदेतदुज्झितम् ।" इति प्रथमार्द्धम् । हनूमदाद्यै-

इत्यादिषु का गतिः ? इति सुष्ठूक्तं "न्यूनताथवा" इति (ब) ।

दूतैः, दूतपथो दौत्यविषयः, यशसा सितीकृतो धवलीकृतः । मया पुनर्दूतेन, द्विषां हसैः शत्रूणां हास्यैः स दूतपथः सितीकृतः ।

(ब) इत्यादिष्विति । का गतिर्व्यतिरेकप्रवेशस्य क उपायः ? तथा चात्र उपमानभूतहनूमदाद्यपेक्षया उपमेयभूतस्य नलस्यापकर्षप्रतीतेरेव व्यतिरेको वक्तव्यः, स च "विपर्यये वा" इत्युक्तिं विना न सम्भवतीति भावः । इति हेतोः "न्यूनताथवा" इति सुष्ठूक्तं युक्तिसङ्गततया साधूक्तम्, "विपर्यये वा" इत्यनुसारादित्याशयः ।

तदेवं व्यतिरेकभेदसङ्कलनम् ।

उपमानादुपमेयस्याधिक्ये—२४	श्लेषे—१२	शाब्दौपम्ये	उपमेयगतमुत्कर्षकारणम् उपमानगतमपकर्षकारणञ्च एततोरुभयोरेवोक्तौ	१
			केवलोपमेयगतोत्कर्षकारणानुक्तौ	१
			केवलोपमानगतापकर्षकारणानुक्तौ	१
			तयोरुभयोरेवानुक्तौ ...	१
		आर्थौपम्ये ...उक्तक्रमेण		४
		आक्षिप्तौपम्ये ...उक्तक्रमेण		४
	अश्लेषे—१२	शाब्दौपम्ये ...उक्तक्रमेण		४
		आर्थौपम्ये ...उक्तक्रमेण		४
		आक्षिप्तौपम्ये ...उक्तक्रमेण		४
उपमानादुपमेयस्य न्यूनत्वे—२४	श्लेषे—१२	शाब्दौपम्ये	उपमानगतमुत्कर्षकारणम् उपमेयगतमपकर्षकारणञ्च एतयोरुभयोरेवोक्तौ	१
			केवलोपमानगतोत्कर्षकारणानुक्तौ	१
			केवलोपमेयगतापकर्षकारणानुक्तौ	१
			तयोरुभयोरेवानुक्तौ	१
		आर्थौपम्ये ...उक्तक्रमेण		४
		आक्षिप्तौपम्ये ...उक्तक्रमेण		४
४८	अश्लेषे—१२	शाब्दौपम्ये उक्तक्रमेण		४
		आर्थौपम्ये ...उक्तक्रमेण		४
		आक्षिप्तौपम्ये ...उक्तक्रमेण		४
				४८

७२। सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः।
सा सहोक्तिर्मूलभूतातिशयोक्तिर्यदा भवेत् ॥ (भ)

अतिशयोक्तिरप्यत्राभेदाध्यवसायमूला कार्य्यकारणपौर्वापर्य्यविपर्य्ययरूपा च। अभेदाध्यवसायमूलापि श्लेषभित्तिका अन्यथा च (म)। क्रमेणोदाहरणम्—

"सहाधरदलेनास्या यौवने रागभाक् प्रियः।" (य)

अत्र रागपदे श्लेषः।

"सह कुमुदकदम्बैः काममुल्लासयन्तः
सह घनतिमिरौघैर्धैर्य्यमुत्सारयन्तः।

(भ) यथाकथञ्चित् सादृश्यमूलामेव सहोक्तिं लक्षयति सहार्थस्येति। अत्रापि यत्रेति यदर्थकमव्ययम्। तथा च यदा अतिशयोक्तिः भेदे अभेदाध्यवसायमूला कार्य्यकारणयोः पौर्वापर्य्यविपर्य्ययरूपा चातिशयोक्तिः, मूलभूता प्रयोजिका भवेत्, तदा सहार्थस्य सह-साकं-प्रभृति-सहार्थवाचकशब्दस्य बलात् सामर्थ्यात्, एकं वस्तु पदार्थः, द्वयोः पदार्थयोः यत्र यत् वाचकमन्वयि भवेत्, सा सहोक्तिर्नाम अलङ्कारो भवेत्।

तथा च अतिशयोक्तिमूलकत्वे सति सहार्थकशब्दप्रयोज्य एकपदार्थस्यानेकपदार्थेऽन्वयः सहोक्तिरिति फलितम्।

सत्यन्तदलात् "लक्ष्मणेन समं रामः काननं गहनं ययौ" इत्यादौ नातिव्याप्तिः। एतच्च वृत्तावपि वक्ष्यते। एतेन "सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्" इति काव्यप्रकाशलक्षणं कटाक्षितम्। वस्तुतस्तु "लक्ष्मणेन समम्" इत्यादौ वैचित्र्याभावादलङ्कारसामान्यलक्षणागमनेनैव विशेषलक्षणस्यापि गमनासम्भवादतिव्याप्त्यसम्भव एवेति "मूलभूतातिशयोक्तिर्यदा भवेत्" इति मूलवत् सत्यन्तदलस्य स्वरूपमात्रकथनम्। सहार्थकशब्दप्रयोज्य इत्यभिधानात् "कमलमिव मुखं मनोज्ञम्" इत्यादौ एकमनोज्ञत्वपदार्थस्य कमलमुखयोरन्वयेऽपि नातिव्याप्तिः।

सह सहार्थकशब्दस्योक्तिः सहोक्तिरिति व्युत्पत्तिः।

(म) लक्षणे अतिशयोक्तिपदं नातिशयोक्तिसामान्यपरम् असम्भवात् किन्त्वतिशयोक्तिविशेषपरं तयैव सम्भवादित्याह अतिशयोक्तिरिति। अभेदाध्यवसायमूला भेदे अभेदाध्यवसायघटिता। श्लेषभित्तिका श्लेषप्रयुक्तभेदमूला, अन्यथा अश्लेषप्रयुक्तभेदमूला च।

(य) तत्र श्लेषप्रयुक्तभेदे अभेदाध्यवसायरूपातिशयोक्तिमूलां सहोक्तिमुदाहरति सहाधरेति। अस्य पूरणं व्याख्यानञ्च प्रागेवाभिहितम (६७० पृष्ठे)। अत्राधरदलस्य रागो लौहित्यं प्रियस्य रागश्च प्रेम इति रागपदे श्लेषः। तेन च लौहित्यप्रेम्णोर्भेदेऽपि अभेदाध्यवसायादतिशयोक्तिः, तद्वशात् सहशब्दार्थवशाच्च एकरागभाक्पदस्यार्थः अधरदलेन प्रियेण च सह अन्वीयत इति श्लेषप्रयुक्ताभेदाध्यवसायरूपातिशयोक्तिमूला सहोक्तिः।

सह सरसिजषण्डैः स्वान्तमामीलयन्तः
प्रतिदिशमसृतांशोरंशवः सञ्चरन्ति (१) ॥" (र) इदं मम।

अत्रोल्लासादीनां सम्बन्धिभेदादेव भेदः, न तु श्लिष्टतया (ल)।

"समसेव नराधिपेन सा गुरुसम्मोहविलुप्तचेतना।
अगमत् सह तैलविन्दुना तनुदीपार्च्चिरिव (२) चितिस्तलम् ॥" (व)

इयञ्च मालयापि सम्भवति। यथोदाहृते "सह कुमुदकदम्बैः—" इत्यादौ (श)।

"लक्ष्मणेन समं रामः काननं गहनं ययौ" इत्यादौ चातिशयोक्ति-मूलत्वाभावान्नायमलङ्कारः (ष)।

(र) अश्लेषप्रयुक्तभेदे अभेदाध्यवसायरूपातिशयोक्तिमूलां सहोक्तिमाह सहेति। कुमुदकदम्बैः कैरवसमूहैः सह कामं कन्दर्पम् उल्लासयन्तः प्रकाशयन्तः, घना निविड़ा ये तिमिरौघा अन्धकारसमूहास्तैः सह धैर्य्यं चित्तस्थिरताम् उत्सारयन्तो दूरीकुर्वन्तः, तथा सरसिजषण्डैः पद्मसमूहैः सह स्वान्तं चित्तम् आमीलयन्तः कामवेगेन सङ्कोचयन्तः, अमृतांशोरंशवश्चन्द्रस्य किरणाः प्रतिदिशं सर्व्वासु दिक्षु सञ्चरन्ति प्रसरन्ति।

(ल) नन्वत्र उल्लासादीनां भेदः कुतः, येन मूलभूता अभेदाध्यवसायरूपातिशयोक्तिः स्यादित्याह अत्रेति। आदिपदेन उत्सारणामीलनयोः संग्रहः। सम्बन्धिनां कुमुदकदम्ब-कामादीनाम्। श्लिष्टतया रागपदवत् श्लेषेण। तथा च कुमुदकदम्बानामुल्लासः प्रकाशः, कामस्योल्लासस्तु आविर्भाव इति सम्बन्धि-भेदेन उल्लासयोर्भेदेऽपि एकशब्दोपस्थाप्यत्वरूपसादृश्येन अभेदाध्यवसायादतिशयोक्तिः, तद्वशात् सहशब्दार्थ-वशाच्च एक एवोल्लासपदस्यार्थ-कुमुदकदम्बैः कामेन च सह अन्वीयत इति अश्लेषप्रयुक्ताभेदाध्यवसायरूपाति-शयोक्तिमूला सहोक्तिः। एवं तिमिरौघानामुत्सारणं ततस्ततोऽपसारणम्, धैर्य्यस्योत्सारणन्तु विध्वंसः। सरसिजषण्डानामामीलनं सङ्कोचनम्, स्वान्तस्यामीलनन्तु एकमात्रकामप्रवृत्तिमत्करणम्। अपरन्तु पूर्ववदूह्यम्।

(व) कार्य्यकारणयोः पौर्व्वापर्य्यविपर्य्ययरूपातिशयोक्तिमूलां सहोक्तिं प्रदर्शयति समेति। रघु-वंशाष्टमसर्गस्थमिदं पद्यम्। सा इन्दुमती, गुरुणा अत्यन्तेन सम्मोहेन मूर्च्छया विलुप्ता चेतना चैतन्यं यस्याः सा तादृशी सती, तैलविन्दुना सह तनुदीपार्च्चिः सूक्ष्मदीपशिखेव, नराधिपेन राज्ञा अजेन सह सम-मेव समकालमेव युगपदेव चितेस्तलं भूतलम् अगमत् पतितवतीत्यर्थः।

अत्र इन्दुमत्याः पतनं दृष्ट्वैव अजः पतित इति इन्दुमत्याः पतनं कारणम् अजस्य पतनन्तु तत्कार्य्य-मिति तयोः पौर्व्वापर्य्यमावश्यकम्; किन्तु अजपतनस्य शीघ्रताद्योतनार्थं सममेवेत्यभिहितम्; तेन कार्य्य-कारणयोः पौर्व्वापर्य्यविपर्य्ययरूपातिशयोक्तिः, तद्वशात् सहशब्दार्थवशाच्च एक एवागमदिति पदस्यार्थं इन्दु-मत्या नराधिपेन च सह अन्वीयत इति सहोक्तिः।

(श) सम्भवयोग्यमाह इयञ्चेति। सहोक्तिश्चेत्यर्थः, मालयापि एकत्रानेकत्वेनापि।

---

(१) भान्ति यन्तः इति क्वचित् पाठः। (२) तनु दीपार्च्चिरिव इति पाठान्तरम्।

७२ । विनोक्तिर्यद्विनाऽन्येन नासाध्वन्यदसाधु वा (१) ॥ (ख)

न असाधु अशोभनं न भवति । एवञ्च यद्यपि शोभनत्व एव पर्य्यवसानम्, तथापि अशोभनत्वाभावमुखेन शोभनवचनस्यायमभिप्रायो यत् कस्यचिद्वर्णनीयस्याशोभनत्वं तत् परसन्निधेरेव दोषः, तस्य पुनः स्वभावतः शोभनत्वमेवेति (छ) । यथा—

"विना जलदकालेन चन्द्रो निस्तन्द्रतां गतः ।
विना ग्रीष्मोष्मणा मञ्जुर्वनराजिरजायत ॥" (च)

(घ) "मूलभूतातिशयोक्तिर्यदा भवेत्" इत्यस्य व्यावृत्तिमाह लक्षणेनेति । एतद्विस्तरस्तु प्रागेवाभिहितः ।

(ख) प्रायेण स्वाश्रयवाक्ये यथाकथञ्चित् साहश्यदर्शनात् उक्तिशब्दान्ततासाम्याच्च सहोक्तेः परं विनोक्तिं लक्षयति विनोक्तिरिति । अन्यद्वस्तु अन्येन विना यत् असाधु अशोभनं न भवति, वा अथवा अन्यद्वस्तु अन्येन विना यत् असाधु अशोभनं भवति, सा विनोक्तिः । तथा च—

एकस्याभावे अपरस्य अशोभनत्वाभावः शोभनत्वाभावो वा विनोक्तिरित्यर्थः । अतएवेयं द्विविधा । अत्र एकस्याभावप्रतिपादनञ्च विनार्थकशब्दमात्रेण । तेन अन्तरेण ऋते निर्-निस्-रहित-वर्जित-शून्य-नञ्-प्रभृतिना येन केनापि विनार्थकशब्देन तदभावप्रतिपादनेऽपि विनोक्तिः स्यादेवेति बोध्यम् ।

विना विनार्थकशब्दस्य उक्तिर्विनोक्तिरिति व्युत्पत्तिः ।

(छ) विवृणोति नेति । पर्य्यवसानं चरमप्रतीतिः, कारिकायां "नासाधु" इत्यस्येति शेषः । "द्वौ नञौ प्रकृतार्थं गमयतः" इति न्यायात् "अभावविरहात्मत्वं वस्तुनः प्रतियोगिता" इति न्यायाच्च । तेन "नासाधु" इत्यत्र 'साधु' इत्येव वक्तुमुचितमित्याशयः । अशोभनत्वाभावमुखेन असुन्दरत्वाभावबोधनद्वारा, शोभनवचनस्य सुन्दरत्वोक्तेः । तत्परस्य वर्णनीयेतरपदार्थस्य सन्निधेः सम्बन्धादेव, दोषो दोषमध्ये गण्यम् । पुनः किन्तु, तस्य वर्णनीयपदार्थस्य ।

(च) तत्र अशोभनत्वाभावे उदाहरति विनेति । जलदकालेन वर्षाकालेन विना चन्द्रो निस्तन्द्रतां निर्म्मलत्वं शोभनत्वं गतः प्राप्तः । ग्रीष्मोष्मणा ग्रीष्मकालीनसन्तापेन विना वनानां राजिः श्रेणिः, मञ्जुः शोभना अजायत । स्वभावत एव शोभनस्य चन्द्रस्य जलदकालेन यदशोभनत्वं विहितम्, तद्जलदकालस्यापगमेनापगतमिति चन्द्रस्य तत् शोभनत्वं पुनरप्यायातम् । तथा स्वभावत एव शोभनाया वनराजेर्ग्रीष्मोष्मणा यदशोभनत्वं कृतम्, तद्ग्रीष्मोष्मणोऽपगमेनापगतमिति वनराजेरपि तत्स्वाभाविकं शोभनत्वं प्रत्यावृत्तमिति भावः ।

अतएवात्र जलदकालस्य ग्रीष्मोष्मणश्चाभावे चन्द्रस्य वनराजेश्च अशोभनत्वाभावाद्विनोक्तिः । उभयोरुपमानोपमेयभावस्तु व्यज्यते ।

---

(१) न साध्वन्यदसाधु वा इति क्वचित् पाठः ।

असाधु अशोभनम् (क)। यथा—

"अनुयान्त्या जनातीतं कान्तं साधु त्वया कृतम् ।
का दिनश्रीर्विनाऽर्केण का निशा शशिना विना ॥" (ख)

"निरर्थकं जन्म गतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम् ।
उत्पत्तिरिन्दोरपि निष्फलैव दृष्टा विनिद्रा नलिनी न येन ॥" (ग)

अत्र परस्परविनोक्तिभङ्ग्या चमत्कारातिशयः (घ)। विनाशब्द-प्रयोगाभावेऽपि विनार्थविवक्षया विनोक्तिरेवेयम् (ङ)। एवं सहोक्तिरपि सहशब्दप्रयोगाभावेऽपि सहार्थविवक्षया भवतीति बोध्यम् (च)।

(क) असाधुपदं व्याचष्टे असाध्विति। अशोभनं भवतीति शेषः।

(ख) शोभनत्वाभावे उदाहरति अन्विति। वनवासकाले सीतां प्रति मुनिपत्नीनामुक्तिरियम्। हे सीते! जनातीतं सर्वलोकोत्तरचरितम्, कान्तं भर्त्तारं रामम्, अनुयान्त्या अन्वागच्छन्त्या त्वया, साधु उचितमेव कृतम्। तथा च अर्केण सूर्येण विना दिनस्य श्रीः शोभा का कीदृशी अशोभनैवेत्यर्थः, तथा शशिना चन्द्रेण विना निशा रात्रिः का अशोभनैवेति तात्पर्य्यम्।

अत्र सूर्येण विना दिनश्रियः चन्द्रेण विना निशायाश्च शोभनत्वाभावाद्विनोक्तिः। तथा दिनश्रिया निशया च सह सीताया व्यतिरेकेणोपमानोपमेयभावो ध्वन्यते।

(ग) विनार्थकनञ्प्रयोगे शोभनत्वाभावे उदाहरति निरर्थकमिति। अत्र पूर्वार्द्धं विद्धशालभञ्जिकायां कुवलयमालया वक्तव्यं नाटिकायामुक्तम्, अपरार्द्धं च राजकुमार्या उक्तम्। नलिन्याः पद्मिन्या जन्म निरर्थकं गतम्, यया नलिन्या तुहिनांशुबिम्बं चन्द्रमण्डलं न दृष्टम्, चन्द्रोदयकाले रात्रावात्मनः सङ्कोचात् आत्मप्रकाशकाले दिवसे च चन्द्रोदयाभावादिति भावः। इन्दोश्चन्द्रस्यापि उत्पत्तिर्जन्म निष्फलैव, येन इन्दुना विनिद्रा प्रस्फुटिता नलिनी सा पद्मिनी न दृष्टा; पद्मिनीप्रकाशकाले दिवसे आत्मन उदयाभावात् आत्मन उदयकाले रात्रौ च पद्मिन्याः प्रकाशाभावादित्याशयः।

अत्र चन्द्रबिम्बदर्शनं विना पद्मिन्याः शोभनत्वाभावात् प्रस्फुटितपद्मिनीदर्शनं विना चन्द्रस्यापि शोभनत्वाभावाच्च विनोक्तिः। नलिनीचन्द्रयोर्जन्मनिष्फलसादृश्यन्तु व्यङ्ग्यम्।

(घ) अत्रेति। परस्परं नलिनीचन्द्रयोरन्योन्यं विनोक्तिभङ्ग्या विनाशब्दप्रयोगाभावेऽपि नञ्प्रयोगादेव तत्प्रयोगप्रकारेण।

(ङ) नन्वास्तां चमत्कारातिशयस्तथापि विनाशब्दप्रयोगाभावे विनोक्तिर्न भवितुमर्हति तदन्वर्थायोगादित्याह विनेति। एतेन विनार्थकशब्दमात्रस्यैव प्रयोगे विनोक्तिरिति ग्रन्थकारस्याप्याशयः सूचितः।

(च) इमञ्च न्यायं सहोक्तावप्यतिदिशति एवमिति। अतएव—

"आशयोत्तोलयामास तरसा हरकार्म्मुकम्। यमञ्ज च सनिर्घोषं संशयेन मम प्रियः ॥"

इत्यादौ सहार्थकशब्दप्रयोगाभावेऽपि सहोक्तिरेव।

७४ । समासोक्तिः समैर्यत्र कार्य्य-लिङ्ग-विशेषणैः ।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः ॥ (छ)

अत्र समेन कार्य्येण प्रस्तुते अप्रस्तुतव्यवहारसमारोपो यथा—

"व्याधूय यद्वसनमम्बुजलोचनाया
वक्षोजयोः कनककुम्भविलासभाजोः ।
आलिङ्गसि प्रसभमङ्गमशेषमस्या
धन्यस्त्वमेव मलयाचलगन्धवाह ! ॥" (ज)

अत्र गन्धवाहे हठकामुकव्यवहारसमारोपः (झ) ।

लिङ्गसाम्येन यथा—

"असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः ।
अनाक्रम्य जगत् कृत्स्नं नो सन्ध्यां भजते रविः ॥" (ञ)

(छ) सादृश्यमूलकत्वादुक्तिशब्दान्ततासाम्याच्च विनोक्तिं निरूप्येदानीं समासोक्तिं निरूपयति समासोक्तिरिति । यत्रापि य इत्यर्थे यत्रेत्यव्ययम् । तेन समैः प्रस्तुताप्रस्तुतयोः समानैः, कार्य्यं कर्म्म, लिङ्गं स्त्री-पुं-नपुंसकात्मकम्, विशेषणं भेदकधर्म्मश्च तैः, प्रस्तुते प्रकृते वस्तुनि, अप्रस्तुतस्य अप्रकृतस्य वस्तुनः पदार्थस्य, यत्र यः, व्यवहारसमारोप आचरणारोपः सा समासोक्तिः ।

तथा च समान-कार्य्य-लिङ्ग-विशेषणान्यतमद्वारा प्रस्तुतपदार्थे अप्रस्तुतपदार्थस्य व्यवहारारोपः समासोक्तिरिति संक्षिप्तः सरलार्थः ।

अनया सहान्येषां भेदस्तु वृत्तावेव वक्ष्यते । समासेन एकोच्चारणरूपसंक्षेपेण उक्तिः प्रस्तुताप्रस्तुतयोरभिधानं सूचनं समासोक्तिरिति व्युत्पत्तिः ।

(ज) व्याधूयेति । हे मलयाचलगन्धवाह ! दक्षिणवायो ! अस्या दृश्यमानायाः, अम्बुजलोचनायाः पद्मनयनाया रमण्याः, कनककुम्भयोः स्वर्णकलसयोः विलासं शोभां भजेते इति तयोस्तथोक्तयोः, वक्षोजयोः वक्षसि जातयोः कुचयोरित्यर्थः, वसनं वस्त्रं प्रसभं बलेन व्याधूय अपसार्य्य, यत् अशेषं सर्वम् अङ्गम्, आलिङ्गसि ; अतस्त्वमेव धन्यः पुण्यवान् । ईदृश्या ईदृश्यालिङ्गनलाभः पुण्येनैव भवतीति भावः ।

(झ) अत्रेति । गन्धवाहे प्रस्तुते वायौ, हठकामुकस्य अप्रस्तुतस्य बलपूर्वकरमणीसङ्गमशीलस्य पुरुषस्य, व्यवहारसमारोप आचरणारोपः ; तस्यापीदृशादेव व्यवहारात्, अतएवात्र समासोक्तिरिति भावः । अत्र "यदि पुनः" इत्यादिना वायोः प्रकृतत्वाप्रकृतत्वसंशयोत्थानमेव रामचरणस्यानुपपन्नम्, "अत्र समेन कार्य्येण प्रस्तुते" इत्यादिना ग्रन्थकृतैव वायोः प्रकृतत्वस्य निश्चयेन निर्द्देशात् ।

(ञ) असमाप्तेति । राजतरङ्गिणीस्थमिदं पद्यम् । न समाप्ता जिगीषा जेतुमिच्छा यस्य तस्य तादृशस्य मनस्विनो बुद्धिमतो जनस्य का नाम स्त्रीचिन्ता, अपि तु कापि नेत्यर्थः । तथा च रविः सूर्यः कृत्स्नं समस्तं जगत् अनाक्रम्य अनतिक्रम्य, सन्ध्यां नो न भजते ।

अत्र पुंस्त्रीलिङ्गमात्रेण (१) रविसन्ध्ययोर्नायकनायिकाव्यवहारः (ट)। विशेषणसाम्यन्तु श्लिष्टतया, साधारण्येन, औपम्यगर्भत्वेन च त्रिधा (ठ)। तत्र श्लिष्टतया यथा मम—

"विकसितमुखीं रागासङ्गाद्गलत्तिमिरावृतिं
दिनकर-कर-स्पृष्टामैन्द्रीं निरीक्ष्य दिशं पुरः ।
जरठलवलीपाण्डुच्छायो भृशं कलुषान्तरः
श्रयति हरितं हन्त ! प्राचेतसीं तुहिनद्युतिः ॥" (ड)

(ट) अत्रेति। पुंस्त्रीलिङ्गमात्रेण केवलाभ्यां पुंलिङ्ग-स्त्रीलिङ्गाभ्यां न पुनर्वस्तुत एव पुंस्त्रीभ्याम्, रवेर्जोमात्ररूपत्वात् सन्ध्यायाश्च कालविशेषत्वादिति मात्रपदप्रयोगाशयः। रविसन्ध्ययोः प्रस्तुतपूर्वार्द्ध-समर्थकत्वेन प्रस्तुतयोरित्यर्थः, नायकनायिकयोरप्रस्तुतयोः पुरुषविशेष-स्त्रीविशेषयोः, व्यवहारो यथासंख्येन व्यवहारसमारोप इति समासोक्तिरिति भावः। तथा तत्समासोक्तिमूलको विशेषेण सामान्यसमर्थनरूपो-ऽर्थान्तरन्यास एव न पुनः "अत्र दृष्टान्तत्वे नाप्रस्तुतयोः" इत्यादिना रामचरणेनोक्तो दृष्टान्तः; "सामान्य-विशेषभावोऽर्थान्तरन्यासे प्रतिवस्तूपमादृष्टान्तयोस्तु न तथा" इति दृष्टान्तप्रकरणे ग्रन्थकृतैव समर्थ्यसमर्थ-कयोः सामान्यविशेषभावे सत्यर्थान्तरन्यासस्यैवाङ्गीकारात् समर्थनीयवाक्ये स्त्रीमनस्विनीः सामान्यत्वे निर्वि-वादात् समर्थकवाक्ये च रविसन्ध्ययोः समासोक्तिघटकेनारोपेणापि पुंविशेषस्त्रीविशेषप्रतीतेरेव स्वाभाविकत्वात् आरोपविषयारोप्यमाणयोः सर्वत्रैव समानतादर्शनात् ।

यदि पुनः प्रस्तुतसमर्थकत्वेन रविसन्ध्ययोः प्रस्तुतत्वं नाङ्गीक्रियते, तदेदमुदाहरणं मम विधागर्भभव-सुधाकाव्ये—

"अथ कृततिलकां वा सान्द्रसिन्दूरतैलैर्दिनपतिरुपयातो यत्र सन्ध्यां क्रमेण ।
नयनमिव धुवन्ती भ्रान्तभृङ्गच्छलेन सह खलु दिनकान्त्या पद्मिनी मुद्रिताऽभूत् ॥"

अत्र सन्ध्यावर्णनस्य प्रस्तुततया तदङ्गत्वेन प्रस्तुते दिनमणौ प्रस्तुतयोश्च सन्ध्यापद्मिन्योः केवलपुंस्त्रीलिङ्गा-नाम् अप्रस्तुतस्य पत्युः अप्रस्तुतयोश्च तत्पत्न्योर्व्यवहारसमारोपात् समासोक्तिः ।

(ठ) विशेषणेति। श्लिष्टतया विशेषणपदस्य श्लेषवशादुभयार्थबोधकतया, साधारण्येन विशेषणपदस्या-श्लेषेऽपि तद्वाच्यस्य प्रस्तुताप्रस्तुतोभयवृत्तित्वेन, औपम्यगर्भत्वेन विशेषणस्यान्तर्निविष्टसादृश्यकत्वेन। अत्र औपम्यगर्भत्वेनेति परमतमादायैव त्रिधेत्यभिहितम्। स्वमते तु श्लिष्टतया साधारण्येन चेति द्विधैव। एतच्च परस्ताद्व्यक्तीभविष्यति ।

(ड) विकसितेति। प्रभातवर्णनेयम्। तुहिनद्युतिश्चन्द्रः, पुरः अग्रतः, रागस्य रक्तिम्नः अनुरागस्य च आसङ्गादुपस्थितेर्हेतोः, विकसितमुखीं प्रकाशितप्रथमभागां प्रफुल्लवदनाञ्च, तथा गलन्ती नश्यन्ती च तिमिरा-त्तिरन्धकारावरणं तिमिरवत् कृष्णवर्णा आवृतिर्वस्त्रञ्च यस्यास्ताम्, ऐन्द्रीं पूर्वां दिशम्, दिनकरस्य सूर्यस्य

---

(१) पुंस्त्रीलिङ्गत्वमात्रेण इति क्वचित् पाठः ।

अत्र मुखरागादिशब्दानां श्लिष्टता (ढ)।

अत्रैव हि "तिमिरावृतिम्" इत्यत्र "तिमिरांशुकाम्" इति पाठे एकदेशस्य रूपणेऽपि समासोक्तिरेव, न तु एकदेशविवर्त्ति रूपकम्। तत्र हि तिमिरांशुकयो रूप्यरूपकभावो द्वयोरावरकत्वेन स्फुटसादृश्यतया परसाचिव्यमनपेक्ष्यापि स्वमात्रविश्रान्त इति न समासोक्तिबुद्धिं व्याहन्तुमीशः (ण)। यत्र तु रूप्यरूपकयोः सादृश्यमस्फुटम्, तत्रैकदेशान्तररूपणं विना तदसङ्गतं स्यादित्यशाब्दमप्येकदेशान्तररूपणमर्थमपेक्षत एवेति तत्रैकदेशविवर्त्ति रूपकमेव (त)। यथा—

"जस्स रणन्तेउरए करे कुणन्तस्स मण्डलग्गलअं।
रससंमुही वि सहसा परंमुही होइ रिउसेणा ॥" (थ)

पुरुषान्तरस्य च करेण किरणेन हस्तेन च स्पृष्टां संयुक्तां श्वेताञ्च निरीक्ष्य दृष्ट्वा, अशनत्यन्तं कलुषान्तः शशचिह्नेन मलिनमध्यदेशः ईर्ष्यया अप्रसन्नमनाश्च, तथा जरठा परिणता या लवली फलविशेषः तद्वत् पाण्डुः छाया दीप्तिर्यस्य स तादृशः सन् एकत्र प्रभातवशादन्यत्र विरहादिति भावः, हन्त खेदेन, प्राचेतसीं पश्चिमां हरितं दिशं श्रयति भजते।

(ढ) अत्रेति। तथा च प्रभातवर्णनायाः प्रस्तुततया तदङ्गत्वेन प्रस्तुतायां पूर्वस्यां दिशि मुखरागादिश्लिष्टविशेषणसाम्यादप्रस्तुताया व्यभिचारिण्या नायिकाया व्यवहारसमारोपः, तथैव प्रस्तुतयोर्दिनकरचन्द्रयोः श्लिष्टविशेषणसाम्यादप्रस्तुतयोर्द्वयोरुपपत्योर्व्यवहारसमारोपश्चेति समासोक्तिरित्याशयः।

(ण) एकदेशविवर्त्तिरूपकसमासोक्त्योर्विषयभेदं दर्शयितुमाह अत्रैवेति। विकसितेत्यादिश्लोक एवेत्यर्थः। रूपणेऽपि तिमिररूपे उपमेये अंशुकरूपस्योपमानस्यारोपेऽपि। हि यस्मात्। तत्र तिमिरांशुकामिति स्थाने. रूप्यरूपकभाव आरोपस्थलीय उपमेयोपमानभावः, द्वयोस्तिमिरस्य अंशुकस्य चेत्यर्थः, आवरकत्वेन आच्छादकत्वरूपसामान्यधर्मेण। परसाचिव्यं प्राच्यां नायिकात्वारोपानुसन्धानसाहाय्यम् स्वमात्रविश्रान्तः केवले स्वस्मिन्नवस्थितः स्वत एव सिद्ध इत्यर्थः, इति हेतोः, समासोक्तिबुद्धिं समासोक्त्यलङ्कारप्रतीतिम्, व्याहन्तं बाधितुम्, न ईशो न समर्थः। शाब्दबोधेन रूपकघटकस्यारोपस्य अनपेक्षितत्वादिति भावः।

(त) यत्रेति। रूप्यरूपकयोरारोपस्थलीययोरुपमेयोपमानयोः। एकदेशान्तररूपणं कस्मिंश्चिदेकदेशे आरोपम्। तत् वाक्यम्, असङ्गतम् अनुपपन्नार्थकम् अशाब्दमपि शब्देनाप्रतिपादितमपि आर्थम् अर्थवशात् प्राप्यम्, एकदेशान्तररूपणं कस्मिंश्चिदेकदेशे आरोपम्। रूपकमेवेति। तादृशस्थले शाब्दबोधेन रूपकघटकस्यारोपस्य अवश्यमेवापेक्षितत्वादित्याशयः।

(थ) जस्स इति। "यस्य रणान्तःपुरके करे कुर्वाणस्य मण्डलाग्रलताम्। रससम्मुखी अपि सहसा पराङ्मुखी भवति रिपुसेना ॥" इति संस्कृतानुवादः। राजस्तुतिरियम्। रणो युद्धस्थलमेव अन्तःपुरकं तस्मिन्, अल्पानुकम्पायां कप्रत्ययः; मण्डलाग्रलतां तरवारिवल्लीं काश्चित् कामिनीञ्च, करे कुर्वाणस्य हस्ते

अत्र रणान्तःपुरयोः सादृश्यमस्फुटमेव (द)। क्वचिच्च तत्र स्फुटसादृश्यानामपि बहूनां रूपणं शाब्दम्, एकदेशस्य च आर्थम्, तत्रैकदेशविवर्त्ति रूपकमेव । रूपकप्रतीतेर्व्यापितया समासोक्तिप्रतीतितिरोधायकत्वात् (ध)। नन्वस्ति रणान्तःपुरयोरपि सुखसञ्चारतया स्फुटसादृश्यमिति चेत्, सत्यमुक्तम् ; अस्त्येव ; किन्तु वाक्यार्थपर्य्यालोचनसापेक्षम्, न खलु निरपेक्षम्, मुखचन्द्रादेर्मनोहरत्वादिवत् रणान्तःपुरयोः स्वतः सुखसञ्चारत्वाभावात् (न)।

…रयतः ; यस्य राज्ञः, रसेन युद्धानुरागेण सुरतानुरागेण च सम्मुखी अभिमुखी अपि रिपुसेना शत्रुसैन्यम् …न्या कामिनी च, सहसा तत्क्षणात् पराङ्मुखी विमुखी भवति, भयात् ईर्ष्यातश्चेति भावः । "कौक्षेयको मण्डलाग्रः करपालः कृपाणवत्" इत्यमरः ।

(द) अत्रेति । अस्फुटमेवेति । रणस्य भयङ्करस्थानत्वेन अन्तःपुरस्य च सुखविहारदेशत्वेन …ततत्त्वलक्षणादिति भावः । अत्रेदमवधेयम्—प्रस्तुते राजनि अप्रस्तुतस्य नायकस्य व्यवहारसमारोपः, …था प्रस्तुतायां मण्डलाग्रलतायामप्रस्तुताया एकस्या रिपुसेनायाश्चापरस्य नायिकाया लिङ्गसाम्याद्व्यवहारसमा…रोपश्चेति किं समासोक्तिः, अथवा रणे अन्तःपुरत्वारोपः शाब्दः, राजनि नायकत्वारोपः मण्डलाग्रलतारिपु…सेनयोर्नायिकाद्वयत्वारोपश्च आर्थ इत्येकदेशविवर्त्ति रूपकम्, इति सन्देहे रणान्तःपुरयोरस्फुटसादृश्यतया …भाव्य सादृश्यकल्पनया रणे अन्तःपुरत्वारोपमन्तरेण वाक्यार्थासङ्गतिरिति तदारोपस्यावश्यमपेक्षणीयतया …एकदेशविवर्त्ति रूपकमेवेति ।

(ध) क्वचिदिति । बहूनामधिकस्येत्यर्थः, व्यापितयेति हेतोरविशेषात् । रूपणमारोपः, शाब्दं शब्द…प्रतिपाद्यम्, आर्थम् अर्थतात्पर्य्यालभ्यम् । तत्र "लावण्यमधुभिः पूर्णम्" इत्यादौ । व्यापितया बहुस्थान…वर्त्तितया ।

(न) "विकसितमुखीम्" इत्यादौ "तिमिरांशुकाम्" इति पाठेऽपि स्फुटसादृश्यतया समासोक्तिवत् "अस्य रणान्तःपुरे" इत्यादावपि स्फुटसादृश्यतां प्रदर्श्य समासोक्तिमाशङ्कते नन्विति । सुखेन सञ्चारो यस्मिन् तत्तया सुखविचरणस्थानत्वरूपसामान्यधर्म्मस्य स्पष्टतयेत्यर्थः, एकवात्मनो महावीरत्वेन शत्रुभिर्वारयितुमशक्यत्वात् अन्यत्र तु स्वकीयविलासालयत्वादिति भावः । स्फुटसादृश्यमस्ति "रणान्तःपुरे" इत्यत्रेति शेषः । अतस्तत्रापि समासोक्तिरेवास्तामित्याशङ्कार्थः । अस्त्येव स्फुटसादृश्यमित्यन्वयः । वाक्यार्थपर्य्यालोचनसापेक्षं "अस्य रणान्तःपुरे" इत्यादिसम्पूर्णवाक्यार्थानुसन्धानानन्तरमेव बोध्यम्, न खलु निरपेक्षं तिमिरांशुकामितिवत् सादृश्यसम्पूर्णवाक्यार्थानुसन्धानात् पूर्वमेव न खलु बोध्यं तत् स्फुटसादृश्यमित्यर्थः रिपुसेनायाः पराङ्मुखीभवनपर्य्यन्तज्ञानाभावे रणे सुखसञ्चारज्ञानासम्भवादिति भावः । मुखचन्द्रादेर्मनोहरत्वादिवत् "मुखचन्द्रः" इत्यादौ मनोहरत्वादिरूपसादृश्यवत् । स्वतः स्वभावतः सुखसञ्चारत्वाभावात् रणे यस्य कस्यचित् सुखसञ्चारत्वाभावेन रणान्तःपुरयोरुभयोरेव तदभावादित्यर्थः, एकत्राभावे उभयत्रैवाभावस्य तार्किकैरङ्गीकृतत्वादिति भावः ।

साधारण्येन (प) यथा—

"निसर्गसौरभोद्भ्रान्त-भृङ्गसङ्गीतशालिनी।
उदिते वासराधीशे स्मेराजनि सरोजिनी॥" (फ)

अत्र निसर्गेत्यादिविशेषणसाम्यात् सरोजिन्यां (१) नायिकाव्यवहार-प्रतीतौ स्त्रीमात्रगामिनः स्मेरत्वधर्मस्य समारोपः कारणम्। तेन विना विशेषणसाम्यमात्रेण नायिकाव्यवहारप्रतीतेरसम्भवात् (ब)।

औपम्यगर्भत्वं पुनस्त्रिधा सम्भवति—उपमा-रूपक-सङ्करगर्भत्वात् (भ)। तत्र (२) उपमागर्भत्वे यथा—

"दन्तप्रभापुष्पचिता पाणिपल्लवशोभिनी।
केशपाशालिवृन्देन सुवेशा हरिणेक्षणा॥" (म)

एतेन यत्र रूप्यरूपकयोः सादृश्यमस्फुटम्, यत्र वा बहूनां रूपणं शाब्दम् एकदेशस्य रूपणञ्च आर्थम्, तत्रैकदेशविवर्त्तिरूपकम्; यत्र तु सादृश्यं स्फुटम्, यत्र वा बहूनां न रूपणम्, तत्र समासोक्तिरिति सिद्धान्तितम्।

(प) साधारण्येनेति। विशेषणसाम्येन तस्य प्रस्तुताप्रस्तुतोभयवृत्तित्वेनेत्यर्थः।

(फ) निसर्गेति। निसर्गसौरभेण स्वभावसिद्धसौगन्ध्येन उद्भ्रान्ता मुग्धीभूता ये भृङ्गा भ्रमरास्तेषां सङ्गीतशालिनी सरोजिनी पद्मिनी तल्लक्षणा नायिका च, वासराधीशे सूर्ये स्वनायके च, उदिते उदयाचलं प्राप्ते उपस्थिते च, स्मेरा विकसिता आनन्देन सुहास्यवदना च, अजनि जाता। प्रभातवर्णनेयम्।

(ब) उदाहृते स्मेरेति विशेषणस्य साधारण्यं प्रतिपादयति अत्रेति। निसर्गेत्यादेः पूर्वार्द्धरूपस्य विशेषणस्य साम्यात् प्रस्तुताप्रस्तुतयोरुभयोरेव सरोजिनीनायिकयोः सत्त्वेन सादृश्यादित्यर्थः एतत् साम्यन्तु सरोजिन्यां नायिकाव्यवहारप्रतीतिं प्रति मुख्यं कारणमिति बोध्यम्। अतएवात्र हेत्वर्थे पञ्चमी। अथ तथापि श्लिष्टस्य स्मेरेतिविशेषणस्य कथं सरोजिन्यां प्रतीतिः, तस्या हास्यासम्भवादित्याह स्त्रीमात्रेति। स्त्रीमात्रगामिनः सरोजिन्यामसम्भवात् केवलस्त्रीवर्त्तिनः। समारोपः सरोजिन्यामिति सम्बध्यते। कारणं सरोजिन्यां नायिकाव्यवहारप्रतीतिं प्रति सहकारि कारणम्। तेन सरोजिन्यां स्मेरत्वधर्मसमारोपेण, विना "स्मेराजनि" इत्यत्र "स्फुटाजनि" इति पाठे इत्यर्थः, विशेषणमात्रसाम्येन केवलपूर्वार्द्धरूपविशेषणेन असम्भवादिति। "स्फुटाजनि" इति पाठे सरोजिनीमात्रवर्त्तिना स्फुटत्वधर्मेण साधारणस्यापि पूर्वार्द्धरूपविशेषणस्य सरोजिनीमात्रवर्त्तितया प्रतिपादनीयत्वादित्याशयः। तेन "विकसितमुखीम्" इत्यादौ विशेषणानां द्व्यर्थकतयैव साधारण्येन साम्यम्, इह तु निसर्गेत्यादीनामेकार्थकतयैव साधारण्येन साम्यमिति भेदः।

(भ) परमतीयमौपम्यगर्भत्वमयुक्तमिति दर्शयितुं तदपि पुनर्विभजते औपम्येति। उपमागर्भत्वात्, रूपकगर्भत्वात्, उपमारूपकयोः सन्देहसङ्करगर्भत्वाच्चेत्यर्थः।

---

(१) सरोजिन्या इति पाठान्तरम्। (२) अत्रेति क्वचित् पाठः।

अत्र सुवेशत्ववशात् प्रथमं दन्तप्रभाः पुष्पाणीव इत्युपमागर्भत्वेन समासः । अनन्तरञ्च दन्तप्रभासदृशैः पुष्पैश्चिता इत्यादिसमासान्तराश्रयेण समानविशेषणमाहात्म्याद्धरिणीलक्षणायां लताव्यवहारप्रतीतिः (य) ।

रूपकगर्भत्वे यथा—"लावण्यमधुभिः पूर्णम्" इत्यादि (र) ।

(म) दन्तेति । दन्तप्रभाः पुष्पाणीव अन्यत्र तु दन्तप्रभा इव पुष्पाणि तैश्चिता व्याप्ता, पाणिः करतलं पल्लवमिव अन्यत्र तु पाणिरिव पल्लवं तेन शोभत इति सा, तथा केशपाशः अलिवृन्दं भ्रमरसमूह इव अन्यत्र केशपाश इव अलिवृन्दं तेन विशिष्टेत्यर्थः, शोभनो वेशः परिच्छदो यस्याः सा सुवेशा हरिणेक्षणा मृगनयना राजत इति शेषः ।

(य) अत्रेति । सुवेशत्ववशात् सुवेशेतिपदस्य उपमासाधकत्वादित्यर्थः । तथा च हरिणेक्षणायाः कामिन्याः पुष्पेण पल्लवेन च सुवेशत्वसम्भवेऽपि अलिवृन्देन सुवेशत्वासम्भवात् "केशपाशालिवृन्देन" इत्यत्र उपमितसमासः कर्त्तव्य एव, तत्साहचर्य्यात् पूर्वपदद्वयेऽप्युपमितसमास इत्याशयः । दन्तप्रभासदृशैरिति तु अर्थप्रदर्शनमात्रम्, "दन्तप्रभा इव पुष्पाणि" इत्यमेव विग्रहवाक्यानि, तानि तु दर्शितान्येव । समासान्तराश्रयेण लताव्यवहारारोपपक्षे प्रकारान्तरोपमितसमासकरणेन । इति केषाञ्चिन्मतम् ।

(र) रूपकेति । रूपकगर्भत्वे रूपकसमासगर्भत्वे । तथा च लावण्यान्येव मधूनि तैः, लोचनान्येव रोलम्बास्तेषां कदम्बैरिति मयूरव्यंसकादित्वाद्रूपकसमासः । एवञ्च लावण्यमधुभिरिति लोचनरोलम्बकदम्बैरिति च विशेषणसाम्यात् समासोक्तिरिति च केषाञ्चिन्मतम् । ग्रन्थकृन्मते तु मुखे पद्मस्वरूपस्यैवारोपेण व्यवहारसमारोपाभावदत्र न समासोक्तिः । किञ्च ग्रन्थकृन्मते औपम्यगर्भविशेषणोत्थापितत्वमात्रमेव न समासोक्तिर्विषयः । तथा चैतत्प्रकरण एव वक्ष्यति—"औपम्यगर्भविशेषणोत्थापितत्वं नास्या विषय इति विशेषणसाम्ये श्लिष्टविशेषणोत्थापिता साधारणविशेषणोत्थापिता चेति द्विधा" इति । तेन "लावण्यमधुभिः" इत्यादौ मुखे पद्मस्य स्वरूपारोपात् लावण्यमधुनोस्तरलत्वादिना लोचनरोलम्बयोश्च श्यामलत्वादिना सादृश्यस्य स्फुटत्वेऽपि अनेकयो रूपणाच्च एकदेशविवर्त्तिरूपकमेवेति ग्रन्थकारस्य स्थिरसिद्धान्तः । अतएवानुपदमेव ग्रन्थकृत् स्वमतमाह—"द्वितीयस्तु प्रकार एकदेशविवर्त्तिरूपकविषय एव" इति । अतएव चैकदेशविवर्त्तिरूपकलक्षणस्य लक्ष्यतया "लावण्यमधुभिः" इत्यादिकमेवोदाहृतम् । एतेन "लावण्यमधुनोः" इत्यारभ्य "एकदेशविवर्त्तिरूपकस्य यदेतदुदाहरणं दत्तं तन्मतभेदेन" इत्यन्तं रामचरणेन यत् सम्पूर्णं विपरीतमुक्तं तत् "द्वितीयस्तु" इत्याद्युत्तरग्रन्थस्य "औपम्यगर्भविशेषणोत्थापितत्वं नास्या विषयः" इत्याद्युत्तरग्रन्थस्य चापर्य्यालोचनेनेति सर्वं पूर्वं हेयम् । न खल्वसाधारणधीरबुद्धिना सुधीरधुरीणेन विश्वनाथेन सिद्धिभक्षणादिना नितान्तधीविकारमापन्नेनेदं प्रकरणद्वयं निरमायि, येन आत्मीयत्वेनैव निर्विवादं परमतमुदाहृत्य किञ्चिद्दूर एव पुनस्तद्विपरीतमुदाह्रियेत ।

किञ्च "लावण्यमधुभिः" इत्यादौ एकदेशविवर्त्तिरूपकसमासोक्त्योरन्यतरेणैव सम्पूर्णवैचित्र्यव्याप्तौ द्वयोः सङ्कराङ्गीकारोऽपि न सम्भवतीति द्रष्टव्यम् ।

सङ्करगर्भत्वे यथा—"दन्तप्रभापुष्पचिता" इत्यादौ (१) "सुवेशा" इत्यत्र 'परीता' इति पाठे हि उपमारूपकसाधकाभावात् सङ्करसमाश्रयणम् । समासान्तरं पूर्ववत् । समासान्तरमहिम्ना लताप्रतीतिः (ल) ।

एषु च येषां मते उपमासङ्करयोरेकदेशविवर्त्तिता नास्ति, तन्मते आद्यतृतीययोः समासोक्तिः (व) । द्वितीयस्तु प्रकार एकदेशविवर्त्तिरूपकविषय एव (श) । पर्य्यालोचने तु आद्ये प्रकारे एकदेशविवर्त्तिन्युपमैवाङ्गीकर्त्तुमुचिता (ष) । अन्यथा—

"ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्दधानार्द्रनखक्षताभम् ।
प्रसादयन्ती सकलङ्कमिन्दुं तापं रवेरभ्यधिकं चकार ॥" (स)

(ल) सङ्करेति । परीता व्याप्तेत्यर्थः । उपमारूपकसाधकाभावात् उपमारूपकयोरेकतरस्य साधकाभावादित्यर्थः । अयमाशयः—परीतेति पाठे पूर्वार्द्धे उपमितसमासो रूपकसमासश्चेत्युभयमेव सम्भवति साधकाभावात् । "केशपाशालिवृन्देन" इत्यत्र च अलिवृन्दसदृशकेशपाशेन नायिकाया व्याप्तत्वसम्भवात् "केशपाशः अलिवृन्दमिव" इत्युपमितसमासः, केशपाशरूपेणालिवृन्देन लताया व्याप्तत्वसम्भवाच्च 'केशपाश एवालिवृन्दम्' इति रूपकसमासश्च सम्भवतीत्युपमारूपकयोरेकतरस्य साधकाभाव एवेति । सङ्करसमाश्रयणम् उपमारूपकयोः सन्देहसङ्करस्वीकारः । समासान्तरं परपदप्रधानः समासः 'दन्तप्रभा इव पुष्पाणि' इत्यादिरूपः समास इत्यर्थः, पूर्ववत् "दन्तप्रभा" इत्यादौ सुवेशा इति पाठवत् । लताप्रतीतिरिति । तथा च प्रथमचरणद्वये उपमितसमासेन साम्यस्य वाच्यत्वात् हरिणीचरणयोः लतासाम्यस्य च गम्यत्वात् किमेकदेशविवर्त्तिन्युपमा, किंवा दन्तप्रभादौ पुष्पत्वाद्यारोपस्य शाब्दत्वात् हरिणीचरणयोः लतात्वारोपस्य च आर्थत्वादेकदेशविवर्त्तिरूपकम् ? इत्येवमुपमारूपकयोः सन्देहसङ्करः ; तद्गर्भकदन्तप्रभापुष्पचितेत्यादिविशेषणसाम्यात् समासोक्तिरित्यपि च केषाञ्चिन्मतम् ।

(व) भङ्गीविशेषेण तन्मतस्य अयुक्ततां प्रतिपादयितुमाह एषु चेति । "दन्तप्रभा" इत्यादिषु च त्रिषूदाहरणेष्वित्यर्थः । उपमासङ्करयोः उपमाया उपमारूपकयोः सन्देहसङ्करस्य चेत्यर्थः । आद्यतृतीययोः सुवेशेतिपाठान्विते "दन्तप्रभा" इत्यादौ प्रथमोदाहरणे, परीतेतिपाठान्विते "दन्तप्रभा" इत्यादाविव तृतीयोदाहरणे चेत्यर्थः । एतेन उपमासङ्करयोरेकदेशविवर्त्तितासत्त्वे तु तयोरेवाङ्गीकरणमुचितमिति सूचितम्, एतच्चानुपदं ग्रन्थकृता मुखत एव व्यक्तीक्रियते ।

(श) इदानीं क्रमशः स्वमतमाह द्वितीयस्त्विति । "लावण्यमधुभिः पूर्णम्" इत्यादिविध इत्यर्थः । एकदेशविवर्त्तिरूपकविषय एवेति । मुखे पद्मस्वरूपस्यैवारोपात् पद्मव्यवहारारोपाभावेन समासोक्तेरसम्भवादिति प्रागुक्तयुक्तेः स्वमते एकदेशविवर्त्तिरूपकसत्त्वाच्चेति भावः ।

(ष) आद्यतृतीययोरपि तदुक्तां समासोक्तिं क्रमान्निरसितुमाह पर्य्यालोचने त्विति । सर्वतः सूक्ष्मानुसन्धाने त्वित्यर्थः । आद्ये प्रकारे सुवेशेतिपाठान्विते "दन्तप्रभा—" इत्यादौ ।

---

(१) इत्यादि इति प्रथमान्तः पाठः क्वचित् ।

इत्यत्र कथं शरदि नायिकाव्यवहारप्रतीतिः? नायिकापयोधरेणार्द्र-नखक्षताभ-शक्रचापधारणासम्भवात् (ङ)। ननु "आर्द्रनखक्षताभम्" इत्यत्र स्थितमप्युपमानत्वं वस्तुपर्य्यालोचनया ऐन्द्रे धनुषि सञ्चारणीयम् (च)। यथा—"दध्ना जुहोति" इत्यादौ हवनस्यान्यथासिद्धेर्दध्नि सञ्चार्य्यते विधिः (क)। एवञ्च इन्द्रचापाभमार्द्रनखक्षतं दधानेति प्रतीतिर्भविष्यति (ख)।

(घ) ऐन्द्रमिति। शरत्कालवर्णनेयम्। पाण्डुपयोधरेण सकलजलवर्षणात् शुभ्रमेघेन शुभ्रस्तनेन च, आर्द्रनखक्षताभं नूतननखक्षततुल्यम्, ऐन्द्रं धनुरिन्द्रधनुः, दधाना धारयन्ती, शरत् शरत्कालः काचित् कुलटा च, सकलङ्कं शशचिह्नसमन्वितं परस्त्रीसंसर्गात् सापवादञ्च, इन्दुं चन्द्रम् उपपतिञ्च, प्रमोदयन्ती निर्मलीकुर्वती स्वसङ्गमेन आनन्दयन्ती च सती, रवेः सूर्य्यस्य पत्युश्चापि, अधिकं तापं प्रखरतां मनस्तापञ्च चकार।

अत्र ऐन्द्रे धनुषि नखक्षतसाम्यं मेघे स्तनसाम्यञ्च वाच्यम्, शरदि नायिकासाम्यम्, इन्दावुपपतिसाम्यम्, रवौ पतिसाम्यञ्च गम्यमित्येकदेशविवर्त्तिन्युपमेति ग्रन्थकर्त्तुराशयः। पाण्डुपयोधरेण आर्द्रनखक्षताभ-मैन्द्रं धनुर्दधानेत्याद्युपमागर्भविशेषणसाम्येन शरदि नायिकाव्यवहारसमारोपात् समासोक्तिरिति च परेषा-मभिप्राय इत्युन्नेयम्।

(ङ) तत्र परमतं दूषयितुमाह इत्यत्रेति। नायिकाया भूतलस्थिताया इति भावः, पयोधरेण स्तनेन। अत्र ग्रन्थकर्त्तुरयमाशयः—यस्य व्यवहारः समारोपणीयस्तत्रापि विशेषणस्य सम्भवपरत्वमत्यावश्यकमेव ; अन्यथा घटेऽपि वह्निव्यवहारसमारोपो भवितुमर्हति। तेन भूतलस्थिताया नायिकायाः स्तनेन दूराकाशस्थितस्य आर्द्र-नखक्षताभशक्रचापस्य धारणासम्भवेन "पाण्डुपयोधरेण आर्द्रनखक्षताभमैन्द्रं धनुर्दधाना" इति विशेषणस्य नायिकापक्षे अत्यन्तमेवासम्भवात् शरदि तद्व्यवहारसमारोपस्यैवासम्भवेन कथं समासोक्तिरिति।

(च) विरोधिनामभिप्रायमाशङ्कते नन्विति। वस्तुपर्य्यालोचनया वक्तुरभिप्रायस्य सर्वतः समालोचनये-त्यर्थः। सञ्चारणीयं प्रेरणीयम्।

(क) उक्तार्थे पर एव मीमांसकसिद्धान्तसिद्धं दृष्टान्तमाहुर्यथेति। हवनस्य होमस्य, अन्यथासिद्धेः "अग्निहोत्रं जुहोति" इत्युत्पत्तिविधिनैव सिद्धेः। विधिर्विधेयता। अत्रायं विस्तरः—अग्निहोत्रप्रकरणे "अग्निहोत्रं जुहोति" "दध्ना जुहोति" इत्यादयो नाना विधयः श्रूयन्ते। तत्र अग्निहोत्रनामकहोमस्य "अग्नि-होत्रं जुहोति" इत्युत्पत्तिविधिनैव प्राप्ततया "दध्ना जुहोति" इत्यनेन पुनस्तदंशे विधानं नोपपद्यते, अप्राप्त-प्रापकस्यैव विधिरूपत्वात्। तेन "दध्ना जुहोति" इति विधौ जुहोतीत्यत्र स्थितं विधित्वं दध्नि सञ्चार्य्यते। तदा चोक्तं पूर्वमीमांसार्थसंग्रहे लौगाक्षिणा—"दध्ना जुहोतीत्यत्र होमस्याग्निहोत्रं जुहुयादित्यनेन प्राप्तत्वात् होमोद्देशेन दधिमात्रविधानम्।" एवञ्च "दध्ना जुहोति" इत्यत्र जुहोतीत्यस्य होमानुवादमात्रे पर्य्यवसानम्। तदुक्तं भट्टपादैः—

"सर्वं वाख्यातसम्बन्धं श्रूयमाणे पदान्तरे। विधिश्शक्त्युपसंक्रान्ते स्याद्धातोरनुवादता॥"

ततश्च दध्नो होमरूपपरार्थतया शेषत्वेन तदङ्गत्वात् "दध्ना अग्निहोत्रं जुहोति" इति विधिः पर्य्यवस्यति। तथा च पूर्वमीमांसातृतीयाध्यायप्रथमपादे सूत्रम्—"शेषः परार्थत्वात्।"

इति चेन्न ; एवंविधनिर्वाहे कष्टसृष्टिकल्पनादेकदेशविवर्त्युपमाङ्गीकारस्यैव न्याय्यत्वात् (ग)। अस्तु वा अत्र यथाकथञ्चित् समासोक्तिः। "नेत्रैरिवोत्पलैः पद्मैः—" इत्यादौ च (६१२ पृष्ठे) अन्यगत्यसम्भवात् (घ)। किञ्च, उपमायां व्यवहारप्रतीतेरभावात् कथं तदुपजीविकायाः समासोक्तेः प्रवेशः ? (ङ)। यदाहुः—(च)

"व्यवहारोऽथवा तत्त्वमौपम्ये यत् प्रतीयते ।
तन्नौपम्यं समासोक्तिरेकदेशोपमा स्फुटा ॥" (छ)

(ख) एवञ्चेति। आर्द्रनखक्षतार्भमित्यत्र स्थितस्याप्युपमानत्वस्य ऐन्द्रे धनुषि सञ्चारणीयत्वे चेत्यर्थः। दधाना नायिकेति शेषः। तथा च इन्द्रचापाभमार्द्रनखक्षतं दधाना इत्यवंरूपेण पर्यवसितस्य विशेषणस्य नायिकापक्षेऽपि सम्भवात् समासोक्तिर्निर्व्यूढैवेति तेषामाशयः।

(ग) एतदपि दूषयति इति चेन्नेति। एवंविधेन वेदवाक्यवत् काव्ये असम्भवेन अन्यत्र स्थितस्यार्थस्य अन्यत्र सञ्चारणव्यापारेण, निर्वाहे समासोक्तिनिष्पादने, कष्टसृष्टिकल्पनात् कष्टजनकलस्वीकारात् तदपेक्षयेत्यर्थः। न्याय्यत्वात् श्रेयस्त्वात्।

(घ) ननु तर्हि "एतस्मिन्नधिकपयः श्रियं वहन्त्यः संक्षोभं पवनभुवा जवेन नीताः। वाल्मीकेररहितरामलक्ष्मणानां साधर्म्यं दधति गिरां महासरस्यः॥" इत्यादौ काव्य एव शिशुपालवधादिपद्ये प्रथमान्ततया महासरसीषु स्थितं शोवहनादिधर्मं गीर्षु, षष्ठ्यन्ततया गीर्षु स्थितम् अरहितरामलक्ष्मणधर्मञ्च महासरसीषु सञ्चार्य कथं श्लेषः सौक्रियत इत्याह अस्तु वेति। अत्र "ऐन्द्रं धनुः—" इत्यादौ। यथाकथञ्चित् "एतस्मिन्" इत्यादिवदेव कष्टेन धर्मसञ्चारकल्पनया। अन्यस्या गतेरुपायस्यासम्भवात् एकदेशविवर्त्युपमासन्तरेण तादृशवैचित्र्यस्य संज्ञान्तरासम्भवादित्यर्थः।

(ङ) अथ तत्रापि नेत्राद्युपमानत्वसुत्पलादिषु सञ्चार्य सरःश्रीषु नायिकाव्यवहारसमारोपेण "दन्तप्रभापुष्पचिता" इत्यादिवदेव समासोक्तिर्भविष्यतीत्याह किञ्चेति। उपमायाम् इवादिशब्दैः साक्षादेव प्रतिपादितायामित्यर्थः। तदुपजीविकाया व्यवहारप्रतीतिमात्राश्रितायाः। तथा च "नेत्रैरिवोत्पलैः पद्मैः—" इत्यादौ पूर्वापरयोरिवशब्दैः सादृश्यस्यैव बोधिततया सन्दंशपातन्यायेन साहचर्येण च मध्यपातिसरःश्रीषु अध्याहृतस्यनायिकासादृश्यप्रतीतेरेव स्वाभाविकत्वम्, न तु गाढयत्नेन भवदुच्यमानाया नायिकाव्यवहारप्रतीतेः। सादृश्यव्यवहारयोश्चात्यन्तमेव वैलक्षण्यम्। अतः "नेत्रैरिवोत्पलैः पद्मैः—" इत्यादौ तादृशवैचित्र्यस्य "एकदेशविवर्तिन्युपमा" इति संज्ञाकल्पनमकामेनापि भवता कर्त्तव्यमेवेति "ऐन्द्रं धनुः पाण्डुपयोधरेण—" इत्यादावपि तत्कल्पनमेव न्याय्यमिति भावः।

(च) उक्तार्थे प्राचीनसंवादमप्याह यदाहुरिति।

(छ) व्यवहार इति। औपम्ये औपम्यगर्भविशेषणस्थले, यो व्यवहारो व्यवहारारोपात्मकमौपम्यम्, अथवा तत् तत्त्वं स्वरूपं स्वरूपारोपात्मकमौपम्यम्, प्रतीयते ; तदौपम्यं न समासोक्तिः ; किन्तु एकदेशविवर्त्ति-

एवञ्चोपमारूपकयोरेकदेशविवर्त्तिताङ्गीकारे तन्मूलसङ्करेऽपि समासोक्ते-रप्रवेशो न्यायसिद्ध एव (ज)। तेन औपम्यगर्भविशेषणोत्थापितत्वं नास्या विषय इति विशेषणसाम्ये श्लिष्टविशेषणोत्थापिता साधारणविशेषणोत्थापिता चेति द्विधा कार्य्यलिङ्गयोस्तुल्यत्वे च द्विविधेति चतुःप्रकारा समासोक्तिः (झ)। सर्वत्रैवात्र व्यवहारसमारोपः कारणम्। स च क्वचिल्लौकिके वस्तुनि लौकिकवस्तुव्यवहारसमारोपः, शास्त्रीये वस्तुनि शास्त्रीयवस्तुव्यवहारसमारोपः, लौकिके वा शास्त्रीयवस्तुव्यवहारसमारोपः, शास्त्रीये वा लौकिकवस्तुव्यवहारसमारोप इति चतुर्द्धा (ञ)।

तत्र लौकिकवस्त्वपि रसादिभेदादनेकविधम्। शास्त्रीयमपि तर्कायुर्वेदज्योतिःशास्त्रादिप्रसिद्धतयेति बहुप्रकारा समासोक्तिः। दिङ्मात्रं यथा— "व्याधूय यद्वसनम्" इत्यादौ लौकिके वस्तुनि लौकिकस्य हठकामुकव्यवहारादेः (१) समारोपः (ट)।

दुपमा स्फुटा उक्तयुक्तेः स्पष्टा। अत्र एकदेशोपमापदमेकदेशरूपकोपलक्षणम्, तत्त्वमित्यभिधानात् समान-न्यायात्। तेन तन्मतेऽपि "लावण्यमधुभिः पूर्णम्" इत्यादौ एकदेशविवर्त्तिरूपकमेवेति बोध्यम्।

(ज) भङ्गीत उक्तप्रायमप्यर्थं स्पष्टतः पुनराह एवञ्चेति। प्रदर्शितस्वमतस्य प्राचीनमतानुसारित्वेऽपि वैदर्थः। तन्मूलसङ्करे उपमारूपकसन्देहसङ्करे एकदेशविवर्त्तिरूपे इति शेषः। अप्रवेशः असम्भवः, न्यायसिद्ध एव उपमायां रूपके तदुभयसङ्करे च व्यवहारप्रतीतिर्नास्तीत्येवं युक्तिसिद्ध एव।

(झ) स्वमतमुपसंहरन्नाह तेनेति। उक्तयुक्त्या दन्तप्रभेत्याद्युदाहरणद्वये समासोक्तेरप्रवेशेनेत्यर्थः। अस्याः समासोक्तेः। इति हेतोः। एतेन "औपम्यगर्भत्वेन" इति पूर्वोक्तिः, "औपम्यगर्भत्वं पुनस्त्रिधा" इति विभागः, "दन्तप्रभा" इत्याद्युदाहरणद्वयञ्च परमत एवेति सूचितम्।

(ञ) सर्वत्रेति। अत्र समासोक्तौ, व्यवहारसमारोप एव कारणम्, न तु स्वरूपसमारोपः सादृश्य-प्रतीतिर्वेति भावः। स च व्यवहारसमारोपश्च। लौकिके इहलोक एव प्रत्यक्षादियोग्ये। शास्त्रीये शास्त्रमात्रगम्ये न तु साधारणप्रत्यक्षादियोग्य इत्यर्थः। एवमन्यत्रापि। चतुर्द्धेति। तथा च प्रागुक्तानां चतुर्णां प्रकाराणां प्रत्येक एव लौकिक इत्याद्युक्तविधया चतुर्विधत्वात् समुदायेन प्रधानतः षोडशविधा समा-सोक्तिरिति बोध्यम्।

(ट) तत्रेति। रसाः शृङ्गारादयः आदिपदाद्घटपटादीनि वस्तूनि च तेषां भेदात्। हठेति। आदिशब्देन मतान्तरसिद्धस्य स्वरूपस्य संग्रहः।

---

(१) हठकामुकस्य व्यवहारादेरित्यसमस्तः पाठः क्वचित्।

"यैरेकरूपमखिलास्वपि वृत्तिषु त्वां
पश्यद्भिरव्ययमसंख्यतया प्रवृत्तम् ।
लोपः कृतः किल परत्वजुषो विभक्ते-
स्तैर्लक्षणं तव कृतं ध्रुवमेव मन्ये ॥" (ठ)

अत्र आगमशास्त्रप्रसिद्धे वस्तुनि व्याकरणप्रसिद्धवस्तुव्यवहारसमारोपः (ड)। एवमन्यत्र (ढ)।

(ठ) यैरिति। हे परमात्मन्! अखिलास्वपि वृत्तिषु सृष्टिस्थितिप्रलयादिषु जगतः सर्वास्ववस्थासु, एकरूपम् अपरिणामित्वात् रूपान्तररहितम्, अन्यत्र तु अखिलास्वपि वृत्तिषु प्रत्यययोगसमासादिषु, एकरूपम् अनन्यथाकारम्। अव्ययं क्षयरहितम्, अन्यत्र तु अव्ययसंज्ञकम्। असंख्यतया इयत्तारहिततया प्रवृत्तं विद्यमानम्, त्वां भवन्तम्, पश्यद्भिर्जानद्भिः, यैर्जनैः परत्वजुषो भिन्नत्वाश्रितायाः त्वद्भिन्नाः पदार्थाः सन्तीति बुद्धिमयुक्ताया इत्यर्थः, विभक्तेर्विभागस्य विभागकरणस्येति तात्पर्य्यम्, अन्यत्र तु परवर्त्तिन्याः स्यादिविभक्तेः, लोप उच्छेदः कृतः; तैर्जनैः ध्रुवं निश्चितमेव तव लक्षणं स्वरूपावधारणम्, कृतमित्यहं मन्ये। एतदुभयपक्ष एव समानम्। "वृत्तिर्विवरणावस्थासमासाजीवनेषु च। कैशिक्यादौ प्रवृत्तौ च" इति गोपालः। "पदानां प्रत्ययैर्योगः समासाद्येह वृत्तयः" इति कातन्त्रपरिशिष्टे श्रीपतिश्च।

(ड) अत्रेति। आगमशास्त्रप्रसिद्धे केवलाध्यात्मशास्त्रप्रथिते वस्तुनि परमात्मनि। तथा च गीतायाम्—"अव्यक्तोऽयमचिन्त्योऽयम् अविकार्य्योऽयमुच्यते।"

वेदान्तशाङ्करभाष्यधृता कठोपनिषत्—

"अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते ॥"

"असङ्ख्यतया प्रवृत्तम्" इति तु सांख्यमते। तथा च सांख्यकारिका—

"जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्य्ययाच्चैव ॥" सांख्यसूत्रमप्येवम्।

अथवा कार्य्यरूपेणासंख्यत्वम्। तथा च वेदान्तभामत्याम्—

"कार्य्यरूपेण नानात्वमभेदः कारणात्मना। हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा ॥"

व्याकरणप्रसिद्धेति। तथा च सूत्रम्—"स्वरादिनिपातमव्ययम्।" कातन्त्रपञ्जीधृता कारिका च—

"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥"

(ढ) एवमिति। अन्यत्राप्येवमूह्यमित्यर्थः। यथा मम रुक्मिणीहरणमहाकाव्ये—

"प्रसाधिका भूरिपदस्य साधु स्वकर्मसूत्रेण जगज्जनानाम्।
इयं यथार्था प्रकृतिः किलेति तस्याः परः प्रत्यय एव जातः ॥"

अत्र लौकिके विश्वासे व्याकरणशास्त्रप्रसिद्धतादिप्रत्ययव्यवहारसमारोपः। यथा वा मम वङ्गीयप्रतापनाटके—

रूपके अप्रकृतमात्मस्वरूपसन्निवेशेन प्रकृतस्य रूपमवच्छादयति, इह तु स्वावस्थासमारोपेणावच्छादितस्वरूपमेव (१) तं पूर्वावस्थातो विशेषयति (ण)। अतएव "अत्र व्यवहारसमारोपो न तु स्वरूपसमारोपः" इति वदन्ति (२) (त)। उपमाध्वनौ श्लेषे च विशेष्यस्यापि साम्यम्, इह तु विशेषणमात्रस्य (थ)। अप्रस्तुतप्रशंसायां प्रस्तुतस्य गम्यत्वम्, इह तु अप्रस्तुतस्येति भेदः (द)।

७५। उक्तिर्विशेषणैः साभिप्रायैः परिकरो मतः। (ध)

"येन सत्यपि योग्यत्वे विशेषश्चेन्न लभ्यते । सति हेतौ फलाभावे विशेषोक्तिर्हि युज्यते ॥"

अत्र लौकिके वाक्ये अलङ्कारशास्त्रप्रसिद्धविशेषोक्त्यलङ्कारव्यवहारसमारोपः ।

"प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ।
या दृष्टाऽस्मीति न पुनर्दर्शनमुपैति पुरुषस्य ॥"

इति सांख्यकारिकायां सांख्यशास्त्रप्रसिद्धे प्रकृतिरूपे वस्तुनि लौकिकलज्जाशीलस्त्रीरूपवस्तुनो व्यवहारसमारोपः ।

(ण) इदानीं सम्भाव्यमानेभ्योऽलङ्कारान्तरादिभ्यः समासोक्तेर्भेदं दर्शयितुमाह रूपक इति । अप्रकृतमप्रस्तुतम् उपमानीभूतं वस्त्वित्यर्थः, आत्मरूपसन्निवेशेन उपमेये स्वकीयरूपारोपेण, प्रकृतस्य प्रस्तुतस्य उपमेयस्येति यावत्, रूपं स्वभावम्, अवच्छादयति तिरोदधाति अप्रधानीकरोति उपमेयमप्रधानीकृत्य स्वयमेव क्रियादौ प्रधानत्वेनान्वेतीत्यर्थः । इह समासोक्तौ तु तदप्रकृतं वस्तु, स्वावस्थासमारोपेण निजव्यवहारारोपेण, अवच्छादितं रूपकवदेव तिरोहितं स्वरूपं यस्य तत् तादृशमेव, तं प्रकृतं पदार्थम्, पूर्वावस्थातः पूर्वावस्थापेक्षया विशेषयति उत्कर्षयतीति स्वमतम् ।

(त) तृतीयमतमाह अतएवेति । अत्र समासोक्तौ । स्वरूपस्याविवरणादेतदुक्तेरस्पष्टतया वदन्तीत्यनेनास्वरसः सूचितः ।

(थ) उपमेति । "हिममुक्तचन्द्ररुचिरः" इत्यादावुक्ते (२३८ पृष्ठे) उपमाध्वनौ । श्लेषे—"प्रवर्त्तयन् क्रियाः साध्वीः" इत्यादौ वक्ष्यमाणे च । न केवलं विशेषणस्य विशेष्यस्यापीत्यर्थः । विशेषणमात्रस्य केवलस्य विशेषणस्य ।

(द) अप्रस्तुतेति । गम्यत्वं व्यञ्जनया प्रतीयमानत्वम् । अप्रस्तुतस्य गम्यत्वमित्यन्वयः ।

(ध) समासोक्तिप्रयोजकगणशेषे विशेषणस्योपस्थितत्वात्तत्प्रयोजितमेव परिकरं नामालङ्कारं लक्षयति उक्तिरिति । साभिप्रायैर्विशेषाभिप्रायेण प्रयुक्तैरित्यर्थः, विशेषणैः, उक्तिर्विषयविशेषकथनं परिकरो नामालङ्कारो मतः । "यद्यप्यपुष्टार्थस्य दोषताभिधानात् तन्निराकरणेन पुष्टार्थस्वीकारः कृतः, तथाप्येकनिष्ठत्वेन बहूनां विशेषणानामेवमुपन्यासे वैचित्र्यमित्यलङ्कारमध्ये गणितः" इति काव्यप्रकाशकारः । अतएवात्र विशेषणैरिति बहुत्वं विवक्षितम् । तेन—

भिन्नभिन्नाभिप्रायेण बहुविशेषणप्रयोगः परिकर इति लक्षणं फलितम् ।

(१) अनवच्छादितं स्वरूपमेव इति क्वचित् पाठः । (२) इत्याहुः इति पाठान्तरम् ।

यथा—"अङ्गराज ! सेनापते ! द्रोणोपहासिन् ! कर्ण ! रक्षैनं भीमाद् दुःशासनम् ।" (न)

७६ । शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम् ॥ (प)

"स्वभावादेकार्थैः" इति शब्दश्लेषादव्यवच्छेदः (फ) । "वाचनम्" इति च ध्वनेः (ब) । उदाहरणम्—

तत्र विशेषणानां हेतुरूपत्वे काव्यलिङ्गं तदितररूपत्वे तु परिकरः सामान्यविशेषन्यायादित्यनयोर्भेदः । परिकीर्य्यते सर्वतः सार्थकविशेषणं प्रक्षिप्यते उपन्यस्यते अस्मिन्नर्थं इति परिकरः । परिपूर्वात् किरतेरधिकरणे अल् । कुवलयानन्दकारस्तु—

"साभिप्राये विशेष्ये तु भवेत् परिकराङ्कुरः । चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः ॥"

इति सोदाहरणं लक्षणमभिधाय परिकराङ्कुरं नामालङ्कारान्तरमङ्गीकरोति । काव्यप्रकाश-दर्पणकाराभ्यान्तु विशेषवैचित्र्याभावादेव तन्न गणितम् । केचित्तु "त्वयासदङ्कुर इवायं (परिकराङ्कुरः) परिकरान्नातिरिच्यते" इति वदन्ति ; तत्तुच्छम्, बहुविशेषणघटितलक्षणेन एकविशेष्यविशिष्टलक्ष्यस्य सर्वथैवास्पर्शात् ।

(न) अङ्गेति । वेणीसंहारनाटके भीमेन निहन्तुमाक्रम्यमाणं दुःशासनमवलोक्य कर्णं प्रति अश्वत्थाम्नः सरोषोपहासोक्तिरियम् । हे अङ्गराज ! एतेन न खलु भवान् यः कश्चित् साधारणो लोकः, किन्तु अङ्गदेशस्यैव राजेति महाशक्तिशालिनस्ते दुर्बलरक्षणमेकान्तमेवोचितमित्यभिप्रायो व्यज्यते । ननु तथापि उदासीनस्य पररक्षणे किं प्रयोजनमित्याह सेनापते इति । मामपहाय दुर्य्योधनेन सेनापतीकृतस्य भवतः सेनान्तर्गतस्यैव विशेषतश्च तस्यैव भ्रातुर्दुःशासनस्य रक्षणं सर्वथैवोचितमित्यभिप्रायः । नन्वहमत्र न समर्थोऽस्मीत्याह द्रोणोपहासिन्निति । तर्हि कथमर्जुनेन वध्यमानं जयद्रथं रक्षितुमशक्नुवन्तं मत्पितरं द्रोणमुपहसितवानसीत्यभिप्रायः ।

अतएवात्र अङ्गराजेत्यादीनां त्रयाणां विशेषणानां भिन्नभिन्नाभिप्रायेण प्रयोगात् परिकरः ।

(प) समासोक्तिप्रयोजकविशेषणमध्ये श्लेषस्यापि प्रस्तावात् शब्दश्लेषस्य च प्रागेव लक्षितत्वादवशिष्टमर्थश्लेषं लक्षयति शब्दैरिति । स्वभावं स्वत एव प्रवृत्तं व्यापारं स्वाभाविकीमभिधाशक्तिमाश्रित्येति स्वभावात्, एकः अर्थो येषां तैः अभिधया एकमात्रार्थप्रतिपादकैरित्यर्थः, शब्दैः, अनेकार्थस्य वाचनं यथासम्भवं वृत्त्या एकार्थस्य परिभाषादिना चापरार्थस्य प्रतिपादनम्, श्लेषः अर्थालङ्कारप्रकरणादर्थश्लेषो नामालङ्कारो मतः । एतेन "वाचनमभिधालक्षणाभ्यां प्रतिपादनम्" इति रामचरणव्याख्यानमपास्तम्, श्लेषस्थले अभिधयैव युगपदनेकार्थाभिधानस्याङ्गीकारेणानुपपत्तिलेशाभावात् प्रदर्शितलक्ष्ये मुख्यार्थबाधाभावेन लक्षणाया एवासम्भवात्, "द्वावपि राजसूर्यौ वाच्यौ" इति वृत्तिपङ्क्तौ "द्वावप्यर्कभूपौ वाच्यौ" इति काव्यप्रकाशोक्तौ च वाच्यावित्यनेन दुर्निवारविरोधाच्च । अत्र शब्दैरिति बहुत्वमविवक्षितम्, ईदृशैकशब्दप्रयोगस्थलेऽपि ईदृशवैचित्र्यसम्भवात् । तेन—

अभिधया एकमात्रार्थबोधकशब्देन अनेकार्थबोधनमर्थश्लेष इति लक्षणं पर्य्यवसितम् ।

"प्रवर्त्तयन् क्रियाः साध्वीर्मालिन्यं हरितां हरन् ।
महसा भूयसा दीप्तो विराजति विभाकरः ॥" (भ)

अत्र प्रकरणादिनियमाभावात् द्वावपि राजसूर्य्यौ वाच्यौ (म) ।

७७ । क्वचिद्विशेषः सामान्यात् सामान्यं वा विशेषतः ।
कार्य्यान्निमित्तं कार्य्यञ्च हेतोरथ समात् समम् ॥

(फ) "स्वभावादिकार्थैः" इत्यस्य व्यावृत्तिमुखेन शब्दश्लेषादस्य भेदमाह स्वभावादिति । व्यवच्छेदः पर व्यावृत्तिः । तथा च अनेकार्थैः शब्दैरनेकार्थाभिधाने शब्दश्लेषः, एकार्थैः शब्दैः शक्तिवैचित्र्यादने-कार्थाभिधाने अर्थश्लेष इत्यनयोर्भेद इति तूक्तमेव ।

(ब) अथ तथापि बोधनमित्यनभिधाय कथं विशिष्य वाचनमित्यभिहितमित्याह वाचनमिति । ध्वने-र्व्यवच्छेद इति पूर्वेणान्वयः । तथा च द्वितीयार्थस्याप्यभिधयैव प्रतिपादने अर्थश्लेषः, व्यञ्जनया प्रतिपादने तु ध्वनिरिति भावः ।

(भ) प्रवर्त्तयन्निति । उद्भटविधया केनचिन्निर्म्मितमिदं पद्यम् । विभाकरो नाम कश्चन राजा, साध्वीः साधारणहितकरत्वेन पवित्राः, क्रियाः सेतुकूपनिर्म्माणादीनि कार्य्याणि, प्रवर्त्तयन् राज्यमध्ये निष्पादयन्, हरितां दिशां सर्वदिग्वर्त्तिनीनां प्रजानामित्यर्थः, मालिन्यं दैन्यादिना मुखकालिमानम्, हरन् अन्न-वस्त्रदानादिना विनाशयन्, तथा भूयसा महसा प्रभूतेन प्रभावेण दीप्तः सर्वत्र प्रकाशमानः सन् विराजति वर्त्तते ।

अन्यत्र तु विभाकरः सूर्य्यः, साध्वीः क्रिया यज्ञादीनि सत्कर्म्माणि, प्रवर्त्तयन् आत्मन उदयेन आरम्भयन्, हरितां दिशां मालिन्यमन्धकारकृतमलिनताम्, हरन् अन्धकारनाशेन नाशयन्, तथा भूयसा महसा प्रचुरतरेण तेजसा, दीप्तो ज्वलितः सन्, विराजति आकाशे प्रकाशते ।

अत्र प्रमाणं यथा प्रायश्चित्ततत्त्वधृतं विष्णुपुराणम्—

"सत्कर्म्मयोग्यो न जनो नैवापः शुद्धिकारणम् । यस्मिन्ननुदिते तस्मै नमो देवाय भास्वते ॥
स्पृष्टो यदंशुभिर्लोकः क्रियायोग्योऽभिजायते । पवित्रताकारणाय तस्मै शुद्धात्मने नमः ॥"

(म) उदाहृते लक्षणं प्रवर्त्तयितुमाह अत्रेति । प्रकरणादिनियमाभावात् "संयोगो विप्रयोगश्च—" इत्यादिप्रागुक्ताभिधानियामकस्यान्यस्याभावादित्यर्थः । वाच्यौ अभिधया प्रतिपाद्यौ । अत्रायमाशयः— "भास्वराहस्करब्रध्न-प्रभाकरविभाकराः" इत्यमरकोषप्रामाण्यात् विभाकरशब्दस्य सूर्य्ये आजानिकः सङ्केत इत्यभिधयैव विभाकरशब्दः सूर्य्यस्य वाचकः ; "ततश्च नाम कुर्व्वीत पितैव दशमेऽहनि" इति स्मृत्या विभाकर इति राज्ञः पित्रादिकृतं नामेति विभाकरशब्दस्य राजनि चाधुनिकः सङ्केतः, तेन च विभाकरशब्दो राज्ञोऽपि वाचक एवेति । न चैवं शब्दश्लेष एवेति वाच्यम्, उभयस्यैवार्थस्य समानप्रसिद्धिसत्त्व एव शब्दश्लेषाङ्गीकारात् अत्र तु राजरूपार्थस्य पित्रादिमात्रसङ्केतितत्वेन सूर्य्यार्थवत् प्रसिद्धिविरहात् । अत्रापि वेदसन्नोपसदा "लोके-नीत्रतिमायाति लोकेनाप्यधोगतिम्" इत्यादिकं शब्दश्लेषप्रकरणीयग्रन्थकारेङ्गितानुसारेण तर्कवागीशदत्त-मेवोदाहरणं द्रष्टव्यम् ।

अप्रस्तुतात् प्रस्तुतञ्चेद्गम्यते पञ्चधा ततः ।
अप्रस्तुतप्रशंसा स्यात्—(य)

क्रमेणोदाहरणम्—

"पादाहतं यदुत्थाय मूर्द्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥" (र)

अत्र अस्मदपेक्षया रजोऽपि वरमिति विशेषे प्रस्तुते सामान्यमभिहितम् (ल) ।

"स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ॥" (व)

(य) ननु प्रस्तुताभिधानेनाप्रस्तुतप्रतीतौ समासोक्तिरिव वैपरीत्येन अप्रस्तुताभिधानेन प्रस्तुतप्रतीतौ कश्चिदलङ्कारो भवति न वेत्याकाङ्क्षायामप्रस्तुतप्रशंसालङ्कारं लक्षयति क्वचिदिति । अत्र अप्रस्तुतादिति विशेषणं सामान्यादित्यादिपञ्चम्यन्तसकलविशेष्येषु प्रस्तुतमिति । विशेषणञ्च यथासम्भवं लिङ्गव्यत्ययेन विशेष इत्यादिसमस्तप्रथमान्तविशेष्येषु अन्वेति । तथा अप्रस्तुतादप्रस्तुताभिधानादित्यर्थः । ततश्च—

अप्रस्तुताभिधानात् प्रस्तुतावगतिरप्रस्तुतप्रशंसेति सामान्यलक्षणं फलितम् ।

अस्या अप्यलङ्कारान्तरादिभ्यो भेदौ वृत्तावेव वक्ष्यते । तथा च क्वचिदप्रस्तुतात् सामान्यात् प्रस्तुतो विशेषश्चेद्गम्यते, क्वचिद्वा अप्रस्तुताद्विशेषतो विशेषात् प्रस्तुतं सामान्यञ्चेद्गम्यते, क्वचिच्च अप्रस्तुतात् कार्य्यात् प्रस्तुतं निमित्तं कारणञ्चेद्गम्यते, क्वचिच्च अप्रस्तुताद्धेतोः कारणात् प्रस्तुतं कार्य्यञ्चेद्गम्यते, अथवा क्वचिदप्रस्तुतात् समात् तुल्यरूपाद्वस्तुनः प्रस्तुतं समं तुल्यरूपं वस्तु चेद्गम्यते प्रतीयते, ततस्तदा पञ्चधा पञ्चप्रकारा अप्रस्तुतप्रशंसा नामालङ्कारः स्यात् ।

अप्रस्तुतस्य वस्तुनः प्रशंसा प्रशंसनवत् प्रकृष्टकथनवत् व्यञ्जनया स्पष्टा सूचना अप्रस्तुतप्रशंसेति व्युत्पत्तिः ।

(र) अप्रस्तुतसामान्याभिधानात् प्रस्तुतविशेषप्रतीतावुदाहरति पादेति । शिशुपालवधद्वितीयसर्गे बलरामस्योक्तिरियम् । यत् रजो भूतलधूलिः, पादेन चरणेन आहतं सत्, उत्थाय उत्पत्य मूर्द्धानम् आहन्तुरेव मस्तकम्, अधिरोहति ; तत् रजो धूलिः, अचेतनमपीति भावः । अपमाने सञ्जातेऽपि स्वस्थादेव अविचलितादेव देहिनश्चेतनपदार्थात् वरं श्रेष्ठम् ।

(ल) अत्रेति । शिशुपालेनावमानितस्यापि यादवगणस्य निरुद्यमतामुपक्रम्य "पादाहतम्" इत्यादेरभिधानात् देहिविशेषभूतस्य यादवगणस्य प्रस्तुतत्वम्, देहिसामान्यस्य चाप्रस्तुतत्वमवगन्तव्यम् । तथा चाप्रस्तुतदेहिसामान्यात् प्रस्तुतस्य देहिविशेषभूत-यादवगणस्य प्रतीतेरप्रस्तुतप्रशंसा । एवमन्यत्राप्यूह्यम् । उपमेयं देहिनमपेक्ष्य उपमानस्य रजस आधिक्यप्रतिपादनात् मल्लिनाथेन तु व्यतिरेक उक्तः । तेनोभयोः सङ्करः ।

(व) अप्रस्तुतविशेषाभिधानात् प्रस्तुतसामान्यप्रतीतौ प्रदर्शयति स्रगियमिति । रघुवंशाष्टमसर्गस्थ-

अत्र ईश्वरेच्छया क्वचिदहितकारिणोऽपि हितकारित्वं हितकारिणोऽप्यहितकारित्वमिति सामान्ये प्रस्तुते विशेषोऽभिहितः (ग)। एवञ्चात्र अप्रस्तुतप्रशंसामूलोऽर्थान्तरन्यासः (घ)। दृष्टान्ते प्रख्यातमेव वस्तु प्रतिबिम्बत्वेनोपादीयते, इह तु विषामृतयोरमृतविषीभावस्याप्रसिद्धेर्न तस्य सद्भावः (ङ)।

"इन्दुर्लिप्त इवाञ्जनेन जड़िता दृष्टिर्मृगीणामिव
प्रम्लानारुणिमेव विद्रुमदलं श्यामेव हेमप्रभा।
कार्कश्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतं
सीतायाः पुरतश्च हन्त! शिखिनां वर्हाः सगर्हा इव॥" (च)

लिदं पद्यम्। इयं स्रक् पुष्पमाला, यदि जीवितापहा इन्दुमत्या जीवनविनाशिनी भवेत्, तदा ममापि हृदये वक्षसि निहिता स्थापिता सती, किं कथं मां न हन्ति। भां ज्ञातमित्याह विषमिति। ईश्वरस्येच्छया विषमपि क्वचिदमृतं भवेत्, क्वचिद्वा अमृतमपि विषं भवेत्। ईश्वरेच्छावशादेव पुष्पमालाताड़नेनापि इन्दुमती निहता, न पुनः पुष्पमालाया एव निहननशक्तिः स्वाभाविकीति भावः।

(ग) अत्रेति। अहितकारिणोऽपि पदार्थस्य, हितकारित्वं भवतीति शेषः। एवमुत्तरत्रापि। सामान्ये अहितकारि-हितकारि-साधारणे, प्रस्तुते प्रयोगायाभिमतत्वेन प्रक्रान्ते। औचित्यादेवात्र सामान्यस्यैव प्रस्तुतत्वावधारणमिति ध्येयम्।

(घ) एवञ्चेति। अप्रस्तुताद्विशेषात् प्रस्तुतसामान्यस्य प्रतीतेरप्रस्तुतप्रशंसया सामान्यस्य बुद्धावुपस्थितत्वे चेत्यर्थः। अर्थान्तरन्यासः सामान्येन विशेषसमर्थनरूप इत्याशयः। एवञ्चानयोरङ्गाङ्गिभावेन सङ्कर इति बोध्यम्।

(ङ) नन्वभिधासापेक्षया व्यञ्जनया सामान्यप्रत्यायनात् पूर्वमेव तन्निरपेक्षया प्रबलया अभिधया विशेषस्यैव प्रत्यायितत्वात् सामान्यविशेषभावाभावे चार्थान्तरन्यासस्यानङ्गीकारादत्र दृष्टान्त एव भवितुमर्हति, तत् कथमर्थान्तरन्यास इत्याह दृष्टान्त इति। प्रख्यातं प्रसिद्धम्। प्रतिबिम्बत्वेन उपमानत्वेन। इह तु "स्रगियम्" इत्यादौ तु। तस्य दृष्टान्तस्य, सद्भावः प्रसङ्गः। एवञ्च पारिशेष्यात् व्यञ्जनया सामान्यस्य प्रतीतौ सत्यां सामान्यविशेषभावोपस्थितेरर्थान्तरन्यास एवेति भावः।

(च) अप्रस्तुतकार्य्याभिधानात् प्रस्तुतकारणप्रतीतावुदाहरति इन्दुरिति। सीतायाः सौन्दर्य्यमुपक्रम्य कस्यचिदुक्तिरियम्। सीतायाः पुरतः अग्रतः समीपे इत्यर्थः, इन्दुश्चन्द्रः अञ्जनेन कज्जलेन लिप्त इव विभातीति शेषः। एवमन्यत्रापि। इति मुखसौन्दर्य्यवर्णनम्। मृगीणां हरिणीनां दृष्टिः, जड़िता सज्जासङ्कुचितेव। नयनशोभावर्णनेयम्। विद्रुमदलं प्रवालखण्डम्, प्रम्लानो मलिनीभूतः अरुणिमा लौहित्यं यस्य तत्तथोक्तमिव। अधरलौहित्यप्रशंसेयम्। हेमप्रभा स्वर्णकान्तिः, श्यामा श्यामलवर्णेव। गात्रवर्णस्य वर्णनेयम्। कोकिलवधूनां कोकिलपक्षिणीनां कण्ठेषु स्वरेषु च, कलया लेशेन कार्कश्यं वाक्यशतेव प्रस्तुतं विधिना

अत्र सम्भाव्यमानेभ्य इन्द्वादिगताञ्जनलिप्तत्वादिभ्यः कार्य्येभ्यो वदनादिगतसौन्दर्य्यविशेषरूपं प्रस्तुतं कारणं प्रतीयते (च)।

"गच्छामीति मयोक्तया मृगदृशा निश्वासमुद्रेकिणं
त्यक्त्वा तिर्य्यगवेक्ष्य बाष्पकलुषेणैकेन मां चक्षुषा।
अद्य प्रेम मदर्पितं प्रियसखीवृन्दे त्वया बध्यता-
मित्थं स्नेहविवर्द्धितो मृगशिशुः सोत्प्रासमाभाषितः॥" (क)

अत्र कस्यचिदगमनरूपे कार्य्ये कारणमभिहितम् (ख)।

तुल्ये प्रस्तुते तुल्याभिधाने च द्विधा श्लेषमूला सादृश्यमात्रमूला च। श्लेषमूलापि समासोक्तिवद्विशेषणमात्रश्लेषे श्लेषवद्विशेष्यस्यापि श्लेषे भवतीति द्विधा (ग)। क्रमेण यथा—

निर्म्मितम्। इयन्तु कण्ठस्वरप्रशंसा। तया शिखिनां मयूराणां बर्हाः पुच्छानि सगर्हाः कुत्सिता इव। केशपाशप्रशंसेयम्। हन्तेति हर्षे।

(च) अत्रेति। सम्भाव्यमानेभ्य उत्प्रेक्षाविषयीक्रियमाणेभ्यः। कार्य्येभ्यः अप्रस्तुतेभ्य इति शेषः। अत्रायमभिप्रायः—सीतायाः सौन्दर्य्यातिशयमुपक्रम्यैव केनचिदेतत्पद्यस्याभिहितत्वात् तदीयवदनादिगतः सौन्दर्य्यातिशय एवात्र प्रस्तुतः; तत्सौन्दर्य्यातिशयवशादेव च चन्द्रादिष्वञ्जनलिप्तत्वादिसम्भावनाः सञ्जाता इति तासां कार्य्यत्वमप्रस्तुतत्वञ्च, तत्सौन्दर्य्यातिशयस्य च कारणत्वं प्रस्तुतत्वञ्चेति। एवञ्चात्रोत्प्रेक्षामूला अप्रस्तुतप्रशंसेति बोध्यम्।

(क) अप्रस्तुतकारणाभिधानात् प्रस्तुतकार्य्यप्रतीतौ दर्शयति गच्छामीति। विदेशं गन्तुमुद्यतोऽपि कथं न गत इति पृच्छन्तं सुहृदं प्रति केनचिदुक्तमिदम्। 'अहं गच्छामि' इति मया उक्तया विदेशगमनायानुमतिं प्रार्थितया मृगदृशा हरिणनयनया मत्प्रियया, उद्रेकिणमत्यन्तविषादोद्रेकसूचकम्, निश्वासं त्यक्त्वा, बाष्पकलुषेण सहसैवोत्पन्नाश्रुजलाविलेन, एकेन चक्षुषा मां तिर्य्यक् वक्रम्, अवेक्ष्य अवलोक्य हे मृगशिशो! त्वया मयि अर्पितम् इयन्तं कालं यावत् दत्तम्, प्रेम स्नेहः, अद्य प्रियसखीवृन्दे बध्यतां स्थाप्यताम्, इत्थमनेन प्रकारेण स्नेहेन विवर्द्धितः परिपोषितो मृगशिशुः, सोत्प्रासं सेषद्धास्यम्, आभाषित उक्तः। इतः परं प्रियविच्छेदेनाहं मरिष्याम्येवेत्याशयः।

(ख) अत्रेति। अगमनरूपे गृह एवावस्थितिरूपे कार्य्ये प्रस्तुते इति शेषः। कारणमप्रस्तुतम् "अद्य प्रेम" इत्यादिरूपं मरणाभिप्रायव्यञ्जकवाक्यमित्यर्थः। तथा च गन्तुमुद्यतस्याप्यगमनं प्रति प्रियाया मरणाभिप्रायप्रकाशकवाक्यमेव हेतुरिति प्रस्तुतस्यागमनस्य कार्य्यत्वम्, अप्रस्तुतस्य तादृशवाक्यस्य च कारणत्वमित्याशयः। एवञ्च तादृशवाक्याभिधानादेव अगमनं जातमिति प्रतीतेरप्रस्तुतप्रशंसेति बोध्यम्।

(ग) इदानीमप्रस्तुतात् समात् प्रस्तुतस्य समस्य प्रतीतावुदाहर्त्तुं तद्विभजते तुल्ये इति। तुल्ये वस्तुनि। तुल्यस्य अप्रस्तुतस्य वस्तुनः अभिधाने इत्यर्थः। विशेष्यस्यापीत्यपिशब्दात् विशेषणस्यापीत्यर्थः।

"सहकारः सदामोदो वसन्तश्रीसमन्वितः ।
समुज्ज्वलरुचिः श्रीमान् प्रभूतोत्कलिकाकुलः ॥" (घ)

अत्र विशेषणमात्रश्लेषवशादप्रस्तुतात् सहकारात् कस्यचित् प्रस्तुतस्य नायकस्य प्रतीतिः (ङ) ।

"पुंस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि
यायात् यदि प्रणयने न महानपि स्यात् ।
अभ्युद्धरेत्तदपि विश्वमितीदृशीयं
केनापि दिक् प्रकटिता पुरुषोत्तमेन ॥" (च)

अत्र पुरुषोत्तमपदेन विशेष्येणापि श्लिष्टेन प्रचुरप्रसिद्ध्या प्रथमं विष्णुरेव बोध्यते । तेन वर्णनीयः कश्चित् पुरुषः प्रतीयते (छ) ।

एतेन तुल्यात्तुल्यप्रतीतौ सादृश्यमात्रमूलत्वे एकविधा श्लेषमूलत्वे च द्विविधेति समुदायेन त्रिविधेति बोध्यम् ।

(घ) केवलविशेषणश्लेषे उदाहरति सहकार इति । भाविनी वरस्यावस्थां पृच्छन्तीं नायिकां प्रति चूततरुवर्णनच्छलेन तत्सख्या वरवर्णनेयम् । सदा सर्वदैव आमोदः कुसुमविकाशात् सौरभं दैन्याभावात् प्रमोदश्च यस्य स सदामोदः ; वसन्तश्रिया वसन्तकालस्वभावादुत्पन्ननूतनपल्लवादिशोभया समन्वितः, अन्यत्र तु वसन्त इव श्रिया स्वाभाविकसौन्दर्य्येण समन्वितः ; अतएव समुज्ज्वला रुचिः सर्वप्रकारा कान्तिर्यस्य सः, अन्यत्र तु समुज्ज्वले सम्यक् शृङ्गारे रुचिः स्पृहा यस्य सः ; "शृङ्गारः शुचिरुज्ज्वलः" इत्यमरः, श्रीमान् कुसुमसम्पत्तिमान् धनसम्पत्तिमांश्च ; तथा प्रभूताभिर्बहुलाभिः उत्कलिकाभिः उत्पन्नकोरकैः सुरतोत्कण्ठाभिश्च आकुलो व्याप्तः अधीरश्च ; सहकार आम्रवृक्षः ।

(ङ) अत्रेति । मात्रपदेन सहकार इति विशेष्यस्य तु न श्लेष इति दर्शितम् ।

(च) विशेष्यस्यापि श्लेषे प्रदर्शयति पुंस्त्वादिति । भल्लटशतके राजवर्णनामुपक्रम्य पठितोऽयं श्लोकः । यदि पुंस्त्वात् पुरुषभावादपि प्रविचलेत् स्खलितो भवेत् स्त्री अपि स्यादित्यर्थः, अन्यत्र तु पुरुषत्वहीनोऽपि यदि स्यात् ; यदि अधः पातालमपि नरकमपि च यायात् गच्छेत् ; यदि च प्रणयने परान्तिके प्रार्थनायां महानपि न स्यात् क्षुद्रोऽपि स्यात् ; तदपि तथापि विश्वं पृथिवीं निजराज्यञ्च अभ्युद्धरेत् असुराधिकारात् प्रलयजलधिजलाच्च, अन्यत्र तु शत्रुहस्तादिति भावः । अतएव इतीदृशी एवम्प्रकारा इयं दिक् दृढ़प्रतिज्ञतारूपा रीतिः, केनापि अनिर्वचनीयेन, पुरुषोत्तमेन विष्णुना, पुरुषश्रेष्ठेन केनचित् राज्ञा च प्रकटिता प्रकाशिता ।

(छ) अत्रेति । न केवलं पुंस्त्वादित्यादिविशेषणेन, किन्तु पुरुषोत्तमेनेति विशेष्येणापीत्यर्थः । प्रचुरप्रसिद्ध्या भूरिप्रयोगादिति भावः । विष्णुरेव अप्रस्तुत इति शेषः । वर्णनीयो वर्णनोपक्रमेण प्रस्तुतः । अत्र प्रस्तुतस्यैव राज्ञो व्यङ्ग्यत्वादुपमानत्वाविवक्षणाच्च नोपमाध्वनिः । उभयोः प्रस्तुतत्वाभावाच्च न श्लेष इति ज्ञेयम् ।

सादृश्यमात्रमूला यथा—

"एकः कपोतपोतः शतशः श्येनाः क्षुधाभिधावन्ति ।
अम्बरमावृतिशून्यं हर ! हर ! (१) शरणं विधेः करुणा ॥" (ज)

अत्र कपोतादप्रस्तुतात् कश्चित् प्रस्तुतः प्रतीयते (झ) ।

इयञ्च क्वचिद्वैधर्म्येणापि भवति । यथा—

"धन्याः खलु वने वाताः कह्लारस्पर्शशीतलाः ।
राममिन्दीवरश्यामं ये स्पृशन्त्यनिवारिताः ॥" (ञ)

अत्र वाता धन्याः, अहमधन्य इति वैधर्म्येण प्रस्तुतः प्रतीयते (ट) ।

वाच्यस्य सम्भवासम्भवोभयरूपतया त्रिप्रकारेयम् (ठ) । तत्र सम्भवे उक्तोदाहरणान्येव (ड) । असम्भवे (ढ) यथा—

(ज) एक इति । बहुभिः शत्रुभिराक्रान्तमसहायमेकं राजकुमारमुपक्रम्य हताशहृदयस्य कस्यचिदुक्तिरियम् । एको निःसहायः, कपोतपोतः पारावतशिशुः ; इतश्च शतशो बहुशतसंख्यकाः, श्येनाख्याः पक्षिणः, क्षुधा क्षुधया अभिधावन्ति त भक्षयितुमिति शेषः । तर्हि आकाशस्य कस्मिंश्चिदंशे पलायतामित्याह अम्बरमिति । अम्बरमाकाशम्, आवृतिशून्यम् आवरणरहितम् ; अतः पलायनसम्भावनापि नास्तीति भावः । हर ! हर ! शिव ! शिव ! विधेः करुणा विधातुर्दयैव शरणं रक्षित्री ।

(झ) अत्रेति । कश्चिन्निःसहायो बालक इत्यर्थः ।

(ञ) धन्या इति । कह्लाराणां स्वभावशीतलानां रक्तोत्पलानां स्पर्शेन शीतलाः, वने वाता वन्यवायवः खलु धन्याः । ये वाताः अनिवारिताः केनाप्यप्रतिरुद्धा सन्तः, इन्दीवरश्यामं नीलोत्पलवत् श्यामलं रामं स्पृशन्ति ।

(ट) अत्रेति । वैधर्म्येण धन्यत्वापेक्षया अधन्यत्वरूपविपरीतधर्मविशिष्टत्वेनेत्यर्थः । प्रस्तुत इति । रामविच्छेदेनाधन्यमात्मानमुपक्रम्य दशरथेनास्योक्तत्वादिति भावः । एवञ्च अप्रस्तुतात् समात् प्रस्तुतस्य समस्य प्रतीतिरूपेयमप्रस्तुतप्रशंसेति बोध्यम् ।

(ठ) सर्वप्रकारामेवाप्रस्तुतप्रशंसां पुनरपि त्रिविधत्वेन विभजते वाच्यस्येति । वाच्यस्य वाच्यार्थस्य उक्तिसम्भवरूपत्वेन एकप्रकारा, उक्त्यसम्भवरूपत्वेन अन्यप्रकारा, उक्तेः सम्भवासम्भवोभयरूपत्वेन चापरप्रकारा, इति त्रिप्रकारा ।

(ड) तत्रेति । तासु त्रिप्रकारासु मध्ये इत्यर्थः । सम्भवे मनुष्यवक्तृकत्वादिव वाक्यार्थस्योक्तिसम्भवस्थले इत्यर्थः, उक्तोदाहरणानि "पादाहतम्" इत्यादीनि ।

(ढ) असम्भव इति । वाक्यार्थोक्तेरिति शेषः ।

---

(१) हरि हरि इति क्वचित् पाठः ।

"कोकिलोऽहं भवान् काकः समानः कालिमावयोः ।
अन्तरं कथयिष्यन्ति काकलीकोविदाः पुनः ॥" (ण)

अत्र काककोकिलयोर्वाक्योपवाक्यं (१) प्रस्तुताध्यारोपणं विना असम्भवि (त)। उभयरूपत्वे (थ) यथा—

"अन्तश्छिद्राणि भूयांसि कण्टका बहवो बहिः ।
कथं कमलनालस्य मा भूवन् भङ्गुरा गुणाः ॥" (द)

अत्र प्रस्तुतस्य कस्यचिदध्यारोपणं विना कमलनालान्तश्छिद्राणां गुणभङ्गुरीकरणे हेतुत्वमसम्भवि, अन्येषान्तु सम्भवीत्युभयरूपत्वम् (ध)।

अस्याश्च समासोक्तिवत् व्यवहारसमारोपप्राणत्वाच्छ्लेषभित्तिमूलाद्वस्तु-

---

(ण) कोकिल इति। आत्मसमानतया स्वर्धमानं कञ्चिदुद्दिश्य केनचिदुक्तमिदम्। अहं कोकिलः ...यं काकः, आवयोः कालिमा कालवर्णत्वं समान एव ; पुनः किन्तु काकलीकोविदा मन्द मधुरास्फुट-...रवाभिज्ञा जनाः, अन्तरं नितान्तकर्कशराविणा त्वया सार्द्धं मम वैषम्यम्, कथयिष्यन्ति। अतीवमधुर-...विणा मया सह नितान्तकर्कशराविणस्तव महदेव वैषम्यमिति कुतो मत्समानत्वे तव स्पर्द्धेति भावः।

(त) अत्र अप्रस्तुतात् कोकिलकाकरूपसमद्वयात् प्रस्तुतस्य उत्कृष्टापकृष्टजनरूपासमद्वयस्य प्रतीते-...प्रस्तुतप्रशंसा स्पष्टैवेति केवलमेतदुक्तेरसम्भवत्वं दर्शयितुमाह अत्रेति। वाक्योपवाक्यं वादप्रतिवादः। ...स्तुतस्य एतदुक्तिसमर्थस्य जनस्य, अध्यारोपणं अप्रस्तुते वक्तरि कोकिले आरोपम्। असम्भवि असम्भवम्, ...विमावस्य कोकिलस्य ईदृशोक्तिसामर्थ्याभावादिति भावः।

(थ) उभयेति। उभयरूपत्वे वाक्यार्थस्य सम्भवासम्भवोभयप्रकारत्वे।

(द) अन्तरिति। आत्मदोषेण शत्रुव्यवहारेण च विनष्टयशसं कञ्चिदुद्दिश्य कस्यचिदुक्तिरियम्। अन्तः ...अन्तरे, भूयांसि बहुतराणि, छिद्राणि रन्ध्राणि कामक्रोधदुरभिसन्धिप्रभृतयो दोषाश्च वर्त्तन्ते ; बहिर्देशे ...इव: कण्टकास्तीक्ष्णाग्रा अवयवाः शुद्रशत्रवश्च वर्त्तन्ते ; अतएव कमलनालस्य पद्मनिम्नस्थदण्डस्य गुणाः ...अन्तर्गतसूत्राणि दयाधर्म्मादिगुणजनितयशांसि च, कथं भङ्गुराश्छेदनशीला विलुप्तस्वभावाश्च मा भूवन् न ...वेयुः ; अपि तु भवेयुरेवेत्यर्थः।

(ध) अत्रापि अप्रस्तुतात् समात् कमलनालात् प्रस्तुतस्य कस्यचित् समस्य प्रतीतेरप्रस्तुतप्रशंसा ...स्पष्टैवेति केवलं वाक्यार्थस्य सम्भवासम्भवोभयरूपत्वं दर्शयितुमाह अत्रेति। कस्यचित् कामक्रोधादि-...दोषवतो जनस्य, अध्यारोपणं कमलनाले आरोपम्। गुणभङ्गुरीकरणे अन्तर्गतसूत्रच्छेदने, हेतुत्वं तात्पर्य्या-...र्थं कारणत्वम्, असम्भवि असम्भवम् ; छिद्राणां शून्यमात्ररूपतया निष्क्रियत्वेन गुणच्छेदने योग्यत्वा-...भावादिति भावः। अन्येषां कण्टकानान्तु, सम्भवि गुणभङ्गुरीकरणे हेतुत्वं सम्भवपरम्, प्रस्तुताध्यारोपणं ...विनापीति शेषः ; मानुषादिचेष्टया अन्तर्गतसूत्राणां बहिष्करणादिना योग्यत्वादिति भावः।

---

(१) वाक्यो वाक्यमिति पाठान्तरम्।

ध्वनेर्भेदः (न)। उपमाध्वनावप्रस्तुतस्य व्यङ्ग्यत्वम् (प)। एवं समासोक्तौ (फ)। श्लेषेऽपि द्वयोरपि वाच्यत्वम् (ब)।

(न) इदानीं ध्वनेरलङ्कारान्तराच्चास्या भेदं दर्शयितुमाह अस्याश्चेति। श्लेषेण समादप्रस्तुतात् प्रस्तुतस्य समस्य प्रतीतिरूपाया अप्रस्तुतप्रशंसायाश्चेत्यर्थः। व्यवहारसमारोप एव प्राणो जीवनं स्वरूपं यस्यास्तस्या भावस्तस्मात् व्यवहारसमारोपघटितत्वादित्यर्थः। तथा च "पथिक ! न एत्यसत्यरस्मिन्" इत्यादिगतशब्दशक्तिमूलवस्तुध्वनौ व्यवहारसमारोपप्रतीतिर्नास्ति "सहकारः सदामोदः" इत्यादौ तु सा अस्तीत्युभयोर्भेद इति भावः।

(प) ननु तर्हि उपमाध्वनौ व्यवहारसमारोपप्रतीतिसत्त्वेन सह अस्याः को भेद इत्याह उपमेति। अप्रस्तुतस्य "हिमसुक्तचन्द्ररुचिरः" इत्यादौ वसन्तादेर्व्यङ्ग्यत्वम्, इह तु "सहकारः सदामोदः" इत्यादौ प्रस्तुतस्यैव नायकादेर्व्यङ्ग्यत्वमित्युभयोर्भेद इत्याशयः।

(फ) अथ समासोक्तेरपि व्यवहारसमारोपप्राणत्वात्तया सहास्याः को भेद इत्याह एवमिति। समासोक्तावप्येवम् उपमाध्वनिवदेव अप्रस्तुतस्य व्यङ्ग्यत्वमित्यर्थः। तथा च समासोक्तावपि प्रस्तुतस्यैव व्यङ्ग्यत्वम्, इह तु प्रस्तुतस्य व्यङ्ग्यत्वमित्युभयोर्भेद इति भावः। यथा समासोक्तिप्रकरणेऽपि वृत्तावेवोक्तम्— "अप्रस्तुतप्रशंसायां प्रस्तुतस्य गम्यत्वम्, इह तु अप्रस्तुतस्य" इति।

(ब) अथ तदा श्लेषेऽपि व्यवहारारोपप्रतीतिसत्त्वेन समत्वया अभेदापत्तिरित्याह श्लेषेऽपीति। अपि-शब्दार्थः। द्वयोरपि पक्षयोः, वाच्यत्वम्, "श्लिष्टैः पदैरनेकार्थाभिधाने" इत्युक्तेः "श्लेषोऽनेकार्थवाचनम्" इत्युक्तेश्च अभिधयैव बोध्यत्वं नियतमिति शेषः; इह तु प्रस्तुतपक्षस्य व्यङ्ग्यत्वमेव नियतमिति श्लेषादस्या भेद इत्याशयः। किञ्च श्लेषे न व्यवहारारोपप्रतीतिरपि स्पष्टा।

अथ अप्रस्तुतप्रशंसाभेदसङ्कलनम्।

उक्तेः सम्भवरूपत्वे	अप्रस्तुतात् सामान्यात् प्रस्तुतविशेषप्रतीतौ	...	१
	अप्रस्तुताद्विशेषात् प्रस्तुतसामान्यप्रतीतौ	...	१
	अप्रस्तुतात् कार्य्यात् प्रस्तुतकारणप्रतीतौ	...	१
	अप्रस्तुतात् कारणात् प्रस्तुतकार्य्यप्रतीतौ	...	१
	सादृश्यमात्रमूलत्वे अप्रस्तुतात् समात् प्रस्तुतसमप्रतीतौ		१
	विशेषणमात्रश्लेषे अप्रस्तुतात् समात् प्रस्तुतसमप्रतीतौ		१
	विशेष्यविशेषणोभयश्लेषे अप्रस्तुतात् समात् प्रस्तुतसमप्रतीतौ		१
			७
उक्तेरसम्भवरूपत्वे—उक्तविधा एव सप्त	...	...	७
उक्तेः सम्भवासम्भवोभयरूपत्वे—उक्तविधा एव सप्त		...	७
			२१

वैधर्म्येण भेदस्तु क्वचिदेव सम्भवतीति साधर्म्यवैधर्म्याभ्यां सर्वं द्वैविध्यं न गणितम्। एवञ्च कारिकायां "पञ्चधा" इति पञ्चविधत्वोक्तिः प्रधानाभिप्रायेणेति बोध्यम्।

७८। उक्ता व्याजस्तुतिः पुनः॥
निन्दास्तुतिभ्यां वाच्याभ्यां गम्यत्वे स्तुतिनिन्दयोः। (भ)

निन्दया स्तुतेर्गम्यत्वे व्याजेन स्तुतिरिति व्युत्पत्त्या व्याजस्तुतिः, स्तुत्या निन्दाया गम्यत्वे व्याजरूपा स्तुतिः (म)। क्रमेण यथा—

"स्तनयुगमुक्ताभरणाः कण्टककलिताङ्गयष्टयो देव!।
त्वयि कुपितेऽपि प्रागिव विश्वस्ता रिपुस्त्रियो जाताः॥" (य)

इदं मम।

"व्याजस्तुतिस्तव पयोद! मयोदितेयं
यज्जीवनाय जगतस्तव जीवनानि।
स्तोत्रन्तु ते महदिदं घन! धर्म्मराज-
साहाय्यमर्जयसि यत् पथिकान् निहत्य॥" (र)

(भ) ननु अप्रस्तुताभिधानात् प्रस्तुतस्य गम्यत्वे अप्रस्तुतप्रशंसेव अन्याभिधानादन्यस्य गम्यत्वे अपरोऽपि कश्चिदलङ्कारो भवति न वेत्यपेक्षायां व्याजस्तुत्यलङ्कारं लक्षयति उक्तेति। वाच्याभ्यां वाच्यार्थवत् श्रवणमात्रमेव बोध्याभ्यां निन्दास्तुतिभ्यां निन्दाप्रशंसाभ्यां स्तुतिनिन्दयोर्यथासंख्येन प्रशंसानिन्दयोः गम्यत्वे प्रतीयमानत्वे पुनः, व्याजस्तुतिर्नाम अलङ्कृतिरुक्ता। तथा च—

स्पष्टया निन्दया प्रशंसाया गम्यत्वे, स्पष्टया प्रशंसया निन्दाया गम्यत्वे वा व्याजस्तुतिरिति फलितार्थः। अतएवेयं द्विविधा।

(म) उभयपक्षेऽपि व्याजस्तुतिशब्दस्य क्रमेण व्युत्पत्तिमाह निन्दयेति। व्याजेन निन्दाच्छलेन, स्तुतिर्वास्तविकी प्रशंसा। व्याजरूपा छलरूपा अवास्तविकीत्यर्थः।

(य) निन्दया प्रशंसाया गम्यत्वे दर्शयति स्तनेति। छलेन राज्ञः प्रशंसेयम्। अव्ययानां नानार्थत्वात् कुपितेऽपीत्यपिशब्द एवार्थे। तथा च हे देव! राजन्! त्वयि कुपितेऽपि क्रुद्ध एव सति, तव रिपुस्त्रियः, स्तनयुगान्मुक्तं भयेन परित्यक्तम् आभरणमलङ्कारो याभिस्ताः, तथा कण्टकैर्भयेनैव सञ्जातै रोमाञ्चैः कलिता व्याप्ता अङ्गयष्टयो देहलता यासां तादृशोऽत्राश्च सत्यः, प्राक् पतिमरणात् पूर्वमेव विश्वस्ता इव आभरणमोचनाद्विधवा इव जाताः। "विश्वस्ताविधवे समे" इत्यमरः।

अत्रानपकारिणीनामबलानामनर्थकदुःखोत्पादनात् श्रवणमात्रमेव राज्ञो निन्दा प्रतीयते, तयैव च पुनस्तस्य महावीरत्वसूचनेन प्रशंसावगम्यत इति व्याजेन स्तवनाद्व्याजस्तुतिः।

तर्कवागीशसम्मतः श्लेषव्याख्यानपक्षस्तु न मनोरमः, तादृशपक्षद्वयस्य परस्परासम्बद्धतया निन्दाकरणकप्रशंसाप्रतीत्यभावादिति सुधीभिर्भाव्यम्।

(र) प्रशंसया निन्दाया गम्यत्वे उदाहरति व्याजेति। हे पयोद! मेघ! जगतो जगज्जनस्य

७९। पर्य्यायोक्तं यदा भङ्ग्या गम्यमेवाभिधीयते ॥ (ल)

उदाहरणम्—"स्पृष्टास्ता नन्दने शच्याः केशसम्भोगलालिताः।
सावज्ञं पारिजातस्य मञ्जर्य्यो यस्य सैनिकैः ॥" (व)

अत्र हयग्रीवेण स्वर्गो विजित इति प्रस्तुतमेव गम्यं कारणं वैचित्र्य-विशेषप्रतिपत्तये सैन्यस्य पारिजातमञ्जरीसावज्ञस्पर्शनरूपकार्य्यद्वारेणाभि-हितम् (श)।

न चेदं कार्य्यात् कारणप्रतीतिरूपा अप्रस्तुतप्रशंसा, तत्र कार्य्यस्या-प्रस्तुतत्वात्। इह तु वर्णनीयस्य प्रभावातिशयबोधकत्वेन कार्य्यमपि कारणवत् प्रस्तुतम् (ष)। एवञ्च—(स)

जीवनाय जीवनरक्षणाय तव जीवनानि जलानि यत् सम्भवन्तीति शेषः ; इयं सा, मया तव व्याजस्तुतिर्छलरूपा स्तुतिर्मिथ्या प्रशंसा उदिता उक्ता, जगज्जनजीवनरक्षणस्य नद्यादिजलेनापि सम्भवादिति भावः। तु किन्तु, हे घन ! मेघ ! इदं महत् ते तव स्तोत्रं प्रशंसा ; यत्, पथिकान् विरहिणो जनान् निहत्य विरह-यातनायाः शतधोत्पादनेन विनाश्य, धर्म्मराजस्य धर्म्मानुसारेण प्राणिनां शासितुर्यमस्य साहाय्यं तेषां निहननेनैव सहायताम्, भजसि करोषि।

अत्र धर्म्मराजसाहाय्यकरणेन श्रवणमात्रमेव प्रतीयमानया प्रशंसयैव निरपराधविरहिहत्याजनितनिन्दाया गम्यतया व्याजरूपस्तवनाद्व्याजस्तुतिः।

(ल) व्याजस्तुतौ गम्यार्थस्य प्रकृतत्वादगम्यार्थविशेषमादायैव पर्य्यायोक्तं नामालङ्कारं निरूपयति पर्य्यायोक्त-मिति। यदा भङ्ग्या भङ्गीविशेषेण उक्तैः प्रकारविशेषेण गम्यमेव प्रतीयमानमेव वस्तु, अभिधीयते अभिधेयवत् स्पष्टं प्रत्याय्यते ; तदा तत् पर्य्यायोक्तं नामालङ्कार उक्त इति लिङ्गव्यत्ययेन पूर्वतोऽनुकृष्यते। तथा च—विशेषानुसन्धानेन प्रतीयमानस्यार्थस्य उक्तिवैचित्र्येण स्पष्टसूचनं पर्य्यायोक्तमिति सरलार्थः। विशेष-रूपत्वेनापवादरूपा व्याजस्तुतिरस्य बाधिकेति बोध्यम्।

पर्य्यायेण प्रकारविशेषेणोक्तमुक्तिरिति पर्य्यायोक्तमिति व्युत्पत्तिः। तथा च विश्वः—"पर्य्यायस्तु प्रकारे स्यान्निर्म्माणेऽवसरे क्रमे।"

(व) स्पृष्टा इति। यस्य हयग्रीवस्य सैनिकैः, शच्या इन्द्राण्याः केशसम्भोगाय केशपाशे परिधानाय लालिता उद्यानपालकैः पोषिताः, पारिजातस्य वृक्षस्य ताः प्रसिद्धा मञ्जर्य्यः, नन्दने कानने, सावज्ञम् अवज्ञया सहितं स्पृष्टाः ; स हयग्रीवः प्रस्तूयते इति पूर्वेणान्वयः।

(श) अत्रेति। गम्यं पूर्वप्रस्तावानुसन्धानेनैव बोध्यम्। कारणमिति। स्वर्गजयाभावे सावज्ञ-पारिजातमञ्जरीस्पर्शासम्भवात् तज्जये च तत्सम्भवात् सावज्ञपारिजातमञ्जरीस्पर्शं प्रति स्वर्गजयस्यैव कारणत्व-मिति भावः। अभिहितं स्पष्टं सूचितम्।

(ष) अप्रस्तुतप्रशंसापर्य्यायोक्तयोर्भेदप्रदर्शनाभिप्रायेण "स्पृष्टास्ता नन्दने शच्याः" इत्यादावप्रस्तुतप्रशंसा-

"अनेन पर्य्यासयताश्रुबिन्दून् मुक्ताफलस्थूलतमान् स्तनेषु।
प्रत्यर्पिताः शत्रुविलासिनीनामाक्षेपसूत्रेण विनैव हाराः॥" (ङ)

अत्र वर्णनीयस्य राज्ञो गम्यभूतशत्रुमारणरूपकारणवत् कार्य्यभूतं तथाविधशत्रुस्त्रीक्रन्दनजलमपि प्रभावातिशयबोधकत्वेन वर्णनार्हमिति पर्य्यायोक्तमेव (च)।

"राजन्! राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुब्जे! भोजय मां कुमारसचिवैर्नाद्यापि किं भुज्यते।
इत्थं राजशुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरा-
च्चित्रस्थानवलोक्य शून्यवड़भावेकैकमाभाषते॥" (क)

माश्रङ्क्य समाधत्ते न चेति। इदं "स्पृष्टास्ता:—" इत्यादावनुभूयमानं वैचित्राम्। अप्रस्तुतप्रशंसेति न च वाच्यमित्यर्थः। तत्र कार्य्यात् कारणप्रतीतिरूपायामप्रस्तुतप्रशंसायाम्। अप्रस्तुतत्वादप्रस्तुतत्वनियमात्, तथैव तल्लक्षणादिति भावः। इह तु "स्पृष्टास्ता:—" इत्यादौ तु, वर्णनीयस्य हयग्रीवस्य। कार्य्यमपि सावज्ञपारिजात-मञ्जरीग्रहणमपि, कारणवत् स्वर्गविजयवत्, प्रस्तुतम्, स्वर्गविजयावगमेनैव तादृशस्पर्शादिरूपात्याचारस्याप्यव-गम्यमानत्वादिति भावः। इत्यश्च "स्पृष्टास्ता:—" इत्यादौ प्रस्तुतादेव प्रस्तुतान्तरप्रतीतेर्नाप्रस्तुतप्रशंसा, किन्तु पर्य्यायोक्तमेवेत्याशयः।

(ङ) एवञ्चेति। उक्तरीत्या "स्पृष्टास्ता नन्दने शच्याः" इत्यादौ पर्य्यायोक्तं चेत्यर्थः।

(ङ) अनेनेति। रघुवंशषष्ठसर्गस्थमिदं पद्यम्। अनेन अङ्गदेशाधिपतिना, शत्रुविलासिनीनां स्तनेषु, मुक्ताफलस्थूलतमान् मौक्तिकवत् पीवरान्, अश्रुबिन्दून्, पर्य्यासयता पातयता सता, आक्षेपसूत्रेण विनैव हाराः प्रत्यर्पिता दत्ताः।

(च) अत्रेति। राज्ञः अङ्गनाथस्य, गम्यभूतं व्यञ्जनया बोध्यरूपं यत् शत्रुमारणरूपं कारणं तद्वत्। कार्य्यभूतमिति। शत्रुमारणादेव तत्स्त्रीणां क्रन्दनजलमुत्पन्नमिति शत्रुमारणस्य कारणत्वम्, तत्क्रन्दन-जलस्य च तत्कार्य्यत्वमिति बोध्यम्। प्रभावातिशयबोधकत्वेन राज्ञ इति पूर्वेण सम्बन्धः। वर्णनार्हं वर्णनार्ह-त्वेन प्रस्तुतम्, इति हेतोः, पर्य्यायोक्तमेव, न पुनरप्रस्तुतप्रशंसेति भावः। एतेन प्रस्तुतादेव प्रस्तुतावगतौ पर्य्यायोक्तम्, अप्रस्तुतादेव च प्रस्तुतावगतौ अप्रस्तुतप्रशंसेत्यनयोर्भेदो ग्रन्थकृतापि सूचितः।

(क) सन्दिग्धं लक्ष्यं काव्यप्रकाशादुदाहरति राजन्निति। आक्रमणीयो राजा स्वराजधान्यां कीदृश-भावेन वर्त्तते इत्यवगन्तुं प्रेरितेन गुप्तचरेण तदवगत्यागत्य प्रेरयितुर्नृपतेरन्तिके उक्तमिदम्। हे देव! तव अरिभवने शत्रुवाट्याम्, अध्वगैः पथिकैः पञ्जरात् पिञ्जरात् मुक्तः प्रच्यावितः, राजशुको राजकीयशुकपक्षी, शून्यवड़भौ जनहीनचन्द्रशालायां स्थित इति शेषः, चित्रस्थान् पटे भित्तौ वा चित्रितान् राजादीनिति शेषः, अवलोक्य इत्थमेकैकं राजादीनामेकमेकम्, आभाषते आलपति। किन्तदित्याह—हे राजन्! राजसुता मां न पाठयति श्लोककथादिकमिति शेषः, देव्यो महिष्योऽपि तूष्णीं स्थिताः न मां पाठयन्तीत्यर्थः, हे कुब्जे!

अत्र "प्रस्थानोद्यतं भवन्तं श्रुत्वा सहसैवारयः पलायिता इति कारणं प्रस्तुतम्, कार्य्यमपि वर्णनार्हत्वेन प्रस्तुतम्" इति केचित् (ख)।

अन्ये तु "राजशुकवृत्तान्तेन न कोऽपि प्रस्तुतस्य प्रभावो (१) बोध्यत इत्यप्रस्तुतप्रशंसैव" इत्याहुः (ग)।

८०। सामान्यं वा विशेषेण विशेषस्तेन वा यदि।
कार्य्यञ्च कारणेनेदं कार्य्येण च समर्थ्यते।
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः॥ (घ)

मत्परिपालिके! कुब्जनारि! मां भोजय, अद्यापि इदानीमपि, कुमारा राजपुत्रा एव सचिवाः स्वसहचरास्तैः, किं न भुज्यते।

(ख) अत्रेति। प्रस्थानोद्यतम् आत्मनामाक्रमणायेति शेषः। कारणं तत्पलायनरूपम्, तेनैव तादृशशुकाभाषणस्य जनितत्वादिति भावः। कार्य्यमपि तादृशशुकाभाषणमपि। केचिन्नव्याः। एवञ्चैषां मते प्रस्तुतादेव तादृशशुकाभाषणकार्य्यात् प्रस्तुतस्यैव शत्रुपलायनरूपकारणस्य प्रतीतिः पर्य्यायोक्तमेवेति बोध्यम्।

(ग) काव्यप्रकाशकारमतमाह अन्ये त्विति। राजशुकवृत्तान्तेन राजन्नित्याद्याभाषणरूपेण। प्रस्तुतस्य विपक्षराजस्य कोऽपि प्रभावो न नास्तीति बोध्यते कविनेति शेषः, सहसैव पलायनादिति भावः। तथा च अप्रस्तुतात् राजशुकवृत्तान्तरूपकार्य्यात् प्रस्तुतस्य विपक्षराजपलायनरूपस्य कारणस्य प्रतीतिरप्रस्तुतप्रशंसेति काव्यप्रकाशकृतामाशयः। यथा काव्यप्रकाशे—"प्रस्थानोद्यतं भवन्तं ज्ञात्वा सहसैव त्वदरयः पलाय्य गता इति कारणे प्रस्तुते कार्य्यमुक्तम्।" ग्रन्थकृन्मते तु निश्चित्यैकतरानभिधानात् उक्तोभययुक्तेरेव सम्भवाच्च अप्रस्तुतप्रशंसापर्य्यायोक्तयोः सन्देहसङ्कर एवेति ध्येयम्।

(घ) ननु कार्य्यकारणभावप्रतीतिस्थले पर्य्यायोक्तवत् अलङ्कारान्तरं भवति न वेत्याकाङ्क्षायां कार्य्यकारणभावे अर्थान्तरन्यासं निरूपयन् सामान्यत एव तं निरूपयति सामान्यमिति। उक्तार्थसमर्थनमर्थान्तरन्यास इति सामान्यलक्षणम्। उक्तार्थसमर्थनञ्च सम्भवपरैणार्थेन प्रस्तुतस्यार्थस्य असम्भवतादिनिरासद्वारा दृढ़ीकरणम्। तच्च विभजते सामान्यमिति। तत्र समर्थ्यसमर्थकोभयवृत्तिधर्म्मवत्त्वं सामान्यत्वम्, समर्थ्यसमर्थकयोरेकतरवृत्तिधर्म्मवत्त्वं विशेषत्वम्। यद्वा व्यापकत्वं सामान्यत्वम्, व्याप्यत्वञ्च विशेषत्वम्। समर्थ्यसमर्थकयोर्विवक्षितसमानधर्म्मकत्वं साधर्म्म्यं तादृशविपरीतधर्म्मकत्वञ्च वैधर्म्म्यम्। कार्य्यकारणयोश्च उत्पत्त्युत्पादनयोग्यत्वं साधर्म्म्यं तद्विपरीतञ्च वैधर्म्म्यम्। एतदुभयञ्च समर्थ्यत इत्यनेन प्रत्येकवारमेवान्वीयते। एवञ्च—

साधर्म्म्येण वैधर्म्म्येण वा यदि विशेषेण सामान्यं समर्थ्यते, तथैव तेन सामान्येन वा विशेषः समर्थ्यते, तथैव कारणेन च कार्य्यं समर्थ्यते, तथैव कार्य्येण च इदं कारणं समर्थ्यते; ततस्तदा तेषां चतुर्णामेव समर्थनानां साधर्म्म्येण, तदितरेण वैधर्म्म्येण च सम्भवात् पुनर्द्वैविध्येन समुदाये अष्टधा अष्टविधः

---

(१) राजशुकवृत्तान्तेन कोऽपि प्रस्तुतस्य प्रभावः, प्रस्तुतप्रभावः इति पाठभेदौ।

क्रमेणोदाहरणम्—

"बृहत्सहायः कार्य्यान्तं क्षोदीयानपि गच्छति ।
सम्भूयाम्भोधिमभ्येति महानद्या नगापगा ॥" (ङ)

अत्र द्वितीयार्द्धगतेन विशेषरूपेणार्थेन प्रथमार्द्धगतः सामान्योऽर्थः सोपपत्तिकः क्रियते (च) ।

"यावदर्थपदां वाचमेवमादाय माधवः ।
विरराम महीयांसः प्रकृत्या मितभाषिणः ॥" (छ)

"पृथ्वि ! स्थिरा भव, भुजङ्गम ! धारयैनां
कूर्म्मराज ! त्वं तदिदं द्वितयं दधीथाः ।

र्थान्तरन्यास उक्तः । अस्य दृष्टान्तादिभिः सह भेदस्तत्र तत्रैवोक्तः, काव्यलिङ्गादिभिर्भेदस्तु वक्ष्यते । काव्यप्रकाशकृता तु काव्यलिङ्गेनैव गतार्थत्वात् कार्य्यकारणभावे अर्थान्तरन्यासो नाङ्गीक्रियते । दर्पणकृता तु तत् काव्यलिङ्गप्रकरणे दूषयिष्यते । अर्थान्तरस्य प्रस्तुतेतरार्थस्य न्यासः स्थापनमिति व्युत्पत्तिः ।

(ङ) विशेषेण सामान्यसमर्थने उदाहरति बृहदिति । शिशुपालवधद्वितीयसर्गस्थमिदं पद्यम् । क्षोदीयान् नितान्तक्षुद्रोऽपि जनः, बृहन् महान् सहायो यस्य स तादृशः सन्, कार्य्यान्तं कार्य्यशेषं गच्छति दुष्करमपि कार्य्यं साधयितुमर्हतीत्यर्थः । तथा च नगापगा पार्वत्यनदी महानद्या गङ्गादिकया सम्भूय मिलित्वा अम्भोधिं सागरम् अभ्येति गच्छति ।

(च) उक्तलक्ष्ये लक्षणं सङ्गमयितुमाह अत्रेति । विशेषरूपेण नगापगादिरूपेण, क्षोदीयःप्रभृतिव्याप्यत्वादिति भावः । सामान्यः क्षोदीयःप्रभृतिः, नगापगादिव्यापकत्वादित्याशयः । सोपपत्तिकः सयुक्तिकः । तथा च "क्षोदीयानपि बृहत्सहायः सन् कार्य्यान्तं गच्छति" इति कुत्र दृष्टमित्याकाङ्क्षायां "नगापगा महानद्या सम्भूय अम्भोधिमभ्येति" इति सम्भवदुदाहरणप्रदर्शनद्वारा एकत्र दृष्टः, अन्यत्रापि सम्भवतीति न्यायेन पूर्वार्द्धसामान्यस्य असम्भवत्वादिनिराकरणादित्यभिप्रायः । तथा समर्थ्यगतकार्य्यान्तप्राप्तेः समर्थकगतसागरप्राप्तेश्च समानत्वादत्र साधर्म्म्यमित्यपि द्रष्टव्यम् ।

(छ) सामान्येन विशेषसमर्थने दर्शयति यावदिति । इदमपि शिशुपालवधद्वितीयसर्गगतं पद्यम् । माधवः कृष्णः, एवमित्थम्, यावानर्थ इति यावदर्थम् अर्थपरिमितानीत्यर्थः पदानि यस्यां तां स्वल्पार्थानुरूपाल्पैव स्वल्पामित्यर्थः, वाचं वाक्यम्, आदाय गृहीत्वा उक्त्वेत्यर्थः, विरराम विरतो बभूव । यतश्च, महीयांसः अतिमहान्तो जनाः, प्रकृत्या स्वभावेनैव मितभाषिणः परिमितवादिनो भवन्ति ।

अत्र प्रथमवाक्यगतो माधवादिरर्थो विशेषः महीयःप्रभृत्यर्थव्याप्यत्वात्, द्वितीयवाक्यगतो महीयःप्रभृतिरर्थस्तु सामान्यः, माधवाद्यर्थव्यापकत्वात् । तथा प्रयोजनीयमात्रमुक्त्वा विरामो मितभाषित्वञ्च वस्तुतः समान एव धर्म्म इति साधर्म्म्यम् । तेन साधर्म्म्ये सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः । तथा पूर्वार्द्धवाक्यघटकस्य विररामेत्येकमात्रपदस्य परार्द्धे पातादर्द्धान्तरैकपदतादोषः ।

दिक्कुञ्जराः ! कुरुत तत्त्रितये दिधीर्षां-
माार्य्यः (१) करोति हरकार्म्मुकमाततज्यम् ॥" (ञ)

अत्र कारणभूतं हरकार्म्मुकाततज्यीकरणं पृथ्वीस्थैर्य्यादेः कार्य्यस्य समर्थकम् (झ)।

"सहसा विदधीत न क्रियाम्—" इत्यादौ (४८६ पृष्ठे) सम्पद्वरणं कार्य्यं सहसाविधानाभावस्य विमृश्यकारित्वरूपस्य कारणस्य समर्थकम् (ञ)।

एतानि साधर्म्म्ये उदाहरणानि। वैधर्म्म्ये यथा—

"इत्थमाराध्यमानोऽपि क्लिश्नाति भुवनत्रयम् ।
शाम्येत् प्रत्यपकारेण नोपकारेण दुर्जनः ॥" (ट)

(ञ) कारणेन कार्य्यसमर्थने उदाहरणमाह पृथ्वीति। बालरामायणमहानाटके लक्ष्मणस्योक्तिरियम्। हे पृथ्वि! पृथिवि! त्वं स्थिरा दृढ़निश्चला भव, यथा न अनन्तमस्तकात् पतेरिति भावः, हे भुजङ्गम! अनन्तनाग! त्वमेनां पृथ्वीं धारय दृढमवलम्बस्व, यथेयं तव मस्तकान्न पततीति भावः। हे कूर्म्मराज! त्वं तदिदं द्वितयं पृथ्वीभुजङ्गमावित्यर्थः, दधीथा दृढं धारयेथाः, अन्यथैतौ पतिष्यत इत्याशयः। हे दिक्-कुञ्जराः! ऐरावतादयो दिग्दन्तिनः! यूयमपि तत्त्रितये पृथ्वी-भुजङ्गम-कूर्म्मराजेति त्रये दिधीर्षां धर्त्तुमिच्छां दृढधारणचेष्टामित्यर्थः कुरुत, अन्यथा सर्व एवैते स्वस्थानात् प्रच्यवेरन्नित्यभिप्रायः। ननु कथमीदृशी साव-धानता उपदिश्यत इत्याह—आर्य्यः पूज्यो रामचन्द्रः, हरस्य कार्म्मुकं धनुः, आतता कोटौ योगाद् विस्तृता ज्या गुणो यस्य तत्तादृशं करोति। अत्र विधेयस्य आततत्वस्य समासे गुणीभावाद्विधेयाविमर्श दोषोऽपि।

(झ) अत्रेति। पृथ्वीस्थैर्य्यादेरिति। उपदिश्यमानदृढ़तरस्थैर्य्यादेरित्यर्थः। तादृशस्य स्थैर्य्यादेश्च अनुत्पन्नपूर्वत्वात् हरकार्म्मुकाततज्यीकरणेनैवोत्पत्तेः परस्परकार्य्यकारणभावः सम्भवत्येवेति नानुप-पत्तिः। तथैव चानयोरुत्पाद्योत्पादनयोग्यत्वरूपं साधर्म्म्यमित्यपि द्रष्टव्यम्। समर्थकं सयुक्तिकताप्रति-पादकम्, अत्र तुर्य्यचरणोक्त्यभावे पृथ्वीप्रभृतीनामसावधानतया पतनादिसम्भावनादिति भावः।

(ञ) कार्य्येण कारणसमर्थने उदाहरति सहसेति। सम्पद्वरणं सम्पत्प्राप्तिरूपम्। विमृश्यकारित्व-रूपस्य विवेचनपूर्वककार्य्यकरणस्य। समर्थकमुपपादकम्। अत्रायमाशयः—विमृश्यकारित्वं खलु सम्पदं जनयतीति लोके दृश्यते; ततश्च विमृश्यकारित्वं कारणम्, सम्पत्प्राप्तिश्च कार्य्यम्। एवञ्च "वृणते हि" इत्यादिद्वितीयार्द्धं वाक्यार्थभूतं विमृश्यकारित्वरूपं कारणं सयुक्तिकं करोति, प्रवृत्तिमतः पुरुषस्य सम्पत्प्राप्ते-रिष्टत्वादिति। अत्रापि सम्पत्प्राप्ति-विमृश्यकारित्वरूपयोः कार्य्यकारणयोरुत्पाद्योत्पादनयोग्यत्वरूपं साधर्म्म्य-मस्तीति द्रष्टव्यम्।

(ट) इत्थमिति। कुमारसम्भवद्वितीयसर्गस्थमिदं पद्यम्। इत्थमनेन प्रकारेण आराध्यमानोऽपि उपास्यमानोऽपि तारकासुरः, भुवनत्रयं क्लिश्नाति उत्पीड़यति। तथाहि, दुर्जनः प्रत्यपकारेणैव शाम्येत् शान्तो भवेत् परोत्पीड़नाद्विरतो भवेत्, न पुनरुपकारेण।

---

(१) देव इति पाठान्तरम्।

अत्र सामान्यं विशेषस्य समर्थकम् (ठ)। "सहसा विदधीत—" इत्यत्र सहसाविधानाभावस्य आपत्प्रदत्वं (१) विरुद्धं कार्य्यं समर्थकम् (ड)। एवमन्यत् (ढ)।

८१। हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते। (ण)

तत्र वाक्यार्थता (२) यथा—(त)

(ठ) अत्रेति। सामान्यं दुर्जनादिद्वितीयवाक्यार्थरूपमित्यर्थः, तारकादिप्रथमवाक्यार्थं व्यापकत्वादिति भावः। विशेषस्य तारकादिप्रथमवाक्यार्थस्य, परार्द्धवाक्यार्थव्याप्यत्वादित्याशयः। समर्थकमुपपादकम्, उक्तरूपस्यैव भूयोदर्शनादित्यभिप्रायः। आराधनं नाम उपकारविशेषः, तेनोपकारापकारयोः परस्परविपरीतत्वाद्वैधर्म्म्यम्।

(ड) वैधर्म्म्येण कार्य्येण कारणसमर्थने दर्शयति पुनः सहसेति। सहसाविधानाभावस्य विमृश्य-कारित्वरूपस्य, आपत्प्रदत्वमापज्जननम्, विरुद्धं विमृश्यकारित्वरूपकारणादुत्पत्त्ययोग्यम्। अत्रायमाशयः— "अधर्मो दुःखकारणम्" इत्युक्तिः सुखकारणीभूतधर्म्मस्य समर्थनमिव, अविमृश्यकारित्वजन्यविपत्प्राप्त्युक्तिः सम्पज्जनकीभूतविमृश्यकारित्वस्य समर्थनमेव करोतीति।

(ढ) एवमिति। वैधर्म्म्येण विशेषेण सामान्यसमर्थने यथा मम वङ्गीयप्रतापनाटके—

"सहायशून्योऽपि गुणान्वितो जनो नैवानुगत्यं भजते प्रभोरपि।
दृढस्फुरीयन्मनरश्मिसंयुतो महाप्रवाहे स्थिर एव लक्ष्यते॥"

अत्र द्वितीयार्द्धगतो विशेषार्थः प्रथमार्द्धगतसामान्यार्थस्य समर्थकः। तथा आनुगत्यभजनाभावो नाम स्थिरत्वम्, स्थिर एवेत्यस्य "न पुनरस्थिरः" इत्यर्थे पर्य्यवसानादस्थिरत्वस्य तयोः परस्परं विरुद्धधर्म्मत्वम्।

वैधर्म्म्ये कारणेन कार्य्यसमर्थने यथा मम रुक्मिणीहरणमहाकाव्ये—

"नृपते! गृहिणां गृहक्रिया यदनन्तेति निगद्यते न तत्।
भुवने परमेशशेषयोर्न तृतीये क्वचिदस्त्यनन्तता॥"

अत्र द्वितीयार्द्धगतः कारणीभूतार्थः प्रथमार्द्धगतस्य कार्य्यभूतार्थस्य समर्थकः। तथा अनन्तताया अभावस्य न खलु निगदनाभावोत्पादनयोग्यत्वमस्तीति वैधर्म्म्यमुन्नेयम्।

(ण) अर्थान्तरन्यासे कारणप्रस्तावात् कारणघटितमेव काव्यलिङ्गालङ्कारं लक्षयति हेतोरिति। हेतोः कञ्चिदर्थं प्रति कारणस्य, वाक्यपदार्थत्वे व्यञ्जनया सम्पूर्णवाक्यबोध्यत्वे पदबोध्यत्वे वा काव्यलिङ्गं नामालङ्कारो निगद्यते। तथा च—

अर्थविशेषं प्रति वाक्यस्यार्थः पदस्यार्थो वा यदि हेतुर्भवति, तदा काव्यलिङ्गं नामालङ्कारो निगद्यत इति सरलार्थः। अतएवायं द्विविधः। वाक्यं पदञ्च प्रागेव लक्षितम्। काव्यस्य लिङ्गं वैचित्र्यविशेषभूतं चिह्नमिति व्युत्पत्तिः।

(१) आपत्पदत्वमिति क्वचित् पाठः। (२) वाक्यार्थगता इति क्वचित् पाठः।

"यत् त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये ! तव मुखच्छायानुकारि शशी ।
येऽपि त्वद्गमनानुकारिगतयस्ते (१) राजहंसा गताः
त्वत्साद्दृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥" (थ)

अत्र चतुर्थपादे पादत्रयवाक्यानि हेतवः (द)। पदार्थता (२) यथा मम—(ध)

"त्वद्वाजिराजिनिर्धूत-धूलीपटलपङ्किलाम् ।
न धत्ते शिरसा गङ्गां भूरिभारभिया हरः ॥" (न)

अत्र द्वितीयार्द्धे प्रथमार्द्धमेकपदं हेतुः (प)। अनेकपदं (फ) यथा मम—

(त) तत्रेति। तयोर्द्विविधयोर्मध्ये, वाक्यार्थता हेतोर्वाक्यबोध्यता यथेत्यर्थः।

(थ) यदिति। हनूमन्नाटके सीताहरणानन्तरं तामुद्दिश्य वर्षाकाले रामस्योक्तिरियम्। हे प्रिये! यत् इन्दीवरं नीलोत्पलं त्वन्नेत्रसमानकान्ति, तत् सलिले जले मग्नम्; अतएव इन्दीवरदर्शनेनापि तव नयनदर्शनतृप्तिर्न जायत इति भावः। तव मुखस्य च्छायां कान्तिमनुकरोतीति स तादृशः, शशी चन्द्रोऽपि मेघैरन्तरित आवृतः। अतश्चन्द्रं दृष्ट्वापि तव मुखदर्शनसुखं न लभ्यत इत्याशयः। तथा येऽपि तव गमनानुकारिणी गतिर्येषां ते तथोक्ता आसन्, तेऽपि राजहंसा गता वर्षास्वभावात् मानससरोवरमिति शेषः। अतो राजहंसगतिदर्शनेनापि तव गतिदर्शनानन्दो नानुभूयत इत्यभिप्रायः। अतएव दैवेन विधिना, मे मम, तव सादृश्ये न अङ्गप्रत्यङ्गसदृशवस्तुदर्शनेनेत्यर्थः यो विनोदो विरहदुःखनिवृत्तिस्तन्मात्रमपि न क्षम्यते न सह्यते।

(द) अत्रेति। चतुर्थपादे चतुर्थपादात्मकवाक्यार्थं प्रति, पादत्रयवाक्यानि प्रथमपादत्रयात्मकवाक्यत्रयार्थाः, हेतवः कारणानि। प्रथमवाक्यत्रयार्थान् विना चतुर्थवाक्यार्थानुत्पत्तेरित्याशयः।

(ध) पदेति। पदार्थता हेतोः पदबोध्यता।

(न) त्वदिति। राज्ञः स्तुतिरियम्। हे राजन्! हरो महादेवः, भूरिभारभिया अत्यन्तभारभयेन शिरसा तव वाजिराजिभिर्घोटकश्रेणिभिः, निर्धूतेन उत्तोलितेन धूलीनां पटलेन राशिना, पङ्किलां कर्दमितां गङ्गाम्, न धत्ते न धारयति।

(प) अत्रेति। द्वितीयार्द्धे द्वितीयार्द्धगतभूरिभारं प्रति, प्रथमार्द्धमेकपदं प्रथमार्द्धरूपैकपदस्यार्थः, हेतुः कारणम्, तथा पङ्किलत्वं विना अजातपूर्वभूरिभारासम्भवादिति भावः। अत्र सम्पूर्णमेव प्रथमार्द्धं समस्ततया एकमात्रमेव पदमिति बोध्यम्।

(फ) अनेकेति। अनेकपदम् अनेकपदस्यार्थो हेतुर्यथेत्यर्थः।

(१) त्वद्गमनानुसारिगतय इति पाठान्तरम्। (२) पदार्थगता इत्यपि क्वचित् पाठः।

"पश्यन्त्यसंख्यपथगां त्वद्दानजलवाहिनीम्।
देव! त्रिपथगात्मानं गोपयत्युग्रमूर्द्धनि॥" (ब)

इह केचित् वाक्यार्थगतेन काव्यलिङ्गेनैव गतार्थतया कार्य्यकारणभावे अर्थान्तरन्यासं नाद्रियन्ते, तदयुक्तम्। तथाहि, अत्र हेतुस्त्रिधा भवति—ज्ञापकः, निष्पादकः, समर्थकश्चेति (भ)। तत्र ज्ञापकोऽनुमानस्य विषयः, निष्पादकः काव्यलिङ्गस्य, समर्थकोऽर्थान्तरन्यासस्य इति पृथगेव कार्य्यकारणभावे अर्थान्तरन्यासः काव्यलिङ्गात् (म)। तथाहि, "यत् त्वन्नेत्र—" इत्यादौ चतुर्थपादवाक्यम् अन्यथा साकाङ्क्षतया असमञ्जसमेव स्यादिति पादत्रयगतवाक्यं निष्पादकत्वेनापेक्षते (य)।

"सहसा विदधीत—" इत्यादौ तु—(४८६ पृष्ठे) (र)

(ब) पश्यन्तीति। इयमपि राजस्तुतिः। हे देव! राजन्! स्वर्गमर्त्यपातालात्मकान् केवलान् त्रीनेव पथो गच्छतीति त्रिपथगा गङ्गा, तव दानजलस्य धनवितरणकालीनोत्सर्गजलस्य वाहिनीं नदीम्, असंख्यपथगां पश्यन्ती सती, उग्रमूर्द्धनि महादेवमस्तके, आत्मानं गोपयति गुप्तं करोति, लज्जावशादिति भावः।

अत्र आत्मगोपनं प्रति असंख्यपथगामिति त्रिपथगेति च पदद्वयरूपानेकपदस्यार्थो हेतुरिति पदार्थहेतुक काव्यलिङ्गम्।

(भ) केवलसामान्यविशेषभावे द्विविधमात्रार्थान्तरन्यासवादिनां मम्मटभट्टादीनां मतं प्रसङ्गाद्दूषयितुमाह इहेति। अर्थालङ्कारप्रकरण इत्यर्थः। केचित् मम्मटादयः, वाक्यार्थगतेन सम्पूर्णार्थप्रकाशासमर्थपदार्थहेतुकेनासम्भवात् केवलवाक्यार्थहेतुकेन, काव्यलिङ्गेनैव। अतएवात्र अर्थान्तरन्यासविषयकपर्य्यालोचनं नासङ्गतमिति द्रष्टव्यम्। गतार्थतया निष्पन्नप्रयोजनकतया "पृथ्वि! स्थिरा भव" इत्यादौ "सहसा विदधीत" इत्यादौ च कार्य्यकारणभावे अर्थान्तरन्यासप्रयोजनस्य तादृशकाव्यलिङ्गेनैव सिद्धतयेत्यर्थः। अत्र अनुमानकाव्यलिङ्गार्थान्तरन्यासात्मकालङ्कारत्रये। ज्ञापकः अनुमितिरूपज्ञानजनकः, निष्पादको नियतस्वसापेक्षस्य सम्पादकः, समर्थकः सर्वथैव स्वनिरपेक्षस्य असम्भवतादिनिरासेन नियतसम्भवतामात्रबोधकः।

(म) अथैतेषु कः कस्य विषय इत्याह तत्रेति। ज्ञापकोऽनुमानस्य विषयः, अनुमितिरूपज्ञानजनकत्वात्; निष्पादकः काव्यलिङ्गस्य विषय इत्यनुषङ्गः, नियतस्वसापेक्षस्य सम्पादकत्वात्; समर्थकोऽर्थान्तरन्यासस्य विषय इति सम्बन्धः, सर्वथैव स्वनिरपेक्षस्य असम्भवतादिनिरासेन नियतसम्भवतामात्रबोधकत्वात्।

(य) नन्वेवं विषयविभागे किं प्रमाणमित्याह तथाहीति। चतुर्थपादवाक्यं चतुर्थपादवाक्यार्थः, अन्यथा प्रथमपादत्रयगतवाक्यार्थत्रयानुक्तौ, साकाङ्क्षतया हेत्वपेक्षतया, असमञ्जसम् अपर्य्यवसितान्वयत्वेन असंलग्नम्। पादत्रयवाक्यं प्रथमपादत्रयवाक्यार्थम्, निष्पादकत्वेन स्वसम्पादकत्वेन। अतएव "यत् त्वन्नेत्रे"त्यादौ काव्यलिङ्गमिति भावः।

(र) अथ "सहसा विदधीत न क्रियाम्" इत्यादावप्येवमेव काव्यलिङ्गमेवास्तामित्याह सहसेति। इत्यादौ तु "उपदेशमात्रेणापि" इति परेणान्वयः।

"परापकारनिरतैर्दुर्जनैः सह सङ्गतिः ।
वदामि भवतस्तत्त्वं न विधेया कदाचन ॥" (ल)

इत्यादिवदुपदेशमात्रेणापि निराकाङ्क्षतया स्वतोऽपि गतार्थं सहसा-विधानाभावं सम्पद्वरणं सोपपत्तिकमेव करोतीति पृथगेव कार्यकारणभावे अर्थान्तरन्यासः काव्यलिङ्गात् (व) ।

"न धत्ते शिरसा गङ्गां भूरिभारभिया हरः ।
त्वद्वाजिराजिनिर्धूत-धूलिभिः पङ्किला हि सा ॥" (श)

इत्यत्र हिशब्दोपादानेन "पङ्किलत्वात्" इतिवत् हेतुत्वस्य स्फुटतया नायमलङ्कारः, वैचित्र्यस्यैवालङ्कारत्वात् (ष) ।

८२ । अनुमानन्तु विच्छित्त्या ज्ञानं साध्यस्य साधनात् ॥ (स)

(ल) परेति । परापकारनिरतैर्दुर्जनैः सह कदाचनापि सङ्गतिः सम्मेलनं न विधेया न कर्त्तव्या इति भवतः समीपे तत्त्वं यथार्थकथां वदामि । अत्र परापकारेत्यादिवाक्याभ्यन्तरे वदामीत्यादिवाक्यस्यानु-प्रवेशाद्गर्भितताद्दोषः समुन्नेयः ।

(व) इत्यादिवदिति । स्वतोऽपि स्वभावत एव गतार्थं चरितार्थमन्यनिरपेक्षमित्यर्थः, सहसाविधाना-भावं "सहसा विदधीत न क्रियाम्" इति वाक्यार्थभूतमित्यर्थः, सम्पद्वरणं कर्त्तृ, "वृणते हि—" इत्यादि-वाक्यार्थभूता सम्पत्प्राप्तिरित्यर्थः, सोपपत्तिकमेव सयुक्तिकमेव निश्चितमेवेति यावत् करोति, न पुनः "यत् त्वन्नेव—" इत्यादिवत् सहसाविधानाभावं निष्पादयतीत्यर्थः । पृथगेव हेतुभेदाद्भिन्न एव । तथा च "सहसा विदधीत न क्रियाम्" इत्यादौ समर्थकहेतुस्थलेऽपि काव्यलिङ्गाङ्गीकारे "बृहत्सहायः कार्य्यान्तम्" इत्यादौ "यावदर्थपदां वाचम्" इत्यादौ च सामान्यविशेषभावेनार्थान्तरन्यासस्थलेऽपि काव्यलिङ्गाङ्गीकारौचित्येन अर्थान्तरन्यासालङ्कारसामान्यस्यैव विलोपापत्तिः । अथ सामान्यविशेषभावस्थले हेतोः समर्थकरूपतया पार्थक्यादस्त्येवार्थान्तरन्यास इति चेत् कार्य्यकारणभावस्थलेऽपि तथैव हेतोः पार्थक्यात् पृथगेवार्थान्तरन्यासः स्वीकर्त्तव्य एवेति चतुर्विध एवार्थान्तरन्यास इत्याशयः । एतेन हेतोः समर्थकरूपत्वे अर्थान्तरन्यासः निष्पादक-रूपत्वे तु काव्यलिङ्गमिति भेदोऽपि दर्शितः ।

(श) व्यावृत्तिप्रदर्शनार्थं प्रदर्शितमेव पद्यं किञ्चिद्विकलीकृत्य पुनः प्रदर्शयति न धत्त इति । हरः शम्भुः, भूरिभारभिया अत्यन्तभारभयेन शिरसा गङ्गां न धत्ते । कुतो नाम गङ्गाया भूरिभार इत्याह—हि यस्मात्, सा गङ्गा, तव वाजिराजिभिरश्वश्रेणिभिः निर्धूता उत्तोलिता या धूलयस्ताभिः पङ्किला कर्द्दमिता ।

(ष) इत्यत्रेति । स्फुटतयेति । पञ्चमीविभक्तेरिव हिशब्दस्य हेत्वर्थत्वात् "हि हेताववधारणे" इत्यमरादिवचनादिति भावः ।

(स) हेतुप्रकरणात् हेतुप्रयुक्तमेवानुमानालङ्कारं लक्षयति अन्विति । तुशब्दः काव्यलिङ्गभेदद्योतनार्थः । काव्यलिङ्गे निरुक्तदिशा निष्पादकरूपी हेतुः, इह तु ज्ञापकरूप इति भेदः । विच्छित्त्या वैचित्र्यविशेषेण

यथा—"जानीमहेऽस्या हृदि सारसाक्ष्या विराजतेऽन्तः प्रियवक्त्रचन्द्रः।
तत्कान्तिजालैः प्रसृतैस्तदङ्गेष्वापाण्डुता कुड्मलताक्षिपद्मे॥" (ङ)

अत्र रूपकवशाद्विच्छित्तिः (च)। यथा वा—(क)

"यत्र पतत्यबलानां दृष्टिर्निशिताः पतन्ति तत्र शराः।
तच्चापरोपितशरो धावत्यासां पुरः स्मरो मन्ये॥" (ख)

विशिष्टमित्यर्थः, साधनात् व्याप्तिविशिष्टहेतुज्ञानात्, साध्यस्य अनुमितिविषयस्य व्यापकस्य, ज्ञानं पक्षवृत्तित्व-धीः, अनुमानं नामालङ्कारो निगद्यत इत्यनुषङ्गः। तथा च—

वैचित्र्यविशेषवत्त्वे सति हेतुज्ञानजन्यं साध्यज्ञानमनुमानमिति सरलार्थः।

वैचित्र्यविशेषवत्त्वे सतीत्यभिधानात् "पर्वतो वह्निमान् धूमात्" इत्यादौ वैचित्र्याभावस्थले नातिव्याप्तिः। वस्तुतस्तु वैचित्र्याभावे अलङ्कारसामान्यलक्षणस्यैवासङ्गतेः "पर्वतो वह्निमान् धूमात्" इत्यादौ विशेषानुमान-लक्षणस्याप्यसङ्गतिः सुतरां सिद्धा। तथापि तत्सामान्यलक्षणस्मरणार्थमेव मूले विच्छित्त्येत्यभिधानादत्रापि वैचित्र्यविशेषवत्त्वे सतीत्यभिहितम्। अनु व्याप्तिज्ञानात् पश्चात् मानं ज्ञानमित्यनुमानमिति व्युत्पत्तिः।

(ङ) जानीमह इति। काञ्चिद्विरहिणीमवलोक्य सख्युरन्तिके कस्यचिदुक्तिरियम्। अस्या दृश्य-मानायाः सारसाक्ष्याः पद्मनयनायास्तरुण्याः, हृदि अन्तः हृदयाभ्यन्तरे प्रियस्य कान्तस्य वक्त्रं मुखमेव चन्द्रः, विराजते प्रदीप्यते इयं प्रियस्य मुखचन्द्रं चिन्तयतीत्यर्थः, इति जानीमहे बुध्यामहे। तत्तस्मात् विराजनात् प्रसृतैः सर्वत्र पतितैः, तस्य प्रियवक्त्रचन्द्रस्य कान्तिजालैर्द्युतिसमूहैः, अङ्गेषु अस्या नायिकाया गात्रेषु, आपाण्डुता सम्यक् श्वेतता, तथा अक्षिपद्मे कुड्मलता मुकुलितता जातेत्यपि जानीमह इत्यन्वयः। चन्द्र-प्रकाशे पद्मस्य कुड्मलता स्यादिति द्रष्टव्यम्।

(च) अत्रेति। रूपकवशात् "प्रियवक्त्रचन्द्रः" इति निरङ्गकेवलरूपकालङ्कारप्रयोगात्। न च प्रियवक्त्रं चन्द्र इवेत्युपमितसमासात् लुप्तोपमेति वाच्यम्, विराजत इति प्रभाविस्तारार्थकक्रियाया रूपकस्यैव साधकत्वात्। अत्र रूपकेत्युपलक्षणम्। तथा च विरहजनितपाण्डुतायां चन्द्रप्रकाशजनितपाण्डुतायाः, चिन्ताजनितनेत्रपद्मसङ्कोचे च चन्द्रप्रकाशजनितसङ्कोचस्य सम्भावनात् जानीमहे इति वाचकस्थितेय वाच्योत्-प्रेक्षापि। तत्कृत विच्छित्तिर्वैचित्र्यम्। ततश्च "अस्या नायिकाया हृदयाभ्यन्तरं प्रियवक्त्रचन्द्रवत् अङ्गेषु तत्कृतपाण्डुत्वात् अक्षिपद्मे तत्कृतसङ्कोचाच्च" इति ज्ञानादनुमानालङ्कारः। प्रस्तरान्तरे वह्निसत्त्वे प्रस्तरान्तरे च धूमदर्शने "पर्वतो वह्निमान् धूमात्" इत्यादाविव अत्रापि हृदयाङ्गाक्षिपद्मानामेकावयवविगततया साध्य-साधनयोर्न व्यभिचार इति ध्येयम्।

(क) विच्छित्तिसामान्यग्रहणादलङ्कारेतरकृतविच्छित्तावप्युदाहर्तुमाह यथा वेति।

(ख) यत्रेति। यत्र अबलानां दृष्टिः पतति, तत्रैव निशिताः शराः कामस्य बाणाः पतन्ति। तत्तस्मात् स्मरः कामदेवः, चापे धनुषि रोपितः स्थापितः शरो येन स तादृशः सन्, आसामबलानां पुरः अग्रतो धावतीति मन्ये।

अत्र कविप्रौढ़ोक्तिवशाद्विच्छित्तिः (ग)।
उत्प्रेक्षायामनिश्चिततया प्रतीतिः, इह तु निश्चिततयेत्युभयोर्भेदः (घ)।

८३। अभेदेनाभिधा हेतुर्हेतोर्हेतुमता सह। (ङ)

यथा मम—"तारुण्यस्य विलासः—" इत्यत्र (१३४ पृष्ठे) वशीकरणहेतुर्नायिकावशीकरणत्वेनोक्ता (च)। विलासह्रासयोस्तु अध्यवसायमूलोऽयमलङ्कारः (छ)।

८४। अनुकूलं प्रातिकूल्यमनुकूलानुबन्धि चेत्॥ (ज)

(ग) अत्रेति। कवेः प्रौढ़ोक्तिवशात् अलपूर्वकासम्भवोक्तिवशात्, विच्छित्तिर्वैचित्र्यम्। तथा च अबलानामग्रे अग्रे स्मरो धावति तद्दृष्टिपतनदेशे तच्छरपतनादिति ज्ञानादनुमानालङ्कारः। अत्रावदेश-सामान्यमेव पक्ष इति न साध्यसाधनयोर्व्यभिचारः। "अबलादृष्टिपातसहचरितशरपातोऽबलापुरोवर्त्तिचाप-रोपितशरजन्योऽबलादृष्टिपातसहचरितशरपातत्वात्" इति तर्कवागीशकृतमनुमानन्तु श्लोकार्थपर्य्यालोचनाया-मनुभवविरुद्धम्।

(घ) नन्वेवमुत्प्रेक्षया सहास्य को भेद इत्याह उत्प्रेक्षायामिति। अनिश्चिततयेति। सम्भावनायाः संशयविशेषरूपत्वादिति भावः। निश्चिततयेति। अनुमितेस्तु निश्चयरूपत्वादित्याशयः।

(ङ) हेतुप्रस्तावादेव हेत्वलङ्कारं लक्षयति अभेदेनेति। हेतुमता कार्य्येण सह हेतोः कारणस्य अभेदेन अभिन्नत्वरूपेण अभिधा उक्तिः, हेतुर्नामालङ्कारो निगद्यत इत्यनुषज्यते। कार्य्यकारणयोरभेदाभि-धानमेव हेतुर्नामालङ्कार इति सरलार्थः। केचित्तु हेतुमता कार्य्येण सह हेतोरभेदेनाभिधा अभिधाहेतु-र्नाम अलङ्कार इत्यभिधाशब्दस्य द्विधा अन्वयमङ्गीकृत्य व्याचक्षाणा लक्ष्यमाणालङ्कारस्य अभिधाहेतुरित्येव नाम निर्द्दिशन्ति। सरस्वतीकण्ठाभरणे तु हेतुरित्येव नाम निर्द्दिष्टम्। तथा च हेतुहेतुमतोरभेदेनाभिधानेऽपि तत्र हेतोरेव प्राधान्यात् हेतुरिति नाम।

(च) तारुण्यस्येति। प्रागेव विवृतमेतत्। वशीकरणस्य हेतुः कारणीभूता, नायिका प्रकरणवशात् लब्धा सुन्दरी, वशीकरणत्वेन वशीकरणक्रियाया अभिन्नत्वेन, उक्ता कविनेति शेषः, प्रकरणलब्धनायिका-शब्दोत्तरवर्त्तिप्रथमाविभक्तेः "वशीकरणम्" इति प्रथमाविभक्तेश्च अभेदार्थकत्वादिति भावः।

(छ) ननु वशीकरणक्रियां प्रति नायिकाया एव कारणत्वात् तयोश्चाभेदाभिधानादस्तु हेत्वलङ्कारः, किन्तु पूर्वार्द्धे विलासह्रासयोर्विधातृविहिततया तत्र नायिकायाः कारणत्वाभावात्तयोरभेदाभिधानेऽपि कथं हेत्वलङ्कार इत्याह विलासेति। विलासः पूर्णाविर्भावः ह्रासः प्रकाशस्तयोः, अध्यवसायमूलः कार्य्यत्वारोप-मूलकः। तथा च तादृशविलासह्रासयोर्विधातृकर्त्तृकत्वेऽपि नायिकाश्रितत्वेन विहितत्वात् तज्जन्यत्वमारोप्य तयोरभेदाभिधानात् हेत्वलङ्कार इति भावः।

(ज) प्राकरणिकहेतुघटितमेवानुकूलं नामालङ्कारं निरूपयति अनुकूलमिति। प्रातिकूल्यं प्रति-

यथा—"कुपितासि यदा तन्वि ! निधाय करजक्षतम् ।
बधान भुजपाशाभ्यां कण्ठमस्य दृढं तदा ॥" (झ)

अस्य च विच्छित्तिविशेषस्य सर्वालङ्कारविलक्षणत्वेन स्फुरणात् पृथगलङ्कारत्वमेव न्याय्यम् (ञ) ।

८५ । वस्तुनो वक्तुमिष्टस्य विशेषप्रतिपत्तये । निषेधाभास आक्षेपो वक्ष्यमाणोक्तगो द्विधा ॥ (ट)

अत्र वक्ष्यमाणविषये क्वचित् सर्वस्यापि सामान्यतः सूचितस्य निषेधः, क्वचिदंशोक्तावंशान्तरे निषेध इति द्वौ भेदौ । उक्तविषये च क्वचि-

---

कूलताचरणं चेद्यदि अनुकूलानुबन्धि व्यञ्जनागम्यानुकूल्यजनकं स्यात्, तदा अनुकूलं नामालङ्कारो निगद्यते इति पूर्वक्रियानुकर्षः । एतेन—

अहिताचरणात् हितोत्पत्तिप्रतीतिरनुकूलमिति लक्षणनिष्कर्षः ।

तत्प्रतीतिस्तु व्यञ्जनयैव । तेन "जीवनहेतोर्विमुञ्चति प्राणान्" इत्यादौ वक्ष्यमाणविचित्रालङ्कारस्थले जीवनादीनां वाच्यतया व्यञ्जनाजन्यप्रतीत्यभावान्नातिव्याप्तिः । अनुकूलमिति अलङ्कारशब्दसामानाधिकरण्येऽपि नपुंसकलिङ्गमेव दीपकमितिवदलङ्कारार्थे तथैव रूढेः । अनुकूलं हितमिति च नार्थान्तरम् ।

(झ) कुपितेति । मानिनीं प्रति तत्सख्याः सकौतुकोक्तिरियम् । हे तन्वि ! क्षीणाङ्गि ! यदा यदि त्वं कुपितासि प्रियं प्रति क्रुद्धासि, तदा करजक्षतं तद्धृदंशादौ नखक्षतं निधाय अर्पयित्वा, भुजपाशाभ्याम् अस्य प्रियस्य कण्ठं दृढं बधान बद्धं कुरु ।

अत्र करजक्षतस्य भुजपाशकरणकदृढकण्ठबन्धनस्य च स्वरूपतो दुःखकरत्वात् प्रतिकूलताचरणत्वमेव, किन्तु नायकपक्षे मदनोद्दीपकतया आलिङ्गनरूपेण पर्य्यवसिततया च ताभ्यां सुखोत्पत्तेरानुकूल्यजननमेवेत्यनुकूलालङ्कारः ।

(ञ) ननु भवदादर्शकाव्यप्रकाशादावनुकूलालङ्कारस्य यथासम्भवं विषमादावन्तःपातेन पृथगगणनात् भवता कथं गण्यत इत्याह अस्य चेति । स्फुरणात् प्रतीतेः ।

(ट) नन्वनुकूलालङ्कारे यथा उक्तातिरिक्तविशेषप्रतिपत्तिस्तथा अलङ्कारान्तरे अस्ति न वेत्याकाङ्क्षायामाक्षेपालङ्कारं लक्षयति वस्तुन इति । वक्तुमिष्टस्य वस्तुनो विषयस्य विशेषप्रतिपत्तये यत्किञ्चिदतिरिक्तत्वबोधाय, निषेधाभासो वस्तुत एव न निषेधः किन्तु उक्तवस्तुस्वरूपस्य वा निषेधवत् प्रकाशः, आक्षेपो नामालङ्कारो गद्यत इति पूर्वेण सह सम्बन्धः । तथा च विवक्षितविषये यत्किञ्चिदतिरिक्तं बोधयितुं विवक्षितविषयस्य वस्तुस्वरूपस्य वा निषेधवदङ्गीकरणमाक्षेप इत्यर्थः । स च प्रथमतो द्विधा—वक्ष्यमाणगो वक्ष्यमाणविषयगतः, तथा उक्तविषयगतश्चेति ।

आक्षेपो वक्तुमारब्धस्याकर्षणमसमाप्तावेव विरतीकरणमिति व्युत्पत्तिः ।

इस्तुस्वरूपस्य निषेधः, क्वचिद्वस्तुकथनस्येति द्वौ, इत्याक्षेपस्य चत्वारो भेदाः (ठ)। क्रमेण यथा—

"स्मरशरशतविधुराया भणामि सख्याः कृते किमपि ।
क्षणमिह विश्राम्य सखे ! निर्दयहृदयस्य किं वदाम्यथवा ॥" (ड)

अत्र सख्या विरहस्य सामान्यतः सूचितस्य वक्ष्यमाणविशेषे निषेधः (ढ)।

"तव विरहे हरिणाक्षी निरीक्ष्य नवमालिकां दलिताम् ।
हन्त ! नितान्तमिदानीम् आः ! किं हतजल्पितै रथवा ॥" (ण)

अत्र मरिष्यतीत्यंशो नोक्तः (त)।

"बालअ ! णाहं दूदी तस्स (१) पिओसि त्ति ण मह वावारो ।
सा मरइ तुज्झ अअसो एअं धम्मक्खरं भणिमो ॥" (थ)

(ठ) उक्तयोरपि भेदयोः प्रत्येकमेवावान्तरभेदद्वयसम्भवात् समुदायेन चतुर्विधत्वं दर्शयितुमाह अत्रेति। सर्वस्य सकलांशस्य सामान्यतः साधारणभावेन न तु स्पष्टत इत्यर्थः। अंशान्तरे वक्ष्यमाणे एकस्मिन्नंशे। वस्तुस्वरूपस्य वक्तृत्वादेः।

(ड) सर्वस्यापि सामान्यतः सूचितस्य निषेधे उदाहरति स्मरेति। नायिकाप्रेषितायाः सख्या नायकं प्रति उक्तिरियम्। हे सखे ! स्मरस्य मदनस्य शरशतेन शरशतप्रहारेण विधुरायाः विह्वलायाः सख्याः कृते निमित्ते किमपि भणामि ब्रवीमि ; तस्मात्, इह स्थाने क्षणं यावत् विश्राम्य विश्रामं कुरु ; अथवा निर्दयहृदयस्य तव समीपे किं वदामि अपि तु किमपि नेत्यर्थः।

(ढ) अत्रेति। सामान्यतः सूचितस्य "स्मरशरशतविधुरायाः" इति विशेषणमात्रेण द्योतितस्य, न तु "विरहिण्याः" इति स्पष्टत उक्तस्येत्यर्थः सम्बन्धिनि वक्ष्यमाणे विशेषे विवक्षितनितान्तदूरवस्थायां निषेधो मरणपर्यन्तरूपविशेषबोधाय "किं वदामि" इति वचनेन निषेधाभास इत्याक्षेपः।

(ण) अंशोक्तावंशान्तरनिषेधे दर्शयति तवेति। नायिकान्तिके नायिकादूत्या उक्तिरियम्। हरिणाक्षी मृगलोचना तव प्रियेत्यर्थः, तव विरहे, नवमालिकां तदाख्यं कुसुमम्, दलितां प्रस्फुटिताम्, निरीक्ष्य, हन्त खेदे, इदानीं नितान्तमेव मदनवेदनामनुभवतीति शेषः। "आः" इति पीडासूचकम्। अथवा हतजल्पितैः अनर्थकोक्तिभिः किम्, अपि तु किमपि नेत्यर्थः।

(त) अत्रेति। तथा च विरह इत्याद्यंशः स्पष्टमेवोक्तः, किन्तु अशक्यवक्तव्यत्वादिरूपविशेषप्रतिपत्तये विवक्षितो मरिष्यतीत्यंशो नोक्तः। एवञ्च "किं हतजल्पितैः—" इत्यनेन निषेधाभासादाक्षेपः।

(थ) वस्तुस्वरूपस्य निषेधे उदाहरणमाह बालअ इति। नायकं प्रति दूतीरूपेणागत्य नायिकासख्या उक्तिरियम्। "बालक ! नाहं दूती ; तस्याः प्रियोऽसि इति न मम व्यापारः। सा म्रियते तव अयश एतत् धर्म्माक्षरं भणामः ॥" इति संस्कृतानुवादः। हे बालक ! बालकवत् प्रेमावस्थानभिज्ञ ! अहं न

---

(१) तुज्झ इति क्वचित् पाठः।

अत्र दूतीत्वस्य वस्तुनो निषेधः (द)।

"विरहे तव तन्वङ्गी कथं क्षपयतु क्षपाम्।
दारुणव्यवसायस्य पुरस्ते भणितेन किम्॥" (ध)

अत्र कथनस्यैव निषेधः (न)।

प्रथमोदाहरणे सख्या अवश्यम्भावि मरणमिति विशेषः प्रतीयते। द्वितीये अशक्यवक्तव्यत्वादि। तृतीये अदूतीत्वे (१) यथार्थवादित्वम्। चतुर्थे दुःखस्यातिशयः (प)।

न चायं विहितनिषेधः, अत्र निषेधस्याभासत्वात् (फ)।

८६। अनिष्टस्य तथार्थस्य विध्याभासः परो मतः। (ब)

दूती; अतः अप्रगल्भाया मम वचनं सर्वथा विश्वसनीयमिति भावः। तस्या नायिकायास्त्वं प्रियोऽसि इति हेतोर्न मम व्यापारस्तवानुनयकरणम्। तर्हि कथमेवं ब्रवीषि इत्याह सा नायिका म्रियते मदनवेदनयेति भावः, तव अयशस्तन्मरणे सति निन्दा भवेत्, एतत् धर्म्माध्वरं न्यायसङ्गतवाक्यम्, भणामो वदामः।

(द) अत्रेति। विवक्षितविषये सख्या आत्मनो यथार्थवादित्वरूपविशेषप्रतिपत्तये दूतीत्वस्य दूतीत्वरूपस्य वस्तुनो निषेध इत्यर्थः। तेनाक्षेपोऽलङ्कार इति भावः।

(ध) कथनस्य निषेधे लक्ष्यमाह विरहे इति। नायकं प्रति विरहिणीसख्या उक्तिरियम्। तन्वङ्गी कृशाङ्गी, तव विरहे, कथं केन प्रकारेण क्षपां रात्रिं क्षपयतु अतिवाहयतु। दारुणव्यवसायस्य निर्दयत्वेन प्रवासात्मकभयङ्करकर्म्मणः, ते तव पुरः अग्रतः भणितेन तदवस्थाकथनेन किं फलम्, अपि तु किमपि नेत्यर्थः।

(न) अत्रेति। विवक्षिते नायिकाविरहविषये दुःखातिशयरूपविशेषप्रतिपत्तये कथनस्यैव तद्विषयकोक्तेरेव निषेधः, "भणितेन किम्" इत्यनेनेति शेषः। अतएवाक्षेपोऽलङ्कार इति भावः।

(प) नन्वेषूदाहरणेषु कुत्र कीदृशविशेषप्रतीतिरित्याह प्रथमेति। प्रथमोदाहरणे "स्मरशरशत" इत्यादौ। द्वितीये "तव विरहे" इत्यादौ, अशक्यवक्तव्यत्वादि वस्तु अशक्यवक्तव्यत्वादिरूपो विशेषः प्रतीयत इति पूर्वेणान्वयः। एवमुत्तरयोरपि। तृतीये "बालक! नाहं" इत्यादौ, अदूतीत्वे वक्तृनायिकाया दूतीभिन्नत्वे, यथार्थवादित्वं विशेषः। चतुर्थे "विरहे तव तन्वङ्गी" इत्यादौ विरहिण्या नायिकाया दुःखस्यातिशयो विशेषः।

(फ) ननु यथार्थ एवायं निषेधः किं न स्यात्, तथा च लक्षणे निषेधाभास इत्युक्तिरनुपपन्नेत्याह न चेति। अयं "स्मरशरशतविधुरायाः—" इत्यादौ प्रतीयमानः विहितः "अप्राधान्यं विधेयं त्र" इत्यादिना लक्षितो वास्तविक एवेत्यर्थः निषेध इति "वाच्यम्" न चेत्यर्थः। अत्र एषूदाहरणेषु निषेधस्य "किं वदामि" इत्यादिना प्रतीयमानस्येति तात्पर्य्यम्, आभासत्वात् भङ्गीमात्ररूपत्वात्, तथैव प्रतीतेरित्याशयः।

(ब) अन्यविधमाक्षेपालङ्कारमेव लक्षयति अनिष्टस्येति। अनिष्टस्य अर्थस्य विषयस्य, तथा पूर्ववत्

(१) दूतीत्वे इति पाठोऽपि दृश्यते।

तथेति पूर्ववद्विशेषप्रतिपत्तये । यथा—

"गच्छ गच्छसि चेत् कान्त ! पन्थानः सन्तु ते शिवाः ।
ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥" (भ)

अत्र अनिष्टत्वाद्गमनस्य विधिः प्रस्खलद्रूपो निषेधे पर्य्यवस्यति (म)। विशेषश्च गमनस्यात्यन्तपरिहार्य्यत्वरूपः प्रतीयते (य)।

८७। विभावना विना हेतुं कार्य्योत्पत्तिर्यदुच्यते ।
उक्तानुक्तनिमित्तत्वात् द्विधा सा परिकीर्त्तिता ॥ (र)

विशेषप्रतिपत्तये, विध्याभासः वस्तुतो न विधिः किन्तु विधिवत् प्रकाशो विधिवदङ्गीकरणम्, परः उक्तादन्यः अन्यविध आक्षेपो मतः । एतत्पक्षे तु आक्षेपोऽभिप्रेतनिषेधादाकर्षणम्, अथवा आक्षेपो निषेध्येऽपि विषये विधेः समर्पणमिति व्युत्पत्तिः ।

(भ) गच्छेति । विदेशगमनायानुमतिं प्रार्थयन्तं कान्तं प्रति कान्ताया उक्तिरियम् । हे कान्त ! तद्येद्विदेशं गच्छसि, गच्छ, ते तव पन्थानः शिवा मङ्गलमयाः सन्तु । किन्तु भवान् यत्र गतो भविष्यति, ममापि तत्रैव जन्म भूयात् । तथा च तव गमने विरहयातनया मम मरणस्यावश्यम्भावित्वात् मरणान्तरस्थाज्ञानिनो जनस्य पुनर्जन्मनोऽप्यवश्यम्भावात् तत्र पुनर्जन्म पुनर्विरहयातनाया असम्भवार्थं भवदन्तिक एव भूयादित्यात्मानं प्रत्याशीर्वादः ।

(म) नन्वत्र कथं विधेराभास इत्याह अत्रेति । विधिर्गच्छेति गमनविधिः, प्रस्खलद्रूपो भग्नप्रवर्त्तनाशक्तिः । तथा च बलवदनिष्टाननुबन्धीष्टसाधनं नाम विधिः, तस्य शक्तिश्चोद्देश्यविषये नियोज्यस्य प्रवर्त्तना नाम । एवञ्चोक्तोदाहरणे कान्तगमनस्य निजमरणसाधनतया अत्यन्तानिष्टत्वात् गच्छेत्यस्य विधित्वमेव नास्तीति तस्य प्रवर्त्तनाशक्तिरपि स्खलितैव । तेन गच्छेत्ययं विधिर्वेशो निषेध एवेत्याशयः ।

(य) अथ तथाप्यत्र कीदृशस्य विशेषस्य प्रतिपत्तिरित्याह विशेषश्चेति । गमनस्य विदेशे कान्तगमनस्य, अत्यन्तपरिहार्य्यत्वरूपः सर्वथैव परित्याज्यत्वरूपः, प्रतीयते आत्मजीवनस्य सर्वथैवेष्टत्वात् गमनपरिहारे च तत्स्थितिसम्भवादिति भावः ।

(र) हेतुघटितालङ्कारस्यैवात्र प्रक्रान्तत्वात् विशेषातिदिष्टेन च आक्षेपालङ्कारेण तद्बाधाया असम्भवादभावसम्बन्धेन हेतुघटितमेव विभावनालङ्कारं निरूपयति विभावनेति । हेतुं प्रसिद्धकारणं विना, यत् कार्य्यस्योत्पत्तिरुच्यते, स विभावना नाम अलङ्कार उच्यत इत्येवान्वयः । तथा च—

प्रसिद्धकारणाभावे कार्य्योत्पत्तिप्रतीतिर्विभावनेति सरलार्थः ।

सा च विभावना उक्तनिमित्तत्वात् उक्ताप्रसिद्धकारणत्वात्, अनुक्तनिमित्तत्वात् अनुक्ताप्रसिद्धकारणत्वाच्च द्विधा द्विप्रकारा परिकीर्त्तिता । यत्र कारणान्वयी नञादिस्तत्र विभावना, यत्र तु कार्य्यान्वयी नञादिस्तत्र विशेषोक्तिरित्यनयोर्भेदः । यद्वा विभावनाविशेषोक्तिविरोधानां परस्परभेदो विरोधप्रकरणे व्यक्तावेव वक्ष्यते ।

विभाव्यते प्रसिद्धकारणाभावात् विशेषेण चिन्त्यते कारणं यस्यामिति ण्यन्तभूधातोः "ण्यासश्रन्थो युच्—" इत्यादिना अधिकरणे बाहुलकाद्युच् ।

विना कारणमुपनिबध्यमानोऽपि कार्य्योदयः किञ्चिदन्यत् कारणमपेक्ष्यैव भवितुं युक्तः ; तच्च कारणान्तरं क्वचिदुक्तं क्वचिदनुक्तमिति द्विधा (ल)। यथा—

"अनायासकृशं मध्यमशङ्कतरले दृशौ ।
अभूषणमनोहारि वपुर्वयसि सुभ्रुवः ॥" (व)

अत्र वयोरूपनिमित्तमुक्तम् (श)। अत्रैव "वपुर्भाति मृगीदृशः" इति पाठे अनुक्तम् (ष)।

८८। सति हेतौ फलाभावः (१) विशेषोक्तिस्तथा द्विधा। (स)

(ल) ननु कारणाभावे कथं कार्य्योत्पत्तिरुपपद्यत इत्याह विनेति। उपनिबध्यमानः अभिधीयमानः, कार्य्यस्य उदय उत्पत्तिः। अन्यदप्रसिद्धम्। युक्त इति। कार्य्योत्पत्त्या यस्य कस्यचित् कारणस्य अवश्यमेवापेक्षणीयत्वात् अन्यथा कार्य्यत्वमेव न स्यादिति भावः। कारणान्तरमप्रसिद्धकारणम्।

(व) तत्र उक्तकारणे उदाहरति अनायासेति। कस्याश्चिद्युवत्या वर्णनमिदम्। वयसि यौवनकाले, शोभने भ्रुवौ यस्यास्तस्याः सुभ्रुवो रमण्याः, मध्यं कटिदेशः अनायासम् आयासेन परिश्रमेण रहितमपि कृशं क्षीणम्, दृशौ चक्षुषी, अशङ्के शङ्काहीने तथापि तरले चपले, तथा वपुर्देहः, अभूषणमलङ्काररहितं तथापि मनोहारि मनोहरं जातमिति शेषः। "वयः पक्षिणि बाल्यादौ यौवने च नपुंसकम्" इति मेदिनी।

अत्र अङ्गस्य कृशत्वं प्रति आयासः, दृशोस्तरलत्वं प्रति शङ्का, वपुषो मनोहारित्वं प्रति च भूषणं प्रसिद्धं कारणम्। तेषाञ्च आयासादीनामभावेऽपि कृशत्वादीनां कार्य्याणामुत्पत्तेर्विभावना। सा चात्र मालारूपा त्रयाणामुपनिबन्धनात्।

केवलरूपा यथा रघुवंशे—"स प्राप हृदयन्यस्त-मणिस्पर्शनिमीलितः।
अपयोधरसंसर्गां प्रियालिङ्गननिर्वृतिम् ॥"

अत्र पयोधरसंसर्गरूपकारणाभावेऽपि आलिङ्गननिर्वृतिरूपकार्य्योत्पत्तिर्विभावना।

(श) अत्रेति। वयोरूपं यौवनरूपं निमित्तं कृशत्वादीनामप्रसिद्धं कारणं यौवनेनैव कटिकृशत्वादीनां जननादिति भावः।

(ष) अनुक्तकारणे उदाहर्त्तुमाह अत्रैवेति। उक्तोदाहरण एवेत्यर्थः। पाठे चतुर्थचरणस्थाने इति शेषः, अनुक्तं निमित्तमिति पूर्वेणान्वयः। तथापि योग्यत्वादेव कृशत्वादिकं प्रति तादृशं वयोरूपमेव कारणमुपलभ्यते इति बोध्यम्।

(स) हेतुप्रकरणाद्विभावनाविपरीतत्वाच्च विभावनानिरूपणानन्तरं हेतुघटितमेव विशेषोक्त्यलङ्कारं निरूपयति सतीति। हेतौ प्रसिद्धकारणे, सति विद्यमाने, फलाभावः कार्य्यानुत्पत्तिर्विशेषोक्तिर्नाम अलङ्कार उच्यत इत्यनुषङ्गः। तथा च—

प्रसिद्धकारणसत्त्वेऽपि कार्य्यानुत्पत्तिप्रतीतिर्विशेषोक्तिरित्यर्थः।

---

(१) फलाभावे इति पाठान्तरम्।

तथेत्युक्तानुक्तनिमित्तत्वात् । तत्रोक्तनिमित्ता यथा—

"धनिनोऽपि निरुन्मादा युवानोऽपि न चञ्चलाः ।
प्रभवोऽप्यप्रमत्तास्ते महामहिमशालिनः ॥" (ङ)

अत्र महामहिमशालित्वं निमित्तमुक्तम् (च)। अत्रैव चतुर्थपादे "कियन्तः सन्ति भूतले" इति पाठे त्वनुक्तम् (क)। अचिन्त्यनिमित्तत्वञ्च अनुक्तनिमित्तस्यैव भेद इति पृथङ् नोक्तम् (ख)। यथा—

"स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरतापि तनुं यस्य शम्भुना न हृतं बलम् ॥" (ग)

अत्र तनुहरणेऽपि बलाहरणे निमित्तमचिन्त्यम् (घ)।

सापि च तथा पूर्ववदुक्तनिमित्तत्वात् अनुक्तनिमित्तत्वाच्चेत्यर्थः द्विधा द्विप्रकारा परिकीर्त्तिता। विशेषेण कारणविशेषेण अप्रसिद्धकारणग्रहणेनेत्यर्थः उक्तिः कार्य्योत्पत्तिकथनमिति विशेषोक्तिः। अनया सह अतद्गुणालङ्कारभेदस्तु तत्प्रकरणे वृत्तावेव वक्ष्यते।

(ङ) उक्तनिमित्ते उदाहरति धनिन इति। महामहिमशालिनस्ते पुरुषा धनिनः सन्तोऽपि निरुन्मादा मत्तताविहीनाः, युवानः सन्तोऽपि न चञ्चला न चपलस्वभावाः, तथा प्रभवः प्रभुत्वसम्पन्नाः सन्तोऽपि अप्रमत्ताः प्रमादशून्या अनवधानतारहिता इति यावत्।

अत्र उन्माद-चाञ्चल्य-प्रमादान् प्रति यथाक्रमं धन-यौवन-प्रभुत्वानि प्रसिद्धकारणानि। तथा च धनादिषु सत्स्वपि उन्मादादीनां कार्य्याणामनुत्पत्तेर्विशेषोक्तिः। तथा इयमपि मालारूपा पूर्ववदेव त्रयाणामुपनिबन्धनात्।

केवलरूपा यथा—"रघोरुदारे स्थितिमूलमग्निशुद्धौ त्वनिश्चयः।"

अत्र अग्निशुद्धिरूपे हेतौ सत्यपि निश्चयरूपतत्कार्य्याभावाद्विशेषोक्तिः।

(च) अत्रेति। तथा च धीरत्वरूपमहामहिमवशादेव उन्मादादयो न जाता इति भावः।

(क) अनुक्तनिमित्ते उदाहर्त्तुमाह अत्रैवेति। धनिन इत्यादावेवेत्यर्थः। अनुक्तं निमित्तमिति पूर्वेणान्वयः। अत्रापि योग्यत्वादेव तादृशमहामहिमशालित्वरूपं कारणमुपलभ्यते।

(ख) ननु काव्यप्रकाशे अलङ्कारकौस्तुभे च "अनुक्तनिमित्ता उक्तनिमित्ता अचिन्त्यनिमित्ता च" इत्युक्ता त्रिविधा विशेषोक्तिरुक्ता, त्वया तु अचिन्त्यनिमित्ता कथं नोक्तेत्याह अचिन्त्येति।

(ग) तत्राचिन्त्यनिमित्ते काव्यप्रकाशादाहृत्य उदाहरति स इति। स एक एव कुसुमायुधः कामः, त्रीणि जगन्ति स्वर्गमर्त्त्यपातालरूपाणि भुवनानि जयति। यस्य कुसुमायुधस्य तनुं देहं हरतापि नाशयतापि शम्भुना शिवेन बलं सामर्थ्यं न हृतं न नाशितम्।

(घ) अत्रेति। तनुहरणेऽपि बलविनाशं प्रति शरीरविनाशरूपे कारणे सत्यपीत्यर्थः, बलस्य अहरणे अविनाशविषये, निमित्तं कारणम् अचिन्त्यं चिन्तयित्वापि लब्धुं न शक्यम्। एवञ्च अस्य भेदस्य अनुक्त-

इह च कार्य्याभावः कार्य्यविरुद्धसद्भावमुखेनापि निबध्यते; विभावनायामपि कारणाभावः कारणविरुद्धसद्भावमुखेनापि (ङ)।

एवञ्च "यः कौमारहरः स एव हि वरः" (१४ पृष्ठे) इत्यादेरुत्कण्ठाकारणविरुद्धस्य निबन्धनाद्विभावना। "यः कौमारहरः—" इत्यादेः कारणस्य च कार्य्यविरुद्धाया उत्कण्ठाया निबन्धनाद्विशेषोक्तिः। एवञ्चात्र विभावनाविशेषोक्त्योः सङ्करः (च)। शुद्धोदाहरणन्तु मृग्यम् (छ)।

निमित्त एवान्तर्भावात् विशेषोक्तेस्त्रिविधत्वकल्पनमसमञ्जसमेवेति काव्यप्रकाशालङ्कारकौस्तुभकारयोर्मतं कटाक्षितमिति द्रष्टव्यम्।

(ङ) नन्वेवं विभावनाविशेषोक्त्योर्यथाक्रमं कारणाभाव-कार्य्याभावघटितलक्षणद्वये सति "यः कौमारहरः स एव हि वरः" इत्यादौ कारणाभावस्य कार्य्याभावस्य चादर्शनात् विभावनाविशेषोक्त्योर्गन्धोऽपि नास्ति। एवञ्च प्रथमपरिच्छेदे "अत्र हि विभावनाविशेषोक्तिमूलस्य सन्देहसङ्करालङ्कारस्य स्फुटत्वम्" इत्यभिधाय कथं काव्यप्रकाशकृता दत्तं तदुदाहरणमपि दूषितमित्याह इह चेति। विशेषोक्तौ चेत्यर्थः। कार्य्याभावः फलाभाव इत्यनेनोच्यमान इति तात्पर्य्यम्, कार्य्यस्य विरुद्धो विपरीतो यः पदार्थस्तस्य सद्भावमुखेनापि सत्तायाः प्रतिपादनद्वारापि। न केवलं "धनिनोऽपि निरुन्मादाः" इत्याद्युदाहृतवत् साक्षात् निःशब्दनञ्-शब्दादिना, किन्तु कार्य्यविरुद्धसद्भावमुखेनापि इत्यपेरर्थः। निबध्यते कविभिरिति शेषः।

तथा च—"ज्ञाने मौनम्, क्षमा शक्तौ, त्यागे श्लाघाविपर्य्ययः।"

इत्यत्र ज्ञानादिकार्य्यं बहुभाषित्वादिकम्, मौनादिकञ्च तद्विरुद्धम्, तस्य तस्य चोक्तिद्वारा बहुभाषित्वादिरूपकार्य्यस्याभावः कालिदासेन निबद्ध इति विशेषोक्तिरेव।

तथा विभावनायामपि कारणाभावः "विभावना विना हेतुम्" इत्यनेनाभिहित इत्यर्थः, कारणस्य विरुद्धो विपरीतो यः पदार्थस्तस्य सद्भावमुखेनापि सत्तायाः प्रतिपादनद्वारापि। न केवलम् "अनायासकृशं मध्यम्" इत्यादिवत् साक्षात् नञादिना किन्तु कारणविरुद्धसद्भावमुखेनापि इत्यपेरर्थः, निबद्धते कविभिरिति पूर्वेणान्वयः।

तथा च—"दैव्यामपि हि वैदेह्यां सापवादो यतो जनः।"

इत्यत्र अपवादं प्रति दोषित्वमेव कारणम्, तद्विरुद्धञ्च गुणवत्त्वम्। इत्यत्र अपिशब्देन वैदेहीगतपरमपातिव्रात्यलक्षणगुणवत्त्वस्य प्रतिपादनद्वारा दोषित्वरूपकारणस्याभावो भवभूतिना निबद्ध इति विभावनेव। एतद्विपरीतप्रकारानुसन्धाने तु उभयवाप्युक्तोभयालङ्कारस्य सम्भवेन सन्देहसङ्कर एवेति ध्येयम्।

(च) नन्वेतावता किमायातमित्याह एवञ्चेति। उक्तोभयविधनिबन्धनस्य महाकवीनां स्वभावत्वे चेत्यर्थः। इत्यादेः इत्याद्युक्तस्य, उत्कण्ठायाः कारणं तत्तद्वरादीनामभावस्तद्विरुद्धस्य तत्तद्वरादीनां सद्भावस्य, निबन्धनात् कविनोक्तत्वात् विभावना भवितुमर्हतीत्यर्थः। इत्यादेः इत्याद्युक्तस्य, कारणस्य तत्तद्वरादिसद्भावरूपस्य, कार्य्यम् उत्कण्ठाया अभावरूपम्, तद्विरुद्धाया उत्कण्ठाया उत्कण्ठासद्भावस्य, निबन्धनात् "चेतः समुत्कण्ठते" इत्यनेन कविनोक्तत्वात् विशेषोक्तिश्च भवितुमर्हतीति तात्पर्य्यम्। एवञ्च उक्तरीत्या विभावनाविशेषोक्त्योरुभयोरेव सम्भवे च, अत्र "यः कौमारहरः—" इत्यादिश्लोके। सङ्करः सन्देहसङ्करः। अतः प्रथमपरिच्छेदे उक्तोदाहरणे द्वैतयसङ्करालङ्कारस्य सर्वथा सद्भावेन अनलङ्कृतिवादिमते यद्दूषणमभिहितं तद्दु निर्वारमेवेति भावः।

८९ । जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः ॥
क्रिया क्रियाद्रव्याभ्यां यद्द्रव्यं द्रव्येण वा मिथः ।
विरुद्धमिव (१) भासेत विरोधोऽसौ दशाकृतिः ॥ (ज)

न च विभावनाविशेषोक्त्योर्लक्षणद्वये तत्तदभावबोधकपदनिवेशात् यत्र यत्र कारणकार्य्ययोः साक्षादभावबोधकनञादिसद्भावस्तत्र तत्रैव विभावनाविशेषोक्तिश्च वक्तव्या, न पुनर्लक्षणानन्तर्गतेन भवदुक्तमार्गेण कारणविरुद्ध-कार्य्यविरुद्धयोः सद्भावेनापीति वाच्यम्; उक्तविषये चित्रत्वस्य चमत्कारकत्वापत्तेः नञादिसद्भावेनेव तत्तद्विरुद्धसद्भावेनापि समानवैचित्र्यावगतेर्युक्तिसाम्याच्चेति जितं विश्वनाथेन ।

(छ) अथ तर्हि भवतैवोदाहृते "अनायासकृशं मध्यम्" इत्यादौ प्रागुक्तरीत्या विभावनास्थले अनायासं नाम परिश्रमाभावः, तत्कार्य्यञ्च स्थूलत्वम्, तद्विरुद्धञ्च कृशत्वमिति स्थूलत्वविरुद्धकृशत्वसद्भावमुखेन स्थूलत्वरूपकार्य्याभावस्य निबन्धनाद्विशेषोक्तेरपि सम्भवेन "यः कौमारहरः—" इत्यादिवदेव तयोः सङ्करापत्तिः । तथा "धनिनोऽपि निरुन्मादाः—" इत्यादौ पूर्वोक्तप्रकारेण विशेषोक्तिस्थलेऽपि निरुन्मादत्वं प्रति कारणम् अधनित्वम्, तद्विरुद्धञ्च धनित्वमिति अधनित्वविरुद्धधनित्वसद्भावमुखेन अधनित्वरूपकारणाभावस्य निबन्धनाद्विभावनाया अपि प्रसङ्गेन "यः कौमारहरः—" इत्यादिवदेव तयोः सङ्करापत्तिश्च स्यादित्यतस्तदभ्युपेत्याह शुद्धोदाहरणन्त्विति । उभयोरेवासङ्कीर्णोदाहरणन्त्वित्यर्थः, सम्यगमन्वेषणीयम् । तथा च मम—

"नलिनी मलिनीभूता पयोदपिहितेऽम्बरे । चन्द्रे चाप्युदिते सान्द्रे खस्थैवेयं कुमुद्वती ॥"

अत्र पूर्वार्द्धे कारणाभावेऽपि नलिन्या मालिन्यरूपकार्य्योत्पत्तेः शुद्धा विभावनैव; सा च सूर्य्यास्तगमनप्रत्यायकमेघकर्त्तृकाकाशाच्छादनरूपनिमित्तस्योक्तत्वादुक्तनिमित्ता । किन्तु तन्मालिन्याभावं प्रति प्रसिद्धकारणस्य तद्विरुद्धस्य वा अनुपादानाद्विशेषोक्तिगन्धोऽपि नास्ति । तथा परार्द्धे चन्द्रोदयरूपप्रसिद्धकारणे सत्यपि कुमुद्वत्याः प्रकाशरूपकार्य्याभावात् शुद्धा विशेषोक्तिरेव; सा चापि चन्द्रोदयप्रतीतिप्रतिबन्धकमेघकर्त्तृकाकाशावरणरूपनिमित्तस्योक्तत्वादुक्तनिमित्ता । किन्तु कुमुद्वत्याः प्रकाशं प्रति चन्द्रोदयस्य, सङ्कोचं प्रति च चन्द्रोदयाभावस्य कारणत्वेन खस्थत्वं प्रति कस्यापि कारणत्वाभावात् खस्थत्वं न कार्य्यमेव; तेन कारणाभावस्य कारणविरुद्धस्य वा सद्भावाभावाद्विभावनाया अपि सम्भावनैव नास्तीति ।

अत्र विशेषोक्तिविभावनयोः क्रमिकशुद्धोदाहरणत्वेन "धनिनोऽपि स्थिरस्वान्ता यौवने धर्म्मतत्पराः" इति रामचरणस्योदाहरणमत्यन्तभ्रमविजृम्भितमेव । तथाहि प्रथमपादे धनित्वरूपकारणे सत्यपि तत्कार्य्योन्मादविरुद्धस्थिरस्वान्तत्वसद्भावमुखेन तदुन्मादरूपकार्य्याभावस्य निबन्धनात् यथा विशेषोक्तिः; तथैव स्थिरस्वान्तत्वं प्रति अधनित्वमेव कारणमिति तद्विरुद्धधनित्वसद्भावमुखेन अधनित्वरूपकारणाभावस्य निबन्धनात् विभावनापि प्रसजतीति "यः कौमारहरः" इत्यादिवदेव सङ्करापत्तिर्दुर्निवारैव । एवमेव "यौवने धर्म्मतत्पराः" इत्यत्रापि सङ्करापत्तिरूहनीया ।

(ज) ननु यथा कार्य्ये बाध्यत्वप्रतीतौ विभावना कारणे बाध्यत्वप्रतीतौ च विशेषोक्तिस्तथा द्वयोरपि पदार्थयोः परस्परबाध्यत्वप्रतीतौ कश्चिदलङ्कारो भवति न वेत्याकाङ्क्षायां विरोधाभासालङ्कारं लक्षयति जाति-

(१) विरुद्धमेवेति क्वचित् पाठः ।

क्रमेण यथा—

"तव विरहे मलयमरुद्दवानलः शशिरुचोऽपि सोष्माणः।
हृदयमलिरुतमपि भिन्ते नलिनीदलमपि निदाघरविरस्याः॥" (भ)
"सन्ततमुषलासङ्गाद्बहुतरगृहकर्मघटनया नृपते!।
द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः॥" (ञ)

ति। अस्य "आपाततो विरुद्धवत् प्रतीतिर्विरोधाभासः" इति सामान्यलक्षणं "विरुद्धमिव भासेत" इति रिकानिर्देशानुसारादेवावगन्तव्यम्। विरुद्धत्वञ्च अतस्मिन् तद्धर्मनिर्देशः। यथा "तव विरहे मलयमरु-द्दवानलः" इत्यादौ दवानलभिन्ने मलयमरुति दवानलत्वनिर्देशः। आपातत इत्यभिधानादवसाने तादृश-विरोधसमाधानमावश्यकमेवेति बोध्यम्।

अत्र विरुद्धमित्यस्य यथासम्भवं लिङ्गविपरिणामेन सर्वत्रान्वयः। तथा च चतुर्भिर्जात्याद्यैः जाति-गुण-क्रिया-द्रव्यैः सह मिथः परस्परं यत् जातिर्विरुद्धेव भासेत प्रकाशेत इमे चत्वारः प्रकाराः। विभि-न्नादिभिः गुण-क्रिया-द्रव्यैः सह मिथो यत् गुणो विरुद्ध इव भासेत। इमे त्रयः प्रकाराः। क्रियाद्रव्याभ्यां सह मिथो यत् क्रिया विरुद्धेव भासेत। इमौ द्वौ प्रकारौ। तथा द्रव्येण वा सह मिथो यत् द्रव्यं विरुद्धमिव भासेत। अयमेकः प्रकारः। असौ, दश आकृतय आकाराः प्रकारा यस्य स दशाकृतिर्दशविधः, विरोधो विरोधाभासो नाम अलङ्कार उच्यते इत्यनुषज्यते। जात्या सह गुणस्य क्रियाया द्रव्यस्य वा यो विरोधः स तु तैः सह जातिविरोध एव, तस्य परस्परवृत्तित्वात्। अतएव दशाधिकप्रकारत्वं नाशङ्कनीयम्। अलङ्कारान्तरैः सह अस्य भेदस्तु वृत्तावेव वक्ष्यते।

विरोधस्य आभास आपाततः प्रतीतिरिति विरोधाभासपदव्युत्पत्तिः। अयन्तु निरुक्तकारिकायामिव क्वचित् विरोधपदेनापि प्रत्याय्यते, भीमपदेन भीमसेनवत्, "एकदेशेन समुदायो गम्यते" इति न्यायात्।

(भ) जात्यादिभिश्चतुर्भिः जातिर्विरोधे उदाहरति तवेति। पतिं प्रति विरहिणीदूत्या उक्तिरियम्। हे नायक! तव विरहे अस्या उल्लिखिताया नायिकायाः सम्बन्धे मलयमरुत् सुशीतलो मलयाचलवायुरपि, दवानलो दावाग्निः, तद्वद्दाहजनकत्वात्। शशिरुचोऽपि स्वभावशीतलाश्चन्द्रकिरणा अपि सोष्माण उष्णाः, तापकरत्वात्। अलिरुतमपि सुमधुरो भ्रमररवोऽपि हृदयं भिन्ते विदारयति, अतीवोद्दीपकत्वात्। तथा नलिनीदलमपि सुशीतलं पद्मिनीपत्रमपि निदाघरविर्ग्रीष्मकालीनसूर्यः, तथैव दाहकत्वात्। अत्र विरोधं समाधानञ्च वृत्तावेवानुपदमाह स्म। न च "मलयमरुद्दवानलः" इत्यत्र रूपकमेवेति वाच्यं श्रवणमात्रमेव प्रतीयमानया विरोधप्रतीत्या वाक्यार्थबोधानन्तरभाविन्याः सन्तापकत्वरूपसादृश्यप्रतीतेर्व्याहतत्वात्। न च "शशिरुचोऽपि सोष्माणः" इत्यादावतिशयोक्तिः, विरहिजनस्य शशिरुक्प्रभृतिषु सोष्मत्वादिप्रतीतेर्यथार्थत्वात्।

(ञ) गुणेन सह गुणस्य विरोधं दर्शयति सन्ततेति। राजस्तुतिरियम्। हे नृपते! सततं सर्वदा यो मुषलासङ्गः तण्डुलादिनिर्माणार्थं मुत्तोलननिपातनसमये मुषलस्य घर्षणं तस्माद्धेतोः, तथा बहुतराणां लेपना-दीनां गृहकर्मणां घटनया करणेन हेतुना, कठिनाः काठिन्यप्राप्ताः, द्विजपत्नीनां ब्राह्मणस्त्रीणां करा हस्त-

"अजस्य गृह्णतो जन्म निरीहस्य हतद्विषः ।
स्वपतो जागरूकस्य याथार्थ्यं वेद कस्तव ॥" (ट)
"वल्लभोत्सङ्गसङ्गेन विना हरिणचक्षुषः ।
राकाविभावरीजानिर्विषज्वालाकुलोऽभवत् ॥" (ठ)
"नयनयुगासेचनकं मानसवृत्त्यापि दुष्प्रापम् ।
रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे ॥" (ड)

"त्वद्वाजि—" इत्यादि (ढ)। "वल्लभोत्सङ्ग—" इत्यादिश्लोके चतुर्थपादे "मध्यन्दिनदिनाधिपः" इति पाठे द्रव्ययोर्विरोधः (ण)।

तत्रानि, भवति सति त्वयि राजनि जाते सति, सरोजसुकुमाराः पद्मवत् सुकोमलाः, जाता इति शेषः, भवद्दत्तधनेनैव रचितदासीदासादिभिस्तत्तत्कर्म्मानुष्ठापनात् स्वयं स्वयञ्च तदकरणादिति भावः।

अत्र कठिनत्वसुकुमारत्वयोर्गुणयोर्विरोधः, कालभेदाच्च तत्समाधानम्।

(ट) क्रियया सह गुणस्य विरोधे उदाहरणमाह अजस्येति। रघुवंशदशमसर्गस्थमिदं पद्यम्। हे भगवन्! अजस्य नित्यत्वात् जन्मरहितस्यापि मत्स्यकूर्म्मादिरूपेण जन्म गृह्णतः, निरीहस्य क्रियारहितत्वात् निश्चेष्टस्यापि हतद्विषो विनाशितशत्रोः, तथा जागरूकस्य चैतन्यरूपतया सर्वदा प्रबुद्धस्यापि स्वपतः प्रलयकाले निद्रां गच्छतः, तव को जनो याथार्थ्यं तत्त्वं स्वरूपं वेद जानाति, अपि तु कोऽपि नेत्यर्थः।

अत्रापि विरोधं तत्समाधानञ्च वृत्तावेव दर्शितवान्।

(ठ) द्रव्येण सह गुणस्य विरोधे उदाहरति वल्लभेति। वल्लभोत्सङ्गसङ्गेन प्रियतमक्रोडोपवेशनेन विना प्रियविच्छेदेनेत्यर्थः, हरिणचक्षुषो मृगलोचनाया नायिकायाः, राकाविभावरी पूर्णिमारात्रिर्जाया यस्य स पूर्णचन्द्र इति तात्पर्य्यम्, विषज्वालया आकुलः पूर्णः अभवत्।

अत्र कथ्यक्तित्वात् पूर्णचन्द्रो द्रव्यम् आकुलत्वञ्च गुणः अनयोर्विरोधः, विरहकाले अवस्थावैचित्र्यात् समाधानम्।

(ड) क्रियया सह क्रियाया विरोधे उदाहरणमाह नयनेति। काचित् सुन्दरीमवलोक्य कस्यचित् कामिन उक्तिरियम्। नयनयुगस्य असेचनकाम् अत्यन्ततृप्तिकरम्, "तदसेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात्" इत्यमरः। मानसवृत्त्यापि चित्तवृत्त्यापि दुष्प्रापं दुर्लभम्, निरतिशयपुण्येनैव प्राप्यत्वान्मम च तदभावादिति भावः, मदिराक्ष्याः खञ्जननयनाया इदं रूपं कर्त्तृ, मे मम हृदयं मदयति आमोदयति, दुनोति च सन्तापयति च।

अत्र मदयति दुनोतीति सुखोत्पादन-दुःखोत्पादनरूपयोः क्रिययोर्विरोधः, दृष्टिलाभेन मदयति भोगालाभेन च दुनोतीति हेतुभेदात् समाधानम्।

(ढ) द्रव्येण सह क्रियाया विरोधं दर्शयति त्वद्वाजीति। इत्यादि उदाहरणमिति शेषः। अत्रापि विरोधस्तत्परिहारश्च वृत्तावेव दर्शितः।

(ण) द्रव्येण सह द्रव्यस्य विरोधे उदाहर्तुमाह वल्लभेति। मध्यन्दिनदिनाधिपो मध्याह्नकालीन-

अत्र "तव विरहे" इत्यादौ पवनादीनां बहुव्यक्तिवाचकत्वाज्जाति-शब्दानां दवानलोष्म-हृदयभेदन-सूर्य्यैर्जाति-गुण-क्रिया-द्रव्यरूपैरन्योन्यं विरोधो मुखत आभासते, विरहहेतुकत्वात् समाधानम् (१) (त)। "अजस्य—" इत्यादौ अजत्वादिगुणस्य जन्मग्रहणादिक्रियया विरोधः, भगवतः प्रभावस्यातिशयित्वात्तु (२) समाधानम् (थ)। "वल्लभाजि—" इत्यादौ "हरोऽपि शिरसा गङ्गां न धत्ते" इति विरोधः, "वल्लभाजि—" इत्यादि-कवि-प्रौढ़ोक्त्या तु समाधानम् (द)। स्पष्टमन्यत् (ध)।

विभावनायां कारणाभावेनोपनिबध्यमानत्वात् कार्य्यमेव बाध्यत्वेन

सूर्यः, तद्वत् सन्तापकत्वादिति भावः। अत्र चन्द्रः सूर्य्यश्च एकैकमात्रव्यक्तित्वात् द्रव्यरूपः, भिन्नयोश्च तयोरभेदाभिधानाद्विरोधः, विरहकालीनत्वाच्च तत्समाधानम्।

(त) इदानीमुदाहृतेषु यथासम्भवं विरोधं तत्समाधानञ्च क्रमाद्दर्शयितुमाह अत्रेति। एतेषु उदाहृतेषु मध्ये इत्यर्थः। पवनादीनां पवनादिवाचकानाम्, बहुव्यक्तिवाचकत्वात् बहुव्यक्तिवाचकत्वेन तदीयशक्यतावच्छेदकानां समवायेन तत्र तत्र वृत्तित्वसम्भवेन च "नित्यानेकसमवेता जातिः" इति लक्षणव्यापनादित्यर्थः, जातिशब्दानां जातिविशिष्टबोधकशब्दानाम्। दवानलत्वं जातिः, उष्मत्वं गुणः, हृदयभेदनं क्रिया, सूर्य्यश्च द्रव्यमिति तद्रूपैरिति यथासंख्येनान्वयः। मुखतः प्रथमतः, आभासते प्रकाशते। विरहो हेतुर्यस्य विरोधस्य स तथोक्तस्तस्य भावस्तस्मात् तादृशतादृशविरोधस्य विरहेणैव जनितत्वादित्यर्थः, समाधानं तत्तद्विरोधस्य भञ्जनम्। प्रियतमविच्छेददशायां हि प्रेमिकजनानां कामोद्दीपकः समस्तपदार्थ एव कामसन्तापं जनयतीति एकादृशपदार्थानामन्यादृशप्रतीतेः सम्भवपरत्वान्न कश्चिद्विरोध इत्याशयः। एवमन्यत्राप्यवधेयम्।

(थ) अजस्येति। कारिकायां जातिक्रिययोः पृथगुपादानात् गुणपदेन जातिक्रियाभिन्नस्य द्रव्यवृत्तिपदार्थमात्रस्यैव ग्रहणात् अभावरूपयोरपि अजत्वनिरीहत्वयोर्गुणत्वेन ग्रहणमित्याशयेनाह अजत्वादिगुणस्येति। प्रथमादिपदेन निरीहत्वजागरूकत्वयोः द्वितीयादिपदेन च अव्युहनन-स्वपनयोर्ग्रहणम्। अतिशयित्वात् आतिशयत्वेन अचिन्त्यत्वात्। तथा च यदस्माभिरसम्भवं मन्यते, तत्तत्र प्रभावातिशयात् सर्वथैव सम्भवतीति नारायणे तादृशविरुद्धधर्म्मसमावेशोऽपि सम्भवत्येवेति भावः। एवमन्यत्राप्यूह्यम्।

(द) वल्लभाजीति। एकमात्रव्यक्तित्वेन हरो द्रव्यं तस्य च शिरसा गङ्गाया धारणं नियतम्, अत्र च तदभावाभिधानेन गङ्गाधारणकर्त्तरि तदधारणकर्त्तृधर्म्मनिर्द्देशस्यावगतेर्द्रव्येण सह क्रियाया विरोध इत्यर्थः। कवेः प्रौढ़ोक्त्या यत्नपूर्वकाभिधानेन। तथा च कवयः खलु वाग्वैचित्र्यसम्पादनार्थं बलेनालीकमप्यभिदधतीति तत्र दृश्यमानो विरोधोऽलीकत्वाद्वस्तुतोऽविरोध एवेत्याशयः। इत्थमन्यत्राप्यनुसन्धेयम्।

(ध) स्पष्टमिति। अन्यत् "सन्ततमुसलासङ्गात्" इत्यादौ "वल्लभोत्सङ्गसङ्गेन" इत्यादौ "नयनयुग" इत्यादौ च विरुद्धत्वं समाधानञ्च स्पष्टम्, अतो न दर्शितं इत्याशयः।

---

(१) अत्र इत्यधिकः क्वचित् पाठः। (२) अतिशयितत्वात्तु इति पाठान्तरम्।

प्रतीयते, विशेषोक्तौ च कार्य्याभावेन कारणमेव, इह तु अन्योन्यं द्वयोरपि बाध्यत्वमिति भेदः (न)।

९०। कार्य्यकारणयोर्भिन्न-देशतायामसङ्गतिः। (प)

यथा—"सा बाला वयमप्रगल्भमनसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयम्।
साक्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयं
दोषैरन्यजनाश्रितैः अपटवो जाताः स्म इत्यद्भुतम्॥" (फ)

(न) ननु विभावनायां विशेषोक्तौ च तथा तथा विरोधप्रतीतिस्ताभ्यां सह अस्य को भेद इत्याह विभावनायामिति। उपनिबध्यमानत्वादभिधीयमानत्वात्। कार्य्यमेव, न तु कारणमित्येवशब्दार्थः, तस्य चानुपनिबध्यमानत्वात् तत्प्रतीतेरेवाभावादित्याशयः। एवमुत्तरत्रापि बाध्यत्वेन उत्पत्त्ययोग्यत्वेन। कार्य्याभावेन उपनिबध्यमानत्वादिति पूर्वेणान्वयः। कारणमेव, न तु कार्य्यमित्येवशब्दार्थः, बाध्यत्वेन प्रतीयत इत्यनुषज्यते। बाध्यत्वेन कुतोऽपि कारणादुत्पादनयोग्यत्वेन। इह तु विरोधाभासे तु, अन्योन्यं परस्परम्, द्वयोरपि कार्य्यकारणयोस्तद्भिन्नयोर्वा पदार्थयोः, बाध्यत्वं विरोधवशादेवासम्भवत्वं प्रतीयत इति पूर्वेणान्वयः।

तदिदं विरोधाभासभेदसङ्कलनम्।

प्रकारः।		उदाहरणम्।
१। जात्या सह जातेर्विरोधः	...	"मलयमरुद्दवानलः।"
२। जात्या सह गुणस्य विरोधः	...	"शशिरुचोऽपि सोष्माणः।"
३। जात्या सह क्रियाया विरोधः	...	"हृदयमलिरुतमपि भिन्ते।"
४। जात्या सह द्रव्यस्य विरोधः	...	"नलिनीदलमपि निदाघरविः।"
५। गुणेन सह गुणस्य विरोधः	...	"कठिनकराः सुकुमाराः।"
६। गुणेन सह क्रियाया विरोधः	...	"अजस्य गृह्णतो जन्म।"
७। गुणेन सह द्रव्यस्य विरोधः	...	"राकाविभावरीजानिर्विषज्वालाकुलः।"
८। क्रियया सह क्रियाया विरोधः	...	"रूपमिदं हृदयं मदयति दुनोति च।"
९। क्रियया सह द्रव्यस्य विरोधः	...	"हरोऽपि शिरसा गङ्गां न धत्ते।"
१०। द्रव्येण सह द्रव्यस्य विरोधः	...	"राकाविभावरीजानिर्मध्यन्दिनदिनाधिपः।"

(प) विरोधप्रस्तावाद्विरोधविशेषघटितमेव असङ्गत्यलङ्कारं निरूपयति कार्य्येति। कार्य्यकारणयोर्भिन्नदेशतायां भिन्नाधिकरणत्वे सति, असङ्गतिर्नाम अलङ्कार उच्यते, कार्य्यकारणयोर्वैयधिकरण्यमेव असङ्गतिरित्यर्थः। विरोधेन सह अस्या भेदस्तु वृत्तावेवोक्तः।

कार्य्यकारणयोः सामानाधिकरण्यनियमेन वैयधिकरण्ये कार्य्योत्पत्तेरेवासङ्गत्या अस्य असङ्गतिरिति नाम। "वनेऽस्ति दण्डो भवने घटश्च" इत्यादौ कार्य्यकारणयोर्वैयधिकरण्येऽपि वैचित्र्याभावान्नायमलङ्कारः।

अस्याश्चापवादत्वादेकदेशस्थयोर्विरोधे विरोधालङ्कारः (ब)।

६१। गुणौ क्रिये वा यत् (१) स्यातां विरुद्धे हेतुकार्य्ययोः॥
यद्वारब्धस्य वैफल्यम् (२) अनर्थस्य च सम्भवः।
विरूपयोः सङ्घटना या च तद्विषमं मतम्॥ (भ)

(फ) सेति। अमरुशतके काचित् सुन्दरीमवलोक्य गत्वा सखायं प्रति कस्यचित् कामिन उक्तिरियम्। सा अवलोकितपूर्वा सुन्दरी, बाला बालिका, किन्तु वयं "वाग्मदय" इति बहुवचनादहमित्यर्थः, प्रगल्भा एवम्। अप्रगल्भमनसः अधृष्टचित्ताः, तदानीं किमपि वक्तुमक्षमत्वादिति भावः। सा स्त्री, वयन्तु कातरा दुर्बलाः, तदन्तिके अनुनयादिप्रवणत्वादित्याशयः। सा बाला, पीनं स्थूलञ्च तत् उन्नतिमत् तुङ्गतायुक्तञ्चेति तत् तादृशं पयोधरयुगं स्तनद्वयं धत्ते धारयति, किन्तु वयं सखेदाः क्लान्तियुक्ताः, कामभाराक्रान्तत्वादित्यभिप्रायः। तथा सा नायिका, गुरुणा विशालेन जघनस्थलेन आक्रान्ता, किन्तु वयं न गन्तुं शक्ताः, तां परित्यक्तुं मनसः सर्वथैवानिच्छुत्वादिति भावः। अतएव अन्यजनाश्रितैर्दोषैर्वयम् अपटवः कर्त्तव्यकर्म्मासमर्था जाताः स्म इत्यद्भुतमाश्चर्य्यम्।

अत्र कारणीभूतानां बालत्वादीनां नायिकानिष्ठत्वात् तत्कार्य्यभूतानामप्रगल्भमनस्त्वादीनाञ्च वक्तृनिष्ठत्वादसङ्गतिरलङ्कारः। इयं मालारूपा।

केवलरूपा यथा नैषधे—"अजस्रमारोहसि दूरदीर्घां सङ्कल्पसोपानततिं तदीयाम्।
श्वासान् स वर्षत्यधिकं पुनर्यत् ध्यानात्तव त्वन्मयतामवाप्य॥"

अत्र सोपानारोहणं दमयन्त्याम् अधिकश्वासास्तु नले इति कारणकार्य्ययोर्वैयधिकरण्यादसङ्गतिः।

(ब) ननूदाहृते यथासम्भवं विरुद्धवद्भासनाद्विरोधालङ्कार एवास्तामित्याह अस्याश्चेति। असङ्गतेरित्यर्थः। अपवादत्वात् केवलकार्य्यकारणवैयधिकरण्यविषयकतया विशेषरूपत्वेन बाधकत्वात्, एकदेशस्थयोः समानाधिकरणयोः कार्य्यकारणयोरिति शेषः। सामान्यविशेषन्यायादिति भावः।

(भ) प्राकरणिकं विरोधमादायैव विषमालङ्कारं लक्षयति गुणाविति। हेतुकार्य्ययोर्गुणौ यत् विरुद्धौ स्यातां क्रिये वा यद्विरुद्धे स्यातामित्यन्वयः। तथा च कार्य्यगुणो यत् कारणगुणाद्विरुद्धः स्यात्। अयमेकः प्रकारः। अथवा कार्य्यगतक्रिया यत् कारणगतक्रियातो विरुद्धा स्यादित्यर्थः, अयं द्वितीयः प्रकारः। वा अथवा आरब्धस्य कर्म्मणो वैफल्यं निष्फलत्वम् अनर्थस्य अनिष्टस्य च सम्भव उत्पत्तिः स्यात्। इति तृतीयः प्रकारः। या च विरूपयोर्विपरीतयोः पदार्थयोः सङ्घटना संयोजना एकत्र सम्मेलनम्। इति चतुर्थः प्रकारः। तत् विषमं नामालङ्करणं मतम्। एष च विषमशब्दो वाच्यलिङ्गः, तेन अलङ्कारशब्दविशेषणत्वे विषम इति पुंलिङ्गोऽपि। अतएव काव्यप्रकाशे अलङ्कारकौस्तुभे च विषम इति पुंसैव निर्द्देशः।

एकदेशस्थयोर्विरोधे विरोधाभासः, कार्य्यवृत्तित्वेन कारणवृत्तित्वेन च भिन्नदेशस्थयोर्विरोधे तु विषम इत्यनयोर्भेदः। गुणयोः क्रिययोर्वा विरुद्धत्वेन विरूपयोः सङ्घटनयैव गतार्थत्वेऽपि वैचित्र्यापार्थक्यादेव पृथगुपन्यासः। व्याख्यातरूपेण गुणादीनां वैषम्यादेवास्य विषम इति संज्ञा।

---

(१) चेत् इत्यपि पाठः। (२) वैकल्यमिति पाठान्तरम्।

क्रमेण यथा—

"सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा ।
तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोकाभरणं (१) प्रसूते ॥" (म)

अत्र कारणरूपासिलतायाः "कारणगुणा हि कार्य्यगुणमारभन्ते" इति स्थितेर्विरुद्धा शुक्लयशस उत्पत्तिः (य) ।

"आनन्दममन्दमिमं कुवलयदललोचने ! ददासि त्वम् ।
विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥" (र)

अत्र आनन्दजनकस्त्रीरूपकारणात् तापजनकविरहोत्पत्तिः (ल) ।

"अयं रत्नाकरोऽम्भोधिरित्यसेवि धनाशया ।
धनं दूरेऽस्तु वदनमपूरि क्षारवारिभिः ॥" (व)

(म) कार्य्यकारणगतयोर्गुणयोर्विरोधे उदाहरति सद्य इति । राजविशेषस्य वर्णनमिदम् । रणे रणे सर्वेष्वेव युद्धेष्वित्यर्थः, तमालनीला तमालपल्लववत् नीलवर्णा कृपाणलेखा असिलता, यस्य राज्ञः करस्पर्शं हस्तसम्बन्धम् अवाप्य प्राप्य शरदिन्दुवत् शरच्चन्द्रवत् पाण्डु शुभ्रवर्णम्, त्रिलोकाभरणं त्रिभुवनालङ्काररूपं यशः, सद्य एव प्रसूते शत्रुविजयादुत्पादयति, एतदेव चित्रमाश्चर्य्यम् ।

(य) उदाहृते कार्य्यकारणगतगुणयोर्विरोधं दर्शयितुमाह अत्रेति । आरभन्ते उत्पादयन्ति । स्थितेर्नियमस्य । अत्रायं सरलार्थः—कृपाणलेखयैव यशोजननात् कृपाणलेखा कारणं यशश्च कार्य्यम्, तत्र च कृपाणलेखायां नीलो गुण इति कार्य्येऽपि यशसि "कारणगुणा हि" इत्यादिनियमात् नीलगुणस्यैव सम्भवे तद्विरुद्धस्य शुक्लगुणस्य उत्पत्तिरिति विषमालङ्कार इति ।

(र) कार्य्यगतकारणगतक्रिययोर्विरोधे उदाहरणमाह आनन्दमिति । हे कुवलयदललोचने ! नीलोत्पलपत्रतुल्यनेत्रे ! त्वमिमम् अमन्दमनल्पं बहुलमित्यर्थः आनन्दं ददासि आलिङ्गनादिना जनयसि; किन्तु त्वयैव पित्रालयगमनादिना जनितो विरहः, मे मम शरीरं तापयतितरामत्यन्तं सन्तापं जनयति । एतदाश्चर्य्यमेवेति भावः ।

(ल) अत्रेति । एष च सरलार्थः—"विरहस्त्वयैव जनितः" इत्युक्तेः स्त्री कारणम्, विरहश्च तत्कार्य्यम्; तेन स्त्रियां सुखजननक्रियेति "कारणगुणा हि" इत्यादिनियमेन विरहेऽपि सुखजननक्रियाया एव सम्भवे दुःखजननक्रियोत्पत्तेर्विरुद्धत्वाद्विषमालङ्कारः ।

(व) आरब्धवैफल्ये अनर्थसम्भवे च लक्ष्यं दर्शयति अयमिति । कस्यचिद्दरिद्रस्य मनोरथस्योक्तिरियम् । अयम् अम्भोधिः सागरः, रत्नानामाकरः उत्पत्तिस्थानम्, इति मत्वा धनाशया धनलाभेच्छया असेवि उपकूलं विचरणादिना सेवितः । किन्तु धनं धनलाभो दूरे अस्तु तिष्ठतु, प्रत्युत क्षारवारिभिर्लवणाक्तजलैर्वदनं मुखम् अपूरि पूरितम् । अहो ! महद्दुःखमेवैतदिति भावः ।

(१) त्रिलोक्याभरणमिति क्वचित् पाठः ।

अत्र केवलं काङ्क्षितधनलाभो नाभूत्, प्रत्युत क्षारवारिभिर्वदनपूरणम् (ग)।

"क्व वनं तरुवल्कभूषणं नृपलक्ष्मीः क्व महेन्द्रवन्दिता ।
नियतं प्रतिकूलवर्त्तिनो बत धातुश्चरितं सुदुःसहम् ॥" (घ)

अत्र वन-राजश्रियोः (१) विरूपयोः सङ्घटना (ङ)। इदं मम ।

यथा वा—(ह)

"विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये ।
मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकया दृशा ॥" (च)

(ग) अत्रेति । केवलमित्यस्यार्थे । तथा च काङ्क्षितधनलाभो नाभवदेवेत्यर्थः । तथाहि धनलाभानवाप्त्या आरब्धस्य समुद्रसेवनस्य वैफल्यम्, अनिष्टस्य च क्षारवारिकरणकवदनपूरणस्य सम्भव इति विषमालङ्कारः ।

(घ) विरूपयोः सङ्घटनायामुदाहरति क्वेति । श्रीरामे वनं गते दशरथस्य विलापोऽयम् । तरुवल्कानि तरुवल्कलान्येव भूषणानि यस्मिन् तत्तादृशं वनं क्व कुत्र । तथा महेन्द्रवन्दिता देवराजेनापि पूजिता, नृपलक्ष्मी राजलक्ष्मीः क्व कुत्र । अनयोरत्यन्तमेव वैषम्यमिति भावः । तथा च प्रतिकूलवर्त्तिनो धातुर्विधातुः, चरितं व्यवहारः, नियतं निश्चितमेव सुदुःसहम् । राजलक्ष्मीसम्भोगयोग्यतस्य श्रीरामस्य सहसैव तादृशवनगमनाश्रयादिति भावः । बत खेदे ।

(ङ) अत्रेति । सङ्घटना एकस्मिन्नेव पद्ये संयोजनम् ; अतोऽत्र विषमालङ्कार इति भावः । अत्र 'एकस्मिन् वस्तुनि श्रीरामे अत्यन्तमसम्भवतीवनवासराजश्रीलाभयोर्मेलनम् । वस्तुतस्तु तदानीं श्रीरामस्य राजश्रीलाभ एव नास्ति इति न विरूपयोः सङ्घटनम्" इत्याद्यभिधाय चतुर्थप्रकारविषमासम्भवं दर्शयित्वा उदाहृते रामचरणस्य तृतीयप्रकारविषमसिद्धान्तयित्नाः । न खलु एकस्मिन् वस्तुनि विरूपयोः सङ्घटनाव विवक्षिता, अपि तु एकस्मिन् पद्यादावेव । अन्यथा "क्व सूर्य्यप्रभवो वंशः क्व चाल्पविषया मतिः" इत्यादावपि एकस्मिन् वस्तुनि तादृशवंशमत्योरसत्त्वात् विषमालङ्कारो न स्यात् । किञ्च, अनुपदमुदाह्रियमाणे विपुलेनेत्यादौ अतिविशालत्वं नारायणे अतिक्षुद्रत्वञ्च पुरस्त्रिया दृशि इति भिन्नभिन्नवस्तुनि स्थितयोर्विरूपयोः सङ्घटनायां दृष्टान्ततया प्रदर्श्यमानो विषमालङ्कारः कथमुपपद्यते । किञ्च, प्रबन्धार्थमादाय लक्ष्यमाणो विरूपसङ्घटनाघटितो विषमालङ्कार आसत्तियुक्तैकप्रबन्धनार्थ एव विरूपयोः सङ्घटनायां भवितुं युक्त इत्युदाहृते चतुर्थप्रकार एव ग्रन्थकारसम्मतो विषमालङ्कारः सर्वथा सङ्गच्छत इति ध्येयम् ।

(ह) प्रकारान्तरेण विरूपयोः सङ्घटनायामेवोदाहर्त्तुमाह यथा वेति ।

(च) विपुलेनेति । शिशुपालवधत्रयोदशसर्गस्थमिदं पद्यम् । युगक्षये प्रलयकाले, सागरशयस्य समुद्रशयितस्य यस्य श्रीकृष्णस्य, विपुलेन विशालेन, कुक्षिणा उदरेण, भुवनानि त्रीणि जगन्ति पपिरे पीतानि ; स श्रीकृष्णः, एकतमया पुरस्त्रिया, मदविभ्रमेण मदनमदजनितविकारेण असकलया असमग्रया एकाकीणमात्रव्यापारया दृशा चक्षुषा पुनः पपे पीतः, एकनयन कटाक्षेणैव सर्वाङ्गेषु दृष्ट इत्यर्थः ।

---

(१) वनराज्यश्रियोः इति क्वचित् पाठः ।

९२ । समं स्यादानुरूप्येण श्लाघा योग्यस्य वस्तुनः । (क)

यथा—"शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा ।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥" (ख)

९३ । विचित्रं यद्विरुद्धस्य कृतिरिष्टफलाय चेत् ॥ (ग)

अत्र भगवानतिविशालः: एकनयनं कक्षीणस्य अतिचुद्र इत्यनयोर्विरूपयोः सङ्घटनया विषमालङ्कार इति ग्रन्थकारस्याशयः । इममेव श्लोकमुदाहृत्य काव्यप्रकाशकृता "इत्यादावपि विषमत्वं ययोर्योगमवगन्तव्यम" इत्युक्तम् । तत्र च तदीयटीकाकृता महेश्वरेण कार्यकारणगतक्रियाविरोधेन विषमालङ्कारो दर्शितः । तत्र च तर्कवागीशेन युक्तमेव दूषणमुपन्यस्तमित्यनुसन्धेयम् । मल्लिनाथस्तु उदाहृते अधिकालङ्कारमाह स्म, तन्न मनोरमम्, यस्मात आश्रयाश्रयिभावप्रतीत्यभावात् तथा प्रतीतावेव च तदलङ्काराङ्गीकारात् ।

(क) ननु विरूपयोः सङ्घटनया विषमालङ्कार इव अनुरूपयोः सङ्घटनया कश्चित्तद्विपरीतोऽलङ्कारो भवति न वेत्याकाङ्क्षायां समालङ्कारं निरूपयति सममिति । आनुरूप्येण परस्परसदृशरूपत्वेन हेतुना, योग्यस्य वस्तुनः अनुरूपपदार्थेन सह अनुरूपपदार्थान्तरयोगस्येत्यर्थः: श्लाघा साधुवादः, समं नाम अलङ्कारं स्यात् ।

अतएव समाना मा मानं ज्ञानं यस्मिन् तत् सममिति व्युत्पत्तिः । अथ समशब्दोऽपि पूर्ववद्वाच्यलिङ्गः ।

(ख) इदञ्च सद्योगे असद्योगे च सम्भवतीति द्विधा । तत्र सद्योगे उदाहरति शशिनमिति । रघुवंशे षष्ठसर्गे अजे इन्दुमत्या स्वयं वृते पौराणामुक्तिगर्भा कवेरुक्तिरियम् । तत्र स्वयंवरे, समगुणयोः समानसौन्दर्य्यादिगुणकयोः इन्दुमत्यजयोः योगेन सम्मेलनेन प्रीतिरानन्दो येषां ते तथोक्ताः पौरा जनाः, इयमिन्दुमती, मेघमुक्तं वर्षाकालातीतं शशिनं शरच्चन्द्रम्, उपगता प्राप्ता, कौमुदी ज्योत्स्ना तद्रूपेत्यर्थः; तथा अनुरूपं स्वसदृशं जलनिधिं समुद्रम्, अवतीर्णा प्रविष्टा जह्नुकन्या गङ्गा तत्स्वरूपेति तात्पर्य्यम्, इति इत्थं नृपाणाम् इन्दुमतीलिप्सया उपस्थितानामपरेषां राज्ञाम्, श्रवणकटु श्रुतिदुःखावहम्, एकवाक्यम् अभिन्नवचनं विवव्रुः प्रकाश्य कथयामासुः ।

अत्र अनुरूपवरेण अजेन सह इन्दुमत्याः सम्मेलनस्य साधुवादात् समालङ्कारः ।

असद्योगे यथा काव्यप्रकाशधृतम्—

"चित्रं चित्रं बत बत महच्चित्रमेतद्विचित्रं जातो दैवादुचितरचनासंविधाता विधाता ।
यन्निम्बानां परिणतफलस्फीतिरास्वादनीया यच्चैतस्याः कवलन-कला-कोविदः काकलोकः ॥"

अत्र काकानुरूपे निम्बफले काकस्यैव योग इति योग्यस्य साधुवादात् समालङ्कारः ।

(ग) विरोधस्य प्रकृतत्वात् विशेषातिदिष्टेन च समालङ्कारेण तद्बाधया असम्भवाद्विरोधघटितमेव विचित्रालङ्कारं लक्षयति विचित्रमिति । चेद्यदि विरुद्धस्य इष्टविपरीतस्य कृतिः करणम्, इष्टफलाय अभिलषितफलसिद्धये सम्पद्यत इति शेष, तदा तत् विचित्रं नाम अलङ्कारः स्यात् ।

यथा—"प्रणमत्युन्नतिहेतोर्जीवितहेतोर्विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः को मूढः सेवकादन्यः ॥" (घ)

९४ । आश्रयाश्रयिणोरेकस्याधिक्येऽधिकमुच्यते । (ङ)

आश्रयाधिक्ये यथा—

"किमधिकमस्य ब्रूमो महिमानं वारिधेर्हरिर्यत्र ।
अज्ञात एव शेते कुक्षौ निक्षिप्य भुवनानि ॥" (च)

आश्रिताधिक्ये यथा—

"युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत ।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः ॥" (छ)

विरोधाभासे विषमे च विरोधः स्वतः सम्भवी, इह तु विरुद्धार्थं विरुद्धस्य करणमिति विशेषः । अनुकूलालङ्कारेण सह अस्य भेदस्तु तत्प्रकरण एव दर्शितः ।

विपरीतफलाय विपरीतस्य करणादेवास्य विचित्रमिति संज्ञा । विचित्रमाश्चर्यम् । अतएवैतदलङ्कारार्थे विचित्रशब्दो नित्यनपुंसकलिङ्गः ।

(घ) प्रणमतीति । उन्नतिहेतोरभ्युदयनिमित्तं प्रणमति स्वामिसन्निधाने प्रणतो भवति, सेवक इति शेषः । एवमन्यत्रापि । जीवितहेतोर्वेतनलाभादिना प्राणरक्षानिमित्तम्, प्राणान् विमुञ्चति युद्धादौ परित्यजति । तथा सुखहेतोः सुखसम्पादननिमित्तम्, दुःखीयति परिश्रमाय प्रवर्त्तमानो दुःखमिच्छति । अतएव सेवकादन्यः को जनो मूढः, अपि तु कोऽपि नेत्यर्थः ।

अत्र उन्नत्यादीष्टफललाभाय तद्विरुद्धप्रणत्यादिकरणात् विचित्रालङ्कारः । इयन्तु मालारूपा ।

केवलरूपा यथा महिम्नःस्तवे—"न कस्या उन्नत्यै भवति शिरसस्त्वय्यवनतिः ।"

(ङ) अथ सम्पूर्णवैरूप्ये विचित्रालङ्कार इव किञ्चिद्वैरूप्ये किञ्चिदलङ्कारान्तरं स्यान्न वेति जिज्ञासायामधिकालङ्कारमाह आश्रयेति । आश्रयाश्रयिणोराधाराधेययोर्मध्ये एकस्य एकतरस्य आधिक्ये विशालत्वे सति अधिकं नाम अलङ्कार उच्यते ।

आधाराधेययोर्न्यूनत्वाधिकत्वाभ्यां वैरूप्ये अधिकम्, तदितरवैरूप्ये तु विषममित्यनयोर्भेदः, सामान्यविशेषन्यायात् । अत्र व्युत्पत्तिः स्पष्टा । एतदलङ्कारार्थे अधिकशब्दोऽपि नित्यनपुंसकः । "विशालशय्यायां शिशुः शेते" इत्यादौ तु वैचित्र्याभावान्नायमलङ्कारः ।

(च) किमिति । अस्य वारिधेः क्षीरोदसागरस्य अधिकं महिमानं विशालत्वं किं ब्रूमः ; यत्र क्षीरोदवारिधौ, हरिर्नारायणः, कुक्षौ उदरे भुवनानि त्रीणि जगन्ति, निक्षिप्य संस्थाप्य, अज्ञात एव "कुत्र स्थितः" इति जलचरैरप्यविदित एव शेते, प्रलयकाले इति शेषः ।

अत्राधेयभूतनारायणापेक्षया आधारभूतवारिधेराधिक्यादधिकालङ्कारः ।

(छ) युगान्तेति । शिशुपालवधप्रथमसर्गस्थमिदं पद्यम् । युगान्तकाले प्रलयसमये प्रतिसंहृता आत्मनि

९५ । अन्योन्यमुभयोरेकक्रियायाः करणं मिथः ॥ (ज)

यथा—"त्वया सा शोभते तन्वी तया त्वमपि शोभसे ।
रजन्या शोभते चन्द्रश्चन्द्रेणापि निशीथिनी ॥" (झ)

९६ । यदाधेयमनाधारमेकञ्चानेकगोचरम् ।
किञ्चित् प्रकुर्वतः कार्य्यमशक्यस्येतरस्य वा ।
कार्य्यस्य करणं दैवाद्विशेषस्त्रिविधस्ततः ॥ (ञ)

उपसंहृता आत्मनो ग्रीवा येन तस्य तथोक्तस्य, कैटभद्विषः श्रीकृष्णस्य, यस्यां तनौ देहे, जगन्ति त्रीणि भुवनानि, सुधिकासं स्वावकाशमसम्बाधमिति यावत् यथा तथा आसत स्थितानि ; तत्र तस्यां तनौ, तपोधनस्य नारदस्य, आभ्यागमसम्भवा आगमनोत्पन्नाः, मुदः आनन्दाः, न ममुर्न धृता अतिरिक्ता अभूवुरित्यर्थः ।

अत्राधारभूतनारायणशरीरापेक्षया आधेयभूतानामानन्दानामाधिक्यादधिकालङ्कारः ; मल्लिनाथेन तु सम्बन्धे असम्बन्धरूपा अतिशयोक्तिरभिहिता । सापि सम्भवत्येवेति तदतिशयोक्त्युत्थापितोऽयमधिकालङ्कार इत्यनयोरङ्गाङ्गिभावेन सङ्कर इति तत्त्वम् ।

(ज) अधिकालङ्कारे उभयोः प्रस्तावोत्थानादुभयघटितमन्योन्यालङ्कारं लक्षयति अन्योन्यमिति । उभयोः कर्त्तृभूतयोर्द्वयोः पदार्थयोः एकस्याः क्रियायाः, मिथः परस्परं करणं विधानम्, अन्योन्यं नाम अलङ्कार उच्यते इत्यनुषङ्गः । अत्र उभयोर्मिथः करणमित्यभिधानात् "दुदोह गां स यज्ञाय शस्याय मघवा दिवम्" इत्यादौ मिथः करणाभावान्नातिव्याप्तिः । "निशया रुचिरश्चन्द्रश्चन्द्रेण रुचिरा निशा" इत्यादौ च "नहि क्रियारहितं वाक्यमस्ति" इति न्यायेन भवतीति क्रिया अध्याहरणीयैव । तेन रुचिरभवनक्रियायाः परस्परकरणान्नाव्याप्तिः । अतः "क्रियापदं गुणस्याप्युपलक्षणम्" इति रामचरणोक्तमपास्तम्, उपलक्षणाङ्गीकारेऽपि भवतीति क्रियाया अवश्यमध्याहरणीयत्वात् तथैव चोपपत्तेरुपलक्षणाङ्गीकारस्यान्याय्यत्वात् । अतएव काव्यप्रकाशेऽपि "क्रियाया" इत्येवोक्तम् । अत्रापि व्युत्पत्तिः स्पष्टा । अन्योन्यशब्दश्च नित्यनपुंसक एव ।

(झ) त्वयेति । नायकनायिकयोर्गुणवर्णनमिदम् । हे नायक ! सा तन्वी कृशाङ्गी त्वया द्वारा शोभते, त्वमपि तया तन्व्या द्वारा शोभसे । तथा च चन्द्रो रजन्या द्वारा शोभते, निशीथिनी सा रजन्यपि चन्द्रेण द्वारा शोभते ।

अत्र नायकनायिकयोश्चन्द्ररजन्योश्च एकस्याः शोभनक्रियायाः परस्परकरणादन्योन्यालङ्कारः ।

(ञ) अधिकालङ्कारे आधाराधेययोः प्रक्रान्तत्वात् विशेषातिदिष्टेन चान्योन्येन तदाधाया अयोगादाधाराधेयघटितं विशेषालङ्कारं लक्षयन् सर्वमेव विशेषालङ्कारं लक्षयति यदिति । अनाधारम् आधाररहितम् आधेयं यदवतिष्ठत इति शेषः । अयमेकविधः । एकञ्च वस्तु अनेकगोचरं युगपदनेकस्थानस्थितम् । अयं द्वितीयविधः । तथा किञ्चित् किमपि कार्य्यं प्रकुर्वतो जनस्य सम्बन्धे, अशक्यस्य कर्त्तुमशक्यस्य इतरस्य कर्त्तुं शक्यस्य वा कार्य्यस्य दैवात् करणं सम्पादनम् । अयं तृतीयविधः । तत्तल्लक्षणात् त्रिविधलक्षणात् विशे[illegible] इति पूर्वार्द्धार्थः ।

क्रमेण यथा—

"दिवमप्युपयातानामाकल्पमनल्पगुणगणा येषाम्।
रमयन्ति जगन्ति गिरः कथमिव कवयो न ते वन्द्याः?॥" (ट)

"कानने सरिदुद्देशे गिरीणामपि कन्दरे।
पश्यन्त्यन्तकसङ्काशं त्वामेकं रिपवः पुरः॥" (ठ)

"गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम्॥" (ड)

पर्य्यायालङ्कारे एकस्य अनेकस्थानवर्त्तिता क्रमात् तत्र क्रमादित्यभिधानात्, अत्र तु युगपदिति द्वितीयविधविशेषेण सह तस्य भेदः।

विशेषः अलङ्कारान्तरेभ्यो विलक्षण इति व्युत्पत्तिः।

(ट) तत्र अनाधाराधेये उदाहरति दिवमिति। दिवमुपयातानामपि स्वर्गं गतानामपि येषां कवीनाम्, अनल्पा बहुलाः गुणगणा वैचित्र्यमाधुर्य्यादिगुणसमूहा यासु तास्तथाविधा गिरः काव्यात्मकवाक्यानि, आकल्पं प्रलयकालपर्य्यन्तं जगन्ति भुवनानि रमयन्ति आनन्दयन्ति, ते कवयः कथमिव न वन्द्या न पूजनीयाः? अपि तु वन्द्या एवेत्यर्थः।

अत्र रमयितृत्वेन आधारभूतानां कवीनामभावेऽपि आधेयभूतानां तद्गिरामवस्थितेर्विशेषालङ्कारः।

(ठ) एकस्यानेकगोचरत्वे उदाहरणमाह कानन इति। कस्यचित् राज्ञः प्रशंसेयम्। रिपवो वैरिणः, कानने वने, सरिदुद्देशे नदीतटे, गिरीणां कन्दरेऽपि पर्वतगुहायाञ्च पुरः अग्रतः, अन्तकसङ्काशं यमतुल्यम्, एकमेव त्वाम्, पश्यन्ति। भवतः शत्रव ईदृशा भयविह्वलाः सञ्जाताः, यथा तत्र तत्र पलायिताः सन्तोऽपि सभयभावनया स्वस्वान्तिक एव युगपदेव च यमतुल्यं भवन्तं पश्यन्तीति भावः।

अत्र एकस्य राज्ञो युगपत् काननाद्यनेकस्थानवर्त्तित्वाद्विशेषालङ्कारः।

(ड) तृतीयप्रकारमुदाहरति गृहिणीति। रघुवंशाष्टमसर्गस्थमिदं पद्यम्। हे इन्दुमति! त्वं गृहिणी गृहस्य कर्त्री, त्वमेव सचिवो मन्त्री, त्वमेव मिथो रहसि सखी नर्म्मसहचरी, तथा त्वमेव ललिते कोमले कलाविधौ नृत्यगीतादिकलानुष्ठाने प्रियशिष्या; अतस्त्वामेतत्समष्टिरूपां भवतीं हरता, अतएव च करुणाविमुखेन दयाविहीनेन मृत्युना यमेन, मे मम किं वस्तु न हृतम्, इति त्वं वद, अपि तु सर्वमेव हृतमिति भावः।

अत्र इन्दुमतीहरणात्मकमेकं कार्य्यं कुर्वतो मृत्योरशक्यरूपस्य गृहिण्यादिहरणरूपस्य कार्य्यस्य दैवतः करणात् विशेषालङ्कारः। तथाहि मृत्युर्नियतित्वादिन्दुमतीमात्रमेव हर्त्तुं शक्नोति न पुनर्गृहिण्यादिकमिति तेषां हरणं तस्याशक्यमेव असर्वशक्तिमत्त्वात्; किन्तु दैवादेव तस्य तेषां हरणरूपं कार्य्यं जातमिति बोध्यम्। तृतीयप्रकारे शक्यस्योदाहरणं यथा—

"स्फुरदद्भुतरूपमुत्प्रताप-ज्वलनं त्वां सृजतानवद्यविद्यम्।
विधिना ससृजे नवो मनोभूर्भुवि सत्यं सविता बृहस्पतिश्च॥"

अत्र युष्मच्छब्दवाच्यराजपुत्रसृष्टिरूपं कार्य्यं कुर्वतो विधेः सर्वशक्तिमत्त्वादिच्छामात्रेण मनोभूप्रभृतिसृष्टिकार्य्यमपि शक्यमेवेति स्वेच्छाप्रयुक्तदैवात्ताद्दशक्यकरणं जातमिति विशेषालङ्कारः।

९७ । व्याघातः स तु केनापि वस्तु येन यथा कृतम् ।
तेनैव चेदुपायेन कुरुतेऽन्यस्तदन्यथा ॥ (ढ)

यथा—"दृशा दग्धं मनसिजम्—" इत्यादि (५६४ पृष्ठे) (ण) ।

९८ । सौकर्य्येण च कार्य्यस्य विरुद्धं क्रियते यदि । (त)

व्याघात इत्येव (थ) ।

"इहैव त्वं तिष्ठ द्रुतमहमहोभिः कतिपयैः
समागन्ता कान्ते ! मृदुरसि न चायाससहना ।
मृदुत्वं मे हेतुः सुभग ! भवता गन्तुमधिकं
न मृद्वी सोढ़ा यद्विरहकृतमायासमसमम् ॥" (द)

(ढ) तृतीयप्रकारविशेषालङ्कारे अन्यकरणप्रस्तावोत्थानादन्यथाकरणघटितं व्याघातालङ्कारं निर्वक्ति व्याघात इति । केनापि जनेन कर्त्रा, येन उपायेन द्वारा, यत् वस्तु यथा कृतं यत्प्रकारं विहितम् ; अन्यो जनः चेद्यदि तेनैव उपायेन तत् वस्तु अन्यथा अन्यप्रकारं कुरुते ; तदा तु स व्याघातो नाम अलङ्कार उच्यते इत्यनुषङ्गः ।

परकरणेन पूर्वकरणस्य व्याघातादस्य व्याघात इति संज्ञा ।

(ण) दृशेति । पूर्वमेव विवृतमेतत् । अत्र महादेवेन चक्षुषा दग्धः कन्दर्पो वामलोचनाभिश्चक्षुषैव पुनरुज्जीवित इति व्याघातालङ्कारः ।

(त) व्याघातमेवान्यप्रकारेण लक्षयति सौकर्य्येणेति । कार्य्यस्य प्रतिवक्तृसम्मतविषयस्य, सौकर्य्येण वक्तृसम्मतविषयापेक्षया प्रतिवक्तृपक्षे सुकरत्वेन हेतुना, यदि विरुद्धं वक्तृसम्मतविपरीतं क्रियते व्यक्तं क्रियते प्रतिवक्त्रा अभिधीयत इत्यर्थः, तदापि व्याघात उच्यते इत्यन्वयः । एकमेव हेतुमवलम्ब्य निजसौकर्य्येण हेतुना प्रतिवक्ता यदि वक्तृमताद्विपरीतमतं प्रकाशयति, तदा सोऽपि व्याघात इति सरलार्थः । एतल्लक्षणे तु वक्तृमतस्य व्याघाताद्व्याघात इति संज्ञा ।

(थ) कारिकायामाकाङ्क्षया अपूरणादध्याहारेण तत्पूरणं दर्शयति व्याघात इत्येवेति ।

(द) इहैवेति । विदेशं यियासोर्नायकस्य तेन सार्द्धं गन्तुमिच्छोर्नायिकायाश्च उक्तिप्रत्युक्तिरूपमिदं पद्यम् । हे कान्ते ! त्वम् इहैव अस्मिन् भवन एव तिष्ठ, अहं कतिपयैरेव अहोभिर्दिवसैः समागन्ता पुनरागमिष्यामि । अथ त्वया सार्द्धं गमने का हानिरित्याह—त्वं मृदुः सुकुमाराङ्गी असि, अतएव आयाससहना विदेशगमनकष्टसहिष्णुर्न च नहीत्यर्थः । इति नायकेनोक्ते नायिका आह । हे सुभग ! पतिप्रिय ! मे मम मृदुत्वं भवता सह गन्तुमेव अधिकं हेतुर्भवति । अत्राध्याहर्त्तव्यभवतीतिक्रियाविशेषणत्वादधिकमित्यस्य क्लीवत्वम्, यद्यस्मात् मृद्वी सुकुमाराङ्गी अहं विरहकृतं भवद्विच्छेदविहितम् असमं अनुपमं निरतिशयमित्यर्थः, आयासं कष्टं न सोढ़ा न सोढुं शक्ष्यामि ।

अत्र नायकेन नायिकाया मृदुत्वं सहगमनाभावहेतुत्वेनोक्तम्, नायिकया च प्रत्युत सहगमने ततोऽपि सौकर्य्येण हेतुतयोपन्यस्तम् (ध)।

९९। परं परं प्रति यदा पूर्वपूर्वस्य हेतुता॥
तदा कारणमाला स्यात्—(न)

यथा—"श्रुतं कृतधियां सङ्गाज्जायते विनयः श्रुतात्।
लोकानुरागो विनयान्न किं लोकानुरागतः॥" (प)

१००। तन्मालादीपकं पुनः।
धर्म्मिणामेकधर्म्मेण सम्बन्धो यद्यथोत्तरम्॥ (फ)

(ध) उदाहृते निरुक्तलक्षणं सङ्गमयितुमाह अत्रेति। प्रत्युत वैपरीत्येन। ततोऽपि सहनमना-भावादपि गृहे अवस्थानादपि, सौकर्य्येण विरहकष्टसहनापेक्षया सहगमनकष्टसहनस्य सुकरत्वेनेत्यर्थः हेतुना, सहगमने हेतुतया सहगमनं प्रति हेतुत्वेन उपन्यस्तमुक्तं तन्मृदुत्वमित्यन्वयः। अतएवात्र द्वितीय-प्रकारो व्याघात इति भावः।

(न) पूर्वव्याघातलक्षणे उपायपर्य्यायहेतोरुत्थानात् हेतुघटितं कारणमालालङ्कारं निरूपयति पर-मिति। यद्वा इदानीं क्रमिकपदार्थघटितालङ्कारप्रकरणमारभमाणः क्रमिककारणघटितं कारणमालालङ्कारं निरूपयति परमिति। यदा परं परं पदार्थं प्रति पूर्वपूर्वस्य पदार्थस्य हेतुता कारणता वर्त्तते; तदा कारणमाला नाम अलङ्कारः स्यात्।

कारणानां माला श्रेणिरिति व्युत्पत्तिः। अत्र सत्यामपि कार्य्यमालायां तदपेक्षया कारणमालाया एवाधिकतरवैचित्र्याधायकत्वात् प्राचीनपरम्पराप्रसिद्धेश्च कारणमाला इत्येव संज्ञा निर्दिष्टा।

(प) श्रुतमिति। कृतधियाम् अध्ययनविहितबुद्धीनां विदुषामित्यर्थः, सङ्गात् संसर्गात् हेतोः, श्रुतं शास्त्रज्ञानं जायते, लोकस्येति शेषः। एवं सर्वत्र। श्रुतात् शास्त्रज्ञानाच्च विनयः शिष्टव्यवहारो जायते, विनयात् लोकानामनुराग आत्मनि प्रेम जायते; तस्माच्च लोकानुरागात् किं न जायते? अपि तु सर्वमेव धनादिकं जायत इत्यर्थः।

अत्र विनयादिकं परं परं प्रति श्रुतादिः पूर्वपूर्वस्य हेतुतया कारणमालालङ्कारः। किञ्च, जायत इत्येकक्रियया उत्तरोत्तरसम्बन्धाद्वक्ष्यमाणलक्षणं मालादीपकमपीत्यनयोरेकाश्रयानुप्रवेशरूपः सङ्करः।

(फ) क्रमिकप्रकरणे पूर्वत्र मालाप्रस्तावोत्थानान्मालादीपकालङ्कारं लक्षयति तदिति। बहूनां धर्म्मिणाम् एकधर्म्मेण गुणरूपेण क्रियारूपेण वा सह, यत् यथोत्तरम् उत्तरोत्तरं सम्बन्धः, तत् पुनर्मालादीपकं नाम अलङ्कारः स्यात्।

अप्रस्तुतप्रस्तुतयोरेकधर्म्माभिसम्बन्धो दीपकम्, तस्य चात्र श्रेणिरूपत्वेन मालारूपत्वान्मालादीपकमिति संज्ञा। "ओकं पाकः" इत्यादिवत् सम्बन्ध इति गौणक्रियाया एव विशेषणत्वेन यदिति नपुंसकलिङ्गम्।

यथा—"त्वयि सङ्गरसम्प्राप्ते धनुषासादिताः शराः ।
शरैररिशिरस्तेन भूस्तया त्वं त्वया यशः ॥" (ब)

अत्रासादनक्रिया धर्म्मः (भ) ।

१०१ । पूर्वं पूर्वं प्रति विशेषणत्वेन परं परम् ।
स्थाप्यतेऽपोह्यते वा चेत् स्यात्तदैकावली द्विधा ॥ (म)

क्रमेणोदाहरणम्—

"सरो विकसिताम्भोजमम्भोजं भृङ्गसङ्गतम् ।
भृङ्गा यत्र ससङ्गीताः सङ्गीतं सस्मरोदयम् ॥" (य)

"न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्युदलीनषट्पदम् ।
न षट्पदोऽसौ न जुगुञ्ज यः कलं न गुञ्जितं तन्न जहार यन्मनः ॥" (र)

(ब) बहूनां धर्म्मिणां क्रियारूपैकधर्म्मसम्बन्धं उदाहरति त्वयीति। राज्ञः प्रशंसेयम्। हे राजन्! त्वयि सङ्गरं युद्धं समाप्तं गते सति, तव धनुषा शरा आसादिताः प्राप्ताः। एवमन्यत्रापि आसादिता इत्यस्य लिङ्गविभक्त्योर्विपरिणामेन अन्वयो बोध्यः। तथा च शरैस्तवैव मार्गणैः, अरीणां शिर आसादितम्, तेन अरिशिरसा भूर्भूमिरासादिता, तया भुवा त्वमासादितः, त्वया च यश आसादितम्।

(भ) अत्रेति। आसादनक्रिया धर्म्मः; तस्य चात्र शरादिभिरुत्तरोत्तरं कर्म्मतया सम्बन्धान्मालादीपकमित्याशयः।

उत्तरोत्तरमेकगुणसम्बन्धे मालादीपकं यथा मम—

"पापी नरेषु चाण्डालो व्याधश्चाण्डालमण्डले। व्याधेषु च पुनर्दस्युर्दस्युष्वपि च घातुकः॥"

(म) क्रमिकप्रकरणात् क्रमिकविशेषणघटितामेकावलीं नामालङ्कारं निर्वक्ति पूर्वमिति। चेद्यदि पूर्वं पूर्वं विशेष्यं प्रति, विशेषणत्वेन रूपेण परं परं विशेष्यं स्थाप्यते उपन्यस्यते अपोह्यते निषिध्यते वा, तदा द्विधा स्थापनापोहनभेदेन द्विप्रकारा एकावली नाम अलङ्कारः स्यात्। विशेषणञ्चात्र समानाधिकरणं व्यधिकरणञ्च ग्राह्यम्।

एकस्य विशेषणस्य क्रमिकावलीघटितत्वादस्या एकावलीति संज्ञा।

(य) स्थापने उदाहरणमाह सर इति। शरद्वर्णनेयम्। यत्र शरत्काले, सरो दीर्घिका विकसितानि अम्भोजानि पद्मानि यत्र तत्तादृशं भवतीति सर्वत्र शेषः। अम्भोजं तत् पद्मञ्च, भृङ्गसङ्गतं भ्रमरसमन्वितम्। ते भृङ्गाश्च ससङ्गीताः सम्यग्गीतशालिनः। तत् सङ्गीतञ्च पुनः, स्मरोदयेन कामाविर्भावेन सहेति सस्मरोदयं कामाविर्भावजनकमित्यर्थः।

अत्र सरःप्रभृतिकं पूर्वं पूर्वं विशेष्यं प्रति विशेषणत्वेन अम्भोजादिपरविशेष्यस्य स्थापनादेकावल्यलङ्कारः।

(र) अपोहने उदाहरति नेति। भट्टिकाव्यद्वितीयसर्गस्थमिदं पद्यम्। तत् तादृशं जलं नासीत्, यत् सुचारूणि पङ्कजानि यस्मिन् तत्तथोक्तं नाभवत्। तत् तादृशं पङ्कजं नासीत्, यत् न लीना मधुपानाय

क्वचिद्विशेष्यमपि यथोत्तरं विशेषणतया स्थापितमपोहितञ्च दृश्यते (ल)। यथा—

"वाप्यो भवन्ति विमलाः स्फुटन्ति कमलानि वापीषु ।
कमलेषु पतन्त्यलयः करोति सङ्गीतमलिषु पदम् ॥" (व)

एवमपोहनेऽपि (श)।

१०२ । उत्तरोत्तरमुत्कर्षो वस्तुनः सार उच्यते । (ष)

स्थिरं नोपविष्टाः षट्पदा भ्रमरा यस्मिन् तत्तादृशमभवत् । असौ तथाविधः षट्पदो नासीत्, यः कलं मधुरास्फुटं न जुगुञ्ज न गुञ्जितवान् । तथा, तत्तादृशं गुञ्जितं नासीत्, यत् मनो न जहार हृतवत् ।

अत्र जलादिकं पूर्वं पूर्वं विशेष्यं प्रति विशेषणत्वेन पङ्कजादिपरपरविशेष्यस्य निषेधनादेकावल्यलङ्कारः ।

(ल) लक्ष्यदर्शनात् कारिकोक्तविपरीतमप्येकावल्यलङ्कारं संग्रहीतुमाह क्वचिदिति । एतेन एतादृशैकावल्यलङ्कारो नितान्तविरल इति कारिकायां न लक्षित इति सूचितम् । विशेष्यमपि पूर्वं पूर्वमित्यर्थः, यथोत्तरमुत्तरोत्तरम् । अपोहितं निषिद्धम् । कारिकालक्षितायामेकावल्यां परं परं विशेष्यम्, पूर्वं पूर्वं विशेष्यं प्रति विशेषणीभूतम्; अत्र तु पूर्वं पूर्वं विशेष्यम्, परं परं विशेष्यं प्रति विशेषणीभूतमित्युभयोः सम्पूर्णवैपरीत्यं द्रष्टव्यम् ।

(व) तत्र स्थापने उदाहरति वाप्य इति । इयमपि शरद्वर्णना । वाप्यो दीर्घिकाः, विमला भवन्ति, यस्यां शरदीति शेषः । एवमन्यत्रापि । तासु वापीषु च कमलानि पद्मानि स्फुटन्ति । तेषु कमलेषु च अलयो भ्रमराः पतन्ति । तेष्वलिषु च सङ्गीतं कर्तृ, पदं प्रतिष्ठां करोति अलयो गायन्तीत्यर्थः ।

अत्र वाप्यादिकं पूर्वं पूर्वं विशेष्यम्, कमलादिपरपरविशेष्यं प्रति विशेषणतया स्थापितमित्येकावल्यलङ्कारः ।

(श) एवमिति । अपोहनेऽप्येवमूह्यमित्यर्थः । यथा मम—

"जले जलेऽस्ति नो पद्मं पद्मे पद्मे न चाप्यली । अलिन्यलिनि नो गीतं गीते गीते न माधुरी ॥"

अत्र पद्मादिकं पूर्वं पूर्वं विशेष्यम्, अलिप्रभृतिपरपरविशेष्यं प्रति विशेषणतया अपोहितमित्येकावल्यलङ्कारः ।

(ष) अस्य च क्रमिकप्रकरणत्वात् क्रमिकोत्कर्षघटितं सारं नामालङ्कारं निरूपयति उत्तरोत्तरमिति । उत्तरोत्तरं क्रमशः, वस्तुनो विशेष्यपदार्थस्य, उत्कर्ष उत्तमत्वम्, सारो नाम अलङ्कार उच्यते । सारः श्रेष्ठ इति नार्थान्तरम् । तेन सारत्वघटितत्वादस्य सार इति सञ्ज्ञा । अलङ्कारसर्वस्वे तु अयमुदारनाम्ना व्यपदिष्टः ।

मालादीपके यस्य कस्यचिद्गुणरूपस्य क्रियारूपस्य वा धर्मस्योत्तरोत्तरसम्बन्धः, इह तु केवलोत्कर्षरूपगुणस्येति विशेषरूपोऽयं सामान्यरूपं तं बाधते ।

अत्र उत्कर्षश्च श्लाघ्यगुणानामश्लाघ्यगुणानाञ्च सम्भवति । तत्राद्यं यथा—"राज्ये सारम्" इत्यादि । अन्त्यं यथा—"तृणादपि लघुस्तूलस्तूलादपि च याचकः । वायुना किं न नीतोऽसौ मामयं प्रार्थयिष्यति ॥" इत्युद्योतकारः । दर्पणकारेण तु अश्लाघ्यगुणोत्कर्षो न विवक्षितः, अविवरणात् प्रकारान्तरानभिधानादनुदाहरणाच्च । तेन [illegible] तथा

यथा—"राज्ये सारं वसुधा वसुधायामपि पुरं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गनाऽनङ्गसर्वस्वम् ॥" (ख)

१०३ । यथासंख्यमनूद्देश उद्दिष्टानां क्रमेण यत् ॥ (ह)

यथा—"उन्मीलन्ति नखैर्लुनीहि वहति क्षौमाञ्चलेनावृणु
क्रीडाकाननमाविशन्ति वलयक्वाणैः समुत्त्रासय ।
इत्थं वञ्जुल-दक्षिणानिल-कुहूकण्ठेषु साङ्केतिक-
व्याहाराः सुभग ! त्वदीयविरहे तस्याः सखीनां क्रमात् ॥" (च)

पदार्थस्य उत्तरोत्तरमुत्कर्षसम्बन्धमात्र एवायमलङ्कारो भवत्येव, न पुनस्तत्र श्लोकसमाप्तिपर्यन्तत्वापेक्षा इत्येव अन्यत्रान्यतानित्यवधार्यते, लक्षणे वृत्तौ च विशेषानभिधानात् । तेन—

"लोकस्त्रजि द्यौर्दिवि चादितेया अप्यादितेयेषु महान् महेन्द्रः ।
किं कर्त्तुमर्थो यदि सोऽपि रागात् जागर्त्ति कथा किमतः परापि ॥"

इति नैषधश्लोकस्य पूर्वार्द्धमात्रेऽपि साराऽलङ्कारः प्राप्त एवेत्यवधेयम् ।

(ख) राज्ये इति । "सारो बले स्थिरांशे च न्याय्ये क्लीबं वरे त्रिषु" इत्यमरकोषात् वरार्थकसार-शब्दस्य त्रिलिङ्गत्वेन वाच्यलिङ्गत्वेऽपि "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" इत्यनेन सारमित्यत्र नपुंसकत्वमेकत्वञ्च । तेन, राज्ये जलस्थलात्मकसमग्रराज्यमध्ये, वसुधा स्थलात्मकप्रदेशः, सारं सारा श्रेष्ठत्वयः, स्वेच्छयैव विचरणसम्भवात् । वसुधायां स्थलात्मकप्रदेशमध्येऽपि पुरं नगरं सारं श्रेष्ठम्, सुन्दरत्वादिवरणादौ नितान्तसुविधावशाच्च । पुरेऽपि च सौधमट्टालिका सारम्, परमसुदृढस्थलत्वात् सुखावासस्थानत्वाच्च । सौधेऽपि तल्पं शय्या सारम्, तत्रापि सुखव्यवहार्यत्वात् । तल्पेऽपि अनङ्गसर्वस्वं कामदेवस्य समस्तसम्पत्तिस्वरूपा, वराङ्गना उत्तमस्त्री सारा, भोगसुखसम्पादकानां मध्ये चरमसीमारूपत्वादिति भावः ।

अत्र वसुधादीनां वस्तूनामुत्तरोत्तरमुत्कर्षात् सारोऽलङ्कारः ।

"जम्बीरश्रियमतिलङ्घ्य लीलयैव व्यानम्रीकृतकमनीयहेमकुम्भौ ।
नीलाम्भोरुहनयनेऽधुनाकुचौ ते स्पर्द्धेते खलु कनकाचलेन सार्द्धम् ॥"

इत्यादावपि कामिनीकुचयोरुत्तरोत्तरोत्कर्षप्रतीतेः सारोऽलङ्कार एवेति बोध्यम् ।

(ह) क्रमिकपदार्थघटितालङ्कारनिर्वचनस्य प्रक्रान्तत्वात् क्रमिकाभिधानघटितमेव यथासंख्यालङ्कारं निर्वक्ति वर्णयति । "शास्त्रे उपचव्यवहारः" इति शुद्धितत्त्वधृतन्यायात् ऊर्ध्वं दिष्टा इत्युद्दिष्टाः प्रथममभिहितास्तेषां प्रथम-मुक्तानामर्थानामित्यर्थः, क्रमेण पौर्वापर्येण, यत्, अनूद्देशः पश्चादुक्तिः, तद्यथासंख्यं नाम अलङ्कार उच्यते। येन क्रमेणार्थाः प्रथममुक्ताः तेनैव क्रमेण तत्सम्बन्धिनामर्थानामपि पश्चादुक्तिर्यथासंख्यमित्यर्थः । अत्रापि अनूद्देश इति गौणक्रियाया विशेषणत्वात् यदिति क्लीबलिङ्गम् । संख्यामनतिक्रम्य स्थितमिति यथासंख्यम् । नित्यनपुंसकोऽयं शब्दः ।

(च) उन्मीलन्तीति । प्रवासिनं नायकं प्रति नायिकादूत्या उक्तिरियम् । हे सुभग ! पश्यामि !

१०४। क्वचिदेकमनेकस्मिन्ननेकं चैकगं क्रमात् ।
भवति क्रियते वा चेत्तदा पर्य्याय इष्यते ॥ (क)

क्रमेण यथा—

"स्थिताः क्षणं पक्ष्मसु ताड़िताधराः पयोधरोत्सेधनिपातचूर्णिताः ।
वलीषु तस्याः स्खलिताः प्रपेदिरे चिरेण (१) नाभिं प्रथमोदविन्दवः ॥" (ख)

त्वदीयविरहे तस्यास्तव प्रियतमायाः सखीनां मिथः परस्परम् इत्थम् एवम्भूताः, वञ्जुला अशोकमुकुलाः, दक्षिणानिलो मलयपवनः, कुहूकण्ठाः कोकिलाश्च तेषु, साङ्केतिकव्याहाराः साङ्केतिकवाक्यानि प्रचलन्तीति शेषः। तथा च उन्मीलन्ति प्रस्फुटन्ति । अशोकमुकुला इति सङ्केतबोध्यम् । इत्यमेकया उक्ते, अपरा आह—नखैर्लुनीहि छिन्धि, यथा नैव पश्येदिति भावः। तानशोकमुकुलानिति सङ्केतबोध्यम्। वहति प्रचरति। दक्षिणानिल इति सङ्केतबोध्यम्। इति चैकया भाषिते अन्या आह— चीनांचलेन पट्टवसनैक-देशेन आवृणु। तं दक्षिणानिलमिति सङ्केतबोध्यम्। यथा नैमां संस्पृशेदित्याशयः। क्रीड़ाकाननं केलिवनम्, आविशन्ति प्रविशन्ति। कोकिला इति सङ्केतगम्यम्। इत्यमेकया कथिते इतरा ब्रवीति— वलयानां हस्ताभरणानां क्वाणैः शब्दैः, समुच्चालय भीषयित्वा अपसारय। तान् कोकिलानिति सङ्केतबोध्यम्। यथा न रुवन्तीति भावः। वञ्जुलादीनां नामोच्चारणेऽपि तस्या नायिकाया मदनवेदना प्रवर्द्धेत इति ते सङ्केतगम्याः प्रतिपादिताः। "वञ्जुलः पुंसि तिनिशे वेतसाशोकयोरपि" इति मेदिनी।

अत्र उन्मीलन्तीत्यादीनामुद्दिष्टानां क्रमेणैव लुनीहीत्यादीनामनूद्देशादयथासंख्यम्।

(क) क्रमिकस्य प्रकृतत्वात् क्रमप्रयुक्तमेव पर्य्यायालङ्कारं लक्षयति क्वचिदिति। क्वचित् एकं वस्तु, क्रमादनेकस्मिन् स्थाने चेद्यदि भवति स्वयमेवावस्थितं भवति, वा अथवा अन्येन अवस्थितं क्रियते ; क्वचिच्च अनेकं वस्तु, क्रमादेकगम् एकस्थानस्थितं चेद्भवति, किंवा अन्येन क्रियते ; तदा पर्य्यायो नाम अलङ्कार इष्यते। अतएवायं चतुर्विधः।

द्वितीयप्रकारविशेषालङ्कारेण सह अस्य भेदस्तु तत्रैव टीकायामुक्तः, अत्र च वृत्तौ वक्ष्यते। पर्य्यायः क्रम एव, तद्घटितत्वादस्य पर्य्याय इत्येव संज्ञा।

(ख) एकस्य वस्तुनः अनेकस्मिन् स्थाने स्वयमवस्थितभवने उदाहरति स्थिता इति। कुमारसम्भव-पञ्चमसर्गस्थमिदं पद्यम्। प्रथमा उदविन्दवो वृष्टिजलविन्दवः, तस्याः पार्वत्याः, पक्ष्मसु नयनलोमसु क्षणं स्थिताः सन्तः। एतेन पक्ष्मणामतिघनत्वं व्यज्यते। परञ्च ताड़िताः पतनेन पीड़िताः अधरो यैस्तादृशाः सन्तः अधरे पतन्त इत्यर्थः। एतेनाधरस्य कोमलत्वं व्यज्यते, अनन्तरञ्च पयोधरयोः स्तनयोः उत्सेधे उपरिभागे निपातेन पतनेन चूर्णिता जर्जरीभूताः सन्तः। एतेन पयोधरयोरत्यन्तकाठिन्यं द्योत्यते। ततश्च वलीषु उदर-चर्मस्थनिम्नगर्भरेखासु स्खलिताः प्रच्युताः सन्तः। अनेन तासां निम्नोन्नतत्वं सूच्यते। तदनु च चिरेण बहुकालेन अनेकप्रतिबन्धकत्वादिति भावः। नाभिं प्रपेदिरे प्रविष्टाः। एतेन च नाभिगम्भीरत्वं ध्वन्यते।

---

(१) क्रमेण इति पाठान्तरम्।

"विचरन्ति विलासिन्यो यत्र श्रोणिभरालसाः ।
वृक-काक-शिवास्तत्र धावन्त्यरिपुरे तव ॥" (ग)

"विसृष्टरागादधरान्निवर्त्तितः स्तनाङ्गरागादरुणाच्च कन्दुकात् ।
कुशाङ्कुरादानपरिक्षताङ्गुलिः कृतोऽक्षसूत्रप्रणयी तया करः ॥" (घ)

"ययोरारोपितस्तारो हारस्तेऽरिवधूजनैः ।
निधीयन्ते तयोः स्थूलाः स्तनयोरश्रुविन्दवः ॥" (ङ)

एषु च क्वचिदाधारः संहतरूपः असंहतरूपश्च । क्वचिदाधेयमपि (च) ।

अत्र जलविन्दुरूपैकवस्तुनः क्रमात् पक्ष्मादावनेकस्मिन् स्थाने स्वयमेवावस्थितभवनात् पर्य्यायालङ्कारः । मल्लिनाथेन तु "अत्र प्रतिपदमर्थवत्वात् परिकरालङ्कारः" इत्युक्तम् । तदपि युक्तमेव ताड़िताधरा इत्यादि-विशेषाभिप्रायेण प्रयुक्तत्वात् । तेन तयोरुभयोरेकाश्रयानुप्रवेशरूपः सङ्करः एव पर्य्यवसित इत्यवधेयम् ।

(ग) अनेकस्य वस्तुनः स्वयमेकस्थानस्थभवने उदाहरणमाह विचरन्तीति । कस्यचित् राज्ञः स्तुति-रियम् । हे राजन् ! यत्र तव अरिपुरे, श्रोणिभरालसा नितम्बभारेण मन्दगमनाः, विलासिन्यः शत्रुरमण्यो विचरन्ति, अतीतसामीप्ये वर्त्तमाना, तेन विचरितवत्य इत्यर्थः । तत्र अरिपुरे इदानीं वृक-काक-शिवा व्याघ्र-काक-शृगालाः, धावन्ति वेगेन सञ्चरन्ति । भवतो भयेन पलायितेषु शत्रुषु तदीयं पुरमिदानीं महारण्यतया परिणतमित्याशयः ।

अत्रानेकरूपाणां शत्रुविलासिनीनां वृकाकाकशिवानाञ्च एकस्मिन्नरिपुरे क्रमेण भवनात् पर्य्यायालङ्कारः ।

(घ) एकस्य अनेकस्मिन् करणे लक्ष्यं दर्शयति विसृष्टेति । इदमपि कुमारसम्भवीयपञ्चमसर्गीयं पद्यम् । तथा पार्वत्या, विसृष्टस्तपोविरुद्धत्वात् परित्यक्तः रागोऽलक्तकादिना रञ्जनं यस्य तथाभूतात्, अधरादधरोष्ठात्, निवर्त्तितः प्रत्यावर्त्तितः, स्तनयोरङ्गरागात् कुङ्कुमाद्यङ्गरागद्रव्यलेपनात् निवर्त्तितः, तथा अरुणात् स्वभावतो रक्तवर्णात् कन्दुकात् खेलोपकरणगुटिकाविशेषाच्च निवर्त्तितः, करः स्वकीयो हस्तः, अधुना कुशाङ्कुराणां चुद्रक्षुद्रदर्भाणाम् आदानेन यज्ञादिसाधनार्थं सञ्चयनेन परिक्षता अङ्गुलयो यस्य तथाभूत एवम् अक्षसूत्रप्रणयी जपमालायामासक्तः कृतः ।

अत्र एकस्य हस्तस्य अधरे, स्तनयोः, कन्दुके, कुशाङ्कुरे, अक्षसूत्रे च क्रमेण करणात् पर्य्यायालङ्कारः ।

(ङ) अनेकस्य एकत्र करणे उदाहरणं दर्शयति ययोरिति । इयमपि राजस्तुतिः । हे राजन् ! ते तव अरिवधूजनैः शत्रुस्त्रीलोकैः, ययोः स्तनयोः तारो लम्बमानः, हारो मुक्तामाला, आरोपितः परिहितः, इदानीं तयोः स्तनयोः स्थूला अश्रुविन्दवः निधीयन्ते स्थाप्यन्ते, त्वयैव तासां पत्यादीनां निहतत्वादिति भावः ।

अत्र अनेकभूतस्य मुक्तावलीनिर्म्मितहारस्य अश्रुविन्दुसमूहस्य च क्रमेणैकस्मिन् स्तनयुगले करणात् पर्य्यायालङ्कारः ।

(च) ननु "स्थिताः क्षणम्" इत्यादौ उदविन्दूनामनेकत्वात् "एकमनेकस्मिन्" इति लक्षणम्, "विचरन्ति" इत्यादौ उद्यानजलाशयादिभिर्भेदेन अरिपुरस्य अनेकत्वात् "अनेकमेकगम्" इति लक्षणम्, "ययोः" इत्यादौ च स्तनयोर्द्वित्वेनानेकत्वात् "अनेकमेकगम्" इति लक्षणञ्च कथं सङ्गच्छते इत्याह एषु चेति । उदाहरणेषु

यथा—"स्थिताः क्षणम्—" इत्यत्र उदविन्दवः पक्ष्मादावसंहतरूपे आधारे क्रमेणाभवन्। "विचरन्ति" इत्यत्राधेयभूता वकादयः संहतरूपारिपुरे क्रमेणाभवन् (छ)। एवमन्यत् (ज)।

अत्र च एकस्यानेकत्र क्रमेणैव वृत्तेर्विशेषालङ्काराद्भेदः (झ)। विनिमयाभावात् परिवृत्तेः (ञ)।

१०५। परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत्। (ट)

न्य इत्यर्थः। संहतरूपः संयुक्तस्वरूपः अनेकोऽपि संयुक्तत्वेनैकरूप इत्यर्थः, असंहतरूपः विश्लिष्टरूपः एकावयविगतत्वेऽपि विश्लिष्टरूपत्वेन अनेकरूप इत्यर्थः। आधेयमपि पूर्ववत् संहतरूपमसंहतरूपञ्चेत्यर्थः।

(छ) ईदृशविवक्षयैव सर्वत्र लक्षणानां सङ्गतिरित्याह यथेति। असंहतरूपे परस्परविश्लिष्टरूपे। एतेन पक्ष्माद्याधाराणामनेकत्वम्, आधेयभूतानामुदविन्दूनाञ्च संहतरूपत्वेनैकत्वमिति सूचितम्। अतः "स्थिताः क्षणम्" इत्यादौ "एकमनेकस्मिन्" इति लक्षणसङ्गतिरिति भावः। वकादयः असंहतरूपा अतएव ते अनेके इत्याशयः। संहतरूपारिपुरे उद्यानजलाशयादिना भेदेऽपि रथ्यादिना संयुक्तरूपत्वेनाभिन्नतया एकरूपे अरिपुरे इत्यर्थः। अतः "विचरन्ति" इत्यादावपि "अनेकस्यैकगम्" इति लक्षणसङ्गतिरिति भावः।

(ज) एवमिति। "ययोः" इत्यादौ आधेयभूता अश्रुविन्दवः असंहतरूपा इति ते अनेके, आधारभूतं स्तनयुगञ्च परस्परसंहतरूपमित्येकरूपमेव तत्। तेन तत्रापि "अनेकस्यैकगम्" इति लक्षणसमन्वय इत्याशयः। विसृष्टेत्यादौ तु "एकमनेकस्मिन्" इति लक्षणसङ्गतिर्निर्बाधैव।

(झ) ननु "एकस्यानेकगोचरम्" इत्युक्तलक्षणेन द्वितीयप्रकारविशेषालङ्कारेण सह "एकमनेकस्मिन्" इति प्रथमप्रकारस्य पर्यायस्य को भेद इत्याह अत्र चेति। प्रथमप्रकारपर्याये चेत्यर्थः। वृत्तेर्वर्त्तमानत्वात्। विशेषालङ्कारात् एकस्य अनेकत्र युगपद्वृत्तिघटितादिति भावः।

(ञ) अथ तथापि घटपटयोः स्थानपरिवर्त्तनमिव "एकमनेकस्मिन्, अनेकस्यैकस्मिन्" इत्येकानेकयोर्वर्त्तिताया: परिवर्त्तनमिति तद्घटितस्यास्य पर्यायसामान्यस्य परिवृत्त्या सह को भेद इत्याह विनिमयाभावादिति। तथा च किञ्चिद्दत्त्वा कस्यचिदादानं नाम विनिमयः, तस्य चात्राभावात् परिवृत्तेरलङ्कारादस्य भेद इति पूर्वेणान्वयः।

(ट) उक्तरीत्या परिवृत्तिप्रस्तावोत्थानात् परिवृत्तिं नामालङ्कारं निर्वक्ति परीति। किञ्चिद्दत्त्वा कस्यचिदादानं नाम विनिमय इत्युक्तमेव। समं समानम्, न्यूनं हीनम्, अधिकञ्चोत्तमम्। तथा च समं दत्त्वा समग्रहणरूपः, अधिकं दत्त्वा न्यूनग्रहणरूपः, न्यूनं दत्त्वा अधिकग्रहणरूपश्च विनिमयः परिवृत्तिर्नामालङ्कारो भवेत्। अतएवायं त्रिविध इत्युन्नेयम्।

तेन "व्यत्ययो वस्तुनोर्यस्तु यो वा विनिमयो मिथः। परिवृत्तिरिहोक्ता सा काव्यालङ्कारलक्षणे॥

इति सरस्वतीकण्ठाभरणे वैपरीत्यात्मकव्यत्ययेऽपि परिवृत्तेस्तैविध्यवर्णनं कटाक्षितम्, न चैवं दर्पणकृन्मते "कुमुदवनमपश्रि श्रीमदम्भोजषण्डम्" इत्यादिशिशुपालवधपद्यगतवैचित्र्यस्यासंग्रहापत्तिरिति वाच्यम्, विरूपद्वयसङ्घटनाघटितविषमालङ्कारेणैव तत्संग्रहात्। परिवर्त्तनं परिवृत्तिरिति व्युत्पत्तिः स्पष्टा।

क्रमेणोदाहरणम्—

"दत्त्वा कटाक्षमेणाक्षी जग्राह हृदयं मम ।
मया तु हृदयं दत्त्वा गृहीतो मदनज्वरः ॥" (ठ)

अत्र प्रथमेऽर्द्धे समेन, द्वितीयेऽर्द्धे न्यूनेन (ड) ।

"तस्य च प्रवयसो जटायुषः स्वर्गिणः किमिव शोच्यतेऽधुना ।
येन जर्जरकलेवरव्ययात् क्रीतमिन्दुकिरणोज्ज्वलं यशः ॥" (ढ)

अत्राधिक्येन (ण) ।

१०६ । प्रश्नादप्रश्नतो वापि कथिताद्वस्तुनो भवेत् ।
तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथवा तदा ॥
परिसंख्या—(त)

(ठ) समेन न्यूनेन च विनिमये उदाहरति दत्त्वेति । काञ्चित् सुन्दरीमवलोक्यागत्य सख्युरन्तिके कस्यचिदुक्तिरियम् । एणाक्षी हरिणलोचना सा नायिका, कटाक्षं वक्रदृष्टिं दत्त्वा, मम हृदयं हृदयवृत्तिं जग्राह । मया तु हृदयं दत्त्वा मदनज्वरः कामसन्तापो गृहीतः ।

(ड) ननु उदाहृते कुत्र कीदृशेन विनिमय इत्याह अत्रेति । समेन समानवस्तुग्रहणेन विनिमय इति शेषः, वक्रदृष्टि-हृदयवृत्त्योरिन्द्रियवृत्तित्वेन समानत्वादिति भावः । न्यूनेन न्यूनवस्तुग्रहणेन विनिमय इति शेषः, हृदयवृत्त्यपेक्षया मदनज्वरस्य दुःखकरत्वेन हीनत्वादिति भावः ।

(ढ) अधिकेन विनिमये उदाहरणमाह तस्येति । प्रकृष्टमधिकं वयो यस्य तस्य प्रवयसः अतिवृद्धस्य, स्वर्गिणः सीतारक्षणार्थं मरणजनितपुण्येन स्वर्गं गतस्य, तस्य जटायुषो निमित्तं किमिव अधुना अस्माभिः शोच्यते शोकः क्रियते । कोऽपि नात्र शोकविषय इत्याशयः । तथा च येन जटायुषा जर्जरकलेवरस्य जराजीर्णशरीरस्य, व्ययात् परित्यागात् इन्दोश्चन्द्रस्य किरणवदुज्ज्वलं यशः क्रीतं गृहीतम् ।

(ण) अत्रेति । आधिक्येन अधिकवस्तुग्रहणेनेत्यर्थः । विनिमय इति शेषः, जर्जरकलेवरापेक्षया यशस उत्तमत्वादित्याशयः ।

(त) इदानीमेकोक्तावन्यप्रतीतेः प्रकरणमारभमाणस्तत्र प्राधान्यात् प्रथमं परिसंख्यालङ्कारं लक्षयति प्रश्नादिति । प्रश्नात् कस्यचिज्जिज्ञासामाश्रित्य, अप्रश्नतो वापि कस्यचिज्जिज्ञासामनाश्रित्यापि वा, कथितात् केनचिद्विधिविच्याभिहितात् वस्तुनः पदार्थात्, चेद्यदि, शाब्दः शब्देनैव बोध्यः, अथवा आर्थः अर्थपर्य्यालोचनया गम्यः, तादृशः कथितसदृशस्य, अन्यस्य वस्तुनः, व्यपोहः प्रतिषेधो भवेत्, तदा परिसंख्या नाम अलङ्कारो भवेत् । तेन प्रश्नपूर्वककथनादप्रश्नपूर्वककथनाच्चेयं द्विविधा, तयोश्च प्रत्येकमेव शाब्दत्वार्थत्वभेदेन पुनर्द्विविधेति समुदायो चतुर्विधा परिसंख्या । "पञ्च पञ्चनखा भक्ष्याः" इत्यादौ पञ्चनखेतरभक्षणप्रतिषेधप्रतीतावपि वैचित्र्याभावान्नायमलङ्कारः ।

क्रमेणोदाहरणम्—"किं भूषणं सुदृढ़मत्र ? यशो न रत्नम्,
किं कार्य्यमार्य्यचरितम् ? सुकृतं न दोषः ।
किं चक्षुरप्रतिहतम् ? धिषणा न नेत्रं
जानाति कस्त्वदपरः सदसद्विवेकम् ॥" (थ)

अत्र व्यवच्छेद्यं रत्नादि शाब्दम् (द) ।

"किमाराध्यं सदा पुण्यं कश्च सेव्यः सदागमः ।
को ध्येयो भगवान् विष्णुः किं काम्यं परमं पदम् ॥" (ध)

अत्र व्यवच्छेद्यं पापादि आर्थम् (न) । अनयोः प्रश्नपूर्वकत्वम् ।
अप्रश्नपूर्वकत्वे यथा—

"भक्तिर्भवे न विभवे व्यसनं शास्त्रे न युवतिकामास्त्रे ।
चिन्ता यशसि न वपुषि प्रायः परिदृश्यते महताम् ॥" (प)

परिसंख्या इतरवर्जनबुद्धिरिति व्युत्पत्तिः, परिशब्दस्य वर्जनार्थत्वात् संख्याशब्दस्य च ज्ञानार्थत्वात् "परेर्वर्जने" इति पाणिनिसूत्रे "यत् सांख्यैः प्राप्यते स्थानम्" इति गीतायाञ्च तथादर्शनात् ।

(थ) प्रश्नपूर्वककथने शाब्दीं परिसंख्यामुदाहरति किमिति । अत्र जगति किं नाम सुदृढं चिरस्थायि भूषणम् ? इति कस्यचित् प्रश्ने—"यश एव सुदृढं भूषणं किन्तु रत्नं न" तस्य क्षयित्वादिति कस्यचित् कथनम् । आर्य्यचरितं मन्वादिमान्यजनव्यवहृतं किं नाम कार्य्यम् ? इति कस्यचित् प्रश्ने—"सुकृतं पुण्यम्, न तु दोषः पापम्" इति कस्यचित् कथनम् । अप्रतिहतं सर्वत्रगामि किं नाम चक्षुः ? इति कस्यचित् प्रश्ने—"धिषणा बुद्धिः, किन्तु नेत्रं न" तस्य भित्त्यादिना प्रतिहतत्वादिति भावः ; इति कस्यचित् कथनम् । इति मदुत्तरं श्रुत्वा प्रश्नकर्त्ता कथयितारं प्रशंसति जानातीति । त्वदपरस्त्वद्भिन्नः को जनः, सदसतोर्विवेकं पार्थक्यं जानाति, अपि तु कोऽपि नेत्यर्थः ।

(द) अत्रेति । व्यवच्छेद्यं व्यपोह्यं प्रतिषेध्यमित्यर्थः । शाब्दं नेतिशब्दबोध्यम् । तेनात्र प्रश्नपूर्वककथने शाब्दी परिसंख्यालङ्कार इति भावः ।

(ध) प्रश्नपूर्वककथने आर्थीं परिसंख्यां दर्शयति किमाराध्यमिति । सदा किं नाम कार्य्यम् आराध्यं सम्यक् साधनीयम् ? इति कस्यचित् प्रश्ने—"पुण्यं धर्म्मं कार्य्यमेव आराध्यम् । न पुनः पापम्" इत्यर्थतो गम्यते । कश्च सेव्यः ? इति कस्यचित् प्रश्ने—सदागमः साधुशास्त्रं वेदादिकमेव सेव्यः । "न पुनर्वात्स्यायनसूत्रादिरसदागमः" इत्यर्थवशाद् बुध्यते । को ध्येयः ? इति कस्यचित् प्रश्ने—भगवान् विष्णुरेव ध्येयः । "न तु धनम्" इत्यर्थाद्गम्यते किं काम्यमभिलषणीयम् ? इति कस्यचित् प्रश्ने—परमं पदं उत्कृष्टं निर्वाणपदमेव काम्यम् । "न पुनः राजत्वादिकम्" इत्यर्थतो लभ्यते । भावार्थास्तु सुगमाः ।

(न) अत्रेति । आर्थमर्थवशाद्बोध्यम् । अतएवात्र प्रश्नपूर्वककथने आर्थी परिसंख्येति भावः ।

(प) भक्तिरिति । प्रायो बाहुल्येनैव महतां जनानाम्, भवे महादेवे भक्तिरनुरक्तिः परिदृश्यते, न

"बलमार्त्तभयोपशान्तये विदुषां सम्मतये (१) बहु श्रुतम्।
वसु तस्य न केवलं विभोर्गुणवत्तापि परप्रयोजनम् (२) ॥" (फ)

श्लेषमूलत्वे चास्य वैचित्र्यविशेषो यथा—"यस्मिंश्च राजनि जितजगति पालयति महीं चित्रकर्म्मसु वर्णसङ्कराः, चापेषु गुणच्छेदाः—" इत्यादि (ब)।

१०७। उत्तरं प्रश्नस्योत्तरादुन्नयो यदि।
यच्चासकृदसम्भाव्यं सत्यपि प्रश्न उत्तरम् ॥ (भ)

पुनर्विभवे धनसम्पदि। शास्त्रे व्यसनमासक्तिः परिदृश्यते, न तु युवतिरिव कामास्त्रं तस्मिन्। तथा यशस्येव चिन्ता प्रागुपायचिन्तनं परिदृश्यते, न पुनर्वपुषि देहे।

अत्र अप्रश्नपूर्वककथने नञ्र्थोपादानात् विभवाद्यन्यार्थव्यपोहः शाब्द इति शाब्दी परिसंख्यालङ्कारः।

(फ) बलमिति। रघुवंशाष्टमसर्गस्थमिदं पद्यम्। तस्य विभोः प्रभोरजस्य बलम्, आर्त्तानां पीड़ितानां भयस्य उपशान्तये विरतये, आसीदिति सर्वत्र शेषः, न पुनर्दुर्बलानां निपीड़नाय। बहु प्रचुरं श्रुतं शास्त्रज्ञानम्, विदुषां सम्मतये बहुमतये अत्यादरायेति यावत्, न तु विवादायेति भावः। तथा केवलं वसु, धनमेव परप्रयोजनम् इति न, अपि तु गुणवत्तापि परप्रयोजनैव, न तु स्वनिमित्तेति भावः।

अत्र अप्रश्नपूर्वकादेव "आर्त्तभयोपशान्तये बलम्" इत्यादिकथनात् 'न तु दुर्बलपीड़नाय बलम्' इत्यादिरूपोऽन्यार्थव्यपोहः अर्थतो गम्यत इत्यार्थी परिसंख्यालङ्कारः।

(ब) श्लेषेति। अस्य परिसंख्यालङ्कारस्य। कादम्बरीपूर्वार्द्धे शूद्रकनृपतिवर्णनपरं यस्मिन्नित्यादि गद्यम्। जितजगति यस्मिंश्च राजनि शूद्रके, महीं पालयति सति, चित्रकर्म्मसु आलेख्यनिर्म्माणव्यापारेष्वेव वर्णसङ्करा नीलपीतादिवर्णानां सम्मिश्रणानि, न पुनर्मानवेषु अन्यवर्णेभ्यः अन्यवर्णोत्पत्तिरूपा वर्णसङ्कराः आसन्निति परेणान्वयः। चापेषु धनुष्वेव गुणच्छेदा युद्धादौ मौर्वीकर्त्तनानि, न तु लोकेषु गुणच्छेदा दयादाक्षिण्यादिगुणविलोपा आसन्। तदत्र परस्परव्यवहितं वाक्यद्वयमिदम्।

अत्र उक्तप्रकारान्यार्थव्यपोहः अर्थवशाद्गम्यते इत्यार्थी परिसंख्या।

(भ) एकस्योन्नावन्यस्य प्रतीतेः प्रकृतत्वात् तद्रूपमुत्तरं नामालङ्कारं निरूपयन् सर्वविधमेव तं निरूपयति उत्तरमिति। उत्तरार्द्धे प्रश्ने सत्यपीत्यभिधानात् पूर्वार्द्धे प्रश्ने असत्यपि इत्यवगन्तव्यम्। तथा उत्तरार्द्धे एकस्मिन् प्रश्ने तादृशवैचित्र्यासम्भवात् बहुतरप्रश्ने सतीति बोध्यम्। तथा च प्रश्ने असत्यपि, उत्तरात् प्रतिवचनात् यदि प्रश्नस्य उन्नयः अनुमानेन ज्ञानं स्यात्, तदा उत्तरं नाम अलङ्कारो भवेदित्येकविधमुत्तरम्। तथा बहुतरप्रश्ने सत्यपि असम्भाव्यमसम्भावनीयं लोकातीतत्वादचिन्तनीयमित्यर्थः, यच्च असकृदनेकवारम् उत्तरं प्रतिवचनम्, तदपि उत्तरं नामालङ्कारो भवेदित्यपरविधमुत्तरम्। तेन तद्द्विविध एवोत्तरालङ्कारः। काव्यप्रकाशेऽप्येवम्। "को भवान्? चैत्रः" इत्यादौ तु प्रश्नस्य उत्तरस्य च बहुलाभावेन वैचित्र्याभावान्नायमलङ्कारः।

उत्तरघटितत्वादेवास्य उत्तरमिति संज्ञा। अत्रार्थे नित्यनपुंसकलिङ्गोऽयं शब्दः।

---

(१) सत्कृतये इतीदानीन्तनपुस्तके पाठः। (२) परप्रयोजना इत्यपीदानीन्तनपुस्तके पाठः।

यथा मम—"वीक्षितुं न क्षमा श्वश्रूः स्वामी दूरतरं गतः।
अहमेकाकिनी बाला तवेह वसतिः कुतः ?॥" (म)

अनेन पथिकस्य वसतियाचनं प्रतीयते (य)।

"का विसमा ? देव्वगई, किं लद्धव्वं ? जणो गुणग्गाही।
किं सोक्खं ? सुकलत्तं, किं दुग्गेज्झं ? खलो लोओ॥" (र)

अत्रान्यव्यपोहे तात्पर्य्याभावात् परिसंख्यातो भेदः (ल)। न चेदमनुमानम्, साध्यसाधनयोर्द्वयोर्निर्देश एव तस्याङ्गीकारात् (व)। न च काव्यलिङ्गम्, उत्तरस्य प्रश्नं प्रत्यजनकत्वात् (श)।

(म) तत्र प्रथमप्रकारमुदाहरति वीक्षितुमिति। चिरं समागतायाः कस्याश्चित्तरुण्याः उक्तिरियम्। श्वश्रूर्भर्तुर्माता वीक्षितुं द्रष्टुं न क्षमा न शक्ता अन्धेत्यर्थः। अतो न तस्याः कापि शङ्कास्तीति भावः। स्वामी मद्भर्ता दूरतरमतिदूरदेशं गतः। अतस्तदागमनसम्भावनापि नास्तीत्याशयः। अहञ्च एकाकिनी बाला अवाप्तौति शेषः। अतएव इह अस्मद्गृहे कुतः कथं तव वसतिरवस्थानं स्यात् ? अपि तु कुतोऽपि नेत्यर्थः। अत्रावस्थाय यथेष्टं रमस्वेति च व्यज्यते।

(य) अनेनेति। वीक्षितुमित्यादिना प्रतिवचनेनेत्यर्थः। वसतियाचनं "अहमत्रावस्थातुमर्हामि" इति वासस्थानप्राप्तिप्रश्न इत्यर्थः, प्रतीयते अनुमानेन ज्ञायते। अतएवात्र उत्तरालङ्कार इति भावः।

(र) द्वितीयप्रकारं दर्शयति का इति। "का विषमा ? दैवगतिः, किं लब्धव्यम् ? जनो गुणग्राही। किं सौख्यम् ? सुकलत्रम्, किं दुर्ग्राह्यम् ? खलो लोकः॥" इति संस्कृतानुवादः। का विषमा पूर्वापरानमाना अप्रतिकार्य्यत्वेन दारुणा वा ? दैवगतिर्विधेर्व्यवहारः। किं नाम वस्तु लब्धव्यम् ? गुणग्राही जनः। किं सौख्यं सुखजनकम् ? सुकलत्रम् उत्तमभार्य्या। किं नाम दुर्ग्राह्यं वशीकर्त्तुमशक्यम् ? खलो लोकः। अत्र बहुतरेषु प्रश्नेषु साधारणस्याचिन्तनीयबहुतरोत्तरदानादुत्तरालङ्कारः।

(ल) ननु "किमाराध्यम्" इत्यादिवदेव "का विषमा" इत्यादावपि प्रश्नपूर्वकात् "दैवगतिः" इत्यादिवचनात् "न मानवचरित्रादिगतिः" इत्याद्यन्यव्यपोहसम्भवेन आर्थपरिसंख्याप्रसक्तिरिति ततः अस्य द्वितीयप्रकारोत्तरालङ्कारस्य को भेद इत्याह अत्रेति। अन्यव्यपोहे इतरार्थव्यवच्छेदे तात्पर्य्याभावादुत्तरकर्त्तुरिच्छाया अभावात्। तथा च यदा "किमाराध्यम्" इति प्रश्ने "पुण्यम्" इत्युत्तरकर्त्तुः "न तु पापम्" इत्यन्यव्यपोह इष्ट एव; "का विषमा" इति प्रश्ने "दैवगतिः" इत्युत्तरकर्त्तुस्तु तावन्मात्रमेवेष्टम्, न तु "न मानवचरित्रादिगतिः" इत्यन्यव्यपोहः, ईदृगर्थस्यानुमानस्य सर्वेषामात्मनिदर्शनेनैव सर्वथा सम्भवपरत्वादिति भावः।

(व) अथ तथापि "वीक्षितुं न क्षमा श्वश्रूः" इत्यादौ तादृशेनोत्तरेण पथिकवसतिप्रश्नस्यानुमानात्, तादृशव्यङ्ग्यार्थसत्त्वेन विच्छित्तिविशेषाच्च अनुमानालङ्कार एवास्तु किं प्रथमप्रकारोत्तरालङ्काराङ्गीकारेणेत्याह न चेति। निर्द्देश एव उक्ताविव, तस्य अनुमानस्य। तथा चोक्तोदाहरणे तादृशपथिकप्रश्नस्यानुक्तत्वान्नानुमानमित्याशयः।

(श) ननु तर्हि तथाविधपथिकप्रश्नप्रतीतिं प्रति "वीक्षितुं न क्षमा श्वश्रूः" इत्यादिवाक्यार्थानां हेतुत्वात्तत्र वाक्यार्थहेतुकं काव्यलिङ्गमेवास्ताम्, किमतिरिक्तोत्तरालङ्कारस्वीकारेणेत्याह पुनर्न चेति। तथाहि

१०८ । दण्डापूपिकयाऽन्यार्थागमोऽर्थापत्तिरिष्यते । (ष)

"मूषिकेण दण्डो भक्षितः" इत्यनेन तत्सहचरितमपूपभक्षणमर्थादायातं भवतीति नियतसमानन्यायादर्थान्तरमापततीत्येष न्यायो दण्डापूपिका (स) ।

अत्र च क्वचित् प्राकरणिकादर्थादप्राकरणिकस्यार्थस्य आपतनम्, क्वचिदप्राकरणिकार्थात् प्राकरणिकार्थस्येति द्वौ भेदौ (ह) । क्रमेणोदाहरणम्—

> "हारोऽयं हरिणाक्षीणां लुठति स्तनमण्डले ।
> मुक्तानामप्यवस्थेयं के वयं स्मरकिङ्कराः ? ॥" (च)

तादृशप्रश्नप्रतीतिं प्रत्येव "वीक्षितुम्" इत्यादिवाक्यार्थानां हेतुत्वम्, न तु तादृशप्रश्नं प्रति ; अतो न काव्यलिङ्गमपीत्याशयः । इदमुपलक्षणम् । निष्पाद्य निष्पादकयोरुभयोर्निर्देशस्थल एव काव्यलिङ्गस्याङ्गीकारात् अत्र तु निष्पाद्यस्य निर्देशाभावादपि न काव्यलिङ्गप्रसक्तिरित्यपि द्रष्टव्यम् ।

(ष) एकोक्तावन्यप्रतीतिः प्राकरणिकत्वात् तत्स्वरूपामेवार्थापत्तिं नामालङ्कारं लक्षयति दण्डेति । दण्डापूपिकया दण्डापूपिकाख्यन्यायेन, अन्यस्य अर्थस्य आगमः प्रतीतिरर्थापत्तिर्नाम अलङ्कार इष्यते । वृत्ति विवरणेनैव एतद्विवरणं स्पष्टीभविष्यति । अर्थस्य अन्यार्थस्य आपत्तिरापतनमुपस्थितिरिति व्युत्पत्तिः ।

(स) ननु का नाम दण्डापूपिका इत्याह मूषिकेणेति । इत्यनेन एवम्प्रकारेण वाक्येन तत्सहचरितं दण्डभक्षणसहसम्पन्नम्, अपूपभक्षणं मूषिककर्तृकमेव पिष्टकभोजनम्, अर्थात् समानयुक्तिवशात् आयातं ज्ञातुरवगतम्, इति नियतसमानन्यायात् इत्यं निश्चिततुल्ययुक्तेः । आपतति उपस्थितं भवति । न्यायो नीतिः । अत्रायं विस्तृतः सरलार्थः—कश्चिंश्चिद्गृहे गृहिणी रात्रौ भोजनावशिष्टानि पिष्टकानि पत्युरन्तिक एव दण्डोपरि भाजने निधाय निद्रिता, पतिश्च निद्रितः । प्रभाते तु पिष्टकहीनं भक्षितैकदेशं दण्डं पश्यता पत्या पृष्टा गृहिणी ब्रूते स्म—"मूषिकेण दण्डो भक्षितः" इति । तच्छ्रुत्वा च पत्या एवमवगम्यते यत्, "येन मूषिकेण दण्डो भक्षितस्तेनैव पिष्टकमपि भक्षितम्" तयोः सहचरत्वात् दण्डभक्षणापेक्षया पिष्टकभक्षणस्य सुकरत्वादिष्टत्वाच्चेति । तेन एकस्य सिद्धिबुद्धौ तत्सदृशस्यान्यस्य सिद्धिबुद्धिर्दण्डापूपिका । एवञ्च दण्डापूपौ अस्यास्त इति दण्डापूपिका "इन्विषये ठकौ वाच्यः" इत्यस्यार्थे दण्डापूपशब्दादिकप्रत्ययः ।

(ह) अत्रेति । प्राकरणिकात् प्रस्तुतात्, अर्थाद्विषयात् । एवमुत्तरत्रापि । आपतनमुपस्थितिः । प्राकरणिकार्थस्य आपतनमिति पूर्वेणान्वयः ।

(च) तत्र प्रथममुदाहरति हारोऽयमिति । कामिनीकुचकुम्भसम्भोगसमासक्तस्य कस्यचित् सुहृदं प्रति निजनिर्दोषत्वख्यापनायोक्तिरियम् । अयं हारो मुक्तामाला, हरिणाक्षीणां मृगलोचनानां तरुणीनां स्तनमण्डले लुठति सततमनवस्थमवतिष्ठते मुक्तानां मौक्तिकफलानां मोक्षपदप्राप्तानां पुरुषाणाञ्च, इयमवस्था दशा ; तत्र वय स्मरकिङ्कराः कामदेवाधीना इत्यर्थः, के ? अपि तु केऽपि नेत्यर्थः ।

"विललाप स वाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु (१) ॥" (क)

अत्र च समानन्यायस्य श्लेषमूलत्वे वैचित्र्यविशेषो यथोदाहृते "हारोऽयम्" इत्यादौ (ख)।

न चेदमनुमानम्, समानन्यायस्य सम्बन्धरूपत्वाभावात् (ग)।

१०९। विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुतः (२) ॥ (घ)

अत्र मुक्ता वर्णनीयत्वेन प्राकरणिकाः, अश्मत्पदवाच्या अमुक्ताश्च अवर्णनीयत्वेन अप्राकरणिकाः। तथा च मोक्षपद प्राप्तानां नितान्तनीरागतया कामिनीकुचमण्डले अवलुण्ठनमत्यन्तासम्भवमेव, तस्यापि सम्भवे जायमाने, अमुक्तानां कामदेवाज्ञाधीनानां रागसागरमग्नानामस्माकं तत्रावलुण्ठनम् अतएव सम्भवपरमिति प्राकरणिकादर्थादप्राकरणिकस्यार्थस्य आपतनादर्थापत्तिरलङ्कारः। अत्र पुरुषत्वरूपसामान्यधर्म्मेण मुक्तामुक्तयोः सादृश्यमवधेयम्।

(क) द्वितीयप्रकारं दर्शयति विललापेति। रघुवंशाष्टमसर्गे श्लोकोऽयम्। सः अजः, सहजामपि स्वाभाविकीमपि धीरतां धैर्य्यम् अपहाय, वाष्पेण अश्रूद्गमेन गद्गदमस्पष्टं यथा स्यात्तथा विललाप। तथा च अभितप्तं सर्वतः सन्तप्तम् अयो लौहमपि मार्दवं कोमलतां भजते, शरीरिषु स्वभावत एव कोमलेषु देहिषु मार्दवभजने, कैव कथा? अपि तु कापि प्रतिवादकथा नास्तीत्यर्थः।

अत्र शरीरिषु मार्दवभजनं वर्णनीयतया प्राकरणिकम्, अयसो मार्दवभजनन्तु अवर्णनीयतया अप्राकरणिकम्। एवञ्च अप्राकरणिकादयसो मार्दवभजनरूपार्थात् प्राकरणिकस्य शरीरिमार्दवभजनरूपस्यार्थस्य आपतनादर्थापत्तिः। अत्र तु सन्तप्तत्वरूपसामान्यधर्म्मेण अयःशरीरिणोः सादृश्यं बोध्यम्।

(ख) अनुभवसिद्धं कञ्चित् फलितार्थमाह अत्र चेति। अर्थापत्तिस्थले चेत्यर्थः। समानन्यायस्य उक्तविधदण्डापूपिकाख्यनीतेः। उदाहृते तु मुक्तानामित्यत्र श्लेषः।

(ग) ननु स्तनमण्डले मुक्तानामवलुण्ठनदर्शनेन, अमुक्तानामपि तत्रावलुण्ठनज्ञानसम्भवात् तप्ते अयस्यपि मार्दवदर्शनेन तप्तेषु शरीरिषु मार्दवस्य अतएव ज्ञानसम्भवाच्च सर्वत्रानुमानालङ्कार एवास्ताम्, किमर्थापत्तिस्वीकारेणेत्याह न चेति। इदमर्थान्तरोपस्थितिरूपम् अनुमानमनुमानसाध्यं ज्ञानं न चेत्यर्थः। सम्बन्धरूपत्वाभावात् व्याप्तिरूपत्वाभावात्। तथा च एकसिद्धौ तत्सदृशापरसिद्धिबुद्धिः समानन्यायः, व्याप्तिस्तु साध्यसाधनयोः सामानाधिकरण्यविशेषः। यथा—"नियतधर्म्मसाहित्यमुभयोरेकतरस्य वा व्याप्तिः" इति सांख्यप्रवचनपञ्चमाध्याये सूत्रम्। "प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः" इति सिद्धान्तलक्षणे गङ्गेशोपाध्यायाश्च। तेन व्याप्तिप्रयुक्तादनुमानात् समानन्यायप्रयुक्ताया अर्थापत्तेर्भेद इत्याशयः।

(घ) निरुक्तप्रकरणवशादेव विकल्पं नामालङ्कारं निर्वक्ति विकल्प इति। चातुरीयुतः कवेर्निपुणता-

(१) शरीरिणामिति पाठान्तरम्। (२) विरोधश्चान्तरा यतः, विरोधश्चातुरी यतः इति पाठभेदौ।

यथा—"नम्यन्तां (१) शिरांसि धनूंषि वा, कर्णः पूरीक्रियन्तामाज्ञा मौर्व्यो वा।" (ङ)

अत्र शिरसां धनुषाञ्च नमनयोः सन्धिविग्रहोपलक्षणत्वात् सन्धिविग्रहयो-श्चैकदा कर्त्तुमशक्यत्वाद्विरोधः (च)। स च एकपक्षाश्रयणपर्य्यवसानः (छ)। तुल्यबलत्वञ्चात्र धनुःशिरोनमनयोर्द्वयोरपि स्पर्द्धया सम्भाव्यमानत्वात् (ज)। चातुर्य्यञ्चात्र औपम्यगर्भत्वेन (झ)। एवं "कर्णः पूरीक्रियन्ताम्" इत्यत्रापि (ञ)। एवम्—

"युष्माकं कुरुतां भवार्त्तिशमनं नेत्रे तनुर्वा हरेः॥" (ट)

युक्तः कवेर्निपुणताजनितवैचित्र्यविशिष्ट इत्यर्थः, तुल्यबलयोः समकक्षयोः पदार्थयोः, विरोधो विप्रतिपत्ति-रसम्भवतेति यावत् विकल्पो नाम अलङ्कार उच्यत इत्यनुषङ्गः।

विरोधाभासे विरोधस्य अवास्तवतया आपातत एव प्रतीतिः येन केनचित् समाधानञ्च, अतएव तस्य विरोधाभास इति संज्ञा। अत्र तु विरोधस्य वास्तवतया सर्वदैव प्रतीतिः एकपक्षावलम्बनेनैव समाधानञ्च; अतएव चास्यापि विकल्प इति संज्ञा इत्यनयोर्भेदः। तेनैव च विरुद्धौ कल्पौ पक्षौ यस्मिन्निति व्युत्पत्तिः।

(ङ) नम्यन्तामिति। आक्रान्तं प्रति दृप्तस्य आक्रमितुरुक्तिरियम्। शिरांसि नम्यन्तां युद्धे पराजय-निश्चयेन मत्समीपे अवनतीक्रियन्ताम्, वा किंवा, धनूंषि नम्यन्तां शक्तिश्चेदाकृष्यन्तां युद्धार्थमित्याशयः। आज्ञा समादेशवाक्यानि, कर्णः पूरीक्रियन्तां नियतावलम्बनेन कर्णभूषणीक्रियन्तां पराजयस्वीकारेण श्रवणा-मित्यर्थः, वा अथवा शक्तिश्चेत् मौर्व्यो धनुर्गुणाः, कर्णः पूरीक्रियन्तां युद्धार्थं कर्णपर्य्यन्तगामीक्रियन्ताम्।

(च) नन्वत्र शिरोधनुर्नमनयोरुभयोरेव सम्भवपरत्वाद्विरोधः कुत इत्याह अत्रेति। सन्धिविग्रहोप-लक्षणत्वादिति। अन्यथा तयोर्निष्प्रयोजनतापत्तिरित्याशयः।

(छ) अथ तर्हि कथं तस्य समाधानमित्याह स चेति। एकपक्षस्य सन्धेर्विग्रहस्य वा आश्रयणेन पर्य्यवसानं निवृत्तिर्यस्य सः तयोरेकपक्षाश्रयणस्य वक्तुरभिप्रेतत्वात् तत्समाधानमित्याशयः।

(ज) ननु तथाप्यनयोस्तुल्यबलत्वं कुत इत्याह तुल्येति। स्पर्द्धया गर्वेण, सम्भाव्यमानत्वात् आक्रमता वक्त्रा इति शेषः। तथा च आत्मदुर्बलत्वज्ञानेन शत्रूणां शिरोनमनं समानाधिकबलत्वज्ञानेन धनुर्नमनं वा एतदुभयमपि गर्विणा वक्त्रा सम्भाव्यते; तेनात्र उभयोः सम्भवपरत्वमेव तुल्यबलत्वं विवक्षितमित्याशयः।

(झ) अथ तथापि चातुरी कुत इत्याह चातुर्य्यमिति। कविरचनाचातुरीनिबन्धनवैचित्र्यमित्यर्थः। तथा च शिरोनमनस्यैव स्पर्द्धया प्रस्तूयमानत्वेन उपमेयत्वम्, धनुर्नमनस्य तूपमानत्वम्। तेन बलवद्भिर्यथा धनूंषि नम्यन्ते, तथैव दुर्बलैर्युष्माभिः शिरांसि नम्यन्तामिति सादृश्यगर्भाभिप्रायवशेन वैचित्र्यमिति भावः।

(ञ) एवमिति। इत्यत्रापि ऊह्यमिति शेषः, तत्तु सर्वमेव पूर्ववदिति सुगमम्।

(ट) श्लेषघटितवैचित्र्यं उदाहरति युष्माकमिति। अस्य पूर्वपादत्रयं यथा ग्रन्थान्तरे—

---

(१) नमयन्तु इति पाठान्तरम्।

अत्र श्लेषावष्टम्भेन चारुत्वम् (ठ)।

"दीयतामर्जितं वित्तं देवाय ब्राह्मणाय वा।" (ड) इत्यत्र चातुर्य्याभावान्नायमलङ्कारः (ढ)।

११०। समुच्चयोऽयमेकस्मिन् सति कार्य्यस्य साधके।

खलेकपोतिकान्यायात् तत्करः स्यात् परोऽपि चेत्॥

गुणौ क्रिये वा युगपत् स्यातां यद्वा गुणक्रिये। (ण)

"भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्द्धिनी

ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये।

लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती

हरेर्विष्णोः, नेत्रे नयनयुगलं तनुः शरीरं वा, युष्माकं भक्तानां भवार्त्तिशमनं सांसारिकदुःखनिवृत्तिं कुरुताम्। नेत्रे इत्यनेनान्वये कुरुतामित्यत्र लोटः परस्मैपदप्रथमपुरुषद्विवचनम्, तनुरित्यनेनान्वये तु तस्या एवात्मनेपदप्रथमपुरुषैकवचनमिति बोध्यम्।

(ठ) अत्रेति। श्लेषस्य अवष्टम्भेन आश्रयेण, चारुत्वं वैचित्र्यम्, तथा एकेन भवार्त्तिशमनस्य कृतत्वे अन्यस्य करणासम्भवाद्विरोधः, एकतरावलम्बनेन तत्समाधानम्, उभयोरपि भवार्त्तिशमने सामर्थ्यात्र तुल्यबलत्वमित्यूह्यम्।

(ड) चातुर्य्ययुत इत्यस्य व्यावृत्तिप्रदर्शनायाह दीयतामिति। अस्य सत्पूरितपूर्वार्द्धं यथा—

"प्राणानपि पणीकृत्य समुत्तीर्य्य च सागरान्।"

(ढ) इत्यत्रेति। चातुर्य्याभावात् चातुर्य्यनिबन्धनवैचित्र्याभावात्। किन्तु एकस्मै दत्ते अन्यस्मै दानासम्भवाद्विरोधः, एकस्मा एव दानमभिप्रेतमिति तत्समाधानम्, देवब्राह्मणयोरुभयोरेव उत्तमपात्रत्वेन तुल्यबलत्वञ्चास्तीति द्रष्टव्यम्। "न रत्नानि न वा भस्म कश्चिमादधते मुनेः" इत्यत्र आदधत इति धाधातुद्व्यधात्वोर्बहुवचनैकवचनरूपतया श्लिष्टत्वेन चातुर्य्ययुतत्वेऽपि रत्नभस्मनोस्तुल्यबलत्वाभावादतिव्याप्तिरित्यतस्तुल्यबलयोरिति विशेषणमूहनीयम्।

(ण) ननु विरुद्धयोर्यौगपद्येनाभिधाने विकल्प इव अविरुद्धानां यौगपद्येनाभिधाने किञ्चिदलङ्कारान्तरं भवति न वेत्याकाङ्क्षायां कारणयौगपद्ये समुच्चयं निरूपयन् सर्वविधमेव तं निरूपयति समुच्चय इति। धान्यानां मर्द्दनस्थानं खलम् (खोला, खामार इति भाषा)। खले कपोताः पारावता अस्यां सन्तीति खलेकपोतिका नीतिः युक्तार्थत्वेऽपि "आमुष्यायणः" इत्यादौ षष्ठ्या इव खले इति सप्तम्या लोपाभावः, दण्डापूपिकेतिवत् "इन्विषये इको वाच्यः" इति इकप्रत्ययस्ततश्च स्त्रियामादा। सा चासौ न्यायो नीतिश्चेति खलेकपोतिकान्यायः। स चोक्तो यथा सामान्यलक्षणायां जगदीशेः—

"वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत् पतन्ति।

तथैव सर्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवन्ति॥"

यथा मम—"हंहो धीरसमीर ! हन्त जननं ते चन्दनक्ष्माभृतो
दाक्षिण्यं जगदुत्तरं परिचयो गोदावरीवारिभिः ।
प्रत्यङ्गं दहसीह मे त्वमपि चेदुद्दामदावाग्निव-
न्मत्तोऽयं मलिनात्मको वनचरः किं वक्ष्यते कोकिलः ॥" (त)

अत्र दाहे एकस्मिंश्चन्दनक्ष्माभृज्जन्मरूपे कारणे सत्यपि दाक्षिण्यादीनां हेत्वन्तराणामुपादानम् (थ)। अत्र सर्वेषामपि हेतूनां शोभनत्वात् सद्योगः। अत्रैव चतुर्थपादे मत्तादीनामशोभनानां योगादसद्योगः (द)। सदसद्योगो यथा—(ध)

"शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गनगतः खलो मनसि सप्त शल्यानि मे ॥" (न)

तथा च कार्य्यस्य एकस्मिन् साधके निष्पादके सति, चेद्यदि खलेकपोतिकान्यायात् परोऽपि पदार्थः तत्करस्तस्य कार्य्यस्य साधकः स्यात् ; तदा अयं समुच्चयो नाम अलङ्कारः स्यात्। अयमेकप्रकारः। यदा अथवा युगपदेकदा गुणौ यत् किञ्चिद्गुणद्वयम्, क्रिये यत्किञ्चित् क्रियाद्वयम्, वा अथवा गुण एकः क्रिया चैका इति गुणक्रिये चेत् स्याताम्, तदा सोऽपि समुच्चयः स्यादित्यर्थः। इमे च त्रिप्रकारा इति समुदाये चतुष्प्रकारः समुच्चयः। दीपकेन सह अस्य भेदो वृत्तावेवोक्तः। समुच्चय उक्तानां कारणादीनां परस्परान्वये परस्परानुकर्ष इति व्युत्पत्तिः।

(त) प्रथमप्रकारमुदाहरति हंहो इति। प्रियाविच्छिन्नस्योक्तिरियम्। हंहो इति सम्बोधनार्थकमव्ययम्। हन्तेति खेदे। धीरो मन्दसञ्चारी सुधीश्च स चासौ समीरो वायुश्चेति तत्सम्बोधनम्। हे धीरसमीर ! ते तव चन्दनक्ष्माभृतो मलयपर्वतात् जननं जन्म, दाक्षिण्यं दक्षिणदिग्भवत्वमौदार्य्यञ्च जगति उत्तरं प्रधानम्, गोदावर्य्या नद्या वारिभिर्जलैः सह परिचयः सर्व्वतः संसर्गः ; ईदृशोऽपि त्वञ्चेत् उद्दामदावाग्निवत् भयङ्करदावानलवत् मे मम प्रत्यङ्गं सर्वाण्यङ्गानि दहसि ; तदा मत्तः मदेनाधीरः, मलिनात्मको दुष्टमना मलिनवर्णश्च, वनचरः सर्वदा वनचारी असभ्यश्च कोकिलः, किं वक्ष्यते पञ्चमस्वरेणोत्पीड़ने किं निन्दिष्यते। उत्तमश्चेत् परान् पीड़यति, तदा अधमस्य परपीडने का निन्देति भावः।

(थ) उक्तलक्ष्ये प्रथमलक्षणं सङ्गमयति अत्रेति। दाहे मलयवायुतो दाहासम्भवेऽपि विरहित्वादेव दहनरूपे कार्य्ये। हेत्वन्तराणाम् अन्येषां दाहकारणानाम्। अत्र तु विषमादयोऽन्येऽप्यलङ्काराः सन्तीत्युन्नेयम्।

(द) अयन्तु केवलसद्योगे केवलासद्योगे सदसमुभययोगे च पुनस्त्रिविध इति केचिदाचक्षते, तदपि भङ्ग्या अङ्गीकुरुते अत्रेति। प्रथमार्द्धे इत्यर्थः, सर्वेषां धीरत्वादीनाम्। अशोभनानां हेतूनामिति पूर्वेण सम्बन्धः।

(ध) सदिति। सदसद्योगः एकत्र सदसदुभययोगः।

इह केचिदाहुः—"शशिप्रभृतीनां शोभनत्वं खलस्याशोभनत्वमिति (१) सदसद्योगः" इति (प)। अन्ये तु "शशिप्रभृतीनां स्वतः शोभनत्वं धूसरत्वादीनां त्वशोभनत्वमिति सदसद्योगः" (फ)। अत्र हि शशिप्रभृतिषु धूसरत्वादेरत्यन्तमनुचितत्वमिति विच्छित्तिविशेषस्यैव चमत्कारविधायित्वम् (२) (ब)। "मनसि सप्त शल्यानि" इति सप्तानामपि शल्यत्वेनोपसंहारस्य, (३) "नृपाङ्गनगतः खलः" इति प्रस्तुतक्रमभेदाद्दुष्टत्वमावहति, सर्वत्र विशेष्यस्यैव शोभनत्वेन प्रक्रमात्" इति (भ)।

(न) शशीति। नीतिशतके श्लोकोऽयम्। दिवसेन दिनारम्भेण धूसरो धूम्रवर्णीभूतः शशी चन्द्रः। गलितं विगतं यौवनं यस्याः सा तादृशी कामिनी भार्य्या। विगतानि लुप्तानि वारिजानि पद्मानि यस्मात् तत्तथोक्तम्, सरो दीर्घिका। शोभना आकृतिर्यस्य तस्य सुन्दरपुरुषस्य अनक्षरं वर्णोच्चारणरहितं मुखम्, मूकत्वमित्यर्थः। धनपरायणो धनलोभविलुब्धः प्रभुः राजा। सततदुर्गतश्चिरदरिद्रीभूतः सज्जनः। एवम्, नृपाङ्गनगतो राजसभास्थः खलः—एतानि सप्त मे मम मनसि शल्यानि शल्यवद्दुःखदायकानि।

अत्र मनोदुःखोत्पादनकार्य्यं प्रति दिवसधूसरशशिरूपे एकस्मिन् कारणे सत्यपि गलितयौवनकामिनी-प्रभृतीनामन्येषां कारणानामुपादानात् समुच्चयः।

(प) उदाहृते सदसद्योगं दर्शयितुमाह इहेति। शशिप्रभृतीनां शशि-कामिनी-सरः-स्वाकृति-प्रभु-सज्जनानाम्। एवमुत्तरत्रापि।

(फ) अलङ्कारसर्वस्वकारमतमाह अन्ये त्विति। स्वतः स्वभावतः धूसरत्वाद्यभावे इत्यर्थः। धूसरत्वादीनामित्यादिशब्देन गलितयौवनत्व-विगतवारिजत्वानक्षरत्वधनपरायणत्वसततदुर्गतत्वरूपाणां विशेषणानां ग्रहणम्।

(ब) उक्तस्वमतसमर्थनाय अलङ्कारसर्वस्वकार एवाह अत्रेति। हि यस्मात्। धूसरत्वादेरित्यादि-शब्देन गलितयौवनत्वादिविशेषणधर्म्माणां ग्रहणम्। अनुचितत्वमयोग्यत्वम्। परमसुन्दरे शशिकामिन्यादौ परमसुन्दरस्य उज्ज्वलत्वनवयौवनत्वादिधर्म्मस्यैव सर्वथा योग्यत्वादित्याशयः। इति इत्थं यो वैचित्र्यातिरेक इत्यर्थः, तस्यैव चमत्कारविधायित्वम्, न पुनः केचिदित्याद्युक्तरूपस्य सदसद्योगस्य चमत्कारविधायित्वम् इति एवशब्दस्यार्थः, शशिकामिनीप्रभृतीनां सद्रूपाणां विशेष्याणाम् असद्रूपेण विशेष्यात्मकेन खलेन सह योगरूपो यः सदसद्योगस्तस्य एकपदान्तर्गतत्वमात्ररूपतया अवास्तविकत्वे नाकिञ्चित्करत्वादिति भावः।

(भ) ननु यथाकथञ्चित् सदसद्योग एव विवक्षणीयः; तेन एकपदान्तर्गतत्वरूपेणापि सदसद्योगे का हानिरित्याह मनसीति। किञ्चेति चार्थः, उपसंहारः समापनम्, इदञ्च आवहतीति परक्रियायां कर्तृत्वेनान्वेति। दुष्टत्वं भग्नप्रक्रमतादोषम्, आवहति भवन्मते जनयति, सर्वत्र "शशी दिवसधूसरः" इत्यादौ, विशेष्यस्यैव, न पुनर्धूसरत्वादिविशेषणस्येत्यर्थः। अत्र अलङ्कारसर्वस्वकारस्यायमभिप्रायः—भवता शशिप्रभृति-

(१) अपि इति पाठोऽपि दृश्यते। (२) अपि इति पाठोऽपि दृश्यते। (३) उपसंहाराय इति क्वचित् पाठः।

इह च खले कपोतवत् सर्वेषां कारणानां साहित्येनावतारः, समाध्यलङ्कारे त्वेककार्य्यं प्रति साधके समग्रेऽप्यन्यस्य काकतालीयन्यायेनापतनमिति भेदः (म)।

"अरुणे च तरुणि ! नयने तव मलिनञ्च प्रियस्य मुखम् ।
मुखमानतञ्च सखि ! ते ज्वलितश्चास्यान्तरे स्मरज्वलनः ॥" (य)

अत्र आद्ये अर्द्धे गुणयोर्यौगपद्यम्, द्वितीये क्रिययोः (र)। उभयोर्यौगपद्ये यथा—(ल)

खलपर्य्यन्तं केवलं विशेष्यमादायैव सदसद्योग आख्यायते, विशेषणानां का गतिरिति तु कथञ्चिदपि न विविच्यते । एवञ्च शशिकामिन्यादीनां विशेष्याणामेव शोभनत्वप्रक्रमे नृपाङ्गनगत इति विशेषणस्य शोभनत्वाभिधानात् भवन्मते भग्नप्रक्रमतादोषो दुर्निवार एव । अस्मन्मते तु विशेष्यविशेषणयोरेव सदसतोर्योगत्वेन सदसद्योग इत्यभिधानात् धूसरत्वादिविशेषणानामपि सम्पूर्णविवेचनाधीनत्वात् शशिप्रभृतौ धूसरत्वादीनामसुन्दरविशेषणानामेव प्रक्रमे खले "नृपाङ्गनगत." इत्यसुन्दरविशेषणेनैवोपसंहारात् न भग्नप्रक्रमतादोषस्य कथमपि प्रसक्तिरिति । किञ्च शशिकामिनीप्रभृतिशोभनविशेष्याणां सहचरत्वेन अशोभनस्य खलस्याभिधानात् सहचरभिन्नतादोषः, पुनस्तथैव सदसद्योगेन समुच्चयालङ्काराङ्गीकारे "सज्जनो दुर्गतौ मग्नः" इत्यादावपि (४८८ पृ॰) एवमेव सदसद्योगेन समुच्चयालङ्कारप्राप्त्या सहचरभिन्नतादोषस्य प्रायेण विलोपापत्तिः, दोषालङ्कारयोः साङ्कर्य्यापत्तिश्च । अस्मन्मते तु ईदृशसदसद्योगो न समुच्चयभेदक इति पृथगेवावतिष्ठत इति । दर्पणकारमते तु परमतस्यैवाङ्गीकार इति प्रतीयते पूर्वमतदूषणाय तस्याभिधानात् तत्र च दोषानभिधानादिति ध्येयम् ।

(म) ननूक्तप्रकारे कारणसमुच्चये यथा एककार्य्यं प्रति अनेककारणोपन्यासः वक्ष्यमाणसमाध्यलङ्कारेऽपि तथैवेत्यनयोः को भेद इत्याह इह चेति । कारणसमुच्चये चेत्यर्थः । साहित्येन यौगपद्येन, अवतार उपस्थितिः । साधके कारणे समग्रेऽपि साधनसमर्थेऽपि आपतनमुपस्थितिः । काक उड्डीनः तालफलमपि पतितम्, तत्र लोकैराख्यायते—काकेन तालफलं पातितमिति । एष न्यायः, काकतालीयः । तथा च कारणानामदैवात्यौगपद्यं तु समाधिरित्यनयोर्भेद इति सरलार्थः । अतएव समाधिलक्षणे दैवादिति वक्ष्यते ।

(य) गुणयोः क्रिययोश्च यौगपद्ये द्वितीयतृतीयप्रकारौ समुच्चयावेकोदाहरणेनैवाह अरुणे इति । मानिनीं प्रति तत्सख्या उक्तिरियम् । हे तरुणि ! तव नयने नेत्रद्वयम्, अरुणे रक्तवर्णे जाते इति शेषः ; प्रियस्य तव पत्युश्च मुखं मलिनं जातम् । तथा हे सखि ! ते तव मुखमानतमवनतीभूतञ्च, अस्य त्वत्प्रियस्य अन्तरे चित्ते स्मरज्वलनो मदनानलो ज्वलितश्च । अत्र चकारचतुष्टयं यौगपद्यसूचनाय ।

(र) अत्रेति । गुणयोररुणत्वमलिनत्वयोः यौगपद्यमेककालीनत्वम् । द्वितीये अर्द्धे इति पूर्वेणान्वयः, क्रिययोरानमनज्वलनरूपयोः यौगपद्यमिति पूर्वानुषङ्गः । तेनात्र प्रथमार्द्धे गुणसमुच्चयः, द्वितीयार्द्धे तु क्रियासमुच्चय इति भावः । अत्र द्वावेव समुच्चयौ वैयधिकरण्य इति द्रष्टव्यम् ।

(ल) उभयोरिति । गुणक्रिययोरित्यर्थः ।

"कलुषञ्च तवाहितेष्वकस्मात् सितपङ्केरुहसोदरश्रि चक्षुः।
पतितञ्च महीपतीन्द्र! तेषां वपुषि प्रस्फुटमापदां कटाक्षैः॥" (व)

"धुनोति चासिं तनुते च कीर्त्तिम्।" (श) इत्यादावेकाधिकरणेऽप्येष दृश्यते (ष)।

न चात्र दीपकम् (स)। एते हि गुणक्रियायौगपद्ये समुच्चयप्रकारा नियमेन कार्य्य-कारण-काल-नियम-विपर्य्ययरूपातिशयोक्तिमूलाः, दीपकस्य चातिशयोक्तिमूलत्वाभावः (ह)।

१११। समाधिः सुकरे कार्य्ये दैवाद्वस्त्वन्तरागमात्॥ (क्ष)

(व) कलुषञ्चेति। कस्यचित् राज्ञो गुणवर्णनेयम्। हे महीपतीन्द्र! राजश्रेष्ठ! सितपङ्केरुहस्य श्वेतपद्मस्य सोदरा तुल्या श्रीः शोभा यस्य तत्तादृशं तव चक्षुः, अहितेषु शत्रुषु कलुषं रोषेणाविलञ्च जातमिति शेषः; अकस्मात् सहसैव तेषामहितानां वपुषि शरीरे आपदां कटाक्षैर्वक्रदृष्टिभिः प्रस्फुटं स्पष्टं पतितञ्च आपद्भिरुपस्थितञ्चेत्यर्थः।

अत्र कलुषत्वं गुणः पतनञ्च क्रिया अनयोर्यौगपद्यात् समुच्चयः। स चात्रापि वैयधिकरण्ये एव।

(श) सामानाधिकरण्येऽप्युदाहरति धुनोतीति। अस्य मत्पूरितापरपादत्रयं सम्पूर्णमिदं पद्यं यथा—

"दत्ते च दृष्टिं कुरुते च भीतिम् उपैति चाराद्धरते च शक्तिम्।
धुनोति चासिं तनुते च कीर्त्तिं छिनत्ति चारीन् लभते च राज्यम्॥"

इयमपि राज्ञो गुणवर्णना। असौ राजा असिञ्च धुनोति सञ्चालयति, कीर्त्तिं शत्रुविजयनिबन्धनामात्मनः सुख्यातिञ्च तनुते विस्तारयति, युगपदेवैतत् द्वयं करोतीत्यर्थः।

(ष) इत्यादाविति। एष गुणक्रियासमुच्चयः। एतेन वैयधिकरण्ये एव गुणक्रियासमुच्चयस्य बाहुल्यम् एकाधिकरणे तु विरलत्वमिति द्योतितम्।

(स) ननु "धुनोति चासिम्" इत्यादौ अनेकयोः क्रिययोरेककर्त्तृकारकत्वात् "अथ कारकमेकं स्यादनेकासु क्रियासु चेत्" इत्युक्तलक्षणं बहुवचनस्य चाविवक्षितत्वाङ्गीकारात् निरुक्तलक्षणं दीपकमप्यास्तामित्याह न चेति। अत्र "धुनोति चासिम्" इत्यादौ।

(ह) कुतो न दीपकमित्याह एत इति। हि यस्मात्। समुच्चयस्य प्रकारा भेदाः, नियमेन विच्छित्तिविशेषावश्यम्भावेन, कार्य्यकारणयोर्यः कालनियमः कारणस्य पूर्ववर्त्तित्वं कार्य्यस्य च परवर्त्तित्वमित्यं नियमस्तस्य विपर्य्ययं वैपरीत्यं रूपं यस्याः सा तादृशी अतिशयोक्तिर्मूलं येषां ते तथोक्ताः। तथा च "धुनोति चासिम्" इत्यादौ कीर्त्तिविस्तारं प्रति असिसञ्चालनस्य कारणत्वात् तयोः पौर्वापर्य्यस्यावश्यकत्वेऽपि यौगपद्यविवक्षणादतिशयोक्तिसमुद्भावितत्वाच्च क्रियासमुच्चय एवेत्याशयः। एतेन एकस्य कारकस्य अनेकक्रियास्वपि उक्तरूपातिशयोक्तिसत्त्वे क्रियासमुच्चयः, तदसत्त्वे तु दीपकमित्यनयोर्भेदोऽपि प्रतिपादितः।

(क्ष) पूर्वं लक्षिते अनेककारणप्रस्तावादनेककारणघटितमेव समाधिं नामालङ्कारं लक्षयति समाधि-

यथा—"मानमस्या निराकर्त्तुं पादयोर्मे पतिष्यतः ।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्ज्जितम् ॥" (क)

११२ । प्रत्यनीकमशक्तेन प्रतीकारे रिपोर्यदि ।
तदीयस्य तिरस्कारस्तस्यैवोत्कर्षसाधकः ॥ (ख)

तस्यैवेति रिपोरेव । यथा मम—
"मध्येन तनुमध्या मे मध्यं जितवतीत्ययम् ।
इभकुम्भौ भिनत्त्यस्याः कुचकुम्भनिभौ हरिः ॥" (ग)

रिति । दैवादीश्वरेच्छातः, वस्त्वन्तरस्य कारणान्तरस्य आगमादुपस्थितेर्हेतोः, कार्य्ये सुकरे अनायासनिष्पाद्ये सति, समाधिर्नाम अलङ्कारः स्यात् । एतेन केवलप्रारब्धकारणेन दुष्करस्य कार्य्यस्य ईश्वरेच्छाप्राप्तकारणेन सुकरत्वे सति समाधिरिति फलितम् । अतएव काव्यलिङ्गादस्य भेदः । कारणसमुच्चयेन सह भेदस्तु तत्रैव दर्शितः । दैवप्राप्तकारणेन कार्य्यस्य समाधानादस्य समाधिरिति समाख्या ।

(क) मानमिति । सख्युरन्तिके कस्यचित् प्रियाया मानभङ्गोक्तिरियम् । अस्याः प्रस्तुतायाः प्रियायाः, मानं निराकर्त्तुं खण्डयितुं तस्याः पादयोः पतिष्यतो मे मम उपकाराय, दिष्ट्या भाग्येन इदमुत्तरूपं घनस्य मेघस्य गर्जितम्, उदीर्णमुत्पन्नम् । केवलपादपतनेन तस्या मानभङ्गो दुष्कर एवासीत् किन्तु घनगर्जनश्रवणात् तस्याः कामावेशवशेनासौ सुकरो जात इत्याशयः ।

अतएवात्र केवलपादपतनेन दुष्करस्य मानभङ्गरूपकार्य्यस्य ईश्वरेच्छाप्राप्तघनगर्जनेन सुकरत्वात् समाधिरलङ्कारः ।

(ख) ननु समाधिरिव अभीष्टकार्य्यस्य आत्मनो दुष्करत्वे अलङ्कारान्तरं भवति न वेत्याकाङ्क्षायां प्रत्यनीकनामालङ्कारं निरूपयति प्रत्यनीकमिति । रिपोः प्रतीकारे अभीष्टे दमनकार्य्ये अशक्तेन दुष्करतया असमर्थेन जनेन विहित इति शेषः, तदीयस्य रिपुपक्षभुक्तस्य पदार्थस्य तिरस्कारः परिभवः, यदि तस्यैव रिपोरेव उत्कर्षसाधको भवेत्, तदा प्रत्यनीकं नाम अलङ्कारः स्यात् ।

प्रत्यनीकं प्रतिपक्षः तत्प्रयुक्तत्वादस्य प्रत्यनीकमिति संज्ञा ।

(ग) मध्येनेति । तनुमध्या कृशतरकटीदेशा नायिका, मध्येन कटीदेशेन, मे मम सिंहस्य, मध्यं कटीदेशं जितवती स्वकटीदेशस्य कृशताधिक्येन पराजितवती ; इति हेतोः, अयं हरिः सिंहः, अस्या नायिकायाः, कुचकुम्भनिभौ स्तनकुम्भतुल्यौ, इभस्य हस्तिनः कुम्भौ भिनत्ति नखराघातेन विदारयति ।

अत्र सिंहस्य मध्यविजयित्वान्नायिका सिंहस्य रिपुः, स च सिंहस्तस्या नायिकायाः साक्षात् कमपि प्रतीकारं कर्त्तुं न शक्तः ; इतश्च हस्तिकुम्भौ नायिकास्तनकुम्भसदृशाविति नायिकाः पक्षभुक्तावेव, तेनैव च सिंहस्तौ भिनत्ति, तच्च भेदनं नायिकायाः स्तनकुम्भोत्कर्षसाधकत्वेन तस्या अप्युत्कर्षसाधकमेवेति प्रत्यनीकमलङ्कारः । तथा स्तनकुम्भोपमानत्वेन प्रसिद्धयोरिभकुम्भयोः कुचकुम्भनिभावित्यनेनोपमेयत्वकल्पनात् प्रतीपालङ्कारस्येत्यनयोरेकाश्रयानुप्रवेशरूपः सङ्करः ।

११३ । प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम् ।
निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते ॥ (घ)

क्रमेण यथा—"यल्लनेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरम्" इत्यादि (७२४ पृष्ठे) (ङ) ।

"तद्वक्त्रं यदि, मुद्रिता शशिकथा ; हा हेम, सा चेद्द्युतिः ;
तच्चक्षुर्यदि, हारितं कुवलयैः ; तच्चेत् स्मितम्, का सुधा ।
धिक् कन्दर्पधनुः ; भ्रुवौ यदि च ते, किं वा बहु ब्रूमहे
यत् सत्यं पुनरुक्तवस्तुविमुखः सर्गक्रमो वेधसः ॥" (च)

अत्र वक्त्रादिभिरेव चन्द्रादीनां शोभातिवहनात्तेषां निष्फलत्वम् (छ) ।

(घ) प्रत्यनीकोदाहरणद्वितीयार्द्धे प्रतीपालङ्कारोपस्थितेः कारिकाकर्त्तुस्तच्चिकर्त्तुर्यैकत्वात् तत्प्रसङ्गेन प्रतीपालङ्कारं निर्वक्ति प्रसिद्धस्येति । प्रसिद्धस्य उपमानस्य उपमानत्वेन लोके प्रसिद्धिं प्राप्तस्य पदार्थस्य, उपमेयत्वप्रकल्पनम्, वा अथवा तादृशोपमानस्यैव निष्फलत्वाभिधानम् अभिधानवत् निष्फलत्वस्य स्पष्टसूचनम्, प्रतीपमिति नाम अलङ्कार उच्यते । अतएवेदं द्विप्रकारम् ।

प्रसिद्धोपमानस्य उपमेयत्वकल्पनेनैव प्रतीपं प्रतिकूलम् (उल्टा) इति प्रथमप्रकारे संज्ञा व्युत्पत्तिः । द्वितीयप्रकारे तु उपमानस्य निष्फलत्वाभिधानेनैव तस्य प्रातिकूल्यकरणात् प्रतीपमिति व्युत्पत्तिः ।

(ङ) तत्र प्रथमप्रकारमुदाहरति यल्लदिति । व्याख्यातपूर्वमेतत् । अत्र यथाक्रमं नयनवदनगमनोपमानत्वेन प्रसिद्धानाम् इन्दीवर-चन्द्र-राजहंसगतीनां तत्तदुपमेयत्वकल्पनात् प्रतीपालङ्कारः । स च मालारूपः । केवलरूपस्तु "इभकुम्भौ भिनत्त्यस्याः कुचकुम्भनिभौ हरिः" इत्यत्रैव ।

(च) उपमानस्य निष्फलत्वाभिधाने उदाहरति तद्वक्त्रमिति । विद्धशालभञ्जिकायाः श्लोकोऽयम् । यदि तस्याः कुवलयमालाख्याया नायिकायाः, वक्त्रं वदनं विद्यत इति शेषः । एवं सर्वत्र । तदा शशिकथा चन्द्रसौन्दर्यसम्बन्धिनी प्रशंसा, मुद्रिता सङ्कुचिता ; सा कुवलयमालासम्बन्धिनी द्युतिर्देहशोभा चेद्विद्यते, तदा हेम सुवर्णं हा शोभाविषये शोच्यमित्यर्थः । यदि तस्याश्चक्षुर्विद्यते, तदा कुवलयैरिन्दीवरैः हारितं पराजितम् । तत् कुवलयमालासम्बन्धि स्मितं चेद्विद्यते, तदा का नाम सुधा अमृतम्, अपि तु कापि नेत्यर्थः । अपि च यदि ते कुवलयमालासम्बन्धिन्यौ भ्रुवौ विद्येते, तदा कन्दर्पधनुर्धिक् निन्दामीत्यर्थः । बहु वा किं ब्रूमहे वदामः, यत् वेधसो विधातुः सर्गक्रमः सृष्टिप्रणाली, पुनरुक्तवस्तुन एकप्रकारद्वितीयपदार्थात्तन्निर्म्माणादित्यर्थः विमुखो विरोधी भवति, तत् सत्यम्, विधाता एकप्रकारं वस्तुद्वयं न सृजतीति प्रवादः सत्य एवेत्यर्थः, चन्द्रादिभ्यस्तद्वक्त्रादीनामत्युत्तमत्वेन एकप्रकारत्वाभावादिति भावः ।

(छ) अत्रेति । शोभाया अतिवहनादतिरेकेण धारणात् चन्द्रादिशोभाभ्यः अत्यधिकशोभाधारणादित्यर्थः, तेषां चन्द्रादीनाम्, निष्फलत्वं सूचितमिति शेषः, उत्तमसत्त्वे अधमानामनावश्यकत्वादिति भावः । अत्रापि मालारूपोऽयम् । केवलरूपो तथा नैषधे—

"सत्यं स त्रिजः [illegible] यतम् ।"

११४ । उक्त्वा चात्यन्तमुत्कर्षमत्युत्कृष्टस्य वस्तुनः ।
कल्पितेऽप्युपमानत्वे प्रतीपं केचिदूचिरे ॥ (ञ)

यथा—

"अहमेव गुरुः सुदारुणानामिति हालाहल ! तात ! मास्म दृप्यः ।
ननु सन्ति भवादृशानि भूयो भुवनेऽस्मिन् वचनानि दुर्जनानाम् ॥" (झ)

अत्र प्रथमपादे उत्कर्षातिशय उक्तः । तदनुक्तौ तु नायमलङ्कारः ।
यथा—"ब्रह्मेव ब्राह्मणो वदति" इत्यादि (ञ) ।

११५ । मीलितं वस्तुनो गुप्तिः केनचित् तुल्यलक्ष्मणा । (ट)

अत्र समानलक्षणं वस्तु क्वचित् सहजं क्वचिदागन्तुकम् (ठ) । क्रमेण
यथा—

(ञ) मतान्तरीयप्रतीपं लक्षयति उक्त्वेति । किञ्चेति चार्थः । अत्युत्कृष्टस्य अतीवप्रधानस्य, वस्तुनः पदार्थस्य अत्यन्तमुत्कर्षमतीवप्राधान्यमुक्त्वा, उपमानत्वे कल्पिते स्थापितेऽपि केचिदालङ्कारिकाः प्रतीपमूचिरे उक्तवन्तः । अत्र सुष्ठु संज्ञाव्युत्पत्तिविरहादसर्ववादिसिद्धत्वाच्च अस्वरसता प्रत्येतव्या ।

(झ) अहमिति । दुर्जननिगृहीतस्य कस्यचिदुक्तिरियम् । हे हालाहल ! महाविष ! तात ! "अहमेव सुदारुणानां मध्ये गुरुः श्रेष्ठः" इति एवं विविच्येत्यर्थः, मास्म दृप्यः न दर्पितो भव । कथमेवमित्याह—ननु हे हालाहल ! अस्मिन् भुवने भवादृशानि त्वत्तुल्यसुदारुणानि, दुर्जनानां वचनानि भूयो बाहुल्येन सन्ति । अतएवात्मनः अद्वितीयत्वबुद्ध्या तादृशदर्पो न युज्यत इति भावः ।

(ञ) अत्रेति । उत्कर्षातिशयो हालाहलस्येत्यर्थः । तथा च तीव्रतायामतिप्रधानस्य हालाहलस्य "सुदारुणानां गुरुः" इत्यनेन अत्यन्तमुत्कर्षमुक्त्वा "भवादृशानि" इत्यनेन उपमानत्वकल्पनात् प्रतीपालङ्कारः । तदनुक्तौ उत्कर्षातिशयानुक्तौ । ब्रह्मेव विरिञ्चिरिव । अत्रोपमानभूतस्य ब्रह्मण उत्कर्षातिशयानुक्तेर्न प्रतीपमित्याशयः ।

(ट) वस्तुनोः प्रतिरूपत्वे प्रतीपमिव अनुरूपत्वे कश्चिदलङ्कारो भवति न वेत्याकाङ्क्षायां मीलितालङ्कारं निर्वक्ति मीलितमिति । तुल्यं लक्ष्म चिह्नं रूपं यस्य तेन अनुरूपेणेत्यर्थः, केनचिद्वस्तुना, वस्तुनस्तुल्यरूपवस्त्वन्तरस्य गुप्तिर्गोपनं तिरस्करणमिति यावत् मीलितं नाम अलङ्कारः स्यात् । उत्कृष्टगुणेन निकृष्टगुणस्याच्छादनं मीलितमिति विवक्षितोऽर्थः । अतएवास्य वक्ष्यमाणसामान्यालङ्कारादिभिर्भेदस्तत्र तत्रैव वक्ष्यते । व्याजोक्तौ प्रकाशितस्य वस्तुनो व्याजेन गोपनचेष्टामात्रं न तु गोपनं सम्पद्यते अत्र तु अव्याजेन चेष्टां विनैव च गोपनं सम्पद्यत इत्यनयोर्भेदः ।

मीलितं मुद्रितं यत्किञ्चिद्वस्तु वस्त्वन्तरेण तिरोहितमित्यतो मीलितमिति संज्ञा ।

(ठ) अस्य विभजनाय तुल्यलक्ष्म विभजते अत्रेति । समानलक्षणं तुल्यलक्ष्मेति पर्यायमित्यर्थः । सहजं स्वाभाविकम्, आगन्तुकं वस्त्वन्तरादागमनशीलम् । अतएवायं द्विविध इति भावः ।

"लक्ष्मीवक्षोजकस्तूरी-लक्ष्म वक्षःस्थले हरेः ।
ग्रस्तं नालक्षि भारत्या भासा नीलोत्पलाभया ॥" (ड)

अत्र भगवतः श्यामा कान्तिः सहजा (ढ) ।

"सदैव शोणोपलकुण्डलस्य यस्यां मयूखैररुणीकृतानि ।
कोपोपरक्तान्यपि कामिनीनां मुखानि शङ्कां विदधुर्न यूनाम् ॥" (ण)

अत्र माणिक्यकुण्डलस्यारुणिमा मुखे आगन्तुकः (त) ।

११६ । सामान्यं प्रकृतस्यान्यतादात्म्यं सदृशैर्गुणैः ॥ (थ)

यथा—"मल्लिकाचितधम्मिल्लाश्चारुचन्दनचर्चिताः ।
अविभाव्याः सुखं यान्ति चन्द्रिकास्वभिसारिकाः ॥" (द)

(ड) तत्राद्यमुदाहरति लक्ष्मीति । हरेर्नारायणस्य वक्षःस्थले, लक्ष्म्या वक्षोजयोः स्तनयोः कास्तूरीलक्ष्म आलिङ्गनेन संलग्नं कस्तूरीचिह्नम्, नीलोत्पलाभया नीलपद्मतुल्यवर्णया भासा हरेरेव देहप्रभया, ग्रस्तं कवलितं तिरोहितमिति यावत्, अतएव भारत्या लक्ष्मीसपत्नीरूपया सरस्वतीदेव्या, न अलक्षि तत् कस्तूरीलक्ष्म न दृष्टम् । अतएव भारत्या मानो न कृत इत्याशयः ।

(ढ) अत्रेति । भगवतो हरेः । तथा च कस्तूरीगतश्यामगुणमपेक्ष्य उत्कृष्टगुणभूतया सहजया उभयोरपि श्यामत्वात्तुल्यरूपया देहप्रभया श्यामकस्तूरीचिह्नस्य तिरोधानादत्र मीलितालङ्कार इत्याशयः ।

(ण) द्वितीयप्रकारस्योदाहरणमाह सदैवेति । यस्यां पुर्य्याम्, शोणोपलकुण्डलस्य रक्तवर्णमणिनिर्म्मितकर्णाभरणस्य, मयूखैः प्रभाभिः, सदैव अरुणीकृतानि कामिनीनां मुखानि, कोपेन प्रणयकोपेन उपरक्तान्यपि आरक्तवर्णीकृतान्यपि सन्ति, यूनां शङ्कां भयं न विदधुः; तादृशकुण्डलमयूखकृत एवायं रक्तिमेति यूनां निश्चयादिति भावः ।

(त) अत्रेति । अरुणिमा रक्तिमा । तथा च मुखे कुण्डलादागन्तुकेन कोपजनितरागापेक्षया आधिक्यादुत्कृष्टेन रागेण कोपजनितरागस्य तिरोधानादत्र मीलितालङ्कार इति भावः ।

(थ) मीलिते सदृशगुणप्रस्तावोत्थानात् सदृशगुणघटितमेव सामान्यालङ्कारं लक्षयति सामान्यमिति । सदृशैर्गुणैः प्रकृतस्य प्रस्तुतपदार्थस्य अन्यतादात्म्यमप्रस्तुतपदार्थाभेदः सामान्यं नाम अलङ्कारः स्यात् । समानगुणद्वारा प्रस्तुताप्रस्तुतपदार्थयोरभेदप्रतीतिः सामान्यमित्यर्थः । परन्तु स्वगुणत्यागादित्यभिधानादत्र स्वगुणात्यागादिति लभ्यते । तेन तद्गुणेन सह अस्य भेदः ।

सामान्यं समानता तद्घटितत्वादस्य सामान्यमिति संज्ञा ।

(द) मल्लिकेति । मल्लिकाभिस्तदाख्यश्वेतपुष्पैश्चिता व्याप्ता धम्मिल्लाः संयतकेशा यासां ताः, तथा चारुभिश्चन्दनैश्चर्चिताः कृताङ्गलेपाः, अतएव अविभाव्याः चन्द्रिकासमानवर्णत्वात् लोकैश्चन्द्रिकाभिन्नत्वेन विभावयितुमशक्याः, अभिसारिकाः प्रागुक्तलक्षणा नायिकाविशेषाः, चन्द्रिकासु ज्योत्स्नासु सुखं निरुद्वेगं यथा स्यात्तथा यान्ति रमणान्तिकमिति शेषः ।

मीलिते उत्कृष्टगुणेन निकृष्टगुणस्य तिरोधानम्, इह तु उभयोस्तुल्यगुणतया भेदाग्रहः (ध) ।

११७ । तद्गुणः स्वगुणत्यागादत्युत्कृष्टगुणग्रहः । (न)

यथा—"जगाद वदनच्छद्मपद्मपर्यन्तपातिनः ।
नयन् मधुलिहः श्वैत्यमुदग्रदशनांशुभिः ॥" (प)

मीलिते प्रकृतस्य वस्तुनो वस्त्वन्तरेणाच्छादनम्, इह तु वस्त्वन्तरगुणेनाक्रान्तता प्रतीयत इति भेदः (फ) ।

११८ । तद्रूपाननुहारस्तु हेतौ सत्यप्यतद्गुणः ॥ (ब)

यथा—"हन्त ! सान्द्रेण रागेण भृतेऽपि हृदये मम ।
गुणगौर ! निवेशोऽपि कथं नाम न रज्यसि ॥" (भ)

अत्र समानश्वेतगुणद्वारा प्रस्तुताया अभिसारिकाया अप्रस्तुतायाश्चन्द्रिकायाश्च अभेदप्रतीतिः सामान्यालङ्कारः ।

(ध) ननु तुल्यरूपेण वस्तुना वस्त्वन्तरस्य गूहिः समानगुणवशात् प्रस्तुताप्रस्तुतयोर्वस्तुनोरभेदप्रतीतिः पर्यालोचने एकरूपतयैव पर्यवस्यतीत्यनयोर्मीलितसामान्ययोः को भेद इत्याह मीलित इति । तिरोधानमाच्छादनम् । इह तु सामान्ये तु भेदाग्रहो भिन्नतया प्रतीत्यभावः । मीलिते कस्यचिद्गुणस्योत्कर्षः कस्यचिच्च निष्कर्षः, सामान्ये तु उभयगुणयोः समानतैवेति भेदः ।

(न) गुणप्रस्तावाद्गुणघटितमेव तद्गुणालङ्कारं निरूपयति तद्गुण इति । स्वगुणत्यागादात्मगुणत्यागं कृत्वा, अत्युत्कृष्टगुणस्य ग्रहो ग्रहणं तद्गुणो नाम अलङ्कारः स्यात् । तस्य उत्कृष्टगुणस्य गुणो यस्मिन्निति तद्गुणः ।

(प) जगादेति । शिशुपालवधद्वितीयसर्गस्थमिदं पद्यम् । उदग्रा उन्नता ये दशना दन्तास्तेषामंशुभिः शुभ्रकिरणैः, वदनमेव छद्म व्याजं यस्य तादृशं यत् पद्मं तस्य पर्यन्ते प्रान्तभागे पतितुं शीलं येषां तान्, मधुलिहो भ्रमरान्, श्वैत्यं श्वेतवर्णतां नयन् प्रापयन् सन्, जगाद बलरामः उवाच ।

अत्र भ्रमरैः स्वकीयकृष्णगुणं परित्यज्य तदपेक्षया अत्युत्कृष्टश्वैत्यगुणग्रहणात्तद्गुणः । वस्तुतः स्वगुणत्यागाभावेऽपि गुणान्तरेणाक्रान्तिवशादेव स्वगुणत्याग इव प्रतीयत इति बोध्यम् ।

(फ) ननूदाहृते श्वैत्यरूपेण उत्कृष्टगुणेन निकृष्टगुणस्य कृष्णरूपस्य तिरोधानान्मीलितस्यापि प्रसक्तिरित्यनयोः को भेद इत्याह मीलित इति । वस्त्वन्तरेण सजातीयगुणविशिष्टेनेत्यर्थः । वस्त्वन्तरगुणेन विजातीयेनेति तात्पर्य्यम्, आक्रान्तता अभिभूतता । तथा च सजातीयोत्कृष्टगुणेन सजातीयनिकृष्टगुणस्य तिरोधाने तु मीलितम्, विजातीयोत्कृष्टगुणेन विजातीयनिकृष्टगुणस्य तिरोधाने तु तद्गुण इत्यनयोर्भेदः । तत्र उत्कर्षनिकर्षौ तु अधिकत्वन्यूनत्वरूपावेवेति बोध्यम् । सामान्यालङ्कारेण सह अस्य भेदस्तु तत्रैव दर्शितः ।

(ब) तद्गुणवैपरीत्येन अतद्गुणं निर्वक्ति तद्रूपेति । हेतौ सत्यपि सन्निधानादिरूपे परगुणग्रहणकारणे विद्यमानेऽपि, तद्रूपस्य परगुणस्य अननुहारः अग्रहणन्तु, अतद्गुणो नाम अलङ्कारः स्यात् । न विद्यते तस्य परस्य गुणो यस्मिन्नित्यतद्गुणः ।

यथा वा—(म)

"गाङ्गमम्बु सितमम्बु यामुनं कज्जलाभमुभयत्र मज्जतः।
राजहंस! तव सैव शुभ्रता चीयते न च न चापचीयते॥" (य)

पूर्वत्रातिरिक्तहृदयसम्पर्कात् प्राप्तवदपि गुणगौरशब्दवाच्यस्य नायकस्य रक्तत्वं न निष्पन्नम्; उत्तरत्राप्रस्तुतप्रशंसायां विद्यमानायामपि गङ्गायमुनापेक्षया प्रकृतस्य हंसस्य गङ्गायमुनयोः सम्पर्केऽपि न तद्रूपता (र)।

अत्र च गुणाग्रहणरूपविच्छित्तिविशेषाश्रयाद्विशेषोक्तेर्भेदः, (ल) वर्णान्तरोत्पत्त्यभावाच्च विषमात् (व)।

(भ) प्रकृतेन प्रकृतगुणाग्रहणे उदाहरति हन्तेति। अननुरक्तं पतिं प्रति अनुरक्तायाः कस्याश्चिदुक्तिरियम्। हन्त खेदे। हे गुणगौर! विद्याविनयादिगुणजनितयशसा गौरवर्ण! सान्द्रेण गाढ़ेन रागेण अनुरागात्मकरक्तिम्ना भृतेऽपि परिपूर्णेऽपि मम हृदये भिषण्णोऽपि अवस्थितोऽपि त्वं कथं नाम न रज्यसि नानुरक्तो भवसि न लोहितो भवसि च।

अत्र रक्तिमपूर्णहृदयावस्थानरूपे कारणे सत्यपि तदीयरक्तिमाग्रहणादतद्गुणः।

(म) प्रकृतेन अप्रकृतगुणाग्रहणे उदाहर्तुमाह यथा वेति।

(य) गाङ्गमिति। तपस्विगृहे वेश्यागृहे च भिक्षां कुर्वन्तं कञ्चित् साधुं प्रति कस्याचिदुक्तिरियम्। हे राजहंस! गङ्गाया इदं गाङ्गम्, अम्बु जलम्, सितं श्वेतवर्णम्, यमुनाया इदं यामुनम्, अम्बु जलञ्च कज्जलाभं कज्जलतुल्यकृष्णवर्णम्, उभयत्र तयोरुभयोरपि मज्जतः अवगाहमानस्य तव सैव पूर्वैव शुभ्रता देहधवलता, न च चीयते शुभ्रगङ्गाजलसम्बन्धात् न च वर्द्धते, न च अपचीयते कृष्णयमुनाजलसम्बन्धादपि न च ह्रासं प्राप्नोति एतदाश्चर्यमिति भावः।

अत्र मज्जनरूपे कारणे सत्यपि गङ्गाजलगतशुभ्रतायाः यमुनाजलगतकृष्णतायाश्च अग्रहणादतद्गुणः।

(र) उक्तोदाहरणद्वये क्रमेण लक्षणं सङ्गमयति पूर्वत्रेति। "हन्त! सान्द्रेण" इत्यादावित्यर्थः। प्राप्तवदपि प्राप्तुमुचितमपि। न निष्पन्नमिति। तेन अतद्गुणालङ्कार इति भावः। उत्तरत्र "गाङ्गमम्बु" इत्यादौ। ननु अप्रस्तुतप्रशंसाया विद्यमानत्वे राजहंसस्य प्रकृतत्वं कुत इत्याह गङ्गायमुनापेक्षयेति। तथा च प्रकृतत्वं नाम वर्णनीयत्वम्; तेन राजहंसस्य वास्तविकप्रकृतभिक्षुमपेक्ष्य अप्रकृतत्वेऽपि गङ्गा यमुनापेक्षया अधिकवर्णनीयत्वात् प्रकृतत्वमेवेति भावः। न तद्रूपता न श्वेतरूपता न कृष्णरूपता वा। अतएवात्रापि अतद्गुणालङ्कार इत्याशयः।

(ल) ननु उभयोरेव लक्षणयोः सर्वथैकरूपत्वादनेनातद्गुणेन सह प्रागुक्तविशेषोक्तेः को भेद इत्याह अत्र चेति। अतद्गुणे चेत्यर्थः। चकारस्त्वर्थे। गुणाग्रहणरूपो यो विच्छित्तिविशेषो वैचित्र्यातिरेकस्तस्य आश्रयादवलम्बनात्। तथा च वैचित्र्यवैधर्म्यात्त्रान्योऽपि वैधर्म्यमिति भावः।

(व) अथ तथापि "हन्त! सान्द्रेण" इत्यादौ नायकावस्थानं प्रति कारणभूते नायिकाहृदये रक्तो गुणः तदवस्थानरूपकार्य्यवन्नायके तु गौरो गुण इति कार्य्यकारणगुणयोर्विरुद्धत्वाद्विषमालङ्कारेण सह अस्यातद्गुणा-

११९ । संलक्षितस्तु सूक्ष्मोऽर्थ आकारेणेङ्गितेन वा ।
कयापि सूच्यते भङ्ग्या यत्र सूक्ष्मं तदुच्यते ॥ (ग)

सूक्ष्मः स्थूलमतिभिरसंलक्ष्यः (घ) । आकारेण यथा—

"वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे ।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख ॥" (ङ)

अत्र कयाचित् कुङ्कुमभेदेन संलक्षितं कस्याश्चित् पुरुषायितं पाणौ पुरुषचिह्नखड्गलेखालिखनेन सूचितम् (च) । इङ्गितेन यथा—

"सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया ।
हसन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥" (छ)

लङ्कारस्य को भेद इत्याह वर्णेति । वर्णान्तरस्य रक्तविपरीतगुणान्तरस्य उत्पत्त्यभावात् विषमाद् दस्यनुपज्यते । तथा चोक्तोदाहरणे नायकगतो गौरो गुणो नोत्पन्नः, किन्तु स्थित एव ; विषमालङ्कारलक्षणे तु कार्य्यगतविरुद्धगुणोत्पत्तिरेव विवक्षितेति भावः । वस्तुतस्तु उक्तोदाहरणद्वये विषमालङ्कारप्रसक्तिरेव नास्ति, नायकं राजहंसञ्च प्रति नायिकाहृदयस्य गङ्गायमुनयोश्च कारणत्वाभावात्, अवस्थानादिक्रियायाः कार्यत्वेन तद्गतोऽपि कार्य्यत्वाङ्गीकारस्य अन्याय्यत्वादिति ध्येयम् ।

(ग) गुणघटितानलङ्कारानभिधायेदानीं दुरूहार्थघटितानभिधातुं तत्र प्राधान्यात् प्रथमं सूक्ष्मं नामालङ्कारमभिधत्ते संलक्षित इति । तुशब्दः पूर्वप्रकरणभेदद्योतनार्थः । यत्रेति यदर्थकमव्ययम् । तथा च आकारेण चिह्नाद्याकृतिविशेषेण, इङ्गितेन भ्रूनेत्रादिभङ्ग्या वा संलक्षितः सम्यगवगतः, सूक्ष्मः सूक्ष्मबुद्धिवेद्यः अर्थो विषयः कयापि भङ्ग्या विदग्धव्यवहारेण, यत्र यत्, सूच्यते संलक्षयता जनेन परस्मै ज्ञाप्यते, तत् सूक्ष्मं नाम अलङ्कार उच्यते ।

(घ) संज्ञाव्युत्पत्तिमाह सूक्ष्म इति । सूक्ष्मबुद्धिवेद्यत्वादेवास्य सूक्ष्म इति संज्ञेत्याशयः । अत्र अनयोर्भेदयोर्मध्य इत्यर्थः ।

(ङ) वक्त्रेति । काऽपि वयस्या, तन्व्याः कृशाङ्ग्याः अपरस्या वयस्यायाः वक्त्रान्मुखात् स्यन्दिनः अवस्रंसिनः ये स्वेदबिन्दुप्रबन्धा घर्मबिन्दुधारास्तैः, कण्ठे गलदेशे कुङ्कुमम् अङ्गरागभूतं कुङ्कुमलेपं भिन्नं विभक्तं दृष्ट्वा, सुरते उपरिस्थितत्वेन पुरुषवद्व्यवहारमनुमायेत्यर्थः, स्मित्वा मन्दहास्यं कृत्वा, पुंस्त्वं तस्या एव वयस्यायाः पुरुषत्वम्, व्यञ्जयन्ती प्रकाशयन्ती सती, पाणौ तस्या वयस्याया एव हस्ततले खड्गलेखाम् असिचित्रं लिलेख चित्रयामास ।

(च) अत्रेति । कयाचित् वयस्यया कुङ्कुमभेदेन तद्रूपाकारेण । पुरुषायितं पुरुषवदाचरितम् उत्तानशयस्य नायकस्योपरि तिष्ठन्त्या रमणात् पुरुषवद्व्यवहृतमित्यर्थः । तथैव मुखगलितघर्मबिन्दुप्रवाहेण कण्ठगतकुङ्कुमलेपभेदनसम्भवात्, उत्तानशयाया नायिकाया रमणे तु तन्मुखगलितघर्मप्रवाहस्य शय्यायामेव पतनसम्भवेन तदीयकण्ठकुङ्कुमलेपभेदनासम्भवादिति भावः । पुरुषचिह्नं पुरुषैरेव खड्गधारणात् पुरुषत्वपरिचायको यो खड्गस्तस्य लेखा चित्रं तस्या लिखनेन अवलक्तकादिभिश्चित्रणेन ।

अत्र विटस्य भ्रूक्षेपादिना लक्षितः सङ्केतकालाभिप्रायो रजनीकालभाविना पद्मनिमीलनेन प्रकाशितः (क)।

१२०। व्याजोक्तिर्गोपनं व्याजादुद्भिन्नस्यापि वस्तुनः। (ख)

यथा—"शैलेन्द्रप्रतिपाद्यमानगिरिजाहस्तोपगूढोल्लस-
द्रोमाञ्चादिविसंष्ठुलाखिलविधिव्यासङ्गभङ्गाकुलः।
आः! शैत्यं तुहिनाचलस्य करयोरित्यूचिवान् सस्मितं
शैलान्तःपुरमातृमण्डलगणैर्दृष्टोऽवताद्वः शिवः॥" (ग)

नेयं प्रथमापह्नुतिः, अपह्नवकारिणो विषयस्यानभिधानात् (घ)। द्वितीयापह्नुतिभेदश्च तत्प्रस्तावे दर्शितः (ङ)।

(घ) सङ्केतेति। विवृतपूर्वमेतत् (६१ पृष्ठे)।

(क) अत्रेति। विटस्य उपनायकस्य, भ्रूक्षेपादिना इङ्गितेनेत्यर्थः। सङ्केतकालाभिप्रायो रमणस्य कालं ज्ञातुमिच्छेत्यर्थः। पद्मस्य निमीलनेन मुद्रणेन, प्रकाशितः स्वयमवगतत्वेन विटाय द्योतितः। अथवा प्रकाशितो विटस्याभिप्रायं बुद्ध्वा तस्यै रजनीरूपः सङ्केतकालो ज्ञापितः।

(ख) निरुक्तसूत्रलक्षणं व्याजरूपाया भङ्ग्याः प्रस्तावात् व्याजघटितं व्याजोक्तिं नामालङ्कारं लक्षयति व्याजोक्तिरिति। उद्भिन्नस्यापि कार्यद्वारा प्रकाशितस्यापि, वस्तुनः पदार्थस्य, व्याजात् प्रकाशयोग्यकारणाभिधानरूपच्छलात् गोपनं व्याजोक्तिर्नाम अलङ्कार उच्यत इत्यनुषङ्गः।

अयथार्थकारणोपन्यासेन कार्यस्य यथार्थकारणगोपनं व्याजोक्तिरिति फलितार्थः। व्याजेन उक्तिर्व्याजोक्तिरिति व्युत्पत्तिः।

(ग) शैलेन्द्रेति। शैलेन्द्रेण गिरिराजेन हिमालयेन प्रतिपाद्यमानाया दीयमानाया गिरिजायाः पार्वत्या हस्तस्य उपगूढेन संयोगेन उल्लसन्त उत्पद्यमाना ये रोमाञ्चादयः कामोद्रेकात् रोमाञ्चकम्पप्रभृतयस्तैः विसंष्ठुलो विशृङ्खलीभूतो यः अखिलः समस्तो विधिव्यासङ्गो विवाहकालीनमन्त्रपाठादिवैदिकव्यापारस्तस्य भङ्गेन भङ्गभयेन आकुलो व्यग्रः। 'आः' इति शैत्यजनितपीडासूचकम्। तुहिनाचलस्य वरणसमयस्पर्शिनो हिमालयस्य, करयोर्हस्तयोः, शैत्यं शीतलत्वम् इति ऊचिवानुक्तवान्; तथा शैलस्य हिमालयस्यैव अन्तःपुरे ये मातृमण्डलगणा मण्डलाकारेणावस्थिता ब्राह्मीप्रभृतिमातृगणास्तैः सस्मितं कामोद्रेकेणैव रोमाञ्चकम्पादिदर्शनात् समन्दहासं दृष्टः, शिवो महादेवः, वो युष्मान् अवतात् रक्षेत्।

अत्र "आः! शैत्यं तुहिनाचलस्य करयोः" इति प्रकाशयोग्यकारणाभिधानरूपच्छलं कुर्वता शिवेन "शीतलस्पर्शजनित एवायं मम रोमाञ्चकम्पादिः" इति सूचयता तादृशरोमाञ्चादिकार्यद्वारा प्रकाशितस्यापि कामोद्रेकरूपकारणस्य गोपनं कृतमिति व्याजोक्तिरलङ्कारः। अथवा हिमालयकरस्पर्शेनैवायं मे रोमाञ्चकम्पादि इति सूचयता शिवेन रोमाञ्चादिकार्यसिद्धिं प्रति शीतस्पर्शरूपायथार्थकारणोपन्यासेन कामोद्रेकरूपयथार्थकारणस्य गोपनात् व्याजोक्तिः।

१२१ । स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम् ॥ (च)

दुरूहयोः कविमात्रवेद्ययोः, अर्थस्य डिम्भादेः, स्वक्रियारूपयोः (१) तदेकाश्रययोश्चेष्टारूपयोः (छ) । यथा मम—

"लाङ्गूलेनाभिहत्य क्षितितलमसकृद्दारयन्नग्रपद्भ्या-
मात्मन्येवावलीय द्रुतमथ गगनं प्रोत्पतन् विक्रमेण ।
स्फूर्जद्धुङ्कारघोषः प्रतिदिशमखिलान् द्रावयन्नेष जन्तून्
कोपाविष्टः प्रविष्टः प्रतिवनमरुणोच्छूनचक्षुस्तरक्षुः ॥" (ज)

(घ) नन्वत्र प्रकृतकारणप्रतिषेधसूचनेन अप्रकृतकारणस्थापनात् "प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः" इति निरुक्तलक्षणाया अपह्नुतेरपि प्रसक्तिरित्यनयोः को भेद इत्याह नेयमिति । इयमुदाहरणस्था विचित्रता, प्रथमा प्रकृतमित्याद्युक्तलक्षणा । अपह्नवकारिणः प्रकृतकारणगोपनकारिणः शिवस्य कर्त्तुः, विषयस्य प्रकृतकारणस्य । तथा च गोपनकारिणा जनेन प्रकृतमभिधायैव तत्प्रतिषेधपूर्वकाप्रकृतस्थापने प्रथमा अपह्नुतिः, प्रकृतमनभिधाय तत्प्रतिषेधसूचनपूर्वकाप्रकृतस्थापने तु व्याजोक्तिरित्यनयोर्भेद इति भावः । किञ्च, निरुक्तापह्नुतिलक्षणस्य "उपमेयं निषिध्य उपमानस्थापनादपह्नुतिः" इत्यर्थकतया उदाहृते तत्प्रसक्तिरेव नास्ति, कामोद्रेकशीतलस्पर्शयोरुपमेयोपमानभावाभावादित्यपि द्रष्टव्यम् ।

(ङ) अथ तथापि रोमाञ्चकम्पादिकार्य्यैर्व कामोद्रेकरूपकारणं द्योतयित्वा शीतलस्पर्शरूपकारणोपन्यासेन तदन्यथाकरणात् "गोपनीयं कमप्यर्थम्" इत्याद्युक्तलक्षणाया द्वितीयापह्नुतेः प्रसक्तिस्तथा सह अस्य को भेद इत्याह द्वितीयेति । तत्प्रस्तावे द्वितीयापह्नुतिप्रकरणे ।

(च) दुरूहार्थस्य प्रकृतत्वात् विशेषातिदिष्टेन च व्याजोक्त्यलङ्कारेण तद्बाधायाः अयोगात् दुरूहार्थघटितमेव स्वभावोक्तिं नाम अलङ्कारं निरूपयति स्वभावोक्तिरिति । दुरूहयोर्विशेषणं पुष्णीतेर्यत्नेन स्थूलबुद्धिभिरवेद्ययोः, कविमात्रवेद्ययोः, अर्थस्य शिशु-पशु-पक्षिप्रभृतिपदार्थस्य स्वक्रियारूपयोः केवलतद्गतस्वाभाविकचेष्टाकारयोः, वर्णनं स्वभावोक्तिर्नाम अलङ्कार उच्यत इत्यनुषज्यते ।

"गौरपत्यं बलीवर्द्दो घासमत्ति मुखेन सः । लाङ्गूलं विद्यते तस्य शृङ्गश्चापि च विद्यते ॥"

इत्यादौ साधारणबुद्धिवेद्यत्वेनादुरूहयोर्वृषगतस्वाभाविकचेष्टाक्रिययोर्वर्णने अतिव्याप्तिवारणाय दुरूहेति विशेषणम् । तर्कवागीशस्तु "पश्चात् पुच्छं वहति विपुलम्" इत्यादावुत्तररामचरितपद्येऽपि स्वभावोक्तिमाह स्म । तदपि युक्तमेव ; अश्वगततादृशचेष्टारूपयोस्तत्कालोपस्थितलवादिबालकानां दुरूहत्वेन चमत्कारविधायित्वात् । "गौरपत्यम्" इत्यादौ तु उद्देश्यभूतश्रोतुरदुरूहत्वेन अचमत्कारविधायित्वमेवेति सुधीभिर्विभावनीयम् ।

स्वभावस्योक्तिर्यस्मिन्निति व्युत्पत्तिः । अथवा स्वभावोक्तिघटितत्वादेवास्य स्वभावोक्तिरिति संज्ञा ।

(छ) लक्षणार्थं विवृणोति दुरूहयोरिति । डिम्भः शिशुः, आदिशब्दात् पशु-पक्षिप्रभृतीनां ग्रहणम् । "पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः" इत्यमरः । स डिम्भादिरेव एकः केवलः आश्रयो ययोस्तयोः । डिम्भादेर्या क्रिया यच्च रूपं वर्ण्यते, तत् केवलं तन्मात्रगतमेव भवेदिति भावः । चेष्टा आचरणम्, रूपमाकारस्तयोः ।

(१) स्वयोरिति पाठान्तरम्, स्वक्रिययोरित्यपि क्वचित् पाठः ।

१२२ । अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यतः ।
यत् प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम् ॥ (झ)

यथा—"मुनिर्जयति योगीन्द्रो महात्मा कुम्भसम्भवः ।
येनैक चुलुके दृष्टौ दिव्यौ तौ मत्स्य-कच्छपौ ॥" (ञ)

यथा वा—(ट)

"आसीदञ्जनमत्रेति पश्यामि तव लोचने ।
भाविभूषणसम्भारां साक्षात् कुर्वे तवाकृतिम् ॥" (ठ)

(ज) लाङ्गूलेनेति । कोपाविष्टः क्रुद्धः, अतएव अरुणे रक्तवर्णे उच्छूने स्फीते च चक्षुषी यस्य स तथोक्तः एष तरक्षुर्व्याघ्रविशेषः, लाङ्गूलेन क्षितितलं भूमिम् अभिहत्य ताड़यित्वा, अग्रपद्भ्यां चरणाग्राभ्याम्, असकृत् बारं बारं दारयन् क्षितितलमेव विलिखन्, आत्मन्येव अवलीय सङ्कुचितदेहो भूत्वेत्यर्थः, अथ अनन्तरं विक्रमेण द्रुतं गमनं प्रोत्पतन् उद्गच्छन्, स्फुर्जन् वर्द्धमानो हुङ्कारघोषो हुमितिशब्दो यस्य स तथाभूतः सन्, प्रतिदिशं सर्वासु दिक्षु, जन्तून् छागकुक्कुरादि प्राणिगणान् द्रावयन् भयजननेनापसारयन्, प्रतिवनं वने वने प्रविष्टः ।

अत्र क्रुद्धस्य तरक्षोः स्वाभाविकक्रियारूपयोर्वर्णनात् तयोश्च तथाभूतयोरन्यत्रासम्भवेन केवलतन्मात्रनिष्ठत्वात् स्वभावोक्तिरलङ्कारः । इदं पशोः स्वभाववर्णनम् ।

शिशोः स्वभाववर्णने यथा मम रुक्मिणीहरणमहाकाव्ये शिशुभूतायाः रुक्मिण्याः—

"यदा तु धात्री नहि सन्निधावो तदा सलीलं सलिलं विलाप्य ।
मृदुन्यधाङ्गे मृदि तद्विहस्य करेण दत्त्वेव लिलिप दत्त्वा ॥"

(झ) प्राकरणिकाद्भुतार्थघटितमेव भाविकं नाम अलङ्कारं लक्षयति अद्भुतस्येति । अद्भुतस्य आश्चर्यस्य, भूतस्य अतीतस्य, अथवा भविष्यतो भाविनः पदार्थस्य, यत् प्रत्यक्षायमाणत्वं वर्णनाकौशलेन प्रत्यक्षवत् प्रकाशमानत्वं तत् भाविकं नाम अलङ्करणमुदाहृतमुक्तम्, आलङ्कारिकैरिति शेषः । पदार्थस्य उक्तद्विविधतया भाविकमपि द्विविधम् ।

भावेन कवेरभिप्रायविशेषेण संसृष्टमिति व्युत्पत्तिः । काव्यप्रकाशकृता तु "भावः कवेरभिप्रायोऽस्तीति भाविकम्" इत्युक्तम् । अत्रार्थे अयमपि नित्यनपुंसकलिङ्गः शब्दः ।

(ञ) तत्राद्यमुदाहरति मुनिरिति । योगिनामिन्द्रः श्रेष्ठो महात्मा कुम्भसम्भवो मुनिरगस्त्यः, जयति सर्वेष्वेव मुनिषु उत्कर्षेण वर्त्तते । येन मुनिना एकस्मिन् चुलुके प्रसृतौ दिव्यौ स्वर्गीयौ, तौ नारायणावतारत्वेन प्रसिद्धौ, मत्स्यकच्छपौ दृष्टौ समुद्रपानकाले इति शेषः ।

अत्र आत्मनः प्रकृतिमात्रस्थान एव निरतिशयविशाल-भगवदवतारमत्स्यकच्छपदर्शितया अद्भुतस्य महर्षेरगस्त्यस्य जयतीति वर्त्तमानकालनिर्देशेन शीदृशां प्रत्यक्षायमाणत्वात् भाविकालङ्कारः ।

(ट) एकोदाहरणेनैव भूतभविष्यतोः प्रत्यक्षायमाणत्वे द्वितीयस्तीतप्रकारौ दर्शयितुमाह यथा वेति ।

न चायं प्रसादाख्यो गुणः, भूतभाविनोः प्रत्यक्षायमाणत्वे तस्याहेतुत्वात् (ड)। न चाद्भुतो रसः, विस्मयं प्रति अस्य हेतुत्वात् (ढ)। न चातिशयोक्तिरलङ्कारः, अध्यवसायाभावात् (ण)। न च भ्रान्तिमान्, भूतभाविनोर्भूतभावितयैव प्रकाशनात् (त)। न च स्वभावोक्तिः, तस्य लौकिकवस्तुगतसूक्ष्मधर्मस्वभावस्यैव यथावद्वर्णनं स्वरूपम्, अस्य तु वस्तुनः प्रत्यक्षायमाणत्वरूपो विच्छित्तिविशेषोऽस्तीति (थ)। यदि पुनर्वस्तुनः क्वचित् स्वभावोक्तावप्यस्या विच्छित्तेः सम्भवः, तदोभयोः सङ्करः (द)।

(ठ) आसीदिति। दशवर्षदेशीयां काञ्चित् कुमारीमवलोक्य कस्यचिदुक्तिरियम्। अत्र अनयोः अञ्जनं कज्जलमासीत् इति ज्ञानेन तव लोचने नयनद्वयं पश्यामि; पूर्वं सततमेवाञ्जनदर्शनादिदानीमपि तथैव संस्कारादिति भावः। तथा भावी भूषणसम्भारः अलङ्कारसमूहो यस्यां तां तादृशीं तव आकृतिं देहं साक्षात् कुर्वे प्रत्यक्षीकरोमि; अस्यास्तवाकृतेरत्यन्तसुन्दरतया धनिगृहे परिणयावस्थाभावसम्भावनया तथैवानुमानाद्यथादित्याशयः।

अत्र पूर्वार्द्धे भूतस्याप्यञ्जनस्य पश्यामीति वर्त्तमाननिर्देशेन प्रत्यक्षायमाणतया भाविकम्। परार्द्धे च भाविनोऽपि भूषणसम्भारस्य साक्षात् कुर्वे इति वर्त्तमाननिर्देशेन प्रत्यक्षायमाणतया भाविकम्।

(ड) ननु भूतभाविनोः प्रत्यक्षायमाणत्वं प्रति उक्तरूपसुखबोध्यशब्दप्रयोग एव प्रयोजक इति प्रसादगुण एवायमङ्गीक्रियताम्, किमतिरिक्तभाविकाख्यालङ्काराङ्गीकारगौरवेणेत्याह न चेति। अयमनुभूयमानो वैचित्र्यविशेषः प्रसादाख्यो गुण इति वाच्यं न चेत्यर्थः। एवमग्रेऽपि बोध्यम्। तत्र प्रसादगुणस्य। रसादिपुष्टिं प्रत्येव तस्य हेतुत्वादित्याशयः।

(ढ) तर्हि अद्भुतस्य प्रत्यक्षायमाणत्वस्थले अद्भुतरस एवास्तामित्याह न चेति। अस्य अद्भुतरसस्य, विस्मयं प्रति हेतुत्वात् श्रोतॄणां विस्मयजनकत्वात्; "मुनिर्जयति" इत्यादौ तु तदभावादिति भावः।

(ण) अथ तदा अप्रत्यक्षस्यापि अद्भुतस्य प्रत्यक्षायमाणत्वे भूतभाविनोः प्रत्यक्षायमाणत्वे च सम्भवातिक्रमिणोऽर्थस्य प्रतीतेरतिशयोक्तिरलङ्कार एवायं भवत्वित्याह न चेति। अध्यवसायस्य अभेदप्रतिपत्तेरभावात्; अतिशयोक्तेश्च तद्रूपत्वादित्याशयः।

(त) ननु तर्हि अप्रत्यक्षस्यापि प्रत्यक्षवत् प्रतीतिर्भ्रान्तिरेवेति भ्रान्तिमानलङ्कार एवायमस्तु इत्याह न चेति। भूतेति। एवञ्च सति "अतस्मिंस्तद्बुद्धिर्भ्रान्तिः" इत्युक्तलक्षणायां भ्रान्तेरेवाभावात् प्रत्यक्षायमाणत्वमित्युक्त्या वास्तविकप्रत्यक्षाभावस्य सूचितत्वाच्चेति भावः।

(थ) अथ तथापि अगम्यस्य कुमार्यास्य दुहित्रोः क्रियारूपयोर्वर्णनात् स्वभावोक्तिरेव भवत्वित्याह न चेति। तस्य स्वभावोक्त्यलङ्कारस्य, लौकिकवस्तुगतः सूक्ष्मः सूक्ष्मबुद्धिमात्रवेद्यो यो धर्मरूपः स्वभावस्तस्यैव, न तु प्रत्यक्षायमाणत्वस्य इति एवशब्दस्यार्थः। स्वरूपं लक्षणम्। अस्य तु भाविकालङ्कारस्य तु, वस्तुनः अद्भुतस्य भूतस्य भविष्यतो वा पदार्थस्य। विच्छित्तिविशेषः स्वभावोक्तिवैचित्र्यापेक्षया भिन्नरूपवैचित्र्यम्, इति हेतोर्न च स्वभावोक्तिरित्यर्थः। एतेन वैचित्र्यभेदादेव नामभेद इति सूचितम्।

"अनातपत्रोऽप्ययमत्र लक्ष्यते सितातपत्रैरिव सर्वतो वृतः ।
अचामरोऽप्येष सदैव वीज्यते विलासबालव्यजनेन कोऽप्ययम् ॥" (ध)

अत्र प्रत्यक्षायमाणस्यैव वर्णनान्नायमलङ्कारः, वर्णनावशेन प्रत्यक्षायमाणत्वस्यैवास्य स्वरूपत्वात् (१) (न) । यत् पुनः प्रत्यक्षायमाणस्यापि वर्णने प्रत्यक्षायमाणत्वं तत्रायमलङ्कारो भवितुं युक्तः । यथोदाहृते "आसीदञ्जनम्" इत्यादौ (प) ।

१२३ । लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते ।
यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत् ॥ (फ)

(द) नन्वेवम् स्वभावोक्तिघटकविच्छित्तेर्भाविकघटकविच्छित्तेश्च समत्वे कतरोऽङ्गीकर्त्तव्य इत्याह यदि पुनरिति । अस्या भाविकालङ्कारघटिकायाः । उभयोः स्वभावोक्तिभाविकयोः । तथा च "ग्रीवाभङ्गाभिरामम्" इत्यादौ शाकुन्तलश्लोके हरिणस्य तदानीन्तनतन्मात्रगतक्रियास्वरूपवर्णनात् स्वभावोक्तिः, तथाभूततया अद्भुतरूपस्य तस्य हरिणस्य प्रत्यक्षायमाणत्वाच्च भाविकमित्यनयोरङ्गाङ्गिभावेन सङ्करः ।

(ध) प्रत्यक्षायमाणत्वं निषेद्धुमुदाहरति अनातपत्र इति । कस्यचित् राज्ञो वर्णनमिदम् । अयं राजा, अनातपत्रोऽपि छत्रविहीनोऽपि, सर्वतः समन्तात् सितातपत्रैः श्वेतच्छत्रैर्वृत आवृत इव लक्ष्यते । तथा अचामरोऽपि बालव्यजनरहितोऽपि, सदैव बालव्यजनेन श्वेतचामरेण वीज्यत इव ; उभयत्रैव यशोराशिप्रसारादिति भावः ; अतएवायं कोऽपि अनिर्वचनीयः पुरुष इत्यर्थः ।

(न) अत्रेति । प्रत्यक्षायमाणस्यैव सितातपत्रकर्त्तृकावरणस्य विलासबालव्यजनकर्तृकव्यजनस्य च उत्प्रेक्षितत्वया सम्भावनावशेनैव प्रत्यक्षवदाचरत इत्यर्थः । अयं भाविकनामा । अस्य भाविकस्य । तथा च यत्र उत्प्रेक्षेतरकविरचनाकौशलेन अद्भुतादेः प्रत्यक्षायमाणत्वम्, तत्रैव भाविकम्, न पुनरुत्प्रेक्षात्मकसम्भावनायामपि ; तस्याः सर्वत्रैव सम्भवेन सर्वत्रैव भाविकप्रसङ्गात् । तेन "अनातपत्र" इत्यादौ उत्प्रेक्षात्मकसम्भावनया आतपत्रकर्त्तृकावरणादेः प्रत्यक्षायमाणत्वान्न भाविकप्रसङ्ग इत्याशयः ।

(प) अथ तर्हि "आसीदञ्जनमत्रेति" इत्यादावपि प्रत्यक्षायमाणस्यैव अञ्जनत्वादेर्वर्णनात् कथं भाविकमित्याह यत् पुनरिति । अयं भाविकनामा । तथा च वयं प्रत्यक्षायमाणस्य वर्णनामात्र एव भाविकमिति न ब्रूमः, अपि तु यत्र उत्प्रेक्षेतरवर्णनावशेन प्रत्यक्षायमाणत्वं तत्रैव भाविकमिति ब्रूमः । तेन "अनातपत्रः" इत्यादौ उत्प्रेक्षावशेनैव प्रत्यक्षायमाणस्य वर्णनान्न भाविकम् ; "आसीदञ्जनम्" इत्यादौ तु प्रत्यक्षायमाणस्यापि उत्प्रेक्षेतरवर्णनावशेन पुनः प्रत्यक्षायमाणत्वमिति भाविकं भवत्येवेति सर्वं समञ्जसमिति भावः ।

(फ) ननु सर्वथा यथावद्वस्तुवर्णने स्वभावोक्तिः यथाकथञ्चिदयथावद्वस्तुवर्णने च भाविकम्, किन्तु अयथावद्वस्तुवर्णने कश्चिदलङ्कारो भवति न वेत्याकाङ्क्षायां प्रथमप्रकारमुदात्तं निरूपयन् एवंमेव तन्निरूपयति लोकेति । लोकानतिशेते अतिक्रामतीति लोकातिशया लोके असम्भवेत्यर्थः या सम्पत्तिर्धनवादिसमृद्धिस्तस्या

---

(१) प्रत्यक्षायमाणत्वस्यास्य, प्रत्यक्षायमाणत्वस्यैव स्वरूपत्वादिति पाठभेदौ ।

क्रमेणोदाहरणम्—

"अधःकृताम्भोधरमण्डलानां यस्यां शशाङ्कोपलकुट्टिमानाम् ।
ज्योत्स्नानिपातात् क्षरतां पयोभिः केलीवनं वृद्धिमुरीकरोति ॥" (ब)

"नाभिप्रभिन्नाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।
अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान् पुरुषोऽधिशेते ॥" (भ)

१२४ । रसभावौ तदाभासौ भावस्य प्रशमस्तथा ।
गुणीभूतत्वमायान्ति यदालङ्कृतयस्तदा ॥
रसवत् प्रेय ऊर्जस्वि समाहितमिति क्रमात् । (म)

तदाभासो रसाभासो भावाभासश्च ।

वर्णना उदात्तं नाम अलङ्कार उच्यते । वा अथवा यद्यपि महतां चरितं चरितवर्णनम्, प्रस्तुतस्य प्रस्तुतवर्णनस्य अङ्गं सम्पादकं भवेत्, तदपि उदात्तमुच्यते इति पूर्वेणान्वयः । अतएवेदं द्विविधमिति बोध्यम् ।

अतिशयोक्तिरध्यवसायमूला इदन्तु न तथेति भेदः । महतामिति बहुवचनमविवक्षितम् ।

उदात्तमुक्तम् । तथा च उदात्तसम्पत्तिवर्णनास्वरूपत्वात् उदात्तचरितवर्णनास्वरूपत्वाच्च अस्य उदात्तमिति संज्ञा । अस्मिन्नर्थे अयमुदात्तशब्दोऽपि नित्यनपुंसकलिङ्गः ।

(ब) तत्राद्यमुदाहरति अध इति । कस्याश्चित् पुरी वर्णनमिदम् । यस्यां पुरि केलीवनं तादृशभवनसन्निहितं विलासकाननं कर्तृ, अधःकृतं नीचे स्थापितम् अम्भोधरमण्डलं मेघसमूहो यैस्तादृशानाम्, ज्योत्स्नायाश्चन्द्रकिरणावल्याः निपातात् पतनात् क्षरतां जलं निःसारयताम्, शशाङ्कोपलकुट्टिमानां चन्द्रकान्तमणिनिर्म्मितोपरितनभूमीनां पयोभिः प्रस्रुतजलैः वृद्धिं पुष्टिम्, उरीकरोति अङ्गीकरोति आप्नोतीत्यर्थः । चन्द्रकिरणसम्पर्के चन्द्रकान्तमणितो जलं स्रवतीति प्रसिद्धिः । जलेन वनवृद्धिस्तु प्रत्यक्षा ।

लोके एकोऽपि चन्द्रकान्तमणिः सुदुर्लभ एव, किन्तु तव पुरि तैरेव चन्द्रकान्तमणिभिर्हर्म्यस्य उपरितनभूमय एव बद्धा इति लोकातिशयसम्पत्तिवर्णनादत्र उदात्तालङ्कारः ।

(भ) द्वितीयप्रकारं दर्शयति नाभीति । समुद्रवर्णनात्मकं रघुवंशत्रयोदशसर्गस्थमिदं पद्यम् । नाभितः प्रभिन्नमुत्पन्नम् अम्बुरुहं पद्ममेव आसनं यस्य तेन तादृशेन, प्रथमेन आद्येन धात्रा सृष्टिकर्त्रां ब्रह्मणा संस्तूयमानः, युगान्ते प्रलयकाले उचिता अभ्यस्ता योगनिद्रा यस्य सः, पुरुषो नारायणः, लोकान् संहृत्य आत्मनि उपसंहृत्य, अमुं समुद्रम्. अधिशेते आश्रित्य स्वपिति ।

अत्र नारायणस्य चरितवर्णनं प्रस्तुतसमुद्रवर्णनस्याङ्गमिति उदात्तालङ्कारः ।

(म) एतावता ग्रन्थेन शब्दघटितानर्थघटितांश्चालङ्कारान् निरूप्य इदानीं रसादिघटितानपि निरूपयितुं तत्र प्रधानतया रसवदाद्यलङ्कारचतुष्टयं निरूपयति रसेति । तत्र रसादयः सर्वे एव तृतीयपरिच्छेदे निरूपिता द्रष्टव्याः । रसो भावश्चेति तौ तयो रसभावयोराभासौ तदाभासौ, तथा भावस्य प्रशमः शान्तिश्च एते यदा गुणीभूतत्वम् अपररसाद्यपेक्षया अप्रधानत्वमङ्गत्वमिति यावत् आयान्ति प्राप्नुवन्ति ; तदा रसवत्,

तत्र रसयोगाद्रसवदलङ्कारो यथा—"अयं स रसनोत्कर्षी" इत्यादि (२५६ पृष्ठे)। अत्र शृङ्गारः करुणस्याङ्गम् (य)। एवमन्यत्रापि (र)।

प्रकृष्टप्रियत्वात् प्रेयः (ल)। यथा मम—

"आमीलितालसविवर्त्तिततारकाक्षीं
मत्कण्ठबन्धनदरश्लथबाहुवल्लीम्।
प्रस्वेदवारिकणिकाचितगण्डबिम्बां
संस्मृत्य तामनिशमेति न शान्तिमन्तः॥" (व)

अत्र सम्भोगशृङ्गारः स्मरणाख्यभावस्याङ्गम्, स च विप्रलम्भस्य (श)।

प्रेयः ऊर्जस्वि, समाहितञ्च इति नामभिश्चत्वारः, अलङ्कृतयः क्रमाद्भवन्तीत्यर्थः। अत्र आभासत्वेन रूपेण रसाभासभावाभासयोरुभयोरप्येकत्वेनैव ग्रहणं प्राचीनमतानुसारादित्यवधेयम्। तथा च यदा एको रसः अपरस्य रसस्य भावादेर्वा अङ्गं भवति, तदा प्रेयो रसवन्नामालङ्कारः; यदा एको भावः अपरस्य भावस्य रसादेर्वा अङ्गं भवति, तदा प्रेयो नामालङ्कारः, यदा रसाभासो भावाभासो वा रसस्य भावादेर्वा अङ्गं भवति, तदा ऊर्जस्वि नामालङ्कारः; यदा च भावस्य प्रशमो रसस्य भावादेर्वा अङ्गं भवति, तदा समाहितं नाम अलङ्कारः स्यादिति सरलार्थः।

अत्र एष्वर्थेषु रसवदादयः शब्दा नित्यनपुंसका एव। अतएव अलङ्कृतय इति स्त्रीविशेषणत्वेऽपि तेषां नपुंसकनिर्देशः, अपत्यं कन्या इत्यादिवत्। एषां व्युत्पत्तयस्तु वृत्तावेव दर्शिताः।

(य) रसवदादिशब्दानां व्युत्पत्तिप्रदर्शनपूर्वकं तेषामुदाहरणानि क्रमेण दर्शयितुमाह तत्रेति। तेषु चतुर्षु अलङ्कारेषु मध्ये इत्यर्थः। रसयोगादिति रसवच्छब्दस्य व्युत्पत्तिप्रदर्शनम्। तथा च रसोऽस्यास्तीति रसवत् प्रशस्तार्थे मत्वर्थीयो वतुप्रत्ययः। रसस्य प्राशस्त्यञ्च रसान्तरेण पुष्टीकरणादिति बोध्यम्; अयमित्यादेर्विवरणं शृङ्गारस्य करुणाङ्गत्वञ्च चतुर्थपरिच्छेदे (२५६ पृष्ठे) अस्माभिः स्पष्टमेव दर्शितम्।

(र) एवमिति। अन्यत्रापि अन्यरसस्य अन्यरसाङ्गत्वे भावाङ्गत्वेऽपि च एवमुदाहरणमूह्यमित्यर्थः। तथा च "क्षिप्तो हस्तावलग्नः—" इत्यादौ (५२७ पृष्ठे) करुणः शृङ्गारस्याङ्गम्। "एकं ध्याननिमीलनान्मुकुलितप्रायम्" इत्यादौ (५२६ पृष्ठे) शान्तशृङ्गाररौद्ररसाः शिवविषयकरतिभावस्याङ्गानि।

(ल) भावस्य इतराङ्गत्वे प्रेय उदाहर्त्तुं प्रेयःशब्दस्य व्युत्पत्तिमाह प्रकृष्टेति।

(व) आमीलितेति। सख्युः समीपे विरहिण उक्तिरियम्। आमीलिते किञ्चित् सङ्कुचिते अलसं शनैर्यथा स्यात्तथा विवर्त्तिते सञ्चालिते च तारके कनीनिकाद्वयं ययोस्ते तादृशे अक्षिणी नयनयुगलं यस्यास्ताम्; मम कण्ठबन्धने कण्ठालिङ्गने दरश्लथा अल्पशिथिलीभूता बाहुवल्ली भुजलता यस्यास्ताम्; उभयत्रापि रतिश्रमेण निद्रावेशादिति भावः; तथा प्रस्वेदवारिकणिकाभिः सुरतपरिश्रमेण समुत्पन्नघर्मजलबिन्दुभिः चितौ व्याप्तौ गण्डबिम्बौ कपोलद्वयं यस्यास्ताम्; तां प्रियतमां संस्मृत्य विद्यमानस्य मम अन्तः अन्तःकरणं कर्त्तृ, शान्तिं न एति न प्राप्नोति।

ऊर्जो बलम्, अनौचित्यप्रवृत्तौ तदत्रास्तीत्यूर्जस्वि (घ)। यथा—

"वनेऽखिलकलासक्ताः परिहृत्य निजस्त्रियः।
त्वद्वैरिवनितावृन्दे पुलिन्दाः कुर्वते रतिम्॥" (ङ)

अत्र शृङ्गाराभासो राजविषयरतिभावस्याङ्गम् (छ)। एवं भावाभासोऽपि (च)।

समाहितं परिहारः (क)। यथा—

"अविरलकरवालकम्पनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः।
ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात्॥" (ख)

अत्र मदाख्यभावस्य प्रशमो राजविषयरतिभावस्याङ्गम् (ग)।

(ग) अत्रेति। स च स्मरणाख्यभावश्च; विप्रलम्भस्य प्रवासात्मकविप्रलम्भशृङ्गारस्य अङ्गमिति सम्बन्धः। एवञ्च भावस्य रसाङ्गतया प्रेयोऽलङ्कार इत्याशयः। किञ्च सम्भोगशृङ्गारस्य स्मरणाख्यभावाङ्गतया रसवदलङ्कारोऽपि। तेनानयोरङ्गाङ्गिभावेन सङ्कर इत्यवधेयम्। प्रक्षीदाहरणन्तु "अरविन्दमिदं वीक्ष्य" इत्यादि (६१९ पृष्ठे)। अत्र स्मरणाख्यभावो विप्रलम्भशृङ्गारस्याङ्गमिति प्रेयोऽलङ्कारः।

(घ) रसभावयोराभासस्य इतराङ्गत्वे ऊर्जस्वि उदाहर्तुम् ऊर्जस्विशब्दस्य व्युत्पत्तिमाह ऊर्ज इति। अनौचित्यप्रवृत्तौ रसभावयोरिति शेषः। एतेन तयोराभासत्वं दर्शितम्, "अनौचित्यप्रवृत्तत्वे आभासो रसभावयोः" इत्युक्तलक्षणात्। तदत्रास्तीति तु अर्थमात्रप्रदर्शनपरम्, सप्तम्यन्तशब्दात् मत्वर्थीयप्रत्ययस्यानुशासनाभावात्। वाक्यन्तु ऊर्जः अस्यास्तीति। चमत्कारविधायित्वे ऊर्जस्वि बलवदिति तदर्थः।

(ङ) वन इति। कस्यचित् राज्ञः स्तुतिरियम्। हे राजन्! वने पुलिन्दा म्लेच्छविशेषाः अखिलासु कलासु नृत्यगीतादिषु आसक्ता आसक्ततया तासु दक्षा अपि निजस्त्रियः परिहृत्य विहाय, त्वद्वैरिवनितावृन्दे तव शत्रुस्त्रीसमूहे रतिं सुरतव्यापारं कुर्वते।

(छ) अत्रेति। शृङ्गाराभासः परस्त्रीविषयकत्वादिति भावः।

(च) एवमिति। ऊर्जस्विविषये भावाभासोऽपि एवमूहनीय इत्यर्थः; तत्र यथा मम—

"अनन्तभङ्गी परिभूषिताङ्गी मञ्जीरमञ्जुस्वनशालिनीयम्।
वेश्याङ्गना कापि विलोक्य लोकं नताना राजति राजमार्गे॥"

अत्र "भावाभासो लज्जादिके तु वेश्यादिविषये स्यात्" इति प्रागुक्तलक्षणात् लज्जाया वेश्यागततया भावाभासः; स च शृङ्गारस्याङ्गमिति ऊर्जस्वि।

(क) भावप्रशमस्य इतराङ्गत्वे समाहितमुदाहर्तुं समाहितशब्दस्य व्युत्पत्तिं दर्शयति समेति। परिहार उपसंहारः समापनमिति यावत्।

(ख) अविरलेति। इयमपि राजस्तुतिः। हे राजन्! तव वैरिणां शत्रूणाम्, अविरलैर्निरन्तरैः करवालानामसीनां कम्पनैः, भ्रूभङ्गीभिः तर्जनैस्तव पक्षमुद्दिश्य भर्त्सनैः गर्जनैर्वीरनादैश्च मदो मत्तता मुहुर्वारं वारं ददृशे लोकैर्दृष्टः; किन्तु तव ईक्षणे दर्शने सत्येव स मदः, क्षणादेव क्वापि गतो विलुप्त इत्यर्थः।

१२५ । भावस्य चोदये सन्धौ मिश्रत्वे च तदाख्यकाः ॥ (घ)

तदाख्यकाः—भावोदय-भावसन्धि-भावशबलनामानोऽलङ्काराः । क्रमेणोदाहरणम्—

"मधुपानप्रवृत्तास्ते सुहृद्भिः सह वैरिणः ।
श्रुत्वा कुतोऽपि त्वन्नाम लेभिरे विषमां दशाम् ॥" (ङ)

अत्र त्रासोदयः (१) राजविषयरतिभावस्याङ्गम् (च) ।

"जन्मान्तरीणरमणस्याङ्गसङ्गसमुत्सुका ।
सलज्जा चान्तिके सख्याः पातु नः पार्वती सदा ॥" (छ)

अत्रौत्सुक्यलज्जयोश्च सन्धिर्देवताविषयरतिभावस्याङ्गम् (ज) ।

(ग) अत्रेति । मदाख्यभावस्य "सम्मोहानन्दसम्भेदो मदो मद्योपयोगजः" इति प्रागुक्तलक्षणस्य, प्रशमो निवृत्तिः । अङ्गमिति । अतएव समाहितमलङ्कार इति भावः ।

(घ) रसभावादिघटितालङ्कारनिरूपणप्रस्तावादेव भावघटितान् भावोदयादीन् त्रीनलङ्कारान् निरूपयति भावस्य चेति । प्रथमचकारेण "गुणीभूतत्वमायान्ति" इति पूर्वस्मादनुकृष्यते ; तच्चात्र आयातीति सप्तम्येकवचनान्ततया विपरिणम्यते योग्यत्वात् । द्वितीयचकारस्तु अवत्यानामुदयादीनां समुच्चये । तथा च भावस्य "सञ्चारिणः प्रधानानि" इत्यादिप्रागुक्तलक्षणस्य कस्यचित्, उदये आविर्भावे गुणीभूतत्वमायाति सति (भावोदयनामा) ; सन्धौ कयोश्चिदुक्तलक्षणकयोर्भावयोः संयोगे गुणीभूतत्वमायाति सति (भावसन्धिनामा) ; यथा केषाञ्चिदुक्तलक्षणकानां भावानां मिश्रत्वे सम्मिलितत्वे च गुणीभूतत्वमायाति सति (भावशबलनामा) ; तदाख्यकास्तन्नामानः भावोदयादिनामान इत्यर्थः अलङ्काराः स्युः ।

अत्र द्वयोर्योगे सन्धिशब्दस्य बहूनां योगे च मिश्रताशबलताशब्दयोरालङ्कारिकनिरूढत्वमवधेयम् । एषां व्युत्पत्तिस्तु स्पष्टा ।

(ङ) भावोदयमुदाहरति मधुपानेति । राजस्तुतिरियम् । हे राजन् ! सुहृद्भिः स्वकीयबन्धुभिः सह मधुपाने मद्यपाने प्रवृत्ताः, ते तव वैरिणः शत्रवः, कुतोऽपि जनात् तन्नाम श्रुत्वा, विषमां दशां भयविह्वलतावस्थां लेभिरे प्राप्तवन्तः ।

(च) अत्रेति । त्रासस्य तदाख्यव्यभिचारिभावस्य उदयो वैरिहृदये आविर्भावः । अङ्गं सम्पादकः । अतएव भावोदयनामालङ्कार इत्याशयः ।

(छ) भावसन्धेरुदाहरणमाह जन्मेति । जन्मान्तरीणः पूर्वजन्मवर्ती यो रमणः पतिस्तस्य शिवस्येत्यर्थः, अङ्गसङ्गे सर्वाङ्गीनस्पर्शे आलिङ्गने समुत्सुका, अथ च सख्या अन्तिके इति हेतोः सलज्जा पार्वती नः अस्मान् पातु रक्षतु ।

(ज) अत्रेति । सन्धिरेकस्यां पार्वत्यां सम्बन्धः । अतएव भावसन्धिरलङ्कारः ।

---

(१) त्रासोदय इत्यवशिष्टः पाठः पुस्तकान्तरेषु दृश्यते ।

"पश्येत् कश्चिच्चल चपल रे ! का त्वराहं कुमारी
हस्तालम्बं वितर हहहा ! व्युत्क्रमः क्वासि यासि ।
इत्थं पृथ्वीपरिवृढ ! भवद्विद्विषोऽरण्यवृत्तेः
कन्या कञ्चित् फलकिसलयान्याददानाभिधत्ते ॥" (झ)

अत्र शङ्काऽसूया-धृति-स्मृति-श्रम-दैन्य-विबोधौत्सुक्यानां शवलता राजविषयरतिभावस्याङ्गम् (ञ) ।

इह केचिदाहुः—"वाच्यवाचकरूपालङ्करणमुखेन रसाद्युपकारका एवालङ्काराः । रसादयस्तु वाच्यवाचकाभ्यामुपकार्य्या एवेति न तेषामलङ्कारता भवितुं युक्ता" इति (ट) । अन्ये तु "रसाद्युपकारमात्रेणेह अलङ्कृतिव्यपदेशो

(झ) भावशवलिं उदाहरणं दर्शयति पश्येदिति । पराजयेन वनवासीभूतस्य विपक्षनृपतेः कन्यया सह कस्यचिद्विशेषपरिचितवनेचरयुवकस्य उक्तिप्रत्युक्ती प्रदर्श्य कश्चिदात्मीयं राजानमनेन स्तौति । कश्चित्तृतीयो जनः पश्येत् आवयोरेतन्निर्जनस्थानावस्थानमवलोकयेत्, दृष्ट्वा चावयोर्दुष्प्रवृत्तिं सम्भावयेदिति भावः । इयं कन्याया उक्तिः । अत्र कन्यायाः शङ्का । अतएव रे चपल ! चपलस्वभाववनेचरयुवक ! चल मया सह पितुरावासमागच्छ । इयमपि कन्याया उक्तिः । अत्र निकृष्टसम्बोधनेन कन्याया औद्धत्यात् तां प्रति वनेचरस्यासूया । का त्वरा इतो गमने का तव सत्वरता । अस्मिन् दुर्गमस्थाने सहसा तृतीयः कोऽपि न खल्वागच्छेदिति भावः । इयं वनेचरस्य प्रत्युक्तिः । अत्र वनेचरस्य धृतिः । अहं कुमारी राजकन्या ; अतो लोकः स्वल्पमपि सङ्केतः चेत्तदा महादोष एव भवेत्, विशेषतश्चाहं फलपल्लवाहरणाय प्रस्तरारोहणेन परिश्रान्तास्मीति भावः । इयं कन्याया उक्तिः । अत्र कन्यायाः "अहं कुमारी" इति स्मृतिः । हस्तालम्बं वितर परिश्रान्तासि चेत् मम गात्रे हस्तभरं देहि । इति वनेचरस्योक्तिः । अत्र राजकन्यायाः श्रमः । हहहा इति कन्याया दैन्यसूचिकोक्तिः । अहमुच्चजातीया राजकन्या सती कथमद्यैवं व्यवहरामीति भावः । अत्र राजकन्याया दैन्यम् । व्युत्क्रमः राजकन्यया त्वया वनेचरस्य समावलम्बनं निरुद्धः क्रम एव । इति वनेचरस्योक्तिस्तस्य विबोधश्च । इत्युक्त्वा वनेचरे प्रच्छन्नीभूय प्रस्थिते कन्या आह—क्वासि वनेचर ! क्व वर्त्तसे त्वं किं यासि । अत्र कन्याया औत्सुक्यम् । हे पृथ्वीपरिवृढ ! धराधिप ! अरण्यवृत्तेर्वनवासिनः, भवद्विद्विषस्तव शत्रुनृपतेः कन्याः, फलकिसलयानि आददाना भोजनभूषणार्थमाहरन्ती सती, कञ्चिद्वनेचरयुवकम्, इत्थमुक्तप्रकारम्, अभिधत्ते परस्परं ब्रवीतीत्यर्थः ।

(ञ) अत्रेति । शङ्काऽसूयादयः । स्वस्वस्थान एव व्याख्यार्था दर्शिताः । शवलता मिश्रता । अङ्गं सम्पादिका । अतोऽत्र भावशवलनामालङ्कार इत्याशयः ।

(ट) ये किल रसवदादीनामलङ्कारत्वं नाङ्गीकुर्वन्ति ; इदानीं तन्मतनिराकरणेन, तेषामलङ्कारत्वं व्यवस्थापयितुं दूषणाय तन्मतानि क्रमादाह इहेति । अलङ्क्रियते अनेनेति अलङ्करणम् । तथा च वाच्यः अर्थः वाचकः शब्दः तदुभयरूपं यदलङ्करणमलङ्कारहेतुस्तन्मुखेन तद्द्वारा रसादीनामुपकारकाः पुष्टिजनका

भाक्तः चिरन्तनप्रसिद्ध्या अङ्गीकार्य्य एव" इति (ठ)। अपरे च "रसाद्युपकारमात्रेणालङ्कारत्वं मुख्यतः, रूपकादौ तु वाच्याद्युपधानम् अजागलस्तनन्यायेन" इति (ड)। अभियुक्तास्तु "स्वव्यञ्जकवाच्यवाचकाद्युपकृतैरङ्गभूतै रसादिभिरङ्गिनो रसादेर्वाच्यवाचकोपस्कारद्वारेणोपकुर्वद्भिरलङ्कृतिव्यपदेशो लभ्यते (ढ)। समासोक्तौ तु नायिकादिव्यवहारमात्रस्यैवालङ्कृतिता ; न त्वास्वादस्य, तस्योक्तरीतिविरहात्" इति मन्यन्ते (ण)। अतएव ध्वनिकारेणोक्तम्—(त)

शब्दार्थमात्रवृत्तिर्वैचित्र्यरूपा धर्म्मा इत्यर्थः। तेषां रसादीनाम्। अतएव रसवदादयो नालङ्कारा इति तेषामाशयः। अत्र द्वाभ्यामेवादिशब्दाभ्यां भाव-रसाभास-भावाभास-सन्धि-शवलतानां ग्रहणम्। एवमुत्तरवाक्येष्वपि।

(ठ) अन्ये त्विति। रसादीनामङ्गिभूतानामित्यर्थः, उपकारमात्रेण यथाकथञ्चित् सामान्यत एव पुष्टिमात्रेण, इह रसवदादौ, अलङ्कृतिव्यपदेशः अलङ्कारतया निर्द्देशः, भाक्तो गौणः, चिरन्तनप्रसिद्ध्या प्राचीनपरम्परया अलङ्कारतया प्रसिद्धिलाभेन। तथा च अङ्गभूतै रसादिभिराङ्गभूतानां रसादीनां यथाकथञ्चित् पुष्टिकरणात् प्राचीनपरम्परया अलङ्कारतया प्रसिद्धत्वाच्च रसवदादीनां गौणालङ्कारत्वमङ्गीक्रियत एव, किन्तु शब्दार्थान्यतरघटितवैचित्र्यविशेषस्यैव वास्तविकालङ्कारत्वेन न पुनर्मुख्यालङ्कारत्वमित्यमीषामभिप्रायः।

(ड) अपरे चेति। मुख्यतः प्रधानतः। रूपकादावित्यादिशब्देन सन्देहादीनां ग्रहणम्। वाच्यादिवाच्यवाचकयोः अर्थशब्दयोः, उपधानं शोभासम्पादनम्, अजा छागी तस्या गलस्तनन्यायेन तद्वत्। तथा च यः पदार्थो रसादीनुपकरोति स एव मुख्योऽलङ्कारः एवञ्च रूपकसन्देहादौ यत्, रसाद्युपकारातिरिक्तशब्दार्थयोरपि शोभासम्पादनम्, तत् स्वभावागतम् अजाया गलदेशवर्त्ती दुग्धहीनः स्तन इव निरर्थकमिति भावः। एतन्मतेऽपि रसवदादीनां गौणालङ्कारत्वमिति बोध्यम्, मुख्यत इत्यभिधानात्।

(ढ) स्वमतसमर्थकं मतमाह अभीति। अभियुक्तास्तु युक्तियुक्ताभिधानेन सर्वमानितास्तु आहुरिति पूर्वेणान्वयः। स्वव्यञ्जका अङ्गभूतरसादिव्यञ्जका ये वाच्यवाचका आदिशब्दात् लक्ष्यलक्षकाश्च अर्थशब्दास्तैरुपकृताः पुष्टीकृतास्तैः। वाच्यवाचकयोरर्थशब्दयोः उपस्कारद्वारेण अध्याहारद्वारेण "अयं स रशनोत्कर्षी" इत्यादौ केवलशृङ्गारव्यञ्जकशब्दार्थवति पद्ये करुणव्यञ्जकशब्दार्थाध्याहारेणेत्यर्थः, उपकुर्वद्भिः अङ्गिनो रसादेरिति सम्बन्धः, अलङ्कृतिव्यपदेशः अलङ्कार इति नाम, लभ्यते, तेषामङ्गभूतरसादीनामपि शब्दार्थवत् रसाद्युपकारकत्वाविशेषादिति भावः।

(ण) नन्वत्र अङ्गीभूतानां रसादीनामुपकारकत्वादङ्गभूतानां रसादीनामलङ्कारत्वमस्तु, यत्र एक एव रसादिस्तत्र उपकार्य्योपकारकभावासम्भवात् कथं तस्यालङ्कारत्वमित्याह समासोक्तौ त्विति। अत्र समासोक्तिपदमेकमात्ररसाद्युपकारकालङ्कारमात्रोपलक्षणम्। आस्वादस्य रसादेः तस्य आस्वादापरपर्य्यायस्य रसादेः, उक्तरीतिविरहात् आस्वादान्तराविद्यमानत्वेन तदुपकारकत्वाभावात्। एतेन तन्मते अङ्गिभूतानां रसादीनामुपकारकत्वादङ्गभूतानां रसादीनामलङ्कारत्वमस्त्वेवेति रसवदादीनां स्वसम्मतमलङ्कारत्वं सिद्धमेवेति दर्शितम्।

"प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गन्तु रसादयः ।
काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः ॥" (थ)

यदि च रसाद्युपकारमात्रेणालङ्कृतित्वम्, तदा वाचकादिष्वपि तथा प्रसज्येत (द)। एवञ्च यच्च कैश्चिदुक्तम्—"रसादीनामङ्गित्वे रसवदाद्यलङ्कारः, अङ्गत्वे तु द्वितीयोदात्तालङ्कारः" तदपि परास्तम् (ध)।

१२६ । यद्येत एवालङ्काराः परस्परविमिश्रिताः ।
तदा पृथगलङ्कारौ संसृष्टिः सङ्करस्तथा ॥ (न)

(त) अतएवेति। अङ्गिभूतानां रसादीनामुपकारकत्वेनैव अङ्गभूतानां रसादीनामलङ्कारव्यपदेशस्य युक्तियुक्तत्वादेवेत्यर्थः।

(थ) प्रधान इति। यत्र काव्ये अन्यत्र अन्यस्मिन् रसादौ वाक्यार्थे वा प्रधाने सति अन्ये रसादयस्तु अङ्गं तयोरुपकारका भवन्तीत्यर्थः, तस्मिन् काव्ये रसादिरङ्गभूत इत्याशयः, अलङ्कारो भवेत्, इति मे मम मतिः सम्मतिः।

एतेन ध्वनिकारमतेऽपि रसवदादीनामलङ्कारत्वमस्तीति दर्शितम्।

(द) केचिदित्यादिमतत्रयमेव दूषयितुमाह यदि चेति। किञ्चेति चार्थः। रसादीनामुपकारमात्रेण केवलेनैवोपकारकत्वेन, न पुनः शोभातिशायित्वेनापीति मात्रशब्दस्यार्थः, यदि अलङ्कृतित्वमलङ्कारत्वमुच्यते भवद्भिरिति शेषः; तदा वाचकादिष्वपि अभिधादिना रसादिबोधकेष्वपि। आदिशब्देन लक्षकग्रहणम्, वस्तुवचनन्तु व्यक्तिभेदात्। तथा अलङ्कृतित्वम्। तथा च—"तामुद्वीक्ष्य कुरङ्गाक्षीं रसो नः कोऽप्यजायत" "उदितं चन्द्रमालोक्य शृङ्गारे मग्नमन्तरम्" "आसील्लज्जावती मुग्धा प्रियस्य परिचुम्बने" इत्यादौ रसशृङ्गारलज्जादिपदैरपि रसभावादीनामभिधानेनैवोपकृतत्वात् भवतां मते अलङ्कारत्वप्रसक्त्या अतिव्याप्तिः; प्रत्युत तेषु स्वशब्दवाच्यत्वादोष एव। अस्माकं मते तु अलङ्कारलक्षणे शोभातिशायीतिविशेषणनिवेशेन एतेषु शोभातिशायित्वाभावान्नातिव्याप्तिः रसवदादौ चाङ्गभूतरसादिभिरेव शोभातिशायित्वादलङ्कारलक्षणसङ्गतिरित्याशयः।

(ध) प्रागुक्तसर्वमतविलक्षणं कस्यचिदद्भुतं मतं दूषयितुमाह एवञ्चेति। स्वपक्षविपक्षाणां सर्वेषामेव मते रसाद्युपकारकारकाणामेवालङ्कारत्वे चेत्यर्थः। अङ्गित्वे प्रधानत्वे अङ्गत्वे उपकारकत्वे तु, द्वितीयोदात्तालङ्कारः "यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्" इत्युक्तलक्षणोदात्तालङ्कारः; तन्मते उक्तलक्षणे "महतां चरितम्" इत्यनिवेशात् "अप्रस्तुतानां प्रस्तुताङ्गत्वं उदात्तम्" इति सामान्याभिधानादिति बोध्यम्। परास्तमिति अङ्गिनां रसादीनां केवलोपकार्यतया उपकारकत्वाभावेनालङ्कारत्वस्यैवाप्रसक्तेः, अङ्गत्वे तु उपकारकतया रसवदादीनामपि प्रसक्तेश्चेति भावः। किञ्च, अङ्गाङ्गिनोर्नियतपरस्परसापेक्षतया एतन्मते रसवदादिभिः सह द्वितीयोदात्तालङ्कारस्य नियतसाङ्कर्यापत्तिश्चेति द्रष्टव्यम्।

(न) एतावता सर्वेषामेवालङ्काराणां प्रातिस्विकलक्षणान्युक्त्वा इदानीं तेषामेव एकत्रानेकसद्भावे

यथा लौकिकालङ्काराणामपि परस्परमिश्रणे पृथक् चारुत्वेन पृथगलङ्कारत्वम्, तथोक्तरूपाणां काव्यालङ्काराणामपि परस्परमिश्रत्वे संसृष्टिसङ्कराख्यौ पृथगलङ्कारौ (प)। तत्र—(फ)

१२७। मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते। (ब)

एतेषां शब्दार्थालङ्काराणाम् (भ)। यथा—

"देवः पायादपायान्नः स्मेरेन्दीवरलोचनः।
संसारध्वान्तविध्वंस-हंसः कंसनिसूदनः॥" (म)

अत्र "पायादपायात्" इति यमकम्, "संसार" इत्यादौ चानुप्रास इति शब्दालङ्कारयोः संसृष्टिः। द्वितीये पादे उपमा, द्वितीयार्द्धे च रूपकमित्यर्थालङ्कारयोः संसृष्टिः। एवमुभयोः स्थितत्वाच्छब्दार्थालङ्कारसंसृष्टिः (य)।

पृथगलङ्कारौ निरूपयितुमुपक्रमते यथेति। अत्र यदिशब्दात् तदाशब्दाच्च परम् अपिशब्दः सामर्थ्यादवगन्तव्यः। तथा च यद्यपि परस्परविमिश्रिता एकस्मिन् पद्ये गद्ये वा बाधकाभावात् परस्परं सम्मिलिताः सन्तः, एत एव पूर्वोक्ताः, अलङ्काराः शब्दालङ्कारा अर्थालङ्कारा रसाद्यलङ्काराश्च, पृथक् पृथग् व्यपदेष्टुं योग्याः सम्भवन्तीत्यर्थः, तथापि संसृष्टिर्नाम सङ्करो नाम च पृथग् भिन्नौ अलङ्कारौ वेदितव्याविति शेषः; अनेकविधवैचित्र्यैकत्र मेलने पृथग्वैचित्र्यस्यैव तदुपलम्भात् तस्य पृथङ्नामतया एवौचित्यादित्याशयः।

(प) दृष्टान्तमुपन्यस्य व्याचष्टे यथेति। लौकिकालङ्काराणां कटककुण्डलादीनाम्। पृथगलङ्कारत्वमिति। यथा कटकनन्मकराकृतिमुखत्वात् कुण्डलवद्गोलाकारत्वाच्च कटककुण्डलयोर्मिश्रितरूपस्य कर्णालङ्कृतिविशेषस्य "भाकरी" इतिसंज्ञकपृथगलङ्कारत्वम्।

(फ) तत्रेति। तयोः संसृष्टिसङ्करयोर्मध्य इत्यर्थः।

(ब) उद्देशक्रमेण प्राक् संसृष्टिं निरूपयति मिथ इति। एतेषामिति बहुवचनमविवक्षितम्। तेन ययोः कयोश्चित् द्वयोरलङ्कारयोः येषां केषाञ्चित् बहूनामलङ्काराणां वा मिथोऽनपेक्षया परस्परनैरपेक्ष्येण, स्थितिः एकस्मिन् पद्ये गद्ये वा अवस्थानं संसृष्टिर्नाम अलङ्कार उच्यते। अनेकशब्दालङ्कारमात्रस्य अनेकार्थालङ्कारमात्रस्य अनेकशब्दार्थोभयालङ्कारस्य च परस्परनैरपेक्ष्येण स्थितिः सम्भवतीति त्रिविधा संसृष्टिः।

(भ) एतेषामिति। अत्र शब्दार्थालङ्काराणामित्युपलक्षणम्। रसालङ्काराणामपि रसवदादीनामुक्तत्वात्तेषामपि, संसृष्टिसङ्करौ वेदितव्यौ समानन्यायाद्बाधकाभावाच्च। अतएव "आनीलितालसविवर्त्तिततारकाचीम्" इत्यादौ प्रेयोरसवदलङ्कारयोः सङ्करो दर्शितः।

(म) एकोदाहरणेनैव त्रिविधा एव संसृष्टीर्दर्शयति देव इति। स्मेरे प्रस्फुटिते इन्दीवरे नीलोत्पले इव लोचने नयनयुगलं यस्य सः, संसार एव ध्वान्तमन्धकारं तस्य विध्वंसे विनाशविषये हंसः, सूर्यः, तथा कंसस्य निसूदनो निहन्ता देवः श्रीकृष्णः, नः अस्मान्, अपायाद्विपत्तेः सकाशात् पायात् रक्षेत्।

(य) अत्रेति। "ध्वान्तविध्वंस—" इत्यत्र ध्वकारयोरनेकधा सकृत् साम्यात् छेकानुप्रासः, "विध्वंस"

१२८ । अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ ।
सन्दिग्धत्वे च भवति सङ्करस्त्रिविधः पुनः ॥ (र)

अङ्गाङ्गिभावो यथा—

"आकृष्टिवेगविगलद्भुजगेन्द्रभोग-
निर्म्मोकपट्टपरिवेष्टनयाम्बुराशेः ।
मन्थव्यथाव्युपशमार्थमिवाशु यस्य
मन्दाकिनी चिरमवेष्टत पादमूले ॥" (ल)

"कंस" इत्यनयोश्च आद्याक्षरेण सह यथावस्थव्यञ्जनावृत्तेः पदगतः अन्त्यानुप्रासः, "संसारः" "हंसः" "निसूदनः" एतेषु दन्त्यसकाराणामसकृत् साम्याद्वृत्त्यनुप्रासश्च एषामनुप्रासानामपि परस्परनैरपेक्ष्येण स्थितिरपरा संसृष्टिश्चानुसन्धेया । उपमेति । "क्विप्समासगता द्विधा धर्म्मवादिविलोपने" इत्युक्तलक्षणा समासगता लुप्तोपमेत्यर्थः । रूपकमिति । संसारे ध्वान्तत्वारोपः श्रीकृष्णे सूर्य्यत्वारोपस्य निमित्तमिति अश्लिष्टशब्दनिबन्धनं केवलपरम्परितरूपकमित्यर्थः । उभयोरिति । यमकानुप्रासरूपशब्दालङ्कारस्य उपमारूपकरूपार्थालङ्कारस्य चेत्यर्थः, स्थितत्वात् परस्परनैरपेक्ष्येणेति शेषः ।

(र) इदानीमवशिष्टं सङ्करालङ्कारं लक्षयति अङ्गेति । अत्रालङ्कृतीनामिति सर्वत्रान्वेति । बहुवचनञ्चाविवक्षितम् । तथा च अनेकस्यालङ्कारस्य अङ्गाङ्गित्वे सम्पादकसम्पाद्यत्वे सापेक्षभावेन गुणप्रधानभावेन वा, तद्वत् तथा, अनेकस्यालङ्कारस्य एकस्मिन्नाश्रये पादरूपे वा स्थाने स्थितौ, तथा अनेकस्यालङ्कारस्य सन्दिग्धत्वे अनेकलक्षणगमनात् "अयमलङ्कारो भवेत् एष वा" इत्येवं संशयविषयत्वे च सङ्करो भवति; अतएव सोऽपि पुनः सङ्करः संसृष्टिवदेव त्रिविधः ।

विषयविभागाभावात् संसृष्टिः सामान्यरूपा, विषयविभागात् सङ्करस्तु विशेषरूपः एवञ्च सामान्यस्य विशेषेतरवृत्तित्वनियमादनेकालङ्कारस्य परस्परनैरपेक्ष्येणापि एकाश्रयस्थितिपक्षे सन्देहपक्षे च सङ्कर एव । एवमेव एकाश्रयस्थितिरूपसङ्करस्यापि, सामान्यरूपत्वात् अङ्गाङ्गिभावसन्देहसंकरयोर्विशेषरूपयोरतिरिक्तस्थल एव तस्य विषयत्वम् । तथा अनेकसंसृष्टेः अनेकसंकरस्य संसृष्टिसंकरयोरुभयोश्च परस्परनैरपेक्ष्येण स्थितौ पुनः संसृष्टिः, अङ्गाङ्गिभावादौ च पुनः संकरः सम्भवत्येव, संसृष्टिलक्षणे एतेषामिति अत्र च अलङ्कृतीनामित्येतयोरलङ्कारसामान्यपरतया संसृष्टिसंकरयोरपि ग्रहणादिति सुधीभिर्भाव्यम् ।

व्युत्पत्तिस्तु संकरः संकीर्णता अनेकस्यैकत्र सम्मेलनमिति यावत् ।

(ल) आकृष्टीति । समुद्रवर्णनमिदम् । मन्दाकिनी गङ्गा पतिव्रता स्त्री चेति व्यज्यते, आकृष्टेर्मन्थनकाले सुरासुरगणैरुभयत आकर्षणस्य, वेगेन गलन् प्रस्खलन् यो भुजगेन्द्रभोगस्य अनन्तनागशरीरस्य निर्म्मोकपट्टः परित्यक्तचर्म्मरूपं वस्त्रम्, तस्य परिवेष्टनया परिवेष्टनकरणच्छलेन, अम्बुराशेः समुद्रस्य, पत्युरिति च व्यज्यते, मन्थनव्यथाव्युपशमार्थमिव मन्थनजनितवेदनाशमनार्थमिव, आशु त्वरितम, यस्य समुद्रस्य पत्युरिति च गम्यते, पादमूले एकस्मिन् प्रदेशे चरणनिकटे च चिरमवेष्टत प्रावृणोत् कराभ्यां परिवेष्ट्य धारणमकरोत् ।

अत्र निर्मोकपट्टापह्नवेन मन्दाकिन्या आरोप इत्यपह्नुतिः। सा च मन्दाकिन्या वस्तुवृत्तेन यत् पादमूलवेष्टनं तच्चरणवेष्टनमिति श्लेषमुत्थापयतीति तस्याङ्गम्। श्लेषश्च पादमूलवेष्टनमेव चरणमूलवेष्टनमित्यतिशयोक्तेरङ्गम्। अतिशयोक्तिश्च "मन्यव्यथाव्युपशमार्थमिव" इत्युत्प्रेक्षाया अङ्गम्। उत्प्रेक्षा च अम्बुराशिमन्दाकिन्योर्नायकनायिकाव्यवहारं गमयतीति समासोक्तेरङ्गम् (व)।

यथा वा—(श)

"अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः।
अहो! दैवगतिश्चित्रा तथापि न समागमः॥" (ष)

अत्र समासोक्तिर्विशेषोक्तेरङ्गम् (स)।

(व) अत्रेति। अपह्नुतिर्वस्तुना अपह्नुतिध्वनिः, तद्वाचकस्याभावादित्यवधेयम्। सा अपह्नुतिः। वस्तुवृत्तेन वस्तुगत्या अवत्यपदार्थपर्य्यालोचनावशेनेत्यर्थः। श्लेषं विभक्तेरभेदात् "नीतानामाकुलीभावम्" इत्यादिवत् प्रकृतिश्लेषम्। अतिशयोक्तेः भेदे अभेदाध्यवसायरूपायाः। उत्प्रेक्षायाः फलोत्प्रेक्षायाः। समासोक्ते लिङ्गसाम्यघटितायाः।

(श) कारिकायामलङ्कृतीनामिति बहुवचनस्य अविवक्षितत्वसूचनाय द्वयोरप्यङ्गाङ्गिभावेन संकरं दर्शयितुमाह यथा वेति।

(ष) अनुरागेति। सन्ध्याः सायंकालः काचिन्नायिका च, अनुरागवती रक्तोत्पलादिसदृशलौहित्यवती सुरतेच्छावती च, दिवसो वासरो नायकश्च, तस्याः सन्ध्याया नायिकायाश्च, पुरःसरः अवसानाय रमणाय च अग्रवर्त्ती सम्मुखवर्त्तीत्यर्थः। अहो आश्चर्य्यम्। तथापि न समागमस्तयोः सम्मेलनम्; अतएव दैवगतिर्विधातृव्यवहारः, चित्रा आश्चर्य्या; दैवगतिवशादेव तयोर्न समागम इति भावः।

(स) अत्रेति। समासोक्तिः सन्ध्यादिवसयोर्लिङ्गसाम्यघटितेत्यर्थः। विशेषोक्तेः रमणाय नायकस्य नायिकायाः सम्मुखवर्त्तित्वरूपकारणे सत्यपि रमणात्मकसमागमरूपतत्कार्य्याभावादिति भावः। अङ्गं सम्पादिका। किञ्चात्र "दैवगतिश्चित्रा" इत्येतमर्थं प्रति वाक्यान्तरार्थानां हेतुत्वात् काव्यलिङ्गं तत् प्रति च सा विशेषोक्तिरप्यङ्गमिति त्रयाणामेवाङ्गाङ्गिभावेन संकरत्वात् द्वयोः संकरः कुत इति चेत्, तदिदमुदाहरणम्—"क्व सूर्य्यप्रभवो वंश." इत्यादि। अत्र केवलविषमनिदर्शनयोरेवाङ्गाङ्गिभावेन संकरः।

गुणप्रधानभावेनाङ्गाङ्गिभावे संकरो यथा मम विराजसरोजिन्याम्—

"उदयति रसिकत्वं यौवने कामिनीनां सततमनपनेया मुग्धता शैशवे तु।
मधु भवति नलिन्याः पुष्पितायाः स्वभावात् पतति च कलिकाया न्यस्तमप्यात्मनैव॥"

अत्र विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासो व्यापित्वात् प्रधानः, "न्यस्तमपि" इत्यर्थापत्तिस्तु अव्यापित्वादप्रधान इत्येतयोः संकरः।

सन्देहसङ्करो यथा—(ङ)

"इदमाभाति गगने भिन्दानं सन्ततं तमः।
अमन्दनयनानन्दकरं मण्डलमैन्दवम्॥" (च)

अत्र किं मुखस्य चन्द्रतयाध्यवसानादतिशयोक्तिः? उत इदमिति मुखं निर्दिश्य चन्द्रत्वारोपाद्रूपकम्? अथवा इदमिति मुखस्य चन्द्रमण्डलस्य च द्वयोरपि प्रकृतयोरेकधर्माभिसम्बन्धात्तुल्ययोगिता? आहोस्विच्चन्द्रस्याप्रकृतत्वाद्दीपकम्? किंवा विशेषणसाम्यादप्रस्तुतस्य मुखस्य गम्यत्वात् समासोक्तिः? यद्वा अप्रस्तुतचन्द्रवर्णनया प्रस्तुतस्य मुखस्यावगतिरित्यप्रस्तुतप्रशंसा? यद्वा मन्मथोद्दीपनः कालः स्वकार्यभूतचन्द्रवर्णनामुखेन वर्णित इति पर्यायोक्तिरिति बहूनामलङ्काराणां सन्देहात् सन्देहसङ्करः (छ)।

यथा वा—(ज) "मुखचन्द्रं पश्यामि" इत्यत्र किं मुखं चन्द्र इव इत्युपमा? उत चन्द्र एवेति रूपकम्? इति सन्देहः (झ)।

साधकबाधकयोर्द्वयोरेकतरस्य सद्भावे न पुनः सन्देहः (ञ)। यथा—

(ङ) अङ्गाङ्गित्वाभावे सन्देहाभावे च सामान्येन पारिशेष्यादेकाश्रयस्थितिरूपः सङ्कर इति सूचयितुमेव कारिकोक्तक्रममुल्लङ्घ्य प्राक् सन्देहसङ्करमुदाहर्तुमाह सन्देहेति।

(च) इदमिति। सततं व्याप्तम्, तमोऽन्धकारम्, भिन्दानं विनाशयत्, तथा अमन्दं बहुलं नयनानन्दं करोतीति तत्तादृशम्, इदं दृश्यमानम्, इन्दोश्चन्द्रस्येदमिति ऐन्दवं मण्डलम्, गगने आभाति शोभते।

(छ) अत्रेति। अतिशयोक्तिर्भेदे अभेदाध्यवसायरूपा। निर्दिश्येत्यनेन मुखस्य अनिगरणं दर्शितम्, अतएव रूपकं तच्च निरङ्गं केवलरूपकम्। तुल्ययोगितेति। इदं मुखं चन्द्रमण्डलञ्च आभातीत्येकक्रियया तदुभयाभिसम्बन्धादिति भावः। चन्द्रस्याप्रकृतत्वादिति। मुखस्य च प्रकृतत्वादिति गम्यते। तथा च प्रस्तुताप्रस्तुतयोर्मुखचन्द्रयोराभातीत्येकक्रियाभिसम्बन्धात् दीपकमित्यर्थः। विशेषणसाम्यादिति। मुखपक्षे, गगने वातायनाकाशे, तमः तमोगुणजनितं विरहकालीनं मोहं भिन्दानमित्यर्थकरणादुभयत्रापि विशेषणसाम्यमित्याशयः। मुखस्य गम्यत्वात् प्रस्तुते चन्द्रमण्डले गम्यस्य मुखस्य व्यवहारसमारोपादित्यर्थः। स्वकार्येति। स्वस्य मन्मथोद्दीपनकालस्य रात्रेरित्यर्थः कार्यभूतो यश्चन्द्रप्रकाशस्तस्य वर्णनामुखेन वर्णनाद्वारा।

(ज) कारिकायां "सन्दिग्धत्वे" इत्यत्राप्यन्वितस्य "अलङ्कृतीनाम्" इति पदस्य बहुवचनाविवक्षासूचनाय द्वयोरप्यलंकारोः सन्देहसंकरं दर्शयितुमाह यथा वेति।

(झ) मुखेति। उपमेति। "क्विप् समासगता द्वेधा धर्मेवादिविलोपने" इत्युक्तलक्षणा औपम्यवाचकसामान्यधर्मयोर्लोपस्थलीया समासगता लुप्तोपमेत्यर्थः। चन्द्र एवेतीति। मुखमिति पूर्वमादत्तलभ्यते। रूपकं निरङ्गकेवलरूपकम्।

"मुखचन्द्रं चुम्बति" इत्यत्र चुम्बनं मुखस्यानुकूलमित्युपमायाः साधकम्, चन्द्रस्य तु प्रतिकूलमिति रूपकस्य बाधकम् (ङ)। "मुखचन्द्रः प्रकाशते" इत्यत्र प्रकाशाख्यो धर्मो रूपकस्य साधको मुखे उपचरितत्वेन सम्भवतीति नोपमाबाधकः (च)।

"राजनारायणं लक्ष्मीस्त्वामालिङ्गति निर्भरम्॥" (छ)

अत्र योषित आलिङ्गनं नायकस्य सदृशेनोचितमिति लक्ष्म्यालिङ्गनस्य राजन्यसम्भवादुपमाबाधकम्, नारायणे सम्भवाद्रूपकम् (ज)।

एवम्—"वदनाम्बुजमेणाक्ष्या भाति चञ्चललोचनम्।" (झ)

(घ) तत् किमेवं समासमात्र एव उपमारूपकयोः सन्देहसङ्कर इत्याह साधकेति। साधकं एकतरस्य प्रतिपादकः, बाधकोऽन्यतरस्य प्रतिबन्धकः, तयोर्द्वयोरेव सद्भावे, अथवा तयोरेकतरस्य सद्भावे इत्यर्थः।

(ङ) तत्र साधकबाधकयोर्द्वयोः सद्भावे उदाहरति मुखचन्द्रं चुम्बतीति। मुखस्यानुकूलं मुखे सम्भवपरम्। चन्द्रस्य तु प्रतिकूलं चन्द्रे असम्भवमित्यर्थः, चुम्बनस्य भूतलस्थकर्तृकत्वात् चन्द्रस्य तु गगनस्थत्वेन बहुदूरवर्त्तित्वादिति भावः। अयं दत्तधेयम्—उपमितसमासे उपमेयस्य प्राधान्यं रूपकसमासे तु उपमानस्य प्राधान्यं भासते। तेन "अव्यक्तं प्रधानगामि" इति मीमांसोक्तन्यायेन अन्वये अनियतस्य चुम्बतीतिपदस्य, प्रधानेनैवान्वयो वाच्यः। एवञ्च भूतलस्थजनकर्तृकचुम्बनस्य मुख एव सम्भवात् मुखस्य प्राधान्यप्रतिपादनाय उपमितसमासस्यैवाश्रयणीयतया चुम्बतीति पदमेव उपमायाः साधकं रूपकस्य च बाधकमित्युक्तमेव। एवमुत्तरत्रापि बोध्यम्।

(च) साधकबाधकयोरेकतरस्य सद्भावे उदाहरति मुखचन्द्रः प्रकाशत इति। प्रकाशाख्यस्तेजःस्फुरणरूपः। रूपकस्य साधक इति। प्रकाशत इत्यस्य शक्यार्थमादाय चन्द्रान्वयार्थं "मुखचन्द्रः" इत्यत्र मुखमेव चन्द्र इति चन्द्रस्य प्राधान्यप्रतिपादकरूपकसमासस्यैव आश्रयणीयत्वादिति भावः। उपचरितत्वेन शोभत इत्यर्थकतया लक्षितत्वेन। नोपमाबाधक इत्यनेन रूपकस्य साधकताभावं दर्शितम्।

(छ) उपमाबाधकसद्भावेऽप्युदाहरति राजेति। "विन्ध्योद्यानविख्यातं शङ्खचक्राजभूषितम्।" इति मत्पूरितपूर्वार्द्धम्। लक्ष्मीः, राजा एव नारायणस्तं त्वां निर्भरं दृढम् आलिङ्गति।

(ज) अत्रेति। योषितो नायिकायाः। नायकस्य स्वयोग्यपुरुषस्य, सदृशेन समानस्थान-प्रभाव-जात्यादिना तुल्येन अपरेण पुरुषेण सहेत्यर्थः, उचितं सम्भवपरम्, इति शेषः। असम्भवादिति। मानुषमात्रस्य राज्ञो लक्ष्मीयोग्यनायकापेक्षया स्थानप्रभाव जात्यादिना नितान्तन्यूनत्वादिति भावः। उपमाबाधकमिति। लक्ष्मीकर्तृकम् "आलिङ्गति" इति पदमित्यर्थः। नारायणे सम्भवात् लक्ष्म्यालिङ्गनस्येति सम्बन्धः। रूपकमिति। प्रदर्शितप्रकाररूपकसमासस्यैवाश्रयादिति भावः।

(झ) विशेषणस्य साधकबाधकतायामुदाहरति वदनेति। "तथा भुजलताद्वन्द्वं कम्पत्कङ्कणभूषितम्॥" इति मत्पूरितपरार्द्धम्। चञ्चले लोचने यत्र तत्तादृशम्, एणाक्ष्या मृगनयनाया नायिकायाः, वदनमम्बुजं पद्ममिव तद्भाति।

अत्र वदने लोचनस्य सम्भवादुपमायाः साधकता, अम्बुजे चासम्भवात् रूपकस्य बाधकता (त) ।

एवम्—"सुन्दरं वदनाम्बुजम्" इत्यादौ साधारणधर्म्मप्रयोगे "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे" (२।१।५६ पा) इति वचनादुपमासमासो न सम्भवतीति उपमाया बाधकः । एवञ्चात्र मयूरव्यंसकादित्वात् रूपकसमास एव (ट) ।

एकाश्रयानुप्रवेशो यथा मम—(ठ)

"कटाक्षेणापीषत् क्षणमपि निरीक्षेत यदि सा
तदानन्दः सान्द्रः स्फुरति पिहिताशेषविषयः ।
सरोमाञ्चोदञ्चत् कुचकलसनिर्भिन्नवसनः
परीरम्भारम्भः क इव भविताऽम्भोरुहदृशः ॥" (ड)

अत्र "कटाक्षेणापीषत् क्षणमपि" इत्यत्र छेकानुप्रासस्य । "निरीक्षेत" इत्यत्र क्षकारमादाय वृत्त्यनुप्रासस्य चैकाश्रयेऽनुप्रवेशः (ढ) ।

एवञ्चात्रैवानुप्रासार्थापत्त्यलङ्कारयोः (ण) ।

(त) अत्रेति । उपमायाः साधकतेति । प्रागुक्तरीत्या वदनस्य प्राधान्यप्रतिपादनार्थमुपमितसमासस्यैवाश्रयणीयत्वादिति भावः । असम्भवात् लोचनस्येति सम्बन्धः ।

(ट) प्रकारान्तरेण विशेषस्यैव साधकबाधकतायां दर्शयति सुन्दरमिति । सामान्याप्रयोगे साधारणधर्म्मानुल्लेखे सति व्याघ्रादिभिः परपदैः सह उपमितं पूर्वपदं समस्यत इति सूत्रार्थः । न सम्भवतीति । उदाहृते सुन्दरमिति सामान्यधर्म्मप्रयोगादिति भावः । इति हेतोः, उपमाया बाधकः, सुन्दरमिति सौन्दर्य्यरूपसामान्यधर्म्मप्रयोग इति शेषः । एवञ्च उपमासमासासम्भवे च ।

(ठ) इदानीमवशिष्टमेकाश्रयस्थितिरूपं सङ्करमुदाहर्त्तुमाह एकेति । एकस्मिन्नाश्रये पादरूपे पदरूपे वा स्थाने अनुप्रवेशः अनेकशब्दालङ्कारस्य अनेकार्थालङ्कारस्य अनेकशब्दार्थालङ्कारस्य वा समावेशः ।

(ड) कटाक्षेणेति । काञ्चित् किशोरीं कुमारीमवलोक्य कस्यचित् साभिलाषोक्तिरियम् । सा नायिका यदि क्षणमपि कटाक्षेणापि ईषदपि निरीक्षेत मां पश्येत्, तदा सान्द्रो निविड़ः, तथा पिहिता आवृता अशेषाः सकला विषया येन स तथाविधः सर्वविषयवर्त्तीत्यर्थः, आनन्दः स्फुरति चित्ते प्रकाशते । किन्तु अम्भोरुहे पद्मे इव दृशौ चक्षुषी यस्यास्तस्याः, सरोमाञ्चौ कामवेशात् सपुलकौ, अतएव उदञ्चन्तौ बाहुल्येनोन्नतीभवन्तौ यौ कुचकलसौ ताभ्यां निर्भिन्नमुदीर्णं ततो निपतितं वा वसनं यस्मिन् स तादृशः, परीरम्भारम्भ आलिङ्गनारम्भः, क इव भविता तन्न जाने इत्यर्थः । अनिर्वचनीयानन्ददायको भविष्यतीति भावः ।

(ढ) अत्रेति । छेकानुप्रासस्येति । ककारषकारघटितक्षकारस्य स्वरूपतः क्रमतश्च सकृत्साम्यादित्याशयः । इत्यत्र स्थितमिति शेषः । वृत्त्यनुप्रासस्य चेति । तृतीयक्षकारग्रहणे क्षकाराणां बहुतया स्वरूपतः, क्रमतश्च असकृत्साम्येन "असकृदप्यनेकधा" इति लक्षणसङ्गतेरिति भावः । चतुर्थचरणेऽप्येवमेव सङ्करः समुन्नेयः ।

यथा वा—(त) "संसारध्वान्तविध्वंस—" इत्यत्र रूपकानुप्रासयोः। (थ)

यथा वा—(द) "कुरवका रवकारणतां ययुः" इत्यत्र "रवका रवका" इत्येकम्, "वकार वकार" इत्येकमिति यमकयोः (ध)।

यथा वा—(न)

"अहिणअपओअरसिएसु पहिअसामाइएसु दिअहेसु।
सोहइ (१) पसारिअगीआणं णच्चिअं मोरविन्दाणं॥" (प)

अत्र "पहिअसामाइएसु" इत्येकाश्रये पथिकश्यामायितेषूपमा, पथिकसामाजिकेष्विति रूपकं प्रविष्टमिति (२) (फ)।

(ण) एवञ्चेति। अपि चेत्यर्थः। अनुप्रासः प्रदर्शितप्रकारच्छेकानुप्रासवृत्त्यनुप्रासात्मकः, अर्थापत्तिश्च "पूर्वं दृष्ट्या दर्शने का कथा कटाक्षेणापि" "अधिकदर्शने का कथा ईषदपि" "बहुकालं यावद्दर्शने वा कथा क्षणमपि" इत्येवंरूपवितयात्मिका तयोः, एकाश्रयेऽनुप्रवेश इति पूर्वेण सम्बन्धः।

(त) एकपदरूपे काश्रये विजातीयानेकालङ्कारानुप्रवेशं दर्शयितुमाह यथा वेति।

(थ) संसारेति। अत्र रूपकं निरङ्गकेवलरूपकम्, अनुप्रासश्च छेकाख्यः एकाश्रये अनुप्रवेश इति पूर्वेण सम्बन्धः। एवञ्च ईदृशेन सङ्करेणापि सह "पायादपायात्" अत्र स्थितस्य यमकस्य संसृष्टिरित्यवधेयम्।

(द) एकपादरूपे काश्रये सजातीयानेकालङ्कारानुप्रवेशमुदाहर्तुमाह यथा वेति।

(ध) कुरवका इति। "विरचिता मधुनोपवनश्रियामभिनवा इव पत्रविशेषकाः। मधुलिहां मधुदानविशारदाः—" इति माघे प्रथमचरणद्वयम्। मधुना वसन्तकालेन विरचिता उत्पादिताः, उपवनश्रियामुद्यानलक्ष्मीणाम्, पत्रविशेषकाः पत्रावलीतिलका इव मधुदाने मकरन्दवितरणे विशारदा दक्षाः, कुरवकाः कुसुमविशेषाः, मधुलिहां भ्रमराणाम्, रवकारणतां गुञ्जनहेतुतां ययुः प्रापुः। इत्येकं यमकमिति शेषः। एवं परत्रापि। यमकयोरेकाश्रये अनुप्रवेश इति पूर्वेणान्वयः।

(न) एकपदरूपे काश्रये अनेकार्थालङ्कारानुप्रवेशं दर्शयितुमाह पुनर्यथा वेति।

(प) अहिणअ इति। "अभिनवपयोदरसितेषु पथिकश्यामायितेषु (पथिकसामाजिकेषु) दिवसेषु। मद्रति प्रसारितग्रीवाणां नृत्यं मयूरवृन्दानाम्॥" इति संस्कृतानुवादः। गाथासप्तशतीस्थमिदं पद्यम्। अभिनवानां पयोदानां मेघानां रसितानि गर्जितानि येषु तेषु, पथिका विदेशवासिनः प्रियाविरहिण इत्यर्थः। श्यामायिताः कामवेदनया श्यामाङ्गवदाचरिता येषु तेषु पथिकसामाजिकेषु इति पक्षे तु पथिका एव सामाजिकाः सभ्या नित्यदर्शिनो येषु तेषु, दिवसेषु वर्षाकालीनदिनेषु, प्रसारिता लम्बीकृता ग्रीवा यैस्तेषां मयूरवृन्दानाम्, नृत्यं कर्त्तृ, मद्रति मह उत्सव इवाचरति।

(फ) अत्रेति। उपमा कथङ्गतेत्यर्थः। रूपकाच्च निरङ्गकेवलरूपं पर्यालोचने तु "पथिकसामाइ-

---

(१) रहइ इति क्वचित् पाठः। (२) क्वचित् इतिशब्दो नास्ति।

श्रीचन्द्रशेखरमहाकविचन्द्रसूनु-
श्रीविश्वनाथकविराजकृतं प्रबन्धम् ।
साहित्यदर्पणममुं सुधियो विलोक्य
साहित्यतत्त्वमखिलं (१) सुखमेव वित्त ॥ (य)

यावत् प्रसन्नेन्दुनिभाननाश्रीर्नारायणस्याङ्कमलङ्करोति ।
तावन्मनः सम्मदयन् कवीनामेष प्रबन्धः प्रथितोऽस्तु लोके ॥ (भ)

इति श्रीमन्नारायणचरणारविन्दमधुव्रत-साहित्यार्णवकर्णधार-
ध्वनिप्रस्थापन-परमाचार्य्य-कविसूक्तिरत्नाकराष्टादशभाषा-
वारविलासिनीभुजङ्ग-सान्धिविग्रहिक-महापात्र-
श्रीविश्वनाथकविराजकृतौ साहित्यदर्पणे
दशमः परिच्छेदः ॥०॥ (म)

—००—

एसु" इत्यत्र पथिकाः श्यामायिता येषु इत्यनुवादः ? उत पथिका एव सामाजिका येषु इत्यनुवाद इत्येवमनुवाद-सन्देहेनैव उपमारूपकयोः सन्देहात् सन्देहसङ्कर एव युक्त इत्यवधेयम् । तेन "राजहंसगतिप्रापिपद-पद्मेयमागता" इत्युदाहरणं द्रष्टव्यम् । अत्र हि "राजहंसगतिप्रापिपदपद्मा" इत्येकपदरूपे कार्य्ये निदर्शनालुप्तोपमारूपयोरर्थालङ्कारयोरनुप्रवेशः ।

(य) ग्रन्थं समाप्येदानीमात्मपरिचयप्रदानपूर्वकं ग्रन्थस्य पूर्णतां सूचयितुमाह श्रीचन्द्रेति । हे सुधियः ! पण्डिताः ! यूयम्, श्रीचन्द्रशेखरो नाम महाकविषु चन्द्र इव तस्य महाकविषु श्रेष्ठस्य श्रीचन्द्रशेखर-स्येत्यर्थः सूनुः पुत्रो यः श्रीविश्वनाथो नाम कविराजः कवीनां मध्ये श्रेष्ठ इति तात्पर्य्यम्, तेन कृतम्, साहित्य-दर्पणं नाम अमुं प्रबध्यत इति प्रबन्धो ग्रन्थस्तम्, विलोक्य आद्योपान्तं समालोच्य, सुखमेव विस्पष्टत्वादनायास-मेव यथा स्यात्तथा, अखिलं सकलं साहित्यस्य काव्यस्य तत्त्वं स्वरूपं ज्ञातव्यविषयमित्यर्थः वित्त जानीत । एतेनास्मिन् ग्रन्थे काव्यस्य ज्ञातव्यविषयाः सर्व एव निबद्धा इति ग्रन्थान्तरापेक्षया अस्य पूर्णतया प्राधान्यं द्योतितम् । हन्त ! पूर्णः खलु ग्रन्थः, किन्तु स्वकीयस्थानसमयादिपरिचयप्रदानादपूर्ण एव चिरमितिहास-लिप्सूनामाकाङ्क्षा ।

(भ) पर्य्यवसाने परमेष्टदेवतास्मरणेन भङ्ग्या तदन्तिक एव स्वनिर्मितग्रन्थस्य चिरस्थायितां प्रार्थयते यावदिति । प्रसन्नेन्दुनिभं निर्म्मलचन्द्रतुल्यमाननं यस्याः सा तादृशी श्रीर्लक्ष्मीः, यावत् नारायणस्य अङ्कमलङ्करोति अवस्थानेन शोभयति तावत् कालमेव एष प्रबन्धः, कवीनां मनः सम्मदयन् जिज्ञासितविषय-ज्ञापनेन सन्तोषयन् सन्, लोके प्रथितः प्रसिद्धः अस्तु ।

(म) इतीति । प्रथमपरिच्छेद एवैष सन्दर्भो यथायथं विवृत इति ।

(१) साहित्यतत्त्वमखिलमित्यपि पाठः ।

विरोधिविद्वेषविवर्जनान्न मे न वाऽस्ति दुःखं खलदूषणात् खलु ।
विषान्तिके हन्त ! सुधा सुधायते न कम्पयेत् कम्पति वा कपिर्मुखम् ॥१॥
सुधीधुरीणैन विविच्य चेत् कृता तिरस्कृतिः सैव भवेत् पुरस्कृतिः ।
तनोति दाही दहनस्य काञ्चने सुसञ्चितां काञ्चिदपूर्वचारुताम् ॥२॥

जानकीविक्रमं नाम नाटकं वीररौद्रवत् ।
नाटिकामुज्ज्वलरसां श्रीविराजसरोजिनीम् ॥३॥
वियोगवैभवाख्यानं खण्डकाव्यमनन्तरम् ।
नानावन्धं महाकाव्यं रुक्मिणीहरणाभिधम् ॥४॥
स्मृतिचिन्तामणिं नाम सं चिन्नस्मृतिसंग्रहम् ।
उत्तररामचरित-टीकां सर्वार्थबोधिनीम् ॥५॥
मालविकाग्निमित्रस्य मालतीमाधवस्य च ।
कादम्बरीकथायाश्च टीकां कल्पलताभिधाम् ॥६॥
श्रीवङ्गीयप्रतापाख्यं नाटकं बहुगौरवम् ।
कृत्वा कुर्वन् गद्यकाव्यमपूर्वं सरलाभिधम् ॥७॥

कोटालिपाड़ीनगियानिवासी नदीपुरेशस्य सभाप्रवासी ।
सत्काव्यपोऽध्यापनमुख्यकर्मा व्यधादिमां श्रीहरिदासशर्मा ॥८॥
ख-देव-वह्निन्दुमिते शकाब्दे सूर्ये धनुःस्थे दशमे बुधेऽह्नि ।
वङ्गेषु रामा प्रतिमा नमेयं समाप्तिमाप्ता गिरिजाप्रसादात् ॥९॥
रसिकाधिकदृष्टिहारिणी सुषमा सौरभलोभदायिनी ।
कुसुमप्रतिमाऽत्र दर्पणे चिरलग्ना विबुधैर्विलोक्यताम् ॥१०॥

इति गङ्गाधरविद्यालङ्कारभट्टाचार्यात्मज-महामहोपाध्याय-भारताचार्य-श्रीहरिदास-
सिद्धान्तवागीशभट्टाचार्यविरचितायां साहित्यदर्पणटीकायां
कुसुमप्रतिमायां दशमः परिच्छेदः ॥०॥

—oo—

समाप्तश्चायं ग्रन्थः ।

महामहोपाध्याय-महाकवि-भारताचार्य्य-

श्रीयुतहरिदाससिद्धान्तवागीशमहाशयप्रणीत-

ग्रन्थावली ।

——०——

मुद्रिता ग्रन्था: ।

—:००:—

१। स्मृतिचिन्तामणि: (চতুর্থবার: সংস্কৃত:) মূল্যং ৩৲ মাশুলাদি ॥৶০

२। रुक्मिणीहरणम् (महाकाव्यम्, तृतीयवारं संस्कृतम्, काव्य-मध्यपरीक्षायां पाठ्यम) मूल्यं २॥० माशुलादि ॥৶৴

३। विराजसरोजिनी (नाटिका) मूल्यं १৲ माशुलादि ॥०৴

४। वङ्गीयप्रतापम् (नाटकम्, प्रतापादित्यचरित्रविषयम्, असकृदभिनीतम्, अभिनयोपयोगि, चमत्कारि च)। मूल्यं २৲ माशुलादि ॥०

৫। যুধিষ্ঠিরের সময় (২য় সংস্করণ) মূল্য ।০ আনা

৬। বিধবার অনুকল্প (২য় সংস্করণ) মূল্য ৶০ আনা

——(:०:)——

मुद्रापणीया ग्रन्था: ।

——०:०——

७। वियोगवैभवम् (खण्डकाव्यम्)

८। शङ्करसम्भवम् (खण्डकाव्यम्)

९। सरला (गद्यकाव्यम्)

१०। कंसवधम् (नाटकम्)

११। जानकीविक्रमम् (नाटकम्)

१२। मिवारप्रतापम् (नाटकम्)

१३। वैदिकवादमीमांसा (इतिहास:)

पाठ्या अपरे मुद्रिता ग्रन्था: पत्रान्तरे द्रष्टव्या: ।

श्रीहेमचन्द्रकाव्यव्याकरणपुराणतीर्थ: । ४१ देवलेन, कलिकाता ।